न्यायवार्त्तिकस्य

भूमिका।

वाराणसीस्थराजकीयसंस्कृतपाठशालीय-
पुस्तकालयाध्यक्षेण
विन्ध्येश्वरीप्रसादद्विवेदिना
सङ्कलिता।

वाराणस्याम्।

सेठ-श्रीहरिदासगुप्तपुत्रेण चौखंबासंस्कृतसीरीज-
काशीसंस्कृतसीरीजाद्यनेकपुस्तकप्रकाशकेन
सेठ-श्रीजयकृष्णदासेन विद्याविलासयन्त्रे
मुद्रिता।

सन १९१६ इशवीये

ॐ नमः परमात्मने ।

न्यायवार्त्तिकस्य

भूमिका ।

—:०:—

विश्वनाथन्यायपञ्चाननो गोतमसूत्रवृत्तौ प्रमाणप्रमेयेत्यादिप्रथमसूत्रव्याख्याने "अत्र वार्त्तिकं यदि वादे देशनीयत्वात् पृथगभिधानं तदा न्यूनाधिकापसिद्धान्तानां वादे देशनीयत्वात् पृथगभिधानं स्यात्"(१) इत्युक्तवन्तः । शङ्करमिश्रेण वैशेषिकसूत्रोपस्कारे २अध्याये २ आह्निके सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशय इति १७ सूत्रव्याख्याने "न्यायवार्त्तिकेऽपि यत् कारणभेदेन संशये त्रित्वमुक्तं तदपि न सम्भवति व्यभिचारेण समानधर्मादीनां त्रयाणां कारणत्वस्यैवासम्भवात्"(२) इत्युक्तम् । श्रीधराचार्येण न्यायकन्दल्यां पृथिवीनिरूपणे "यथाहोद्द्योतकरः समानासमानजातीयव्यवच्छेदो लक्षणार्थः"(३) इत्युक्तम् । वर्द्धमानोपाध्यायेन द्रव्यकिरणावलीप्रकाशे "तस्य संस्कारात् कालाद्वा विनाश इति वार्त्तिकविरोधाच्च" इत्युक्तम् । षड्दर्शनटीकाकृद्वाचस्पतिमिश्रेणापि "प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्या-

(१) अस्मिन्नेव मुद्रिते न्यायवार्त्तिकपुस्तके पृ०१९ प०९ द्रष्टव्यम् ।
(२) " " पृ० ९९ प० १४ "
(३) " " पृ० २८ प० १० "

तम्"(१) इतिकारिकाव्याख्यायां सांख्यतत्त्वकौमुद्यां "सर्वं चैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटीकायां व्युत्पादितं नेहोक्तं विस्तरभया"दित्युक्तम् । चित्सुखाचार्येण तत्त्वप्रदीपिकायां (चित्सुख्यां) द्वितीयपरिच्छेदे "वाचको गवयस्याय"मिति ३१ कारिकाव्याख्यायां "तथा च भगवदक्षपादप्रणीतं सूत्रम् प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति । व्याख्यातं चैतदुद्द्योतकरेण वार्त्तिककृता आगमाहितसंस्कारस्मृत्यपेक्षं सादृश्यज्ञानमुपमानमिति"(२) इत्युक्तम् । एवमनेकेषु न्याय–वैशेषिक–सांख्य–वेदान्तग्रन्थेषु न्यायवार्त्तिकस्य तथा तट्टीकायाश्च नाम दृष्ट्वा उद्द्योतकराचार्यकृतं न्यायवार्त्तिकनामानं महानिबन्धं मनसि विज्ञाय पण्डितवृद्धेभ्यो न्यायदर्शनवात्स्यायनभाष्यस्य पठनपाठनयोः परमोपयोगित्वं तस्य निशम्य तदन्वेषणेऽहं प्रवृत्तः । किन्तु "न्यायवार्त्तिकस्य विनष्टप्रायत्वात् तल्लाभेऽनेके महापण्डिताश्चिरादेव विफलप्रयत्ना अभूवं(३)स्तत्र किं साध्यं भविष्यतीति" नैयायिकवृद्धैर्निरुत्साहितोऽप्यहम्

---

(१) पञ्चमी कारिका ।

(२) अस्मिन्नेव मुद्रिते न्यायवार्त्तिकपुस्तके पृ०५७ प०२१ द्रष्टव्यम् ।

(३)न्यायवार्त्तिकस्य दुर्लभत्वे खण्डश उपलब्धत्वे वा वक्ष्यमाणा लेखा वर्तन्ते ।

A contribution towards an index to the Bibliography of the Indian Philosophical systems by Fitzdward Hall, M.A., page 20, III. Nyăya–Vârttika–Tâtparya–Parisuddhi, also called Nyăya–nibandha. This is probably an emendation of Pakshila Svâmin's Vârttika or Supplement to No. I. Dínnága, whom Văchaspati Misra names with censure: he was another ancient expositor of

"उद्योगेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥"

इत्यनुसरन् न्यायवार्त्तिकं स्मरन् कतिपयवर्षानन्तरमेकस्य ब्राह्मणस्य गृहेऽहं भोजनार्थमाहूतो ब्राह्मणानां पङ्क्तौ उपविष्टस्तत्रैकस्य महावातायनस्य मध्ये याथातथ्येन जीर्णवस्त्रेण वेष्टितानि धूलीधूसराणि ऊर्णनाभादिभिराच्छादितानि अनेकानि पुस्तकपुटकानि प्रवेशितानि दृष्ट्वा तेषां निष्कासने प्रवृत्तो गृहपतिना वृद्धेन

---

the logical institutes. The writings of both have, perhaps, perished. Complete copies of the work in question may be forthcoming; but I have never seen one. Its author is Udayana Âchărya, who is also called Uddyotakara Âchărya and Udayakara Âchărya. He was of the gotra of Bharadwăja. F. E. H.

The Kusumănjali edited and translated by E. B. Cowell, preface page vi, III–The Nyăya–Vărttika, a commentary on No. II. by Uddyotakara Âchărya. I procured lately, from a pandit of Nuddea, a fragment of this work containing a portion of the first book.

A classified index of the Sanskrit MSS in the palace at Tanjore by A. C. Burnell, p. 113; these are all precisely similar recent transcripts made at Benares by several persons about 1820. As the work is exceedingly rare, it is much to be regretted that these MSS. are so incorrect as to be useless. Whole lines are quite unintelligible, and some of the copyists seem to have been perfectly ignorant of even the form of the letters.

See Catalogus Catalogorum by Theodor Aufrecht printed in 1891–1903, part I, p. 311; pt. II, p. 68; pt. III, p. 66.

ब्राह्मणेन "मा स्पृश मा स्पृश मार्जारगमनागमननिरोधार्थं स्थापितानीमानि पुस्तकानि भोजनकाले मार्जार आगमिष्यति कीदृशस्त्वं बालकवच्चञ्चलः सर्वमन्नपानादिकं मार्जारेण भ्रंशयिष्यसि" इत्यादिभिरनेकैर्भर्त्सनैरपमानितो निवारितोऽप्यहं विलम्बेन भोजनं करिष्यामीति ब्रुवन् तत्र स्थितानि कतिपयपुस्तकपुटकानि समाकृष्टवान्। तेष्वेकस्मिन् पुटके न्यायवार्त्तिकस्य प्रथमाध्यायस्य त्रिसूत्रीप्रकरणं प्रमाणप्रकरणं(१) द्वितीयतृतीयावध्यायौ च सम्पूर्णौ(२) लब्धवान् । ततश्चास्मद्गुरुवरम-

---

(१) पुस्तकमिदं देवनागराक्षरैः कागजाख्याधारे लिखितं परिशुद्धं च । पेशवामहाराजसभासदा नैयायिकप्रवरेण श्रीमेरुशास्त्रिणा लिखितेन वाराणसीस्थेन न्यायदर्शनवात्स्यायनभाष्यपुस्तकेन संवादादिदं वार्त्तिकपुस्तकमपि तेनैव पण्डितेन लिखितमित्यनुमीयते । अस्यैव पुस्तकस्य प्रथमपत्रे निरङ्कपृष्ठे ।

प्र० २८००
द्वि० २३००
तृ० १६००
च० ११००
प० ४३५
―――
८२३५

इति लेखदर्शनात् संपूर्णस्य वार्त्तिकग्रन्थस्य संख्यावगता । "प्र० २८००" इत्यनेन प्रथमाध्याये श्लोकसंख्या "द्वि० २३००" इत्यनेन द्वितीयाध्याये श्लोकसंख्या एवंरीत्याग्रेऽपि बोध्या ।

(२) अयं द्वितीयाध्यायो देवनागराक्षरैः कागजाख्याधारे लिखितोऽशुद्धश्च । अत्र लेखकेन लिपिकाल एवंरूपेण लिखितः ।

"इत्याचार्यश्रीउद्द्योतकरकृतौ द्वितीयोऽध्यायः समाप्तः ॥ शुभमस्तु ॥ संवत् १६०० शाके १४६५ विरोधकृत् नाम संवत्सरे पुस्तक लिषि(खि)तं वाराणसीमध्ये लिषा(खा)यितं ब्राह्मण लि-

द्गामहोपाध्यायश्रीद्मत्कैलासचन्द्रभट्टाचार्यशिरोमणिभिर्दत्तं प्रथमाध्यायत्रिसूत्रीवार्त्तिकपुस्तकम् तत्प्राप्त्या चात्यन्तं हर्षितः । ततश्च क्रमशोऽन्वेषणे कृते चिरेण मिथिलादेशस्थझोपाख्यपण्डितश्रीचण्डीश्वरसकाशात् प्रमेयप्रकरणमारभ्य प्रथमाध्यायसमाप्त्यन्तं पुस्तक(१)मुपलब्धवान् । इत्थमध्यायत्रये सम्पन्ने वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमानं तृतीयचतुर्थाध्यायपुस्तकं(२) ततश्च स्वर्गनिवासिनां भूतपूर्ववाराणसीभूषणभूतानां श्रीविभवरामपण्डितानां पुरातनं पञ्चमाध्यायपुस्तक(३)मथ च वाराणसीस्थितेन श्रीहरिनामदास-

---

षि(खि)तं धर्म्मदासकायस्थ मासमाघवदि एकादशी ॥ श्रीविश्वेश्वरस्थानात् ॥ श्रि(शेर)साहि आलमराज्ये प्रवर्तमाने ॥"

तृतीयाध्यायोऽपि तथैव लिखितो जीर्णत्वाद्याकारेणानुमीयते यद्वर्षत्रिशत्याः पूर्वं लिखितो भवेदिति ।

(१) पुस्तकमिदं मैथिलाक्षरैस्तेडेतपत्रेषु लिखितं पुरातनं जीर्णं कृमिस्पृष्टं प्रायः शुद्धं च । अन्ते लेखकेन "पुस्तकमिदं महोपाध्यायश्रीभवानन्दभट्टाचार्याणाम्" इति लिखितत्वात् कस्यचित्पण्डितस्य पुस्तकमिदमित्यवगम्यते । तेडेतपत्राणि तालपत्रेभ्यो भिन्नानि समीचीनान्यपि भवन्ति । तेडेतफलं च सुदृढं कृष्णवर्णं भाषायां वज्रवट्टू इति प्रसिद्धं दृष्टिदोषनिवारणार्थं बालकैर्धार्यते ।

(२) इदमपि मैथिलाक्षरैः कागजाख्याधारे लिखितं परिशुद्धं जीर्णम् । अत्र यद्यपि लिपिकालो न लिखितस्तथापि जीर्णत्वाद्याकारेण तत्सम्बद्धन्यायनिबन्धप्रकाशपुस्तकेन ल० सं० ४५६ (लक्ष्मणसेनसंवत्सर) लिखितेन चानुमीयते तस्मिन्नेव समये लिखितं भवेदिति ।

(३) देवनागराक्षरैः कागजाख्याधारेषु लिखितं "१६०० विक्रमीये संवत्सरे लिखितमिति" तत्र लिपिकालो लिखितो लेखकेन ।

साधुना कृपया प्रदत्तं नवीनं प्रथमाध्यायपुस्तकं(१) च प्राप्य पञ्चाध्याय्यात्मकं सम्पूर्णं न्यायवार्त्तिकं सङ्कलय्य(२) तमानन्दमविन्दं यो वचसामगोचरः ।

"लाभाल्लोभः प्रवर्द्धत" इति न्यायवार्त्तिकलाभात् न्यायवार्त्तिकतात्पर्यटीकाया अप्यन्वेषणे कृतेऽस्या अपि त्रीणि पुस्तकानि(३) प्राप्तानि । ततश्च क्रमशो न्यायवार्त्तिकतात्पर्यटीकाया अपि व्याख्यानमुदयनाचार्यकृतं न्यायवार्त्तिकतात्पर्यपरिशुद्ध्याख्य(४)मस्यापि व्याख्यानं श्रीगङ्गेशोपा-

---

(१) इदमशुद्धं नवीनमपि सन्दिग्धस्थले पाठापपाठनिश्चायकमत्यन्तमुपयोगि च ।

(२) एषु पञ्चस्वध्यायेषु "इति प्रमाणप्रकरणम्" "इति प्रमेयप्रकरण"मेवंरूपेण भिन्नान्येव प्रकरणानि आसन् तानि च वाचस्पतिमिश्रकृतन्यायसूचीनिबन्धानुसारेण एकत्र सङ्कलितानि कृत्वा ग्रन्थः सम्पूर्णीकृत इति । अयं च न्यायसूचीनिबन्धोऽप्यत्र मुद्रित एव विस्तरस्त्वग्रे वक्ष्यते ।

(३) प्रथमं पुस्तकं कागजाख्याधारे देवनागराक्षरैर्वाराणस्यां लिखितम् । तत्र लेखकेन लिपिकाल एवं लिखितः ।

"इति वाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमोऽध्यायः समाप्तः । ळ् ॥ ळ् ॥ ळ् ॥ स्वस्ति संवत्॥१४५४समये आश्विनवदि १० रविवासरे ॥ श्रीः ॥ ळ् ॥ ॐ नमो नारायणाय ॥ स्वस्ति ॥ ॥ काशी करोतु कल्याणं विश्वेशः सर्वसम्पदः" इत्यादि ।

द्वितीयं तु तेडतपत्रेषु मैथिलाक्षरैर्लिखितं तत्र लेखकेन लिपिकाल एवं लिखितः । "ल० सं० ४९७" (लक्ष्मणसेनसंवत्सरे)

तृतीयं कागजाख्याधारे देवनागराक्षरैर्लिखितं नवीनमशुद्धं च ।

ग्रन्थोऽयं श्लोकदशसाहस्रयात्मक इदानीं मुद्रित उपलभ्यते ।

(४) ग्रन्थोऽयं श्लोकद्वादशसाहस्र्यात्मकः । इदानीं वङ्गदेशस्थएसियाटिक्सोसाइटीसभाया निदेशेन श्रीवर्द्धमानोपाध्यायकृतटीकासहितो मुद्रितो भवतीति तद्विशेषवर्णनं तद्भूमिकायां द्रष्टव्यम् ।

ध्यायात्मजश्रीवर्द्धमानोपाध्यायविरचितं न्यायनिबन्धप्रकाशाख्य(१)मस्यापि व्याख्यानं श्रीबलभद्रमिश्रात्मजश्रीपद्मनाभमिश्रविरचितं वर्द्धमानेन्दुनामक(२)मस्यापि व्याख्यानं तात्पर्यमण्डनाभिधं श्रीशङ्कर(३)कृतं च प्राप्तम् । एतेषां प्राप्त्या परमप्रमुदितमना एते ग्रन्थाः सर्वेषामपि विद्यानुरागिणां सुलभा भवेयुरिति चिन्तयन् मुद्रणद्वारा प्रकाशने यतमानोऽहमतिष्ठम् ।

अत्रान्तरे न्यायवार्त्तिकमन्वेषयद्भिर्वाराणस्यां समागतैः कलिकातास्थगवर्नमेण्टसंस्कृतपाठशालाप्रधानाध्यक्षैर्महामहोपाध्यायैरिदानीं स्वर्गस्थैः श्रीमहेशचन्द्रन्यायरत्नभट्टाचार्य--सी. आई. ई. महाशयैरहं प्रोत्साहितो "यदेतेषां ग्रन्थानां मुद्रणं वङ्गदेशस्थएसियाटिक्सोसाइटीसभासमादेशेन यदि भवेत् तर्हि सर्वप्रकारेण समीचीनं भविष्यतीति" तत्र न्यायदर्शनवात्स्यायनभाष्यस्य पृथङ् मुद्रितत्वादिदानीं न्यायवार्त्तिकादीनां ग्रन्थानामपि पार्थक्येनैव मुद्रणं समुचितमिति निर्धारितं तैरेव महाशयैः । ततश्च मयानुमोदितेऽस्मिन्नर्थे उक्तमहाशयेषु कलिकातानगरे गतेषु उक्तसोसाइटीसम्पादकमहाशयानामपि समादेशपत्रे समागते न्यायवार्त्तिकमुद्रणारम्भो जात इति ।

---

(१) ग्रन्थोऽयं श्लोकविंशतिसाहस्रयात्मकः ।

(२) आरम्भप्रभृत्यात्मनिरूपणान्तस्य ग्रन्थस्य पुस्तकमस्मन्निकटे वर्ततेऽतः सम्पूर्णग्रन्थस्य श्लोकसंख्या इदानीं कर्तुं न शक्यते । अनेनैव पद्मनाभमिश्रेण किरणावलीप्रकाशोऽपि व्याख्यातस्तदपि व्याख्यानं वर्द्धमानेन्दुनामकं द्रव्यग्रन्थात्मकमस्मान्निकटे वर्तते तत्र श्लोकसंख्या ॥ ३०० ।

(३) अयं शङ्करमिश्रो वा शङ्करभट्टाचार्यो वेति निर्णयस्तन्मुद्रणावसरे भविष्यति ।

तत्र च सर्वेष्वप्युपलब्धन्यायवार्त्तिकादर्शपुस्तकेषु व्याख्येयत्वेन मूलत्वेन वा विन्यस्तानि न्यायसूत्राणि वार्त्तिकसंश्लिष्टानि न तु पार्थक्येन, मया तु जिज्ञासूनां सुबोधार्थं तत्र तत्रैव सर्वाणि न्यायसूत्राणि स्थूलाक्षरैः पार्थक्येन मुद्रणसमये विन्यस्तानीति विज्ञेयम् ।

अत्रादर्शपुस्तकेषु प्रथमद्वितीयाध्यायपुस्तकानि देवनागराक्षरलिखितपरमादर्शपुस्तकाद्देवनागराक्षरैर्लिखितानीति लेखकलिखितनामग्रामादिभ्योऽनुमीयते । अपराणि तृतीयचतुर्थाध्यायपुस्तकानि देवनागराक्षरैर्लिखितानि प्राचीनान्यपि मैथिलाक्षरलिखितपरमादर्शपुस्तकाद्देवनागराक्षरेष्ववतारितानि यतस्तेषु क्वचिद् रकारस्थाने वकारः क्वचिच्च वकारस्थाने रकार इत्यादिलेखोऽस्ति । अन्यानि प्रथमतृतीयचतुर्थाध्यायपुस्तकानि मैथिलाक्षरलिखितानि किन्तु प्राचीनत्वाज्जीर्णत्वाद्विलुप्ताक्षरत्वाच्च मैथिलानामपि दुष्पठानि ततः का कथा मादृशानामचिरपरिचितमैथिलाक्षराणाम् । एवं क्वचित् क्वचित् तात्पर्यटीकायामप्यव्याख्यातत्वाद् भ्रामकेष्वक्षरेषु अर्थानुसन्धानेनाक्षरान्तरविन्यासः क्वचित् सम्भवतीति भ्रान्तेः पुरुषधर्मत्वादिति तत् क्षन्तव्यं विद्वद्भिः परिश्रमवेत्तृभिरिति ।

मुद्रणसमयेऽस्मिन् पुस्तके पाठान्तरबोधनार्थं वाराणस्यां वृद्धब्राह्मणस्य गृहे प्राप्तं पुस्तकं प्रथमत्वेन मिथिलादेशस्थेन झोपाख्यपण्डितश्रीचण्डीश्वरशर्मणा दत्तं पुस्तकं द्वितीयत्वेन गुरुभिर्दत्तं पुस्तकं तृतीयत्वेन वाराणसीस्थराजकीयसंस्कृतपाठशालीयं चतुर्थत्वेन विभवरामपण्डितानां पुस्तकं पञ्चमत्वेन द्वितीयाध्यायमुद्रणसमये च महामहोपाध्यायश्रीगङ्गाधरशास्त्रि— सी. आई. ई. महाशयैर्वाराणसीस्थराजकीय-

संस्कृतपाठशालीयभूतपूर्वाध्यापकैः मदत्तं द्वितीयाध्यायपुस्तकं च षष्ठत्वेनाङ्कद्वारा सूचितम् ।

यद्यप्यस्य न्यायवार्त्तिकस्य टीका आचार्यवाचस्पतिमिश्रेण कृता तस्या अपि टीका उदयनाचार्येण कृता तस्या अपि टीका वर्द्धमानोपाध्यायेन कृता एवंरूपेण टीकापरम्पराशालिनोऽप्यस्य न्यायदर्शनरहस्यप्रकाशकस्य महानिबन्धस्य मुद्रणकार्यं महानैयायिकानामप्यसाध्यं किं पुनर्मादृशानामल्पज्ञानां तथापि चिरेणाननुभूतमहाश्रमेणोक्तरीत्या वार्त्तिकपुस्तकं सम्पूर्णं समाकलय्य यावच्छक्यं संशोध्य पाठान्तराणि च सन्निवेश्य सर्वसाधारणविद्यानुरागिणां सौलभ्यार्थमुक्तसोसाइटीसभानिदेशेन मुद्रितवानहमस्मि । अत्र गुणैकपक्षपातिनो नैयायिकप्रवराः सम्पूर्णं मुद्रितपुस्तकं समाधिगम्य दृष्टिपूतं कृत्वा मामकीनं परिश्रमं सफलयन्तु नैसर्गिकदयया अस्मद्दृष्टिदोषजा मुद्राप्रमादजा अशुद्धीः संशोधयन्त्विति च भूयोभूय एवाभ्यर्थये । अनेन कर्मणा प्रसीदतु सर्वान्तर्यामी श्रीपरमेश्वर इति ॥

अत्र वाराणसीस्थराजकीयसंस्कृतपाठशालाभूषणभूतैरिदानीं स्वर्गस्थैर्महामहोपाध्यायैस्तार्किकशिरोमणिभिरस्मद्गुरुवरैः श्रीद कैलासचन्द्रभट्टाचार्यमहाशयैरादर्शपुस्तकसम्पादनसाहाय्येन विषमस्थलव्याख्यानादिना च परममनुकम्पितोऽस्मि नोचेदस्य संस्करणं मम साध्यं कथमपि न भवेदिति ॥

यद्यपि कविभिः कल्पनया(१) शिष्यप्रशिष्यैश्च स्तु-

---

(१) यथा माधवीये शङ्करविजये ३ सर्गे । विष्णुः पद्मपादाचार्योऽभूत् । वायुर्हस्तामलकाचार्योऽभूत् । वायुरेव तोटकाचार्योऽभूत् । ब्रह्मा सुरेश्वराचार्योऽभूदेवमेवाऽनेके देवाः शङ्कराचा-

त्या(१) सम्प्रदायप्रवर्तकैश्चोत्कर्षख्यापनाय(२) अन्यैश्च साहसिकैः किंवदन्तीश्रवणादिना(३) अपरैश्च हेत्वाभासैर्भ्रमात्मकानुमाने-

र्येस्य चरणं सेवितुं ब्राह्मणपुत्रा अभूवन्निति निरूपितम् ।

अयं माधवश्च न वेदभाष्यकर्ता पूर्वोत्तरमीमांसाव्याख्याता पराशरस्मृत्यादिधर्मशास्त्रव्याख्याता सायनमाधवाचार्यः यतः पूर्वोक्तामाख्यायिकां प्रमाणोल्लेखरहितां स कथं लिखेत् । अपि च ९१३ शाकाब्दे निर्मितां न्यायकन्दलीं चित्सुखीग्रन्थे समुद्धृतवन्तं चित्सुखाचार्यं खण्डनखण्डखाद्यटीकाकारं श्रीहर्षादपि पश्चाद्भाविनं शङ्कराचार्यस्य शिष्यत्वेन च कथं लिखेत् । अपि च "वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे" इत्यादिमुद्राश्लोकानां शङ्करविजयेऽभावात् । यद्यपि मुद्राश्लोकः सर्वदर्शनसंग्रहेऽपि नास्ति तथापि "श्रीमत्सायनदुग्धाब्धिकौस्तुभेन महौजसे"त्यादिश्लोकदर्शनात् तस्य तत्कर्तृत्वं निर्विवादमेव ।

(१) गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ इत्यादि ।

(२) यथा रामानुजाचार्यो लक्ष्मणार्यापरनामधेयः फणिराजशेषस्यावतारः १२० वर्षाणि भूमौ स्थितो लोकोत्तराणि कार्याणि कृतवानित्यादिप्रपन्नामृतग्रन्थे रामानुजचरितनामधेये प्रतिपादितम् । मध्वाचार्यस्तु वायोरवतार इत्यादिमहाभारते भविष्यत्पर्वणि आर्यविद्यासुधाकरग्रन्थेऽपि । महाभारतस्य खिलो हरिवंशोऽस्यापि खिलो भविष्यत्पर्व अस्यापि खिलः कदाचिद् भवेत् ? वल्लभाचार्यस्तु अग्नेरवतार इत्यादिवल्लभदिग्विजयग्रन्थे । एवं नानकशाहस्य नानकचन्द्रोदयपुस्तके गोरखनाथस्य निरञ्जनपुराणे माहात्म्यम् । अनयैव रीत्या बहूनां निरूपणम् ।

(३) यथा भक्तमालाग्रन्थे १०८ भक्तानां चरितानि ।

मानसिंहः । हनूमान् । विभीषणः । शवरी । अजामिलः । जटायुः । अम्बरीषः । विदुरः । सुदामा । चन्द्रहासः । शिविः । उशीनरः । द्रौपदी । वाल्मीकिः । रुक्माङ्गदः । मयूरध्वजः । प्रह्लादः । निम्बादित्यः । श्रीमार्गः । रामानुजः । श्रीरङ्गः । श्रीकृष्ण-

न(१)बहूनां पुरुषाणामेकनाम्ना प्रसिद्ध्यापि नाममात्रेणैवा(२)र्वा-

दासः। अग्रदासामरसिंहौ। शङ्कराचार्यः। मण्डनमिश्रः। उद-यनाचार्यः। विठ्ठलेशः। नामदेवः। गीतगोविन्दकारजयदेवः। पद्मावती। श्रीधरस्वामी। विल्वमङ्गलः। पद्मकला। विष्णुशर्मा। ज्ञानदेवः। त्रिलोचनः। कुलशेखरः। रतिमतिः। द्युतिमान्। क-र्मावाई। राजकन्या। राजपुत्रः। वैश्यसाधुः। चतुर्भुजः। काम-धुक्। जयमल्लः। श्रीधरः। साक्षीगोपालः। रामदासः। नन्ददा-सः। आह्लदासः। रविदासः। कवीरदासः। पीपाजी। धनाभागवतः। रामराजः। सुखानन्दः। सुरसरित्। नरहरिः। माधवदासः। वृद्धा। परमानन्दः। श्रीकृष्णचैतन्यः। सूरदासः। हरिव्यासः। कृष्ण-दासः। विठ्ठलः। व्रजवल्लभः। रूपसतानतः। व्यासः। गोविन्दस्वामी। मुरारिः। सदनकसाई। लड्डूदासः। सत्याराशी। लम्पा। नरसी। मीरावाई। तुलसीदासः। परशुरामः। एवमन्येऽपि बहवो निरूपिताः।

एवमेव सन्तविलासग्रन्थेऽपि अनेके निरूपिताः।

(१) यथा केनचिन्निरूपितं "वराहमिहिराचार्यो भिल्लजातीयो वा कश्चित् शूद्र इति। उक्तं च वृहज्जातके।

आदित्यदासतनयस्तदवाप्तबोधः
काम्पिल्लके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्य यत्ना-
द्धोरां वराहमिहिरो रुचिरां व्यधत्त॥ इति।

अत्र आदित्यदासतनय इत्यत्र दासपदोपादानात्।"

वस्तुतस्तु भट्टोत्पलेन वृहज्जातकटीकायाम्।

"आदित्यदासाख्यो ब्राह्मणस्तस्य तनयः पुत्रः"

"चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे।
वस्वष्टाष्टमिते शाके ८८८ कृतेयं विवृतिर्मया॥"

इत्युक्तत्वाद् ब्राह्मण एव। अन्येऽपीदानींतना ब्राह्मणा राखा-लदासकालिदासादिनामानो वर्तन्ते।

(२) एके तु तर्कभाषाकर्तुः केशवमिश्रस्य समयनिर्णये प्रतिपा-दितवन्तः गोवर्धनेन तर्कभाषायाष्टीका रचितेति गोवर्धनसमयात् पूर्वकालभावी केशवः अपि च तर्कसंग्रहटीकापि न्यायबोधिनी

गोवर्धनेन कृता यथा।

"अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥"

इति टीकामुखदर्शनादवगम्यते गोवर्धनात् पूर्वकालवर्त्ती अन्नम्भट्टोऽपि तर्कसंग्रहकारः। "शृङ्गारोत्तमसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्द्धी कोऽपि न विश्रुतः" इति गीतगोविन्दे आदावेव दर्शनात् जयदेवसमयात् पूर्वकालवर्त्ती गोवर्द्धनाचार्यः।

"ख्यातो गोवर्धनाचार्य उमापतिधरस्तथा।
शरण्यो जयदेवश्च धोयी कविनृपः क्रमात् ॥
राज्ञो लक्ष्मणसेनस्य पञ्चरत्नानि संसदि ॥"

इत्यनेन लक्ष्मणसेनस्य राज्ञः समये १०१० शकाब्दे वा तदासन्ने समये जयदेवस्य स्थितिरिति निष्पन्नं भवति। श्रीरजनीकान्तगुप्तमहाशयेन जयदेवचरित्रपुस्तके १३०० शकाब्दे जयदेवस्य स्थितिरनुमिता ततोऽपि जयदेवात्पूर्वं गोवर्धनाचार्यस्ततोऽपि पूर्वं तर्कभाषातर्कसंग्रहकाराविति।

वस्तुतस्तु तर्कभाषाटीकारम्भे

"यस्तर्कभाषामनुभाषते स्म गोवर्धनस्तर्ककथासु धीरः।
तेनानवद्येन सुधांशुगौरी कीर्तिर्गुरूणाममृताधिकास्तु ॥
विजयश्रीतनूजन्मा गोवर्धन इति श्रुतः।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मितिम् ॥
श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा।
तनोति तर्कानधिगत्य सर्वान् श्रीपद्मनाभाद्विदुषो विनोदम् ॥"

इति दर्शनात् गोवर्धनः पद्मनाभमिश्रस्य भ्राता बलभद्रमिश्रस्य पुत्रः। पद्मनाभेन च किरणावलीभास्करे

"उपदिष्टा गुरुचरणैरस्पृष्टा वर्धमानेन।
किरणावल्यामर्थास्तन्यन्ते पद्मनाभेन ॥"

"यस्तर्कदुस्तरतरार्णवकर्णधारो
वेदान्तवर्त्मनिरताध्वगसार्थवाहः।
श्रीपद्मनाभरचितेन दिवाकरेण
तुष्टोऽमुनास्तु सुकृती बलभद्रमिश्रः ॥"

इत्युक्तत्वात् वर्धमानोपाध्यायादपि पश्चात्कालभावीत्यर्वाचीनः सः यत उदयनाचार्यं न्यायलीलावत्यां प्रमाणयति न्यायलीलावतीकारः सा च वर्द्धमानोपाध्यायेन व्याख्याता इति ॥

अपि च शुक्लयजुःसंहिताभाष्यकर्तुः महीधरस्य समयनिर्णये १८६९ ईसवीयवर्षे सप्तेम्बरमासे पण्डितपत्रे मुद्रितं जयचन्द्रप्रदत्ताम्रपत्रशासनस्थं "द्वात्रिंशदधिकद्वादशशतसंवत्सरे भाद्रे मासि शुक्लपक्षे त्रयोदश्यां तिथौ रविदिने अङ्कतोऽपि संवत् १२३२" इत्युपक्रम्य "महापण्डितश्रीमहीधरपौत्राय महामिश्रपण्डितश्रीहालेपुत्राय महापण्डितश्रीहृषीकेशशर्म्मणे ब्राह्मणाय" इत्युक्तं वचनमवलम्ब्य १२३२ संवत्सरात् पूर्वं महीधरस्य स्थितिर्निर्णीता।

वस्तुतस्तु शुक्लयजुःसंहिताभाष्यकर्त्रा महीधरेणात्मचरितमेवं लिखितम्।

"रसवेदाङ्गभू १६४६ वर्षे मास्यसे ? धवले दले।
त्रयोदश्यां रवेर्वारे वाराणस्यां महीधरः॥
श्रीरत्नेश्वरमिश्रस्य गुरोः केशवजन्मनः।
आज्ञया विवृतिं शौल्वीं भाष्यवृत्त्यनुसारिणीम्।
विदुषां सुखबोधाय व्यधाद्बुद्ध्यनुसारतः।
भाष्यं रामकृतां वृत्तिं तारावालोच्य ? तत्त्वतः॥
नीलकण्ठो रमानाथः सिताम्भश्चन्द्रशेखरः।
भैरवोऽथ कृपासिन्धुस्तेन तुष्यान्नृकेशरी॥
इति महीधरविरचिता शुल्बसूत्रवृत्तिः समाप्ता॥"

अत्र कदाचिद्बहूनां महीधराणां सम्भवोस्ति तथापि तत्कृतग्रन्थेषु मङ्गलश्लोकस्यैक्यात् संहिताभाष्ये आदावेव "भाष्यं विलोक्यौव्वटमाधवीयम्" इत्युक्त्वा च १३१३ शकाब्दे वर्तमानस्य माधवाचार्यस्य समयात् पश्चाद्भावी महीधर इति तु वज्रलेपायितम्।

एवं—ऋग्वेदीयसर्वानुक्रमे मेधातिथिः ऋषिः, मेधातिथिभट्टोपि मनुस्मृतिभाष्यकारः। श्रीवाचस्पतिमिश्रो भामत्यामन्ते "तस्मिन्महीपे महनीयकीर्त्तौ श्रीमन्नृगेऽकारि मया निबन्धः।" नृ-

चीनानामपि निबन्धकाराणां जीवनचरितस्य निरूपितत्वात् तथ्येनेयत्तया विवादरहितमर्वाचीनानां जीवनचरितं प्रायो नावगम्यते किं पुनश्चिरन्तनानां गोतम–कणाद–प्रभृतीनां महर्षीणामन्येषामपि ऋषिकल्पानामाचार्याणां तथापि यथोपलब्धं सप्रमाणमत्र निरूपयामि ॥

न्यायशास्त्रप्रणेतुर्भगवतो महर्षेर्गोतमस्य चरितम् ।

तत्र तावन्न्यायशास्त्रप्रणेता भगवान् महर्षिर्गोतमः(१) क-

गोपाख्यानं महाभारते अनुशासनपर्वणि ७० अध्याये श्रीमद्भागवतेऽपीत्यन्यो नृगनृपतिः । रामावतारसमये रावणो दशमुखः अपरोऽपि लक्ष्मणोत्सवग्रन्थकर्त्तुर्लक्ष्मणकायस्थस्य भ्राता रावण इति लक्ष्मणोत्सवग्रन्थे प्रथमोल्लासे वर्णितः । वैशेषिकसूत्रकर्त्ता कणादमहर्षिरपरोऽपि कणादभट्टाचार्यो भाषारत्नस्य कर्त्ता । मान्धाता महार्णवकर्मविपाकग्रन्थकारः अन्योऽपि मान्धाता महाभारते राजधर्मे ६४ अध्याये निरूपितः । एवमेव वहवो वर्तन्ते ।

(१) मन्त्रद्रष्टृत्वमृषित्वमिति सामान्यलक्षणं मन्त्रद्रष्टृत्वे सति महद्दर्शित्वं महर्षित्वं तथा च वक्ष्यमाणरीत्या ऋग्वेदादिसूक्त–द्रष्टृत्वात् तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादिशास्त्रकर्तृत्वेन महद्दर्शित्वाल्लक्षणसमन्वयः ।

महर्षिलक्षणं वायुपुराणे पूर्वार्द्धे ५९ अध्याये ।

"ऋषीत्येष गतौ धातुः श्रुतौ सत्ये तपस्यथ ।

एतत्सन्नियते तस्मिन् ब्रह्मणा स ऋषिः स्मृतः॥७९॥" इत्यादि ।

"यस्मान्न हन्यते मानैर्महान् परिगतः पुरः ।

यस्माद्दृषन्ति ये धीरा महान्तं सर्वतो गुणैः ॥

तस्मान्महर्षयः प्रोक्ता बुद्धेः परमदर्शिनः ॥ ८२ ॥"

विस्तरस्तु तत्रैवाथ मत्स्यपुराणे १४४ अध्याये ऽप्यनुसन्धेयः ।

स्मिन् काले कस्मिन देशे आविरासीदिति निर्णयस्तु दूरे गत-
स्तस्य नाम्न्येव विवादो वर्तते । स च गोतमो गौतमो वा ?
दृश्यते चानेकत्र गोतम इति बहुत्र च गौतम इति । किन्तु
नैषधचरिते १७ सर्गे ७५ श्लोकः ।

"मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम् ।
गोतमं तमवेत्यैव यथा वित्थ तथैव सः(१) ॥" इति
महापण्डितेन लोकोत्तरविद्यावैभवशालिना श्रीहर्षेणोक्त-
त्वात्(२) ।

न्यायसूत्रवृत्तावप्यन्ते ।

ऋषिलक्षणं तेषां चातुर्विध्यमुक्तं सम्प्रदायविद्भिः । यथा
"ऋषीणाम् ऋषिपुत्राणामृषिकाणां स्वयम्भुवाम् ।
तथा नामाभिजानीयाद्यथैषां मन्त्रदृष्टयः ॥
प्रवरेर्थे समाख्याता ऋषयस्ते इति श्रुतिः ।
तत्पुत्रपौत्रनप्तार ऋषिपुत्रा इति स्मृताः ॥
राजन्यवैश्या ऋषिकास्त्रियस्तास्तिर्यग्योनयः ।
देवादेवाप्सरोनद्यो गन्धर्वास्ते स्वयम्भुवः ॥" इति ।

(१) यः सचेतसां चैतन्यवतां सुखदुःखाद्यनुभवाभावात् शि-
लात्वाय पाषाणावस्थारूपायै मुक्तये मुक्तिं प्रतिपादयितुं शास्त्रमूचे
न्यायदर्शनं निर्ममे यूयं तं स्वयमेव अवेत्य विचार्यैव गोतमम् एत-
न्नामानं मुनिं यथा वित्थ जानीथ स एव तथा नान्य इत्यर्थः ।
स गोतमः यथा युष्माकं संमतस्तथा ममापीत्यर्थः । नायं
परं नाम्ना गोतमः किं तु प्रकृष्टो गौर्गोतमो महावृषभः पशुरेव । इति
भगीरथादयष्टीकाकाराः ।

(२) श्रीहर्षेण स्वकपोलकल्पनया नोक्तमिदं किन्तु चार्वाको-
क्तिरेवाक्षरशोऽनूदिता । चार्वाकस्य कथा तु महाभारते शान्तिप-
र्वणि राजधर्मे ३८ । ३९ अध्याये विस्तरेण वर्तते । यथा
"वैशम्पायन उवाच ।
ततस्तत्र तु राजानं तिष्ठन्तं भ्रातृभिः सह ।

उवाच देवकीपुत्रः सर्वदर्शी जनार्दनः ॥
वासुदेव उवाच ।
ब्राह्मणास्तात लोकेऽस्मिन् अर्चनीयाः सदा मम ।
एते भूमिचरा देवा वाग्विषाः सुप्रसादकाः ॥
पुरा कृतयुगे राजंश्चार्वाको नाम राक्षसः ।
तपस्तेपे महाबाहो बदर्यां बहुवार्षिकम् ॥
वरेण छन्द्यमानश्च ब्रह्मणा च पुनः पुनः ।
अभयं सर्वभूतेभ्यो वरयामास भारत ॥
द्विजावमानादन्यत्र प्रादाद्वरमनुत्तमम् ।
अभयं सर्वभूतेभ्यो ददौ तस्मै जगत्पतिः ॥
स तु लब्धवरः पापो देवानमितविक्रमः ।
राक्षसस्तापयामास तीव्रकर्मा महाबलः ॥" इत्युपक्रम्य
"स एव निहतः शेते ब्रह्मदण्डेन राक्षसः ।
चार्वाको नृपतिश्रेष्ठ माशुचो भरतर्षभ ॥" इत्युक्तम् ।

अत्र केचित् बृहस्पतिशिष्य एकश्चार्वाको दुर्योधनसखः (धूर्तः) राक्षसश्चार्वाकोऽपर इति चार्वाकद्वयं निर्मूलं कल्पयन्ति । तथात्वेऽपि वेदादिनिन्दकस्य न्यायकर्तृगोतमनिरूपकस्य चार्वाकस्य नलकथा-प्रसङ्गे निरूपणान्महाभारतेऽस्य निरूपणं नासम्भवीति मन्तव्यम् ।

अपि च शान्तिपर्वणि मोक्षधर्मे १८६ अध्याये । भारद्वाज उवाच ।
"यदि प्राणयते वायुर्वायुरेव विचेष्टते ।
श्वसित्याभाषते चैवं तस्माज्जीवो निरर्थकः ॥"

अत्र नीलकण्ठटीकाकारः । नित्यं समिध्यत इति जीवस्यानौ-पाधिकं रूपं दीप्यत इत्युक्तं तल्लोकायतमतं स्थित्वा आक्षिपति । यदीति । एवमेव २१८ अध्याये २३ तमे श्लोके लोकायतमतसञ्चारः कृतः "दृश्यमाने विनाशे च प्रत्यक्षे लोकसाक्षिके" इत्यादिना ।

चार्वाकः चारुः लोकसम्मतो वाको वाक्यं यस्य पृषोदरादित्वात् साधुः । "अत एव तस्य चार्वाकमतस्य लोकायतमित्यन्वर्थपरं नाम-धेय"मिति सर्वदर्शनसंग्रहे चार्वाकदर्शने माधवाचार्येणोक्तत्वात् चार्वाको लौकायतिकश्चैक एवेति ।

अपरे तु "अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् ।

"एषा मुनिप्रवरगोतमसूत्रवृत्तिः(१)
श्रीविश्वनाथकृतिना सुगमाल्पवर्णा ।
श्रीकृष्णचन्द्रचरणाम्बुजचञ्चरीक-
श्रीमच्छिरोमणिवचःप्रचयैरकारि ॥"
इति नैयायिकप्रवरेण विश्वनाथन्यायपञ्चाननेनोक्तत्वात् ।

बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥" इति
"त्रयो वेदस्य कर्तारो धूर्तभण्डनिशाचराः ।"

इत्याद्यपि च वदतश्चार्वाकराक्षसस्यवेदमपि "मुक्तये यः शिलात्वाये"त्यादिवचनमित्यविज्ञाय न्यायशास्त्रस्य वास्तविकनिन्दायां तत् प्रमाणयन्ति तच्चूपहासास्पदम् राक्षसोक्तत्वेन शिष्टापरिगृहीतत्वात् । न चैवं रीत्या गोतमनामाप्युपहासास्पदमित्यप्युच्यतामिति वाच्यम । वेदानां वेदसञ्ज्ञयैव अग्निहोत्रस्याग्निहोत्रसञ्ज्ञयैवोच्चरितत्वात् । यथा च अग्निहोत्रत्रिदण्डभस्मधारणादीनां बुद्धिपौरुषहीनानां जीविकात्वेन व्यवस्थापनं कृतम तथैव गोतममहर्षेर्गोतमत्वं व्यवस्थापितं महापशुत्वमिति यावत् तस्य गोतम इति नाम्नि तन्न सम्भवतीति भावः ।

अत्र महाभारते राजधर्मे युधिष्ठिरस्य राज्याभिषेकसमये चार्वाकः समायातश्चार्वाकाद् बहुपूर्वो वाल्पपूर्वो महर्षिगोतम इति लौकिकानां मते निर्णयो भवितुमर्हतीति ।

स च समय "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ" इत्यादिबृहत्संहितावचनेन यदा सप्तर्षयो मघानक्षत्रे स्थितास्तदेति ५४०० गतवर्षासन्ने सम्भवतीति गणितशास्त्रानुसारेणैतिहासिकवृत्तेन च न्यायदर्शनभाष्यकारवात्स्यायनचरितेऽत्रैव निपुणतरमुपपादयिष्यते ।

(१) अस्मन्निकटे पुण्यग्राम(पूनानगर)लिखितं पुरातनमेकं परिशुद्धं पुस्तकं वर्तते तत्राऽयमेव पाठः तथा इण्डियाआफिस्लाइब्रेरीपुस्तकालये वर्तमाने लिखितपुस्तकेऽपि एवं १८२८ इसवीयवर्षे कलिकातानगरे मुद्रिते ऽपि पुस्तके । नवीने तु क्वचित् शोधकप्रमादाद् "गौतमसूत्रवृत्ति"रिति जातम् ।

वेदादिभाष्यकर्त्रा श्रीमाधवाचार्येण च सर्वदर्शनसंग्रहे(१) ऽक्षपाददर्शने "तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाये"त्याद्युक्तत्वाद् श्रीजयनारायणतर्कपञ्चाननेन च वैशेषिकसूत्रविवृत्याद्यनेकानिबन्धकारेण वङ्गदेशस्थ–एसिआटिक्–सोसाइटीद्वारा मुद्रिते न्यायदर्शनपुस्तके "गोतममुनिप्रणीतं न्यायदर्शन"मिति लिखितत्वात् । श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येणापि वाचस्पत्ये बृहदभिधाने न्यायशब्दे न्यायशास्त्रस्य गोतमप्रणीतत्वेनैवावधारणाद् गोतम इत्येव निर्णीतं भवति ।

अयं च गोतमः पुरोहितत्वेन सूक्तकर्तृत्वेन वा ऋग्वेदसंहिता–तद्भाष्य–अथर्ववेदसंहिता–शतपथब्राह्मणादिषु अनेकेषु स्थलेषूक्त इत्यस्य समयादिनिर्णये वेदा एव प्रमाणानीति ।

तथाहि ऋग्वेदसंहितायाम् १ अष्टके ५ अध्याये ६२ सूक्ते ।

सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

एवमेव ७७ । ७८ सूक्तयोरपि ।

अथर्ववेदसंहितायाम् ४ काण्डे ६ अनुवाके, १८ काण्डे ३ अनुवाकेऽपि गोतमस्य चर्चास्ति ।

माध्यन्दिनीये शतपथब्राह्मणे(२) १ काण्डे ४ अध्याये । "विदेघो ह माथवोऽग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरोहित आस तस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति तन्मेऽग्निर्वैश्वानरो मुखान्निष्पद्याताऽइति ।" एवमेवा-

---

(१) एसिआटिक् सोसाइटीमुद्रिते पुस्तके ११२ पृष्ठेऽवलोक्यम् ।

(२) Dr. Albrecht Weber. वेबरमहाशयमुद्रिते पुस्तके ३४ पृष्ठे द्रष्टव्यम् ।

ग्रेऽपि तस्मिन्नेवाध्याये ।

ऋग्वेदसंहिताभाष्ये प्रथमाष्टके ५ अध्याये २१ वर्गे । "त्रयोदशानुवाके एकादश सूक्तानि तत्रोपप्रयन्त इति नवर्चं प्रथमं सूक्तम् । तत्रानुक्रम्यते । उपप्रयन्तो नव गोतमो राहूगणो गायत्रं त्विति । अस्यायमर्थः रहूगणनामा कश्चिदृषिः तस्य पुत्रो गोतमोऽस्य सूक्तस्य ऋषिरि"त्यादि ।

अपि च । यजुर्वेदीयकाठकोपनिषदि ५ वल्ल्याम् । छान्दोग्योपनिषदि ४ प्रपाठके ४ खण्डे, ५ प्रपाठके ३ । ४ । ५ । ६ । ७ । १६ । खण्डेषु । बृहदारण्यकेऽपि ४ अध्याये ६ ब्राह्मणे गौतमस्य चर्चाया वर्तमानत्वान्निश्चितं भवति गोतमस्यापत्यं गौतमः ऋष्यन्धकवृष्णिकुरुभ्यश्च (पाणिनिः अ. ४ पा. १ सू. ११४) इत्यनेन अण्प्रत्यये कृते गोतमं विना गौतमस्यासम्भवात् गोतम एव मूलपुरुषः ।

अत एव बृहदारण्यकोपनिषदि ५ अध्याये ७ ब्राह्मणे "सोऽब्रवीत् पतञ्चलं काप्यं याज्ञिकांश्च यो वै तत् काप्य सूत्रं विद्यात तञ्चान्तर्यामिणमिति स ब्रह्मवित् स लोकवित् स देववित् स वेदवित् स भूतवित् स आत्मवित् स सर्ववि-दि"त्युपक्रम्य "स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति" इत्युक्तम् । अत्र शाङ्करभाष्ये "गौतमेति गोत्रतः" इत्युक्तम् । अन्ये तु अस्यामेवोपनिषदि ४ अ. २ ब्रा. "इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज" इत्यत्र गोतमशब्दवदत्रापि गोतम एवेत्याहुः ।

यद्यपि नैषधचरितश्लोके शास्त्रमित्येवोक्तं न तु न्यायशास्त्रमिति तथापि भगीरथ–नृहरि–नारायण–लक्ष्मणप्रभृ-

तितट्टीकाकारैः "शास्त्रं न्यायदर्शनं" "तदत्यन्तविमोक्षोऽपवर्ग इतिसूत्रेण" इत्यस्यैवोक्तत्वात् गोतमकृतस्य अस्यैव न्यायशास्त्रस्य ग्रहणम्। अपि च गोतमान्तरेण कृतमर्वाचीनमिदं न्यायशास्त्रमित्यपि न भ्रमितव्यम्। विश्वनाथन्यायपञ्चाननेन न्यायसूत्रवृत्तौ प्रथमाध्याये प्रथमसूत्रव्याख्याने न्यायस्य सर्वशास्त्रोत्तमत्वसाधनप्रस्तावे "तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुति(१)"रित्युक्तत्वात् वेदे(२) न्यायशब्दोपादानान्न्यायस्यातिचिरकालावस्थायित्वात् तत्क-

---

(१) मुण्डकोपनिषदि प्रथममुण्डके "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च तत्र परा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति इतिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीत्यपरा यया तदक्षरमधिगम्यते" अस्मन्निकटे वर्तमानेऽतिप्राचीने पुस्तकेऽयं पाठो वर्तते। युक्तश्चायमन्यासूपनिषत्सु मन्वादिस्मृतिष्वपि तथा पातञ्जले व्याकरणमहाभाष्ये च इतिहासपुराणन्यायमीमांसादीनां परिकीर्तनात् शिक्षाद्यङ्गसहितानामुपनिषद्गर्भाणां चतुर्णां वेदानां परविद्यात्वं सर्वोत्कृष्टत्वं न्यायाद्युपाङ्गसहितानामितिहासपुराणानां वेदोपबृंहणरूपाणामपरात्वमिति विभागस्याप्यन्वर्थत्वाच्च। मुद्रितमुण्डकोपनिषदि तथा पाठाभावात् स चांशो निपतित इति प्रतिभाति। ऋग्वेदीयचरणव्यूहे तथा यजुर्वेदीयचरणव्यूहेऽपि दृश्यते। तथाहि "तस्मात् साङ्गमधीत्य ब्रह्मलोके महीयते। तथा प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायतर्का इत्युपाङ्गानि।" इति। जीर्णं प्राचीनं लिखितं चरणव्यूहपुस्तकमस्मन्निकटे वर्तते। तत्राप्ययं पाठो वर्तते। तत्र लेखकेन लिपिकाल एवं लिखितः "स्वस्ति संवत् १६४२ वर्षे माघवदि १२ शनौ पञ्चोलीहापैयापठनार्थं द्विजजनचरणपांशुधूसरमौलिना महादेवेन कृष्णार्पणबुद्ध्या लिखितं॥"

(२) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। मनुस्मृतिः अ० १ श्लो० १०।

तुर्गोतमस्याप्यतिचिरकालावस्थायित्वं निर्विवादमेव । अत्र श्रुतौ मीमांसाधर्मशास्त्रयोः साक्षादुक्तत्वान्न्यायशब्दवाच्ययोरपि तयोर्ग्रहणं न सम्भवति तस्मान्न्यायशास्त्रस्य ऋग्वेदसंहिताशतपथब्राह्मण–यजुर्वेदीयकाठकोपनिषत्–सामवेदीयच्छान्दोग्योपनिषत्प्रतिपादितगोतम(१)प्रणीतत्वे नासमञ्जसमिति । एतदनुकूलान्येव वचनानि पुराणेष्वपि उपलभ्यन्ते । तथाहि पद्मपुराणे उत्तरखण्डे २६३ अध्याये ।

"कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ।
गोतमेन(२) तथा न्यायं सांख्यं तु कपिलेन वै ॥

---

(१) केचित्तु वायुपुराणीयगयामाहात्म्ये २ अध्याये ।
"ब्रह्मा संभृतसंभारो मानसानृत्विजोऽसृजत् " इत्युपक्रम्य ।
"सुकपालं गोतमं च तथा वेदशिरोव्रतम् ।"
इत्युक्तं वचनमवलम्ब्य श्वेतवाराहकल्पे गोतमस्य ब्रह्मणः पुत्रत्वं वदन्ति तथात्वे ।

" क्षीरोदार्णवसम्भूत लक्ष्मीबन्धो निशाकर ।
गृहाणार्घ्यं मया दत्तं गणेशप्रीतिवर्द्धनम् ॥ "

इति गणेशचतुर्थीव्रतकथायां दर्शनाच्चन्द्रमसः समुद्रादुत्पत्तिः ।
अपि च " नेत्राभ्यां वारि सुस्राव दशधा द्योतयद्दिशः ।
तद्गर्भविधिना हृष्टा दिशो देव्यो दधुस्तदा ॥
समेत्य धारयामासुर्न च ताः समशक्नुवन् ।
स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः ॥
पपात भासयँल्लोकाञ्छीतांशुः सर्वभावनः ॥ " इति

हरिवंशात् अत्रेर्महर्षेर्नेत्रादुत्पत्तिः अस्य च समन्वयः कल्पभेदाद्भवतीति गोतमोत्पत्तावपि तथैव समन्वयः कार्य इति । गयामाहात्म्ये मुद्रिते तु गौतमं चेति दृश्यते ।

(२) अपरोऽपि गोतमो मत्स्यपुराणे ४८ अध्याये निरूपितः । अयं च उशिजान्महर्षेर्ममतागर्भे स्थितो बृहस्पतिशापाद् दीर्घतमा नाम (अन्धः) ऋषिरभूत् पुनः सुरभेरनुग्रहात् गोभिस्तमो ध्व-

स्तं यस्येति निरुक्त्या गोतमः सञ्जातः ।

महाभारते आदिपर्वणि १०४, १०५ अध्याये दीर्घतमसो गोतमस्योत्पत्तिः गौतमादिभिस्तत्पुत्रैश्च स्वमात्रनुज्ञया दीर्घतमसो गङ्गाजले प्रक्षेप इत्युक्तम् ।

अहं तु ऋग्वेदसंहिताभाष्य-शतपथब्राह्मणादीननालोच्यैव न्यायकन्दलीभूमिकायामस्यैव गोतमस्य न्यायशास्त्रकर्तृत्वं प्रतिपादितवान् किन्त्विदानीं तत्समालोचनाद् राहूगणस्य गोतमस्य वैदिकसूक्तस्य ऋषित्वात् पौरोहित्याच्च शास्त्रकर्तृत्वसम्भवाद्दीर्घतमसोऽन्धस्य शास्त्रकर्तृत्वं निराकृतं भवति । अपि चानुपदमेव वक्ष्यामि अस्य न्यायशास्त्रकर्तुर्गोतमस्य अक्षपाद इति नामान्तरम् तथा सति दीर्घतमसोऽन्धस्य गोतमस्य प्राकृते चक्षुषी एव न स्तः अक्षपादत्वं तु प्रमाणसहस्रेणापि भवितुं नार्हतीति ।

अपि च मनुस्मृतौ १ अध्याये श्लो० ३४ । ३५ ।

"अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ।
पतीन् प्रजानामसृजं महर्षीनादितो दश ॥
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्राचेतसं वसिष्ठं च भृगुं नारदमेव च ॥"

इत्युक्तत्वाद् अङ्गिरा ब्रह्मणः पुत्रस्तद्वंश्यो गोतमो गोत्रप्रवर्तको यथाह मनुः ।

"जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः ।
वसिष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥"

इदमुपलक्षणमन्येषामपि ग्रन्थान्तरे दर्शनात् ।

गोत्रप्रवरनिरूपकेषु ग्रन्थेषु गोतमगणे दश पठिताः । आयास्याः । शरद्वन्तः । कौमण्डाः । दीर्घतमसः । औशनसः । कारेणुपालाः । राहूगणाः । सोमराजकाः । वामदेवाः । बृहदुक्थाश्चेति ।

इत्यनेन राहूगणो भिन्नो गोतमो दीर्घतमाश्च भिन्न इति सिद्ध्यति । एवमत्र्यादीनामवान्तरभेदाः सप्रमाणं वात्स्यायनचरिते निरूपयिष्यन्त इति ॥

अत्र गोतमस्यापत्यं पुमान् गौतमः ऋष्यन्धकवृष्णिकुरुभ्यश्च

(पाणिनिः अ० ४ पा० १ सूत्र ११४) इत्यनेन अण्प्रत्यये कृते अनेके गौतमाः सम्भवन्ति । तथाहि वाल्मीकिरामायणे बालकाण्डे ५० सर्गे

"शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितः ।"
"प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ।" इति ।

"गौतमश्च शतानन्दो जनकानां पुरोहितः ।" इति उत्तररामचरिते "गौतमः गोतमस्य महर्षेरपत्यं पुमान्"इति तट्टीकाकारः ।

शतानन्दस्य पिता गोतमः माता च अहल्या अस्मिन् विषये साधकानि बाधकानि च प्रमाणानि सन्त्विरन्ते पण्डिताः किन्तु साधके ममापि संमतिः गोतमो राहूगणो विदेघराजस्य तत्रत्यस्य पुरोहित आसीदिति शतपथब्राह्मणे प्रतिपादितमिति पूर्वं पृ. १८ पं. २० दर्शितम् । तत्पुत्रस्य शतानन्दस्य जनकानां पुरोहितत्वे किमपि नासमञ्जसम् । एवं चेद्वाल्मीकिरामायणे बालकाण्ड ४८-५१ सर्गेषु मिथिलाभूमौ जनकपुरोपकण्ठे गौतमाश्रमस्य वर्णनात् तस्मिन् देशे न्यायशास्त्रस्य प्रणयनकथनं न साहसास्पदं भविष्यतीति । अत एव मिथिलायां न्यायचर्चाधिक्यात् उदयन-वाचस्पति-गङ्गेश-वर्धमानोपाध्यायैरनेके न्यायरहस्यग्रन्था निर्मिता इति । केचित्तु "अक्षपादः कणादश्च उलूको वत्स एव च"इत्यादिवायुपुराणमुद्धृत्य अन्तसमये गोतमस्य प्रभासगमनेन समन्वयं दर्शयन्ति । तच्चिन्त्यम् अपवर्गनिरूपकं न्यायशास्त्रं निर्मायापि किमपरमवशिष्टं यदर्थं प्रभासं गत्वा सोमशर्मणो ब्राह्मणस्य शिष्यतां गत इति विचारासहत्वात् ।

अपि चामरकोशे बुद्धनामभेदेऽपि ।

"सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।" इत्यादि ।
"गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ।" इति ।

अन्यच्च । जैनतीर्थङ्करस्य २४ संख्यकस्य महावीरस्वामिनः शिष्योऽपि गौतमः यतो गौतमः पृच्छति महावीरस्वामी भणतीति जैनागमेषु दृष्टत्वात् ते चागमाः उभयसंवादरूपा एवेति ।

एतेनापि प्रमाणेन गोतमस्य चिरन्तनत्वमेव सिद्धम् ।

द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः ।
निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥" । इत्यादि
स्कन्दपुराणे कालिकाखण्डे १७ अध्याये ।

"गोतमः स्वेन तर्केण खण्डयन् तत्रतत्र ही"त्यादि ।
अपि च न्यायदर्शनवात्स्यायनभाष्येऽन्ते ।

"योक्षपाद(१)मृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इति भाष्यजातमवर्त्तयत् ॥" इति ।
न्यायवार्त्तिकारम्भे च ।

"यदक्षपादः प्रवरो मुनीनां
शमाय शास्त्रं जगतो जगाद ।" इति

इत्यनेनास्य गोतमस्य महर्षेः अक्षपाद इति नामान्तरं निष्पन्नं भवति ।

महाभारतटीकायां नैलकण्ठ्यामादौ ।

"कणभक्षमक्षचरणं जैमिनिकापिलौ पतञ्जलिं च नुमः"।
इति दर्शनात् अक्षचरण इत्यपि नामान्तरमेवेति ॥

---

(१) "नैयायिकस्त्वक्षपाद" इत्यमरः । (भट्टकीलहार्ननिदेशेन मुद्रितेऽमरकोशे १६७ पृष्ठे) नैयायिकः अक्षपादः द्वे प्रमाणप्रमेयसंशयेत्यादिषोडशपदार्थवादिनो गोतमस्ये"ति तद्व्याख्यातारः । अक्षं नेत्रं दर्शनसाधनतया जातः पादेऽस्येति तदर्थः ।

कदाचिद्वेदव्यासापरनामधेयः कृष्णद्वैपायनमहर्षिर्गोतमेन सङ्गतः इदमूचे यदनेन जीवब्रह्मणोर्भेदस्तर्केण प्रतिपादित इत्यस्य मुखं नावलोकयिष्यामीति तावदेव गोतमेन महर्षिणा व्यासस्यावलोकनार्थं पादः प्रसारित इति पादे चक्षुः सञ्जातं ततश्च व्यासो गोतममक्षपादनाम्ना स्तुतवानिति पौराणिकीं कथां कथयन्ति वृद्धाः । इमामेव कथां भङ्ग्यन्तरेण समुद्धृत्य वाचस्पत्ये बृहदभिधानेऽक्षपादशब्दे शब्दार्थसमन्वयः कृत इति ।

अथ न्यायशास्त्रप्रशंसा ।

अनेन गोतमेन प्रणीतस्य न्यायशास्त्रस्य सर्वविद्योत्तमत्वं प्रतिपादयन्ति स्म श्रुतिस्मृतिपुराणेषु ।

तथाहि "न्यायो मीमांसा धर्मशास्त्राणीति श्रुतिः(१) ।"

मनुः ।

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥"(२) इति ।

याज्ञवल्क्योऽपि ।

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"(३) इति ।

विष्णुपुराणे च ।

"अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु ॥"(४) इति ।

अत्र कर्मोपासनाज्ञानात्मकत्वत्रयप्रतिपादकत्वाद् वेदानां काण्डत्रयात्मकत्वा(५)न्मीमांसापि कर्ममीमांसा भक्तिमीमांसा

---

(१) पुराणं न्यायो मीमांसा धर्मशास्त्राणीति आत्मोपनिषदि २ खण्डे ।

(२) इदं वचनं तु "वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेतीति" रघुवंशस्थपञ्चमसर्गस्थश्लोकव्याख्याने मल्लिनाथेन समुद्धृतम् ।

(३) याज्ञवल्क्यस्मृतौ १ अध्याये ३ श्लोकः । अत्र पुराणतर्कमीमांसेति केचित् पठन्ति, अनेनापि पाठेन तर्कपदेन न्यायस्यैव ग्रहणम् ।

(४) विष्णुपुराणे ३ अंशे ६ अध्याये । एवं वायुपुराणे पूर्वार्द्धे ६१ अध्याये श्लो. ७८ । ७९ ।

(५) गीतागूढार्थप्रकाशे आरम्भे

ब्रह्ममीमांसा चेति त्रिविधैव मीमांसापदेन ग्राह्या । परमात्म-जीवात्मनोर्भेदस्य सिद्धान्तत्वेन प्रतिपादकत्वाद्वैशेषिकसांख्य-योगानां न्यायविस्तरपदेन न्यायेऽन्तर्भाव इति प्राधान्येन न्याय-पदोपादानम् । यद्यपि सांख्ये परमात्मनिरूपणं नास्ति तथापि "एकं सांख्यं च योगं च यः पश्यति स पश्यति" इति वचनप्रामाण्यात् सांख्ययोगयोरेकवाक्यतया सांख्यस्यापि ग्रहणम्(१) ।

अत एव मनुरपि । १२ अध्याये १०६ श्लो० ।

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥" इति ।

इदमेव मनुवचन(२)मुद्धाव्य

"सच्चिदानन्दरूपं तत् पूर्वं विष्णोः परं पदम् ।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः ॥
कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात् ।
तद्रूपाष्टादशाध्यायैर्गीता काण्डत्रयात्मिका॥" इत्यादि ।

(१) जरन्नैयायिकजयन्तस्तु न्यायमञ्जर्यां प्रारम्भे एव । "न्याय-विस्तरशब्देनैतदेव शास्त्रमुच्यते । न्यायस्तर्कोऽनुमानं सोऽस्मिन्ने-व व्युत्पाद्यते । यतः सांख्यार्हतानां तावत्क्षपणकानां कीदृशमनु-मानोपदेशकौशलं कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यते इति ना-साविह गणनार्ह इति ।"

(२) अत्र मनुवचनं नैकदेशीयत्वेन ग्राह्यम् । मेधातिथिप्रभृति-भाष्यकारैर्मन्वर्थमुक्तावलीकारैः कुल्लूकभट्टैरपि "मनुर्वै यत्किञ्चाव-दत् तद्भेषजमिति ।

ऋचो यजूंषि सामानि मन्त्रा आथर्वणाश्च ये ।
सप्तर्षिभिस्तु यत् प्रोक्तं तत्सर्वं मनुरब्रवीत् ॥ " इत्याद्युक्तम् ॥

मनोः प्राधान्ये मन्वर्थमुक्तावल्युद्धृतच्छान्दोग्यब्राह्मणे "मनुर्वै यत्किञ्चिदवदत् तद्भेषजं भेषजताया इति ।" एवं छान्दोग्योप-

तार्किकरक्षायां(१) तर्कस्य सर्वप्रमाणानुग्राहकत्वं प्रसाधितम्। एतस्मादपि तर्कनिरूपकन्यायशास्त्रस्य ग्रहणं सम्भवति। अत्र तर्कशब्देन गोतमप्रणीताया आन्वीक्षिक्या एव ग्रहणम्। "आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयो"रित्यमरकोशात्। अत एव सर्वलिङ्गसंन्यासग्रन्थे "नैषा तर्केण मतिरापनेयेति कठोपनिषदः २।९" "तर्कादिशास्त्रपठनं वर्जयेच्छ्रुतिशासना"दित्यादिवदौन्तिकार्थः सङ्गच्छत इति। न्यायदर्शनवात्स्यायनभाष्ये १ सूत्रव्याख्याने।

"सेयमान्वीक्षिकी विद्या
प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥"(२) इति।

निषदि ८ प्रपाठके १५ खण्डे "तद्धैतद्ब्रह्मा प्रजापतये उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदि"त्यादिदर्शनान्मनोः प्रशंसा वेदेऽपि वर्तत इति विज्ञेयम्।

बृहस्पतिनाप्युक्तम्।

"वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥
तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च।
धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते॥"

वचनमिदं कुल्लूकभट्टेन मनुटीकायां समुद्धृतं किन्तूपलभ्यमानायां मुद्रितायां बृहस्पतिस्मृतौ नोपलभ्यते, उपलभ्यते च वृद्धबृहस्पतिस्मृतौ ग्रन्थोऽयं ३२०० श्लोकात्मको वर्तते इति श्रुतं मया श्रीगुरुचरणेभ्यः।

(१) तार्किकरक्षायां दिपण्डितजर्नल्मुद्रिते पुस्तके १९५ पृष्ठेऽवलोक्यम्।

(२) अस्यार्थो न्यायवार्त्तिक-न्यायवार्त्तिकतात्पर्यटीका-न्या-

जयन्तोऽपि न्यायमञ्जर्याख्यायां न्यायसूत्रवृत्तौ प्रथमसूत्रावतरणिकायाम् । "इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वतीति । प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षाऽनुमानमित्यर्थः । तद्व्युत्पादकं शास्त्रमान्वीक्षिकम् । ननु चतस्रश्चेद् विद्याः कथं चतुर्दश दर्शिताः" इत्युपक्रम्य "नन्वक्षपादात् पूर्वं कुतो वेदप्रामाण्यनिश्चय आसीत् । अत्यल्पमिदमुच्यते । जैमिनेः पूर्वं केन वेदार्थो व्याख्यातः पाणिनेः पूर्वं केन पदानि व्युत्पादितानि । पिङ्गलात् पूर्वं केन छन्दांसि रचितानि । आदिसर्गात् प्रभृति वेदवदिमाः विद्याः प्रवृत्ताः । संक्षेपविस्तरविवक्षया तु तांस्तांस्तत्रतत्र कर्तॄनाचक्षते" इत्यन्तेनामुमर्थं निपुणतरमुपपादितवान् ।

अत एव गङ्गेशोपाध्याया अपि तत्त्वचिन्तामणौ

"अथ जगदेव दुःखपङ्कमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय" इत्याहुरुक्तवन्तः ।

विश्वनाथन्यायपञ्चाननास्तु न्यायसूत्रवृत्तौ प्रथमसूत्रव्याख्याने ।

"श्रवणादनु पश्चादीक्षा अन्वीक्षा उन्नयनं तन्निर्वाहिका सेयमान्वीक्षिकी न्याय(१)तर्कादिशब्दैरपि व्यवह्रियते

यद्वार्त्तिकतात्पर्यपरिशुद्ध्यादौ बहुविस्तरेण श्रुतिस्मृतिपुराणप्रामाण्येन न्यायस्य सर्वविद्योत्तमत्वं व्यवस्थाप्य प्रपञ्चितोऽतो विस्तरभिया न निरूपितोऽस्माभिरिति ।

(१) न्यायदर्शनवात्स्यायनभाष्ये प्रमाणप्रमेयेत्यादिप्रथमसूत्रव्याख्याने "कः पुनरयं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः । प्र-

तथा च न्यायो मीमांसा धर्मशास्त्राणीति श्रुतिः । पुराणन्यायमीमांसेत्यादिस्मृतिः । मीमांसा न्यायतर्कश्च उपाङ्गः(१) परिकीर्तित इति पुराणम् ।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।

त्यक्षागमाश्रितमनुमानं सान्वीक्षा प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्त्तत इत्यान्वीक्षिकी न्यायविद्या न्यायशास्त्रम् ।" अत्र तात्पर्यटीका "पञ्चरूपश्चतूरूपो वा हेतुर्न्यायः । प्रतिज्ञाद्यवयवसमूहो वा न्यायः । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्याय इति ।"

निर्णीयतेऽनेनेति न्याय इति व्युत्पत्त्या न्यायशब्दो वैदिकपदार्थनिर्णायकेऽधिकरणभेदे प्रयुज्यते अत एव जैमिनीयन्यायमालाविस्तरे माधवाचार्याः "सर्वे न्यायाः समर्थिता भवन्तीति ।" क्वचिद्धर्मशास्त्रेऽपि न्यायशास्त्रत्वेन प्रयुज्यते । काकतालीयन्यायादौ आभाणके न्यायशब्दप्रयोगस्तु पारिभाषिकस्ते च न्याया लौकिकन्यायसंग्रहग्रन्थे ३३४ संख्यकाः पण्डितश्रीरामदयालुशिष्यश्रीरघुनाथेन संगृहीताः ।

(१) वेदाङ्गानि अथर्ववेदीयमुण्डकोपनिषदि १ मुण्डके "द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्र परा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ॥"

पाणिनीयशिक्षादौ च वेदाङ्गानां निरूपणं यथा

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ॥
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥" इति

वेदाङ्गोपाङ्गभेदाः शिक्षाकल्पव्याकरणभेदादयश्चतुर्वेदपरिशिष्टसंग्रहभूमिकायां जैनेन्द्रव्याकरणभूमिकायां च निरूपयिष्यन्तेऽस्माभिः ।

आन्वीक्षिकीं चात्मविद्यां वार्तारम्भाँश्च लोकतः॥ इति मनुः(१)
तथा । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतर इत्यादि(२) । मोक्षधर्मे भारते ।

तत्रोपनिषदं तात परिशेषं तु पार्थिव ।
मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम् ॥

इत्युपनिषदर्थश्चान्वीक्षिक्यनुसारी ग्राह्य" इत्याद्युक्तवन्तः ।

देवीपुराणे ऽपि ४५ अध्याये ।

"आत्मवेदनशीलत्वादन्वीक्षणपराथ वा ।
अन्वीक्षाकरणत्वाद्वा तस्मादान्वीक्षिकी स्मृता ॥" इति ।

कामन्दकोऽपि ।

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
विद्याश्चतस्र एवैता लोकसंस्थितिहेतवः ॥
आन्वीक्षिक्याऽऽत्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अथानर्थौ च वार्तायां दण्डनीतौ नयानयौ ॥" इति ।

इमामेवान्वीक्षिकीं विद्यामध्यात्मविद्यात्वेन दत्तात्रेयः अलर्काय प्रह्लादादिभ्य ऊचिवानिति श्रीमद्भागवते महापुराणे १ स्कन्धे ३ अध्याये १० । ११ श्लोके प्रतिपादितं यथा

"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥
षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तो ऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥" इति ।

अत्र टीकाकाराः, तत्र श्रीधरस्वामी आन्वीक्षिकीमात्मवि-

---

(१) मनुस्मृतौ ७ अध्याये श्लो० ४३ । विस्तरस्तु मेधातिथिभाष्यादौ द्रष्टव्यः ।

(२) मनुस्मृतौ १२ अध्याये श्लो० १०६ ।

द्याम्। राधारमणदासगोस्वामी अन्वीक्ष्यते आत्मा इत्यन्वीक्षा तामधिकृत्य ताम्। वीरराघवः आन्वीक्षिकीमध्यात्मविद्याम्। विजयध्वजः आन्वीक्षिकीं तत्त्वविद्याम्। वल्लभाचार्यः आन्वीक्षिकीं योगपुरःसरामात्मविद्याम्। विश्वनाथचक्रवर्त्ती आन्वीक्षिकीमात्मविद्याम्। शुकदेवः अन्वीक्षिकीमध्यात्मविद्याम्।

एतेन न्यायभिन्ना आन्वीक्षिकी न प्रतीयते। अत एव "आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयो"रित्यमरकोशेऽपि निरूपितः।

"नैयायिकानां मुख्येन वरुणस्यात्मजेन च।
पराजितो यत्र वन्दी विवादेन महात्मना॥"

इति महाभारतेऽपि तृतीयो नैयायिकः सङ्गच्छते अन्यथान्वीक्षिकीत्रितयापत्तेः। अयमेवार्थो न्यायनिन्दाप्रशंसासमन्वये ऽग्रे विस्तरेण प्रपञ्चयिष्यते।

तत्र उपनिषदर्थश्च आन्वीक्षिक्यनुसारीग्राह्य इत्यत्र "तत्रोपनिषदं तात परिशेषं तु पार्थिवेत्यादि"महाभारतीयमोक्षधर्मं प्रमाणयन्ति स्म विश्वनाथन्यायपञ्चाननादयः परं समन्वयं तु न प्रदर्शितवन्त इति समन्वयः प्रदर्श्यते।

महर्षिणा गोतमेन आन्वीक्षिकीत्यपरनामधेये न्यायशास्त्रे प्रमाणादिपदार्थनिर्वचनरूपाणि सूत्राणि(१) रचितानि उपनि-

---

(१) पराशरोपपुराणे १८ अध्याये।

"स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥" इति।

अस्मन्निकटे वर्तमाने एकस्मिन् प्राचीने व्याकरणमहाभाष्यपुस्तके केनचित् पण्डितेन समुद्धृतम्।

षत्स्वपि तत्रतत्रोपदेशप्रसङ्गेन स्वभावोक्त्या भङ्ग्यन्तरेण वा तत्तत्पदार्थज्ञापनपराणि वाक्यान्युपलभ्यन्ते इति उपनिषद्वाक्याभिप्रायकाण्येव सूत्राणीति विज्ञायते।

तथाहि। प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्त–सिद्धान्तावयव–तर्क–निर्णय–वाद–जल्प–वितण्डा–हेत्वाभास–च्छल-जाति–निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायसूत्रम्।

प्रमाणम्—सौक्ष्म्यत्वादेतत् प्रमाणम्—न विना प्रमाणेन प्रमेयस्योपलब्धिः। मैत्र्युपनिषदि ६। १४, प्रमाणैरेतैरवगतः। नृसिंहोत्तरतापन्याम् ९, प्रमाणाप्रमाणसाधारणा। सर्वोपनिषत्सारे ४, किं द्रव्यं किं स्थानं कति प्रमाणम्। कालाग्निरुद्रोपनिषदि १, उपनिषदः प्रमाणम्। मुक्तिकोपनिषदि २॥

प्रत्यक्षम्—अनो ह वै नाम प्रत्यक्षम्। छान्दोग्ये ५। २। १, त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। तैत्तिरीयके। १। १। १॥

अनुमा वा अनुमानम्—बहिरात्मकया गत्यान्तरात्मनोऽनुमीयते गतिः अन्तरात्मकया गत्या बहिरात्मनोऽनुमीयते गतिः। मैत्र्युपनिषदि ६। १।

उपमा वा उपमानम् सप्तविधेयं तस्योपमा। मैत्र्युपनिषदि ६। २२।

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
सूत्रस्य लक्षणं चैतत् सहेतु अनुमापकम॥" इति।

भामत्यां श्रीवाचस्पतिमिश्राः।

"लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥" इति।

केचित्तु "बह्वर्थसूचनात् सूत्र"मित्यप्याहुः।

शब्दः-प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वाञ्छब्दानाप्नोति।
कौषीतकिब्राह्मणोप. । ३ । ६ । उपनिषदः प्रमाणम्।
मुक्तिकोपनिषदि २॥

प्रमेयम्-प्रमेयोऽपि प्रमाणतां पृथक्त्वादुपैति। मैत्र्युपनिषदि६।१४।
आत्मा-कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा
रूपं पश्यति येन वा शब्दं शृणोति येन वा गन्धाना-
जिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु
च विजानाति। ऐतरेयोपनिषदि ३ अध्याये।
आत्मानꣳ रथिनं विद्धि शरीरꣳ रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयाꣳस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥
कठोप. १ अध्या० । ३ वल्ल्याम्।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति।
कठोप. ४ वल्ल्याम्।
अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा। बृहदा-
रण्यके ४ । ५ । १४ ।
आत्मा वा अरे द्रष्टव्यः श्रोतव्यः । बृहदारण्य.२ । ४ । ५,
(आत्मगुणाः)-इच्छयाप्नोति कैवल्यम् । अमृतबिन्दु. २९,
विदेहमुक्ताविच्छा चेत् । मुक्तिकोपनिषदि १ । २९,
द्वेषश्चाणूरमल्लोऽयम् । कृष्णोप. १५, तत्प्रयत्नेन शोधयेत्,
मैत्र्युपनि - ६ । ३४, तत्पुरुषप्रयत्नसाध्यम् । मुक्ति-
कोप. २, पौरुषेण प्रयत्नेन । मुक्तिकोप. २ । ६,
अन्वेष्टव्यं प्रयत्नेन । मुक्तिकोप. ६३ ।

यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञासे। छान्दोग्ये। ७। २२। १, तेषां सुखं शाश्वतं नेतरेषाम्। कठो. ५। १२, इतरे दुःखमेवापि यन्ति। बृहदारण्यके ४। ४। १४, श्वेताश्वत. ३। १०। दुःखस्यान्तं भविष्यति। श्वेताश्वत. ६। २०, ज्ञान-मात्मनि महति नियच्छेत। कठोप. ३। १३, अनेन ज्ञानमाप्नोति संसारार्णवनाशनम्। कैवल्य. २४।

शरीरम्—केन सुखदुःखे इति शरीरेणेति। कौषीतकि. १। ७, प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति। कौषीतकि. ३। ६, स्वे शरीरे यथाकामं परिवर्त्तते। बृहदारण्यके २। १। १८, अस्मिन् पञ्चात्मके शरीरे। गर्भोप. १।

इन्द्रियम्—भूतानीन्द्रियाणि। नृसिंहोत्तरता. ९। दशेन्द्रियाणि महो. १। चक्षुरादीन्द्रियं स्वतः। मुक्ति. २। २२।

अर्थाः—शब्दस्पर्शादयो ह्यर्थाः। मैत्र्युप. ४। २।

बुद्धिः—संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मति-र्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति। ऐतरे-योप. ३ अध्याये, बुद्धिर्धृतिः स्मृतिः प्रज्ञानम्। मैत्र्युप. ६। ३१।

मनः—दशेन्द्रियाणि मन एकादशम्। महोप. १, हृदीन्द्रियाणि मनसा सन्निवेश्य। श्वेताश्वत. २। ८, मनः सर्वेन्द्रियाणि च। मुण्डकोप. २। १। ३, इन्द्रियैर्मनसि सम्पद्यमानैः। प्रश्नोप. ३। ९।

प्रेत्यभावः—अञ्जसा प्रेत्य सम्भवः । बृहदारण्यके ३ । ९ । २८ ।
फलम्—रतिमात्रं फलमस्याः । मैत्र्युप. ७ । ९ ।
दुःखम्—दुःखे नोद्वेगः । परमहंसोप. ३, कर्तृत्वादिदुःखनिवृत्ति-
द्वारा । मुक्ति. २ ।
अपवर्गः—सर्गस्वर्गापवर्गहेतुः । मैत्र्युप. ६ । ३०, अध्यवसायस्य
दोषक्षयाद्धि मोक्षः । मैत्र्युप. ६ । ३०, बद्धोऽतस्तद्विपरीतो
मुक्तः । मैत्र्युप. ६ । ३०, तन्निवृत्तिर्मोक्षः । सर्वोप-
निषत्सारे १, मोक्षः स्याद्वासनाक्षयः । मुक्तिकोप. २ । ६८ ।

अनयैव दिशा संशयादयोऽपि पदार्थास्तत्रतत्रोक्ता वेदितव्या
विस्तरभयादिहोपरम्यते ।

एवमुपनिषत्सु तत्रतत्र तर्क-चिकित्सित-योग-वेदान्त-मी-
मांसा-ऋग्यजुःसामाथर्ववेदेतिहासपुराणादिविद्यानां नामानि
तत्प्रतिपाद्यविषयाश्च वर्तन्त इत्यवगन्तव्यम् ।

अत एव "आदिसर्गात् प्रभृति वेदवदिमा विद्या" इत्या-
दि २९ पृष्ठोक्तजयन्तलेखोऽपि सङ्गच्छत इति ।

तच्च न्यायशास्त्रं(१) पञ्चाध्याय्यात्मकं तथा च न्यायवा-

---

(१) केचित्तु वात्स्यायनभाष्ये आत्मशरीरेन्द्रियार्थेत्यादिप्रमेय-
सूत्रव्याख्याने "अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवा-
याः प्रमेयम् । तद्भेदेन चापरिसंख्येयम् । अस्य तु तत्त्वज्ञानादप-
वर्गो मिथ्याज्ञानात् संसार इति ।" अपि च वैशेषिकशास्त्रे त्रय
एव हेत्वाभासाः संक्षेपेण निरूपितास्त एव विस्तरेण पञ्च न्या-
यशास्त्रे निरूपिता इत्यादिना बलवतीं युक्तिं प्रदर्श्य न्यायापेक्ष-
या वैशेषिकस्य प्राथम्यं निरूपयन्ति । तदसत् मुक्तावलीप्रका-
शादौ प्रमाणादिषोडशपदार्थानां न्यायोक्तानां वैशेषिकोक्त-
द्रव्यादिसप्तपदार्थेष्वन्तर्भावनिरूपणात् । सङ्करस्यैव पूर्वं कालाव
स्थायित्वे "पदार्थो द्विविधो भावोऽभावश्च भावःषड्विधः अ-

र्त्तिके आरम्भे "शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूह-विशिष्टः पदं पुनर्वर्णसमूहः पदसमूहः सूत्रम् सूत्रसमूहः प्रकरणम् प्रकरणसमूह आह्निकम् आह्निकसमूहोऽध्यायः पञ्चाध्यायी शास्त्रम्" इति ।

तत्र प्रथमाध्यायान्ते ।

"तन्त्रप्रतिज्ञा संसारस्तन्निवृत्तिश्च संविदा ।
उद्देशो लक्षणं चैव तत्त्वानामिह कीर्त्तितम् ॥"

द्वितीयाध्यायान्ते ।

"संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः ।
शब्दस्य तत्त्वप्रामाण्यं पदार्थश्चेह कीर्त्तिताः ॥"

तृतीयाध्यायान्ते ।

"आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा ।
यद्यथा वस्तु तत्त्वेन तत्तथेहोपपादितम् ॥"

चतुर्थाध्यायान्ते ।

"प्रवृत्तिदोषसम्बन्धः प्रेत्यभावः प्रपञ्चितः ।
फलं दुःखं विमुक्तिश्च चतुर्थे परिकीर्त्तिताः ॥"

पञ्चमाध्यायान्ते ।

"जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥"

इत्येवम्प्रकारेण शास्त्रार्थसंग्रहे कृतेऽपि(१) इदानीं न्यायसू-

---

भावश्चतुर्विध" इति निरूपणात् जगदीशभट्टाचार्यकृततर्कामृत-कोण्डभट्टकृतपदार्थप्रदीपिकादीनां सर्वापेक्षया प्राथम्यापत्तेश्च ।

(१) न्यायोक्तानां पदार्थानां संक्षेपेण निरूपणं न्यायसिद्धान्तः निरूपणं च सर्वदर्शनसंग्रहादौ श्रीमाधवाचार्यादिभिः कृतमेवेति पिष्टपेषणभिया न प्रदर्शितमस्माभिः ।

त्रपाठनिर्णये बहवो मतभेदा दृश्यन्ते। तत्र तावत् सूत्रपाठपुस्तकं द्विविधमुपलभ्यते प्राचीनं भाष्यकारसम्मतपाठानुसारि नवीनं च विश्वनाथन्यायपञ्चाननकृतवृत्त्यनुसारि । किन्त्वेकं पुरातनं प्रायःशुद्धं पुण्यग्रामे (पूनानगरे) लिखितं नैयायिकैः प्रामाणिकत्वेनावधृतं वात्स्यायनीयन्यायभाष्यपुस्तकमस्मान्निकटे वर्तते तत्र सर्वत्र सूत्रभाष्ययोर्मध्ये विरामचिह्नाभावात् सूत्राक्षराणां नवीनपुस्तकवत् गैरिकादिना रञ्जितत्वाभावात् क्वचिच्च भाष्यकारेणापि अवतरणव्याख्यानयोर्मध्ये सूत्राणां मिश्रणात् (१) क्वचिच्च स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वात् सूत्रकारेण यत्रयत्र ग्रन्थसङ्कोचः कृतस्तत्रतत्र वैशद्यार्थं भाष्यकारेण सूत्रत्वेनावभासमानानि बहूनि वाक्यानि रचितानि तान्यपि “स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु”रिति भाष्यलक्षणसमन्वयिना तेन व्याख्यातानीति (२) भाष्यग्रन्थेन सूत्रपाठनिर्णयो दुरधिगम एव ।

सूत्राणां लघुत्वात् स्वल्पाक्षरत्वात् सर्वतः सारभूतत्वात् भाष्यसंवलितानामेव तेषां पठनपाठनयोः प्रचारश्चिरन्तनः । कुतार्किकैश्च कुहेतूत्थापनादिना स च प्रचारो कृशतां नीत इति एतावन्मात्रं सूत्रमेतावन्मात्रं भाष्यमिति निर्णयो न्यायवार्त्तिककारसमयेऽपि दुरधिगम एवासीत् अत एव वार्त्तिककारोऽपि “अन्ये तु साध्यसाधर्म्यात् तद्धर्मभावित्वं

(१) १ अ० १ आ० २८ सर्वतन्त्रसिद्धान्तसूत्रव्याख्याने द्रष्टव्यम् ।

(२) १ अ० १ आ० तदत्यन्तविमोक्षोऽपवर्ग इति २२ सूत्रव्याख्याने द्रष्टव्यम् ।

दृष्टान्तस्येति सूत्रं पठन्ति" इत्याद्युक्तवान्(१) किन्तु महर्षिणाक्षपादेन प्रणीतस्य निःश्रेयसहेतुभूतस्य शास्त्रस्य कुतार्किकाज्ञानान्धकारतिरोहितस्य प्रकाशनार्थं महाप्रदीपप्रज्वलने प्रवृत्तेन वार्त्तिककारेण प्रायो बहूनि सूत्राणि निर्णीतानीति तत्रतत्र वार्त्तिकदर्शनादवगतं भवति ।

अथ वार्त्तिककारकृतसूत्रनिर्णयोऽपि मन्देभ्यो नालं भविष्यतीति षड्दर्शनटीकाकार आचार्यवाचस्पतिमिश्रो न्यायवार्त्तिकतात्पर्यटीकायां सूत्रपाठनिर्णयं यत्र तत्र कृत्वापि साकल्येन तद्दार्ढ्यार्थं न्यायसूचीनिबन्धाख्यं(२) न्यायदर्शनसारार्थबोधकं

---

(१) मुद्रितवार्त्तिकपुस्तके पृ० १३५ पं० ९ द्रष्टव्यम् ।

(२) एतदनुसारेणैव विश्वनाथन्यायपञ्चाननैरपि न्यायसूत्रवृत्तौ तत्तन्नाम्ना ८४ प्रकरणानि विभक्तानि किन्तु मुद्रितस्य तत्सूत्रवृत्तिपुस्तकस्यानवस्थितत्वात् परिशुद्धे पुस्तके तत्सर्वं द्रष्टव्यम् ।

निबन्धोऽयं न्यायवार्त्तिके तृतीयखण्डेऽन्ते मुद्रितः । अस्माभिः समालोचितं न्यायसूचीनिबन्धे पदसंख्यायामक्षरसंख्यायां च लेखगणनावैषम्यं वर्तत इति । तच्च लेखकशोधकप्रमादाज्जातमिति बोध्यम् ।

केचित्तु अस्य न्यायसूचीनिबन्धस्य न्यायवार्त्तिकतात्पर्यटीकायां क्वचिद् विसंवाददर्शनाद्भिन्नकर्तृकत्वं वदन्ति । तदसत् न्यायवार्त्तिकटीकायामेव १ सूत्रव्याख्याने पृ. २ "तदिदमभिधेयसम्बन्धप्रयोजनप्रतिपादनार्थकत्वं प्रथमसूत्रस्येत्युक्तम्" पृ. ४८ "तदेवं प्रथमसूत्रेण शास्त्रस्याभिधेयप्रयोजनसम्बन्धान् दर्शयता पदार्थाः प्रमाणादय उद्दिष्टा" इति वैषम्यदर्शनात् पूर्वपरग्रन्थयोर्विभिन्नकर्तृकत्वापत्तेः ।

आधुनिकास्तु नैतादृशो निबन्धः केनापि प्रामाणिकेनाचार्येण कस्मिँश्चिदपि शास्त्रे निर्मित इति केनचिद्धूर्तेनास्य सूत्रनिर्णायकस्य ग्रन्थस्योपलब्धेः प्रदर्शनेन कीर्त्तिलाभेच्छया क-

लिपतोऽयमित्युद्घोषयन्ति । तदत्यन्तदरिद्रायितमनोरथम् यतः ऋग्वेदीयशाकल्यसंहिताया मण्डलाध्यायसूक्तमन्त्रादीनां संख्या वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमाने देवीपुराणे २१४ पत्रे निरूपितास्ति । अपरोऽपि तन्निरूपकोऽनुवाकानुक्रमनामा ऋग्वेदीयग्रन्थो वर्तते । यत्राध्याय—मण्डल-वर्ग—सूक्त—ऋक्—पदाक्षराणां संख्यैव प्रकाशिता । यथा

"अध्यायानां चतुःषष्टिः६४मण्डलानि दशैव १० तु ।
वर्गाणां तु सहस्रे द्वे संख्याते च षडुत्तरे २००६ ॥
सहस्रमेतत्सूक्तानां निश्चितं खैलिकैर्विना ।
दश सप्त च पठ्यन्ते संख्यातं वै पदक्रमम् १०१७ (?) ॥
एकर्चे एकवर्गः स्यादेकश्च नवकस्तथा ।
द्वौ वर्गौ तु द्व्यृचौ ज्ञेयौ ह्यूनं तृचशतं स्मृतम् ॥
चतुष्कं शतमेकं च चत्वारः सप्ततिस्तथा ।
पञ्चकानां सहस्रं तु द्वे च सप्तोत्तरे शते ॥
त्रीणि शतानि षट्कानां चत्वारिंशत् षट् च वर्गकाः ।
शतमूनविंशतिभिः सप्तकानामूनाष्टिरष्टकानाम् ॥
ऋचां दश सहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिः पादश्च १०५८० । पारायणं सम्प्रकीर्तितम् ।
अर्द्धर्चानां सहस्राणामेकविंशतिकं तथा ।
शतद्वयं तु द्वात्रिंशत्सपादं २१२३२ । मुनिभिः पुरा ॥
शाकल्यदृष्टे पदलक्षमेकं
सार्द्धं च वेदे त्रिसहस्रयुक्तम् ।
शतानि चाष्टौ दशकं द्वयं च १५३८१२
पदानि चर्चा दश चर्चितानि ॥
एकं च शतसहस्रं च दश च सहस्राणि सप्त शतानि ।
चर्चापदानि ज्ञेयानि पदानि चान्यानि चत्वारि ॥
चत्वारि शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि ४३२००० ॥"
इति ।

एवं यजुर्वेद-सामवेद-अथर्ववेदीयसंहिताग्रन्थानां मन्त्रादिसंख्या वायुपुराणे पूर्वार्द्धे ५९ । ६० । ६१ आध्यायेषु निरूपिता ।

माधवाचार्येण पराशरमाधवाख्ये पराशरस्मृतिभाष्ये १९२ स्मृतीनां संख्या कृता। यथा

"पराशरस्मृतावस्यां ग्रन्थकल्प्तिर्विविच्यते।
द्वे काण्डे द्वादशाध्यायाः श्लोका अष्टोनषट्शतम्॥"

एवं महाभारते आदिपर्वणि संपूर्णस्य महाभारतस्य पर्वावान्तरपर्वाध्यायश्लोकानां संख्या कृता।

तथा मार्कण्डेयपुराणान्तर्गतचण्डीसप्तशतीस्तोत्रस्य टीकायामन्ते नागेशभट्टेन कात्यायनीयतन्त्रानुसारेण प्रत्येकाध्यायस्य प्रत्येकमन्त्राणामक्षराणां संख्यां प्रदर्श्य "अत्रायं गोप्यविधि"रित्यादिना संख्या लिखिता। यथा

मार्कण्डेय उवाच ५ वैश्य उवाच २ राजोवाच ४ ऋषिरुवाच २७ भगवानुवाच १ ब्रह्मोवाच १ देव्युवाच १२ देवा ऊचुः ३ दूत उवाच २ अर्द्धश्लोकाः ४० पादमन्त्राः २३ पादार्द्धमन्त्राः २२ सार्द्धपादार्द्धश्लोकमन्त्राः २२ श्लोकमन्त्राः ५३६ इत्थं सप्तशतमन्त्राः ७०० श्लोकसंख्या ५७८ ग्रन्थसंख्या ६०२ अक्षरसंख्या १९२७२।

अपि च महाभाष्यानुसारी पाणिनिसूत्रपाठो भिन्नः काशिकादिवृत्त्यनुसारी च भिन्न इति नागेशभट्टेनैव।

त्रीणि सूत्रसहस्राणि नव सूत्रशतानि च।
चतुःषष्टि च सूत्राणि कृतवान् पाणिनिः स्वयम्॥

महाभाष्यानुसारिपाणिनिव्याकरणसूत्रसंख्यानिर्णयः कृत इति।
काशिकासम्मतश्चायं सूत्रपाठ इति प्रदर्श्य।

"त्रीणि सूत्रसहस्राणि तथा नव शतानि च।
चतुर्णवतिसूत्राणि पाणिनिः कृतवान् स्वयम्॥"

इत्युक्तम्। इदं पुस्तकद्वयमस्मन्निकटे वर्तते।
एवं शारीरकमीमांसासूत्रपाठनिर्णयेऽपि

"सूत्रं तु पञ्चपञ्चाशदुत्तरं शतपञ्चकम्"।

५५५ सूत्राणि इति वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालये वर्तमाने शारीरकसूत्रसारार्थचन्द्रिकापुस्तके निरूपितम्।

ग्रन्थं रचितवान् । यत्र न केवलं न्यायदर्शनाध्यायाह्निकप्रकरणसूत्राणां संख्या निर्धारिता किन्तु पदानामक्षराणामपि संख्या निर्धारिता। एवमुदयनाचार्या न्यायपरिशिष्टाख्यां(१) बोधसिद्धिर्बोधशुद्धिर्वेत्यपरनामधेयां न्यायसूत्रवृत्तिमेवं महानैयायिकश्रीगङ्गेशोपाध्यायात्मजवर्द्धमानोपाध्याया अपि अन्वीक्षानयतत्त्वबोधाख्यां न्यायसूत्रवृत्तिं निर्मितवन्त(२) इति ।

अपरोऽपि वाचस्पतिमिश्रो न्यायतत्त्वालोकाख्यां न्यायसूत्रवृत्तिं रचितवान् तत्त्वचिन्तामणिप्रकाशाख्यां तत्त्वचिन्तामणिव्याख्यामपि, तेनैव

"श्रीवाचस्पतिमिश्रेण मिथिलेश्वरसूरिणा(३) ।
लिख्यते मुनिमूर्धन्यश्रीगोतममतं महत् ॥"

---

(१) अस्य ग्रन्थस्य खण्डितमेकं जीर्णं पुस्तकं ममान्तिके वर्त्तते । तट्टीकापि न्यायपरिशिष्टप्रकाशाख्या वर्द्धमानोपाध्यायकृता वर्त्तते ।

(२) सूत्रपाठनिर्णयार्थं तत्सारार्थनिरूपणार्थमेव वा उदयनाचार्यवर्द्धमानोपाध्यायादिभिर्वृत्तिग्रन्था रचिता नो चेत् तात्पर्यपरिशुद्धिग्रन्थेन तट्टीकया न्यायनिबन्धप्रकाशाभिधया च सर्वांशस्य व्याख्यातत्वात् किमपरमवशिष्टं यदर्थं वृत्तिग्रन्थः पार्थक्येन रचित इति ।

(३) "श्रीभैरवेन्द्रधरणीपतिधर्मपत्नी
राजाधिराजपुरुषोत्तमदेवमाता ।
वाचस्पतिं निखिलतन्त्रविदं नियुज्य
द्वैतविनिर्णयविधिं विधिवत् तनोति" ॥

इति द्वैतनिर्णये ।

अस्य वाचस्पतिमिश्रस्य जीवनचरितमाचार्यवाचस्पतिमिश्रजीवनचरितप्रकरणे प्रपञ्चयिष्यते ।

इत्यादिना न्यायसूत्रोद्धारनामा ग्रन्थो(१) रचितः किं तु तत्र सूत्रपाठ एव न त्वपरः कश्चिल्लेखः सूत्राणां निर्णायक इति ।

न्याय–वैशेषिक–सांख्य–योग–कर्ममीमांसा—भक्तिमीमांसा–ब्रह्ममीमांसाशास्त्रसूत्राणामार्षत्वादाप्तोक्तत्वाद्वा समानं प्रामाण्यमित्यत्र सन्देह एव नास्ति । इदं तु व्याख्याकाराणां व्याख्यानकौशलं यत् स्वशास्त्रोत्कर्षस्थापनायेतरमतखण्डनेन स्वमतव्यवस्थापनम् । सर्वाण्येव शास्त्राणि अनेकात्मप्रतिपादकानि ब्रह्ममीमांसाशास्त्रे (वेदान्ते) विवादो व्याख्याकारमूलक एवेति नैव तिरोहितमस्ति दार्शनिकानाम् । तर्काप्रतिष्ठानादित्यादिना सूत्रेण २ । १ । ११ एतेन शिष्टापरिग्रहा अपि व्याख्याता २ । १ । १२ इत्यादिसूत्रेण च नास्तिकानामुपनिषदुक्तानां निराकरणं न तु न्यायादिदर्शनानां तत्र आर्षोक्तत्वात् शिष्टपरिग्रहात् । किं तु शङ्कराचार्यादिभिर्हठादेव तथा व्याख्यातं सूत्रेषु तदभावादिति । यत्तु एतेन योगः प्रत्युक्त इत्याद्युक्तं तत्राप्यर्थान्तरसंभवादार्षं व्याख्यानमपेक्षत इति ।

यत्तु स्कन्दपुराणीयकालिकाखण्डे १५–१८ अध्यायेषु वेदादिविद्यानामितिहासो विस्तरेण निरूपितस्तत्रैव १७ अध्याये ।

> “आश्वलायननामासौ शौनकात् प्राप्य चाखिलम् ।
> संगृह्यापि च वैतानं सूत्रं होतुर्विनिर्ममे ॥
> आपस्तम्बो भरद्वाजः सत्याषाढो(२) महामुनिः ।
> कात्यायनोऽथ वि–नास्तथा(?) बोधायनो मुनिः ॥
> तत्रैवाध्वर्युसूत्राणि निर्ममुर्यजुषां तथा ।

---

(१) अयं न्यायसूत्रोद्धारग्रन्थो विजयनगरसंस्कृतसीरीज-मुद्रितेन न्यायभाष्येण साकं मुद्रितोऽस्ति ।

(२) सत्याषाढो हिरण्यकेश एव इति सम्प्रदायविदः ।

जैमिनिः सामसूत्राणि निर्ममे छन्दसां ततः ॥
सर्वेषां प्रत्ययैः कर्म यज्ञीयं समभूत् तदा ।
गोतमः स्वेन तर्केण खण्डयन् तत्रतत्र हि ॥
शप्तोऽथ मुनिभिस्तत्र शार्गालीं योनिमृच्छति ।
पुनश्चानुगृहीतोऽसौ श्रुतिसिद्धान्ततर्कतः ।
सर्वलोकोपकाराय तव शास्त्रं भविष्यति ॥" इत्युक्तम् ।
तत्तु शापानुग्रहाभ्यां समन्वयनीयम् ॥

प्राणतोषिणीतन्त्रे तु अष्टादशविद्यानिरूपणप्रस्तावे "गोतमेन तथा न्याय"मित्यादिवचनानि गन्धर्वतन्त्रनाम्ना समुद्धृत्य न्यायनिन्दाप्रशंसासमन्वयः कृतस्तथाहि "गन्धर्वतन्त्रे" ।

"गोतमप्रोक्तशास्त्रार्थनिरताः सर्व एव हि ।
शार्गालीं योनिमापन्नाः सन्दिग्धाः सर्वकर्मसु ॥

अत एव महाभारते मोक्षधर्मे काश्यपेन्द्रसंवादे ।
अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थकाम् ॥ इति प्रस्तुत्य
आक्रोष्टा चातिवक्ता च ब्रह्मयज्ञेषु वै द्विजान् ।
यस्येयं फलनिष्पत्तिः शृगालत्वं मम द्विज ॥
इति ब्राह्मणं प्रति शृगालवाक्यम् ।

नन्वा'न्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरीति' कालीकुलसर्वस्वीयवचनेन आद्यानामसहस्रान्तर्गतत्वेनान्वीक्षिकयाः श्रीमद्दक्षिणकालिकास्वरूपाया अध्ययनरूपोपासनया यदि शृगालत्वं स्यात् तदा चतुर्वर्गफलं कुतो लब्धव्यमिति चेत् सत्यम् आन्वीक्षिक्यध्यात्मविद्येति ब्रूमः सा च दत्तात्रेयप्रणीता न गोतमोक्ता तथा च भागवते प्रथमस्कन्धे ।

'षष्ठे ऽत्रेरपत्यत्वं वृतः प्राप्तोऽनुसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥' इति ।

अत्रिणा वृतः सन् तस्यापत्यत्वं प्राप्तः कथमित्याह अनसूयया मामेवापत्यं वृतवान् इति दोषदृष्टिमकुर्वान्नित्यर्थः । शेषं सुगमम् । "आन्वीक्षिकीमात्मविद्यामिति" श्रीधरस्वामिना व्याख्यातं न गोतमोक्तविद्या सा तु तर्काह्वयत्वेन प्रसिद्धेति चेन्नैवम् तथात्वे आन्वीक्षिकीं तर्कविद्यामिति मोक्षधर्मश्लोके तर्कविद्येति विशेषणम् आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोरित्यमरसिंहोक्तं न सङ्गच्छते तस्मात् तयोर्द्वयोरेवान्वीक्षिकीति नामधेयम् । अथ तदुक्तदोषस्तदवस्थ इति सत्यम् गन्धर्वतन्त्राभिप्रायमनालोच्य दोषमाशङ्कसे तथाहि निष्ठाया अतीतार्थाभिधायित्वाच्छार्गालीं योनिमापन्नाः प्राप्ताः शृगालयोनिकाः सर्व एव गोतमप्रोक्तशास्त्रार्थनिरताः केवलं तर्कशास्त्रनिपुणाः सन्तः सर्वकर्मसु सन्दिग्धा भवन्तीति वचनस्य निर्गलितार्थः । शास्त्रान्तरव्यावृत्तिस्तु निपातेन व्यज्यते । अत एव

'आम्नायार्थाविवादेन न्यायचिन्तां करोति यः ।
तेन निःश्रेयसं प्राप्यं शार्गालीं योनिमन्यथा ॥'

इति पठन्ति । मोक्षधर्मश्लोकार्थस्तु तर्कविद्यामान्वीक्षिकीमनुरक्तोऽहं द्विजानाक्रोष्टातिवक्ता च यस्य ब्राह्मणं प्रत्याक्रोशस्य अतिवादस्य च फलनिष्पत्तिर्मम शृगालत्वमिति । युक्तं चैतद् वाचिकपापस्य मनुना तथात्वस्य प्रतिपादितत्वात् तथा च मनुः

'शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षितां याति मानसैरन्त्यजातिताम् ॥' इति ।

मानसपापं तु न गृहस्थानामित्यग्रे वक्ष्यते । कलीतरपरं वा तथा च भागवते प्रथमस्कन्धे

'नानुद्वेष्टि कलिं संम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥'

सारङ्गोभ्रमर इव सारग्राही संम्राट् राजा कलिं नानुद्वेष्टीत्यन्वयः । कुशलानि पुण्यानि आशु सङ्कल्पेन सिद्ध्यन्ति फलन्ति । इतराणि पापानि नाशु सिध्यन्ति यतस्तानि कृतान्येव सिद्ध्यन्ति न तु सङ्कल्पमात्रादित्यर्थः । सङ्कल्पः कर्म मानसमित्यमरः । यदि तु तर्कविद्यापाठेन शृगालत्वमुच्यते तदा तु मोक्षधर्मस्थाक्रोष्टेत्यादिश्लोकस्य वैयर्थ्यं स्यादिति सुधीभिर्विचार्यमिति ।" इत्थं च प्राणतोषिणीकृद्व्यवस्थाया आक्रोशस्य अतिवादस्य च फलं शृगालत्वं न त्वान्वीक्षिक्यनुरागस्येति निष्कर्षः ।

यत्तु सांख्यप्रवचनभाष्ये पराशरोपपुराणनाम्ना

" अक्षपादप्रणीते च काणादे सांख्ययोगयोः ।
त्याज्यः श्रुतिविरुद्धोंशः श्रुत्येकशरणैर्नृभिः ॥
जैमिनीये च वैयासे विरुद्धांशो न कश्चन ।
श्रुत्या वेदार्थविज्ञाने श्रुतिपारं गतौ हि तौ ॥"

इति वचनं समुद्धृतं तत्सर्वं पूर्वोक्तन्यायप्रशंसाप्रतिपादकश्रुतिस्मृतिपुराणेतिहासादिविरुद्धत्वादेकदेशीयत्वादुपपुराणोक्तत्वाच्चोपेक्षणीयम् ।

तथाहि श्रुतिस्मृतिपुराणसदाचारबलाबलपरीक्षायाम् पूनानगरस्थानन्दाश्रमयन्त्रमुद्रितगौतमप्रणीतधर्मसूत्रे २ पृष्ठे "अथ यत्र द्वे विरुद्धे तुल्यबले प्रमाणे उपनिपततः, यथा "अतिरात्रे षोडशिनं गृह्णाति" "नातिरात्रे षोडशिनं गृह्णाति" "उदिते

जुहोति" "अनुदिते जुहोति" इतिश्रुत्योर्विरोधः, तथा "नित्य-मभोज्यं केशकीटावपन्नम्" इति गौतमः "पक्षिजग्धं गवाघ्रा-तमवधूतमवक्षुतम् । केशकीटावपन्नं च मृत्प्रक्षेपेण शुध्यति" इति मनुः । तत्र किं कर्त्तव्यम् तुल्यबलविरोधे विकल्पः । प्रकर्ष-बोधने तु श्रुतिस्मृतिविरोधे स्मृत्यर्थो नादरणीयः अतुल्यबल-त्वात्, अत एव जाबालिराह

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्यं स्मार्त्तं वैदिकवत् सदा ॥"
आचरात्तु स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम् ।
तेन ह्यन्तरितं तेषां प्रामाण्यं विप्रकृष्यते ॥
विस्तरस्तु तन्त्रवार्त्तिकाद्याकरग्रन्थतोऽवगन्तव्यः ॥

यत्तु विश्वनाथन्यायपञ्चाननेन न्यायसूत्रवृत्तौ पृ.५पं.१७ "निग्रहस्थानान्तःपातिनां हेत्वाभासानां पृथगभिधानप्रयोजनं जानाति भगवान् अक्षपाद एव" इत्युक्तम् ।

शङ्कराचार्येण बृहदारण्यकोपनिषद्भाष्ये ४ अध्यायस्य २ ब्राह्मणव्याख्याने ।

"अहोऽनुमानकौशलं दर्शितमपुच्छश्रृङ्गैस्तार्किकबलीवर्दै"रिति ।

विज्ञानभिक्षुणा विज्ञानामृताख्ये ब्रह्ममीमांसाभाष्ये अ-द्वैतसिद्धान्तखण्डनप्रसङ्गे "आधुनिकास्तु" "प्रच्छन्नबौद्धास्तु" इत्यादिवाक्यैः शङ्कराचार्या एव परिगृहीताः ।

प्रशस्तपादभाष्यटीकायां न्यायकन्दल्यां तदलं प्रकोपितैः श्रोत्रियवृद्धद्विजन्मभिरित्यादिवाक्यैर्जैमिनीया एव परिगृहीताः ।

तत्सर्वं प्रस्थानभेदेन औद्धत्येन वा कृतमेवं समन्वयनीयम् ॥

आधुनिकन्यायतत्त्वविदस्तु वदन्ति । एतानि न्यायदर्श-

नसूत्राणि खण्डितानि(१) पुरातनान्न्यायदर्शनाद् याथातथ्येनोपलब्धात् केनचित् समुद्धृतानि यतः परीक्षाप्रकरणे प्रमाणादीनां परीक्षां विहाय प्रथमतः संशयस्यैव परीक्षितत्वात् सकलपदार्थानां परीक्षाभावात् उद्देशक्रमपरीक्षाक्रमयोर्वैषम्याच्च । इदं वात्स्यायनीयं न्यायभाष्यमपि विहाय किमपि प्राचीनं न्यायभाष्यमासीत्(२) इदमुपलभ्यमानं वार्त्तिकमपि विहाय किमपि प्राचीनं वार्त्तिकमासीत्(३) हेत्वाभाससूत्रवार्त्तिके "वार्त्तिकं कुर्वाणेनोक्त"मित्याद्युक्तत्वात् ।

इदं सर्वं कुकल्पनामात्रं शास्त्रतात्पर्यानवबोधात् वाचस्पतिमिश्रोदयनाचार्यवर्द्धमानोपाध्यायादिभिरचर्चितत्वाच्च ॥

अभिनवदार्शनिकास्तु वदन्ति "यस्मिन् समये ऋग्वेदादिसंहिताग्रन्थानां(४) मन्वादिस्मृतीनां वायुपुराणादि-

---

(१) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके सिद्धान्तलक्षणसूत्रटिप्पण्यां द्रष्टव्यम् ।

(२) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके सिद्धान्तलक्षणसूत्रटिप्पण्यां द्रष्टव्यम् ।

(३) विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तके भूमिकायां २ पृष्ठे "सूत्रनिर्माणभाष्यनिर्मितिकालमध्ये कश्चन वार्त्तिकं निर्ममौ यन्नाम साम्प्रतं नोपलभ्यते यथा पाणिनीयव्याकरणे सूत्रभाष्ययोरन्तरा कात्यायन इति तर्कयतां पाश्चात्यानां मतेन वार्त्तिकवचनानीत्यादि ।"

विण्डिशमहाशयेनक्त एवार्थः प्रसाधितः । "Ueber Das Nyâyabhâshya", von Ernst Windisch, Leipzig,

(४) संहिताग्रन्थेषु पृथिव्यापस्तेजोवायूनामन्येषामपि स्तुतिपराणि वाक्यानि रचितानि तेषां समूहाः सूक्तानीत्युक्तानि भवन्ति तेषां समुदायः संहितापदवाच्य इति संहिताया अन्वर्थं नामेति तेषां सिद्धान्तः ।

पुराणानां च प्रणयनं तस्मिन् समये मूर्खबहुले संसारेऽध्यात्मविद्याया अभावात् कोऽपि पुरुषस्तद्विद्याप्रणयने न समर्थ आसीदिति पञ्चभिः पुरुषैरितस्ततः प्रकीर्णानि न्यायविद्यासम्बन्धीनि ५२८ लघुवाक्यानि कल्पितानि अत एव तान्यनवस्थितानि यतश्चतुर्ष्वध्यायेषु आधुनिकतार्किककल्पितोद्देशलक्षणपरीक्षानुसारेण याथातथ्येन शास्त्रसमाप्तिः कृता पञ्चमाध्यायस्तु व्यर्थ एव ॥

एवं शारीरकमीमांसासूत्राणि १२००० नारदेन प्रणीतानि तद्भाष्यमपि ६०००० श्लोकात्मकं महर्षिणा वार्ष्यायणेन(१) प्रणीतम् । उपलभ्यमानानि वेदव्यासकृतित्वेन प्रसिद्धानि शारीरकमीमांसासूत्राणि शाङ्करं तद्भाष्यमप्युपलभ्यमानं यमनराज्यप्राबल्यसमये सर्वगोपनार्थमद्वैतसिद्धान्तप्रचारार्थं केनाचिन्महाधूर्तेन प्रणीतमिति ॥"

अत्र परीक्षकास्तत्त्वविदस्तु वदन्ति प्रमेयसिद्धिः प्रमाणाद्धीति अभिनवदार्शनिकैर्निरूपितेऽर्थे न किमपि प्रमाणं दर्शितं नापि बलवती युक्तिरभिहितेति तत्सर्वं खपुष्पशशविषाणनिरूपणायितमिति । तत्सिद्धान्तस्य परीक्षणेऽस्माकं वाक्यद्वयं स्फुरति ।

"घटं भिन्द्यात् पटं छिन्द्यात् कृत्वा रासभरोहणम् ।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ॥"
"मुखमस्तीति वक्तव्यं दशहस्ता हरितकी ॥" इति ।

अपि च । प्रयागक्षेत्रे भूतपूर्वप्रदर्शिन्यामेकः सुदीर्घकायो लम्बग्रीवः सुपुष्टाङ्गो नातिवृद्धस्तिलकमालाधारी वैष्ण-

(१) "वार्ष्यायणि"रिति तु निरुक्तग्रन्थनाम्ना नागेशभट्टेन समुद्धृतं वैयाकरणसिद्धान्तमञ्जूषायाम् ।

वाभासः प्रदर्शनीयपुस्तकसंग्रहभवने मिलितो यत्रान्यत्रासुलभानि बहुमूल्यानि महाभारतादीनि पुस्तकानि स्थापितान्यासन् तेन महापुरुषेणोक्तम् "ममान्तिक एकमेवास्ति महत्पुस्तकम् यत्र भूतभविष्यद्वर्तमानानां समस्तजगतः पुस्तकानामन्तर्भावोऽस्ति यथा

वेदस्मृतिपुराणेषु तन्त्राङ्गोपाङ्गनीतिसु।
कौमुदीनां सहस्राणि चन्द्रिकानां तथैव च॥
कौस्तुभानां तु लक्षाणि दर्पणानां तथैव च।
मनोरमाणां लक्षाणि प्रकाशानां तथैव च॥
चिन्तामणीनामयुतं प्रदीपानां सहस्रकम्।
लघुभाष्यमहाभाष्यटीकानां टिप्पणस्य च॥
विवरणानां च विवृतेर्लघुवृत्तेश्च दीधितेः।
सुबोधिनीदीपिकानां प्रयुतान्यर्बुदानि च॥
सारास्तेषां संगृहीता ग्रन्थे मार्तण्डमण्डले।
तिस्रः कोट्योऽर्द्धकोटिश्च ग्रन्था मार्तण्डमण्डले॥"इत्यादि।

अत्र परीक्षका वदन्ति। सर्वैरपि निबन्धकारैरनिबन्धकारैश्च विद्वद्भिरदृष्टत्वादनुद्धृतत्वादस्य ग्रन्थस्य महत्त्वस्य चासम्भवदोषेण दूषितत्वात् स च शविषाणायित इति॥

पाश्चात्यानुयायिनस्तु "तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः" (४ अ. २ आ. ४६ सू.) इति सूत्रव्याख्याने "योगशास्त्राच्चाध्यात्मविधिः प्रतिपत्तव्य इति भाष्यकारेणोक्तत्वात् योगशास्त्रस्य पतञ्जलिप्रणीतत्वात् पतञ्जलेश्च ख्रीष्टाब्दारम्भात् १४० वर्षेभ्यः पूर्वं तदासन्नसमये वा वर्तमानत्वात् तत्पश्चात्काले न्यायसूत्राणां निर्माणं जातमिति वदन्ति। तन्मन्दम्। पातञ्जले व्याकरणमहाभा-

ष्ये(१) प्रथमाह्निक एव "सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या(२) बहुधा भिन्ना एकशत-

---

(१) योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य तु वैद्यकेन ।
योपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

चरक एव पतञ्जलिरिति भावप्रकाशे आयुर्वेदोत्पत्तिप्रकरणे विस्तरेण निरूपितम् ।

(२) केचित्तु "रहस्यमुपनिषद् मन्वादिस्मृतयो वा" इति महाभाष्यप्रदीपोद्द्योते नागेशभट्टेनोक्तत्वादुपनिषदर्थप्रतिपादकत्वान्न्यायमीमांसाधर्मशास्त्राणां तत्र गतार्थत्वात् तेषामुपादानस्य पौनरुक्त्यमुद्भाव्य तत्पाठस्य प्रक्षिप्तत्वं कल्पयन्ति तथात्वेऽपि इतिहासः पुराणमिति पाठस्य मुद्रितामुद्रितसर्वसाधारणेषु महाभाष्यपुस्तकेषु वर्तमानत्वात् पुराणेषु च न्यायस्य निरूपणात् योगापेक्षया न्यायस्यातिपुराणत्वं दुर्वारमेव । यथा च पुराणेषु न्यायनिरूपणं तथा प्रतिपादितमधस्तात् । यद्वा "वाको वाक्यं तर्कशास्त्र"मिति छान्दोग्योपनिषद्भाष्ये ७ प्रपाठके १ खण्डे शङ्कराचार्येणोक्तत्वात् वाको वाक्यमितिप्रतिपादकव्याकरणभाष्यापेक्षया न्यायस्य प्राचीनत्वमित्याहुः ।

यद्वा । छान्दोग्योपनिषदि ३ प्रपाठके १७ खण्डे "तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच" इति । श्रीकृष्णेन तु भगवद्गीतायाम् ५ अध्याये ।

"सांख्ययोगौ पृथक् बालाः प्रवदन्ति न पण्डिताः ।"
"एकं सांख्यं च योगं च यः पश्यति स पश्यति॥" इति ।

४ अध्याये ।

"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवे ऽब्रवीत् ॥ १ ॥
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥ ३ ॥"

मध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाऽथर्वणो वेदः वाको वाक्यमितिहासः पुराणं न्यायो मीमांसा धर्मशास्त्राणि वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः" इत्याद्युक्तत्वात् योगापेक्षया न्यायस्य प्राचीनत्वासिद्धेः॥

एके निरूपयन्ति "ख्रीष्टाब्दारम्भात् परं षष्ठशताब्द्यामन्ते सप्तमशताब्द्यामारम्भे वा बौद्धो दिङ्नागाचार्यः प्रादुरभूत् तन्मतखण्डनात् न्यायवार्त्तिककार उद्द्योतकराचार्यो दिङ्नागादर्वाचीनः वार्त्तिककारात् वर्षशतकात् पूर्वं भाष्यकारो वात्स्यायनः भाष्यकारात् वर्षशतकात् पूर्वं वर्षशतकद्वयाद्वा पूर्वं न्यायसूत्रप्रणेता गौतमः बुद्धोऽपि गौतमः

अपि च श्वेताश्वतरोपनिषदि ६ अध्याये

"तत्कारणं सांख्ययोगाधिगम्यं
ज्ञात्वा देवं मुच्यते सर्वपापैः॥ १३॥"

अत्रेदं न भ्रमितव्यं यत् तदानीं कापिलं सांख्यं नासीदेव ५ अध्याये ऽत्रैवोपनिषदि "ऋषिं प्रसूतं कपिलं यस्तमग्रे" इत्याद्युक्तत्वात्। देवकीपुत्रेण श्रीकृष्णेन भगवद्गीतायां १० अध्याये

"सिद्धानां कपिलो मुनिः॥ २६॥"

इत्युक्तत्वाच्च।

अत्रान्वेषकंमन्याः स्वाभिप्रायसिद्धये छान्दोग्योपनिषदुक्ता देवकी भिन्ना तत्पुत्रः कृष्णोऽपि भिन्नः महाभारतभागवताद्युक्ता देवकी भिन्ना तत्पुत्रः कृष्णोऽपि भिन्नः सांख्यकर्ता कपिलो भिन्नः उपनिषदुक्तः कपिलस्तत्कृतं सांख्यं च भिन्नमित्यादि प्रलपन्ति। तत्तूपहासास्पदम् तथोक्ताभिन्नत्वे तेषुतेषु ग्रन्थेषु देवकीकृष्णोक्त्या तदानन्त्यप्रसङ्गात् उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावात् तत्तुल्ययुक्त्या सूर्यचन्द्रादीनामपि प्रत्यहमुदयास्तत्वात् स्थानान्तरे दर्शनात् परिमाणन्यूनाधिक्यदर्शनादेषामप्यानन्त्यकल्पनापत्तेरित्यलं पल्लवितेन॥

जैनोऽपि गौतम आसीत् तन्नामभेदज्ञापनाय सूत्रकारस्य गौतमस्य गोतम इति नाम कल्पितम् ।" इत्यादि ।

अत्र समालोचयामः । महादिङ्नागादिभेदेनानेके दिङ्नागाः सञ्जाता(१) वार्त्तिककारेण कस्य दिङ्नागस्य मतं खण्डितं ? यदि प्रमाणसमुच्चयग्रन्थकर्तुर्दिङ्नागस्य ग्रहणं तदा यथाकथञ्चित् आख्यायिकालापादिश्रवणेन तत्समयनिर्णयेऽपि तत्पश्चात्कालवर्त्तित्वं वार्त्तिककारस्य कथमपि भवितुं नार्हति प्रमाणग्रन्थं विहायापि प्रमेयादिग्रन्थेष्वपि दिङ्नागमतखण्डनदर्शनात् सम्पूर्णन्यायग्रन्थसमालोचकदिङ्नागान्तरसम्भवात् ।

अपि च "वार्त्तिककारात् वर्षशतकात् पूर्वं भाष्यकारो वात्स्यायनः भाष्यकारात् वर्षशतकात् पूर्वं वर्षशतद्वयाद्वा पूर्वं न्यायसूत्रप्रणेता गौतमः" इति यदुक्तं तत्तु "मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी"तिवत्, तत् कस्मात् प्रमाणादवगतं महाशयेनेति ? नावगम्यते । यदि सूत्रभाष्यवार्त्तिककाराणां पूर्वाप-

---

(१) एको दिङ्नागः सङ्घभद्रस्य प्रशिष्यः ख्रीष्टाब्दारम्भात् परं षष्ठशताब्द्यां जातः "India, what can it teach us", pp 305–307

अपरो विक्रमादित्यसभासदा कालिदासेनोक्तः विक्रमादित्यसमयश्च १९७३ वर्षेभ्यः पूर्वमिति हालसप्तशत्या निश्चीयते । महादिङ्नागादयोऽत्रैव ६१ पृष्ठ निरूपिता इत्यादिदिङ्नागभेदाः ।

अत्रैव पुस्तके इदमपि निरूपितं तावत् ख्रीष्टाब्दारम्भात् परं षष्ठशताब्द्यां मध्ये कालिदासोऽभूत् एवं चेत् षष्ठशताब्द्यामन्ते सप्तमशताब्द्यामारम्भे वा आविर्भूतं दिङ्नागं कालिदासो "दिङ्नागानां पथि परिहरन्" इत्यादिना मेघदूते कथं लिखेदिति वदतो व्याघातः ।

रभावे नियम एवैतादृशस्तदा माधवाचार्येण १३१२ शका-ब्दे(१) वर्तमानेन वेदधर्मशास्त्रमीमांसाशास्त्रादयो व्याख्याता इति वेदधर्मशास्त्रादिकर्तुरपि वर्त्तमानसमयात् पूर्वं षष्ठशताब्द्यां सप्तमशताब्द्यामेव स्थितिः स्यादिति(२) ।

यत्तु "न्यायसूत्रप्रणेता गौतमः बुद्धोऽपि गौतमः जैनोऽपि गौतम आसीत् तन्नामभेदज्ञापनाय सूत्रकारस्य गौतमस्य गोतम इति नाम कल्पित"मित्युक्तं तस्माद् बहुज्ञत्वं रहस्यज्ञत्वमपि प्रकाशितं भवति । किं तु शतपथब्राह्मणमत्स्यपुराणादि तु दूरे स्थितं महाशयेन नैषधचरितमपि न पठितं येन "गोतमं तमवेत्यैवेति"(३) पठित्वापि गोतम एव तन्नाम इति निश्चितं स्यादिति ।

यत्तु गोतमचरितनिरूपणप्रसङ्गात् "वैशेषिकशास्त्रप्रणेता काणादः स च काकमांसभक्षीति" इत्यादिना एकेनैव यन्त्रेण कणादमपि पेषितवाँस्तन्महदाश्चर्यम् ।

त्रिकाण्डशेष—मेदिनीकोशप्रामाण्यात् काणः काकस्तमत्तीति काणादः काकमांसभक्षीति यावत्(४) ।

उलूका एव काकमांसं भक्षन्तीति अन्वर्थं तस्य वै-

---

(१) आनन्दाश्रमसंस्कृतसीरीजनं० २ विज्ञापने ३ पृष्ठे द्रष्टव्यम् ।

(२) अन्वेषकंमन्यास्तु निर्धारितवन्तः प्रथमं संहिताग्रन्थनिर्माणं ततो ब्राह्मणग्रन्थानां ततश्च सूत्र—भाष्यग्रन्थानां निर्माणं जातमिति । तदपि काल्पनिकमेव आश्वलायनसूत्र एव "सूत्रकारभाष्यकारमितिहासपुराणकार"मित्याद्युक्तत्वात् ।

(३) नैषधचरिते १७ सर्गे ७५ श्लोकः ।

(४) History of Indian Literature, p. 246

शेषिकशास्त्रकर्त्तुः काणादस्य उलूक इति नाम(१)। पक्ष्यात्मकत्वात् कौशिकगोत्र इति आहुण(२)इति नामान्तरं तस्य इत्यादिजैनप्रलापान् हृदि निधाय आर्यशास्त्रेतिवृत्तं सिद्धान्तयन्ति केचित्।

तत्तु सर्वान् वेदान् शास्त्राणि च मिथ्यात्वेन प्रलपतः कस्याचिज्जैनस्य लेखमेव(३)मूर्ध्नि स्थाप्य कणादस्य महर्षे-

(१) न्यायकन्दलीभूमिकोक्तप्रमाणेन कणभुग् वा कणादो वा तस्य महर्षेर्नाम तस्मादागतं शास्त्रं काणादम्। तथैव उलूकादागतं शास्त्रमेव औलूक्यमिति औलूक्यदर्शननाम्ना माधवाचार्येण वैशेषिकदर्शनं समुद्धृतं सर्वदर्शनसङ्ग्रहे।

(२) न्यायदर्शनप्रणेता राहूगणो गोतम इतीतिहासं केनचित् श्रुत्वा वैशेषिकशास्त्रतत्कर्त्तृकणादनिन्दासमये त्वरया निपीडितचेतसा कणाद एव आहुणनाम्ना प्रलपितः। यथा च राहूगणो गोतमो न्यायप्रणेता तथा प्रतिपादितमधस्तात्।

(३) तीर्थकल्पग्रन्थे
"मुनीनां कोटिविंशत्या कुन्त्या च सह निर्वृताः।
कृतार्हत्प्रतिमोद्धारा अत्र ते पञ्च पाण्डवाः॥" इति।

अर्हत्पूजका यदि पाण्डवास्तर्हि धर्मराजो युधिष्ठिर इन्द्रोऽर्जुनो वायुर्भीमोऽश्विनीकुमारौ नकुलसहदेवाविति भारताद्युक्तिः कुत्र गच्छेदिति। भगवतो विष्णोरवतारं सर्वविद्यानिधानं वेदव्यासं चकुक्षित्वेन भगवन्तं पाणिनिं शालातुरीयत्वेन भगवन्तं महर्षिं शाकटायनं शाकटाङ्गजत्वेन सर्वान् श्रोत्रियान् ब्राह्मणान् मिथ्यादृष्टित्वेन गणरत्नमहोदध्यादौ प्रलपन्ति स्म जैनाः तत् किं वस्तुतत्त्वनिर्णायकमितिवृत्तनिर्धारकं वा मन्तव्यं भविष्यति?। पुराणेषु पादपूरणार्थकचकारोपन्यासात् वेदव्यासश्चकुक्षिः चकारपूर्णा कुक्षिर्यस्येति व्युत्पत्त्याऽलपन्न इति शालातुरो ग्रामस्तत्रभवः पाणिनिर्ग्राम्यः शाकटाङ्गजो भारवाहकः शाकटायन इति तेषां हृदयम्।

बुद्धजातके रामलक्ष्मणभरतशत्रुघ्ना भ्रातरः सीता च तेषां भ-

नोम प्रसह्य काणाद इति कल्पयित्वा काणशब्दं कस्मिँश्चित्कोशे काकवाचकं दृष्ट्वा काकमांसभक्षीति निर्धारितवानित्ययुक्तम् ।

वस्तुतस्तु "कणादः काश्यपः समाविति" त्रिकाण्डशेषकोशात् "काश्यपोऽब्रवीदिति प्रशस्तपादभाष्याच्च कश्यपस्य महर्षेः पुत्रः कणाद इति" कणाद इति तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता सञ्ज्ञा" । "स्वयमीश्वरः उलूकरूपधारी प्रत्यक्षीभूय द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपादिदेश" त्यादिपौराणिकीं कथामजानन्तः ।

"योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥"

इतिप्रशस्तपादभाष्यमप्यवज्ञाय अपरिचितनिन्दास्तुतिविषया अज्ञातसिद्धान्तपूर्वपक्षास्ते व्यामोहयन्ति श्रोत्रियद्विजबालकान् । विस्तरस्तु न्यायकन्दलीभूमिकायां ६ । ११ पृष्ठे द्रष्टव्यः ।

केचिद्वदन्ति "शतपथब्राह्मणाद्युक्तो गोतमः शाक्यसिंहो बुद्धो गौतमः इन्द्रभूतिर्जैनगौतमश्च एते ख्रीष्टाब्दारम्भात् ६०० वर्षेभ्यः पूर्वं वर्तमाना एककालावस्थायिन(१)

गिनीति भगिन्या सह विवाहो जात इति वाल्मीकिरामायणाध्यात्मरामायणादि सर्वं मिथ्यैवेति ।

एवं सति एकधर्मावलम्बिनिरूपितापरधर्मिकेतिहासादिना वस्तुस्थितिर्नावगन्तव्या यथा च आचार्यवाचस्पतिमिश्रेण सांख्यतत्त्वकौमुद्याम "पुरुषापसदैर्विगानैः पशुप्राये" रित्यादिना बौद्धा जैनाश्च परिगृहीताः ।

(१) यास्कासुरायणयोः शिष्यो जातूकर्ण्य इत्यत्र शतपथब्राह्मणं प्रमाणं प्रदर्श्य यास्कासुरायणयोः ख्रीष्टाब्दारम्भात् पूर्वं षष्ठशताब्द्यां स्थितिर्निर्णीता । अत्र गुरुपरम्पराबोधकं दिव्यावदानीय ३३ अध्यायस्थं वचनं "ब्रह्मा देवानां परमतापसः इन्द्र-

आसन् परं गोतमेन तस्मिन् समये न्यायसूत्राणि प्रणीतानि न वेति ? प्रणीतानि वा पञ्चाध्यायात्मकानि प्रणीतानि न वेति सन्देहः। मम तु मतं प्रथमाध्याय एव प्रणीतो द्वितीय-तृतीय-चतुर्थाध्यायाः येषु वैशेषिक-योग-मीमांसा-वेदान्त-बौद्धदर्शनानां समालोचनानि तेऽन्येन केनचिद्ग्रन्थकारेण भिन्ने समये रचिताः। एष्वध्यायेषु अनेकत्र लङ्कावतारसूत्रेभ्यो नागार्जुनकृतमाध्यमिकसूत्रेभ्यः आर्यदेवकृतशतकाच्च अक्षरशो विषयाः समुद्धृताः। एते च ग्रन्थाः खीष्टाब्दारम्भसमयनिकटवर्त्तिन इति।"

अत्र समालोचयामः। शतपथब्राह्मणादुक्तो गौतम इत्यत्रादिशब्देन ऋग्वेदसंहिता-अथर्ववेदसंहिता च गृहीता। तथा सति न्यायसूत्रकर्ता गोतमो बुद्धगौतमो जैनगौतमश्च एककालावस्थायिन इति ऋग्वेदसंहितादिषु गोतमोक्त्या बुद्ध-जैनगौतमात् पश्चात्कालभाविनस्ते ग्रन्था इति निष्पन्नम्। बुद्धात् पूर्वम् ऋग्वेदसंहितादयो ग्रन्था नासन्नेवेति हृदयम्।

वेदधर्मशास्त्रपुराणतन्त्रादिषु यत्रयत्र गोतमशब्दाः यत्रयत्र

स्य कौशिकस्य वेदार्थान् वाचयति स्म। इन्द्रः कौशिकोऽरणेमींगौतमे (?) वेदान् वाचयति। अरणेमींगौतमौ श्वेतकेतु वेदान् वाचयतः। श्वेतकेतुः शुक्रं पण्डितं (?) वेदान् वाचयति।" इत्यादि प्रदर्शितम्। अत्र शिष्यात् पूर्वं गुरोः स्थितिस्तत्पूर्वशताब्द्यामिति क्रमेण निर्धारिते खीष्टाब्दारम्भात् पूर्वं गौतमस्य स्थितिः षष्ठशताब्द्यामन्ते सिद्ध्यति।

एवं चेत् परमगुरोर्ब्रह्मणः स्थितिः सप्तमशताब्द्यां सम्भवति तथा च ब्रह्मविष्णुमहेश्वराणामेककालावस्थायित्वादेतेषां स्थितिमरणादिकं च खीष्टाब्दारम्भात् सप्तमशताब्द्यां भवेदिति केन वारणीयम् ?

वा गौतमशब्दास्तेषां वाचक एक एव पुरुषस्तेनैव न्यायशास्त्रं तेनैव धर्मशास्त्रं तेनैव पितृमेधसूत्रं तेनैव यत् कर्तव्यं तत् सर्वं कृतम्(१) अत्र गौतमीयं तन्त्रं कस्माद्विस्मृतमिति न बुद्ध्यामहे ? किन्तु प्रमेयसिद्धिः प्रमाणाद्भवतीति "इदं मया बुद्ध्यते" "इदं मया न बुद्ध्यते" इति कथनादेव कथं परप्रतिपत्तिर्भविष्यतीत्यपि न बुद्ध्यामहे। प्राधान्येन प्रमाणनिरूपणपरस्य न्यायशास्त्रस्य माहात्म्यं यथा वेदधर्मशास्त्रपुराणादिषु दृश्यते तथा नैव तिरोहितमस्ति विदुषाम्। एवं स्थिते न्यायशास्त्रस्य प्रामाण्याप्रामाण्यपरीक्षकस्य कियती सामग्र्यपेक्षितेति पूर्वोक्तवचनान्येव बलवत्यो युक्तय इति महदाश्चर्यम्।

अत्र त्रयाणां गोतमादीनामेककालावस्थायित्वमुक्त्वैव न सम्भवति प्रमाणाभावादिति प्रथमः। बुद्धगौतमजैनगौतमयोर्यथाकथञ्चित् बौद्धजैनपट्टावल्यादिदर्शनात् समयनिर्णयेऽपि शतपथब्राह्मण-(२)ऋग्वेदसंहिताथर्ववेदसंहितोक्तगो-

---

(१) अत्र देवयाज्ञिकलेख एव प्रमाणम्। शास्त्रत्रयस्य कर्ता एक एव गौतमः अत्र प्रमाणं स एव जानाति। अस्माभिर्यदुक्तं योग-व्याकरण-वैद्यककर्ता एक एव पतञ्जलिस्तत्र प्रमाणं स्कन्दपुराणीयागस्त्यसंहितास्थं पतञ्जल्याविर्भावप्रकरणम्।

(२) नव्यास्तु इतिहासेन युक्त्या कल्पनया वा वेदानां समयनिर्णयं तु कृतवन्त एव परं नक्षत्रग्रहगणितेन दुरुच्छेद्येन प्रकारेणापि कृतवन्त इति अल्पज्ञानां व्यामोहनमात्रम्। वेदानां प्रणयने देशस्य ज्ञानाभावाद् ग्रहादीनां गणितमकिञ्चित्करं देशनिर्णयेऽपि ग्रहाणां गतिरपि पुनः पुनरपि तथैव भवतीति अव्यवहितपूर्वगतिसमय एव वेदाः प्रणीता इत्यपि स्थिरीकर्तुमशक्यमिति नैव तिरोहितमस्ति विदुषाम्। विस्तरस्तु महामहोपाध्यायश्रीसु-

तमस्यातिचिरन्तनस्य समयनिर्णयस्तु इदानींपर्यन्तं न जात इति द्वितीयः। त्रयाणां समानकालिकत्वे वेदानामपि तत्पश्चाद्भावित्वे बुद्धदेवेन वेदास्तर्कादीनि शास्त्राणि कथं पर्यालोचितानीति बुद्धदेवसमानकालिकेन जैनगौतमेनापि वेदधर्मशास्त्रपुराणतर्कादीनि शास्त्राणि कथं मिथ्याशास्त्रत्वेन(१) प्रति-

---

धाकरद्विवेदिकृताद् बनारसमेडिकल्हालयन्त्रे मुद्रिताद् दिङ्मीमांसाग्रन्थादवगन्तव्य इति नेह पिष्टपेषणभिया प्रपञ्चितमस्माभिः।

(१) "Encyclopaedia of Religion and Ethics" Vol. VII p. 467, article on "Jainism" by H. Jacobi.

श्वेताम्बरजैनास्त्वेवं वदन्ति २४ तीर्थङ्करो महावीरस्वामी स्वशिष्याय गौतमाय इन्द्रभूतये चतुर्दशपूर्वसञ्ज्ञकान् एकादशाङ्गसञ्ज्ञकान् सिद्धान्तानुपदिदेश ते चैकादशाङ्गसञ्ज्ञकाः ४१ भागेषु विभक्ताः यथा ११ अङ्गानि १ आचाराङ्गम् २ सूत्रकृदङ्गम् ३ स्थानाङ्गम् ४ समवायाङ्गम् ५ भगवतीसूत्रमित्यादिना। तत्र ४० नन्दिसूत्रम् ४१ अनुयोगद्वारसूत्रमस्ति। तत्रानुयोगद्वारसूत्रे "जं इमं अन्नाणीहिं मिच्छादिट्ठीहिं सच्छन्दबुद्धिमइ विगप्पियं तं जहा भारहं रामायणं भीमासुरुक्कं कोडल्लयं घोडयमुहं (घोडयमुहं) सगडभद्दियाउ कप्पासियं नागसुहुमं कणगसत्तरीवेसियं वइसेसियं बुद्धसासनं काविलं लोगायतं सट्ठितंतं माढरपुराणं वागरणनाडगाइ अहवा सावत्तरि कलाउ चत्तारिय वेया सङ्गोवङ्गा सेतं लोइयं नो आगमउ भावसुयम्"।

अत्र नन्दीसूत्रे पाठान्तराणि 'कोडल्लयं' कोडिल्लयं। अपि च 'भागवयं पाअंजली पुस्सदेवयं लेहं गणिअं सउणरूपं' एतावान् पाठोऽधिकः।

भगवतीसूत्रे च २।१।२० रिउव्वेय जजुव्वेय सामव्वेय अहव्वणव्वेय इतिहासपञ्चमाणं निघंटुछट्ठाणं चउण्हंवेयाणं संगोवंगाणं सरहस्साणं सारए वारए धारए पारए सडंगवी सट्ठितंतविसारए संखाणे सिक्खा कप्पे वागरणे छंदे निरुत्ते जोइसामयणे अण्णेसुय बहूसु बंभण्णएसु परिव्वायएसु नएसु

पादितानीति तृतीयः । यथा च बुद्धदेवेन वेदादयः पर्यालोचितास्तथा तेनैवोक्तं प्रदर्श्यते ।

ब्रह्मजालसुत्त १-३२

"इध भिक्खवे एकच्चो समणो वा ब्राह्मणो वा तक्की होति वीमंसी । सो तक्कपरियाहतं वीमंसानुचरितं सयं पटिभानं एवं आह ।" इत्यादि ।

अत्तनगलुवंसपुस्तके २२९ पृष्ठे "तक्कसत्थं" तर्कशास्त्रम् ।

ललितविस्तरेऽपि १२ अध्याये "निघण्टौ-निगमे-पुराणे-इतिहासे-वेदे-वैशेषिके-हेतुविद्याया"(१)मित्यादि ।

परिनिट्ठिए याविहोत्था* इति । भगवतीसूत्रविषयकनिबन्धे वेबरमहाशयकृते २ खण्डे २४८ पृष्ठे द्रष्टव्यम् ।

नव्यास्तु उक्ता आगमा अतिनवीना खीष्टाब्दारम्भात् परममुकशताब्द्याममुकशताब्द्यां प्रणीता इति । इति तु श्रूयत एव महावीरस्वामिनः समये लेखनसम्प्रदायाभावात् गुरुपरम्परया श्रुताः शिष्यकण्ठे स्थिताः पश्चाच्च लेखनसम्प्रदायप्रचारेण पुस्तकरूपेण सम्पन्ना जाता इति । यदि च लेखशब्दस्य प्रणयनमेवार्थस्तदा विक्रमादित्यसंवत्सरारम्भात् ४७० वर्षेभ्यः पूर्वमेव निर्वाणं गतानां महावीरस्वामिनां गौतमस्य च संवादो लेखकेन कया रीत्या दृष्टः श्रुतो वेति महान् विप्लवो भवेदिति ।

अत्र लेखनसम्प्रदायाभावस्यायमेवार्थो यदन्यमतावलम्बिभिर्न पाठ्या न च श्राव्या आगमा इति, न च लेखने मूर्खा अज्ञा वेति जैनवृद्धा वदन्ति ।

(१) हेतुविद्या तु गोतमप्रोक्तं न्यायशास्त्रमेवेति महाभारतादौ सुव्यक्तम् । तथाहि

> "न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ।
> हेत्वागमसदाचारैर्यद्युक्तं तदुपास्यताम् ॥"

इति महाभारते शान्तिपर्वणि २१० अध्याये ।

*जैनप्रभाकरयन्त्रमुद्रिते सटीकभगवतीसूत्रपुस्तके १४९ पृष्ठे द्रष्टव्यम् ।

अपि च बुद्धदेवस्य न्यायप्रणेतुर्गोतमस्य च एककालान्तःस्थायित्वं नैव सम्भवतीति चीनदेशीया जापानदेशीयाश्च सिद्धान्तयन्ति तथाहि—Sadajiro Sugiura नामकजापानदेशीयविद्वद्वरेण स्वरचिते "Hindu Logic as preserved in China and Japan" (Philadelphia, 1900; Publications of the University of Pensylvania: Series in Philosophy, No 4 ग्रन्थे २० पृष्ठे निरूपितम् । "एकस्य मते स्त्रीष्टाब्दारम्भात् १०३० वर्षेभ्यः पूर्वं बुद्धदेवस्य जन्माभूव, द्वितीयस्य मते १०१४ वर्षेभ्यः पूर्वं बुद्धदेवस्य जन्माभूत्, तृतीयस्य मते स्त्रीष्टाब्दारम्भात् ७८० वर्षेभ्यः पूर्वं चतुर्थस्य मते ७२३ वर्षेभ्यः पूर्वं पञ्चमस्य मते ७१५ वर्षेभ्यः पूर्वं षष्ठस्य मते ६८७ वर्षेभ्यः पूर्वं सप्तमस्य मते ४८७ वर्षेभ्यः पूर्वं बुद्धदेवस्य जन्माभूदिति ।"

अत्र चीनदेशीया बहवः सिद्धान्तयन्ति खलु महाटीकाग्रन्थे १ । २२ निरूपितमस्ति "भारतवर्षे आदौ न्यायशास्त्रप्रणेता "सक–मक"नामको ब्राह्मणोऽभूव वस्तुतस्तन्नाम "मक–सक" इति । अत्र मकशब्दश्चक्षुर्वाचकः सकशब्दश्च पादवाचक इति गुणवशादेव अक्षपाद इति तेन नाम लब्धम् । वस्तुतः गोतमनाम्नैव सर्वत्र प्रसिद्धिः । अस्याक्षपादापरपर्यायस्य गोतमस्याविर्भावो बुद्धदेवाद् बहुवर्षशताब्दीभ्यः पूर्वमभूदिति ।

"अहमासं पण्डितको हैतुको वेदनिन्दकः ।
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थकाम् ॥
हेतुवादान् विवदता वक्ता संसत्सु हेतुमत् ॥"
इत्यादि महाभारते शान्तिपर्वणि १८० अध्याये ।

"बुद्धदेवस्तु महादार्शनिको नाभूत् किन्तु सामाजिको विषयसंशोधको दयालुश्च तेन पञ्च शुद्धाः सप्त अशुद्धा(पदार्थाः)श्चिन्तिताः(१) अर्थात् हेतवो हेत्वाभासाश्चेति सर्वं न्यायदर्शनरहस्यमनुगतम् ।"

"ख्रीष्टाविर्भावाद् द्वितीयशताब्द्यां युर्जुनामकमहाजानिकबौद्धपण्डितेन स्वग्रन्थे समालोचितम् ।"

"Hindu Logic as preserved in China and Japan" नामके ग्रन्थे ३३ पृष्ठे महादिङ्नागस्य चरिते प्रतिपादितम् Kwei-Ko नामकग्रन्थस्य भूमिकायाम् वसुबन्धुसमयात् परं रंकी—रंशिकीनामकयोस्तर्कग्रन्थयोर्निर्माता बोधिसत्त्वदिङ्नागः प्रादुरभूत् स च सहस्रबुद्धान्तर्गतः पर्वते वसन् स्वकीयां ध्यानशक्तिमवर्धयत् यस्मिन् समये गम्भीरतत्त्वप्रतिपादकस्य तस्य ग्रन्थस्य समाप्तिरभूत् तस्मिन् समये पर्वतस्य देवता तत्सन्मानार्थं भूमेरूर्ध्वं सप्तषष्टिहस्तपरिमितमुच्चैः समारुह्यावोचदिदं खलु शाक्यबुद्धात् पर(२)मनेनैव बुद्धेन प्रथमतो न्यायशास्त्रोपरि व्याख्यानं कृतं यदि शाक्यबुद्ध इदानीं वर्त्तमानश्चेत्तदा तस्याप्यादरणीयोऽयं भवेदिति ।" अनेनापीतिहासेनानुमितं भवति यत् शाक्यबुद्धात् पूर्वमपि गोतमप्रोक्तं न्यायशास्त्रमासीदेवेति ।

यच्चोक्तं "गोतमेन न्यायशास्त्रस्य प्रथमाध्याय एव प्रणीतः द्वितीय-तृतीय-चतुर्थाध्याया अन्येन प्रणीताः बौद्धादिदर्शना-

(१) Kwai-Shin-mitz, Vol. V., p. 2 seq.

(२) अनेनानुमितं भवति शाक्यबुद्धेन गोतमप्रणीतं न्यायशास्त्रं पर्यालोचितमिति ।

नां तत्र समालोचना"दित्यादि "एष्वध्यायेषु लङ्कावतार-सूत्र-नागार्जुनकृतमाध्यमिकसूत्र-आर्यदेवकृतशतकेभ्योऽक्षरशो विषयाः समुद्धृताः । तस्मात् । २ । ३ । ४ । अध्याया नवीना" इति ।

अत्र "पञ्चममध्यायमतिगहन"मित्युदयनाचार्योक्त्या आचार्यवाचस्पतिमिश्रादीनामप्यतिगहनत्वेन प्रतीयमानः पञ्चमाध्यायोऽस्ति किं पुनर्मादृशानामत्यल्पज्ञानामिति जिज्ञासुरूपेणान्वेषकेण मया पञ्चमाध्यायविषये नवीनतार्किकसमालोचनं किमपि न दृश्यते । यच्चेदं लिखितं प्रथमाध्यायेन पञ्चमाध्यायस्य सम्बन्ध एव नास्ति तन्न सम्यक् "तद्विकल्पाज्जातिनिग्रहस्थानबहुत्व"मिति प्रथमाध्यायान्तिमसूत्रेण सूचितत्वात्तद्बहुत्वनिरूपणावश्यकत्वादिति । अनुमीयते कदाचिच्चतुरध्याय्यात्मकमेव यथाकथञ्चिन्न्यायशास्त्रं तेषां मतं भवितुमर्हति । २ । ३ । ४ । अध्यायेषु बौद्धादिदर्शनानां समालोचनादन्येनैव नवीनेन केनचिद्रचिताः प्रथमाध्याय एव गोतमेन रचित इति । परन्तु तेष्वध्यायेषु योगं विहाय कस्यापि दर्शनशास्त्रस्य नामापि न वर्तत इति कस्माद्ज्ञातं यदिदं बौद्धस्यैव मतं मीमांसकस्यैव मतमित्यादि ? यदि च संवादात् तर्हि सूत्रेषु ये विकल्पा दृश्यन्ते तेषामाधुनिकब्राह्म-आर्य-परमार्थदर्शनादिग्रन्थेषु संवादादभिनवमेवेदं न्यायशास्त्रं कथं न कल्पनीयम् ? । यदि च भाष्यकाराद्यनुपतव्याख्यानेन शास्त्रान्तरसमालोचनान्नवीनत्वनिष्कर्षस्तदा "आप्तोपदेशः शब्दः" १ अध्याये १ आह्निके ७ सूत्रव्याख्याने भाष्यकारेण "स द्विविधो दृष्टादृष्टार्थत्वा"दिति १ अ० १ आ० ८ सूत्रव्याख्याने वार्त्तिककारेण च "तदेतल्लक्षणमृष्यार्यम्लेच्छानां समा-

न"मिति व्याख्यातत्वात् प्रथमाध्यायोऽपि गोतमहस्तान्निप-तितश्चतुरध्यायात्मकमपि न कृतं गोतमेनेति निष्पन्नं भवति ।

वस्तुतस्तु न्यायसूत्रपाठे उद्द्योतकर–वाचस्पति–उदयनाचार्यादीनामपि क्वचित् सन्देह आसीदिति तत्रतत्र सुव्यक्तमेव, विश्वनाथपञ्चाननेन तु न्यासूत्रवृत्तिग्रन्थे सुस्पष्टतया "नेदं सूत्रं किन्तु भाष्य"मित्याद्युक्तमेव । नवीनतार्किकैस्तु मुद्रितपुस्तके स्थूलाक्षरैर्विन्यस्तानां सूत्राणामेव सूत्रत्वं समाधिगम्य तत्र सन्देहमपि विहाय सम्पूर्णा अध्याया एव गलहस्तिता इति महदाश्चर्यम् ।

यदि च २ । ३ ४ । अध्याया असम्बद्धा एवेति तदा उद्देशो लक्षणं परीक्षा चेति अनुबन्धत्रयसम्बद्धं शास्त्रं भवतीति महर्षीणां सम्प्रदायविच्छेदादाचार्यैरपि अनुबन्धत्रयसमन्वयार्थं कृताः प्रयासा अरण्यरुदितं स्यादिति २ । ३ । ४ अध्यायात्मकं परीक्षाभागं विहाय कोऽनुमन्येत प्रथमाध्याय एव प्रणीत इति ।

अत्रावशिष्टा प्रबला युक्तिर्बौद्धशास्त्रसमालोचनं लङ्कावतारसूत्र–नागार्जुनकृतमाध्यमिकसूत्र—आर्यदेवकृतशतकेभ्यः अक्षरशो विषयाणां समुद्धरणं च । यदि चात्र शङ्कासमाधिपरिशीलनेनैव तत्तत्सूत्राणां मूले प्रक्षिप्तत्वमेव शङ्क्येत तदपि कथञ्चित् सङ्गतं भवेत् किमपराद्धमध्यायत्रयेणेति न बुद्ध्यामहे ? । कस्माज् ज्ञातं यच्छाक्यसिंहबुद्धस्यैव मतं ? यस्य च सम यस्य स्थैर्ये बहवोऽस्थिराः पण्डिताः । अपि च हीनयानिकानां बौद्धानां मते(१)शाक्यसिंहश्च पञ्चविंशो बुद्धः अस्मात् पूर्वमनेके बुद्धाः सञ्जाता परमप्यनेके भविष्यन्तीति नैत-

(१) Buddha Vamsa (Pali Text Society–1882)
Travels of Hiouen Thsang and Fa Hien.

त् सिद्धं भवति यद्बौद्धनाम्नैव शाक्यसिंहमतमिदं, बौद्धनाम्नैव इदं शाक्यसिंहात् पश्चाद्भावीत्यादिनिश्चयावसर इति ।

यत्रयत्र बौद्धमतसंवादस्तत्रतत्र कस्माद् ज्ञातं बौद्धस्य शाक्यसिंहस्यैव मतं ? मूले तन्नामोल्लेखाभावाद् । उपनिषत्स्वपि तद्दर्शनात् ।

तथाहि बृहदारण्यकोपनिषदि तृतीयाध्यायस्य द्वितीय ब्राह्मणे "नैवेह किञ्चनाग्र आसीन् मृत्युनैवेदमावृतमासी"(१) दित्याद्युपनिषद्व्याख्याने शङ्कराचार्येण तट्टीकायामानन्दज्ञानेनापि शून्यवादि–क्षणिकवादि–बौद्धमतोद्भावनं कृतं तच्च तत्तत्सम्प्रदायधूरवहत्वेन तत्तन्नाम्ना व्यक्तीकृतं तत्सम्प्रदायनिराकरणार्थम् । यतस्तथाविधाः शङ्कासमाधयोऽनादिकालप्रवृत्ताः । यदि च बुद्धात्परमेव उपनिषदोऽभूवन् तर्हि बुद्धदेवेन तत्समानकालिकेन महावीरस्वामिना वा वेदाः समालोचिता इति ते कुत्र तिष्ठेयुरिति ? शङ्कितमधस्तात् ।

अल्पज्ञानां व्यामोहनिवृत्त्यर्थं व्याख्याकाराणामेषा रीतिरेव यत्प्राचीनग्रन्थमाहात्म्याविष्कारपूर्वकं नवीनमतखण्डनप्रदर्शनेन व्याख्यानम् यथा तत्रतत्र विशिष्टाद्वैतमतखण्डने "त्रिदण्डिवेदान्तिमतं खण्डयतीत्यत्र" "रामानुजमतं खण्डयतीति" अन्यथा रामानुजाचार्यादपि पूर्वकालवर्तिना शङ्कराचार्यसमानकालिकेन सुरेश्वराचार्येण बृहदारण्यकवार्त्तिके ५ ब्राह्मणे ३ अध्याये त्रिदण्डिमतखण्डनात् रामानुजाचार्यात् परं सुरेश्वराचार्याः स्युः अपि च ब्रह्ममीमांसाभाष्ये "वैधर्म्याच्च न स्वप्नादिवत्" २ अ० २ पा० २९ सूत्रव्याख्याने भास्कराचार्येण शाङ्करमतखण्डने "ये तु बौद्ध-

(१) एशियाटिक्सोसाइटीवङ्गालमुद्रितपुस्तके पृ. २७ द्रष्टव्यम् ।

मतावलम्बिनो मायावादिनस्तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्ता" इति भाष्यात् पश्चात् सूत्राणि रचितानि स्युरिति महान् विप्लवो भवेदिति।

बहुज्ञत्वाद् यच्च न्यायशास्त्रस्य निन्दास्तुतिविषयको महर्षेर्गोतमस्य च निवासविषयकः समन्वयः कृतः सोऽप्याश्चर्यजनक एव। तथाहि—"वैदिकसंहिताब्राह्मणग्रन्थयोर्न्यायशास्त्रस्य च पूर्वं सम्बन्ध एव नासीत् शुष्कन्यायविद्या तदानीं पृथगेवासीत् तस्माद् ब्राह्मणैरनादृता पश्चात् शनैः शनैर्विपुलसमादरः सञ्जात इति।"

यदि च वैदिकग्रन्थस्य सम्बन्ध एव नासीत् तदा विश्वनाथन्यायपञ्चाननादिभिरुक्ता न्यायो मीमांसा धर्मशास्त्राणीत्युपाङ्गानि इत्यादिश्रुतयश्च कुत्र तिष्ठेयुः अथ च न्यायप्रणेतुर्गोतमस्य ऋग्वेदादिसंहिताग्रन्थेषु शतपथब्राह्मणे च निरुक्तरीत्या चर्चायां सत्यां पूर्वं गोतमः काष्ठवत् स्थितः पश्चाद्बहुकालानन्तरं न्यायशास्त्रं प्रणीतवान् इति निष्पन्नं भवति।

अथ च "आन्वीक्षिकी विद्या न्यायशास्त्रं वा अध्यात्मविद्या वा क्षत्रियेष्वासीन्न ब्राह्मणेषु इत्यादि" तत्र प्रमाणं छान्दोग्योपनिषद् ५—३ "मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मात् सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदि"त्यादि(१)।

तत्र मनुस्मृतौ १ अध्याये ३४। ३५ श्लो.

"अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्।
पतीन् प्रजानामसृजं महर्षीनादितो दश॥

---

(१) न्याये प्रशासनप्रकारस्याभावाद् धर्मसूत्रकर्तुर्गौतमस्यात्र ग्रहणम्।

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्राचेतसं वसिष्ठं च भृगुं नारदमेव च ॥"

इत्युक्त्या अङ्गिरा ब्रह्मणः पुत्रस्तद्वंश्यो गोत्रप्रवर्तको गोतमः। छान्दोग्ये च मनोः प्रशंसा वर्तत एव । तर्हि गोतमात् पूर्वं कोसौ क्षत्रियः आसीद् यत्र न्यायविद्याध्यात्मविद्या वा वर्तमाना तत्र विद्याशब्दोऽप्यान्वीक्षिकीवाचक एव ? इति वर्णनीयम् ।

अपि च

"विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवे ऽयताय
न मा ब्रूया वीर्यवती तथा स्याम् ॥"

इत्यादिसंहितोपनिषद्ब्राह्मणश्रुतीनां माधवाचार्येण ऋक्संहिताभाष्यमुखबन्ध उदाहृतानां का गतिः ॥

गोतमस्थानविषयकसमन्वये च वाल्मीकिरामायणेन तु गोतमस्थानं मिथिलामण्डले आसीदिति सिद्धं किं तु "अक्षपादः कणादश्च उलूको वत्स एव च"त्यादिवायुपुराणात् प्रभासक्षेत्रेऽपि स्थानं सम्भवति । अस्य समन्वयार्थं गोतमासम्बद्धां श्रीमद्भागवतीय ११ स्कन्धीय ६ अध्यायस्थां ३५ "प्रभासं सुमहत्पुण्यं यास्यामोऽद्यैव माचिर"मितिश्लोकसम्बद्धां श्रीमद्भागवतीय ११ स्कन्धीय ३० अध्यायस्थां ६ श्लोकसम्बद्धां "वयं प्रभासं यास्यामो यत्र प्रत्यक् सरस्वती"त्यादिश्रीकृष्णकथामुद्धृत्य गोतमस्य प्रभासगमनं साधयति । अत्र मिथिलादेशे स्वाश्रमे स्थित एव गोतमोऽपवर्गनिरूपकं न्याय-

शास्त्रं प्रणीतवान् ततः परं किमपरमवशिष्टं यदर्थमन्ते प्रभास-क्षेत्रे गत्वा सोमशर्मणो ब्राह्मणस्य शिष्यतां गत इति स-मन्वयकर्ता एव जानाति ।

यच्च लङ्कावतारसूत्र—नागार्जुनकृतमाध्यमिकसूत्र—आर्य-देवकृतशतकेभ्यो विषयाः समुद्धृता इति अत्र ते विषया उक्तग्रन्थेष्वेव निरूपिता नान्यत्रेत्यत्र किं बीजं किं प्रमाणं कस्माच्चावगतम् ? इति वक्तव्यं भवति । तानि वाक्यानि प्रायः शङ्कासमाधिलक्षणाक्रान्तानीति चिरकालादेव विचारग-र्भाणीति विज्ञायते । मम तु मतमेते विषया ऋग्वेदसंहिताया-मुपनिषत्स्वपि निरूपिताः अतोऽनादिकालादेवास्तिकनास्ति-कशङ्कासमाध्योर्वर्तमानत्वादुक्तरीत्या तत्तत्सूत्राणां नवीनत्वकल्प-नया २ । ३ । ४ अध्यायानां नवीनत्वकल्पनमयुक्त-मेवेति । तथाहि—

गोतमसूत्रम् ४ । १ । ३९

"न स्वभावसिद्धिरापेक्षिकत्वात् ।"

माध्यमिकसूत्रम्

"न सम्भवः स्वभावस्य युक्तः प्रत्ययहेतुभिः ।
स्वभावः कृतको नाम भविष्यति पुनः कथम् ॥"

श्वेताश्वतरोपनिषदि २

"कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।" तथा श्वेताश्वतरोप. ६ । १ "स्व-भावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।"

गोतमसूत्रम् ४ । १ ४९

"नासन्न सन्न सदसदसत्सतोर्वैधर्म्यात् ।"

माध्यमिकसूत्रम्

"सतश्च तावदुत्पत्तिरसतश्च न युज्यते ।
न सतश्चासतश्चेति पूर्वमेवोपपादितम् ॥
नैवासतो नैव सतः प्रत्ययार्थस्य युज्यते ।
न सन्नासन्न सदसद् धर्मो निर्वर्तते सदा ॥"
"सदसत् सदसच्चेति यस्य पक्षो न विद्यते ।
उपालम्भाश्चिरेणापि तस्य वक्तुं न शक्यते ॥"
सुबालोपनिषदि १ । ११
"सहोवाच न सन्नासन्न सदसत् ।" तत्रैव ३ खण्डे
"असद्वा इदमग्र आसीत् ।"
ऋग्वेदसंहितायामपि १० म० १२९ सू० १ मन्त्रे द्रष्टव्यम्
गोतमसूत्रम् ४ । २ । ३१-३२
"स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।"
"मायागन्धर्वनगरमृगतृष्णिकावद्वा ।"
माध्यमिकसूत्रम् ।
"यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतम् ॥"
मैत्र्युपनिषदि ४ प्रपाठके
"इन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शन"
मित्यादि ।

अन्ये तु "उपलभ्यमानन्यायसूत्राणामतिसावधानतया पाठेन समालोचनेन च निष्पन्नं भवति तावद् योगवेदान्तादिशास्त्रनिरूपितविषयोपनिपातात् जैनदर्शने प्रमेयेषु सुखस्य परिगणनात् अत्र च न्यायशास्त्रे प्रमेयेषु तदभावात् जातिनिरूपणे प्रथमाध्यायपञ्चमाध्याययो-

र्विरोधात् तत्र महान् विप्लवो जातः। अपि च द्वितीय-तृतीय-चतुर्थाध्यायेषु षोडशपदार्थानां परीक्षाया अभावात् नेदं पूर्णं शास्त्रमिति। अन्यच्च हिन्दूशास्त्रेषु न्यायशास्त्रस्य निन्दाया दर्शनात् बौद्धशास्त्रेण संश्लिष्टमिदं शास्त्रं जातम्। यत्तु ख्रीष्टाब्दारम्भसमयात् ३०० वर्षेभ्यः परं वर्तमानाद्वात्स्यायनात् प्रभृति इदानींतनपर्यन्तैष्टीकाकारैः स्वव्याख्यानेन समाहितं संयोजितं तेऽपि नापारयँस्तत्त्वतो व्यवस्थापयितुं तत्त्वार्थानित्यादि" निरूपयन्ति। इयं हि तेषामुक्तार्थसंसिद्धौ प्रबला युक्तिर्यद् "वाचस्पतिमिश्रेण न्यायसूत्रोद्धारः न्यायसूचीनिबन्धश्च रचितः अनयोः संवादेन समालोचनेन च महान् विप्लवो दृश्यत" इति।

अत्र समालोचनम्। अत्र महान् विशेषोऽस्ति यत् न्यायशास्त्रस्येतिवृत्तातिहासः समयनिर्णयादिकमपि बहुभिः कृतम् तन्निरूपितप्रमेयादिपदार्थसमालोचनं तैर्न कृतमन्येनैव कृतमिति हर्षविषयोऽयम्। अयं तु अननुभूतमहाहर्षविषयो "यद्वात्स्यायनप्रभृतीदानींतनपर्यन्तं टीकाकारा नापारयँस्तत्त्वतो व्यवस्थापयितुं पदार्थान्" इदं तु तथ्यमेव गङ्गेशोपाध्यायैः श्लोकद्वादशसाहस्र्यात्मकेन तत्त्वचिन्तामणिग्रन्थेन "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी"तिपञ्चदशाक्षरात्मकमेव गोतमसूत्रं व्याख्यातं ततः परं व्याख्यानुव्याख्यानैः श्लोकानां लक्षाणामष्टात्रिंशत्या उपबृंहितमपि(१) इदानींपर्यन्तं क्रोडपत्रविवेचनादयो न समाप्तिं गता नापि विश्रान्ता इत्ये-

---

(१) चौखंबासंस्कृतसीरीजमुद्रिते क्रोडपत्रसंग्रहे भूमिकायां विस्तरेण निरूपितमिदमस्माभिः।

षां तत्त्वज्ञा महाशया एव । परं तु कुत्र किं वा स्खलनं जातमिति निरूपितवन्तश्चेत् सिद्धं नः समीहितं भवेत् तस्य चर्चैव न कृतेति खेदास्पदम् । परं तु वैद्यकविद्यावद् गणितविद्यादिवन्नास्य न्यायशास्त्रस्य लौकिकार्थसिद्धिः प्रयोजनं किं तु "तत्त्वज्ञानान्निःश्रेयसाधिगम" इति प्रथमसूत्र एव प्रयोजनं दर्शितं सूत्रकारेण तत्तु निःशेषन्यायशास्त्रपरीक्षणान् महाशया एव जानन्ति तत्त्वज्ञानान्निःश्रेयसाधिगमो भवति न भवति वेति ? । बौद्धाद्यागमविषये वाचस्पतिमिश्रेण ५ कारिकाव्याख्यायां सांख्यतत्त्वकौमुद्यामुक्तमेव "विगानात् छिन्नमूलत्वात् म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैरित्यादि" तस्माच्छिष्टापरिगृहीतास्ते आगमा एवेति तर्हि न्यायोक्तद्वादशविधेषु प्रमेयेषु सुखस्य गणनाभावे जैनागमेषु तत्परिगणनान् न्यायशास्त्रस्य न्यूनतेति कथकस्यैव न्यूनता । यद् आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रोक्तद्वादशविधेषु प्रमेयेषु परिगणितं दुःखमेकविंशतिप्रकारकमिति तत्र सुखस्य वार्त्तिककारेण ग्रन्थारम्भ एव सम्यक्परिगणितस्य ज्ञानाभावाद्वा तिरष्कृतत्वात् ।

जातिनिरूपणे प्रथमपञ्चमाध्याययोः को विरोध इति तु "मुखमस्तीति वक्तव्यं कुन्तीपुत्रो विनायक इतिवत्" विरोधस्यादर्शितत्वात्(१) ।

यदि च अन्यशास्त्रोक्तपदार्थानां तदन्यत्रोपनिपातेनैव शास्त्रस्य व्यर्थता तदा सर्वेष्वेव शास्त्रेषु(२) अन्यदीयशास्त्रविषयोपनिपातात् सर्वाणि शास्त्राणि व्यर्थान्येवेति किमपि नाध्येत-

(१) प्रथमाध्यायपञ्चमाध्याययोः सम्बन्धश्च ६२ पृष्ठे ऽत्रैव प्रदर्शितो मया ।

(२) अस्यामेव भूमिकायां पृष्ठे ५० द्रष्टव्यम् ।

च्यम् । उपनिषत्स्वपि सांख्यशास्त्रस्य प्रशंसा सांख्ये तु न वयं षट्पदार्थवादिनो वैशेषिकादिवत्(१) इति सूत्रेणैवोक्तत्वा-द्यथर्मेव तत् ।

अपि च २ । ३ । ४ अध्यायेषु सकलपदार्थपरीक्षाया अभावान्नेदं पूर्णं शास्त्रं तदपि न सम्यक् येषां पदार्थानां प-रीक्षा न कृता तत्कारणानि च तत्र तत्रोक्तान्येवेति । न्याय-निन्दाप्रशंसासमन्वयश्च आचार्यैः कृत एव अस्माभिरपि प्रतिपा-दित एवाधस्तादिति हिन्दूशास्त्रज्ञानां(२) नात्र कथनावकाशः ।

यत्तु ख्रीष्टाब्दारम्भात् ३०० वर्षेभ्यः परं वात्स्यायनस्य वर्तमानत्वमुक्तं तदपि लेखमात्रेणैव सिद्धं न भवतीति । अय-मर्थः परीक्षणीयोऽग्रे वात्स्यायनचरिते ऽस्माभिरिति ॥

इयं हि तेषामुक्तार्थसंसिद्धौ प्रबला युक्तिर्यद्वाचस्पति-

(१) सांख्यप्रवचनषडध्याय्यां १ अध्याये २५ सूत्रम्

(२) वेदान्तिब्रुवाणस्तु "न्यायो मीमांसा धर्मशास्त्राणीति" श्रु-तिः । "अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।" "पुरा-णन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश"त्यादिस्मृतिः । "भक्षामि मनसा तात दृष्ट्वा चा-न्वीक्षिकीं परा"मिति महाभारतम् । एषु वचनेषु जन्मान्ध-व्यापारं विधाय "यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद"इत्यादिवाक्येषु न्यायपक्षपातित्वं प्रलपन्तः अक्षपादप्र-णीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धांशः" इ-त्यादिवचनानामेकमेवाद्वितीयं ब्रह्मेति श्रुतिर्ब्रह्मपरा जीवेषु नो-पयुज्यत इति नैयायिकार्थमजानन्तो न्यायनिन्दापरायणा वेदा-न्तिब्रुवगुरुवचनान्येव प्रमाणयन्तो न्यायस्यार्षत्वेऽपि तदप्रामाण्ये बार्हस्पत्यं चार्वाकमतमुदाहरन्ति यथा गौतमं शास्त्रमार्षं तथा बार्हस्पत्यमिति । तदत्यन्तमसत् तत्र बार्हस्पत्यशास्त्रप्रामाण्ये श्रुत्या-दिप्रमाणानुपलम्भात् ।

मिश्रेण न्यायसूत्रोद्धारः न्यायसूचीनिबन्धश्च रचितः(१) अन-योः संवादेन समालोचनेन महान् विप्लवो दृश्यत" इति(२)। इदमुपलभ्यमानं न्यायशास्त्रं सर्वथानवस्थितं पठनपाठनानुपयुक्तमिति तेषां हृदयम्।

इदं सर्वं न चित्रं नाप्यपूर्वार्थनिर्द्धारणं जैनागमे सुयणाङ्गसूत्रे त्रिषष्ट्यधिकानि त्रीणि शतानि मतानि(३) प्रदर्शितानि भारतवर्षीयोपासकसम्प्रदायाख्यपुस्तके ऽपि सुबहूनि मतानि निरूपितानि तानि च स्वमते सर्वथैवानुभवसिद्धानि परमते तु स्वमतं विहाय सर्वत्रैवानुभवापलाप इति सर्वेषां साधुत्वे यत्समाधानं तदेव केषामन्येषां शङ्कायाः समाधानं भवितुमर्हतीति। अपि च पूर्वाचार्यैः कृतानामेतादृशीनां शङ्कानां समाधानं तु उदयनाचार्येण किरणावल्यां श्रीहर्षेण खण्डनखण्डखाद्ये साहित्याचार्यैरपि तत्रतत्र कृतमेव। अधिकं तु मया न्यायदर्शनभाष्यकर्त्तुर्वात्स्यायनस्य चरिते भाष्यवर्णने यथा यथं परीक्षिष्यते॥

---

(१) एकेनैव वाचस्पतिमिश्रेण ग्रन्थद्वयं रचितं विभिन्नेन वा कुत्र को वा विप्लव इति तैः समालोचितं न वेति बहूनां सन्देहो भवति स्वयं तीर्णः परान् तारयतीति लौकिकाभाणकेन तत्प्रदर्शनस्यात्यन्तावश्यकत्वात्। मया तु किञ्चिद्वर्णितमधस्तात् परिशिष्टं वाचस्पतिमिश्रचरिते निरूपयिष्यते।

(२) कुत्र विप्लवः को वा विप्लव इति अवश्यनिरूपणीयं भवति तदभावादकिञ्चित्करमिदम्।

(३) मलयगिरिकृतायां द्वितीयोपाङ्गटीकायां मुखबन्धे द्रष्टव्यम्। Indian Antiquary 1888 p. 344.

अथ

न्यायदर्शनभाष्यकर्तुर्महामुनेर्वात्स्यायनस्य चरितम् ।

तत्र तावन्न्यायदर्शनभाष्यकर्ता भगवान् वात्स्यायनः कस्मिन् देशे कस्मिन् काले आविर्भूत इति निर्णयस्तु दूरे गतस्तन्नाम्न्येव मतभेदा दृश्यन्ते एकत्र वात्स्यायनोऽपरत्र पक्षिलस्वामी अन्यत्र पक्षिलमुनिः पक्षिल इति वा ।

किन्तु न्यायभाष्यान्ते ।

"योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ॥

तस्य वात्स्यायन इदं भाष्यजातमवर्तयत्"॥(१) इति । न्यायवार्त्तिकसमाप्तौ च ।

"यदक्षपादप्रतिभो(२) भाष्यं वात्स्यायनो जगौ ।

अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥"

इति दर्शनात् निर्णीतं भवति तस्य मुख्यं नाम वात्स्यायन इति । अक्षपादप्रतिभ इति वार्त्तिककारोक्त्या अक्षपादतुल्यो महर्षिर्भाष्यकार इति सिद्धम् ।

न्यायवार्त्तिकतात्पर्यटीकायामारम्भे आचार्यवाचस्पतिमिश्रेण ।

"अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते

(१) पद्यमिदं विजयनगरसंस्कृतसीरीजमुद्रिते न्यायदर्शनपुस्तकेऽन्येष्वपि प्राचीनेषु लिखितपुस्तकेषु तथा अस्मन्निकटे वर्त्तमाने महानैयायिकैः प्रामाणिकत्वेनावधृते प्रायः शुद्धे पुण्यग्रामे (पूनानगरे) लिखिते प्राचीने पुस्तकेऽपि वर्तते ।

(२) यदक्षपादप्रतिम इत्यपि क्वचित् ।

व्याख्याते च भगवता पक्षिलस्वामिना किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ" इत्युक्तत्वात् पक्षिलस्वामी इत्यपि निष्पन्नं भवति ।

वेदादिभाष्यकर्त्रा माधवाचार्येणापि सर्वदर्शनसंग्रहे ऽक्षपाददर्शने(१) "पक्षिलस्वामिना च सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाने"त्याद्युक्तम् ।

तार्किकरक्षाटीकायां चादावेव "पक्षिलमुनि(२)प्रभृतय"- इत्युक्तम् ।

तथा च वात्स्यायनस्य नामान्तरं पक्षिलमुनिः पक्षिलस्वामी इति च सिद्धम् ।

शतपथब्राह्मणे बृहदारण्यकोपनिषदि समाप्तौ "अथ-वंशः" इत्युपक्रम्य "वात्स्याद्वात्स्यः"(३)इत्युक्तम् । तस्माद् वत्सयस्य युवा अपत्यं वात्स्यायन इति ।

वात्स्यायनस्य चर्चा पद्मपुराणीयरामाश्वमेधे १ अध्यायेऽपि वर्तते ।

---

(१) वङ्गदेशीय-एशियाटिक्सोसाइटीद्वारा मुद्रितपुस्तके १९ पृष्ठे द्रष्टव्यम् ।

(२) केचित्तु अत्र मुनिशब्दस्तत्त्वप्रदीपिकाकारचित्सुखमुनिवद् बोध्य इति तन्न न्यायवार्त्तिकारम्भे "यदक्षपादप्रवरो मुनीनां" वाचस्पतिमिश्रकृतखण्डनोद्धारे "यदक्षपादस्य महामुनेर्मत"मित्याद्युक्त्या अत्रापि तथात्वात् । पक्षयति तत्त्वज्ञानं परिगृह्णातीति पक्षिलः । पक्ष+बाहुलकादिलच् । यद्वा पक्षिणो दयया लाति आदत्ते गृह्णातीति पक्षिलः । ला आदाने इति पाणिनिः । पक्षिलचर्चापि मत्स्यपुराणे ५२ अध्याये द्रष्टव्या ।

(३) वत्सयस्य युवा गोत्रापत्यं वात्स्यायनः वत्स+यञ् ततो यूनि फक् जीवति वत्से युवापत्यं वात्स्यायन इति यावत् ।

व्यास उवाच ।

"ततः परं धराधारं पृष्टवान् भुजगेश्वरम् ।
वात्स्यायनो मुनिवरः कथामेतां सुनिर्मलाम्॥" इत्यादि ।

इत्थं च पुराणादौ वात्स्यायनस्य चर्चाया दर्शनात् तस्य चिरन्तनत्वं सिद्धमेव ।

एवं तत्कृतन्यायदर्शनभाष्येऽपि न कोऽपि हेतुर्दृश्यते येनार्वाचीनत्वं सिद्ध्येत् ।

यदि च वक्ष्यमाणात्मवाद्यनात्मवाद्यास्तिकनास्तिकसांख्ययोगक्षणिकवादिभूतचैतनिकदशावयववादिनां मतोपन्यासेनार्वाचीनत्वं कल्प्येत तदा उपनिषदादिष्वपि तद्दर्शनात् तेषामप्यर्वाचीनत्वं भवेत् किं पुनर्वात्स्यायनस्य तत्प्रणीतभाष्यस्य वेति। यथा तद्भाष्ये २५ पृष्ठे(१) "अनात्मवादिनः ।"

३८ पृ० "इति सांख्यानाम् । इति योगानाम् ।"

३९ पृ० "दशावयवानेके नैयायिका वाक्ये संचक्षते । जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति ॥"

६० पृ०"अथवास्त्यात्मेत्येके।नास्त्यात्मेत्यपरे मन्यन्ते"इति।

१०४ पृ० "आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके" ।

"गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मक इत्यपरे ।"

"आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवदित्यपरे" ।

"महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मक इत्यन्ये" ।

---

(१) अत्र पृष्ठाङ्का विजयनगरसंस्कृतसीरीजमुद्रितन्यायदर्शनभाष्यपुस्तकानुसारेण बोध्याः ।

१५९ पृ० "एवं हि पश्यन्तः प्रवदन्ति सांख्याः पुरुषस्यान्तःकरणभूता नित्या बुद्धिरिति"।

१६३ पृ० "क्षणिकत्वाद्याह।"

१७४ पृ० "भूतचैतनिक आह।"

१८७ पृ० "अत्र नास्तिक आह।"

२२१ पृ० "याज्ञवल्क्यो मैत्रेयीमिति होवाच। कात्यायन्या सहान्तं करवाणीति"।

२२२ पृ० "चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः।"

इत्याद्युक्तं तेनापि नार्वाचीनत्वं सिद्ध्यति॥

तथाहि तद्भाष्ये २५ पृष्ठे(१) अनात्मवादिनः। नैरात्म्यवादस्तु मैत्रायण्युपनिषदि ७।८ "नैरात्म्यवादकुहकै"रिति। इदं चार्वाकमतमपि सम्भवति। यथा महाभारते शान्तिपर्वणि मोक्षधर्मे १८६ अध्याये।

"यदि प्राणयते वायुर्वायुरेव विचेष्टते।
श्वसित्याभाषते नित्यं तस्माज्जीवो निरर्थकः॥" इत्यादि

३८ पृष्ठे "इति सांख्यानाम्। इति योगानाम्।" योगस्य चर्चा कठोपनिषदि ६ वल्ल्याम्। श्वेताश्वतरोपनिषदि ६ अध्याये सांख्ययोगौ समुद्धृतौ। अपि च छान्दोग्योपनिषदि ६ प्रपाठके १७ खण्डे "तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच" श्रीकृष्णेन भगवद्गीतायाम्।

"एकं सांख्यं च योगं च यः पश्यति स पश्यति।" इत्युक्तम्।

३९ पृष्ठे "दशावयवानेके नैयायिका वाक्ये सञ्चक्षते।

---

(१) अत्र पृष्ठाङ्का विजयनगरसंस्कृतसीरीजमुद्रितपुस्तकानुसारेण बोध्याः।

जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदास इति ।"
नैयायिकानामनेकत्वं मयैवात्र प्रदर्शितमान्वीक्षिकीविद्यानि-
रूपणप्रकरणे । यथा महाभारते ।

"नैयायिकानां मुख्येन वरुणस्यात्मजेन च ।
पराजितो यत्र वन्दी विवादेन महात्मना ॥

इत्थं चान्वीक्षिक्यैक्येऽपि न नैयायिकैक्यम् अन्यथा
इदानींतनेषु न्यायग्रन्थेषु "इति प्राञ्चः" "इति नव्याः" "इत्य-
स्मात्पितृचरणाः" "इत्यस्मद्गुरुचरणा" इति मतभेदानुपपत्तेः ।

केचित्तु दशावयववादित्वेन बौद्धं कल्पयन्ति तन्निर्मूलम्
यदि स बौद्धो भवेत् तदा भाष्यकारैर्नैयायिकनाम्ना कदापि
गृहीतो न भवेदपि तु नास्तिकादिनाम्नेति ।

६० पृष्ठे अथवास्त्यात्मेत्येके नास्त्यात्मेत्यपरे मन्यन्त-
इति । मैत्रायण्युपनिषदि ७ प्रपाठके ८ खण्डे ।

"नैरात्म्यवादकुहकैर्मिथ्यादृष्टान्तहेतुभिः ।
भ्राम्यल्लोको न जानाति वेदविद्यान्तरं तु यत् ॥"

१०४ पृष्ठे आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्ति-
धर्मक इत्येके ।

१०४ पृ० गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिव-
दवस्थितोऽभिव्यक्तिधर्मक इत्यपरे ।

१०४ पृ० आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बु-
द्धिवदित्यपरे ।

१०४ पृ० महाभूतसङ्क्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको
निरोधधर्मक इत्यन्ये । अत्र "अन्ये" इत्यनेनाधुनिका बौद्धं क-
ल्पयन्ति तदनुयायिनस्तु ख्रीष्टाब्दारम्भात् ४८७ वर्षेभ्यः पूर्वं
बुद्धदेवस्थितिं निश्चिन्वन्तस्ततपूर्वं न्यायभाष्यमिदं नासीदेवे-

ति समुद्घोषयन्ति ।

तदसत् । वेदधर्मशास्त्रपुराणेषु आस्तिकनास्तिकभेदे-नानेकानि मतानि निरूपितानि भाष्यकारेण बौद्धनामानुल्लि-खितत्वात् तदिदं मतं कस्मादवगतं बौद्धस्यैवेति यदि च त-तद्ग्रन्थसंवादात् तदाऽऽधुनिकमतसंवादादपि तत्पश्चाद्भावि-त्वात् अभिनवमेव वात्स्यायनीयं भाष्यं कथं न कल्प्येत ? । बौद्धग्रन्थेष्वपि हीनयानिकैरतीतानागता अनेके बुद्धा निरू-पिता इति कस्य बुद्धस्येदं मतमित्यपि निरूपणीयमेव यदि च गौतमस्य शाक्यसिंहस्य बुद्धदेवस्य मतं तदपि निरू-पणीयमेव कस्मिन् ग्रन्थे तत् प्रतिपादितमिति ? ।

ऐतिहासिकवृत्तशोधने निपुणंमन्या आधुनिकास्तु इ-स्वीयवर्षारम्भत् ४८७ वर्षेभ्यः पूर्वम् ।

"सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिश्च सः ॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥

इत्यन्वर्थनामविशिष्टो बुद्धो निर्वाणं गत इति वदन्ति तत्र वक्ष्यमाणानि दुरुच्छेद्यानि बलवन्ति प्रमाणान्युपन्यस्तानि ।

"प्रोफेसर बुलरमहाशयाः (Bühler) तथा डाक्टर फलीट (Fleet) महाशयाः पाषाणस्तम्भे लिखितेऽशो-कराजस्य शासने २५६ संख्यां दृष्ट्वा कल्पयन्ति बुद्धपर-णाशोकजीवनसमययोरेतावद्वर्षपरिमितमन्तरम्"

"अपि च परमार्थनामकेन बौद्धेन वसुबन्धुचरितपुस्तकं

निर्मितं तत्र लिखितमास्ति बुद्धदेवनिर्वाणानन्तरं १००० वर्षेभ्यः पश्चात् स्थितौ "वृश्यपं" "विन्ध्यवस" नामकौ बौद्धौ । तावेतौ ख्रीष्टाब्दारम्भात् परं पञ्चमशताब्द्यां वर्तमानाविति उपात्तसमय एव बुद्धनिर्वाणस्य ।"

"अन्यच्च चीनदेशीयकांटननामके नगरे संख्याबोधकरेखाविन्द्वादिवत्–चिह्नविशेषाङ्कितलेखाः ४८९ वर्षपर्यन्तं स्थापयन्ति स्मेति स्थितिः तत्र ९७५ चिह्नान्यासन् तत्र ४८९ संख्या न्यूनीकृता सती स एव निर्दिष्टसमयो बुद्धनिर्वाणस्य भवति ।"

यद्येतादृशान्येव प्रमाणानि व्यक्ताव्यक्तसाधारणानि वस्तुतत्त्वनिर्णये प्रभवन्ति तदा किमपराद्धं वेदधर्मशास्त्रपुराण(१)भारतरामायणादीतिहासैर्महापण्डितैः सहृदयैरवगम्यैरिति न बुद्ध्यामहे ।

यदि च बुद्धात्परमेव सर्वमिति निर्णीयते तदा इसवीयवर्षारम्भात् ५२७ वर्षेभ्यः पूर्वं निर्वाणपदव्यां गतानां जैनचतुर्विंशतीर्थङ्करमहावीरस्वामिनां चतुर्णां वेदानां भारतरामायणादीनां मिथ्याशास्त्रत्वनिरुक्तिः(२) कुत्र तिष्ठेद्वेदादयो वा कुत्र तिष्ठेयुरिति ? ॥

१६३ पृ. "क्षणिकवाद्याह" । क्षणिकवादश्च बृहदारण्यकोपनिषदि ३ अध्याये २ ब्राह्मणे छान्दोग्ये ७ प्रपाठके ७ । ८ खण्डयोः कठोपनिषदि ६ वल्ल्याम् ।

१७४ पृ० "भूतचैतनिक आह" । भूतचैतनिकदेहात्मवा-

(१) यथा च पुराणानां सामञ्जस्यं तथाग्रे वक्ष्यते ।

(२) अयमर्थो निपुणतरमधस्तादुपपादितमग्रे उपपादयिष्यते च इत्यास्तां तावदिति ।

दनिरासश्च छान्दोग्ये ८ प्रपाठके ९–१२ खण्डेषु वर्तत इति ।

अन्ये आधुनिकतार्किकास्तु स्वेन तर्केण तर्कयन्ति खलु हेमचन्द्रकृताभिधानचिन्तामणेर्मर्त्यकाण्डस्य ५१७ श्लोकस्य अर्द्धम् अर्द्धञ्च ५१८ श्लोकस्य

"वात्स्यायने मल्लनागः कौटिल्यश्चणकात्मजः ।
द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः ॥"(१)

इति दृष्ट्वा उक्तवचनानुसारि यत्र कुत्रचिद्व्याख्यानमपि श्रुत्वा उक्तवचने चाणक्यस्याविकलं नाम हठात् सन्निवेश्य चाणक्यस्य विष्णुपुराण–वायुपुराण–मत्स्यपुराणाद्युक्तस्यापि चन्द्रगुप्तस्य राज्ञो मन्त्रिणः समयनिर्णायकं ग्रीक–चीन–देशीयानां कमपि लेखं वा शिलाशासनस्थं वा वक्ष्यमाणप्रकारकलेखं यत्र चाणक्यस्य चर्चापि नास्ति तमेव मूर्ध्नि संस्थाप्य समुद्घोषयन्ति तावन्न्यायदर्शनभाष्यं चाणक्यवात्स्यायनकृतं ख्रिष्टाब्दारम्भात् पूर्वं ३२१ वर्षेभ्यः(२) पुरातनं कथमपि भवितुं

(१) अत्र श्लोके उक्तानि कानिचिन्नामान्येवासाधूनि । स च प्रमादो ग्रन्थकारस्य लेखकस्य वेति न बुध्यामहे । यथा वात्स्यायनीयकामसूत्रटीकायामारम्भे महापण्डितेन यशोधरेण "मल्लिनाग"इत्युक्तम् । मुद्राराक्षसनाटकटीकायां "कौटिल्यः कुटिलमतिश्चाणक्य" इत्युक्तम् । चाणक्यनीतावथ च मुद्राराक्षसे चाणक्य इति मुख्यं तन्नाम प्रतिपदं गृह्यते । हेमचन्द्रेण कोशकृता तद् गृहीतमेव नास्ति । पुराणेतिहासादौ च चाणक्य एव चन्द्रगुप्तस्य मन्त्रीति । अभिधानचिन्तामणिटीकाकारेण केनचिज्जैनेन कौटिल्यशब्दार्थमजानता "कौटल्य" इति कृतं "कुटः मृत्पात्रं तत्र धान्यानि लाति आदत्ते संगृह्णातीति यावत् कुटलः तस्य भावः कौटल्य" (?) इति व्युत्पादितम् । "अंगुल" इत्यस्य स्थाने "अङ्गुल" इत्यपि कृतम् ।

(२) आधुनिकेतिहासतत्त्वविदस्तु अयमेव समयश्चन्द्रगुप्त-

नार्हतीति ।

अत्र नैयायिका वदन्ति

पुरुषोत्तमदेवकृतत्रिकाण्डशेषकोशे(१) ब्रह्मवर्गे

"विष्णुगुप्तस्तु कौण्डिन्यश्चाणक्यो द्रामिलोंशुलः ।

वात्स्यायनो मल्लिनागपक्षिलस्वामिनावपि(२) ॥"

अपि च त्रिकाण्डशेषकोशारम्भ एव

"अलौकिकत्वादमरः स्वकोशे

न यानि नामानि समुल्लिलेख ।

राज्याभिषेकस्येति निर्णीतं सोऽपि परीक्षणीयोऽग्रे मयेति ।

(१) कोशकारेण वेद-धर्मशास्त्र-पुराणेषु न्यायदर्शनादिषु च ये शब्दा येषु अर्थेषु प्रयुक्ता नानास्थानेषु वितता एकत्र संकलय्य कोशे कथिता अत एव अमरसिंहः

"समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।

सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥"

अमरानुयायी पुरुषोत्तमदेवोऽपि ।

"परिभाषादिकं सर्वमत्राप्यमरकोशवत् । "इत्युक्तवान्

अमरपरिशिष्टाख्योऽपि महान् कोशो ऽतीवोपयुक्तो वर्तते त-द्दर्शनान्न तत्परिशिष्टापेक्षा भवतीति ।

इत्थं च "पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् ।

आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥"

इतिवत् कोशानां नाज्ञासिद्धत्वं नाप्यैतिहासिकवृत्तक्रमव्य-वस्थापकत्वम् । तथा च अनेकार्थध्वनिमञ्जर्याख्यकोशे २ हरि-शब्दो विष्णु-सूर्य-वानरादीनां वाचकत्वेनैकत्र लिखितः न त-स्माद्विष्णु-सूर्य-वानराणामैक्यं नाप्येकदेशैककालावस्थायित्वम् इति सिद्धम् ।

(२) पाठोऽयं प्राचीने लिखिते पुस्तके वर्तते । मुद्रिते पुस्तके तु "द्रोमिणः" "मल्लिनाग" अत्र "मन्दनागः"इति दृश्यते । अत्र विसर्गः शोधकप्रमादाद्बोध्यः पक्षिलस्वामिनावपीति द्विवचनानुपपत्तेः ।

विलोक्य तैरप्यधुना प्रचार-
मयं प्रयत्नः पुरुषोत्तमस्य ॥"
"परिभाषादिकं सर्वमत्राप्यमरकोशवत् ।"

इति लिखितम् अमरकोशे तु "स्वन्ताथादि न पूर्वभाक्" इति लिखितम् । अत एव त्रिकाण्डशेषकोशटीकायां बुधमनोहरायां "विष्णुगुप्तस्तु कौण्डिन्यः कौटिल्यो वा चाणक्यो द्रामिलः अंशुलः इति पञ्चनामानि चाणक्यस्य । वात्स्यायनः मल्लिनागः पक्षिलस्वामी पक्षिलमुनिर्वा इति त्रीणि नामानि वात्स्यायनमुने"रिति व्याख्यातम्(१) । कलिकातानगरमुद्रिते अमर–त्रिकाण्डशेष–हारावली–मेदिनीतिकोशचतुष्टयपुस्तके(२) सूचीपत्रेऽपि अष्टौ नामानि न चाणक्यस्येति प्रदर्शितम् । एवं स्थिते चाणक्यो भिन्नो वात्स्यायनश्च भिन्न इति प्रतिभाति ।

यदि च अष्टौ नामानि वात्स्यायनस्यैव । पञ्च चाणक्यस्य त्रीणि वात्स्यायनस्येति तु टीकाकारसूचीपत्रकारयोः प्रमादः तदापि "मल्लिनागपक्षिलस्वामिनावपीत्यत्र" स-

---

(१) दृश्यते च न्यायवार्त्तिकतात्पर्यटीकायां सर्वदर्शनसङ्ग्रह तार्किकरक्षाटीकायामपि पक्षिलस्वामी पक्षिलमुनिर्वा । यशोधरकृतकामसूत्रटीकायां मल्लिनाग इत्युक्तम् । न्यायग्रन्थेषु नैयायिकत्वेन वात्स्यायनं विहाय चाणक्योऽन्यो वा नाभिहितः इति त्रिकाण्डशेषटीकाकारस्य मतं नायुक्तमिति ।

(२) श्रीमदमरकृतकोशः पुरुषोत्तमकृतस्त्रिकाण्डशेषश्च ।
हारावल्यभिधानं मेदिनीकारस्य नानार्थः ।
नगरे कलिकाताख्ये कोलब्रुक्साहबाज्ञया ।
श्रीविद्याकरमिश्रेण कृतसूचीसमन्वितः ॥
वेदर्त्वष्टकलानाथसम्मिते विक्रमाब्दके ।
मुद्राक्षरेण यत्नेन बाबूरामेण लेखितः ॥

मुच्चयार्थकेनापिशब्देन(१) मल्लिनागपक्षिलस्वामिनोः समुच्चयेन ग्रहणाद्व्यक्तिभेदः सिद्ध्यति वात्स्यायनशब्दवाच्यौ मल्लिनागपक्षिलस्वामिनावपि भवत इति यावत्। अतः विष्णुगुप्तादिनामविशिष्टश्चाणक्य एको वात्स्यायनः, मल्लिनागः पक्षिलस्वामी च भिन्नो भिन्नो वात्स्यायनः(२)। नात्र किमपि चित्रम् न वात्स्यायना एव भिन्ना अपि तु वत्सोऽपि भिन्नो भिन्नः। यथाह आश्वलायनश्रौतसूत्रे उत्तरषट्के ६ अध्याये(३) "जामदग्न्या वत्सास्तेषां पञ्चार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्नेति ॥ ६ ॥ "द्विविधाः वत्साः जामदग्न्या अजामदग्न्याश्च। तत्र ये जामदग्न्याः वत्साः वयमिति स्मरन्ति तेषां पञ्चार्षेयः प्रवरो भवति भार्गवच्यावनाप्नवानौर्वजामदग्नेति" इति तद्वृत्तिकृतः।

"अथ ह्यजामदग्न्यानां भार्गवच्यावनाप्नवानेति ॥ ७ ॥ "ये तु वयमजामदग्न्या वत्सा इति स्मरन्ति तेषां त्र्यार्षेयः प्रवरो" भवति।

"द्विप्रकाराणां वत्सानां परस्परमविवाहः।" इति तद्वृत्तिकृतः।

पुरुषोत्तमदेवस्तु वेद-धर्मशास्त्र-पुराणादीनि सम्यगालोच्य "अलौकिकत्वादमरः स्वकोशे" इत्यादि उक्त्वा त्रिकाण्डशेषाभिधं कोशं रचितवान् इत्येतस्य प्रामाणिकत्वम्। हे-

---

(१) १।४।९६ पाणिनिसूत्रेण अपिशब्दः समुच्चयवाचकः।

(२) चाणक्य—विष्णुगुप्त—कौटिल्यादयो वात्स्यायनगोत्रजा इत्याश्वलायनीयश्रौतसूत्रे प्रवराध्याये।

(३) एशिआटिक्सोसाइटीवंगालद्वारा मुद्रिते पुस्तके ८७५ पृष्ठे द्रष्टव्यम्

मचन्द्रस्तु न जाने कस्मात् साङ्कर्यं विधाय अष्टौ नामानि वात्स्यायनस्येति सर्वं विप्लावितवान् इति तत्र मूलं मृग्यमेवेति वदन्ति ॥

अपरे तु यदाधुनिकतार्किकाः हेमचन्द्रोक्तेषु वात्स्यायनस्याष्टसु नामसु चाणक्यशब्दाभावेऽपि प्रसह्य चाणक्यं तेषु सन्निवेश्य ग्रीकदेशनिवासिनो मेगास्थिनीसस्य पुस्तके(१) निरूपितं भारतवर्षीयं कमपि "सेन्द्राकोत्तस" नामकं(२) तदानींतनं राजानं विज्ञाय "सेन्द्राकोत्तस"शब्देन चन्द्रगुप्तं परिकल्प्य चन्द्रगुप्तचाणक्ययोश्च मुद्राराक्षसादिभ्य एककालावस्थायित्वं ब्रुवन्तश्चन्द्रगुप्तस्य राज्याभिषेकसमयं ख्रीष्टाब्दारम्भात् ३२१ वर्षेभ्यः पूर्वं निश्चिन्वन्तः तस्मिन्नेव समये वात्स्यायनीयं न्यायभाष्यं रचितमिति सिद्धान्तयन्ति तन्न सम्यक् ।

यतो वात्स्यायन इत्यनेनैव चणकात्मजात् चाणक्याद् भेदसिद्धिः न व्यक्त्यैक्यम् वत्सस्य गोत्रापत्यं वात्स्यः वत्स्यस्य युवा गोत्रापत्यं वा वात्स्यायनः(३) एवं सति वात्स्यायनः

---

(१) एन् सेंट इण्डिया (See Mc Crindle's Ancient India)

(२) Justini Hist Philipp. Lib XV. cap IV) जस्टिन् महाशयास्तु "सन्द्राकोतस" इति वदन्ति । Diodorus Siculus XVII 93 डियोडोरस, (Quintus Curtius) IX. 2 क्विंटसकार्टियस महाशयास्तु "जन्द्रमस" इति वदन्ति । Strabo XV. I. 36 स्ट्रेबो महाशयास्तु "सन्द्रकोतस" इति । Sir William Jones सर विलियम् जोन्स महाशयास्तु सेन्द्राकोतस चन्द्रगुप्तश्चैक एवेति ।

(३) गर्गादिभ्यो यञ् ४ अध्याये १ पादे १०५ पाणिनीयसूत्रेण जुगुप्सा-पूजयोर्यञ्विधानात् । अत्र गर्गादिगणे वत्सः पठितः चणकोऽपि पृथक् पठितोऽस्ति अतः पार्थक्यं निश्चितमेव अ-

चणकात्मजश्चाणक्यः कथमपि भवितुं नार्हति । यदि च वत्सगोत्रीयश्चाणक्य एव न्यायभाष्यकर्ता तर्हि वत्सपुत्रस्य वात्स्यस्य पुत्र एव कथं न सः अपि च गोतम–कणाद–कपिल–पतञ्जलिप्रभृतयोऽपि कथं स्वनामोल्लेखं तत्रतत्र कृतवन्तः कथं स्वगोत्राण्येव न लिखेयुरिति सम्प्रदायविरोधः । अपि च कोशकारेण विष्णुगुप्तादिषु नामसु सप्त व्यक्तिनामानि एकं नाम तु गोत्रस्य तदा कोशकारेण अन्येऽपि सर्वे वात्स्यायना ये वत्सगोत्राः गोत्रप्रवरग्रन्थे पठितास्ते कथं नोपात्तास्तस्मान्न्यायभाष्यकर्त्ता वात्स्यायनो व्यक्तिविशेष एवेति न तु चणकात्मजो नापि कोशोपात्ताः सर्वे शब्दा एकव्यक्तिवाचका इति । तस्माद् य एव वात्स्यायनः स एव पक्षिलस्वामी पक्षिलमुनिर्वेति(१) मन्तव्यम् । वाचस्पतिमिश्रादिभिस्तात्पर्यटीकादिग्रन्थेपूक्तत्वादिति । यथा कात्यायन एव पारस्कराचार्यो हिरण्यकेश एव सत्याषाढः कृष्णद्वैपायन एव वेदव्यास इत्यादय इत्याहुः ।

वस्तुतस्तु मेगास्थिनीसपुस्तकविषयेऽनेके वदन्ति यत् खलु तल्लिखितं संपूर्णं पुस्तकमेव नोपलब्धं केनापि इतस्ततः प्रकीर्णानि पत्राण्येवोपलब्धानि तेभ्य एकं पुस्तकं समाकलय्य भाषान्तरेष्वनूदितमिति(२) तत्र "सेन्द्राकोत्त-

---

न्यथा व्याघ्रपात्—प्राचीनयोग-पुलस्ति—अग्निवेश—शङ्ख-धनञ्जय-विश्वावसु—मनु—ऋक्ष—अनुड्डह-याज्ञवल्क्य—रहूगण—मुद्गल-जमदग्नि—पराशरादीनामपिपाठात् सर्वेषामैक्यापत्तेः ।

(१) योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ॥ इति न्यायभाष्यान्ते वर्तते ।

(२) वाङ्किमचन्द्रचट्टोपाध्यायेर ग्रन्थावली, कृष्णचरित्र १३१४

स'' ''सेन्द्राकोतस'' ''जन्द्रमस'' शब्देन चन्द्रगुप्तस्य ग्रह-णमाधुनिकतार्किकाणामेव बुद्धिकौशलं तत्सन्तानानां शिष्याणामेवाहो पाण्डित्यमहो कौशलमिति घण्टाघोषपूर्वकं तत्प्रशंसनं न तु तत्त्वविदाम् यतो ''मात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः'' ''एक बिन्दु के लघु भये कुन्ती कुत्ती होइ'' बिन्द्वाकारस्य नकारावयवस्य स्पष्टत्वे ''कुन्ती'' इति पठ्यते तस्यैवास्पष्टत्वे ''कुत्ती'' (शुनी) इति पठ्यते । उच्चारणापाटवे तु शकलं सकलं सकृच्छकृद्भवतीति ।

अत्र केचित् उच्चारणापाटवेन चन्द्रगुप्तस्यैव नाम सेन्द्राकोत्तसादिशब्देभ्य उपात्तमिति समादधति अस्तु तदेव परं तु यच्च भूमेश्चित्रे भारतवर्षस्य चतुष्कोणत्वं तेन निरूपितमपि च भारतवर्षीयमनुष्याणां जातिरूपेण सप्तधा भेदं प्रदर्श्य ''एकजातीया मनुष्या एतादृशा वर्तन्ते येषां मुखं नास्त्येव ते खलु धूममाघ्राय फलस्य सौरभं गन्धमाघ्राय जीवन्ती''त्यादि प्रलपितम् अन्येषां मनुष्याणां प्रत्येकहस्तेषु अष्टावष्टावङ्गुल्यो भवन्त्येवमनेके विषया निरूपिताः एवं च यत्र सेन्द्राकोत्तसराजा निरूपितस्तत्र चाणक्यस्य चर्चापि नास्ति तदपि उच्चारणापाटवेन अनु-

---

बङ्गलासन् मुद्रित ''मिगास्थेनिस् खीष्टपूर्व ३ वा चतुर्थशताब्दीर लोक । मिगास्थेनिसेर भारतसम्बन्धीय ग्रन्थ विद्यमान नाई, केवल अन्यान्य ग्रन्थकार ताहा हइते ये सकल अंश ताहादिगेर निज-निज पुस्तके उद्धृतकरिया छिलेन ताहाई संकलन पूर्वक डाक्तर श्वान्वेक नामक एक जन आधुनिक पण्डित एकखानि ग्रन्थ प्रस्तुत करियाछेन ताहाई एखन मेगास्थेनिसकृत भारतवृत्तान्त बलिया प्रचलित ।''

मानेन बुद्ध्यपाटवेन वेति केनचिदेव समञ्जसनीयं न तत्त्व-विद्भिरिति ।

मित्रगोष्ठीमासिकसंस्कृतपत्रिकायां चतुर्थवर्षीयषष्ठसप्तम-संख्ययोः (१८२९ शाकाब्दीयाश्विनकार्त्तिकमासयोः) १५६—१५७ पृष्ठे उद्धृतोऽस्ति । "ग्रीसदेशीय-मेगास्थिनीसनामकराजदूतेन स्वनिर्मित-इण्डिकानामकग्रन्थे भारतदेशस्याकारश्चतुष्कोणक्षेत्रसमानो वर्णितः । अन्येन ग्री-सदेशीयेन "टलेमी"नामकेन भारतदेशीयमानचित्रं-(map) मुद्रितं तत्रापि भारतदेशश्चतुष्कोण एव वर्णित" । इति ।

ज्यौतिषसिद्धान्तेषु भूगोलवर्णनप्रस्तावे भारतभूमेरा-कारस्त्रिकोणकल्प एव यथाह सिद्धान्तशिरोमणौ गोलाध्याये भास्कराचार्यः

लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात्
तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः ।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीलाः
वर्षाण्येषां जगुरिह बुधा अन्तरे द्रोणिदेशान् ॥ २६ ॥

आधुनिकैरपि भूमेश्चित्रेषु त्रिकोणकल्प एव निरूपि-तस्तदा ग्रीसदेशीयानामुक्तनिरूपणं तु सर्वथैवाप्रामाणिकमेव । तस्मान्मेगास्थिनीसनामकस्य तत्सदृशस्य वा लेखोऽश्रद्धेयः ।

अपि च साङ्गोपाङ्गं विना चन्द्रगुप्तादिनाममात्रेणैव समय-निर्णये(१) सति राजतरङ्गिणीग्रन्थे १ तरङ्गे काश्मीरदेशे रा-

---

(१) यदि च प्राचीनपाषाणादिपाठकबलेन सेन्द्राकोत्तसश-ब्देन चन्द्रगुप्त एव भवेत् तत्सम्बन्धबलेन तन्मन्त्री चाणक्योऽपि तत्रागच्छेत् पूर्वोक्तहेमचन्द्रकोशबलेन स एव विष्णुगुप्तः स एव वात्स्यायनः स एव न्यायभाष्यकर्ता भवेत् तदा ५२० शाका-

वणकुम्भकर्णविभीषणनामका राजानः सञ्जाता इति ले-
खदर्शनात् रामलक्ष्मणादीनामाधुनिकत्वापत्तेः एवं महाभारते
ऽनुशासनपर्वणि ७० अध्याये नृगोपाख्यानं श्रीमद्भागवतेपि
नृगोपाख्यानं वर्तते ।

वाचस्पतिमिश्रेण भामत्यामन्ते

"नरेश्वरा यच्चरितानुकार-
मिच्छन्ति कर्त्तुं न च पारयन्ति ।
तस्मिन् महीपे महनीयकीर्त्तौ
श्रीमन्नृगेऽकारि मया निबन्धः ॥"

इत्युक्तत्वान्महाभारताद् भागवताच्च पूर्वं वाचस्पतिमिश्र-
स्य स्थितत्वापत्तेः ।

अन्यच्च नृसिंहनामसहस्र-रामनामसहस्र-कृष्णनामसहस्रा-
दिपुस्तकदर्शनाद्विज्ञातं भवति यानि नामानि नृसिंहस्य तान्येव
बाहुल्येन रामस्य कृष्णस्य तथा बहूनां मनुष्याणामपीत्यसा-
धारणहेतून् विना नाममात्रादेव कालनिर्णये रामादीनामप्या-
धुनिकत्वमाधुनिकमनुष्याणामपि त्रेतायुगावस्थायित्वं स्यादिति
महान् विप्लवः ।

यदि च सेन्द्राकोत्तसशब्देन चन्द्रगुप्त एव सिद्ध्येत् तत्स-
म्बन्धबलेन तन्मत्री चाणक्योपि तदानीं प्रसह्य तत्र प्रविशेत् हे-
मचन्द्रकोशप्रामाण्यात् क्लिष्टकल्पनया चाणक्य एव वात्स्यायनः

ब्दलब्धजन्मना त्रिंशद्वर्षवयस्केन ब्रह्मगुप्तेन ब्रह्मस्फुटसिद्धान्तो
विरचितः अस्य पिता जिष्णुगुप्तः पितामहश्च विष्णुगुप्तः अयं च
पुरुषपरम्परया सुप्रसिद्धग्रन्थकारो महापण्डितः अयमेव न्यायभा-
ष्यकर्ता कथं न कल्प्यत इति न बुध्यामहे । ब्रह्मस्फुटसिद्धान्त-
स्तु महामहोपाध्यायश्रीसुधाकरद्विवेदिना मुद्रापितः ।

मल्लनागः चणकात्मजः द्रामिलः पक्षिलस्वामी विष्णुगुप्तः अङ्गुलः स एव कौटिल्यश्च एकस्यैव पुरुषस्य सर्वाणि नामानि तदा कौटिल्यप्रणीतस्यार्थशास्त्रस्य जैनचतुर्विंशतीर्थङ्करेण महावीरस्वामिना जैनसिद्धान्तेषु मिथ्याशास्त्रत्वेन(१) निरूपितत्वात् महावीरस्वामिनश्च विक्रमीयवर्षारम्भात् ४७० वर्षेभ्यः पूर्वं खीष्टाब्दारम्भात् ५२७ वर्षेभ्यः पूर्वं निर्वा-

---

(१) श्वेताम्बरजैनास्त्वेवं वदन्ति २४ तीर्थङ्करो महावीरस्वामी स्वशिष्याय गौतमाय इन्द्रभूतये चतुर्दशपूर्वसञ्ज्ञकान् एकादशाङ्गसञ्ज्ञकान् सिद्धान्तानुपदिदेश ते चैकादशाङ्गसञ्ज्ञका ४१ भागेषु विभक्ताः यथा ११ अङ्गानि १ आचाराङ्गम् २ सूत्रकृदङ्गम् ३ स्थानाङ्गम् ४ समवायाङ्गम् ५ भगवतीसूत्रमित्यादिना तत्र ४० नन्दिसूत्रम् ४१ अनुयोगद्वारसूत्रमस्ति । तत्रानुयोगद्वारसूत्रे "जं इमं अन्नाणीहिं मिच्छादिट्ठीहिं सच्छन्दबुद्धिमइ विगप्पियं तं जहा भारहं रामायणं भीमासुरुक्कं कोडल्लयं घोडयमुयं सगडभाद्दयाउ कप्पासियं नागसुहुमं कणगसत्तरीवेसियं वइसेसियं बुद्धसासनं काविलं लोगायतं सट्ठितंतं माढरपुराणं वागरणनाडगाइ अहवासावत्तरि कलाउ चत्तारिय वेया संगोवंगा सेतं लोइयं नो आगमउ भावसुयम्" ।

अत्र नन्दीसूत्रे पाठान्तराणि (कोडल्लयं)कोडिल्लियं अपि च 'भागवयं पाअंजली पुस्सदेवयं लेहं गणिअं सउणरुअं, एतावान् पाठोऽधिकः ।

भगवतीसूत्रे च २ । १ । २० "रिउवेद जजुवेद सामवेद अथव्वणवेद इतिहासपञ्चमाणं निघंटुछट्ठानं चउणह वेदाणं संगोवंगाणं सरहस्साणं सारए वारए धारए पारए खडंगवी सट्ठितंतविसारए संखाणे सिक्खा कप्पे वागरणे छन्दे निरुत्ते जोतिसामयने अण्णेसुय बहुसु बंभणएसु परिव्वायएसु नयेसु परिनिट्ठिए यावि होत्था" इति भगवतीसूत्रविषयकनिबन्धे वेबरमहाशयकृते २ खण्डे २४८ पृष्ठे द्रष्टव्यम् ।

णपदं गतत्वात्(१) ततोऽपि पूर्वं स्थितः कौटिल्यः मेगास्थिनीसोक्तसेन्द्राकोत्तससमये ख्रीष्टाब्दारम्भात् पूर्वं ३२१ वर्षेऽपि स्थित इत्यस्य सामञ्जस्यमाधुनिकतार्किकैरेव कर्तव्यं न तत्त्वविद्भिरिति ।

मम तु मते भारतवर्षस्य चतुष्कोणाकारत्वनिरूपणवत् तत्रत्यमनुष्याणां मुखहीनत्वनिरूपणादिवच्च सेन्द्राकोत्तमूशब्देन कश्चिदन्य एव राजा भवेत् चन्द्रगुप्तस्याग्रहे तु कश्चिदन्यश्चन्द्रगुप्तः ? तरङ्गराजतरङ्गिण्यादिनिरूपितकाश्मीरराजरावणादिवदिति न तु विष्णुपुराणाद्युक्तश्चन्द्रगुप्तश्चाणक्यसचिव इति प्रतिभाति ।

एवं सति विक्रमादित्यवर्षारम्भात् ४७० वर्षेभ्यः पूर्वं निर्वाणत्वं गतस्य महावीरस्वामिनः २४ तीर्थङ्करस्य जीवनसमयात् पूर्वं शास्त्रत्वेन वर्तमानस्य कौटिल्यशास्त्रस्य तत्कर्तुः कौटिल्यस्य बहुपूर्वकालावस्थायित्वं सिद्ध्यति ।

अत एव भागवते १२ । १ । ७

"नव नन्दान् द्विजः कश्चित्(२) प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्या(३) भोक्ष्यन्ति वै कलौ ॥

---

(१) आपामरप्रसिद्धोऽयं विषयो जैनपट्टावल्यां द्रष्टव्यः ।

(२) द्विजः कश्चित् चाणक्य इति श्रीधरस्वामी भागवतटीकायाम् ।

(३) भारतवर्षीयेतिहासपुस्तकानि महाभारतादीनि महापुराणानि विष्णु—मत्स्य—वायुपुराणादीनि च सर्वाणि मुरायाः राजपत्न्या अपत्यानि मौर्या इति वदन्ति व्युत्पत्तिबललभ्यानि मौर्या इति नामान्यन्वर्थान्यपि भवन्ति । परं तु रघुवंशे "नवे तस्मिन् महीपाले सर्वं नवमिवाभवत्" अपि च लौकिकाभाणकोऽपि "कवयः किं न कल्पन्ते किं न भक्षन्ति वायसाः" इदानीं

स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥" इति ।
स्कन्दपुराणेऽपि ।

"ततोऽपि द्विसहस्रेषु दशाधिकशतत्रये ।
भविष्यं नन्दराज्यं च चाणक्यो यान् हनिष्यति ॥"

इत्युक्त्या अस्मिन् १९७२ विक्रमाब्दे १८३७ शाकाब्दे २७०६ सौरवर्षेभ्यः पूर्वं चाणक्यस्य स्थितिरासीदिति निष्पन्नं भवति ।

एवं स्थिते शिलादिशासनस्थानां सन्देहपूर्णानां जीर्णत्वाद्विलुप्तकल्पाक्षराणामर्थानुसन्धानेन संयोजितवर्णानां वाक्यानामेकैकप्रकारेणान्येनान्यप्रकारेणा(१)ऽनुमानेनार्थानुसन्धानेन पाठकानां ख्रीष्टपूर्वं चतुर्थशताब्दां चाणक्यस्थितिस्थापकानां कुत्र स्थितिर्भविष्यतीति आधुनिकतार्किकैरेव समञ्जसनीयम् ।

यदि चाणक्यश्चेदर्वाचीनस्तदा विष्णुपुराणे वायुपुराणे मत्स्यपुराणे च चाणक्यस्य कथाया निरूपणात् विष्णुपुराणादिकर्त्ता द्वापरयुगे वर्तमानो वेदव्यासः कुत्र तिष्ठेत् तानि पुराणा-

---

श्रूयते पारशीकदेशे मुरानामिका काचिन्नगरी तदुत्पन्नो मौर्यश्चन्द्रगुप्तः पारशीक इति । "किं किं न साधयति कल्पलतेव विद्या ॥"

(१) यथा दिल्लीनगरस्थस्तम्भस्थलेखं कोलब्रुकमहाशयेन एकेन प्रकारेण कयानिङ्हममहाशयेनान्येन प्रकारेण एवं वाराणसीस्थराजकीयपाठालये वर्तमाने पाषाणस्तम्भे लिखितं पद्यं पठित्वा केचित् युधिष्ठिरस्य स्तम्भोऽयमिति कल्पयन्ति । अन्ये तु तत्र 'पाल' शब्दपाठात् पालवंशीयस्य कस्यचिद्राज्ञः । अपरे तु गुप्ताक्षरेषु लेखात् गुप्तवंशस्येत्यादयः कल्पनाविशेषाः ।

आचार्यश्रीसत्यव्रतसामश्रमिणस्तु ताम्रशासनमेव पठित्वा वेदभाष्यकर्त्तुर्महीधरस्य पुरातनत्वं वदन्तीति प्रतिपादितमधस्तात् ।

न्यपि कुत्र तिष्ठेयुरिति । तथाहि विष्णुपुराणे ३ अंशे ३ । ४ । ५ । ६ अध्यायेषु

"द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ।
वेदमेकं स बहुधा कुरुते जगतो हितः ॥"

"यया स कुरुते तन्त्वा वेदमेकं पृथक् प्रभुः ।
वेदव्यासाभिधानात् तु सा मूर्त्तिर्मधुविद्विपः ॥"

"अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः ।
वैवस्वतेन्तरे तस्मिन् द्वापरेषु पुनः पुनः ॥"

"चतुर्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ॥
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः ।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥
जैमिनिं सामवेदस्य तथैवाथर्ववेदवित् ।
सुमन्तुस्तस्य शिष्योऽभूद्वेदव्यासस्य धीमतः ॥
रोमहर्षणनामानं महाबुद्धिं महामुनिम् ।
सूतं जग्राह शिष्यं स इतिहासपुराणयोः ॥"

"कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
कोन्यो हि भुवि मैत्रेय महाभारतकृद्भवेत् ॥"

"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥
आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं(१) भागवतं तथा ।

---

(१) मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक् ॥
इति देवीभागवते । अत्र मद्वयेन मत्स्यपुराणम् मार्कण्डे-

अथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ॥
आग्नेयमष्टमं चैव भविष्यं नवमं तथा ।
दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं स्मृतम् ॥
वाराहं द्वादशं चैव स्कान्दं चात्र त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम् ॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥
सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितं च यत् ।" इति

इत्थमष्टादशविद्या वेदानां शाखाभेदाश्च तत्संख्या तत्पाठकानां महर्षीणां नामानि च ३–६ अध्यायेषु निरूपितानि ।

एवं ४ अंशे ४ । ५ अध्याययोः सूर्यवंशकथनप्रसङ्गेन रामायणकथां ६–२० अध्यायेषु सोमवंशकथामुपक्रम्य यदुवंशकथाप्रसङ्गे कृष्णावतारकथां भारतकथां च संक्षिप्य भूतकालिकत्वेन वर्तमानत्वेन वा निरूपितवान् । ततश्च २१–२४ अध्यायेषु कलियुगे भविष्यत्वेन च राजवंशा निरूपिता यथा

गपुराणं च गृह्यते । भद्वयेन भागवतं भविष्यं च । ब्रत्रयेण ब्रह्मपुराणं ब्रह्मवैवर्तं ब्रह्माण्डं च । वचतुष्टयेन विष्णुपुराणं वायुपुराणं वाराहपुराणं वामनपुराणं च । अ–ना–प–लिं–ग–कू–स्कानीत्यनेन आग्नपुराणं नारदपुराणं पद्मपुराणं लिङ्गपुराणं गरुडपुराणं कूर्मपुराणं स्कन्दपुराणं च । एषु शिवपुराणानुक्त्या वायुरूपेण शिवेन प्रोक्तत्वाच्छैवापरनामधेयं वायवीयं पुराणमिति तत्र तत्र लेखदर्शनाद्विरोधपरिहारेऽपि पुराणद्वयं तु जातमेव । अत एव बृहन्नारदपञ्चरात्रे पुराणसमन्वये षड्विंशतिमहापुराणानीति प्रदर्श्य कल्पभेदेन एकस्मिन् कल्पे एतानि अन्यस्मिन् कल्पे कानिचिद्भिन्नानि परन्तु षड्विंशतेर्नाधिकानीति निरूपितम् । ततः परमष्टादशोपपुराणानि अष्टादशोपोपपुराणानि अष्टादशेतिहासाश्च वर्तन्ते इत्यलं पल्लवितेन ।

"अर्जुनस्याप्युलूप्यां नागकन्यायामिरावान् नाम पुत्रोऽभूत् । मणिपूरपतिपुत्र्यां च पुत्रिकाधर्मेण बभ्रुवाहनं नाम पुत्रमर्जुनोऽजीजनत् । सुभद्रायां चार्भकत्वेऽपि योसावतिबलपराक्रमः समस्तारातिरथविजेता सोऽभिमन्युरजायत । अभिमन्योरुत्तरायां परिक्षीणेषु कुरुषु अश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्यात्मेच्छाकारणमानुषरूपधारिणोनुभावात् पुनर्जीवितमवाप्य परिक्षित् जज्ञे । योऽयं साम्प्रतमेतद् भूमण्डलमखण्डितायतिधर्मेण पालयतीति ।" ततः परम्

"पराशर उवाच । अतः परं भविष्यानहं भूमिपालान् कीर्तयिष्ये योऽयं साम्प्रतमवनीपतिः परिक्षित् तस्यापि जनमेजयश्रुतसेनोग्रसेनभीमसेनाः पुत्राश्चत्वारो भविष्यन्ति ।" इत्युपक्रम्य

"ब्रह्मक्षत्रस्य यो योनिर्वंशो राजर्षिसत्कृतः ।
क्षेमकं प्राप्य राजानं स संस्थां प्राप्स्यते कलौ" ॥ इत्युक्तम्

ततः "मागधानां वार्हद्रथानां भविष्याणामनुक्रमं कथयामि । अत्र हि वंशे महाबला जरासन्धप्रधाना बभूवुः । जरासन्धसुतात् सहदेवात् सोमापिस्तस्माच्छ्रुतवान् " इत्युपक्रम्य "तस्यापि रिपुञ्जयः पुत्र इत्येते वार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्ति । योयं रिपुञ्जयो नाम वार्हद्रथोऽन्त्यस्तस्य सुनिको नामामात्यो भविष्यति । स चैनं स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति तस्यापि पालकनामा पुत्रो भविता ततश्च विशाखयूपस्तत्पुत्रो जनकस्तस्य च नन्दिवर्धन इत्येतेऽष्टात्रिंशदुत्तरमब्दशतं पञ्च प्रद्योताः (प्रद्योतनामानः) पृथिवीं भोक्ष्यन्ति । ततश्च शिशु-

नागस्तत्पुत्रश्च काकवर्णो भविता तत्पुत्रः क्षेमधर्मा तस्यापि क्षतौजास्तत्पुत्रो विम्बिसारस्ततश्चाजातशत्रुस्तस्माच्च दर्भको दर्भकाच्चोदयनस्तस्मादपि नन्दिवर्धनस्ततो महानन्दी इत्येते शैशुनागा दशभूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यन्ति ।* महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविता । ततः प्रभृति शूद्राः भूमिपाला भविष्यन्ति । स चैकच्छत्रामनुल्लङ्घितशासनो महापद्मः पृथिवीं भोक्ष्यति । तस्याप्यष्टौ सुताः सुमहत्पाद्मा भवितारः तस्य महापद्मस्यानु पृथिवीं भोक्ष्यन्ति । महापद्मस्तत्पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति । नचैव तान् नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति । तेषामभावे मौर्याश्च पृथिवीं भोक्ष्यन्ति कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति ।

तस्यापि पुत्रो विन्दुसारो भविष्यति तस्याप्यशोकवर्द्धनस्ततः सुयशास्ततो दशरथस्ततः सङ्गतस्ततः शालिशूकस्तस्मात् सोमशर्मा तस्माच्छतधन्वा तस्य तु बृहद्रथनामा भविता । एवं मौर्या दश भूपतयो भविष्यन्ति अब्दशतं सप्तत्रिंशदुत्तरं तेषामन्ते पृथिवीं शुङ्गा भोक्ष्यन्ती"त्यादि निरूपितम् एवमेव वायुपुराणे उत्तरार्द्धे(१) ३७ अध्याये निरूपितम्(२) ।

---

(१) मुद्रितं तु वायुपुराणं पूर्वार्द्धमेव अस्योत्तरार्द्धं तु रेवाखण्डात्मकं श्लोकद्वादशसाहस्र्यात्मकं वर्तते तेन सह वायुपुराणस्य २४००० संख्या भवति । केचित्तु प्रदर्शितशिवपुराणात्मकत्वमपि विहाय कल्पितपुस्तकं ब्रह्माण्डपुराणत्वेन वदन्ति तदसत् ब्रह्माण्डपुराणस्य १२००० श्लोकात्मकस्य लिखितस्य पुस्तकस्य वाराणसीस्थराजकीयसंस्कृतपाठशालायामप्युपलभ्यमानत्वात् ।

(२) सूत उवाच ।

यथा मे कीर्त्तितं सर्वं व्यासेनाद्भुतकर्मणा ।
भाव्यं कलियुगं चैव तथा मन्वन्तराणि तु ॥
अनागतानि सर्वाणि ब्रुवतो मे निबोधत ।
अत ऊर्ध्वं प्रवक्ष्यामि भविष्यन्ति नृपाश्च ये ॥" इत्युपक्रम्य

अधिसामकृष्णनामकं राजानमारभ्य क्षेमकान्तं पञ्चविंशतिराजानो भविष्याः । ततश्च बृहद्रथमारभ्य पुनरपि सञ्जयस्तत्पुत्रः शाक्यः तत्पुत्रः शुद्धोदन इत्यादिः । ततश्च मागधा जरासन्धप्रभृतयः ३२ राजानः तेषां प्राधान्येन नामानि तथाहि जरासन्धस्य पुत्रः सहदेवः सहदेवस्य पुत्रः सोमापिः ५८ वर्षाणि श्रुतश्रवाः ६४ वर्षाणि अयुतायुः २६ वर्षाणि निरामित्रो १०० सुक्षत्रः ५६ वर्षाणि बृहत्कर्मा सेनाजिच्च २३ श्रुतञ्जयस्तु ४० महाबाहुः महाबुद्धिः महाभीमपराक्रमश्च ३५ शुचिः ५८ क्षेमः २८ सुव्रतः सुव्रतो वा ६४ धर्मनेत्रो ५ नृपतिः ५८ पुनः सुव्रतः ३८ दृढसेनः ५८ सुमतिः ३३ सुबलः २२ सुनेत्रः ४० सत्यजित् ८३ वीरजित् ३५ अरिञ्जयः ५० एते राजानो भविष्यन्ति वर्षसंख्यानां योगे कृते ९७४ वर्षाणि तत्र जरासन्धस्य सहदेवस्य च वर्षाणि नोल्लिखितानि तत्संयोजने १००० सम्भवन्ति । ततः परं पञ्च प्रद्योता भविष्यन्ति तथाहि मुनिकः २३ वर्षाणि ततः पालकः २४ विशाखयूपः ४० अजको जनको वा ३१ नन्दिवर्द्धनः २० एतेषां वर्षाणां संयोजने १३८ वर्षाणि भवन्ति । ततः परं दश शैशुनागा भूपतयो भविष्यन्ति तथाहि शिशुनागः ४० वर्षाणि काकवर्णः शुक्रवर्णो वा ३६ क्षेमवर्मा २० अजातशत्रुः २५ क्षत्रोजा वा क्षत्रौजाः ४० विविसारो विम्बिसारो वा २८ दर्शको दर्भको वा २५ उदयो वा उदयनः ३३ नन्दिवर्द्धनः ४२ महानन्दी ४३ एतेषां योगे कृते ३३२ वर्षाणि भवन्ति । अत्र शिशुनागजन्मारभ्य गणनया ३६२ वर्षाणि सम्भवन्ति शैशुनागसमय एव विंशतीराजानो भविष्यन्ति । ततो महानन्दिसुनादयोऽपि वर्षशतं १०० भविष्यन्ति । तान् समुद्धृत्य कौटिल्यो ब्राह्मणश्चन्द्रगुप्तं नृपं राज्येऽभिषेक्ष्यति स च २४ वर्षाणि भोक्ष्यति । ततो भद्रसारो बिन्दुसारो वा २५ वर्षाणि

आधुनिकतार्किकास्तु आधुनिकीं लोकयात्रामुदाहृत्य तावद् भविष्यद्वृत्तं केनाप्यवगन्तुं न शक्यत इति वदन्तः पुराणेषु च कथाभागं दृष्ट्वा तदुक्तपदार्थानां तत्पश्चात्कालभावित्वं निरूपयन्ति। तन्न सङ्गच्छते यतः पुराणेषु भूतकालिकीं कथां भूतत्वेन वर्तमानकालिकीं कथां वर्तमानत्वेन भविष्यत्कालिकं वृत्तं भविष्यत्वेन सुस्पष्टतया वर्णितम्। यदि सर्वं भूतकालिकमेव ततः परं पुराणादिनिर्माणं जातमिति तदा कलौ क्षीणे सन्ध्याशिष्टे कल्क्यवतारो भविष्यतीत्युक्त्या(१) तस्यापि भूतत्वापत्तेः। अन्येषामपि वर्तमानानां कलिधर्माणां येषां वर्षाणां पश्च-

---

ततस्तस्यापि पुत्रोऽशोकवर्द्धनः २६ वर्षाणि राज्यं भोक्ष्यतीत्याद्योऽनेके राजानो निरूपिताः।

(१) मत्स्यपुराणे ४८ अध्याये।

" चतुर्विंशे युगे रामो वसिष्ठेन पुरोधसा।
सप्तमे रावणस्यार्थे जज्ञे दशरथात्मजः॥
अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात्।
वेदव्यासस्ततो जज्ञे जातूकर्ण्यपुरःसरः॥
कर्तुं धर्मव्यवस्थानमसुराणां प्रणाशनम्।
बुद्धो नवमके जज्ञे तपसा पुष्करेक्षणः॥
तस्मिन्नेव युगे क्षीणे सन्ध्याशिष्टे भविष्यति।
कल्की विष्णुर्यशा नाम पाराशर्यपुरःसरः॥"

इत्युपक्रम्य कालधर्माः संक्षेपेण निरूपिताः। मिरुक्ते पुराणे ५२ अध्याये अष्टादशपुराणानां सारांशाः श्लोकसंख्या दानमाहात्म्यं द्वापरे द्वापरे वेदव्यासेन पुराणानां समुद्धरणं च सम्यक्तया निरूपितम्। अत्राध्यायादिनिदर्शनं वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकानुसारेण बोध्यम्।

विष्णुपुराणे ३ अंशे २ अध्याये।
प्रोक्तान्येतानि भवता सप्तमन्वन्तराणि वै।
भविष्याण्यपि विप्रर्षे समाख्यातुं त्वमर्हसि॥ १॥

शत्याः पूर्वं लिखितेषु पुस्तकेषु लेखोऽस्ति तेषां तथा भविष्यत्सूर्यचन्द्रोपरागादीनामपि भूतकालिकत्वापत्तेश्च । अत एव गङ्गामाहात्म्यमधिकृत्य तदानीं गङ्गाया असत्त्वेऽपि तच्छङ्कासमाधिप्रसङ्गे स्कन्दपुराणीयकाशीखण्डे उक्तम् ॥

पुराणसंहिता तात ब्रूते त्रैकालिकीं कथाम् ।

इत्यादि सङ्गच्छते । वस्तुतस्तु वेदव्यासेन गुरुपरम्परया पुराणानि प्राप्तानि तथा स्वशिष्याय प्रतिपादितानि न तु निर्मितानीति(१) ॥

---

(१) वायुपुराणे उत्तरार्द्धे ४१ अध्याये ।

ब्रह्मा ददौ शास्त्रमिदं पुराणं मातरिश्वने ॥ ५८ ॥
तस्माच्चोशनसा प्राप्तं तस्माच्चापि बृहस्पतिः ।
बृहस्पतिस्तु प्रोवाच सवित्रे तदनन्तरम् ॥ ५९ ॥
सविता मृत्यवे प्राह मृत्युश्चेन्द्राय वै पुनः ।
इन्द्रश्चापि वसिष्ठाय सोऽपि सारस्वताय च ॥ ६० ॥
सारस्वतस्त्रिधाम्ने च त्रिधामा च शरद्वते ।
शरद्वतस्त्रिविष्टाय सोऽन्तरिक्षाय दत्तवान् ॥ ६१ ॥
वर्षिणे चान्तरिक्षो वै सोऽपि त्रय्यारुणाय च ।
त्रय्यारुणो धनञ्जये स च प्रादात् कृतञ्जये ॥ ६२ ॥
कृतञ्जयात् तृणञ्जयो भरद्वाजाय सोऽप्यथ ।
गौतमाय भरद्वाजः सोऽपि निर्य्यन्तरे पुनः ॥ ६३ ॥
निर्यन्तरस्तु प्रोवाच तथा वाजश्रवाय च ।
स ददौ सोमशुष्माय स ददौ तृणबिन्दवे ॥ ६४ ॥
तृणबिन्दुस्तु दक्षाय दक्षः प्रोवाच शक्तये ।
शक्तेः पराशरश्चापि गर्भस्थः श्रुतवानिदम् ॥ ६५ ॥
पराशराज्जातुकर्णस्तस्माद् द्वैपायनः प्रभुः ।
द्वैपायनात् पुनश्चापि मया प्रोक्तं द्विजोत्तमाः ॥ ६६ ॥

वैशम्पायन उवाच ।

मया चैतत्पुनः प्रोक्तं पुत्रायामितबुद्धये ।
इत्येव वाचा ब्रह्मादिगुरुणा समुदाहृता ॥ ६७ ॥

यद्वा निर्णायकानां भूतभविष्यद्वर्त्तमानकालिकक्रियाविशेषविषयकं ज्ञानमेव नास्ति अथवा ते विष्णोरवतारं महर्षिमूर्धन्यस्य शुकदेवस्य पितरमष्टादशपुराणानां महाभारतेतिहासस्य पञ्चमवेदस्य च वक्तारं ऋग्यजुःसामाथर्ववेदानां विभक्तारं ब्रह्ममीमांसाप्रणेतारं(१) श्रीवेदव्यासं मिथ्याभाषित्वेन वञ्चकत्वेन पापिष्ठं कल्पयन्ति । अत्र पुराणेषु अन्यकर्तृत्वेन वेदव्यासकृतित्वे सन्देहश्चेत् तर्हि ममापि महान् सन्देहो भवति तत् किं ते सम्यग् विमृष्य वदन्ति त्वरया निपीडितचेतसा वा आग्रहेण अथवानवधृतमनसा वदन्तीत्यादिरित्यलमतिप्रसङ्गेन प्रकृतमनुसरामः ।

विष्णुपुराणे ४ अंशे २४ अध्याये कलिधर्मनिरूप-

---

(१) आनन्दतीर्थापरनामधेयेन मध्वाचार्येण ब्रह्ममीमांसाभाष्ये "तथा चोक्तं स्कान्दे ।

नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् ।
किञ्चित् तदन्यथा जातं त्रेतायां द्वापरेऽखिलम् ॥
गोतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते ।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥
शरण्यं शरणं जग्मुर्नारायणमनामयम् ।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः ॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात् ।
उत्सन्नान भगवान् वेदानुज्जहार हरिः स्वयम् ॥
चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः ।
शतधा चैकधा चैव तथैव च सहस्रधा ॥
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये ।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥
कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
कोऽन्यो हि भुवि मैत्रेय महाभारतकृद्भवेत् ॥" इत्यादि ।

णानन्तरं पुनः कृतयुगाविर्भावप्रसङ्गे

"यावत् परिक्षितो जन्म यावन्नन्दाभिषेचनम् ।
तावद्वर्षसहस्रं तु ज्ञेयं पञ्चशतोत्तरम्(१) ॥
सप्तर्षीणां च यौ पूर्वौ दृश्येते उदितौ दिवि ।
तयोस्तु मध्यनक्षत्रं दृश्यते यत्समं निशि ॥
तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ।
ते तु यौधिष्ठिरे काले(२) मघास्वासन् द्विजोत्तम ॥
तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः(३) ।

(१) मुद्रितपुस्तके पञ्चदशोत्तरमिति पाठः । पञ्चदशोत्तरसहस्रवर्षपर्यन्तं शुद्धः क्षत्रियवंशः स्थास्यतीति टीकाकारैस्तदर्थोऽपि निरूपितः तन्न सङ्गच्छते लेखकादिना मूले कृतस्य प्रमादस्य टीकाकारैरपि तथैवार्थस्य प्रदर्शितत्वात् । तथात्वे परिक्षिदारभ्य नन्दपर्यन्तानां मध्ये बार्हद्रथा वर्षसहस्रमेकं ततोऽष्टत्रिंशदुत्तरमब्दशतं पञ्च प्रद्योताः ततः शिशुनागा दश भूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि ततो महानन्दिसुतो नन्द इत्यधस्तादुक्ते विष्णुपुराणे १५०० वर्षाणि भवन्तीत्यस्योन्मत्तप्रलापापत्तेरिति ।

(२) ते तु पारिक्षिते काले इति मुद्रितपुस्तके प्रामादिकः पाठः । "आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ" इत्यादिनिर्दिश्यमानबृहत्संहितावचनविरोधात् । "प्रयास्यन्ति यदा चैते पूर्वाषाढां" इत्यपि प्रामादिकमेव । अन्यथा युधिष्ठिरसमये परीक्षित्समयेऽपि मघासु सप्तर्षयः स्थिताः अथ नन्दसमये पूर्वाषाढायां गताः परं तु परीक्षिदारभ्य नन्दपर्यन्तं १५०० वर्षाणि भवन्तीति मघा आरभ्य शतभिषक्पर्यन्तं पञ्चदशनक्षत्राणि भवन्तीति शतभिषङ्नक्षत्रे सप्तर्षिस्थित्यापत्तेः ।

(३) कलिप्रमाणं ३६०००० मानुषवर्षाणि दिव्यवर्षाणि तु शतानि सप्त पञ्च योजनया १२०० द्वादश शतानि इत्यग्रेऽस्मिन्नेव पुराणे निरूपितम् । तदा कलिः प्रवृत्तः प्रक-

यदैव भगवद्विष्णोरंशो यातो दिवं द्विज ॥
वसुदेवकुलोद्भूतस्तदैव कलिरागतः।
यावत् स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम् ॥
तावत् पृथ्वीपरिष्वङ्गे समर्थो नाभवत् कलिः।
गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवम् ॥
तत्याज सानुजो राज्यं धर्मपुत्रो युधिष्ठिरः।
विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः ॥
याते कृष्णे चकाराथ सोऽभिषेकं परिक्षितः।
प्रयास्यन्ति तदा(१) चैते पूर्वाषाढां महर्षयः(२) ॥

र्षेण वर्तमानः न त्वारब्ध इति फलितोर्थः। तदा कदेत्यपेक्षायामाह। यदैव भगवद्विष्णोरित्यादि। "कलिः पूर्वं सन्ध्यारूपेण वृत्तोऽपि स्वेन रूपेण सन्ध्यारूपमतिक्रम्य प्रवृत्तः प्रकर्षेण वृत्त इति। एतदेव स्पष्टयति। यदैवेति।" इति विष्णुपुराणटीकायां रत्नगर्भभट्टाचार्याः।

(१) यदा—इति मुद्रितपुस्तके पाठः।

(२) कमलाकरेण ज्योतिषसिद्धान्ततत्त्वविवेके लोके प्रसिद्धानां सप्तर्षीणां स्थिरत्वं प्रतिपादितम्। येषां सप्तर्षीणां पुराणादिषु चारो निरूपितस्ते तु धर्मानुष्ठानोपयोगिनोऽदृश्याः केचिदन्य एव। आधुनिका अपि सप्तर्षिचारविषये ऽनेकान् विकल्पानुद्भावयन्ति यथा "नक्षत्राणि राशिचक्रे स्थितानि सप्तर्षयस्तु तद्बहिः स्थिता कदाचिदपि मघासु न स्थास्यन्ति" इत्यादि। अत्रानुमीयते मया यथा मनुष्यादयो यानादिकं समारुह्य गच्छन्ति तथा ग्रहा अपि गच्छन्तीति चारशब्दस्यार्थ इति उपर्यधःकल्पनया चरत्वं स्थिरत्वं नक्षत्रेषु स्थायित्वं कल्पयन्ति। वस्तुतस्तु नक्षत्रकक्षातः सप्तर्षिकक्षायाश्चातिदूरे वर्तमानत्वान्न केनाप्याधुनिकेनाभिनववयस्केन तन्निर्णेतुं शक्यम् एकस्मिन्नक्षत्रे यदि वर्षशतं तिष्ठन्ति यदि च गणकस्य वर्षशतद्वयमायुश्चेत्तदा स्थू

तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ।
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ॥
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे ।
त्रीणि लक्षाणि वर्षाणां द्विज मानुषसंख्यया ॥
षष्टिं चैव सहस्राणि भविष्यत्येष वै कलिः ।
शतानि तानि दिव्यानि सप्त पञ्च च संख्यया ॥
निःशेषेण ततस्तस्मिन् भविष्यति पुनः कृतम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ॥
युगेयुगे महात्मानः समतीताः सहस्रशः ।
बहुत्वान्नामधेयानां परिसंख्या कुलेकुले ॥
पुनरुक्तबहुत्वात्तु न मया परिकीर्त्तिताः ॥" इति ॥

श्रीवराहमिहिराचार्येण वेद-धर्मशास्त्र-पुराणादीनि समालोच्य बृहत्संहितायां १३ अध्याये सप्तर्षिचारप्रकरणे उक्तम् ।

"आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः २५२६ शककालस्तस्य राज्यस्य ॥३॥

लगतिदर्शनगणितैक्यं भवितुमर्हति । एवमेव भास्कराचार्येण ग्रहगणिते भगणोपपत्तौ ग्रहाणां मन्दोच्चादिदृग्गणितैक्यपक्षे "नायमर्थः पुरुषसाध्य" इत्याद्युक्तम् । नवीनानामपि मते येषां तारागणानां सुमहातिदूरवर्तित्वादसत्त्वं पूर्वं निश्चितमासीत् तेषामिदानीं दूरदर्शकनवीनयन्त्राविर्भावेन सत्त्वमेव सुनिश्चितं जातम् । तस्माद्विष्णुपुराणटीकाकारादिप्रदर्शितरीत्या यन्नक्षत्रेण समं सप्तर्षीणामुदयो दृश्यते तस्मिन्नेव नक्षत्रे तदानीमवस्थानं वक्तव्यमिति । सप्तर्षीणां चाराभावेऽदृश्यत्वे च वृद्धगर्ग—कश्यप—वराहमिहिरादीनां तच्चारनिरूपणं धूमाच्छादिते किरणरहिते प्रत्येकर्षिदर्शने ऽशुभफलनिरूपणमुन्मत्तप्रलाप एवेत्यलं पल्लवितेन ।

वर्षसहस्त्रत्रितयं शतमेकं सप्ततिर्नवाग्रा ३१७९ च ।
शककालयातमिश्रं कलेर्गतं धर्मपुत्रात् तु(१) ॥ ४ ॥

(१) पाठोऽयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवनस्थे पुरातने पुस्तके वर्तते । मुद्रितपुस्तके च त्रुटितस्तथैव टीकापि त्रुटिता वर्त्तते । त्रुटितमूलपुस्तकानुसारेण भट्टोत्पलेन टीका कृता इति कथनं तु साहसमिवाभाति । मुद्रितटीकाप्रदर्शितरीत्या कृतया गणनया इदानीमुत्तराभाद्रपदासु सप्तर्षीणां स्थितिरायाति तत्तु दृग्गणितैक्यविरुद्धम् ।

आसन् मघास्वित्यादिना तत्र संयुक्ता इत्यन्तेन ग्रन्थेन वस्तुत्रयं प्रतिपादितम् युधिष्ठिरस्य राज्यकालः तस्य शककालानयनप्रकारः गतकलियुगाब्दानयनप्रकारश्च । तथाहि धर्मपुत्राद् युधिष्ठिरात् वर्षसहस्त्रत्रितयम् एकं शतं नवाग्रा सप्ततिश्च ३१७९ एतद्वर्षवृन्दे शककालयातमिश्रे सति गतकलियुगाब्दाः समायान्ति । षड्द्विकपञ्चद्वियुतः २५२६ एतद्वर्षवृन्दे शककालयुक्ते सति राज्यान्तकालः समायाति । पृथ्वीं शासति युधिष्ठिरे अर्थात् राजसिंहासनाधिरूढे मघासु सप्तर्षयः आसन् इति । अत्र धर्मपुत्रयुधिष्ठिरसमयात् गतकलियुगाब्दानयनं प्रदर्शितमतः कलियुगारम्भात् पूर्वकालावस्थायित्वे द्वापरयुगावस्थायित्वं सुव्यक्तम् । अत एव सप्तर्षिचारप्रकरणे भट्टोत्पलेन बृहत्संहिताटीकायां "कलिद्वापरसन्धौ तु स्थितास्ते पितृदैवतम्" इत्युक्तवृद्धगर्गवचनं सङ्गच्छते । ते सप्तर्षय इति भावः ।

शककालस्तस्य राज्ञश्च राज्यस्येति वा पाठः तस्य युधिष्ठिरस्य शककालः अत्र शकशब्दः संवत्सरवाचकः पारिभाषिकः तथाह ज्योतिर्विदाभरणे १० अध्याये

"युधिष्ठिरो विक्रमशालिवाहनौ
नराधिनाथौ विजयाभिनन्दनः ।
इमेऽनु नागार्जुनमेदिनीविभु-
र्बलिः क्रमात् षट् शककारकाः कलौ ॥" इति ।

विस्तरस्तु वाचस्पत्ये बृहदभिधाने शकशब्दविवरणे द्रष्टव्यः ।

एकैकस्मिनृक्षे शतं शतं ते चरन्ति वर्षाणाम् ।
प्रागुदयतोऽप्यविवराद्दजूनयन्ति तत्र संयुक्ताः ॥ ९ ॥”

एतदनुसारेणास्मिन १९७२ विक्रमाब्दे १८३७ शाकाब्दे १९१५ खीष्टाब्दे कलियुगस्य ५०१६ सौरवर्षाण्यतीतानीत्ययं बहूनां ज्योतिर्विदां सिद्धान्तः एतदेव स्पष्टयामि । तथाहि

युधिष्ठिरराज्यकाले मघानक्षत्रस्य कस्मिन् पादे वा सिंहराशौ कस्मिन्नंशे सप्तर्षयः स्थिता इति लेखाभावात् सूक्ष्मगणनायां व्यतीतवर्षसंख्यायां किञ्चिदन्तरं सम्भवतीति स्थूलगणनया प्रदर्श्यते । इदानीमपि आकाशे सप्तर्षयो मघास्वेव वर्तमाना दृश्यन्ते इति नैव तिरोहितमस्ति विदुषाम् तथा सति प्रथमावृत्तौ मघा आरभ्य म-

---

षड्द्विकपञ्चद्वि २५२६ युतः इदानीन्तनशककालः १८३७ युक्त्या ४३६३ एतावन्ति वर्षाणि व्यतीतानि तानि च तस्य राज्यत्यागकालात् स्वर्गारोहणकालाद्वा अवगन्तव्यानि । यतः प्रायो निर्वाणकालान्मरणकालाद्वा वर्षारम्भव्यवहारो भवति शालिवाहनशककालविषये सिद्धान्तशिरोमणौ गणिताध्याये भास्कराचार्याः ।

याताः षण्मनवो युगानि भमितान्यन्यद्युगाङ्घ्रित्रयं
नन्दाद्रीन्दुगुणास्तथा शकनृपस्यान्ते कलेर्वत्सराः ।
गोद्रीन्द्वद्रिकृताङ्कदस्रनगगोचन्द्राः१९७२९४७१७९शकाब्दान्विताः ।
सर्वे सङ्कलिताः पितामहदिने स्युर्वर्तमाने गताः ॥ २८ ॥

यथा च जैनानां महावीरस्वामिनिर्वाणकालात् संवत्सरारम्भः । एवं सति राजतरङ्गिण्युक्त ६५३ गतेषु कलिवर्षेषु युधिष्ठिरावस्थाने इदानींतन ४३६३ गतयुधिष्ठिराब्दयोगे ५०१६ कलिगताब्दाः समायान्तीति सर्वं समञ्जसम् ।

धापर्यन्तं २७०० सौरवर्षाणि नृणां वर्षाणि वा अतीतानि (१) पुनरपि द्वितीयावृत्तौ(२) तथैव २७०० वर्षाणि अतीता-

(१) वायुपुराणे उत्तरार्द्धे ३७ अध्याये
सप्तर्षयस्तदा प्राहुः प्रतीपे राज्ञि वै शतम् ।
सप्तविंशैः शतैर्भाव्या आन्ध्रान्तास्ते त्वया पुनः ॥ ४१२ ॥
सप्तविंशतिपर्यन्ते कृत्स्ने नक्षत्रमण्डले ।
सप्तर्षयस्तु तिष्ठन्ति पर्यायेण शतं शतम् ॥ ४१३ ॥ इति

(२) इदानींपर्यन्तमेकावृत्तिरेव कथं न मन्तव्या तथा सति
"ततोऽपि छिन्नहस्रेषु दशाधिकशतत्रये ।
भविष्यं नन्दराज्यं च चाणक्यो यान् हनिष्यति ॥"
इति स्कन्दपुराणस्थं वचनं कुत्र समन्वयनीयम् ? ।

अपि च जनमेजयप्रदत्तं ताम्रशासनं कुत्र गच्छेत् ? तत्ताम्रशासनस्य प्रतिलिपिः सन् १८७५ नवम्बरमासमुद्रिते इण्डियन् अंटिक्वेरी पुस्तके वर्तते तथाहि

"श्रीगणाधिपतये नमः पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः स्वस्ति श्रीजयाभ्युदये युधिष्ठिरशके प्लवङ्गाख्ये एकोननवतिवत्सरे सहस्यमासे अमावस्यायां सौम्यवासरे श्रीमन्महाराजाधिराजपरमेश्वरो वीरप्रतापशाली कुरुकुलोद्भवो वैयाघ्रपादगोत्रजः श्रीजन्मेजयभूपः किष्किन्धानगर्यां सिंहासनस्थः सकलवर्णाश्रमधर्मप्रतिपालकः पश्चिमदेशस्थसीतापुरवृकोदरक्षेत्रे तत्रत्यमुनिवृंदमठस्य गरुडवाहनतीर्थश्रीमच्छिष्यकैकयनाथैराराधितसीतारामस्य पूजार्थं कृतभूदानसाधनअस्मत्प्रपितामहयुधिष्ठिराधिष्ठितमुनिवृन्दक्षेत्रेऽस्य चतुःसीमापरिमितिक्रमः पूर्वभागे उत्तरवाहिन्याः तुङ्गभद्रायाः पश्चिमे दक्षिणभागे अगस्त्याश्रमसङ्गमादुत्तरे पश्चिमे पाषाणनद्याः पूर्वे उत्तरभागे भिन्ननद्याः दक्षिणे एतन्मध्यस्थमुनिवृन्दक्षेत्रं भवच्छिष्यपरंपरया आचन्द्रार्कपर्यन्तं निधिनिक्षेपजलपाषाणआक्षिणी(?) आगामिसिद्धसाध्यतेजःस्वाम्यसहितं स्वबुद्ध्यनुकूलेन अस्मन्माता-

नि सङ्कलनया ५४०० वर्षाणि गतानि । युधिष्ठिरमहाराजस्य द्वापरयुगे वर्तमानत्वात् वर्षसहस्रात्मकमायुः सम्भवति(१)

पित्रोः विष्णुलोकप्राप्त्यर्थं हरिहरसन्निधौ उपरागसमये सहिरण्येन तुंगभद्राजलधारापूर्वकं क्षेत्रं यतिहस्ते दत्तवानस्मि एतद्धर्मसाधनस्य साक्षिणः आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् दानपालनयोर्मध्ये दानाच्छ्रेयोनुपालनम् दानात्स्वर्गमवाप्नोति पालनादच्युतं पदं स्वदत्ताद् द्विगुणं पुण्यं परदत्तानुपालनं परदत्तापहारेण स्वदत्तं निष्फलं भवेत् स्वदत्ता पुत्रिका ज्ञेया पितृदत्ता सहोदरा अन्यदत्ता तु जननी दत्तभूमिं परित्यजेत् । अन्यैस्तु च्छर्दितं क्षुद्रैः श्वभिश्च च्छर्दितं न तु । ततः कष्टस्ततो नीचः स्वयंदत्तापहारकः स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत यः षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ।" इति ॥

केचित्तु अनियतस्वरूपां लिपिं नियतस्वरूपां परिकल्प्य तत् ताम्रशासनं कृत्रिमं निरूपयन्ति ।

अन्ये तु तत्रोक्ताः प्लवङ्गसंवत्सरसहस्यमासकृष्णपक्षामावास्यासौम्यवासरोपरागादियोगा इतः पूर्वं त्रयोदशशताब्द्यां सम्भवन्तीति स एव समयो महाभारतस्येति वदन्ति ।

वाराणसीस्थराजकीयसंस्कृतपाठशालीयप्रधानगणिताध्यापकेन महामहोपाध्यायश्रीवापूदेवशास्त्रि—सी. आई. ई. महाशयेन तु पूर्वोक्तकुकल्पनानिरासपूर्वकं गणितेन तत्ताम्रशासनं तदुक्तकालिकमेव व्यवस्थापितमिति ।

(१) युधिष्ठिरस्य वर्षसहस्रपरिमितमायुरभूदित्यत्र ममाग्रहो नास्ति यदि महाभारतमत्स्यपुराणादिनिरूपितमायुर्दायादियुगव्यवस्था मिथ्यैव तदा युधिष्ठिरोऽपि नाभूत् भारतीयं युद्धमपि नाभूत् सर्वं स्वकपोलकल्पितं काव्यं सर्वमनवस्थितमिति तदुदाहृत्याधुनिकैर्वस्तुतत्त्वव्यवस्थापने न किमपि वाच्यम् । किं जातं किं न जातमिति सर्वज्ञो भगवानेव वेद मयातु यया रीत्या शास्त्रनिर्माणं तयैव रीत्या सामञ्जस्यं कृतं तथैव निरूपयिष्यत इति ।

तथोक्तं मत्स्यपुराणे १३१ अध्याये द्वापरयुगे वेदव्यासेन वेदानां तच्छाखानां विभागप्रसङ्गे तच्छिष्याणां कल्पसूत्रतन्त्राद्यरचनाप्रसङ्गे ।

"द्वापरेष्वभिवर्त्तन्ते मतिभेदास्तथा नृणाम्।" इत्युपक्रम्य ।

पूर्णं वर्षसहस्रं तु(१)परमायुस्तदा नृणाम्।" इत्याद्युक्तम् ।

---

(१) पाठोऽयं वाराणसीस्थराजकीयसंस्कृतपाठशालीयहस्तलिखितपुस्तके वर्तते मुद्रितपुस्तके तु पाठभेदोऽध्यायक्रमभेदश्च वर्त्तत इति ।

चिरजीवित्वे प्रमाणं तु

"दश वर्षसहस्राणि दश वर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥"

इति वाल्मीकिरामायणादिकं वर्तत एव । जैनबौद्धग्रन्थेष्वपि बहूनां चिरजीवित्वं प्रतिपादितमेव। ख्रीष्टीयानामपि ग्रन्थे बहूनां दीर्घजीवित्वं महम्मदीयानामपि पुस्तके बहूनां चिरजीवित्वं प्रतिपादितमिति बहूनामैक्यात् युधिष्ठिरस्य वर्षसहस्रजीवित्वे न किमपि चित्रं प्रतिभाति ।

अपि च सम्बन्धाभिधेयप्रयोजनाधिकारीत्यनुबन्धचतुष्टयम् उद्देशो लक्षणं परीक्षा चेति निरूपणक्रमः सञ्ज्ञापरिभाषा चेति शास्त्रमुखम् इति यया संज्ञया परिभाषया येन च क्रमेण पुराणानां प्रणयनं तथैव तेषां समालोचने न किमप्यसमञ्जसम् ।

केचित्तु उत्तरायणे गते सूर्ये मरणमिच्छतो भीष्मस्य शरशय्यां गतवत आधुनिकरीत्याऽसमञ्जसं निरूपयन्तो गणितेन तत् संसाध्य महाभारतस्यातात्कालिकत्वमाहुस्तत्र तावत्कालं गणितेन शरशय्यायामवस्थावासिद्धेः ।

कुवेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग् दक्षिणा गन्धवहं मुखेन
व्यलीकनिःश्वासमिवोत्ससर्ज ॥

इति शिवपुराणमूलककुमारसम्भवानुपपत्तेश्च ।

आधुनिकलोकयात्रामुदाहृत्य परीक्षणे तु आकाशस्थितानां बहूनां पदार्थानां भूमिस्थितानां च बहूनां पदार्थानामशेषविशेषरूपेण सर्वात्मना ज्ञानं न भवतीति कुतो युधिष्ठिरस्य चिरायुष्ट्वं भीमस्य हस्तिसहस्रबलत्वं भीष्मपितामहस्य शरशय्याशयनं च सिध्येत् ? । इतः पूर्वं व्योमयानादीनामपि असम्भव एवासीत् दृश्यते चानवरतं प्रत्यहं विज्ञानविद्यामहिम्ना नवंनवं वस्तु आविर्भवतीति तत्सर्वं नासम्भवीति ।

वेदधर्मशास्त्रपुराणादीनां न्यायादिदर्शनानां च परस्परविरोधपरिहारार्थं मधुसूदनसरस्वत्याख्यभिक्षुणा प्रस्थानभेदग्रन्थे उदयनाचार्येण न्यायकुसुमाञ्जलौ ज्यौतिषपुराणयोरेकवाक्यतासम्पादनाय पण्डितवरश्रीरामचन्द्रेण अविरोधप्रकाशग्रन्थे च बहवः प्रयासाः कृताः । वस्तुतस्तु तेषामेकवाक्यतासम्पादनमैकमत्यं च न केनापि कर्तुं शक्यं तथात्वे विशिष्टाद्वैताद्वैतद्वैताद्वैतमतभेदो न स्यात् मम तु मते तदपि ब्रह्मानिर्वचनीयत्वसाधकमेव । आधुनिकास्तु मन्वादिप्रणीतधर्मशास्त्राणां पुराणानामपि न्यूनाधिकपाठदर्शनान्निबन्धेषूद्धृतानां वचनानां तदुपलब्धपुस्तकेष्वनुपलम्भान्महाविप्लवं वर्णयन्ति तदपि शास्त्रतात्पर्यानवबोधात् ।

यथा अस्यां लोकप्रसिद्धायां मनुस्मृतौ ११९६ संवत्सरलिखितेन तालपत्रपुस्तकेन संवादे कृते ७५ श्लोका अधिका दृश्यन्ते । अपरापि ६००० श्लोकात्मिका षट्साहस्री वृद्धमनुस्मृतिर्वा बृहन्मनुस्मृतिः वाराणस्यां भिसरयोगरास्थले कान्यकुब्जस्य पं० विश्वेश्वरदत्तव्यासस्य गृहे वर्तमाना मया दृष्टा । अन्येऽपि मनुसंहिता–मनुसिद्धान्त–मनुहोरा–नामका ग्रन्था वर्त्तन्ते ।

तथोक्तं नारदसंहितायामारम्भे

"ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यलोमशौ ।
मरीचिरङ्गिराव्यासो नारदः शौनको भृगुः ॥
च्यवनश्च्यवनो गर्गः कश्यपोऽथ पराशरः ।
अष्टादशैते गम्भीरा ज्योतिःशास्त्रप्रवर्त्तकाः ॥
सिद्धान्त–संहिता–होरारूपस्कन्धत्रयात्मकम् ।

वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमिहोच्यते ॥"(१) इत्यादि।
मानवपुराणमप्युक्तम्(२) पराशरोपपुराणे १ अध्याये।

एवं मानवं श्रौतसूत्रं(३) स्मार्तसूत्रं शुल्वसूत्रमित्यादयो ग्रन्था मनुप्रोक्ता वर्तन्ते एताननुविमृष्य केवलमुपलब्धां मनुस्मृतिं पठित्वा विप्लवं वर्णयन्तो निपुणतरं निराकरणीया इति।

पुराणेष्वपि श्रीमद्भागवतस्यैकं पुस्तकं ममान्तिक एवास्ति उपलभ्यमानेन भागवतेन संवादे कृते श्लोकानां प्रायस्त्रीणि सहस्राणि अथ च १५ अध्यायास्तत्र न सन्ति किन्तु बोपदेवजन्मनः १५० वर्षेभ्यः पूर्वं लिखितं पुरातनं सम्पूर्णं तत् पुस्तकम्।

एवं वाराणसीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवने वर्तमानं भविष्यपुराणं १४५०० श्लोकात्मकं सम्पूर्णं वर्तते तत्र अकबर-जहाँगीर-शाहजहा इत्यादिराज्ञां चर्चापि नास्ति। यथा आधुनिका भविष्यपुराणस्याधुनिकत्वं वदन्ति। भविष्यपुराणं भविष्योत्तरपुराणं भविष्योत्तरोत्तरपुराणं भविष्यपुराणपरिशिष्टं च वर्तते। महाभारतं वर्तते तस्य पूरको हरिवंशस्तस्यापि पूरकं भविष्यत् पर्व च वर्तत इत्यन्यदेतत्।

अत्रैव महारामायणापरनामधेयस्य योगवासिष्ठस्यैकं पुरातनं पुस्तकमस्ति तत्र प्रत्येकपुष्पिकायां "शतसाहस्र्यां संहितायां बालकाण्डे (आदिकाण्डे)" एवं लिखितमस्ति। अस्यैवायोध्याकाण्डं वाराणस्यामेव रंगीलदासफाटकसंज्ञके प्रदेशे तमोलकरवाडानामके स्थले पं. गणेशरामव्यासस्य निकटे आ-

---

(१) अत्रोक्ता मनुग्रन्थाः कश्यप-पराशरादिभिः स्वेषु संहितादिग्रन्थेषु समुद्धृताः तत्सर्वं बनारस-संस्कृत-सीरीजमुद्रिते ज्योतिषसिद्धान्तसंग्रहे भूमिकायां प्रदर्शितमस्माभिः।

(२) अस्य पुराणस्यानेके अध्यायाः कैवल्यरत्नग्रन्थे समुद्धृतास्ते च वाराणस्यां पण्डितपत्रे मुद्रिता वर्तन्ते।

(३) भाष्यसहितं वाराणसीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवने वर्तते। मूलं तु यूरोपदेशे मुद्रितमस्ति।

एवं सति कलिवर्षेषु ६५३ मितेषु गतेषु युधिष्ठिर-महाराजस्य वर्तमानत्वं निरूपयन्ती राजतरङ्गिणी अपि सङ्गच्छते ।

"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः ॥" इति ।

एवं सति मघा आरभ्य पूर्वाषाढापर्यन्तं १० नक्षत्राणि भवन्तीति परीक्षिद्राज्याभिषेकसमये वर्षाणां दश शतानि १००० अतीतानि । अयमेव परमार्थो विष्णुपुराणस्य ये सप्तर्षयो मघास्वासन् युधिष्ठिरसमय इति शेषः एते च तदा पूर्वाषाढां प्रयास्यन्ति तदैव भगवति वासुदेवे श्रीकृष्णे दिवं याते सति परीक्षितो राज्याभिषेकं कृत्वा सानुजो युधिष्ठिरो राज्यं तत्याज । एषः कलिः नन्दात् प्रभृति वृद्धिं गमिष्यतीति । अतो निष्पन्नं परिक्षिद्राज्याभिषेकसमये कलिवर्षाण्यतीतानि ६५३

ततश्च बार्हद्रथा भूपतयः सहस्रवर्षपर्यन्तम् ।	१०००
ततश्च प्रद्योतनामानो भूपतयोऽष्टत्रिंशदुत्तरमब्दशतम् ।	१३८
ततश्च शैशुनागास्त्रीणि वर्षशतानि द्विषष्ठ्यधिकानि ।	३६२
ततश्च महापद्मस्तत्पुत्राश्च एकशतम् ।	१००
	२२५३

सीदिदानीं तत्पुस्तकसंग्रहस्य विक्रयाच्च जाने तत् कुत्र गतम् ।

एवं तत्तन्निबन्धकारैरुद्धृतानां भारतवचनानामुपलभ्यमाने महाभारते क्वचिदनुपलम्भान्महाभारतस्यापि नवीनत्वं खण्डितत्वमनवस्थितत्वादिकं प्रलपन्ति तदपि तात्पर्यानवबोधात् मन्त्रभारत-जैमिनिभारतादीनां विद्यमानत्वात् ।

एवं सर्वमननुविमृश्य वक्तव्ये महान् विप्लवो भवेत् ।

नवैव नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति । तेषामभावे मौर्याश्च भोक्ष्यन्ति कौटिल्य एव चन्द्रगुप्तं राज्ये ऽभिषेक्ष्यतीति ।

इत्थं स्थूलगणनया विष्णुपुराणेन २२८३ कल्यब्देष्वतीतेषु ततः परं चन्द्रगुप्तस्य राज्याभिषेकसमयः समायाति ।

एवं सति

ततोऽपि द्विसहस्रेषु दशाधिकशतत्रये ।

भविष्यं नन्दराज्यं च चाणक्यो यान् हनिष्यति ॥

इति स्कन्दपुराणीयवचनमपि सङ्गच्छते । एवं च पूर्वोक्तं भागवतीयं वायुपुराणीयं मत्स्यपुराणीयं च वचनं सङ्गच्छत इति। अपि च विक्रमाब्दारम्भात् ४७० वर्षेभ्यः पूर्वं निर्वाणपदवीं गतानां जैन २४ तीर्थङ्कराणां महावीरस्वामिनां कौटिल्यशास्त्रस्य मिथ्याशास्त्रनिरुक्त्या उक्तसमयादनल्पपूर्वकालावस्थायित्वं कौटिल्यस्य सङ्गच्छत इति सर्वं समञ्जसम् ।

आधुनिकास्तु दूरदेशस्थैरत्युग्रबुद्धिभिर्महासामर्थ्यवद्भिश्चिरस्थैरपि दुरधिगमान् विषयान् तस्मिन् समयेऽल्पायासेनाल्पेन कालेन राजदूतेन येन केनचिन्मेगास्थेनीसनाम्ना याथातथ्येनाऽवगतान् समाकलय्य पुस्तकनिर्माणाभावेऽपि तन्नाम्ना पश्चादिना सङ्कलिते पुस्तके 'सेन्द्राकोत्तस' 'सेन्द्राकोतस' 'जन्द्रमस' इत्याकारकैः पदैः स्वविद्याबुद्धिमहिम्ना चन्द्रगुप्तं परिकल्प्य तत्प्रकरणे चाणक्यस्य चर्चाया अभावेऽपि बलात्कारेण चाणक्यं सन्निवेश्य अशोकवर्द्धनस्य चन्द्रगुप्तपौत्रस्य चर्चाया अभावेऽपि यं कञ्चिदशोकं सन्निवेश्य तज्जीवनचरितादिकं यथोक्तशिलाशासनादिभ्यो यथोक्तरीत्या परिकल्प्येदानीं महाभारतं विष्णुपुराणं वायुपुराणं मत्स्यपुराणं श्रीमद्भागवतं स्कन्दपुराणादिकं च समन्वेतुमिच्छन्ति यदि न पारयन्ति

तदा तान्येवावज्ञायोपहसन्ति "सर्वं गप्पं" "सर्वं गाँजा" इति वदन्तीति शोकस्थानम् ।

यदि च निरुक्तपुराणादिनिर्दिष्टचन्द्रगुप्ताशोकवर्द्धनादिभ्यो भिन्ना अर्वाचीनाश्चन्द्रगुप्ताशोकप्रभृतयस्तदा नासम्भवः तथाहि विष्णुपुराणे १ अंशे १५ अध्याये ।

"युगेयुगे भवन्त्येते दक्षाद्याः मुनिसत्तम ।
पुनश्चैव निरुध्यन्ते विद्वांस्तत्र न मुह्यति ॥ ६१ ॥"
विष्णुपुराणे ४ अंशे २४ अध्याये कलिधर्मे एव
"ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम ।
युगेयुगे महात्मानः समतीताः सहस्रशः ॥
बहुत्वान्नामधेयानां परिसंख्या कुलेकुले ।
पुनरुक्तबहुत्वात् तु न मया परिकीर्तिताः ॥"
"एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया ।
निखिलो गदितुं शक्यो नैव जन्मशतैरपि ॥" इति ।

युधिष्ठिरार्जुनभीमसेननकुलसहदेवाः पञ्च भ्रातरः पाण्डवा इति सार्वजनीनप्रसिद्धिः । विष्णुपुराणे ४ अंशे २१ अध्याये परिक्षितोऽपि जनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारः पुत्रा भविष्यन्तीति । ततश्च शतानीकाद् द्वादशपुरुषानन्तरमपरः शतानीको भविष्यतीति । तत्रैव २२ अध्याये गुरुक्षेपस्ततो वत्सो वत्साद्वत्सव्यूहस्ततः प्रतिव्योमस्तस्यापि दिवाकरस्तस्मात् सहदेवः । ततश्च त्रयोदशपुरुषानन्तरं सञ्जयस्तस्माच्छाक्यः शाक्याच्छुद्धोदनः । ततः २३ अध्याये जरासन्धसुतात् सहदेवादित्यादि भविष्यत्वेन निरूपितम् ।

अत्रापरे इतिहासतत्त्वविदः "वात्स्यायने मल्लनागः कौटिल्यश्चणकात्मज" इति हेमचन्द्रस्य कोषं "विष्णु-

गुप्तस्तु (कौण्डिन्यः) कौटिल्यः चाणक्यो द्रामिलोंऽशुल" इति पुरुषोत्तमदेवस्य कोषं चावलम्ब्य वदन्ति यत् वात्स्यायनश्चाणक्य एव इति न्यायदर्शनभाष्यं चाणक्येनैव कृतं ते तु वदतो व्याघातेन दूरादेव निराकृता भवन्ति यतः कोशे कौटिल्यस्यापि पाठात् कौटिल्येन स्वनिर्मितेऽर्थशास्त्रे प्रथमे ऽधिकरणे द्वितीयेऽध्याये "सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी"(१)त्युक्तत्वात् स च न्यायशास्त्रं जानात्येव नेति वात्स्यायनेन तु न्यायभाष्ये "सेयमान्वीक्षिकी न्यायविद्या

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आधारः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता ॥"

---

(१) महिसूरस्थ–ओरिअण्टल् लाइब्रेरी सीरीजमुद्रिते पुस्तके ६ पृष्ठ द्रष्टव्यम् ।

केचित्तु सांख्ययोगयोरुपनिषत्सु अनेकत्र चर्चितत्वात् पुराणेष्वपि भागवतादिषु "पञ्चमः कपिलो नाम–प्रोवाचासुरये सांख्य"मिति, मत्स्यपुराणे १५७ अध्याये बा० रा० सं० पाठशालीयपुस्तके २७० पत्रे ।

"अथान्यद्रूपमास्थाय शम्भुं नारायणोऽव्ययः ।
आजगाम महातेजा योगाचार्यो महायशाः ॥
सांख्याचार्योऽतिमानिमान् कपिलो ब्राह्मणोऽपि वा ।
उभावपि महात्मानौ कूजन्तौ क्षेत्रतत्परौ ॥" इति ।

सांख्यं योगो लोकायतं चेत्यान्वीक्षिकीति सुष्ठूक्तं कौटिल्येनेति वदन्ति तदल्पज्ञतामात्रं सांख्यसूत्रषष्ठध्याय्यां "न वयं षट्पदार्थवादिनो वैशेषिकादिवत्" इत्युक्तत्वान्न्यायवैशेषिकयोरेकवाक्यतया सांख्यापेक्षयाऽपि न्यायस्य पूर्वकालिकत्वं महर्षीणां सम्मतमिति ।

सम्प्रदायविदस्तु यथोक्तश्रुति–स्मृति–पुराणेतिहासोक्तन्यायशास्त्रस्यैवान्वीक्षिकीपदवाच्यत्वादिदं कौटिल्यार्थशास्त्रं यत्र तत्र तद्विरुद्धार्थप्रतिपादकत्वात् कल्पितमिवाभातीत्युपेक्षणीयमित्याहुः ।

इत्युक्तत्वाद्व्यक्तिभेदः कर्तृभेदो बुद्धिभेदः सिद्धान्तभेदश्च सुव्यक्त एव ।

अत्र इतिहासतत्त्वविद्धुरवः केचिद्वदन्ति "तदानीं न्यायशास्त्रं नासी"देवेति तथात्वेऽपि सिद्धं नः समीहितं "मूलं नास्ति कुतः शाखा" इत्याभाणकेन यदि तदानीं न्यायशास्त्रमेव नासीत् तदा भाष्यं कस्य कृतं चाणक्यवात्स्यायनेनेति ? ।

कामसूत्रव्याख्यायां "वात्स्यायन इति स्वगोत्रनिमित्ता सञ्ज्ञा मल्लनाग इति सांस्कारिकी"(१) इत्युक्तत्वात् अयं चाणक्यो वात्स्यायनो राजमन्त्रित्वात् कामशास्त्रे ऽर्थशास्त्रे चैकयैव रीत्या अधिकरणाध्यायक्रमेण लौकिकविषयान् संगृह्य तच्छास्त्रं प्रणीतवान् इति नायं नैयायिक इति सिद्धम् ।

एवं स्थिते निर्दिष्टाश्वलायनसूत्रोक्तवत्सभेदाद्वात्स्यायनभेदस्तद्भेदात् कौटिल्यचाणक्यभिन्नेन महर्षिणा वात्स्यायनेन न्यायभाष्यं प्रणीतमिति सुष्ठूक्तम् ।

अपि च चाणक्येनैव न्यायदर्शनभाष्यं कृतमिति वदन्तश्चाणक्यस्य विष्णुपुराणादौ पाठात् तस्य चाणक्यपश्चाद्भावित्वं संसाध्य पुराणानामर्वाचीनत्वं न्यायभाष्यस्य प्राचीनत्वं प्रलपन्ति तदप्यनधिगतशास्त्रतात्पर्यमूलकमेव । यतश्छान्दोग्योपनिषत्सु ७ प्रपाठके १ खण्डे "अधीहि भगव इति सोपससाद सनत्कुमारं नारदस्तꣳ होवाच । यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति ॥ १ ॥ स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं

(१) बनारसचौखम्बाबुकडीपोमुद्रितपुस्तके १७ पृष्ठे २८ पङ्क्तौ द्रष्टव्यम् ।

पञ्चमं वेदानां वेदं(१) पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्वदेवजनविद्यामेतद्भगवोऽध्येमि ॥ २ ॥"

एवमेवात्रैव ७ प्रपाठके २ खण्डेऽपि । अपि चात्रैवोपनिषत्सु ८ प्रपाठके १५ खण्ड "तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदध"दित्यादि ।

मन्वर्थमुक्तावल्यां तु "मनुर्वै यत् किञ्चिदवदत् तद्भेषजं भेषजतायाः" इत्युक्त्या उपनिषदपेक्षया मनोः प्राचीनत्वं सिध्यति मनुना च

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

(१) वङ्गदेशस्थएशिआटिक्सोसाइटीमुद्रिते मैत्र्युपनिषत्पुस्तके १७१ पृष्ठे "इतिहासः पुराणं विद्या । अत्रेतिहासो भारतादिः ।" बृहदारण्यके ४ अध्याये इतिहासः पुराणं विद्या इत्यादि ।

वङ्गदेशस्थ एसि. मुद्रिते छान्दोग्यपुस्तके ४७६ पृष्ठे "वाको वाक्यं" "तर्कशास्त्रम्" इति शाङ्करभाष्ये ।

आधुनिकतार्किकास्तु वदन्ति "इतिहासपुराणं पञ्चमं वेदानां वेद"मित्यत्र वेदोक्तस्य तत्रतत्रेतिहासभागस्य वेदोक्तस्य तत्रतत्र प्राचीनकथाभागस्य ग्रहणम् न तु महाभारतविष्णुपुराणादीनां ग्रहणमिति । तत्र पञ्चमं वेदानां वेदमित्यस्य कोऽर्थः ? यदि चतुर्षुवेदेष्वेव पञ्चमोऽपि वेदोऽस्ति तदा तताद्विषयभेदेन सहस्रशो वेदा भवेयुस्तदा ब्रह्मादिकमारभ्यापामरं प्रसिद्धं वेदानां चतुष्ट्वं व्याहतम् अपि च ।

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति ॥"

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥"(१)

अपि च

"पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥"

मनुस्मृतौ ५ अध्याये २३ श्लो. इत्युक्तत्वान्मनोरपेक्षया पुराणानां प्राचीनत्वं सिद्ध्यति विष्णुपुराणादौ चाणक्यस्य चर्चाया दर्शनात् पुराणापेक्षया चाणक्यस्य प्राचीनत्वं किं तु आधुनिकतार्किकतर्कसिद्धेन चाणक्येन न्यायभाष्यं रचितं न्यायभाष्ये च ४ अध्याये १ आ-

---

इति इतिहासपुराणानां वेदोपबृंहणरूपाणां वेदभिन्नत्वप्रतिपादिका याज्ञवल्क्यस्मृतिरपि कुत्र गच्छेत् तथा च येषां वचनं पूर्वापरसमन्वयपूर्वकं प्रामाणिकं युक्तिपथं नावरोहेत् तदा तत्र उन्मत्तप्रलापात्को भेद इति न बुद्ध्यामहे।

अत्र पुराणेतिहासपञ्चमानां चतुर्णां वेदानां वेदं व्याकरणमित्यादिशाङ्करभाष्यं मूलवपस्याश्चिन्त्यम।

केचित्तु इतिहासपुराणानां रूपकमूलकत्वात् नाटकादिवदभिनेयत्वं वदन्ति तत्तूपहासास्पदं सति कुड्ये चित्रमिति न्यायात् तात्त्विकवस्तुसत्त्व एव रूपकत्वमभिनेयत्वं च सम्भवति अन्यथा खपुष्पशशविषाणादीनामपि रूपकाभिनयौ स्यातान्। रूपकत्वेऽभिनयत्वे चाग्रहश्चेत्तदिदानींतनानामपि लेखो रूपकमेवेत्याकिञ्चित्करमेव। अपि च तदानींतनायोध्याजनकपुरहस्तिनापुरादीनि नगराणि गौतमविश्वामित्रवसिष्ठादीनामाश्रमाणि मथुरादीनि तीर्थानि अन्यान्यपि पुरातनानि चिह्नानि कस्मिन् गिरिगह्वरे महान्धकारे तिष्ठेयुरितीदानींतनरन्वेषकैमन्यैरेव पण्डितैर्वाच्यम्।

(१) रघुवंशीय ५ सर्गस्थवित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति इति श्लोकव्याख्याने मल्लिनाथेन मनुनाम्ना वचनमिदमुद्धृतम्।

ह्निके पात्रचयान्तानुपपत्तेश्च फलाभाव इति ६२ सूत्र-व्याख्याने(१) "नाविशेषेण कर्त्तुः प्रयोजकफलं भवतीति चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः । तदप्रमाणमिति चेन्न प्रमाणेन प्रामाण्याभ्यनुज्ञानात् प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते ते वा खल्वेते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदन्नितिहासपुराणं पञ्चमं वेदानां वेद इति तस्मादयुक्तमेतदप्रामाण्यमिति । अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसङ्गः । द्रष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति ।" इति लेखदर्शनाद् चाणक्यापेक्षया पूर्ववर्त्तित्वं पुराणानां सिद्ध्यति ।

अपि च महाभारते मोक्षधर्मे २१८ अध्याये सौगततार्किकमतनिरासदर्शनात् सुगतानन्तरं महाभारतनिर्माणम् ।

बुद्धदेवसमानकालिकेन २४ जैनतीर्थङ्करेण महावीरस्वामिना विक्रमादित्यसमयात् ४७० वर्षेभ्यः पूर्वं निर्वाणत्वं(मरणं) प्राप्तवता अनुयोगद्वारसूत्र–नन्दिसूत्र–भगवतीसूत्र–दशाश्रुतस्कन्धादौ महाभारतादीनां मिथ्यात्वनिरुक्तिः । जनमेजयप्रदत्तेन ताम्रपट्टशासनादिना ४३६३ वर्षेभ्यः पूर्वं वेदव्यासयुधिष्ठिरादीनामवस्थानम् । शतपथब्राह्मणे २ । १ । २–३ । "एताह वै प्राच्यै दिशो न च्यवन्ते–तस्मात् कृत्तिकासु आदधीत"

---

(१) विजयनगरसंस्कृतसीरीजमुद्रितपुस्तकानुसारेणात्र सूत्रसंख्यावगन्तव्या ।

इति लिखितं निरीक्ष्य गणितशास्त्रेण ४८७५ वर्षेभ्यः पूर्वं शतपथब्राह्मणनिर्माणं न्यायवैशेषिकसांख्ययोगमीमांसा-वेदान्तानां परस्परखण्डनमण्डनानि च ।

अपि च कौलजगमर्दनोद्धृतजैन—बौद्धमतनिरासकोमा-महेश्वरसंवादात्मकतन्त्राणामर्वाचीनत्वं सिद्ध्यति । सुय-णाङ्गसूत्रमितिप्रसिद्धे जैना गमे(१) ऋषभदेवस्तीर्थङ्करो भरताय राज्ञे चतुरो वेदानुपदिदेशेति जैनागमापेक्षया वेदानां पुरातनत्वं सिद्ध्यति तथा दशाश्रुतस्कन्धनाम-के(२) जैनागमे जैनतीर्थङ्कराः पुराणानामन्यादिधर्मशास्त्रा-णां(३) ज्ञातारो भविष्यन्तीति पुराणानां धर्मशास्त्राणामपि प्राचीनत्वं सिद्ध्यतीति । अत्र किं नवीनं किं वा प्राचीनं किं पूर्वं किं वा परमित्यादिकं लौकिकयुक्त्याधुनिकै स्तार्किकैरेव व्यवस्थापनीयम् ।

अत्राधुनिकानामेका बलवती युक्तिरवशिष्टा वर्त्तते उपनिष-दुक्तानि पुराणानि भिन्नानि न तूपलभ्यमानानि अथवा तत्रतत्र उपलभ्यमानानि वचनानि नवीनत्वप्राचीनत्वानुमापकानि

(१) यतिवरेण श्रीरामचन्द्रेण प्रतिपादितम् ।

(२) वाराणसीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवनस्थे पुस्तके १३ पत्रे द्रष्टव्यम् ।

(३) तदुक्तं याज्ञवल्क्यस्मृतौ ।

"मन्वत्रिविष्णुहारीता याज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्त्तकाः ॥" इति

अन्ये ऽप्युपस्मृतिकारकाः १८, अपरे उपोपस्मृतिकारकाः २१, तद्भिन्ना अपि प्रकीर्णकस्मृतिकर्तारश्चाग्रे निरूपणीयाः ।

तानि केनचित्प्रक्षिप्तानि वा अनेकैः पण्डितैरल्पज्ञैः रचितास्ते ते ग्रन्था अनवस्थिता इत्यादिका इयं च विनिगमनाविरहेणानवस्थितवाग्जालमात्ररूपत्वात् शिष्टापरिगृहीतत्वादेव दूरापास्तेति ।

अत्र सम्प्रदायविदस्तु देवा महर्षयश्चापि योगबलेनातीतानागतपदार्थविषयकज्ञानवन्तः क्वचिद्भविष्यत्कथामपि कथयन्ति स्म यथा भागवते १ स्कन्धे ३ अध्याये २४ श्लो. "बुद्धो नाम्नाऽजनिसुतः कीकटेषु भविष्यति" । मात्स्ये ४८ अध्याये

"तस्मिन्नेव युगे क्षीणे सन्ध्याशिष्टे भविष्यति ।
कल्की विष्णुः" इत्यादि ।

मुद्गलपुराणे कलिधर्मा निरूपिताः । एवं वाल्मीकिरामायणेऽपि "रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति" । एवं रूपेण भविष्यतीतिक्रियाविन्यासपूर्वकं कथितवन्त इति तेन न प्राचीनत्वनवीनत्वनिर्णयावकाश इति वदन्ति ।

अथापरे व्यवस्थापका वदन्ति तावत् न्यायदर्शनभाष्यकारो वात्स्यायनगोत्रोत्पन्नो यः कश्चिदप्रसिद्धो नैयायिकः प्राकृतिकमनुष्य एवासीत् न तु ऋषिः इयं हि तेषां बलवती युक्तिर्बलवत्प्रमाणमपि तथाहि कुसुमाञ्जलेरनुक्रमणिकायां १२ पृष्ठे

"ततश्च भाष्यकारो वात्स्यायनगोत्रोत्पन्न इति सिद्ध्यति । पक्षिलस्वामीतिनाम्नापि स न ऋषिरिति प्रतीयते । ऋषीणां तथाविधनाम्नः क्वचिदप्यश्रवणात् । यदक्षपादप्रतिम इति वार्त्तिकश्लोके भारद्वाजेनत्यस्य भारद्वाजगोत्रोत्पन्नेनेतिवत् वात्स्यायन इत्यस्यापि वात्स्यायनगोत्रोत्पन्न इत्यर्थस्यैव प्रतीतिर्भवति । यदक्षपादप्रतिम इत्यनेन

भाष्यकर्तुरक्षपादवत् न्यायवीथ्यामवीणत्वमेव प्रतीयते न तु ऋषित्वमिति ।"

अस्य लेखस्यायमाशयः सूत्रकाराः कदाचिन्महर्षयो भवेयुर्भाष्यकारास्तु मनुष्या एव तत्तन्महर्षिगोत्रोत्पन्नाः । एवं सति व्याकरणमहाभाष्यकारः पतञ्जलिरपि तद्गोत्रोत्पन्न एव तथा सति याज्ञवल्क्यस्य ? महर्षेः सूर्यार्घ्यदानसमयेऽञ्ज-लौ पतित इति अन्वर्थनामबोधिका पौराणिकी कथा कुत्र गच्छेत् ? एवं बोधायनादयोऽपि तत्तद्गोत्रोत्पन्ना एव गो-त्रप्रवर्तकस्तु किमपि शशशृङ्गं वा खपुष्पं वा पाषाणो वा न तु पण्डितो नापि ग्रन्थकार इति ।

"पक्षिलस्वामीतिनाम्नापि स न ऋषिरिति प्रतीयते । ऋषीणां तथाविधनाम्नः क्वचिदप्यश्रवणात् ।" इत्यनेन मह-त्पाण्डित्यं बहुज्ञत्वं च प्रकाशितं भवति ।

किं तु वाचस्पतिमिश्रेण भामत्यामादौ उक्तम्

"मार्तण्ड–तिलकस्वामि–महागणपतीन् वयम् ।
विश्ववन्द्यान्नमस्यामो सर्वसिद्धिविधायिनः ॥"

अत्र वेदान्तकल्पतरुटीकाकारादयः पद्यमिदं

"मार्त्तण्डस्य सदा पूजां तिलकस्वामिनस्तथा ।
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥"

इति याज्ञवल्क्यस्मृति(१ अध्यायस्य २९४ श्लोक)मूलकमिति वदन्तीति तिलकस्वामी देवविशेष इति निर्णीतं(१) भवति ।

अपि च चतुर्वर्गचिन्तामणौ प्रायश्चित्तखण्डे महिषीहरण-

---

(१) मिताक्षरासहितमुद्रितयाज्ञवल्क्यस्मृतौ तिलकं स्वामिन-स्तथेति पाठश्चिन्त्यः विस्तरस्तु वाचस्पतिमिश्रचरिते मया निरूपयिष्यते ।

प्रायश्चित्तप्रकरणे "देवस्वामी(१)

यो विप्रो महिषीं हृत्वा परकीयां धनातुरः।
स गत्वा नरकं घोरं भुवि चाण्डालवान् भवेत्॥
न तस्य निष्कृतिर्नास्ति गुरुचान्द्रायणादिह॥"

इति स्मृतिवचनेन देवस्वामिनो महर्षित्वं सिद्धम्। अत्र देवस्वामिपदेन देवलो ग्राह्य इति न भ्रमितव्यम्। यतोऽस्मिन्नेव चतुर्वर्गचिन्तामणौ भूमिहरणप्रायश्चित्तप्रकरणे

---

(१) श्रीनरसिंहीये प्रयोगपारिजाते षोडशकर्मकाण्डे संस्कारनिरूपणे आरम्भ एव

"मनुर्बृहस्पतिर्दक्षो गौतमोथ यमाङ्गिराः।
योगीश्वरः प्रचेताश्च शातातपपराशरौ॥
संवर्तोशनसौ शङ्खलिखितावत्रिरेव च।
विष्णवापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः॥
एते ह्यष्टादश प्रोक्ता मुनयो नियतव्रताः।
[illegible]लिर्नाचिकेतश्च स्कन्दो लौगाक्षिकश्यपौ।
[illegible] सनत्कुमारश्च सनन्तनुजनकस्तथा॥
[illegible]ः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः।
बोधायनश्च काणादो विश्वामित्रस्तथैव च॥
पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः।
वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहः॥
विष्णुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः।
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः।
आत्रेयश्च गवेयश्च मरीचिर्वास ? एव च।
पारस्करश्चर्ष्यशृङ्गो वैजा ? वामस्तथैव च।
इत्यन्ये स्मृतिकर्तार एकविंशतिरीरिता॥" इत्यादि।

आश्वलायन-देवस्वामि—शौनक-मार्कण्डेय—भृग्वादीनां वचनानि तत्र तत्र प्रमाणत्वेनोद्धृतानीति तेऽपि प्रकीर्णकस्मृतिकारका एवेति।

देवलवचनमुक्त्वाऽनुपदमेव यथाह "देवस्वामी

ग्रामं वा क्षेत्रमात्रं वा केदारं भूमिमेव वा ।
विप्राधीनं हरेद्राजा यमलोकमवाप्नुयात् ॥
पश्चाद्भूमिमुपागम्य क्रिमिराशिर्भवेन्मले ॥"

एवमेवमनेकत्र देवस्वामिस्मृतिवचनानि समुद्धृतानि । अत एवं तार्किकरक्षाटीकायां "पक्षिलस्वामी" "पक्षिलमुनि" रित्युक्तमपि सङ्गच्छते ।

अपि च "यदक्षपादप्रतिम इति न्यायवार्त्तिकश्लोके भारद्वाजेनेत्यस्य भारद्वाजगोत्रोत्पन्नेनेतिवत् वात्स्यायन इत्यस्यापि वात्स्यायनगोत्रोत्पन्न इत्यर्थस्यैव प्रतीतिर्भवति" इति यदुक्तं भारद्वाजेनेत्यस्य भारद्वाजगोत्रोत्पन्नेन अत्र गोत्रोत्पन्न इति कस्य शब्दस्यार्थ ? इति महामहोपाध्याया एव जानन्ति । अक्षपादप्रतिम इत्यनेनापि भाष्यकारस्य न्यायविद्याप्रवीणत्वं महाशयानामनुमतम् अर्थात् अक्षपादस्य न्यायविद्याप्रवीणत्वमेव न तु कर्तृत्वम् अक्षपादप्रतिभ इति पाठे अक्षपादप्रतिम इति वा पाठे प्रतिमाशब्दस्य प्रतिभाशब्दस्यापि प्रवीणत्वमेवार्थो महाशयसम्मतः । अत्र विवेचका एव प्रमाणम् ॥

अन्ये तु कालात्ययापदिष्टः कालातीत इति १ अध्याये २ आह्निके ९ सूत्र(१)व्याख्याने तात्पर्यटीकायां वाचस्पतिमिश्रेण लिखितम् "एवं व्यवस्थिते भाष्यकारः सूत्रं स्वपरमताश्लिष्टं व्याचष्टे" इत्युपक्रम्य "स्थूलतया एष दोषो भा-

---

(१) अत्र विजयनगरसंस्कृतसीरीजमुद्रितन्यायदर्शनपुस्तकानुसारेणाङ्काः ज्ञातव्या इति ।

ष्यकारेण नोद्भावितः यत्पुनर्भदन्तेन(१) कालातीतस्य व्याख्यानं कृतं" "तदेतद्भदन्तदूषणमेतद्व्याख्यानानभ्युपगमेन परिहरति । अवयवविपर्यासवचनं त्विति । अनभ्युपगमहेतुं पृच्छति । कस्मादिति । उत्तरं यस्येति ।" इति दृष्ट्वा समुद्घोषयन्ति यद्बुद्धात् परमवश्यमेव भाष्यकारस्य स्थितिरभ्युपगन्तव्या । तदप्यसत् । प्रथमतस्तु बुद्धस्य स्थितिनिर्णये ऽनेके मतभेदा उपलभ्यन्ते पुराणादिष्वपि तच्चर्चाया दर्शनात् तन्निर्णयस्तु बालक्रीडायितमिवाभाति । अथ यथाकथञ्चिन्निर्णयेऽपि भदन्तात् पश्चाद्भाविना वाचस्पतिमिश्रेण व्याख्यानकौशलपूर्वकं भदन्तमतखण्डनं प्रदर्शितमित्येवावगन्तव्यम् अन्यथा ब्रह्ममीमांसाभाष्ये "वैधर्म्याच्च न स्वप्नादिवत्" २ अध्याये २ पादे २९ सूत्रव्याख्याने भास्कराचार्येण शङ्कराचार्यमतखण्डने "ये तु बौद्धमतावलम्बिनो मायावादिनस्तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्ता" इति लिखितत्वात् भाष्यकारात् शङ्कराचार्यात् परं सूत्रकारः स्यादित्यादि ६४ पृष्ठे निपुणतरमुपपादितमधस्तात् ।

केचित्तु पक्षिलस्वामीत्यनेन स्वामीत्युपाधिधारिणो द्रामिल इति नाम्ना द्रविडत्वेन निश्चितस्य वात्स्यायनस्य सम्प्रति कंजीवरमिति प्रसिद्धे काञ्चीनगरे स्थितिरासीदिति । "वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः" २ अध्याये १ आह्निके ४२ सूत्रभाष्ये "पचतीति स्थाल्यधिश्रयणमुदकासेचनं तण्डुलावपनमेधोपसर्पणमग्न्यभिज्वलनं दर्वीघट्टनं मण्डस्रावणमधोवतारणमिति" इत्यादि ओदनपाचनक्रियोदाहरणेन द्रविडत्वमेव द्रढयति यतो द्रविडदेशे

(१) बौद्धभेदे भदन्तशब्दस्त्रिकाण्डशेषकोशे द्रष्टव्यः ।

ओदनमेव भोज्यपदार्थेपूत्तमम् । अपि च कौटिल्यार्थशास्त्रात् प्रदीपः सर्वविद्यानामित्यादिवचनस्य समुद्धृतत्वात् अथ च "पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्" ५ अध्याये २ आह्निके १० सूत्रभाष्ये दश दाडिमानीत्युदाहरणस्य व्याकरणमहाभाष्यादुद्धृतत्वात् कौटिल्यात् पतञ्जलेश्च पश्चात्कालभावी वात्स्यायनो न्यायभाष्यकार इति खीष्टाब्दारम्भात् परं चतुर्थशताब्द्यामासीदिति वदन्ति । अपि च माध्यमिकसूत्र—नागार्जुनशतक—लङ्कावतारसूत्रमूलकानां न्यायसूत्राणां व्याख्यातत्वात् खीष्टाब्दारम्भात् पश्चात्कालभावित्वं वात्स्यायनस्य दु[illegible]मित्यपि वदन्तीति ।

अत्र समालोचनम् । स्वामीन्युपाधिर्वा पा[illegible]स्वामीत्येकं नाम चेति जिज्ञासायां मार्त्तण्डतिलकस्वामी देवस्वामीति(१)वदेकं नामैवेति नात्र किञ्चिद्बाधकं दृश्यत इत्युपाधिधारणकल्पनं कल्पनामात्रम् ।

व्यवस्थापकमहाशयेनैवेदमप्युक्तं यन्न्यायभाष्यकर्ता वात्स्यायनः कामसूत्रकर्ता च वात्स्यायनः अर्थशास्त्रकर्ता च नैकव्यक्तिकः किन्तु भिन्न एव परन्तु न्यायभाष्यकर्तुर्वात्स्यायनस्य द्रविडत्वसाधनप्रसङ्गे त्वरया "विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रामिलोंऽगुलः" इत्यादिकोशेन कौटिल्यस्यार्थशास्त्रप्रणेतुरेव द्रामिल इत्यपि नामेति नावधारितम् । हठात् तथात्वे ऽपि द्रामिलशब्देन कया व्युत्पत्त्या द्रविडत्वं तस्य प्रसाध्यत इति न बुद्ध्यामहे । यतः 'सकलं' 'शकलं'

(१) [illegible] मार्तण्डतिलकस्वामी देवविशेषो देवस्वामी च महर्षिः स्मृतिकारस्तथा प्रतिपादितमधस्तात् ।

'सकृत्' 'शकृत्' इत्यादयो भेदा वैयाकरणैः प्रदर्शिता इति । अथ द्रविडत्वे ऽपि काञ्च्यां निवासे असाधारण इतरव्यावर्तको हेतुः ओदनपाचनप्रकार एव प्रदर्शित इत्यनेन काञ्चीं विहाय द्रविडदेशं विहाय वा भारतवर्षमात्रे केऽपि ओदनपाचनं तद्भोजनं वा न जानन्तीति निष्पन्नं भवतीति बहुज्ञैः समालोचनीयम् ।

बहूनि न्यायसूत्राणि लङ्कावतारसूत्र—नागार्जुनकृतमाध्यमिकसूत्र—आर्यदेवकृतशतकेभ्यः समुद्धृतानीति न्यायसूत्रपाठनिर्णयप्रस्तावे निराकृतमधस्तात् तन्निराकरणेनात्रोक्तमपि निराकृतं भवति ।

यत्तु कौटिल्यार्थशास्त्रव्याकरणमहाभाष्याद्वचनानि समुद्धृतानि न्यायभाष्यकर्त्रा वात्स्यायनेन तदत्र विनिगमकाभावेन न्यायभाष्यादेव कौटिल्येन व्याकरणभाष्यकारेण च कथं न समुद्धृतानीति ? ।

यदि च न्यायदर्शनवात्स्यायनभाष्योक्त्यैव तदाविर्भावसमयो देशश्च निश्चीयते तदा युक्तियुक्तं तत् प्रदर्श्यते ।

वेद—धर्मशास्त्र—पुराणेषु द्वौ गोतमौ निरूपितौ एकश्च रहूगणस्य पुत्रोऽपरश्च दीर्घतमा अन्धः । तत्र अन्धस्य दीर्घतमसः शास्त्रकर्तृत्वं न सम्भवतीति राहूगणस्यैव ऋग्वेदादिसूक्तस्मारकत्वात् शास्त्रकर्तृत्वमिति २२ पृष्ठे प्रतिपादितमधस्तात् । स च राहूगणो गोतमो मिथिलाभूपतेर्विदेघराजस्य विदेहराजस्य वा पुरोहित आसीत् तद्राज्यस्थानं च सरस्वतीनद्याः पूर्वस्मिन् सदानीराया नद्याश्च(१) पश्चिमे देश इति सर्वमुपपादितं शतपथब्राह्मणे १ काण्डे ४ अध्याये । अयमेव देशो मिथिलादे-

(१) सदानीरा उत्तरवङ्गे वगुरामण्डलेऽद्यापि प्रसिद्धा वर्तते ।

श इति वाल्मीकिरामायणादिभ्योऽपि निश्चीयते। अपि च वायुपुराणे २३ अध्याये

"तत्रापि मम ते पुत्रा(१) भविष्यन्ति तपोधनाः।
अक्षपादः कणादश्च उलूको वत्स एव च॥ २०३॥

इत्यनेन गोतमसमीपवर्ती वा गौतमसमीपवर्ती वात्स्यायनः प्रतिभाति। अन्यच्च पद्मपुराणीयरामाश्वमेधप्रकरणसमालोचनेन श्रीरामचन्द्रेण अयोध्योपकण्ठे सरय्या उत्तरे तटेऽश्वमेधयज्ञः कृतः स च देशो वात्स्यायनस्यातिप्रिय इति शतशस्तत्कथाभागं भुजगश्वरं पप्रच्छेति विज्ञायते स एव देशो मिथिलासम्बद्धस्तन्निनामस्थानमिति सम्भाव्यते। अयोध्यागर्भोत्तरकोशलामिथिलादेशयोश्च महादृढः सम्बन्ध इति सार्वजनीनप्रसिद्धिरिति।

एवं स्थिते वात्स्यायनेन न्यायभाष्ये १ अ. २ आ. अविशेषाभिहितेर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलमिति १२ सूत्रव्याख्याने "नवकम्बलोऽयं माणवक" इत्युदाहृतम् अत्र कम्बलशब्दस्य प्रयोगो द्वादशावृत्त्या कृतः। लौकिकास्तु नेपालादागतोऽयं नवकम्बलवत्त्वादित्युदाहरन्तीति प्रशस्ताः कम्बला नेपालदेशीया इति वात्स्यायनो नेपालसमीपवर्त्ती। अपि च २ अ. १ आ. रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणमिति ३७ सूत्रव्याख्याने "नदी पूर्णा गृह्यते" "नीडोपघातादपि पिपीलिकाण्डसञ्चारो भवति" "पुरुषोऽपि मयूरवासितमनुकरोति" एवं

(१) शिष्ये पुत्रत्वोपचारः "उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता" इति मनुः। इदं निपुणतरमुपपादितं न्यायकन्दलीभूमिकायामस्माभिः।

नैकदेशत्रासमादृश्येभ्योऽर्थान्तरभावादिति ३८ सूत्रव्याख्याने "पूर्वोदकाविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेनफलपर्णकाष्ठादिवहनं" "यथा सर्पादीनामिति" एतैरुदाहरणैरपि मिथिलादेशीयः प्रतिभाति । एवं ५ अ.२ आह्निके पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकमिति १० सूत्रव्याख्याने "दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः" एतैरुदाहरणैस्तु मैथिल एव प्रतिभाति पललपिण्डो वङ्गदेशे मिथिलादेशे वा भवतीति षडपूपाः दश दाडिमानीत्युक्त्या वङ्गदेशीयत्वव्यावृत्त्या मैथिल एव वङ्गदेशे तेषां प्रशस्तानामभावादिति । पललपिण्डोक्त्या च दाक्षिणात्यमात्रव्यावृत्तिरिति ।

केचित्तु समानतन्त्रासिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः इति १ अ० १ आ० २९ सूत्रव्याख्याने न्यायदर्शनवात्स्यायनभाष्ये(१) "पुरुषकर्मादिनिमित्तो भूतसर्गः कर्महेतवो दोषाः प्रवृत्तिश्च स्वगुणविशिष्टाश्चेतनाः असदुत्पद्यते उत्पन्नं निरुद्ध्यत इति योगानाम् ।" इति ।

अपि च सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति १ अ० २ आ० ६ सूत्र व्याख्यानेऽपि तस्मिन्नेव भाष्ये "यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात् । अपेतोऽप्यस्ति विनाशप्रतिषेधात् ।" इति च वर्तते । अयमेव लेखः पातञ्जलसूत्रभाष्ये विभूतिपादे एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याता इति १३ सूत्रस्य व्याख्याने "तदेतत् त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् ।" इति दृश्यते । अत्र योगशास्त्राचार्यपतञ्जलेरेव

(१) विजयनगरसंस्कृतसीरीजमुद्रित पुस्तके ३८ पृष्ठे ।

ग्रहणम् अनेन पतञ्जलिना मौर्य्यराजस्य नाम स्वग्रन्थे लिखितम् स च राजवंशः खीष्टसमयात् १४० वर्षेभ्यः पूर्वं समाप्त इति तस्मिन् समये तदासन्ने वा समये पतञ्जलिरभूत् ततः परं पातञ्जलमतनिदर्शको न्यायभाष्यकर्ता वात्स्यायनोऽभूदित्याहुः । तदसत् योगानामित्यनेन(१) शिवसंहिताशिवस्वरोदययोः कर्त्तुः शिवस्य कस्मान्न ग्रहणम् ? याज्ञवल्क्यगीतायाः योगियाज्ञवल्क्यस्मृतेः कर्तुर्याज्ञवल्क्यस्य कस्मान्न ग्रहणम् ? योगवासिष्ठकर्तुर्वसिष्ठस्य कस्मान्न ग्रहणम् ? एतेषां विषयाणां परमार्थतो भङ्ग्यन्तरेण वा तत्रतत्र प्रतिपादनात् । अपि च मौर्यवंशसमाप्तिसमयश्च उक्तसमयो न सम्भवतीति पूर्वं निरूपितत्वाच्च ।

यश्च पातञ्जलसूत्रव्यासभाष्ये दर्शितः स चांशः स्वयमेव कथं न पूर्वापरपाठेन समालोचनेन निर्णीयते सा चान्योक्तिरेव "अपर आह धर्मानभ्यधिको धर्मी पूर्वतत्त्वानतिक्रमात् पूर्वापरावस्थाभेदमनुपतितः कौटस्थ्येन विपरिवर्तेत यद्यन्वयी स्यादित्ययमदोषः कस्मात् एकान्तानभ्युपगमात् तदेतत् त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतमप्यस्ति विनाशप्रतिषेधात् संसर्गाच्चास्य सौक्ष्म्यं सौक्ष्म्याच्चानुपलब्धिरिति ।"

अवशिष्टं प्रसह्य गृहीतस्य पतञ्जलेरर्वाचीनत्वं तत्र विचार्यते । पतञ्जलिर्यद्युक्तकालावस्थायी तदा "द्वापरेद्वापरे विष्णुर्व्यासरूपी महामुने ।" इति विष्णुपुराणाद्युक्तो योगसूत्रभाष्यकारो वेदव्यासः कुत्र तिष्ठत् अपि च स्कन्दपुराणीयहालास्यखण्डे भावप्रकाशे

(१) योगस्य यथा चिरन्तनत्वं तथा ५० पृष्ठे प्रतिपादितमधस्तात् ।

च चरकप्रादुर्भावप्रकरणे पतञ्जलेरितिहासवर्णनात् स्कन्द-पुराणकर्ता वेदव्यासः भावप्रकाशनिर्दिष्टेतिहासमूलकर्ता च कुत्र तिष्ठेत् कात्यायन-लौगाक्षिसूत्रेषु गोत्रप्रकरणे निर्दिष्टः पतञ्जलिरिति सूत्रकर्तारोऽपि कुत्र तिष्ठेयुः । यथा पुराणानां नार्वाचीनत्वं तथा प्रतिपादितमधस्तात् । तस्मान्नार्वाचीनत्वं पतञ्जलेरिति ॥

अन्ये तु मंद्रासदेशस्थ-अदिआरपुस्तकालयस्थेषु पुस्तकेषु एका न्यायसूत्रवृत्तिर्वात्स्यायनभाष्यादपि प्राचीना वर्तत इति तत्रत्यसूचीपत्रे ९१ । ९२ पृष्ठे लिखितमस्तीति न्यायसूत्राणां व्याख्यानेषु वात्स्यायनभाष्यं नातिप्राचीनमिति बोधयन्ति ।

तस्याः प्रतिलिपेः द्वित्राणि पत्राणि वाराणसीस्थराजकीयसंस्कृतपाठशालीयकार्यालये वर्त्तन्ते इति मया सा वृत्तिः समालोचिता तस्या रचनायाः प्रकारोऽतीव नवीनोऽप्रौढोऽस्पष्टार्थ इति केनचिदाधुनिकनैयायिकेन रचिता इति प्रतिभाति ।

अपरे तु सूत्रेभ्यो भिन्नानि न्यायदर्शनवात्स्यायनभाष्ये कानिचिद्वाक्यानि तेषामपि व्याख्यानान्यवलोक्य तर्कयन्ति खलु भाष्यात् प्राचीनं न्यायसूत्राणां किमपि व्याख्यानं वार्त्तिकं वा आसीत् यदिदानीं नोपलभ्यत इति । तदसत् इदानीं नोपलभ्यते किं तु उद्द्योतकरापरपर्यायेण भारद्वाजेन न्यायवार्त्तिककृता ऋषिकल्पेनाचार्येण वाचस्पतिमिश्रेण शिवावतारेणोदयनाचार्येण वर्द्धमानोपाध्यायेन वेदादिभाष्यकर्तृभिर्माधवाचार्यैरपि नोपलब्धा नापि चर्चितेति तत् किं मूषिकविषाणशशशृङ्ग-खपुष्पात्मकमासीत् ? तस्मान्नासीदेव । किं तु

"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥"

इति पराशरोपपुराणीयाष्टादशाध्यायस्थभाष्यलक्षणस्य समन्वय एव । स्वपदानि च वर्ण्यन्तेऽत्र पदानीत्यस्य "पदसमूहो वाक्यमिति" न्यायवार्त्तिकात् स्ववाक्यानि च वर्ण्यन्ते इत्याशयोऽवगम्यते । तस्मात् तानि वाक्यानि भाष्यकारस्यैव न त्वन्यस्य । अत एव भगवताभाष्यकारेण कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् नित्येष्वप्यव्यभिचार इति २ अध्याये २ आह्निके १७ सूत्रव्याख्याने(१) "कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयते इति शीलमिदं भगवतः सूत्रकारस्य बहुष्वधिकरणेषु द्वौ पक्षौ न व्यवस्थापयति तत्र शास्त्रसिद्धान्ततत्त्वावधारणं प्रतिपत्तुमर्हतीति मन्यते । शास्त्रसिद्धान्तस्तु न्यायसमाख्यातमनुमतं बहुशाखमनुमानमिति ।"

उदयनाचार्यास्तात्पर्यपरिशुद्धौ तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति सूत्रव्याख्याने "भाष्यकारस्य रीतिरियं स्वप्रतिभया व्याख्यान"मित्यादि । विश्वनाथन्यायपञ्चाननैरपि न्यायसूत्रवृत्तौ पृ. २७ पं. १ अभ्युपगमसिद्धान्तन्यायेन भाष्यकारस्यापि सूत्रकर्तृत्वं सूचितम् ।

एतावता सिद्धं भवति भाष्यकारेण कचित् स्वातन्त्र्येण वैशद्यार्थं वाक्यानि रचितानि तानि व्याख्यातान्यपीति ॥

अपि च शास्त्रकाराणां रीतिरियं ऊहापोहविचारे आचार्याणां नामानि कचिद्वचनान्यपि समुद्धरन्ति तेन न पृथक् शास्त्राणि ग्रन्था वा अनुमेयाः यथा शारीरकसूत्रे

(१) विजयनगरसंस्कृतसीरीजमुद्रिते पुस्तके १०८ पृष्ठे द्रष्टव्यम् ।

आश्मरथ्यादयः पाणिनिसूत्राष्टाध्याय्यामपि स्फोटायन-भारद्वाज-गार्ग्यादयश्च।

आधुनिका अपि विद्वांसः सभायां स्ववक्तृतायां स्वमतानि निरूपयन्ति यदि तानि अन्यः कश्चित् स्वग्रन्थे उद्धरेत् तदा न शास्त्रान्तरं ग्रन्थान्तरं वानुमेयं भविष्यतीति। वेदेषु ब्राह्मणोपनिषत्सु अलौकिकपुरुषानिर्मितेष्वपौरुषेयेषु वा आयुर्वेदेष्वपि "भवन्ति चात्र" इत्यादिना उक्तं तत्र न वेदान्तरमनुमेयम्।

न्यायभाष्यस्य द्विविधं पुस्तकमुपलभ्यते द्विविधमपि पुरातनं तालपत्रेषु लिखितं तत्रैकं प्रायः सम्पूर्णं यत्रान्ते "योक्षपादमृषिं न्यायः" इत्यादिपद्यं मध्ये ऽपि बहुविशेषो वर्त्तते। अपरं च अन्त्यश्लोकहीनं मध्ये ऽपि क्वचित् खण्डितम्। एतत्पुस्तकद्वयं जगन्नाथपुर्यां गोवर्द्धनमठे वर्तते एतन्मूलकान्येव प्रायो बहूनि आदर्शपुस्तकानि उपलभ्यन्ते। इदं ग्रन्थन्यूनाधिक्यं लेखकशोधककृतं तत्रतत्र समुपलभ्यत इत्यनुमीयते इति।

वात्स्यायनभाष्याद्भिन्नान्यर्वाचीनानि अन्यान्यपि न्यायसूत्रव्याख्यानानि वर्त्तन्ते। यथा वाचस्पतिमिश्रकृतो न्यायसूचीनिबन्धः। उदयनाचार्यकृतं बोधसिद्धिर्बोधशुद्धिर्वेत्यपरनामधेयं न्यायपरिशिष्टम्। वर्द्धमानोपाध्यायकृतमन्वीक्षानयतत्त्वबोधाख्यम्। इत्यादि पूर्वं सूचितमेव विस्तरेण तत्तदाचार्याणां समयनिरूपणप्रस्तावे ऽग्रे ऽपि निरूपयिष्यते।

अपराण्यपि व्याख्यानानि वर्तन्ते। जयन्तकृता न्यायसिद्धान्तमञ्जर्याख्या महावृत्तिः इयं विजयनगरसंस्कृतसीरीजनामकपुस्तकावल्यां मुद्रिता। तत्कृता न्यायकलिका लघुवृत्तिः(१)।

---

(१) न्यायसूत्रपाठस्यातिदुरूहत्वं निरूपितमधस्तात् अत एव

विश्वनाथन्यायपञ्चाननकृता गोतमसूत्रवृत्तिः(१) । वृत्तिरियं द्वित्रवारं कलिकातानगरे वाराणस्यामपि मुद्रिता परं त्वशुद्धिबहुला अनेकेषु पत्रेषु पङ्क्तिद्वयेन पङ्क्तित्रयेण खण्डिता वर्तते ।

वेदान्तिमहादेवकृता मितभाषिण्याख्या न्यायसूत्रवृत्तिः(२) ।

नागेशभट्टकृता न्यायसूत्रवृत्तिः पूर्वं मया दृष्टा इदानीं सा नोपलभ्यते । अनेनैव नागेशभट्टेन पाणिनिव्याकरणे

बहुभिराचार्यैर्द्विविधं व्याख्यानं कृतम् प्रथमं न्यायभाष्यानुसारिसूत्रपाठानुसारि द्वितीयं तु स्वसिद्धान्तानुसारि । यथा वाचस्पतिमिश्रेण १ तात्पर्यटीका २ न्यायसूची च । उदयनाचार्येण १ तात्पर्यपरिशुद्धिः २ न्यायपरिशिष्टं च । वर्द्धमानोपाध्यायेन १ न्यायनिबन्धप्रकाशः २ अन्वीक्षानयतत्त्वबोधश्च । विश्वनाथपञ्चाननेन १ न्यायसूत्रवृतिः २ न्यायालोकः । एवमन्यैरपि ।

(१) अस्मन्निकटे वर्त्तमानेऽधःप्रतिपादिते पुस्तके मुद्रितपुस्तकादन्ते ऽयं विशेषः ।

"एषा मुनिप्रवरगोतमसूत्रवृत्तिः
श्रीविश्वनाथकृतिना सुगमाऽल्पवर्णा ।
श्रीकृष्णचन्द्रचरणाम्बुजचञ्चरीक-
श्रीमच्छिरोमणिवचःप्रचयैरकारि ॥
कठिनार्थपदां कृतिं ममैतां मृदुनि त्वच्चरणे समर्पयामि ।
अपराधमिमं प्रभो क्षमेथाः ननु नारायणदेव दीनबन्धो ॥
रसवाणतिथौ १५५६ शकेन्द्रकाले
बहुले कामतिथौ शुचौ सिताहे ।
अकरोन्मुनिसूत्रवृत्तिमेतां
ननु वृन्दाविपिने स एष विश्वनाथः ॥"

(२) अस्मन्निकटेऽस्या वृत्तेः १ । २ । ३ । ४ अध्याया वर्तन्ते ।

न्यायादिशास्त्रेषु धर्मशास्त्रे साहित्यादिषु चानेके ग्रन्था रचिताः ।

महामहोपाध्यायश्रीभट्टाचार्यचूडामणितनयश्रीभट्टाचार्यसार्वभौमरामभद्रविनिर्मितं न्यायरहस्याख्यं व्याख्यानम्(१)

श्रीमद्राधामोहनगोस्वामिकृता न्यायसूत्रविवरणाख्या वृत्तिः । वृत्तिरियं वाराणस्यां पण्डितपत्रे मुद्रिता तस्मादुद्धृत्य पृथगपि मुद्रिता । अनेनैव राधामोहनगोस्वामिना रघुनन्दनभट्टाचार्यकृतस्मृतितत्त्वानि व्याख्यातानि माथुरी-जागदीशी-गादाधरीग्रन्थोपरि क्रोडपत्राण्यपि रचितानि ।

श्रीदिमद्गुरुवरमहामहोपाध्यायश्रीकैलासचन्द्रभट्टाचार्यशिरोमणिकृता भाष्यच्छायाख्या न्यायसूत्रवृत्तिः । वृत्तिरियं न्यायदर्शनवात्स्यायनभाष्यार्थबोधिका ग्रन्थसंख्ययाऽपि भाष्येण समाना । शोकस्थानम् आरम्भात् प्रभृति पञ्चमाध्यायस्य द्वितीयाह्निके ५ सूत्रव्याख्यापर्यन्तं ग्रन्थं निर्माय महाशयाः पाञ्चभौतिकं देहं सन्त्यज्य परमपदं गतवन्त इति ।

न्यायसूत्राणां सर्वेषां व्याख्यानानां शिरोमणिभूतं नवीनन्यायत्वेन व्यवह्रियमाणानां तत्त्वचिन्तामण्यादिन्यायमहानिबन्धानामाधारभूतं न्यायवार्त्तिकं वरीवर्ति किन्तु न केवलसूत्राणां नापि केवलभाष्यस्य(२) व्याख्यानमपि तूहापोहविचारपूर्वकन्यायसिद्धान्तव्यवस्थापकं भाष्यसंवलितसूत्रव्याख्यानमित्यनुपदं वर्णयिष्यते ॥

---

(१) इदं व्याख्यानमस्मन्निकटे चतुर्थाध्यायान्तं वर्त्तते । पत्राणि १६८ श्लोकसंख्या ४२००

(२) भाष्यस्य टीका न्यायचन्द्रिकाख्या रामचन्द्रकृता ऽतीव मनोहरा वर्तते ।

अथ न्यायवार्त्तिककर्तुः परमर्षेर्भारद्वाजस्य चरितम् ।

न्यायवार्त्तिककारो भारद्वाजः कस्मिन् देशे कस्मिन् काले आविर्भूत इति निश्चयाभावेऽपि इदानीमनेके सिद्धान्तास्तद्विषका आविर्भूता इति तत्परीक्षापूर्वकं किञ्चिदुच्यते।

न्यायवार्त्तिकान्ते

"यदक्षपादप्रतिभो भाष्यं वात्स्यायनो जगौ ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥"

"इति परमर्षिभारद्वाजकृतं न्यायत्रिसूत्रीवार्त्तिकं समाप्तम्" इति त्रिसूत्रीप्रकरणान्ते दृश्यते(१) ।

"इति पाशुपताचार्यश्रीभारद्वाजोद्द्योतकरकृतौ न्यायसूत्रवार्त्तिके पञ्चमोऽध्यायः(२)

इति वार्त्तिककारोक्त्या न्यायवार्त्तिककारः परमर्षिभारद्वाजः किं तु आचार्यवाचस्पतिमिश्रेण तात्पर्यटीकारम्भे "अथ भगवताक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते व्युत्पादिते च भगवता पक्षिलस्वामिना किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति । यदक्षपादइति । यद्यपि भाष्यकृता कृतव्युत्पादनमेतत् तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेनाच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्द्योतकरेण स्वनिबन्धोद्द्योतेन तदपनीयत इति ।"

---

(१) पाठोऽयं महामहोपाध्यायश्रीद्युक्तकैलासचन्द्रभट्टाचार्यशिरोमणिमहाशयानां पुस्तके वर्तते ।

(२) पाठोऽयं वाराणसीस्थपण्डितवरश्रीविभवरामशर्मणः पुस्तके वर्तते ।

अपि च श्रीधराचार्येण न्यायकन्दल्यां चित्सुखाचार्येण तत्त्वप्रदीपिकायामपि न्यायवार्त्तिककारमुद्द्योतकराचार्यनाम्नाजुहावेति न्यायवार्त्तिककारस्य मुख्यं नाम भारद्वाजः उद्द्योतकर इत्युपनाम वा गुणवशान्नाम इति अनुमीयते । नैतच्चित्रम् अनेके आचार्या नामद्वयेन प्रसिद्धा यथा महर्षिः कृष्णद्वैपायन एव वेदव्यासः । महर्षिर्गोतम एव अक्षपादः । महर्षिर्वात्स्यायन एव पक्षिलस्वामी । महर्षिः कणाद एव कणभुग् वा कणभक्षः । प्रशस्तपाद एव प्रशस्तकरः । कात्यायन एव पारस्करः । सत्याषाढ एव हिरण्यकेशः । एव मन्येऽपि ।

निबन्धकारास्तु कृष्णद्वैपायनस्य स्थाने वेदव्यासमपि विहाय "व्यासः" मीमांसका यथा प्रभाकरस्य स्थाने "गुरवः" भट्टकुमारिलस्य स्थाने "भट्टाः" पार्थसारथिमिश्रस्य स्थाने "मिश्राः" । अन्येऽपि गुरुचरणाः पितृचरणा यज्ञपत्युपाध्यायस्य स्थाने उपाध्याया इति लिखन्ति स्म । इति चिरन्तनसम्प्रदायानुसारेण न्यायवार्त्तिककारं भारद्वाज(१)मुद्द्योतकरनाम्नालिखन्ति स्म आचार्या इति ।

अयं भारद्वाज उद्द्योतकराचार्यः कस्मिन् देशे कस्मिन् काले च आविर्भूत इति विचारे काश्मीरदेशीय इति केचिद्वदन्ति तन्त्रेषु केरलाम्नाय–चीनाम्नाय–महाचीनाम्नाय–शैवागमापरनामधेयकाश्मीराम्नायनाम्ना नानासम्प्रदायदर्शनाद् वार्त्तिकपुस्तके क्वचित् "पाशुपताचार्य–उद्द्योतकरविरचितं न्यायसूत्रवा-

(१) अनुमीयते ऽनेनैव भारद्वाजेन वैशेषिकसूत्रवृत्तिरपि प्रणीता न्यायवार्त्तिके ऽनेकत्र प्रशस्तपादभाष्यस्थवाक्यानि "इति शास्त्र"मित्याकारेण समुद्धृतानीति ।

र्त्तिकमिति" दर्शनात् । तत्र शिवादित्यमिश्रेऽपि व्योमशिवाचार्य इतिप्रयोगात् सूत्रकारभाष्यकारयोर्मिथिलादेशे निवासात् । तात्पर्यटीका—परिशुद्धि—प्रकाश—वर्द्धमानेन्दु—तात्पर्यमण्डनकाराणां मैथिलत्वात् मध्ये वार्त्तिककारस्य काश्मीरदेशीयत्वे प्रबलप्रमाणाभावात् वार्त्तिककारोऽपि मैथिल इत्यनुमाने बाधकाभावाच्च ।

एके तु वदन्ति न्यायवार्त्तिके पृ. ११० "गोपालकेन मार्गे ऽपदिष्टे एष पन्थाः श्रुघ्नं गच्छती"ति उदाहृतत्वाद्वार्त्तिककारो मालवदेशान्तर्गतपद्मावत्यां लब्धजन्मा स्थाण्वीश्वरस्थानस्थः पद्मावत्यां न्यायविद्याप्रचारबाहुल्यादिति ।

तत्र वाक्यारम्भ एव 'गोपालकेने'त्युक्तत्वात् न्यायाकरग्रन्थेषु न कोऽपि पद्मावतीनिर्मितो ग्रन्थो दृश्यत इति तस्य वाङ्मात्रत्वाच्च ।

न्यायवार्त्तिककारो भारद्वाजः कस्मिन् काले आविर्भूत इति प्रस्तूयते । न्यायवार्त्तिके पृ. ११० पं. ७ "अहो कौशलं भदन्तस्य" पृ. ४४ पं. इति "कोऽन्यो भदन्ताद्वक्तुमर्हति ।" पृ. १३१ पं. १० "सौत्रान्तिकपक्षमाश्रित्य लक्षणं विचार्यते" पृ० १२० पं. ७ "वादविधानटीकायां" पृ. १२१ पं. २ "वादविधौ" इत्यादिलेखदर्शनात बुद्धात् पश्चात् कालभावी इत्यनुमीयते । आचार्यवाचस्पतिमिश्रेण तत्रतत्र "दिङ्नागमतं खण्डयति" "वसुबन्धवं लक्षणं खण्डयति" इत्यादिलिखितत्वात् कश्चिदर्वाचीनो भारद्वाजोद्द्योतकर इति निष्पन्नं भवति परं तु तात्पर्यटीकारम्भ एव ।

"इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम् ।
उद्द्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥" इति ।

अत्र अतिजरतीनामुद्द्योतकरगवीणामित्युक्त्या अति-जीर्णानामतिपुरातनीनामित्यवगम्यते ततोऽपि दुस्तरकुनिबन्धप-ङ्कमग्नानामित्युक्तिरप्युक्तमेवार्थं दृढयति तथा सति वाचस्पतिमि-श्रसमयात् पूर्वं(१) भदन्तसमयात् परं न्यायवार्त्तिकग्रन्थनिर्मा-णमभूत् तदानीं भारद्वाज आसीदिति निर्णीयते ।

अत्र सम्प्रदायविदः । वासवदत्ताख्यायिकायां पृ० २३५ "न्या-यस्थितिमिवोद्द्योतकरस्वरूपा" मिति दर्शनात् १,२०० वर्षेभ्यः पूर्वं वासवदत्ताकर्तुः स्थित्या तत्पूर्वं न्यायस्थितिकर्ता भारद्वाज आ-सीत् । यथा शङ्कराचार्यः श्रौतस्मार्तधर्मस्थितिकर्ता शिवावतार(२)-

---

(१) वाचस्पतिमिश्राणां ८९८ शाकाब्दे यथा स्थितिरासीत् तथा तच्चरिते ऽग्रे निरूपयिष्यते ।

(२) शिवावतारः प्रस्थानत्रयभाष्यप्रणेता शङ्कराचार्यः तत्स्था-पितशृङ्गेरी-गोवर्द्धन-शारदा-ज्योतिर्मठेषु तच्छिष्याः शङ्कराचा-र्यनाम्ना प्रसिद्धाः तारारहस्यादितन्त्राणां कर्तापि गौडशङ्कराचार्यः इत्यादिशङ्कराचार्यभेदात् तच्चरितान्यपि नानाविधानि उपल-भ्यन्ते किं तु प्रस्थानत्रयभाष्यकर्तुरेव चरितं किञ्चिदुच्यते ।

तथा चोक्तं कूर्मपुराणे पूर्वार्द्धे ३० अध्याये

"कलौ रुद्रो महादेवो लोकानामीश्वरः परः ।
तदेव साधयेन्नृणां देवतानां च दैवतम् ॥ ३२ ॥
करिष्यत्यवताराणि शङ्करो नीललोहितः ।
श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥ ३३ ॥
उपदेक्ष्यति तज्ज्ञानं शिष्याणां ब्रह्मसंज्ञितम् ।
सर्ववेदान्तसारं हि धर्मान् वेदनिदर्शनात् ॥ ३४ ॥
ये तं प्रीता निषेवन्ते येन केनोपचारतः ।
विजित्य कलिजान् दोषान् यान्ति ते परमं पदम् ॥ ३५ ॥" इति ।

तथा शिवरहस्ये ऽपि नवमांशे १६ अध्याये

"शृणु देवि भविष्याणां भक्तानां चरितं कलौ ।
वदामि संग्रहेणैव श्रवणाद्भक्तिवर्द्धनम् ॥ २ ॥

१८

कलयब्धौ मज्जमानाँस्तान् दृष्ट्वानुक्रोशतोऽम्बिके ।
मद्वंशजातं देवेशि कलावपि तपोधनम् ॥ ६ ॥
केरलेषु तदा विप्रं जनयामि महेश्वरि ।
तस्यैव चरितं तेऽद्य वक्ष्यामि शृणु शैलजे ॥ ७ ॥
कल्यादिमे महादेवि सहस्रत्रितयात् परम ।
सारस्वतास्तथा गौडा मिश्राः कर्णाजिना ? द्विजाः ॥ ८ ॥
आममीनाशना देवि आर्यावर्तानुवासिनः ।
औत्तरा विन्ध्यनिलया भविष्यन्ति महीतले ॥ ९ ॥
शब्दार्थज्ञानकुशलास्तर्ककर्कशबुद्धयः ।
जैना बौद्धा बुद्धियुक्ता मीमांसानिरताः कलौ ॥ १० ॥
वेदबोधदवाक्यानामन्यथैव प्रबोधकाः ।
प्रत्यक्षवादकुशलाः शल्यभूताः कलौ शिवे ॥ ११ ॥
मिश्राः शास्त्रमहाशस्त्रैश्छेदोच्छेदिनोऽम्बिके ।
कर्मैव परमं श्रेयो नैवेशः फलदायकः ॥ १२ ॥
इति युक्तिपरास्तुष्टाश्चैवमज्ञान्वञ्चयन्ति च ।
तेन घोराः कुलाचाराः कापाला भवन्त्यथ ? ॥ १३ ॥
तेषामुद्धारणार्थाय भूजानीते मदंशजम् ।
केरले शलग्रामे विप्रपत्न्यां मदंशजः ॥ १४ ॥
भविष्यति महादेवि शङ्कराख्यो द्विजोत्तमः ।
उपनीतस्तदा मात्रा वेदान् साङ्गान् ग्रहीष्यति ॥ १५ ॥
जैनान् विजित्य तरसा तथान्यान् कुमतानुगान् ।
तदा मातरमामन्त्र्य परिव्राट् स भविष्यति ॥ १८ ॥
व्यासोपदिष्टसूत्राणां ह्यनवाक्यात्मनां शिवे ।
अद्वैतमेव सूत्रार्थं प्रामाण्येन करिष्यति ॥ २९ ॥
द्वात्रिंशत्परमायुरन्ते शीघ्रं कैलासमावसेत् ।
एतत् प्रतिगृहाण त्वं पञ्चलिङ्गं सुपूजयन् ॥ ३९ ॥" इत्यादि ।

एवं स्थूलेन प्रकारेण देशकालनिर्णयो भवति । सूक्ष्मेन प्रकारेण देशकालादिनिर्णयार्थं शङ्कराचार्यशिष्येण चिद्विलासाख्येन २४००० श्लोकात्मकं शङ्करजयाख्यं चरितम् । रचित इदमेव माधवाचार्येण "प्राचीनशङ्करजये सारमाकृष्य लिख्यते" इत्यादिना स्वग्रन्थे स-

स्तथा बौद्धप्राबल्यसमये भारद्वाजोऽपि न्यायस्थितिं कृतवानिति न चित्रम् ।

यद्यपि शङ्कराचार्याणां श्रौतस्मार्तधर्मस्थितिकर्तृत्वे कूर्मपुराण-शिवरहस्यादि आर्षं प्रमाणमस्ति न तथा उद्द्योतक-

---

मुद्धृत्तम् । अनन्तानन्दगिरिणापि शङ्कराचार्यशिष्यमात्मानं ब्रुवता शङ्करजयनाम्ना ग्रन्थो रचित इति नैव तिरोहितम् । एवं धनपतिसूरिणापि शङ्करविजयो रचितः । एवमनेकैरपि विद्वद्भिर्नानाविधा ग्रन्था रचिता । सम्प्रति बाबूराजेन्द्रनाथघोषमहोदयेन "शङ्कर ओ रामानुज"नाम्ना ८०.१ पृष्ठात्मको निबन्धो वङ्गभाषायां रचित इति । किं तु शङ्करमन्दारसौरभे नीलकण्ठभट्टाः

"प्रासूत तिष्यशरदामतियातवत्या-

मेकादशाधिकशतोनचतुःसहस्र्याम् ।" इत्युक्तवन्तः

तिष्यशरदां कलियुगाब्दानामिति भावः ।

सम्प्रदायविदस्तु

"निधिनागेभवह्न्यब्दे ३८८९. विभवे मासि माधवे ।

शुक्ले तिथौ दशम्यां तु शङ्करार्योदयः स्मृतः ॥" इत्याहुः ।

नवाशीत्युत्तराष्टशताधिकत्रिसहस्रमिते वर्षे कलियुगस्येति शेषः ।

श्रीभास्करभारतीकृतमाधवचन्द्रोदये

"वर्षेष्वतीतेषु शतेषु षट्सु

तिष्येऽवतीर्णो भुवि शङ्करार्यः ।" इति ।

सदानन्दस्वामिकृतशङ्करविजये

"धर्मे द्वाविंशतिशके सप्तषड्द्विसहस्रके ।

अब्दे सर्वजिते जातः सद् वै पञ्चमे दिने ॥" इति ।

अत्र अन्वेषकंमन्याः शिवरहस्यस्थं "सहस्रत्रितयात् परमिति" वचनं "सहस्रद्वितयात् परमिति" पठित्वा किंवदन्त्यादिना विक्रमादित्यसमयासन्ने समये शङ्कराचार्याणां स्थितिं वदन्ति । तत्र शङ्कराचार्यप्रणीतेषु ब्रह्मसूत्रोपनिषद्गीताभाष्येषु समुद्धृतेषु ग्रन्थेषु इतः पूर्वं त्रयोदशशताब्द्यां निर्मितोऽपि ग्रन्थः समुद्धृत इति तत्पूर्वं द्वात्रिंशद्वर्षपरिमितायुनामाचार्याणां स्थितिस्थापनं त एव कर्तुं शक्नुवन्ति ।

रस्य न्यायस्थितिकर्तृत्वे उपलभ्यते तथापि प्राचीनेनाचार्येण वासवदत्ताख्यायिकायां समूलमेवोपात्तमिति नासमञ्जसम् ।

न्यायवार्त्तिकं पुरातनं भवतु वा नवीनं किं तु "भारद्वाजेन वार्त्तिक"मित्युक्त्या न्यायसूत्रतद्भाष्यवदेव समादरणीयं कालनिर्णयस्तु काकदन्तपरीक्षावदुपेक्षणीय इति(१) ।

वार्त्तिकलक्षणं तु पराशरोपपुराणे १८ अध्याये

"उक्तानुक्तद्विरुक्तानां चिन्ता यत्र प्रसज्यते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः ॥" इति ।

अस्मन्निकटे वर्त्तमाने एकस्मिन् महाभाष्यपुस्तके लिखितेषु सूत्र-भाष्य-वार्त्तिकलक्षणेषु वार्त्तिकलक्षणं यथा ।

"उक्तानुक्तद्विरुक्तानां विचारस्य निबन्धनम् ।
हेतुभिश्च प्रमाणैश्च एतद्वार्त्तिकलक्षणम् ॥" इति ।

उक्तलक्षणाक्रान्तो न्यायवार्त्तिकग्रन्थश्च तत्त्वचिन्तामण्यादिन्यायमहानिबन्धानामाधुनिकैर्नवीनन्यायत्वेन व्यवह्रियमाणानामाधारभूतो महानैयायिकैरपि दुरधिगमो भारद्वाजकृतोऽपि इदानींतनानां भाष्यकारंमन्यमानानां महामहोपाध्यायानां मते भारद्वाजो न ऋषिरिति वदतां भारद्वाजगोत्रेण येन केनापि पण्डितेन रचित इति सिद्धान्तः ।

अत्र यथा भारद्वाजेन वार्त्तिकग्रन्थो रचितस्तथा प्रतिपादितमधस्तात् । भारद्वाजस्य ऋषित्वं तु प्रश्नोपनिषदि ६ प्रश्ने "अथ हैनं सुकेशाः भारद्वाजः पप्रच्छ" "षोडशकलं भारद्वाज पुरुषं" इति मुण्डकोपनिषदि १ मुण्डके । पाणिनिरपि व्याकरणसूत्रपाठे ७ अ. २ पा. ६३ सू. "ऋतो भारद्वाजस्य" इति । किं तु

(१) "पुराणमित्येव न साधु सर्वं नवीनमित्येव न गर्हणीयम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥" इति ।

अनेनैव भारद्वाजेन न्यायवार्त्तिकं प्रणीतमित्यत्र दृढप्रमाणाभावेऽपि श्रौतस्मार्तसूत्रादिषु कृष्णात्रिः वृद्धात्रिः अत्रिः, विष्णुः विष्णुवृद्धः, श्रीमुखः शाण्डिल्यः गर्दभीमुखश्च शाण्डिल्यः, याज्ञवल्क्यः वृद्धयाज्ञवल्क्यो योगियाज्ञवल्क्यश्चेत्यादिदर्शनाद्भारद्वाजभेदानुमानादुक्तकालावस्थायिना भारद्वाजेन परमर्षिणा कृतं वार्त्तिकमित्युक्तः सिद्धान्तो निराकृतः। वत्सोऽपि द्विविध इत्युक्तमधस्तात् ।

वार्त्तिकग्रन्थेऽपि १२८ पृ० १७ पं० "हेतुवार्त्तिकं कुर्वाणेन" १६८ पृ० २२ पं० "हेत्वाभासवार्त्तिके" इत्याद्युक्त्या किमपि पुरातनं न्यायवार्त्तिकमासीदिति कल्पयन्ति केचित् तन्न क्वचिद्बौद्धानां वार्त्तिकं क्वचिच्च ब्रह्ममीमांसासूत्रे "वादरायणः"(१) व्याकरणमहाभाष्ये गोनर्दीयस्त्वाहेत्यादिवदुक्तत्वात् शास्त्रतात्पर्यानवबोधाच्च ।

विश्वनाथन्यायपञ्चाननो न्यायसूत्रवृत्तिग्रन्थं न्यायभाष्यवार्त्तिकादिग्रन्थान् समालोच्यैव कृतवान् किं तु न्यायवार्त्तिकग्रन्थं साकल्येन नोपलब्धवान् "प्रत्यक्षनिमित्तत्वात्–" २ अ. १ आ. २५ सूत्रव्याख्याने" इदं न सूत्र"मित्युक्तं तेन, वार्त्तिककारेणास्य सूत्रत्वं कण्ठरवेणोक्तत्वादिति । अनुमीयते यद्वर्षशतत्रयात्पूर्वमपि वार्त्तिकग्रन्थो लुप्तप्राय आसीदिति ।

चीनदेशीयेतिहासपुस्तकाद्विज्ञातं भवति यत् वर्तमानसमयात् चतुर्दशशताब्दीभ्यः पूर्वं शङ्कभद्रबौद्धस्य शिष्यपरम्परायां दिङ्नागो बौद्धाचार्योऽभूत् तेन न्यायसूत्राणां स्वमतानुसारेण समालोचनं कृतम् तन्मतखण्डनाद्वार्त्तिककारोऽर्वाचीन इति सिद्धान्तयन्ति केचित् इदं न सम्यगित्युक्तं मया गोतमचरिते अयं विशेषोऽप्यस्ति । यत् वर्तमानसमयात् नवशताब्दीभ्यः पूर्वं वर्त्तमान आचार्यवाचस्पतिमिश्रः "उद्द्योतकरग-

(१) ४ अध्याये ४ पादे ७ । १२ सूत्रम् ।

वीणामतिजरतीनामिति कथं लिखेत् यतो वर्त्तमानसमयात् षट्-शताब्दीभ्यः पूर्वं वर्त्तमानमपि गङ्गेशोपाध्यायं नव्यास्तित्वसाकारेण व्यवहरन्ति नैयायिकाः तस्मात् स सिद्धान्तः सन्दिग्ध एवेति ।

न्यायवार्त्तिके १०३ पृ० (प्रथमसंस्करणे) काश्यपीयं लक्षणमित्यत्र "कणादः काश्यपः समौ" इत्यनेन पर्यवसितं काणादलक्षणमित्यर्थमजानता केनचित् काश्यपी क्षितिरिति लिखितमादर्शपुस्तके तथैव प्रमादान्मुद्रितमिति ज्ञेयम् ।

१२८ पृ. १७ पं. वार्त्तिकं कुर्वाणेनेति केनचिद्बौद्धेन कृतं तद्वार्त्तिकमित्यजानन्तो न्यायवार्त्तिककारमेव समाकृष्य निरूपयन्ति "मुद्रितवार्त्तिके साम्प्रतं नोपलभ्यते" इति मुद्रितं वार्त्तिकमनवस्थितमिति तेषां हृदयम् ।

यत्र क्वचित् न्यायवार्त्तिकतात्पर्यटीकायां प्रतीकादौ मुद्रितवार्त्तिकपुस्तकेन वैषम्यात् मुद्रितवार्त्तिकपुस्तकस्यानवस्थितत्वं खण्डितत्वं च कल्पयन्ति केचित् । तन्न मूलादर्शपुस्तकेषु बहूनि पाठान्तराणि उपलभ्यन्ते तानि न अनवस्थामूलकानि न वा त्रुटिमूलकानि निबन्धस्य चिरन्तनत्वात् लेखकशोधकप्रमादजातात् पाठान्तराद् वाचस्पतिमिश्रेण यल्लब्धं वार्त्तिकपुस्तकं तदनुसारि व्याख्यानं कृत(१)मिति विज्ञेयम् ॥

---

(१) तात्पर्यटीकायां ६५ पृ० द्रष्टव्यम् । यथा पक्षताजागदीश्याम् । "न च प्रकृतस्वरसंवलितस्यैव पाठस्य धर्तुमुचितत्वाद्-व्याप्त्येति धारणं युक्त"मित्यादि ।

मुद्रितदीधितिपुस्तके "भवानन्दसम्मतः पाठः" "जगदीशासम्मतः पाठ"इत्यादि

न्यायवार्त्तिकस्यापरं व्याख्यानं न्यायसारविचारकर्त्रा श्रीराघवभट्टेन कृतं "समानादिशब्दार्थस्तु वार्त्तिकव्याख्यानावसरे स्फुटीभविष्यति" इति तत्रोक्तत्वात् । वा. रा. सं. न्यायसारविचारपुस्तके ७ पत्रे द्रष्टव्यम् ।

न्यायवार्त्तिकतात्पर्यटीकाकर्तुः
आचार्यवाचस्पतिमिश्रस्य चरितम्।

वेद-धर्मशास्त्र-पुराण-तन्त्र-व्याकरण-ज्यौतिष-छन्दो-न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्त-चिकित्साशास्त्रादौ वाचस्पतिप्रणीतास्तत्पुत्रपौत्रप्रणीता वा अनेके ग्रन्था उपलभ्यन्त इति अनेके वाचस्पतयोऽभूवन्निति नात्र सन्देहावकाशः। तत्र वाचस्पतिमिश्रा अपि अष्टौ तत्रापि दार्शनिकौ द्वौ तत्राप्याचार्यसन्मिश्रवाचस्पतिर्वा षड्दर्शनटीकाकृदाचार्यवाचस्पतिमिश्रो वा इतरव्यावर्त्तकविशेषणयुक्तत्वादेक एवेति न्यायवार्त्तिकतात्पर्यटीकाकारत्वात् प्रकृते स एव वर्णनीय इति॥

तत्र आचार्यवाचस्पतिमिश्राणां(१) महर्षिकल्पानामाविर्भावे देशकालनिर्णयाभावेऽपि गुणैकपक्षपातिनो विद्वांसो भवन्तीति ते अनेकान् सिद्धान्तान् निरूपयन्ति(२) वस्तुतस्तु

(१) तार्किकरक्षाटीकायां लघुदीपिकायां १२ पत्रे "आचार्यवाचस्पतिमिश्रा." अप्पयदीक्षितेनापि शास्त्रसिद्धान्तलेशसंग्रहे पृ. ८। २४ आचार्यवाचस्पतिमिश्राः"

(२) माधवीये शङ्करविजये वाचस्पतिमिश्रः पूर्वजन्मनि श्रीशङ्कराचार्याणां प्रधानशिष्यः पद्मपादाचार्यः शारीरकभाष्यव्याख्यां प्रणीतवान् स एव निबन्धः सुरेश्वराचार्याणां शापात् पञ्चपादिकाभिधानत्वं गतः ततश्च शङ्कराचार्यानुग्रहात् पद्मपाद एव द्वितीयजन्मनि वाचस्पतिर्भूत्वा शारीरकभाष्यव्याख्यां संपूर्णां भामतीं प्रणीतवानित्यादि निरूपितम्।

केषाञ्चिन्मते वाचस्पतिमिश्राणां पत्नी भामती। मतान्तरे कन्या भामती। अन्येषां मते नेपालप्रान्तभागे भामानामको ग्रामविशेषः। तत्र स्थितेन वाचस्पतिमिश्रेण भामती ग्रन्थो रचित इति यावत्।

आचार्यवाचस्पतिमिश्रेण सांख्यतत्त्वकौमुद्यादौ वक्ष्यमाणानि वचनानि लिखितानि ।

"मनांसि कुमुदानीव बोधयन्ती सतां सदा ।
श्रीवाचस्पतिमिश्राणां कृतिः स्तात् तत्त्वकौमुदी ॥"

तत्रैव "सर्वं चैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटीकायाम् ।" न्यायवार्तिकतात्पर्यटीकायां च ३ अध्याये २ आह्निके ३९४ पृ. "विपश्चितं चैतदस्माभिर्ब्रह्मतत्त्वसमीक्षान्यायकलिकाभ्याम्" तत्त्वबिन्दौ मुद्रितपुस्तके २३ "उपपादितं न्यायकलिकायाम्" "भामत्यां च १.८ पृ. "विस्तरस्तु ब्रह्मतत्त्वसमीक्षायाम् पृ. ७१ "उपपादितं चैतदस्माभिर्विस्तरेण न्यायकलिकायाम् ।" एवं तात्पर्यटीकायां पृ. ५७ । "तत्त्वसमीक्षायाम्" योगभाष्य-व्याख्यायां तत्त्ववैशारद्याम् ३२ सूत्रव्याख्याने "अर्थक्रिया ब्रह्मतत्त्वसमीक्षान्यायकणिकाभ्यामुपपादिता ।"

अपि च भामत्यां ग्रन्थसमाप्तौ

"यन्न्यायकलिका–तत्त्वसमीक्षा–तत्त्वबिन्दुभिः ।
यन्न्याय–सांख्य–योगानां वेदान्तानां निबन्धनैः ॥
समचैषं महत् पुण्यं तत्फलं पुष्कलं मया ।
समर्पितमथैतेन प्रीयतां परमेश्वरः ॥"

इत्युक्तनिबन्धानां कर्ता एक एव । अत एव षड्दर्शन-टीकाकारत्वेन तं व्यवहरन्ति विद्वांस इति ।

अयं वाचस्पतिमिश्रः कस्मिन् देशे आविरभूदिति विचारे मण्डनमिश्र—मुरारिमिश्र–पार्थसारथिमिश्र—सुचरितमिश्रादयो मिश्रशब्दान्ता मैथिला इति मिश्रशब्दसम्बन्धात् "तन्निषिद्धं च परिहरतां दाक्षिणात्याना"मिति तात्पर्यटीकायां ३२ पृ. दर्शनादयमपि मैथिल एवेति अनुमीयते ।

समयनिर्णये तु वक्ष्यमाणं पद्यं तत्कृतन्यायसूचीनिबन्धान्ते लिखितमुपलभ्यते ।

"न्यायसूचीनिबन्धोसावकारि सुधियां मुदे ।
श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सरे ॥"

इति न्यायसूचीनिबन्धाख्ये सूत्रपाठनिर्णायके न्यायदर्शनरहस्यार्थप्रदर्शके निबन्धे लिखितत्वात् ८९८ शाकाब्दे न्यायवार्त्तिकतात्पर्यटीकाकाराणां वाचस्पतिमिश्राणां स्थितिरासीदिति निश्चीयते । निबन्धोऽयं तात्पर्यटीकाकारेणैव कृत इति व्युत्पादितमत्रैव ३८ पृष्ठे अधिकं तु निरूप्यते । न्यायदर्शने सूत्रपाठभेदाद्बहव आचार्याः ग्रन्थद्वयं कृतवन्तः यथा उदयनाचार्यास्तात्पर्यपरिशुद्धिं न्यायपरिशिष्टं च वर्द्धमानोपाध्यायास्तात्पर्यपरिशुद्धिप्रकाशमन्वीक्षानयतत्त्वबोधं च जयन्तश्च न्यायमञ्जरीं न्यायकलिकां च विश्वनाथन्यायपञ्चाननो न्यायसूत्रवृत्तिं न्यायालोकं च तथैव वाचस्पतिमिश्रोपि न्यायवार्त्तिकतात्पर्यटीकां न्यायसूचीमपीति नैतच्चित्रम् तथा भामत्यामन्ते "न्यायसांख्ययोगानां निबन्धनै"रिति बहुवचनेन न्यायसूचीतात्पर्यटीकास्थाद्यन्तपद्ययोः प्राय ऐक्येनैककर्तृकत्वं निर्विवादमेव । वस्वङ्कवसुवत्सरे अत्र वत्सरशब्दः शाकाब्दवाचक एव इदमेव द्रढयन्ति वक्ष्यमाणानि प्रमाणानीति । तथाहि भामत्यामन्ते ।

"नरेश्वरा यच्चरितानुकार-
मिच्छन्ति कर्तुं न च पारयन्ति ।
तस्मिन् महीपे महनीयकीर्त्तौ
श्रीमन्नृगे ऽकारि मया निबन्धः ॥" इति ।

यद्यपि नृगनामानोऽनेके राजानो महाभारते भागवते

च उपलभ्यन्ते तथापि अर्वाचीननृगविषये शार्ङ्गधरपद्धत्यां विशिष्टराजवंशवर्णनप्रसङ्गे नृगनृपतिपाषाणयज्ञयूपप्रशस्तिनाम्ना पद्यद्वयं समुद्धृतम् । यथा

"आविन्ध्यादाहिमाद्रेर्विरचितविजयस्तीर्थयात्राप्रसङ्गा-
दुद्ग्रीवेषु प्रहर्षान्नृपतिषु विनमत्कन्धरेषु प्रपन्नः ।
आयुर्वित्तं यथार्थं पुनरपि कृतवान् म्लेच्छविच्छेदनाभि-
र्देवः शाकम्भरीन्द्रो जगति विजयते वीसलः क्षोणिपालः ॥
ब्रूते सम्प्रति चाउहानतिलकः शाकम्भरीभूपतिः
श्रीमान् विग्रहराज एष विजयी सन्तानजानात्मजः ।
अस्माभिः करदं व्यधायि हिमवद्विन्ध्यान्तरालं भुवः
शेषस्वीकरणाय मास्तु भवतामुद्योगशून्यं मनः ॥" इति ।

शार्ङ्गधरपद्धत्या शाकम्भरीदेशे चउहान–क्षत्रियवंशे हम्मीरराजोभूत् तत्सभायां राघवदेवपण्डितात्मजा गोपाल–दामोदर–देवदासाख्याः पण्डिता वर्तमाना आसन् । दमोदरात्मज-शार्ङ्गधरेण नृगनृपतिपाषाणयज्ञयूपस्य नाम उक्तप्रकारेण समुद्धृतम् । हम्मीरराजश्च १२९५ वैक्रमे वर्षे मृतः तत्पूर्वं ६० वर्षाणि राज्यं कृतवानिति वदन्ति ऐतिहासिकाः । अतो निष्पन्नं भवति १२३५ वैक्रमवर्षेभ्यः ११०० शाकवर्षेभ्योऽपि पूर्वं डिल्लीनगरोपकण्ठस्थितस्तम्भेऽपि १२२० विक्रमवर्षे १०८५ शाकाब्दे निरुक्तानि पद्यान्यासन्निति उक्तसमये वाचस्पतिमिश्रस्थितौ नासमञ्जसं किमपि ।

हेमाद्रिणा–वोपदेवेन च आयुर्वेदीया शार्ङ्गधरसंहिता व्याख्याता वोपदेवसमयश्च ११८२ गतशाकाब्दासन्नसमय एवेति निरुक्तसमये शार्ङ्गधरस्थितिर्न विरुद्धा ।

वर्जेसमहाशयसंगृहीते एपीग्राफिआइण्डिकापुस्तके (वा-

ल्यूम १ पेज २१९। २२० वाल्यूम २ पेज २३५) समुद्धृता-
दनुशासनपत्राशयाद्विज्ञायते

राजा कीर्तिवर्मा प्रबोधचन्द्रोदयनाटककर्ता कृष्णमिश्रश्च ईशवीय १०५० वर्षेभ्यः परं १११६ वर्षेभ्यः पूर्वमासीदिति। अपि च ईशवीय १०५० वर्षे देववर्मा १०९८ वर्षे कीर्तिवर्मा १११६ वर्षे जयवर्मा च आसीदिति यावत्।

अत्र १०२० गतशाकाब्दे वर्तमानः कृष्णमिश्रः प्रबोधचन्द्रोदये श्रीहृषीकेशशास्त्रिसंस्कृते पुस्तके पृ. ३४

"नैवाश्रावि गुरोर्मतं न विदितं तौतातिकं दर्शनम्
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा॥"

इत्युक्तवानिति न्यायसूचीनिबन्धोक्तं समयमेव द्रढयति।

केचित्तु वाचस्पतिमिश्रेण सांख्यतत्त्वकौमुद्यामन्ते "तदुक्तं राजवार्तिके" इति लिखितत्वात् राजवार्तिकग्रन्थो भोजराजेन कृत(१) इति भोजराजसमयात् पश्चात्कालभावी वाचस्पतिमिश्र इति वदन्ति तच्चिन्त्यम्।

अपि च रामानुजाचार्याः १०१२ शाकाब्दे यादवाचलपर्वते मन्दिरे नारायणमूर्त्तिं स्थापितवन्तः तैश्च श्रीभाष्ये खण्डनखण्डखाद्यस्था कारिका समुद्धृता खण्डनकाराच्च पूर्वं ९०६ शाकाब्दे उदयनाचार्याणां तात्पर्यपरिशुद्धिकाराणां स्थितिरासीदिति ८९८ शाकाब्दे वाचस्पतिमिश्राणां स्थितिर्न विरुद्धेति। रामानुजाचार्येण २।१।१४। भामत्यपि अनूदिता।

आचार्यवाचस्पतिमिश्रेण शारीरकभाष्यटीकायां भामत्यामन्ते

---

(१) राजमार्तण्डाभिधायां योगसूत्रवृत्तौ रणरङ्गमल्लनृपतेरित्युक्त्या राजवार्त्तिकग्रन्थो भोजराजकृत इति कल्पयन्ति तन्निर्मूलम्। अपि च देशभाषानिबद्धः राजवार्त्तिकनामा जैनग्रन्थोऽपि वर्तते।

यानि लिखितानि पद्यानि तदुक्तक्रमेणैव ग्रन्था रचिता इति अनुमीयते प्रथमतो मण्डनमिश्रविरचितविधिविवेकस्य टीका न्यायकलिकैव रचिता(१)अस्य ग्रन्थस्योपादानं प्रायस्तत्कृत-ग्रन्थेषु दृश्यते ततो ब्रह्मसिद्धिव्याख्या ब्रह्मतत्त्वसमीक्षा(२) ततश्च तत्त्वबिन्दुग्रन्थः(३) इदं ग्रन्थद्वयं न्यायवार्त्तिकतात्पर्यटीकायां(४)

(१) केचित्तु अमुं ग्रन्थं न्यायकणिकानाम्ना व्यवहरन्ति । वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तके "इति पूर्वकणिका समाप्ता" इति लेखोऽपि दृश्यते । ग्रन्थोऽयं काशीविद्यासुधानिधिपत्रे मुद्रितः ।

(२) ब्रह्मतत्त्वसमीक्षा मण्डनमिश्रकृतब्रह्मसिद्धेर्व्याख्या ।

(३) तत्त्वबिन्दुग्रन्थः टिप्पणसहितः पण्डितपत्रे मुद्रितोऽपि लघुत्वात् दुरूहः अस्य एका महती टीका ममान्तिके ४००० श्लोकात्मिका वर्तते ।

(४) न्यायवार्त्तिकतात्पर्यटीकायाः पुस्तकत्रयं ममान्तिके वर्तते तत्र प्रथमे पुस्तके लिपिकालोऽधोलिखितप्रकारेण लिखितोऽस्ति ।

"इति वाचस्पतिमिश्रविरचितायां न्यायवार्त्तिकतात्पर्यटीकायां प्रथमोऽध्यायः समाप्तः ।ळ॥ळ॥ळ॥ स्वस्ति संवत् ॥ १४५४ समये आश्विनवदि १० रविवासरे ॥ळ॥ ॐनमो नारायणाय॥ स्वस्ति ॥काशी करोतु कल्याणं विश्वेशः सर्वसम्पदः ॥ भवानी च जगन्माता जयं ते विदधातु च ॥ तावद्गर्जन्तु कवयः शाखायां कपयो यथा । महेशामृतचीत्कारवाणी यावन्न निःसृता ॥ छ ॥ शुभम् ॥ ॥ गर्व्वं वहन्तु भुवि भाविनि लेखकाऽत्र ? शून्याटवीमदनिरीक्षितमत्तसत्त्वाः ॥ श्रीमाधवांघ्रियुगपद्ममधुव्रतोऽपि यावत्प्रयाति न हरिर्नरसिंहनामा ॥ छ ॥"

वाराणसीस्थराजकीयसंस्कृतपाठशालीयं तु न्यायवार्त्तिकतात्पर्यटीकापुस्तकं गोरक्षशतकं च सर्वविद्यानिधानकवीन्द्राचार्य-सरस्वतीनां पुस्तकम् । अयं च १६९६ वैक्रमाब्दासन्ने समये वाराणस्यां वर्तमानः गोदावरीतटात् समायातः गोरक्ष-

समुद्धृतमिति पश्चान्न्यायवार्त्तिकतात्पर्यटीकाया निर्माणमियं टीका च सांख्यतत्त्वकौमुद्यां समुद्धृता योगभाष्यटीकायां तत्त्ववैशारद्यां तत्त्वकौमुदी समुद्धृता भामत्यां तु आदिमध्यावसानेषु सर्वे ग्रन्था उपात्ता इति ।

केचित्तु भामत्यामारम्भे

"मार्तण्डतिलकस्वामिमहागणपतीन् वयम् ।
विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥"

इति दृष्ट्वा मार्तण्डतिलकस्वामिनः शिष्यो वाचस्पतिमिश्र इति वदन्ति तन्न शास्त्रतात्पर्यानवबोधात् तात्पर्यटीकायां ८७ पृ. "अस्माभिस्त्रिलोचनगुरून्नीतमार्गानुगमनोन्मुखै"रित्युक्तत्वाच्च । प्रपञ्चितं चास्माभिर्वात्स्यायनचरिते ऽधस्तात् ।

मुम्बईनगरे द्वितीयावृत्तिमुद्रिते सटीककाव्यप्रकाशपुस्तके भूमिकायां ३१ पृ. विश्वनाथकृतकाव्यप्रकाशदर्पणे "इति वाचस्पतिमिश्रः" ४० पृ० दीक्षितभीमसेनकृतायां सुधासाराख्यायां काव्यप्रकाशटीकायां "सर्वतन्त्रविदो वाचस्पतिमिश्राः" इति प्रदर्शयता काव्यप्रकाशस्य टीका वाचस्पतिमिश्रेण कृता इति स्वकृतटीकोपोद्धाते २ पृष्ठे कल्पितम् एतच्चिन्त्यम ।

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येण सांख्यतत्त्वकौमुदीभूमिकायां निरूपितं यद्वाचस्पतिमिश्रेण खण्डनोद्धारः कृत

शतकपुस्तकं संगृहीतवान् तत्र उक्तसमय एव लिखितः । अपि च १६२७ ईशवीयवर्षात् १६५६ वर्षान्तं शाहजहांनृपतिसमयः तस्मादेव उक्ताचार्यैः काशीप्रयागयात्रिकाणां करो विमोचित इति ऐतिहासिका वदन्ति ।

अस्मन्निकटे पुस्तकमयं वर्तत इति तद्वर्णनं च कृतमधस्तात् ।

इति श्रीहर्षादर्वाचीन इति । परं तु वाचस्पतिमिश्रकृता न्यायवार्त्तिकतात्पर्यटीका उदयनाचार्येण व्याख्याता उदयनाचार्यकृता किरणावली न्यायकुसुमाञ्जलिरपि खण्डनग्रन्थे श्रीहर्षेण समुद्धृतौ पुनरपि खण्डनग्रन्थस्योद्धारो वाचस्पतिमिश्रेण कृत इति विजानाति तर्कवाचस्पतिमहाशय इति ।

अस्माभिरनुमीयते तत्त्वचिन्तामणिप्रकाशाख्यव्याख्या-न्यायतत्त्वालोकाभिधन्यायसूत्रवृत्ति-न्यायसूत्रोद्धारादिकर्त्रा नवीनवाचस्पतिमिश्रेण काव्यप्रकाशटीका खण्डनखण्डखाद्योद्धारश्च कृत(१) इति । अनेन स्वरचितग्रन्थेषु न्यायतत्त्वालोकादिषु षड्दर्शनटीकाकारो वाचस्पतिमिश्रः समुद्धृत(२) इति । अस्य समयादिनिरूपणे ।

"श्रीवाचस्पतिमिश्रेण मिथिलेश्वरसूरिणा ।
लिख्यते मुनिमूर्धन्यश्रीगौतममतं महत् ॥"
इति न्यायसूत्रोद्धारारम्भे ।
"शिवेनोरसि विधृतौ पादौ नत्वापवर्गदौ ।
व्यलेखि न्यायसूत्राख्यं चैत्रे वस्वक्षिवासवे ॥"

इति सूत्रोद्धारान्ते दर्शनात् वस्वक्षिवासवे इत्यनेन १४२८ वैक्रमे वर्षे ग्रन्थोऽयं निर्मितः सुधामधुनामाप्येको ग्रन्थो वाचस्पतिमिश्रकृतो विज्ञायते तत्र लिपिकालः १३०३ शाकाब्दो दृश्यते इत्युभयोरविरोधात् १२९३ शाकाब्देभ्यः पूर्वं मिथि-

---

(१) खण्डनोद्धारोऽपि काशीविद्यासुधानिधिपत्रे मुद्रित इति ।

(२) खण्डनोद्धारे २५ पृष्ठे "विस्तरस्तु तत्त्वालोके मयैवोक्त इतीहोपरम्यते" तत्त्वालोकाख्ये न्यायसूत्रव्याख्याने १ अ० १ आ० २१ सू० बाधनालक्षणं दुःखमित्यत्र च षड्दर्शनटीकाकृद्वाचस्पतिमिश्रः समुद्धृतः ।

लादेशे उक्तवाचस्पतिमिश्रस्य स्थितिरासीदित्यनुमीयते । विस्तरस्तु खण्डनखण्डखाद्योद्धारभूमिकायां निरूपितोऽस्माभिः ।

अपरोऽपि वाचस्पतिमिश्रो विवादचिन्तामणि-तीर्थचिन्तामणि-श्राद्धचिन्तामण्यादिधर्मशास्त्रनिबन्धकर्ता अन्योपि सिद्धान्तशिरोमण्यादिज्योतिषनिबन्धव्याख्यातुर्लक्ष्मीदासस्य पिता वाचस्पतिमिश्रो भिन्न एवेति तत्तद्ग्रन्थसमालोचनाद्व्यक्तं भविष्यतीति ॥

न्यायवार्त्तिकतात्पर्यटीकापरिशुद्धिकर्तुः

श्रीमदुदयनाचार्यस्य चरितम् ।

उदयनो(१) वा उदयनाचार्यो वा न्यायाचार्योदयनो वा उदयकरो(२) वा उदयाकरो(३) वा उदयंकरो(४) वा उदय-

---

(१) "व्यातने किरणावलीमुदयन" इति किरणावल्यामुदयनाचार्योक्त्या न्यायाचार्योदयन एव नान्यः । विस्तरस्तु अग्रे निरूपयिष्यते ।

(२) "इदमुदयकरेण न्यायलोकागमाना"मिति कलिकातामुद्रितात्मतत्त्वविवेकपुस्तकान्ते दर्शनात् स एव नान्यः । वस्तुतस्तु "तदिदमुदयनेन न्यायलोकागमाना"मित्येव पाठस्तालपत्रादिलिखितपुस्तकेषु दृश्यते ।

(३) "उदयाकरसूनुना" इति ईश्वरप्रत्यभिज्ञासूत्रग्रन्थे दर्शनात् सोऽन्यः ।

(४) "शब्देन्दुशेखरे ज्योत्स्नां प्रकरोत्युदयंकर" इत्युक्त्या नागेशभट्टादपि पश्चात्कालभावीति सुतरां भिन्नः ।

नाचार्यभादुडी(१) इत्यादिनामभिस्तद्देशीया गुणैकपक्षपातिनोऽनेकैः प्रकारैः किंवदन्त्यादिभिर्न्यायाचार्यमुदयनाचार्यं वर्णयन्ति । किं तु वैशेषिकभाष्यटीका वा प्रशस्तपादभाष्यटीका किरणावली, वैशेषिकशास्त्रसारभूता लक्षणावली, न्यायभाष्यटीकाटीकाटीका न्यायनिबन्धापरनामधेया तात्पर्यपरिशुद्धिः, बोधशुद्धिर्बोधसिद्धिर्वा न्यायपरिशिष्टाख्या न्यायसूत्रवृत्तिः, आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्च येनोदयनाचार्येण रचितः स एवेदानीं वर्णनीय इति नासौ वङ्गदेशीयो न वा दाक्षिणात्यः किं तु मैथिल इति भविष्यपुराणपरिशिष्टे भगवद्भक्तमाहात्म्ये ३० अध्याये स्पष्टमुपलभ्यते तथाहि—

अथ वक्ष्ये तृतीयस्य हरेरंशस्य धीमतः ।
उदयनाचार्यनाम्नस्तु माहात्म्यं लोमहर्षणम् ॥ १ ॥
भूत्वा स मिथिलायां तु शास्त्राण्यध्यैष्ट सर्वशः ।
विशेषतो न्यायशास्त्रे साक्षाद्वै गोतमो मुनिः ॥ २ ॥
बौद्धसिद्धान्तमुग्धान्तःसुखाय हितकारिणीम् ।

---

(१) "उदयनाचार्यभादुडी भिन्नः चाटुर्जी–वानुर्जी–गाङ्गुली–भादुडीत्याद्युपाधयस्तु वल्लालसेनेन दत्ता अस्य समयस्तु तत्कृताद्भुतसागरादिग्रन्थेभ्यः १०८९ शाकाब्दः । उदयनाचार्येण लक्षणावल्यां ९०६ शाकाब्दो ग्रन्थनिर्माणकालो लिखित एव अथ च न्यायवार्त्तिकतात्पर्यपरिशुद्धौ "अमृतस्थाने अमृत इति दाक्षिणात्यानाम्" । "गौडाः शपसाः सा इति" । अत्र गौडा वङ्गदेशीयाः एवं निन्दालिखनादुभयभिन्नत्वं निर्विवादम् । विस्तरस्तु न्या० वा० ता० परिशुद्धिभूमिकायाम् ।

वल्लालसेनस्तु १०८९ वर्षेऽद्भुतसागरग्रन्थं कृतवान् किं तु लक्ष्मणसेनस्य पुत्रो वल्लालसेनो वा वल्लालसेनस्य पुत्रो लक्ष्मणसेन इत्यादि विचारोऽग्रे समुद्भावयिष्यते ।

वितेने विदुषां प्रीत्यै विमलां किरणावलीम् ॥ ३ ॥
एकदा बौद्धसिद्धान्तान् प्रकटीकर्तुमागतः ।
बौद्धाचार्यस्तीरभुक्तौ नृपग्रामे समागतः ॥ ४ ॥
स्वशिष्यैः स्वीयशास्त्रस्य पुस्तकैर्बहुभिर्वृतः ।
राजानं प्रेषयामास दूतं दर्पवशादसौ ॥ ५ ॥
कश्चिच्छिष्यं गच्छ शिष्य मिथिलेशं वदाधुना ।
मद्वाक्यात् वेदशास्त्राभ्यां मुधा भ्रान्तोऽसि भूपते ॥ ६ ॥
निरीक्ष्य मम शास्त्राणि मत्पथानुगतो भव ।
अस्ति चेत् तव देशेऽस्मिन् वेदस्थापनकृत् पुमान् ॥ ७ ॥
तमानय मया सार्द्धं विचारं प्रकरोतु सः ।
तदा राजा तु श्रुत्वैतद्वचनं दूतभाषितम् ॥ ८ ॥
उवाच दूतं गच्छ त्वं स्वगुरुं ब्रूहि मे वचः ।
अहं भ्रान्तः स चेद् भ्रान्त इत्येवं निश्चयो महान् ॥ ९ ॥
आगच्छ सदसि प्रातः स ते व्यक्तिर्भविष्यति ।
इत्युक्तः स गतो दूतः प्राह सर्वं नृपोदितम् ॥ १० ॥
गुरवे स तु शृण्वन् वै जहासातिमदान्वितः ।
अथ राजा तत्क्षणात्तु देशस्थान् पण्डितान् बहून् ॥ ११ ॥
श्रीमदुदयनाचार्यमुख्यानानाय्य चोक्तवान् ।
अहोऽयं नास्तिको ग्रामे समायातोऽतिपण्डितः ॥ १२ ॥
अनेन विवदध्वं वै यूयं यदि स चेज्जयेत् ।
तदाहं च भवन्तश्च सर्वे तन्मतगामिनः ॥ १३ ॥
भविष्यामो न सन्देहो भवतां चेज्जयो भवेत् ।
तदाहं भवतां दास्यं करिष्यामि न संशयः ॥ १४ ॥
इत्युक्तवास्ते तु विद्वांसः सर्वे तूष्णीं स्थिता अथ ।
श्रीमदुदयनाचार्यस्तेषां मध्येऽब्रवीन्नृपम् ॥ १५ ॥

सत्यमात्थ महाराज शृणु किञ्चिन्मयोदितम् ।
जयः पराजयो वापि श्रीहरेरिच्छया नृणाम् ॥ १६ ॥
यथाशक्ति विवादं तु करिष्यामि न संशयः ।
त्वं तु चिन्तां परित्यज्य पश्यास्माकं पराक्रमम् ॥ १७ ॥
इत्युक्त्वा नृपतिग्राम तस्थुः सर्वेऽथ पण्डिताः ।
द्वितीये दिवसे प्राप्ते राजा सदसि चागतः ॥ १८ ॥
आहूय पण्डितान् सर्वान् तं चापि जिनशास्त्रिणम् ।
उवाच युवयोरस्तु विचारः पश्यतो मम ॥ १९ ॥
इति राजवचः श्रुत्वा नास्तिकः पूर्वमब्रवीत् ।
अहो विचार उभयोः स नो भवितुमर्हति ॥ २० ॥
नैते वै सत्पथारूढाः किं वदिष्यन्ति मामिह ।
इति श्रुत्वा वचस्तस्य नास्तिकस्य दुरात्मनः ॥ २१ ॥
उवाचोदयनाचार्यो मतं तन्मतखण्डनम् ।
एवं बहुदिनान्यासीद्विचारः सुमहाँस्तयोः ॥ २२ ॥
तदा बौद्धो हृदा मत्वाचार्यान्निजपराजयम् ।
मायां विस्तारयामास महाश्चर्यप्रदायिनीम् ॥ २३ ॥
उवाच नृपतिं राजन् सर्वे ऽमी मद्विरोधिनः ।
न कोपि मद्धितं ब्रूते तस्मादेकं वदाम्यहम् ॥ २४ ॥
शालग्रामशिलायां तु सत्यमेषां स्थितो हरिः ।
तामानयात्र स्वमतैः खण्डयामि शिलामहम् ॥ २५ ॥
यदि सा जलवद् भूत्वा स्याददृश्या शिला पुनः ।
तदा मदुक्तं सत्यं स्यादथ चेत् तां पुनः स तु ॥ २६ ॥
आचार्यो जलवत् कृत्वा शिलां व्यक्तां करिष्यति ।
तदास्यापि मतं सत्यं मन्येऽहं नात्र संशयः ॥ २७ ॥
इत्युक्तः स नृपस्तेन बौद्धेनाथ महीपतिः ।

ददर्शोदयनाचार्यं किं वदत्येष नास्तिकः ॥ २८ ॥
इत्युक्तो भूमिपतिना प्राहाचार्योतिहृष्टवत् ।
इदं तु मायाचरितं तथापि स्वीकरोम्यहम् ॥ २९ ॥
मायामपि च जानामि परं त्वेकं ब्रवीम्यहम् ।
जातायां च पुनस्तस्यां शिलायां तन्मतद्वयम् ॥ ३० ॥
सत्यं चेति वदिष्यन्ति भ्रान्त्या सर्वे सभासदः ।
तस्मादेकमहं वक्ष्ये सत्यमिथ्याविचारणे ॥ ३१ ॥
तत्करिष्यत्ययं चेद्वै करिष्ये स्वोक्तमप्यहम् ।
इति श्रुत्वा ततो राजा जैनाचार्यं ददर्श ह ॥ ३२ ॥
ततो जैनः स्वयं प्राह करिष्याम्यस्य भाषितम् ।
* * * * * * * ॥ ३३ ॥
इति श्रुत्वा ततो राजा शालग्रामशिलां दृढाम् ।
आनाय्य स्थापयामास स्वर्णस्थाल्यां शुचौ भुवि ॥ ३४ ॥
ततो बौद्धोऽब्रवीत् स्वीयं मतं दृष्ट्वा तु तां शिलाम् ।
अथ क्षणेन सा सर्वा शिला जलमभूत् तदा ॥ ३५ ॥
ततोर्द्धक्षणतस्तद्वै जलमन्तर्बभूव ह ।
पश्यतां सर्वलोकानां महाचर्यमभूदिदम् ॥ ३६ ॥
ततस्तूदयनाचार्यो बौद्धसिद्धान्तखण्डनम् ।
स्वमतं प्राह शीघ्रं तज्जलं प्रादुर्बभूव ह ॥ ३७ ॥
तत्क्षणेन च तद्वारि सा शिला समपद्यत ।
ततो राजादयः सर्वे साधुसाध्वितिवादिनः ॥ ३८ ॥
प्रशशंसुश्च तं भक्त्योदयनाचार्यमादरात् ।
आचार्यस्तु तदा प्राह कथमेषा स्तुतिर्मम ॥ ३९ ॥
स्थित एव मते ह्यस्य तस्मात् कुरु मदीरितम् ।
इत्युक्त्वा नास्तिकं प्राह मयाकारि तवेरितम् ॥ ४० ॥

अतः परं मतं कस्यं सत्यं मिथ्येति निश्चिनु ।
मया यदुच्यते तेन प्रकारेण नृपाग्रतः ॥ ४१ ॥
एष तालद्रुमो द्वारि तिष्ठत्यतिमहानहो ।
तमारुह्य पतिष्यावो यः स्थास्यति स सत्यवाक् ॥ ४२ ॥
वेदाः प्रमाणमित्युक्त्वा निपतिष्याम्यहं भुवि ।
त्वं तु वेदा अप्रमाणमित्युक्त्वा निपताधुना ॥ ४३ ॥
युगपत् पततोर्वृक्षाज्जीविष्यति य आवयोः ।
स सत्यवाग्मतं तस्य सत्यं लोकस्तुतं भवेत् ॥ ४४ ॥
एवमाचार्यवचनं श्रुत्वा सोऽपि जहर्ष च ।
स्वीचकार ततो राजा तावुभावब्रवीद्वचः ॥ ४५ ॥
अहो प्राणान्तकी चेयं परीक्षा नैव शोभना ।
तस्माद्विरमतामत्र युवामेतद्विचारतः ॥ ४६ ॥
इति राजवचः श्रुत्वा उदयनाचार्य आहृतम् ।
तव नास्त्यत्र किञ्चिद्वो दूषणं नैव घातकम् ॥ ४७ ॥
स्वशास्त्रभक्तितश्चावां करिष्यावो यथारुचि ।
त्वमेकस्मिन्मृते चास्मिन् मयि वा नृपसत्तम ॥ ४८ ॥
तन्मतं च परित्यज्य जीवन्मतपरो भव ।
किं च यावन्ति ते राज्ये पुस्तकानि च तानि वै ॥ ४९ ॥
जले प्रक्षिप ये चैतच्छास्त्रोपासनकारकान् ।
तान् दण्डयित्वा यो जीवेद्दावयोस्तन्मतानुगान् ॥ ५० ॥
कुरुष्वेत्यस्मदुक्त्या वै प्रतिज्ञां कुरु भूपते ।
इत्युक्तो नृपतिर्जैनाचार्यस्य मुखमैच्छत ॥ ५१ ॥
एवमेवाब्रवीत् सोऽपि प्रतिजज्ञे नृपस्तदा ।
तत उत्थाय ते सर्वे आगतास्तालसन्निधौ ॥ ५२ ॥
वंशादिनाथ तौ द्वौ तमारुह्योच्चैर्महातरुम् ।

वेदाः प्रमाणमित्युक्त्वा आचार्यो न्यपतद् भुवि ॥ ५३ ॥
बौद्धो वेदा अप्रमाणमित्युक्त्वा निपपात ह ।
आचार्यो निपतन्भूमौ वेदैः संरक्षितः सुखम् ॥ ५४ ॥
मन्दंमन्दं समागत्य तस्थौ वेदं हरिं स्मरन् ।
जैनाचार्यः पतन्मार्गे भ्राम्यमाण उपर्यधः ॥ ५५ ॥
परिवर्तितशीर्षो हि पपात धरणीतले ।
व्यस्तमस्तकनाह्यङ्घ्रिर्निष्प्राणो न्यपतत् खलु ॥ ५६ ॥
इति दृष्ट्वा महाश्चर्यं सर्वे राजादयो जनाः ।
आचार्यं प्रशशंसुस्ते नमस्कृत्य मुहुर्मुहुः ॥ ५७ ॥
ततो राजा वेदशास्त्रं सत्यं मत्वातिभक्तितः ।
स्वराज्ये स्थापयामास तदाचारपरः स्वयम् ॥ ५८ ॥
भूत्वा चकार राज्यं स सर्वधर्मसमन्वितः ।
नास्तिकस्य च यान्यासन् शास्त्राणि पृथिवीतले ॥ ५९ ॥
तानि सर्वाणि चिक्षेप जले ये तदुपासकाः ।
तान् सर्वान् दण्डयित्वा स चकारास्तिकसंमतान् ॥ ६० ॥
श्रीमदुदयनाचार्यं चक्रे राजगुरुं नृपः ।
जीविकार्थं ददौ ग्रामान् स्वयमाज्ञापरोऽभवत् ॥ ६१ ॥
एकदोदयनाचार्यो जगन्नाथदिदृक्षया ।
पुरुषोत्तमपुरे गत्वा स्नात्वा तत्तीर्थवारिणा ॥ ६२ ॥
मार्कण्डेयह्रदाद्येन मन्दिरद्वारमागतः ।
देवं द्रष्टुं मन्दिरान्तः प्रवेष्टुं चलितो यदा ॥ ६३ ॥
तदा कपाटः संलग्नः स्वयमेव निरीक्ष्य सः ।
द्वारान्तरमुपायातस्तदाप्येवं बभूव ह ॥ ६४ ॥
अथ तृतीये द्वारे तु संप्राप्तः स यदा द्विजः ।
तत्रापि स कपाटस्तु स्वयं लग्नः पुनश्च सः ॥ ६५ ॥

चतुर्थं द्वारमागत्य मन्दिरं गन्तुमुद्यतः ।
तमप्यपश्यत् संलग्नं कपाटं द्वयमेव हि ॥ ६६ ॥
इति कौतुकमेतत् तु पश्यन्तस्ते जनाः स्थिताः ।
तदा तूदयनाचार्यः सस्मितं वाक्यमब्रवीत् ॥ ६७ ॥
जगन्नाथ सुरश्रेष्ठ भक्त्यहङ्कारपूर्वकम् ।
ऐश्वर्यमदमत्तोसि मामवज्ञाय वर्त्तसे ॥ ६८ ॥
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः ।
इत्येवमुक्ते श्लोके तु सहसोद्घाटिताः स्वयम् ॥ ६९ ॥
कपाटास्तत्क्षणादेव नृणां चित्रं तु पश्यताम् ।
ततस्तत्र स्थिता येषु जगन्नाथस्य पूजकाः ॥ ७० ॥
ते सर्वे विनयात् तं तु गृहीत्वाचार्यमादृताः ।
नीत्वाथ मन्दिरे देवं दर्शयन्ति स्म हर्षिताः ॥ ७१ ॥
सोऽपि दृष्ट्वा जगन्नाथं संपूज्य स्तुतिभिर्मुहुः ।
स्तुत्वा जप्त्वा समभ्येत्य बहिर्दत्वा धनानि च ॥ ७२ ॥
उषित्वा कतिचिद्रात्रीः समायातुमथोद्यतः ।
अथ स्वप्ने जगन्नाथः पूजकब्राह्मणान् स्वयम् ॥ ७३ ॥
उवाच मम यच्चास्ति पीताम्बरमनुत्तमम् ।
तद्देह्युदयनाचार्यायाशु सोऽतीव मे प्रियः ॥ ७४ ॥
ममैवांशो न सन्देहो ऽनेनैव स्थापितोऽस्म्यहम् ।
तिरस्कृतो महामूढबौद्धसिद्धान्तवादिभिः ॥ ७५ ॥
इति दृष्ट्वा तु ते स्वप्नं पूजकाः प्रातरुत्थिताः ।
परस्परं स्वप्नमध्ये मन्त्रयित्वातिभक्तितः ॥ ७६ ॥
पीताम्बरं समानीय जगन्नाथाज्ञया ददौ ।
आचार्याय ततः सोऽपि धृत्वा तन्निजमस्तके ॥ ७७ ॥
प्रणनाम मुहुर्देवं जगन्नाथं मुदा द्विजः ।

एवं ततो जगन्नाथप्रसादं प्राप्य स द्विजः ॥ ७८ ॥
मिथिलामाजगामाशु निजमन्दिरमुत्तमम्।
तत्र शिष्योपशिष्यैश्च सेवितः परमादरात् ॥ ७९ ॥
अध्यापयामास मुहुः सर्वशास्त्राणि यत्नतः।
अधीत्य तस्मादाचार्याद्द्विदशास्त्राणि सर्वशः ॥ ८० ॥
धर्मं संस्थापयामासुर्देशेदेशेतिपण्डिताः।
अद्यापि मिथिलायां तु तदन्वयभवा द्विजाः ॥ ८१ ॥
विद्वांसः शास्त्रसम्पन्नाः पाठयन्ति गृहेगृहे।
स तु कालेन महता वृद्धो भूत्वा जरातुरः ॥ ८२ ॥
काशीमागत्य कतिचित् स्थित्वा तत्र दिनानि च।
मणिकर्ण्यां ब्रह्मनाले प्राणांस्तत्याज लीलया ॥ ८३ ॥
प्रातः पुरातनं देहं वैष्णवं सुरदुर्लभम्।
एवं सोदयनाचार्यो बभूव पृथिवीतले ॥ ८४ ॥
धर्मसंस्थापनार्थाय नास्तिकानां निवृत्तये।
शृण्वन् चरितमेतस्य नरो बुद्ध्या महीयते ॥ ८५ ॥

इति भविष्यपुराणपरिशिष्टे उदयनाचार्यचरितं नाम
त्रिंशोऽध्यायः ॥ ३० ॥

इत्थं स्थूलेन प्रकारेणोदयनाचार्याणां देशकालस्थितीनां निर्णयो भवति सूक्ष्मेन प्रकारेण तु तत्कृतलक्षणावलीग्रन्थान्तस्थेन श्लोकेन

"तर्काम्बराङ्कप्रमितेष्वतीतेषु ९०६ शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥"

इत्यनेन ९०६ शाकवर्षे तेषां स्थितिरासीदिति नि-

ष्पन्नं भवति । शकान्तत इत्युक्त्या शाकवर्ष एव ग्राह्यो यथो-
क्तमत्रैव भूमिकायां १०४ पृ. सिद्धान्तशिरोमणिगणिताध्या-
यस्थं भास्कराचार्यवाक्यम्

"शकनृपस्यान्ते कलेर्वत्सराः ।" इत्यादि ।

अस्मन्निकटे तार्किकरक्षाटीकाया ज्ञानपूर्णकृतायाः पु-
स्तकं १३२४ शाकवर्षे लिखितं वर्तते । टीकाग्रन्थे च उ-
दयनाचार्यस्य नाम समुद्धृतम् । ज्ञानपूर्णश्च विष्णुस्वामिनः
शिष्यः । अपि च ११९९ विक्रमवर्षे १०६४ शाकवर्षे कु-
मारपालस्य राज्ञो राज्याभिषेकोऽभूत् तस्मिन्नेव समये
मध्वाचार्य आसीदिति आर्यविद्यासुधाकरे निरूपितम् मध्वा-
चार्यात्पूर्वं विष्णुस्वाम्यासीदिति भगवद्भक्तमाहात्म्ये ३१
अध्याये निरूपितमित्यनेन ९०६ शाकाब्दे उदयनाचार्य-
स्थितिर्न विरुद्धा ।

अपि च ११६४ शाकाब्दे लिखिता नैषधचरितटी-
का नेपालदेशे वर्तत इति तत्रत्यलिखितपुस्तकसूचीपत्रे भूमि-
कायां ३२ पृ० निरूपितम् ।

अन्यच्च

"युग्माश्वाङ्कैर्निरुक्ते ९७२ शकनृपतिसमे कान्यकुब्जेश्वरस्य
आदेशं प्राप्य यत्नान्नलचरितमहाकाव्यटीकां व्यधत्त ।
सूरिर्भूदेवसञ्ज्ञो दिनमणितनयः कूर्मपूर्वागजन्मा
तुष्यात् तेनान्तरात्मा त्रिभुवनजनकोमापतिश्रीमहेशः ॥"इति ।

इत्युक्तनैषधचरितटीकाभ्यां ९७२ शाकवर्षेभ्यः पूर्वं
नैषधचरितकर्त्तुः श्रीहर्षस्य स्थितौ सत्यामेव खण्डनखण्ड-
खाद्यग्रन्थे "शङ्का चेदनुमास्त्येवे"त्यादिकुसुमाञ्जलिकारि-
कोद्धारे ९०६ शाकाब्दे उदयनाचार्यस्थितौ नासम-

ऋसं किमपि(१) ।

(१) अत्रान्येषामैतिहासिकानां मतानि वर्तन्ते । "श्रीहर्षकविः श्रीहीरपण्डितात् मामल्लदेव्यां समजनि । पूर्वस्यां वाराणस्यां(१) पुरि गोविन्दचन्द्रो नाम राजा तत्पुत्रो विजयचन्द्रः तत्पुत्रो जयन्तचन्द्रः जयन्तचन्द्रस्य पुत्रो मेघचन्द्रः तस्य राज्ञो बहवो विद्वांसः तत्रैको हीरनामा विप्रः तस्य नन्दनः श्रीहर्षः सोऽपि बालावस्थः सभायां राजकीयेनैकेन पण्डितेन वादिना हीरो राजसमक्षं जित्वा मुद्रितवदनः कृतः ।

इत्यादि सर्वं राजशेखरसूरिणा १३४८ खीष्टाब्दे विरचिते प्रबन्धकोशे श्रीहर्षविद्याधरजयन्तचन्द्रप्रबन्धात् गौडदेशीय इत्यवगम्यते ।

प्राचीनलेखमालायां २३ लेखे सं० १२४३, २२ लेखे जयचन्द्रयौवराज्यदानपत्रं सं० १२२५ लिखितः इत्थं च जयन्तचन्द्रस्य द्वादशखीष्टशतके स्थितिनिश्चयान्नैषधीयचरितकर्तुः श्रीहर्षस्यापि तदैव स्थितिर्निश्चिता । अत एव जयन्तचन्द्रपितृविजयचन्द्रवर्णनात्मकमेव विजयप्रशस्तिरचनातातस्य इति पञ्चमसर्गसमाप्तिश्लोके स्वकीयविशेषणध्वनितविजयप्रशस्तिनामकं काव्यं भवेत् । अस्मिँश्च विषये बहूनां विसंवादं प्रदर्श्य तत्खण्डनपूर्विका डाक्तरबुलरसंमतिरपि तथाहि तदीयं रायल् एशियाटिक् सासाइटी बांबे व्रांच इति नामभूषितविद्वत्सभया १८७५ खीष्टाब्दे प्रकाशिते प्रबोधनग्रन्थे पृ० २७९-२८७ मुद्रितं व्याख्यानम् ।

अयं जयन्तचन्द्रो जयचन्द्र एव यः किल राठौरवंशीयानां कान्यकुब्जाधिपानामन्तिमो वाराणस्यधिपतिर्बभूव यं च खीष्टस्य ११९५ वर्षे यवना राज्यात् प्रसह्य प्रभ्रंशयांचक्रुः ।

श्रीमान् काशीनाथस्त्र्यम्बकसूनुस्तैलङ्गः कुसुमाञ्जलिकर्तुरुद-

(१) कान्यकुब्जेश्वरत्वेपि काश्यादितीर्थाधिपतित्वमपि तदीयताम्रपत्रादवगम्यते । किं तु ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरादित्यनेनात्र विजयचन्द्र एव ग्राह्य इत्यत्र प्रमाणं राजशेखर एव जानाति ।

उदयनाचार्येण न्यायवार्त्तिकतात्पर्यपरिशुद्धौ २ अध्याये २ आह्निके "प्रपञ्चितोऽस्माभिस्तु न्यायकुसुमाञ्जलाविति" इति।

तत्रैव ३ अ. १ आ. "विद्यासन्ध्योदयोद्रेका"दित्यादि-

यनाचार्यस्य समयं(१) निरूपयन् प्रसङ्गतः श्रीहर्षस्यापि समयविवेकमन्वबध्नात् तत्रादर्शयत् श्रीहर्षः खीष्टस्य नवम्यां दशम्यां वा शताब्द्यां बभूव न तु द्वादश्याम।

अहमदावादसमीपे ढोलकाग्रामे चाण्डुपण्डितेन १३५३ संवत्सरे(२) नैषधटीका व्यरचि। तत्रैवं दृश्यते पङ्क्तिः "प्रथमं तावत्कविर्जिगीषुकथायां स्वपितृपरिभावुकमुदयनमत्यमर्षणतया कटाक्षयंस्तद्ग्रन्थानुद्ग्रन्थयितुं खण्डनं प्रारिप्सुः" इत्यादि

केचित्तु "विजयप्रशस्तिरचनातातस्य" इति नैषधचरितपञ्चमसर्गान्तश्लोकदर्शनात् "ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरा"दित्यादिदर्शनाच्च ताम्रपत्रोपात्तस्य कान्यकुब्जाधिपतेर्विजयचन्द्रदेवस्य संवत् १२२५ वर्षे जयचन्द्राय यौवराज्यं दत्तवत उक्तसमयात्पूर्वं स्थायी कान्यकुब्जश्च श्रीहर्ष इति वदन्ति तत्तुच्छम् "गौडोर्वीशकुलप्रशस्तिभणिती"ति ७ सर्गान्ते दर्शनात् वङ्गदेशीयोऽपि सम्भवति। विजयचन्द्रनाम्नैव तत्समयावस्थायी चेत् इण्डियन् अण्टिक्वेरीसञ्ज्ञके पत्रे सन् १८८६ मईमासमुद्रिते पृष्ठे १४१ मुद्रिते ताम्रपत्रे श्रीहर्षेण प्रयुक्तस्य शासनस्य स्थिरायतेः इतिदर्शनात् तात्कालिकोऽपि श्रीहर्षो भवेत् तत्ताम्रपत्रं तु ७९४ खीष्टाब्दे लिखितमिति॥"

(१) इण्डियन् अण्टिक्वेरी प्रथमपुस्तके २९७ पृ० ३५३ पृ. द्वितीयपुस्तके ७१ पृ० च।

(२) तदीयसमाप्तौ श्लोकः

श्रीविक्रमार्कसमयाच्छरदामथत्रि-
पञ्चाशता समधिकेष्वितेषु ?।
तेषु त्रयोदशसु भाद्रपदे च शुक्ल-
पक्षे त्रयोदशतिथौ रविवासरे च॥

पद्यं लिखितम् इदमेव पद्यं किरणावल्यामारम्भेऽपि ।

अपि च "अपसिद्धान्तस्तु यथा विरोधाद्भिद्यते तथा तत्रैव वक्ष्यते । शेषं परिशिष्टे ।" इति ।

किरणावल्यां "विस्तरस्तु न्यायकुसुमाञ्जलावात्मतत्त्ववि-वेके चानुसन्धेयः ।" इति ।

तात्पर्यपरिशुद्धि-किरणावल्युक्तमेव "विद्यासन्ध्योदयोद्रे-का"दित्यादिपद्यं लक्षणावल्याम् ।

प्रबोधसिद्धिर्बोधसिद्धिर्बोधशुद्धिर्न्यायपरिशिष्टं चेत्येकस्यैव ग्रन्थस्य नामभेदा इति वरदराजाचार्येण तार्किकरक्षायां ३१० पृ. निरूपितमिति उक्तस्य निबन्धषट्कस्यैककर्तृकत्वं निर्विवादम् ।

त्रिदण्डिवेदान्तिनो वदन्ति उदयनाचार्याणामात्मतत्त्ववि-वेकेऽन्ते "अत एव त्रिदण्डिवेदान्तिमतोपसंहार" इत्याद्युक्त्या प्रपन्नामृतग्रन्थेन १०१२ शाकाब्दे रामानुजाचार्याणां स्थिति-सिद्धौ तत एव त्रिदण्डिवेदान्तिमतप्रचारात् तत्कालपूर्ववर्त्तित्वा-सम्भवाल्लक्षणावल्युक्त ९०६ शाकाब्दे उदयनाचार्याणां स्थिति-र्न सम्भवतीति । तन्न रामानुजाचार्येभ्योऽपि बहुपूर्ववर्तिन-ष्टङ्क-द्रमिण-गुहदेव-भारुच्यादयोऽपि विशिष्टाद्वैतवादिन एक-दण्डी त्रिदण्डी वेति मनुस्मरणात् त्रिदण्डिवेदान्तिमतस्यापि चि-रन्तनत्वादिति ।

अपि च सुरेश्वराचार्येण बृहदारण्यकवार्त्तिके ५ ब्राह्मणे ३ अध्याये "सात्रिदण्डवदि"त्युक्तत्वात् शङ्कराचार्याणामपि समये त्रिदण्डिमतसत्त्वात् शङ्कराचार्यात् पश्चात्कालवर्त्तिनो वाचस्प-तिमिश्रस्य पश्चात् कालवर्त्तिन उदयनाचार्यस्य त्रिदण्डिमतो-पन्यासे नासमञ्जसं किमपि । सम्प्रदायधूर्वहत्वेन रामानुजाचार्य-परत्वे तत्राग्रहश्चेत् तदा क्लिष्टकल्पनया निर्वाहो भवितुमर्हति तथा

हि १०१२ शाकाब्दोऽन्त्यसमयो १२० वर्षपरिमितपरमायुषां रामानुजाचार्याणां ८९२ शाकाब्दे जन्मसिद्धौ लक्ष्मणाब्दयुक्त ९०६ शाकाब्दात् परमपि उदयनाचार्याणां स्थितिसम्भवादिति ।

यच्चोक्तं पञ्चरत्ने ।

"ख्यातो गोवर्द्धनाचार्य उमापतिधरस्तथा ।
शरणो जयदेवश्च धोयी कविनृपः क्रमात् ॥
राज्ञो लक्ष्मणसेनस्य पञ्चरत्नानि संसदि ॥" इति ।

गोवर्धनाचार्येण शृङ्गारसप्तशत्यामन्ते ।

"उदयनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां मे ।
द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्मलीकृत्य ॥

अत्रोदयन उदयनाचार्य इति व्यङ्ग्यार्थसन्दीपनाख्ये सप्तशतीव्याख्याने आनन्दपण्डितेन व्याख्यातम् ।

एतेन उदयनाचार्यो लक्ष्मणसेनस्य राज्ञः सभायामासीदिति निष्पन्नम् । लक्ष्मणसेनश्चातिप्रसिद्धो राजाभूदिति तत्संवत्सरश्च ल० सं० इत्याकारेण मिथिलादेशीयलिखितपुस्तकादिषु दृश्यते तत्संवत्सरप्रवृत्तिकालविषये उक्तं गणकैर्देशभाषया ।

"शाके सो सन् जानब सोई । रहित बाणशशिबाण ५१५ जो होई ।
जासन् जमा रहै सो देखहु । शरशशिबाण५१५हीन कर लेखहु ॥
बाकी रहै सो ल० सं० प्रमान । गुरु ज्ञानीजन भाषाभान ।
अरु चौपट् एकादश दीजै । ल० सं० सहित संवत् कर लीजे ॥"इति ।

इत्यनेन १०२९ शाकाब्दे लक्ष्मणसेनसंवत्सरप्रवृत्तिः सम्भवति । अथ च "मैथिलकोकिलविद्यापति"नामके पुस्तके ११ पृष्ठे समुद्धृते दानपत्रे ल० सं० २९३ शाके १३२१ इति लिखितत्वात् स एव समयः समायाति । किन्तु वल्लालसेनकृताद्भुत-

सागरे ग्रन्थनिर्माणकालः १०८१ शाकाब्दो लिखितस्तत्र लक्ष्मणसेनस्यापि नाम वर्तत इति ६० वर्षपरिमितकालान्तरे लक्ष्मणसेनवल्लालसेनयोः स्थितेर्नासम्भवः परन्तु लक्ष्मणसेन एव पूर्वपुरुषः आनन्दभट्टेन वल्लालसेनचरिते वल्लालसेनस्य पुत्रो लक्ष्मणसेन इति प्रतिपादितं तत्र लक्ष्मणसेन इत्यत्र लवणसेन इति पुस्तकान्तरे पाठदर्शनात् लक्ष्मणसेनश्च पूर्वपुरुष इत्यत्र नासमञ्जसं किमपि ।

तथा च लक्षणावल्युक्त ९०६ शाकाब्दे वर्तमान उदयनाचार्यः १०२९ शाकाब्दासन्ने समये वा १०२९ शाकाब्दात् परं १०८१ शाकाब्दात् पूर्वं ६० वर्षाभ्यन्तरेऽपि आसीदित्यसम्भवाल्लक्ष्मणसेनसंसदि वर्तमानो गोवर्धनाचार्यस्य भ्राता भिन्न एवोदयनाचार्य इति ।

एवं गोवर्धनाचार्यस्य भ्राता बलभद्रोऽपि भिन्नः पद्मनाभमिश्रस्य पिता बलभद्रो भिन्न एव अनेन किरणावलीभास्करे वर्द्धमानोपाध्यायस्य नाम समुद्धृतमिति प्रतिपादितमस्यामेव भूमिकायां १२ पृष्ठे ।

एवं गीतगोविन्दटीकाकार उदयनाचार्यः कश्चिदन्य एव गीतगोविन्दकर्तुर्जयदेवस्य रजनीकान्तगुप्तमहाशयेन १३०० शाकाब्दे पण्डितपत्रमुद्रितप्रसन्नराघवनाटकभूमिकायां पण्डितगोविन्ददेवशास्त्रिणा च स्थितेर्निर्द्धारणात् गीतगोविन्दटीकाकर्तुः तत्पश्चात्कालभावित्वात् ।

अपरोऽपि वत्सराजापरनामधेय उदयनः सुतरां भिन्नस्तत्कथा च विष्णुपुराणे ४ अंशे २१ अध्याये कथासरित्सागरेऽपि निरूपिता इति ॥

न्यायनिबन्धप्रकाशकर्तुः श्रीवर्द्धमानोपाध्यायस्य चरितम् ।

वर्द्धमाननामानोऽपि अनेके पण्डिता अभूवन् परं तु न्यायनिबन्धप्रकाशकर्ता एवेदानीं प्राधान्येन निरूपणीयः । तथाहि न्यायनिबन्धप्रकाशान्ते

"यस्तर्कतन्त्रशतपत्रसहस्ररश्मि-
गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्मात्मजः पितुरधीत्य निबन्धमित्थं
प्राकाशयत् कृतिमुदे बुधवर्द्धमानः ॥" इति
कुसुमाञ्जलिप्रकाशादावपि
"न्यायाम्भोजपतङ्गाय मीमांसापारदर्शिने ।
गङ्गेश्वराय गुरवे पित्रे ऽत्रभवते नमः ॥" इति

तत्त्वचिन्तामणौ च

" गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम्"

एतावता निष्पन्नं भवति दिगन्तविश्रान्तकीर्तेस्तत्त्वचिन्तामण्यादिकर्तुः श्रीगङ्गेशोपाध्यायस्य पुत्रः शिष्यश्च वर्द्धमानोपाध्याय इति । गङ्गेशोपाध्यायश्च कस्मिन् देशे कस्मिन् काले आविरभूदितीदानींपर्यन्तं तदीयोपलभ्येषु ग्रन्थेषु नोपलभ्यते किन्तु तत्त्वचिन्तामणावनुमानपरिच्छेदे "इति खण्डनकारमतमपास्त"मित्युक्त्वा श्रीहर्षसमयात् पश्चात्कालभावी १२९३ शाकाब्दे सुधामधुनिबन्धकर्त्रा वाचस्पतिमिश्रेण तत्त्वचिन्तामणिग्रन्थस्य व्याख्यातत्वादुक्तशाकाब्दपूर्वकालभावीति नात्र सन्देहः ।

अपि च १४०० ईशवीयवर्षे १३२२ शाकाब्दे वर्तमानस्य मैथिलकोकिलविद्यापतेः पक्षधरमिश्रापरपर्यायस्य तत्त्वचिन्तामण्यालोककारस्य जयदेवमिश्रस्य पितृव्याद्धरिमिश्राद्विद्यासम्पादनं तमेव समयं द्रढयति।

अपि च मिथिलादेशाधिपतेर्महेशठक्कुरस्य भ्राता मेघठाकुरापरपर्यायो भगीरथठक्कुरो विंशाब्दवयस्को जयदेवमिश्रात् संपूर्णं न्यायशास्त्रमधीतवानिति तत्कृतकिरणावलीप्रकाशप्रकाशिकाग्रन्थादवगम्यते तथाहि

"यः कैशोरे विश्वविख्यातकर्मा
धर्माचार्यः श्रीमहादेवशर्मा।
तत्सोदर्यो वर्द्धमानस्य सूक्तौ
भावं मेघः सम्यगाविष्करोति॥"

"विंशाब्दे जयदेवपण्डितकवेस्तर्काब्धिपारं गतः
श्रीमानेष भगीरथः समजनि श्रीचन्द्रपत्यात्मजः।
श्रीधीरातनयेन तेन रचिता श्रीमन्महेशाग्रज-
श्रीदामोदरपूर्वजेन जयतादाचन्द्रमेषा कृतिः॥"

अन्यच्च

आसीत् पण्डितमण्डलाग्रगणितो भूमण्डलाखण्डलो
जातः खण्डवलाकुले गिरिसुताभक्तो महेशः कृती।
शाके रन्ध्रतुरङ्गमश्रुतिमहीसंलक्षिते १४७८ हायने
वाग्देवीकृपयाऽथ येन मिथिलादेशः समस्तोऽर्जितः॥

पद्यमिदं मिथिलायां जनकपुरस्थानात् पञ्चक्रोशान्तर ईशानभागे धनुःपूक्षेत्रे (धनुखा) कूपे प्रस्तरपट्टे लिखितमस्ति।

तत्रान्यान्यपि पद्यानि सन्ति ।

इत्यनेन १४७८ शाकाब्दे विद्याविभवसम्पन्नेन महेशठक्कुरेण वृद्धावस्थायां मिथिलाराज्यं प्राप्तम् तथा च भगीरथठक्कुरेण २० वर्षवयस्केन वृद्धादेव जयदेवपण्डितकवेः न्यायशास्त्रमधीतमिति १३७८ शाकाब्देऽपि जयदेवस्थितिः(१) सम्भवतीति १२९३ शाकाब्दादपि पूर्वकालभावी गङ्गेशोपाध्याय इति नासम्भवी तस्मिन्नेव काले वर्द्धमानोपाध्यायोऽप्यासीदिति ।

पाँजीपुस्तकाल्लोकप्रसिद्ध्या च वर्द्धमानोपाध्यायो मैथिल एव अनेनैव न्यायवार्त्तिकतात्पर्यपरिशुद्धिप्रकाशापरपर्यायन्यायनिबन्धप्रकाश—न्यायपरिशिष्टप्रकाश—न्वीक्षानयतत्त्वबोधादयो ग्रन्था रचिता इति प्रतिपादितमधस्तात् । तत्पित्रा लोकोत्तरविद्याविभवबुद्धिशालिना महर्षिकल्पेन श्रीगङ्गेशोपाध्यायेनैतादृशस्तत्त्वचिन्तामणिन्यायमहानिबन्धो रचितो यद् वर्द्धमानोपाध्याय–पक्षधरमिश्र–रुचिदत्त–गोकुलनाथोपाध्याय—मधुसूदनमिश्र—प्रभृतिभिर्मैथिलपण्डितैः

---

(१) कुसुमाञ्जलिभूमिकायां ११८९ शाकाब्दे जयदेवस्थितिं संस्थाप्य "शाके मुनिव्योमयुगेन्दुगण्ये १४०७" इति चैतन्यदेवजन्मव्यवस्थापकपद्यस्थं युगशब्दं चैतन्यचन्द्रोदयनाटकस्थेन "शाके चतुर्दशशते रविवाजियुक्ते १४०७" इतिपद्येन चतुर्वाचकं दृढीकृत्य रघुनाथशिरोमणिचैतन्यदेवयोरेककालावस्थायित्वात् शिरोमणिजयदेवमिश्रयोः संवादं खण्डयन्ति । तत्तुच्छम ३८६ लक्ष्मणसेनवर्षे १४१५ शाकाब्दे वर्त्तमानेन रुचिदत्तेन "अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरोः"इत्युक्तेः १३२२ शाकाब्दे वर्त्तमानाज्जयदेवपितृव्याद्धरिमिश्रान्मैथिलकोकिलविद्यापतेरध्ययनस्यानुपपत्तेः ।

वासुदेवसार्वभौम—रघुनाथतार्किकशिरोमणि—मथुरानाथ—भवानन्द—जगदीश—गदाधर—चन्द्रनारायण—कालीशङ्करप्रभृतिभिर्वङ्गदेशीयैः पण्डितैर्महादेव—कृष्णम्भट्ट—रामचन्द्राचार्यादिभिर्दाक्षिणात्यपण्डितैश्च साक्षात् परम्परया वा व्याख्यातत्वात् क्रोडपत्रादिना च संवलितत्वात् श्लोकानां लक्षाणामष्टाविंशत्या उपबृंहित इदानीं नवीनन्यायत्वेन लोके व्यवह्रियते इत्यादि प्रतिपादितमस्माभिर्वाराणसीमुद्रिते चौखंबासंस्कृतसीरीजपुस्तके क्रोडपत्रसंग्रहे भूमिकायां १ । २ । ३ खण्डेषु । किं तु नवीनत्वव्यवहारः शास्त्रतात्पर्यानवबोधात् गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिग्रन्थे आदावेव "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी"ति गोतमसूत्रमवलम्ब्य "प्रमाणतत्त्वं विविच्यते" इत्यादिना तत्त्वचिन्तामणिग्रन्थो रचित इति न नवीनत्वं किमपि। यत्तु अवच्छेदकावच्छिन्नशब्दादिभिर्व्याख्यातत्वेन नवीनत्वसाधनं तदपि शास्त्रतात्पर्यानवबोधादेव । पातञ्जलदर्शने समाधिपादे २६ सूत्रं "पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्" । अत्र व्यासभाष्यम् "पूर्वे हि गुरवः कालेनाऽवच्छेद्यन्ते यत्रावच्छेदार्थेन कालो नोपावर्तते" इति । अत्र भाष्यटीकायां वाचस्पतिमिश्राः "व्याचष्टे पूर्वे हि इति । कालस्तु शतवर्षादिः अवच्छेदार्थेन अवच्छेदेन प्रयोजनेन नोपावर्तते ।" इत्यादिदर्शनादिति ।

गङ्गेशोपाध्यायादिनैयायिकानामुक्तानां चरितानि सप्रमाणानि श्रीमता वाराणसीस्थराजकीयसंस्कृतपाठशालीयसरस्वतीभवनस्थपुस्तकप्रधानाध्यक्षेण श्रीगोपीनाथकविराज—एम्. ए. महाशयेन सङ्गृहीतानि तानि शीघ्रमेव प्रकाशितानि भविष्यन्तीति मयात्रोपरम्यत इति ।

तत्त्वचिन्तामण्यादिनिबन्धानामाधारभूतं तदिदं न्यायवार्त्तिकमेशिआटिक्सोसाइटीवङ्गालसभानिदेशेन मत्संशोधनपूर्वकं प्रथमं मुद्रितमिदानींपर्यन्तं न्यायदर्शनानुरागिभिर्निःशेषं सर्वाणि तन्मुद्रितपुस्तकानि गृहीतानि उपयोजितानि च तत्तत्कार्येष्विति मया सहर्षं पुनरपि चौखंबाबुक्डिपोसम्पादकसेठहरिदासात्मजसेठजयकृष्णदासप्रार्थनया मुद्रितम् । भूमिकापीयमेशियाटिक्सोसाइटीवङ्गालसभाद्वारैव प्रथमं मुद्रायितुमारब्धा किन्तु विलम्बमसहमानैरत्यर्थं भृशं नोदितोऽहमेनां मुद्रितवान् । इदानीं रोगार्तत्वादनवहितचेतसो मम दृष्टिदोषेण च जाता अशुद्धीः क्षाम्यन्तु दयापरा विद्वांसः सफलयन्तु मामकीनं परिश्रममिति भूयो भूय एव परमेश्वरं प्रार्थय इति शम् ॥

सरस्वतीभवन गवर्नमेण्टसंस्कृतकालेज बनारस २५ दिसम्बरमासे १९१६ इसवीये वर्षे	विन्ध्येश्वरीप्रसादद्विवेदी

॥ श्रीः ॥

भूमिकेयं मुद्रितशुद्धिपत्रसंयोगेन पठनीया किं तु यासामशुद्धीनां दर्शनमात्रादेव बोधो भवति तासां नात्र समावेशः कृतः ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२	२१	Fitzdward	Fitz Edward
७	२३	॥ ३०० ।	३६००
१६	२१	भाषते	भाषते
१६	२५	दृश्श्यमाने	दृश्यमाने
२७	७	वदौन्तिकार्थः	वैदान्तिकार्थः ।
२८	२	चतसृणां	चतसृणां
३०	१	रम्भाँश्च	रम्भाँश्च
”	”	ममुः	मनुः
३५	२५	पूर्व काला	पूर्वकाला
३५	२६	भावःषड्विधः	भावः षड्विधः
३६	२३	सिद्धान्तः	सिद्धान्त-
३९	३०	आध्यायेषु	अध्यायेषु
४०	२०	चतुःषष्टि	चतुःषष्टिं
४५	३	सानुद्वेष्टि	मानुद्वेष्टि

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४५	५	संम्राट्	सम्राट्
४६	१७	अहोऽनु	अहो अनु
४९	६	नीतिसु	नीतिषु
४९	७	चन्द्रिकानां	चन्द्रिकाणां
४९	१८	शविषाणा	शशविषाणा
५४	६	स्थाप्य	संस्थाप्य
६२	११	तिमि	मिति
६३	२	निष्यन्नं	निष्पन्नं
६३	५	न्यासूत्र	न्यायसूत्र
६३	१३	कृत्ताः	कृताः
६३	२१	सम यस्य	समयस्य
६३	२५	Travcls	Travels
६६	१०	शेवधीष्टे(?)	शेवधिष्टे(?)
६८	५	सदसच्चेनि	सदसच्चेति
६८	६	उपारम्भाश्चि	उपारम्भश्चि
६८	२२	जैनदर्शने	जैननिबन्धो-द्धृतसूत्रे
७०	१२	जैनागमेषु	जैननिबन्धो-द्धृतसूत्रे
७०	१६	तिरष्कृत	तिरस्कृत
७२	१५	यथा यथं	यथायथं
७७	१५	ग्राम्यल्लोको	ग्राम्यँल्लोको
७८	१२	रम्भत्	रम्भात्
८१	२४	नप्येक	नाप्येक

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम
८४	१६	पन्र्सेट	पन्र्शेट
८५	२	वत्सपुत्रस्य	(वत्सपुत्रस्य) वात्से पुत्रस्य
८७	१	समञ्जस	समञ्जस
९०	१२	निर्वाणत्वं	निर्वाणं
९१	११	शताब्धां	शताब्धां
९४	११	अवनीपत्तिः	अवनीपतिः
९७	३	तत्पश्चात्काल	तत्पूर्वकाल
९७	२७	सप्तमन्वन्तराणि	सप्त मन्वन्तराणि
१०७	२५	रस्मौ	रश्मौ
१०८	२६	राङ्गिराव्यासो	राङ्गिरा व्यासो
११२	६	दक्षाद्याः	दक्षाद्या
११४	२२	चत्तुर्थ	चतुर्थ
११४	२३	बुक्डीपो	बुक्डिपो
११७	१७	निर्वाणत्वं	निर्वाणं
११८	६	जैना गमे	जैनागमे
१२०	१	न्यायवीद्या	न्यायविद्या
१२१	१६	सन्तनु	शन्तनु
१२१	२५	रीरिता	रीरिताः
१२२	२४	णाङ्काः	णाङ्का
१२९	१२	वृतिः	वृत्तिः
१३२	२२	क्षमेथाः	क्षमेथा
१३४	२२	पाठेऽयं	पाठोऽयं
१३६	२४	इच्छामि	इच्छामि

१३८	२९	चरितम् । रचित	चरितं रचितम्
१३९	८	रचिता	रचिताः
१२९	२४	अन्वेषकं मन्याः	अन्वेषकंमन्याः
१४०	२१	शुकेशाः	सुकेशाः
१४५	११	परिशुद्धि	परिशुद्धि
१५०	२४	षडदर्शन	षड्दर्शन
१५४	३	त्रिदादं	विवादं
१५४	५	ग्राम	ग्रामे
१५५	१७	महाचर्य	महाश्चर्य
१५८	१०	येषु	ये तु
१६३	५	वे चा	वेके चा

ॐ श्रीगणेशाय नमः ।

—:०:—

न्यायवार्त्तिकम् ।

श्रीभारद्वाजोद्द्योतकरविरचितम् ।

प्रथमोऽध्यायः ।

यदक्षपादः प्रवरो मुनीनां
शमाय शास्त्रं जगतो जगाद ।
कुतार्किकाज्ञाननिवृत्तिहेतुः
करिष्यते तस्य मया निबन्धः(१) ॥

प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रं(२) तस्याभिसम्बन्धवाक्यं प्रमाणतोऽर्थप्रतिपत्तावित्येवमादि तस्यानुसन्धानवाक्यं शास्त्रस्य पुरुषश्रेयोभिधायकत्वात् । शास्त्रं पुनः प्रमाणादिवाचकपदसमूहो व्यूहविशिष्टः पदं पुनर्वर्णसमूहः पदसमूहः सूत्रं सूत्रसमूहः प्रकरणं प्रकरणसमूह आह्निकम् आह्निकसमूहोऽध्यायः पञ्चाध्यायी शास्त्रम् । तत्पदार्थाः प्रमाणादयः तस्य शास्त्रस्य पदानामर्थाः प्रमाणादयः षोडशात्मानः

(१) "अथ भगवता अक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते व्युत्पादिते च भगवता पक्षिलस्वामिना किमपरमवशिष्यते यदर्थं वार्त्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्त्तिकारम्भप्रयोजनं दर्शयति । यदक्षपाद इति । यद्यपि भाष्यकृता कृतव्युत्पादनमेतत् तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेन आच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्द्योतकरेण स्वनिबन्धोद्द्योतेन तदपनीयत इति प्रयोजनवाक्यमारम्भ" इति न्यायवार्त्तिकतात्पर्यटीकायां वाचस्पतिमिश्राः ॥

(२) आदिमं सूत्रम्—पा० ३ पु० ।

तच्छास्त्रं पुरुषश्रेयोऽभिधत्ते । प्रत्यक्षानुमानाधिगतवस्तुतत्त्वाऽन्वाख्यानं शास्त्रधर्मः तस्य विषयः प्रत्यक्षानुमानानधिगतवस्तुतत्त्व आध्यात्मिकशक्तिसम्प्रयुक्तोन्तेवासी । पुरुषः पुनश्चतुर्धा भिद्यते प्रतिपन्नोऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्चेति । तत्र प्रतिपन्नः प्रतिपादयिता । इतरे सापेक्षाः सन्तः प्रतिपाद्याः । ते यदेन्द्रियार्थसन्निकर्षमपेक्षन्ते तदा प्रत्यक्षेण यदा लिङ्गदर्शनस्मृत्याद्यपेक्षन्ते तदानुमानेन यदा पुनरुपदेशमपेक्षन्ते तदा शास्त्रं प्रवर्तते । श्रेयः पुनः सुखमाहितनिवृत्तिश्च । तच्छ्रेयो भिद्यमानं द्वेधा व्यवतिष्ठते । दृष्टादृष्टभेदेन । दृष्टं सुखमदृष्टमहितनिवृत्तिः । अहितनिवृत्तिरत्यात्यन्तिकी अनात्यन्तिकी च । अनात्यन्तिकी कण्टकादेर्दुःखसाधनस्य परिहारेण । आत्यन्तिकी पुनरेकविंशतिप्रभेदाभिन्नदुःखहान्या । एकविंशतिप्रभेदभिन्नं पुनर्दुःखं शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति।शरीरं दुःखायतनत्वाद्दुःखम्। इन्द्रियाणि विषया बुद्धयश्च तत्साधनभावात(१)।सुखं दुःखानुषङ्गात् । दुःखं स्वरूपत इति । तस्य हानिर्धर्माधर्मसाधनपरित्यागेन अनुत्पन्नयोर्धर्माधर्मयोरनुत्पादेन उत्पन्नयोश्चोपभोगात् प्रक्षयेणेति। पुरुषा रागादिमन्तो वीतरागाश्च । तत्र रागो विषयाभिषङ्गलक्षणः स एषामस्ति ते रागादिमन्तः । वैराग्यं पुनर्भोगानभिष्वङ्गलक्षणं तद्येषामस्ति ते वीतरागाः। प्रवृत्तेर्द्वैविध्यं(२) पुरुषभेदानुविधानात्। तेषां पुरुषाणां प्रवृत्तयस्ताः पुरुषभेदमनुविधीयमाना उभयरूपा भवन्ति । वीतरागप्रवृत्तिरेकधा । तत्र या वीतरागाणां प्रवृत्तिः सा खल्वेकरूपा अनिष्टप्रतिषेधार्था अनिष्टं हास्याम इत्येव ते प्रवर्तन्ते । न पुनरेषां क्वचिदभिष्वङ्गोऽस्ति । रागादिमत्प्रवृत्तिस्तु

(१) तत्साधनत्वात्—पा० ३ पु० ।

(२) प्रवृत्तेरपि द्वैविध्यम्—पा० ३ पु० ।

द्विरूपा । ये तु रागादिमन्तस्तेषां याः प्रवृत्तयस्ता द्विविधा भवन्ति । इष्टानिष्टविषयाधिगमप्रतिषेधार्थाः । इष्टमाप्स्यामीति सक्तः प्रवर्तते । अनिष्टं हास्यामीति द्वेषान्निवर्तते । रागादिमत्प्रवृत्तेरपि द्वैविध्यं भवति समर्थासमर्थभेदात् । या खलु रागादिमत्प्रवृत्तिः सा समर्थाऽसमर्था च भवति । इष्टमाप्स्यामीति प्रवर्तमानो यदा प्राप्नोति तदा समर्था । अनिष्टं हास्यामीति प्रवर्तमानो यदा जहाति तदा समर्था यदा विपर्ययस्तदाऽसमर्थेति । ततः पुनः प्रवृत्तिद्वैविध्यं प्रमाणस्यार्थवदनर्थकत्वात् प्रमाणं तावदर्थपरिच्छेदकं प्रमाणसामान्यात् प्रमाणप्रतिरूपकमपि प्रमाणमित्युपचर्यते । किं पुनः प्रमाणसामान्यं प्रमाणाभासस्य सामान्यपरिच्छेदकत्वम् प्रमाणेनापि सामान्यं परिच्छिद्यते प्रमाणाभासेनापि। सोऽयं प्रमाता यदा प्रमाणेनावधार्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति यदा पुनः प्रमाणभासेनार्थमवधार्य प्रवर्तते तदाऽसमर्था तस्याः पुनरर्थवत्त्वं प्रमाणतोऽर्थप्रतिपत्तावित्यादिभाष्यम् । परस्परापेक्षित्वादुभयासिद्धिरिति चेत् । न अनादित्वात् । यदि प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यं यदि वा प्रवृत्तिसामर्थ्यात् प्रमाणतोऽर्थप्रतिपत्तिः किं पूर्वं किं पश्चादिति वाच्यम् । यदि तावत् प्रमाणतः पूर्वमर्थप्रतिपत्तिः प्रवृत्तिसामर्थ्यमन्तरेण किमिति प्रतिपद्यते । अथ पूर्वं प्रवृत्तिसामर्थ्यमनवधार्यार्थे किमिति प्रवर्तते तस्मात् प्रवृत्तेः प्रमाणतोऽर्थप्रतिपत्तेर्वा परापरभावो न कल्प्यत इति । तच्च नैवं कस्मात् अनादित्वात् अनादिरयं संसार इति पूर्वाभ्यस्तसूत्रे प्रतिपादयिष्यामः । आदिमति च संसारे एष दोषः किं पूर्वं प्रमाणतोऽर्थप्रतिपत्तिराहोस्वित् प्रवृत्तिसामर्थ्यमिति । प्रमाणप्रवृत्त्योर्वा बलाबलजिज्ञासायामुभयसामर्थ्यप्रतिपादनार्थं वाक्यं लोकः खलु प्रवर्तमानः प्रमाणेनावधार्य प्रवर्तते स च तथाप्रवर्तमानः

फलमुपलभते । तत्रेदं चिन्त्यते । किं प्रमाणतोऽर्थप्रतिपत्तिः समर्था आहोस्वित् प्रवृत्तिरिति । उभयं समर्थं तन्नान्तरीयकत्वात् । तस्य फलस्य अस्य चार्थस्योपदर्शनार्थं वाक्यमिति । लोकवृत्तानुवादो वा सर्वः प्रमाता प्रमाणेनार्थमवधार्य प्रवर्तमानः फलमुपलभते इति लोकवृत्तं तद्वाक्येनानूद्यते । हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्यर्थ-पदानीति । हेयं दुःखं तद्धेतुश्च दुःखमुक्तं हेतुरविद्यातृष्णे धर्माध-र्माविति । हानं तत्त्वज्ञानम् । तत्पुनर्यथार्थावस्थितपदार्थाधिगतिः तच्च प्रमाणम् । उपायः शास्त्रं तदप्युक्तम् । अधिगन्तव्योऽपवर्गः स पुनरात्यन्तिको दुःखाभावः । एतस्मिंश्च चतुर्वर्गे प्रमा-णस्य प्राधान्यप्रदर्शनार्थं चेति । कथं पुनरनेन वाक्येन प्रमाणा-दिचतुर्वर्गः प्रदर्श्यत इति । प्रमाणप्रमेयाधिगतयः श्रुतिगम्याः प्रमाता तन्नान्तरीयकत्वात् । न हि प्रमातारमन्तरेण प्रमाणं सम्भ-वति तदिदं वाक्यमवयवशः उपन्यस्य वर्ण्यते । तत्र प्रमाणत इति तसिर्वचनविभक्तिव्याप्तिप्रदर्शनार्थः । प्रमाणत इतीयं निमित्तप-ञ्चमी । अस्याभिधानं वचनव्याप्त्यर्थं विभक्तिव्याप्त्यर्थं च । कथं पुनः पञ्चमीव्यतिरेकेण तसिर्लभ्यते लभ्यत इत्याह । आद्यादावु-पसंख्यानादिति । तत्र किं सिद्धं भवति वचनव्याप्त्या संप्लवो व्यवस्था च । प्रमाणेन प्रमाणाभ्यां प्रमाणैरिति संप्लवो गम्यते प्रमाणेनैवेति व्यवस्था विभक्तिव्याप्त्या हेतुकरणभावः । प्रमाणा-दर्थाधिगतिर्भवतीति हेतुत्वं प्रमाणेनार्थं साधयतीति साधकतमत्वात् करणार्थ इति । संप्लवानुपपत्तिर्विशिष्टविषयत्वादिति चेत् । न अ-नभ्युपगमात् । स्यान्मतिरेषा विशिष्टविषयाणि प्रमाणानि । विशे-षविषयं प्रत्यक्षं सामान्यविषयमनुमानमिति । एतच्चाधिगन्तव्यं यत् सामान्यं(१) विशेषश्च न च सामान्यविषयं प्रत्यक्षं न जात्वनुमानं

---

(१) यदुक्तं सामान्यं—पा० ३ पु० ।

विशेषविषयमिति । एतच्च न अनभ्युपगमात् । न तावत् प्रमाणद्वयं प्रतिपद्यामहे न विषयद्वयं नाप्यसङ्करम् । किं कारणम् । प्रमाणानि तावच्चत्वारि विषयः सामान्यविशेषतद्वद्भेदात् त्रेधा । सङ्करोऽप्येकस्य सर्वैः प्रमाणैरधिगतेरिन्द्रियवदिति । इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणं तस्य व्यवस्थासङ्करश्च व्यवस्था गन्धादिषु सङ्करः पृथिव्यादिषु द्वीन्द्रियग्राह्यत्वात् । सत्तायां गुणत्वे च सार्वेन्द्रियं ज्ञानमिति । अधिगतत्वाद् वैयर्थ्यमिति चेत् । न अन्यथा तदधिगतेः । स्यान्मतं यदि सङ्कीर्येरन् प्रमाणानि नन्वेकेन प्रमाणेनाधिगतेऽर्थे द्वितीयं प्रमाणं व्यर्थमापद्येत । अधिगतं चार्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यात् । न अन्यथाधिगतेः न ब्रूमो यथा प्रत्यक्षेणार्थोऽधिगम्यते तथानुमानादिभिरपीति । अन्यथा प्रत्यक्षेणेन्द्रियसम्बद्धः । इन्द्रियासम्बद्धोऽनुमानेन । सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिरुपमानेन । शब्दोल्लेखेनागमेनेति । विषयान्तरे व्यवस्थादर्शनाच्च(१) । न च सर्वस्मिन्नर्थे संप्लवोऽस्तीति अतो न वैयर्थ्यमिति । तस्माद्व्यवस्थितमेतत्त्रसिर्वचनविभाक्तिव्याप्तिज्ञापनार्थ इति प्रमाणस्वरूपावधारणं कर्तव्यम् । किं पुनः प्रमाणस्य प्रमाणत्वं किञ्चोक्तं प्रमाणमिति उपलब्धिहेतुः प्रमाणम् उपलब्धिहेतुत्वं प्रमाणत्वं यदुपलब्धिनिमित्तं तत् प्रमाणमिति । समानत्वादलक्षणमिति चेत् यद्युपलब्धिहेतुः प्रमाणं ननु प्रमातृप्रमेययोरपि उपलब्धिहेतुत्वात् प्रमाणत्वं प्रसज्येत विशेषो वा वक्तव्य इति । अयं विशेषः प्रमाणे प्रमातृप्रमेययोश्चरितार्थत्वात् प्रमाणे प्रमाता प्रमेयं च चरितार्थम् । अचरितार्थं च प्रमाणम् अतस्तदेवोपलब्धिसाधनमिति । अकरणा प्रमाणोत्पत्तिरिति चेत् यदि प्रमातृप्रमेयाभ्यां प्रमाणं जन्यते अकरणा तर्हि प्रमाणोत्पत्तिः

(१) विषयान्तरव्यवस्थापनाच्च—पा० ३ पु० ।

माप्नोति । न इन्द्रियार्थसन्निकर्षस्य करणभावात् नाकरणा प्रमाणोत्पत्तिः प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षमाणाभ्यां प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति नाकरणप्रमाणोत्पत्तिप्रसङ्गः। यदि तर्हि प्रमाणोत्पत्ताविन्द्रियार्थसन्निकर्षमपेक्षेते प्रमातृप्रमेये अथ तर्हि इन्द्रियार्थसन्निकर्षोत्पत्तौ किमपेक्षेते इति तस्मिन्नपीन्द्रियमित्येवमनादिः कर्तृकरणभावः यद्यत्पश्चाद्भवति तत्तत्पूर्वभाविनमपेक्षत इत्यनादिः कर्तृकरणभावो द्रष्टव्य इति । यदि प्रमातृप्रमेयाभ्यां सद्भ्यां प्रमाणं जन्यते ततः प्रमाणमन्तरेण प्रमातृप्रमेयभावस्यासिद्धत्वात् प्रमातृत्वं प्रमेयत्वं चानुपपन्नमिति । कथं प्रमाणमिति यथा कारकशब्दोऽयं तथा प्रमाता प्रमेयमिति । न च कारकशब्दाः क्रियामन्तरेणात्मानं लभन्त इति । न च द्रव्यमात्रं कारकं न च क्रियामात्रमिति । कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते । प्रमातृप्रमेयशब्दौ च कारकशब्दौ तावन्तरेण क्रियां न प्रवर्तयेतामिति । न । पाचकादिशब्दवत् त्रिकालविषयत्वात् न ब्रूमः क्रियासम्बन्धेनैव कारकशब्दाः प्रवर्तन्त इति अपि तु त्रिकालविषया एते यदि क्रियासम्बन्धनिमित्ताः स्युर्न क्रियासम्बन्धमन्तरेण प्रवर्तेरन् क्रियासम्बन्धमन्तरेण तु प्रवर्तन्ते किं पुनर्निमित्तं सामर्थ्यं तच्च त्रिष्वपि कालेष्वस्तीति । तस्मादुपपन्नं प्रमातृप्रमेयाभ्यां प्रमाणं जन्यत इति तदुपलब्धिसाधनमिति । साधकतमत्वाद्वा न प्रसङ्गः । न चायं प्रसङ्गोऽस्ति प्रमाता च प्रमेयं चोपलब्धेर्निमित्तत्वात् प्रमाणं प्रसज्यत इति । कस्मात् साधकतमत्वात् साधकतमं प्रमाणं न तु प्रमातृप्रमेये । कः खलु साधकतमार्थः साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थ इति । भावाभावयोस्तद्वत्ता न प्रमातरि प्रमेये वाऽसति प्रमा भवति सति तु भवति

न पुनः सति भवत्येव प्रमाणे तु सति भवन्ती भवत्येव सोऽयमतिशयः साधकतमत्वमुच्यते । यद्वान्वा प्रमिमीते सोऽतिशयः किंवान् प्रमिमीते प्रमाणवान् प्रमिमीते प्रमाणे सति प्रमिमीते नासतीति सतोर्वाऽकर्तृत्वं यदभावात । यस्य चाभावात् प्रमातृप्रमेये न प्रमां कुरुतः सोतिशयः संयोगवच्चरमभाविता वा यथा वा संयोगः पश्चाद्भावी द्रव्यशक्तिर्भवति तथा प्रमाणं चरमभावि प्रमातृप्रमेययोः प्रमाशक्तिर्भवति पश्चाद्भावोऽतिशयः । प्रतिपत्तेरानन्तर्यं वा । यद्वा प्रमाणानन्तरं प्रतिपत्तेर्जन्म स चायमतिशय इति । असाधारणकारणता वा प्रमाता साधारणं कारणं सर्वप्रतिपत्तीनां प्रमेयमप्यशेषपुरुषसाधारणत्वात् तथाभूतं प्रमाणं त्वसाधारणकारणत्वात् प्रधानम । प्राधान्याच्च साधकतमत्वेनाभिधीयत इति । प्रमाकारणसंयोगविशेषकत्वं वा यो वा प्रमाकारणं संयोगस्तस्य प्रमाणमनुग्रहे वर्तमानमतिशयशब्दवाच्यम् । अर्थग्रहणं प्रमाणविषयप्रतिपत्तिनिषेधार्थं यतो न प्रमाणविषया प्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति किन्त्वर्थस्य तथाभावविषया यदायमर्थस्य तथाभावं प्रतिपद्यते अथ प्रवर्तत इति उपेक्षणीयविषयप्रतिषेधार्थं वा न ह्युपेक्षणीयविषयप्रतिपत्तिः पुरुषमितिकर्तव्यतायां प्रयोजयति किन्त्वर्थस्य सुखदुःखहेतुभावविषया यदायमर्थस्य सुखदुःखहेतुभावं प्रतिपद्यते अथ प्रवर्तत इति प्रमाणाग्रहणं गम्यमानत्वादिति चेत् । न प्रमाणविशेषज्ञापनार्थत्वात् । अर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादित्यभिधीयमाने गम्यते एवैतत् प्रमाणत इति न हि काचित(१) प्रतिपत्तिः प्रमाणमन्तरेण भवति । तच्च नैवं प्रमाणविशेषज्ञापनार्थत्वात् अस्त्ययं प्रमाणशब्दः प्रमाणे वर्तमानोऽस्ति च प्रमाणसामान्यात् प्रमाणाभासे ऽपीति । तथेह प्र-

(१) कदाचिद्-पा० ३ पु० ।

माणेन प्रतिपत्तिः सा प्रवृत्तिसामर्थ्यं प्रतिपादयति प्रमाणं नेतर-
दिति। न च प्रमाणग्रहणमन्तरेण पञ्चम्यभिधानं लभ्यते। तेन च
प्रयोजनं अतश्च प्रमाणग्रहणं कृतमिति। अर्थग्रहणेन सुखदुःखहे-
तुत्वेन सर्वसङ्ग्रहोऽर्थमाणत्वात्(१)। सर्वः प्रमाणादिरर्थः सुखदुःखहेतुः
सर्वश्चार्यते अर्थमाणत्वादर्थ इति न व्याघातादविवक्षितत्वाच्च।
सर्वः प्रमाणादिरर्थः सुखदुःखहेतुरिति ब्रुवता हेयादिभेदाच्चत्वार्य-
र्थपदानीति व्याहन्येत। न च प्रमाणादिहानं शक्यं कर्तुं न च
प्रमाणादिहानं विवक्षितं तस्माद्व्याख्यानमेतत् किन्तु सुखदुःख-
त्वेन तद्धेतुत्वेन च यावतां सङ्ग्रहस्ते ऽभिधीयन्ते अधिकारात् न च
संविदो ग्रहणमनाधिकारात् अकर्मत्वाच्च न संविद्धेया असुखदुःख-
त्वात् अतद्धेतुत्वाच्च नाप्यर्थ्यते फलत्वात् सोऽयं प्रमाणार्थोऽपरिसंख्येय-
यः इयानयं प्रमाणविषय इति न परिसंख्यातुं शक्यम् आनन्त्यात् न
उभयस्यापि परिसंख्यातत्वात्। एतावानयं प्रमाणार्थो यत्सुखदुःखे
तद्धेतुश्चेति तच्चोभयं परिसंख्यातम् अतो न युक्तमानन्त्यात् न
परिसंख्यातुं शक्यं प्राणभृद्भेदस्यचापरिसंख्येयत्वादपरिसंख्येयः
प्रमाणार्थ इत्यसम्बन्धमुक्तमिति। नार्थशब्दस्य प्रयोजनवाचित्वात्
प्रमाणार्थोऽपरिसंख्येय इति। प्रमाणे प्रयोजनमपरिसंख्येयमित्ययं
वाक्यार्थः कथं स एवार्थः केषाञ्चित्सुखहेतुर्भवति केषाञ्चिद्दुःखहे-
तुरिति। अर्थवति च समर्थे प्रमाणे अर्थवन्ति समर्थानीति। अ-
न्यतमत्वार्थः साधकतमार्थो द्रष्टव्यः प्रकरणात् प्रकरणं हि चतुर्वर्गे
प्रमाणं प्रधानमिति वर्ण्यते। यदि पुनर्यथा श्रुतिवाक्यमर्थवत्
स्यात् किं प्रमाणसामर्थ्यं वर्णितं स्यात् तस्माद्यथोक्तं न्याय्यमि-
ति। प्रमाता स्वतन्त्रः किं पुनः स्वातन्त्र्यं कारकफलोपभोक्तृत्वं
यस्मात् कारकाणां फलेनायमभिसम्बध्यते। तत्समवायो वा

(१) अर्थ्यमानत्वात्-पा० ३ पु०।

यद्वा अशेषकारकनिष्पाद्यायाः क्रियायाः पुरुष आश्रयो भवति तत्प्रयोक्तृत्वमितराप्रयोज्यता वा । यद्वा परिदृष्टसामर्थ्यानि कारकचक्राणि प्रयुङ्क्ते तैश्च न प्रयुज्यते । तत्त्वपरिसमाप्तिर्विनियोगयोग्यता उपेक्ष्यता वा याऽसाववितथसंवादिता सावधारितस्यार्थस्य विनियोगयोग्यता सुखसाधनं वा दुःखसाधनं वाऽयमर्थ इति । ज्ञात्वा विनियोगः समाप्तिस्तत्प्राप्तिस्तत्प्रतिषेधश्च । यद्वा न सुखसाधनं न दुःखसाधनमित्युपेक्षेति किं पुनस्तत्र सदसती तत्र तस्य भावस्तत्त्वमित्यत्र तद्वाच्यं यस्य भाव इति सदसती तत्र प्रमाणविषयत्वेनाधिकारात् सदसती। प्रमाणविषयावित्यधिकृतम् तस्मात् सदसती तदिति तद्भावः सदसत्त्वं सदसतोः प्रमाणविषयता तत्प्रतिषेधश्च तयोः खलु सदसतोर्भावो द्विरूपः विधीयमानः प्रतिषिध्यमानश्च यदेकत्र विधीयते तदन्यत्र प्रतिषिध्यते तद्यथा गन्धवती पृथिवी अगन्धा आप इति प्रमाणविषयत्वात् सदसद्भावाविशेषप्रसङ्ग(१) इति चेत् । न अनैकान्तात् तत्र भवेदेषा बुद्धिर्यदि प्रमाणेन सदसती गम्येते ततः प्रमाणविषयत्वादुभयोरविशेषः प्राप्तः तच्च न अनैकान्तात् सर्वमिदं गोघटादि द्रव्यजातं प्रमाणगम्यं भेदवच्च तस्मादनेकान्तोयमिति स्वतन्त्रपरतन्त्रोपलब्ध्यनुपलब्धिकारणभावाच्च विशेषः सत्खलु प्रमाणस्यासम्बन्धं स्वतन्त्रं भवति असत्तु परतन्त्रं प्रतिषेधमुखेन प्रतिपद्यते प्रदीपवदिति यथा प्रदीपोऽपवरकादिस्थितं घटादिकमर्थं प्रतिपादयति तद्वदसदपि प्रतिपादयति । न ह्यसत्प्रतिपत्तौ उपायान्तरमास्थीयते दृश्यमाने हि घटादिकेर्थे नानेन समानजातीयं दृश्यान्तरमस्ति यद्यभविष्यदिदमिवाद्रक्ष्यत न च दृश्यते तस्माद्दर्शनाभावान्नास्तीति गम्यते । एवं प्रमाणेनापि

---

(१) सदसतोरविशेषप्रसङ्गः—पा० ३ पु० ।

सति प्रमीयमाणे नानेन समानजातीयं प्रमेयान्तरमस्ति यद्यभावि-
ष्यदिदमिवाभास्यत न च प्रमीयते तस्मान्मानाभावान्नास्तीति त-
देवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयति तत्र स्वातन्त्र्येणा-
सद्भेदा न प्रकाशन्त इति नोच्यन्ते चतुर्वर्गानन्तर्भावाद्वा भावप्रप-
ञ्चवदभावप्रपञ्चोऽप्युद्दिष्टो वेदितव्य इति भावोपदेशादभावप्रपञ्च
उद्दिष्टो भवतीति अतश्च नोच्यन्त इति ॥

**प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-
तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्र-
हस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥**

सच्च खलु षोडशधा व्यूढमुपदेक्ष्यत इति । व्यूहः संक्षेपः ।
त एते सद्भेदा इति सूत्रम् । सर्वपदार्थप्रधानः समासो द्वन्द्व इति
किमुक्तं भवति । सर्व एते प्रमाणादयो विज्ञेया इति । अन्यथा
हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमाणादीनामवि-
ज्ञेयता स्यात् यथावचनं विग्रहः यदेव निर्देशे वचनभेदोपादाने
प्रयोजनं तदिहापि द्रष्टव्यम् । प्रमाणादीनां तत्त्वमिति शैषिकी
षष्ठी । कः पुनः शेषः कारकाणामविवक्षा शेष इति । यत्र न
कारकं कारकार्थो वा विवक्ष्यते स शेषः तद्यथा ब्राह्मणस्य कम-
ण्डलुरिति । तत्त्वस्य प्रमाणादिभ्योऽन्यानन्यत्वे दोषः यदि ता-
वत् प्रमाणादिव्यतिरिक्तं तत्त्वं न प्रमाणाद्यधिगमान्निःश्रेयसा-
धिगम इति प्राप्तम् । किं कारणं तत्त्वविशेषणत्वेनोपादानात् रा-
जपुरुषानयनक्रियावदिति । अथाऽभेदस्तत्त्वग्रहणानर्थक्यं यदि
प्रमाणादिव्यतिरिक्तं तत्त्वं न प्रतिपद्यसे एवं तर्हि तत्त्वग्रहणमन-
र्थकं सम्पद्यते नोभयथाप्यदोषादित्येके । यदि तावत् प्रमाणादि-
व्यतिरिक्तं तत्त्वं स्यात् तस्यास्वतन्त्रत्वात् प्रमाणादयोऽपि गम्यन्त
इति कुण्डे बदरवृत्तिवदिति यथा कुण्डे बदराणां वृत्तिरिति भावे

देशिते भावस्यास्वतन्त्रत्वात् कुण्डे बदराणि वर्तन्त इत्युक्तं भवति । तथेहापि तत्त्वज्ञानान्निःश्रेयसाधिगम इति प्रमाणादीनां ग्रहणं भावस्यास्वतन्त्रत्वादिति । अभेदेपीषुस्थितिवत्तद्भावप्रतिषेधो नार्थान्तरमिति न प्रमाणादिमात्रमुच्यते अपि त्वर्थान्तरं प्रतिषिध्यते । यथेषोः स्थितिरिति नेषुमात्रं स्थितिरपि तु गतिमदर्थान्तरं(१) न भवतीति । तन्न । अनर्थान्तरत्वासिद्धेः । तत्त्वज्ञानान्निःश्रेयसाधिगम इति तत्त्वं ज्ञायमानं कर्म सम्पद्यते निःश्रेयसमधिगम्यमानं कर्म भवतीति । किं पुनस्तत्त्वं किं वा निःश्रेयसमिति । तत्त्वं पदार्थानां यथावस्थितात्मप्रत्ययोत्पत्तिनिमित्तत्वं यो यथावस्थितः पदार्थः स तथाभूतप्रत्ययोत्पत्तिनिमित्तं भवति यत् तत् तत्त्वम् । निःश्रेयसं पुनर्दृष्टादृष्टभेदाद्द्वेधा भवति । तत्र प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसं दृष्टं न हि कश्चित्पदार्थो ज्ञायमानो हानोपादानोपेक्षाबुद्धिनिमित्तं न भवतीति एवं च कृत्वा सर्वे पदार्था ज्ञप्त्युपक्षिप्यन्ते इति । परन्तु निःश्रेयसमात्मादेस्तत्त्वज्ञानाद्भवति दृष्टं प्रमाणादिपरिज्ञानाददृष्टं पुनरात्मादेः प्रमेयस्य परिज्ञानादिति न प्रमाणमस्ति । न नास्त्यर्थस्य तथाभावात् अर्थ एवायं तथाभूतो यदात्मादेः प्रमेयस्य तत्त्वज्ञानान्निःश्रेयसमधिगम्यते । यदा ह्ययमात्मादि प्रमेयं विपर्ययेणाध्यवसितो भवति । अथ संसारं नातिवर्तत इति । एवं(२) चार्थं द्वितीयसूत्रे प्रतिपादयिष्यामः । यदि पुनः प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसं स्यान्न मोक्ष्यमाणा मोक्षाय घटेरन् न हि कस्यचित् क्वचिच्च तत्त्वज्ञानं नास्तीति तस्मादात्माद्येव प्रमेयं मुमुक्षुणा ज्ञेयमिति । पृथगुपदेशाच्च । यदि प्रमाणाद्येव प्रमेयं स्यात् तस्य च परिज्ञानान्निःश्रेयसं भवेत् । नात्मा-

---

(१) गतिमत्त्वार्थान्तरं—पा० २ पु० ।

(२) एवं—पा० १ पु० ।

दि प्रमेयं पृथगुपदिष्टं स्यात् । प्रमेयार्थावधारणार्थायां चोत्तरसूत्रप्रक्रियायां प्रमेयस्य विहितत्वादाद्येन सूत्रेणाकुशलः सूत्रकारः स्यात् । तच्चैतदुत्तरसूत्रेणानूद्यत इति भाष्यम् । हेयहानोपायाधिगन्तव्यभेदाच्चत्वार्यर्थपदानि सम्यग्बुद्ध्वा निःश्रेयसमधिगच्छतीति । हेयं दुःखं तस्य निर्वर्तकमविद्यातृष्णे धर्माधर्माविति । हानं तत्त्वज्ञानं तस्योपायः शास्त्रम् । अधिगन्तव्यो मोक्षः । एतानि चत्वार्यर्थपदानि सर्वास्वध्यात्मविद्यासु सर्वाचार्यैर्वर्ण्यन्त इति । संशयाद्यग्रहणं पृथक् प्रमेयान्तर्भावादिति चेत् । न विद्याप्रस्थानभेदज्ञापनार्थत्वादिति । संशयादयः प्रमेयेन्तर्भवन्तीति पृथक् ते न वक्तव्याः । न विद्याप्रस्थानभेदज्ञापनार्थत्वात् । चतस्र इमा विद्या भवन्ति ताश्च पृथक्प्रस्थानाः । अग्निहोत्रहवनादिप्रस्थाना त्रयी । हलशकटादिप्रस्थाना वार्त्ता । स्वाम्यमात्यभेदानुविधायिनी दण्डनीतिः । संशयादिभेदानुविधायिनी आन्वीक्षिकी । तस्याः संशयादिप्रस्थानमन्तरेणात्मविद्यामात्रमियं स्यात् ततः किं स्यात् अध्यात्मविद्यामात्रत्वादुपनिषद्विद्यावत् त्रय्यामेवान्तर्भाव इति चतुष्ट्वं निवर्तेत(१) तस्मात् पृथग्गृह्यन्त इति । तत्र संशयस्तावद्वस्तुस्वरूपानवधारणात्मकः प्रत्ययः । अनवधारणात्मकश्च प्रत्ययश्चेति व्याहन्यते । न व्याघातः स्वरूपावधारणात् स्वरूपमस्यावधार्यते अस्ति मे संशयज्ञानमिति । वस्तुस्वरूपं तु नानेन परिच्छिद्यते । तदुभयमनवधारणात्मकश्च प्रत्ययश्चेति । स कथं न्यायस्याङ्गं भवतीति । यस्मान्नानुपलब्धे न निर्णीते न्यायः प्रवर्तते । उपलब्धोऽनिर्णीतश्चेति व्याहतम् । यद्युपलब्धो नानिर्णीतोऽथानिर्णीतो नोपलब्ध उपलब्धोऽनिर्णीतश्चेति व्याहतम् । नास्ति व्याघातः सामान्येनोपलब्धो विशेषतोऽनिर्णीत इति । एवमपि यथोपलब्धस्त-

(१) निवर्तेत--पा० २ पु० ।

थाऽनिर्णीत इति व्याघातानिवृत्तिः नानिवृत्तिः यथा तथेति व्यपदेशात् सर्वथा निर्णीते यथा निर्णीतस्तथोपलब्ध इत्यनर्थकं स्यात् । तस्मात् सामान्यत उपलब्धो विशेषतोऽनिर्णीत इति । स चायं संशय एवंभूतः प्रमेयेन्तर्भूत एवमर्थं पृथगुच्यते । अथ प्रयोजनम् । किं पुनः प्रयोजनमिति । येन प्रयुक्तः प्रवर्तते तत् प्रयोजनमिति लौकिकोयमर्थः । केन प्रयुज्यते । धर्मार्थकाममोक्षैरिति केचित् । वयं तु पश्यामः सुखदुःखाप्तिहानिभ्यां प्रयुज्यत इति । सुखदुःखसाधनभावात्तु सर्वेऽर्थाश्चेतनं प्रयोजयन्तीति । तदिदं प्रयोजनं न्यायस्याश्रयः । क आश्रयार्थः आधारार्थस्तावन्न भवति । उपकारकत्वमाश्रयार्थः तन्मूलत्वात् परीक्षाविधेः । प्रयोजने सति परीक्ष्यत इति प्रयोजनं परीक्षां प्रवर्तयतीति । का पुनरियं परीक्षा । न्यायः । कः पुनरयं न्यायः । प्रमाणैरर्थपरीक्षणं न्यायः । किमुक्तं भवति । समस्तप्रमाणव्यापारादर्थाधिगतिर्न्याय इति । नैकैकं प्रमाणमर्थपरिच्छेदहेतुभावेन व्यवतिष्ठमानं न्याय इत्युच्यते किन्तु समस्तानि । सोऽयं विप्रतिपन्नपुरुषप्रतिपादकत्वात् परमो न्याय इति वक्ष्यामः । प्रत्यक्षागमाश्रितमनुमानं प्रत्यक्षागमाश्रितमिति प्रत्यक्षागमाविरोधि यदिहानुमाना(१)धिगतोऽर्थः प्रत्यक्षागमाभ्यामनुसन्धीयते अथ स्फुटतरः प्रत्ययो भवति । यत्र पुनरेतानि प्रमाणानि इतरेतराप्रतिसंहितानि व्यावृत्तानि प्रयुज्यन्ते । न्यायविप्लवोऽसौ लाभपूजाख्यातिकामैस्तीर्थप्रतिरूपकः प्रवादो वर्ण्यते । यत्पुनरनुमानं प्रत्यक्षागमविरोधि स न्यायाभास इति । प्रत्यक्षविरुद्धं तावत् वह्निरनुष्णः कृतकत्वाद्घटादिवत् । कः पुनरस्यानुमानस्य विरोधः अनुमानाविषये प्रयोगः । नायमनुमानस्य विषये प्रयोगः नायमनुमानस्य विषयः यस्मिन् विषये एतत्प्रयुज्यते स प्रत्यक्षे-

(१) यदि ह्यनुमाना—पा० १ पु० ।

णापह्नव इति । अपरे पुनरश्रावणः शब्द इति प्रत्यक्षविरोधं (१) वर्णयन्ति तैस्तु न प्रत्यक्षस्य विषयो ज्ञातो नानुमानस्य विषय इति । किं कारणम् इन्द्रियवृत्तीनामतीन्द्रियत्वात् श्राव- णत्वं चेन्द्रियवृत्तिः सा कथं प्रत्यक्षा भवति । आगमवि- रुद्धं शुचि नरशिरःकपालं प्राण्यङ्गत्वात् शङ्खशुक्तिवदिति । क- थमिदमागमविरुद्धं । शुचि नरशिरःकपालमिति ब्रुवता शुच्यर्थो वा- च्यः किमुक्तं भवति शुचीति । यदि स्प्रष्टुः प्रत्यवायाभावः स क- स्येति वाच्यम् । यद्यात्मन इति ब्रूयात् तदागमार्थानुष्ठानतात्पर्ये- णावस्थानादेवमेतत् । अथ त्रयीविदामिति ब्रूयात् त्रय्यभ्युपग- माद्विरोध इति वाच्यम् । शुचि नरशिरःकपालमिति कोऽर्थः वि- शेषविधानमेतत् विशेषविधानं हि शेषनिषेधविषयं यदि शुचि न- रशिरःकपालमिति किमशुचीति वाच्यम् । अथ सर्वमेव शुचीति दृष्टान्तो नास्ति सर्वस्य पक्षीकृतत्वादिति(२) । अथानुमानवि- रुद्धं कस्मादनुमानं न भवति एकस्मिन्ननुमानद्वयसमावेशस्यास- म्भवात् । न विरोधः । न ह्यन्वयव्यतिरेकसम्पन्ने अनुमाने एकस्मिन्नर्थे समाविशतः तस्यान्नानुमानविरुद्धम् । प्रत्यक्षविरोधोऽपि तर्हि न प्रा- प्नोति । न न प्राप्नोति अन्वयव्यतिरेकसम्पन्नस्य प्रत्यक्षेण बाधि- तत्वात् । अथोपमानविरुद्धं कस्मान्न भवति नोपमानविरुद्धं पूर्व- प्रमाणविरोधानुविधानात् । उपमानविरोधः पूर्वप्रमाणानुविधायी आगमाहितसंस्कारस्मृत्यपेक्षं च सारूप्यज्ञानमुपमानमिति वक्ष्या- मः । प्रत्यक्षागमयोर्विरोधादुक्तं तदिति । तत्र वादजल्पौ सप्रयो- जनाविति भाष्यम् । तस्य कुत उत्थानं तेनानेन प्रयोजनेन सर्वे प्रा- णिनः सर्वाणि कर्माणि सर्वाश्च विद्या व्याप्ता इति तत्र वादजल्पौ

(१) प्रत्यक्षविरुद्धम्—पा० ३ पु० ।
(२) पक्षत्वात्—पा० ३ पु० ।

किंप्रयोजनाविति युक्तो विचार इत्याह । तत्र वादजल्पौ सप्रयोजनाविति । तस्मिन् न्यायाभास इति । वितण्डा तु परीक्ष्यते सप्रयोजना निष्प्रयोजना वेति । एके तावद्वर्णयन्ति निष्प्रयोजना दूषणमात्रत्वात् । तच्च नैवं न दूषणमात्रं वितण्डा किन्त्वभ्युपेत्य पक्षं यो न स्थापयति स वैतण्डिक उच्यते । अथ पक्षमपि न प्रतिपद्यते उन्मत्तवदुपेक्षणीयः स्यात् । अथ परपक्षप्रतिषेधज्ञापनं प्रयोजनमिति तादृगेवैतत् । एतस्मिन्नपि चतुर्वर्गं चेत् प्रतिपद्यते सोऽस्य पक्षः चतुर्वर्गो भाष्य उक्तः । अथ न प्रतिपद्यते पूर्ववदुपेक्षणीयः । प्रतिपक्षस्थापनाहीनं च वाक्यं वितण्डेत्युच्यते । तस्य यमर्थं प्रतिपद्यते सोऽस्य पक्षः । अथ न प्रतिपद्यते पूर्ववद्दोष इत्युक्तं प्रयोजनमिति । प्रत्यक्षविषयोऽर्थो दृष्टान्तः । किमुक्तं भवति । लौकिकपरीक्षकाणां दर्शनाविघातहेतुरिति । एवं चात्मादिव्याप्तिरिति दर्शनाविघातहेतुत्वेन दृष्टान्ते वर्ण्यमाने आत्मादि व्याप्तं भवति । प्रत्यक्षादिविषयतायां चात्मादि त्यक्तं भवति । ततश्चोदाहरणसूत्रं व्याहन्येत । सोऽयं दृष्टान्तः प्रमेयमुपलब्धिविषयत्वात् तस्य पृथगुपदेशो न्यायस्य तन्मूलत्वात् सति तस्मिन्ननुमानागमौ स्यातामसति तु न स्यातामिति पूर्वं प्रत्यक्षदृष्टमर्थमनुमिमते । पूर्वं ज्ञातं चार्थं परस्मै आचक्षते नास्तिकस्य च व्याघातो ऽभ्युपगमे ऽनभ्युपगमे वा तदुक्तं भाष्य इति । अभ्युपगमव्यवस्था सिद्धान्तः । अभ्युपगम इदमित्थम्भूतं वेति । इदमिति सामान्यत इत्थम्भूतमिति विशेषतस्तस्य व्यवस्था इदं सांख्येष्विदं योगेष्विति । सर्वतन्त्रसिद्धान्तस्तर्हि न सिद्धान्तोऽव्यवस्थानात् न ह्ययं क्वचिद्व्यवतिष्ठत इति । तच्च न योऽयं सर्वैरभ्युपगम इयमेव व्यवस्था तस्य प्रमेये ऽन्तर्भूतस्य पृथग्वचनं वादादिविषयत्वात् सिद्धान्तभेदे हि वादजल्पवितण्डाः प्रवर्तन्ते इति । अथावयवा वाक्यैकदेशाः किं पुन-

वाक्यं पूर्वपदस्मृत्यपेक्षो(१)ऽन्त्यपदप्रत्ययः स्मृत्यनुग्रहेण प्रतिसन्धीयमानो विशेषप्रतिपत्तिहेतुर्वाक्यं तस्य भागा एकदेशा इति । ते कियन्तः यावद्भिः सिद्धिः परिसमाप्यत इति । का पुनरियं सिद्धिः पदार्थस्य तथाता(२) का परिसमाप्तिः विशेषप्रत्ययः ते समाख्याशब्दैरभिधीयन्ते प्रतिज्ञादय इति तत्रागमः प्रतिज्ञेति न युक्तं आगमस्य तत्त्वव्यवच्छेदकत्वात् प्रतिज्ञार्थस्य च प्रतिपाद्यत्वात् आगमाधिगतस्य प्रतिपाद्यत्वात् आगमः प्रतिज्ञेति न दोषः य एवार्थ आगमेनाधिगतस्तमेव परस्मा आचष्ट इत्यागमः प्रतिज्ञेत्युच्यते । एवं लिङ्गदर्शनमात्रे हेतूपचाराद्धेतुरनुमानमिति । यत्तु द्वितीयं लिङ्गदर्शनं तत्सम्बन्धस्मृतिव्यक्तिहेतुभावाद्धेतुरित्युच्यते । स्मृतिविषयस्य प्रत्यक्षतः पुनरूपदर्शनादुदाहरणं प्रत्यक्षं यस्मात् पूर्वानुभूतमर्थं स्मरति स्मृतं च विषयमुदाहरणत्वेनादत्ते । तेन पूर्वानुभवप्रसिद्धमनुविधीयमानं प्रत्यक्षमिव प्रत्यक्षमिति । कः पुनरुपमानार्थः अविप्रतिपत्तिः यथा प्रत्यक्षे न विप्रतिपद्यते एवमुदाहरणेऽपीति । यथा तथेत्युपमानैकदेशो उपमानोपचारादुपमानमुपनय इति । उपमानं खलु यथा तथेत्युपदेशोपयोगे सति प्रत्यक्षागमस्मृतिपूर्वकं सारूप्यज्ञानमुपमानमिति तत्रोपमानैकदेशे उपमानमित्युपचरन्ति । सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति । कः पुनरेकार्थसमवायः एकवाक्याध्यारोपः किं पुनः सामर्थ्यं इतरेतरसम्प्रत्यायितार्थापेक्षित्वम् । एतच्च वक्ष्याम इति । निगम्यन्तेऽनेन प्रतिज्ञादय एकार्थेन सम्बद्ध्यन्त इति । सोऽयं परमो न्याय इति । कः पुनः परमार्थः विप्रतिपन्नपुरुषप्रतिपादकत्वम् एकैकशः प्रमाणानि प्रवृत्तानि न विप्रतिपन्नं पुरुषं

---

(१) स्मर्यमाणं विशेष्यवाचिपदं स्मर्यमाणविशेषणपदसपेक्षाम् ।

(२) तथाता तथात्वम् ।

प्रतिपादयन्ति वाक्यभावापन्नानि पुनर्विप्रतिपन्नमतोऽयं परम इति । किं ? पुनरवयवाः प्रमाणान्तरमुत तेष्वन्तर्भवन्तीति । किं चातः यदि प्रमाणान्तरं परिसंख्यानमयुक्तम् अथ तेष्वेवान्तर्भवन्ति पृथगभिधानानर्थक्यमवयवानामिति । न प्रमाणान्तरमिति ब्रूमः । संहतानामेतेषां वाक्यपरतन्त्राणां विप्रतिपन्नपुरुषप्रतिपादकत्वेन पृथगुपादानमिति । त एते ऽवयवाः पृथग्भवन्तो वादजल्पवितण्डानां प्रवृत्तिहेतवो भवन्ति । तत्त्वव्यवस्थायाश्चाश्रया भवन्तीति । क आश्रयार्थः । विशेषप्रतिपादकत्वमिति । तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरमपरिच्छेदकत्वात् । प्रमाणं परिच्छेदकं न तर्कः । तस्मान्न प्रमाणं न प्रमाणान्तरमप्यत एव । प्रमाणविषयविभागात्तु प्रमाणानामनुग्राहकः । यः प्रमाणानां विषयस्तं विभजते । कः पुनर्विभागः ? युक्तायुक्तविचारः इदं युक्तमिदमयुक्तमिति । यत्तत्र युक्तं भवति तदनुजानाति न त्ववधारयति । अनवधारणात् प्रमाणान्तरं न भवति । तस्योदाहरणं भाष्ये कर्मनिमित्तं जन्मेति । कथं पुनः कर्मनिमित्तं जन्म भेदवत्त्वात् । कः पुनर्भेदः सुगतिर्दुर्गतिश्चेति । सुगतौ देवो मनुष्य इति । मनुष्यत्वे पुमानितर इति । पुंस्त्वे ब्राह्मणोऽन्य इति । ब्राह्मणत्वे पट्विन्द्रियो मृद्विन्द्रिय इति । पट्विन्द्रियतायामुच्चाभिजनो नीचाभिजन इति । उच्चाभिजनतायां सकलो निष्कल इति । साकल्ये विद्वान् मूर्ख इति । विद्वत्तायां समाश्वासी परित्रस्त इति । समाश्वासे वशी परायत्त इति । दुर्गतावपि तिर्यङ् नारक इति । नारकत्वेपि कूटशाल्मल्यामयःकुम्भ्यामिति । तिर्यक्तायां गौरितर इति । सोऽयं भेदोऽनेकप्रवास्थितमनित्यमेकद्रव्यं प्रत्यात्मनियतं निमित्तमन्तरेण न युक्तः । किं कारणं ? पृथिव्यादीनां सर्वपुरुषसाधारण्यात् पृथिव्यादिगतस्य च नियमहेतोरभावात् सर्वं सर्वात्मकं प्रस-

ज्येत । दृष्टश्च नियमभेदस्तस्मात् कर्म नियामकमिति । सो-ऽयमित्थम्भूतस्तर्क उपलब्धिविषयत्वात् प्रमेयम् ।

निर्णयस्तत्त्वज्ञानं प्रमाणानां फलम् । कदा पुनर्निर्णयः प्रमाणानां फलमिति ?। यदा वस्त्वन्तरपरिच्छेदहेतुत्वेन नोपादीयते तदा फलं यदा तेन परिच्छिनत्ति तदा प्रमाणमिति न व्यवतिष्ठते प्रमाणफलभावः । एतच्च वक्ष्यामः "प्रमेयता च(१) तुलाप्रामाण्यव"दित्येतस्मिन् सूत्रे निमित्तद्वयसमावेशादेकं वस्तु द्विशब्दवाच्यमिति । तावेतौ तर्कनिर्णयौ लोकयात्रामुद्वहत इति । बुद्ध्वा बुद्ध्वा(२) लोकः प्रवर्तमानस्तर्कनिर्णयाभ्यां हेयं जहाति उपादेयं चोपादत्ते । अस्यान्तर्भावः प्रमाणेषु प्रमेयेषु वा यदा फलं तदा प्रमेयं यदा तेन परिच्छिनत्ति तदा प्रमाणमिति ।

वादो नानाप्रवक्तृक इति सिद्धान्तभेदानुविधाना-न्नानावक्तृक इति प्रत्यधिकरणसाधनोऽन्यतराधिकरणनिर्ण-यावसान इति । अधिकरणमधिकरणं प्रति प्रत्यधि-रणम् अस्य साधनमिति । किमुक्तं भवति । उभाभ्यां साधनं वक्तव्यमिति । अन्यतरस्मिन्नधिकरणे निर्णयः । एतच्च वक्ष्यामः । सोऽयं किंरूपो वादः ? वाक्यसमूह इत्याह । ननु च प्रमाणतर्कसाधनोपालम्भ इति श्रूयते प्रमाणानि च ज्ञानात्मकानि "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञान"मित्येवमादिना प्रक्रमेण प्रमाणानि ज्ञानात्मकानीत्युक्तं तर्कश्चोहः स चोहो ज्ञानात्मक एव तस्माद्वाक्यसमूहोवाद इत्ययुक्तम् । न । प्रमाणतर्कसाधनोपालम्भस्यान्यथा व्याख्यानात् । तच्च सूत्रं वर्णयिष्यन्तो वक्ष्यामः ।

(१) प्रमेया च— पा० १ पु० ॥
(२) बुध्वा—पा० ३ पु० ॥

तद्विशेषौ जल्पवितण्डे इति । कः पुनर्विशेषोऽङ्गाधिक्यमङ्गहानिश्चेति । छलजातिनिग्रहस्थानप्रयोगादधिको जल्पः । स प्रतिपक्षस्थापनाहीनस्तु वितण्डा । एतावता विशेषेण कथामार्गभेद इति । विषयभेदाच्च भेदः शिष्यादिविषयो वादः शिष्यमाणविषये जल्पवितण्डे इति ।

अन्यतमलिङ्गधर्मानुविधानेन प्रवर्तमाना अहेतवः सन्तो हेतुवदाभासन्त इति हेत्वाभासाः । ते च निग्रहस्थानम् । निग्रहस्थानप्राप्तानां पुनरेषां पृथगुपदेशो वादे देशनीयत्वादिति भाष्यम् । यस्मात् किलैते वादे देश्यन्ते अतः पृथगुपदिश्यन्ते । नोभयथाप्यसम्बन्धात् न वादे देशनीयत्वं पृथगुपदेशाविनाभावि, पृथगुपदेशो वा वादे देशनीयत्वाविनाभावीति । यदि तावद्यः पृथगुपदिश्यते स वादे देश्यत इति सर्वे पदार्था वादे देशनीयाः प्रसज्यन्त इति । किं कारणं? सर्वे पृथगुपदिष्टा इति । अथ वादे देश्यन्ते ते पृथगुपदिश्यन्त इति । तदपि नानेकान्तात् । न तावन्निग्रहस्थानेभ्यो न्यूनाधिकयोः पृथगुपदेशोऽथ च देश्येते वादे । तस्माद्वादे देशनीयत्वादेषां पृथगुपदेश इति यत्किञ्चिदेतत् । एतदेव तु न्याय्यं पृथगुपदेशप्रयोजनं विद्याप्रस्थानभेदज्ञापनार्थत्वादिति । अथ कस्मान्निग्रहस्थानभावापन्नानां हेत्वाभासानां पृथगुपदेश इति । प्रमाणसामान्यात् पृथगुपदेश इति । अथ कस्माद्वादे देश्यन्ते प्रमाणसामान्यात् । प्रमाणानि वादे ऽभिधीयन्ते प्रमाणसामान्यं च हेत्वाभासेऽस्तीति । अतः प्रमाणसामान्याद्वादे ऽभिधीयन्त इति । अथ वादे निग्रहस्थानानि कानि चित् सन्ति कानिचिन्नेति किमयं पदार्थानां नियोगः, अथ तथाभूतानामन्वाख्यान-

मिति ?, किं चातः यदि तावन्नियोग एवं भवतैवं मा भवतेति एवं पदार्थाननुजानानो भवानुपेक्षणीयः । अथ स्वरूपत एवावस्थिताः पदार्थास्तानजानाति भवान् कस्मान्निग्रहस्थानानि कानिचिद्वादे भवन्ति कानिचिन्नेति वक्तव्यम् । न । लक्षणपरतन्त्रत्वादर्थतथाभावस्येति ब्रूमः । न पदार्था वक्तृनियोगमनुविधीयन्ते । यथा तु भवन्ति तथाभूता एवार्था अन्वाख्यायन्ते । सोऽयं लक्षणपरतन्त्रत्वमाचक्षाणो नाभ्याख्येयः पदार्था भवता नियुज्यन्त इति वादस्य शिष्यादिविषयत्वात् । न च शिष्यादिभिः सह वादं कुर्वाणेनापि अप्रतिभादिदेशना कार्या, तावदस्याभिधेयं यावदसौ बोधितो भवतीति । प्रमाणप्रतिरूपकत्वाद्धेत्वाभासानामविरोध इति । किं कारणं ? भ्रान्तेः पुरुषधर्मत्वात पुरुषधर्म एव भ्रान्तिरिति । सोऽयं भ्रान्त्या प्रमाणं ब्रुवन् प्रमाणाभासमपि ब्रूते अतोऽस्य निग्रह इति । कः पुनः शिष्याचार्ययोर्निग्रहः ? विवक्षितार्थाप्रतिपादकत्वम । न्यूनाधिकापसिद्धान्तानां वादे कथमवतारः ? प्रमाणसामान्याद्वेव । न्यूनस्यापि प्रमाणसामान्यमतिक्रम्यापि । अवयवविहीनताऽवयवाधिक्यं वाक्यस्य भ्रान्त्या भवतीत्यस्यावतारः । जल्पवितण्डयोस्तु निग्रहस्थानानीति विजिगीषुभिर्जल्पवितण्डाभ्यां प्रत्यवस्थेयम्(१) । तस्य यथासम्भवं निग्रहस्थानानि वक्तव्यानीति नोपेक्षणीयः । छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनं परवाक्ये पर्यनुयोगः परिज्ञानार्थमेव केवलम । छलजातिनिग्रहस्थानानि स्वयं न प्रयोक्तव्यानि जातेश्च स्वयं सुकरः प्रयोग इति न, व्याघातात्, स्ववाक्ये परिवर्जनं सुकरश्च प्रयोग इति

(१) विजिगीषुर्जल्पवितण्डाभ्यां प्रत्यवस्थेयः—पा० १ पु० ॥

व्याहतम् यदि सुकरः प्रयोगो न स्ववाक्ये परिवर्जनम्, अथ स्ववाक्ये परिवर्जनं न सुकरः प्रयोग इति व्याघातः । न व्याघातः, प्रश्नापाकरणार्थत्वात् । स्वयं च सुकरः प्रयोग इति किमुक्तं भवति । परेण जातौ प्रयुक्तायां प्राश्निकान् ब्रवीति जातिरनेन प्रयुक्तेति त एनं पर्यनुयुञ्जीरन् कथं जातिष्कतमा जाति(१)रतो जात्यभिज्ञः शक्नोति वक्तुमेवं जातिरियं जातिरिति । एवं च सुकरः प्रयोग इति । तस्मादेते संशयादयः पदार्थाः प्रमाणे प्रमेये चान्तर्भवन्तो विद्याप्रस्थानभेदज्ञापनार्थं पृथगुपदिष्टाः ।

सेयमान्वीक्षिकी न्यायविद्या प्रमाणादिभिः पदार्थैर्विभज्यमाना प्रदीपः सर्वविद्यानां भवति प्रकाशकत्वात् प्रदीपवत् प्रमाणादिप्रतिपादितमर्थमितरा विद्याः प्रतिपद्यन्त इति । किमितरासु विद्यासु प्रमाणादीनि न सन्ति ? न सन्तीत्याह । कथं न सन्ति ? अनधिकारात् । न ताः विद्याः प्रमाणादिपरिज्ञानेनाधिक्रियन्ते इति प्रमाणादिप्रकाशिते त्वर्थे ताः प्रवर्तन्त इति । उपायः सर्वकर्मणामिति । प्रकाशितानां करणादुपायः यस्मात् प्रमाणादिप्रकाशितमर्थमितरा विद्याः कुर्वन्ति(२) । आश्रयः सर्वधर्माणामिति । सर्वविद्योपकारकत्वादाश्रयः । सर्वासां विद्यानामियमुपकरोति उपकारित्वादाश्रयो राजभृत्यवदिति ।

तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविद्यं वेदितव्यमिति । सर्वासु विद्यासु तत्त्वज्ञानमस्ति निःश्रेयसाधिगमश्चेति । त्रय्यां तावत् किं तत्त्वज्ञानं कश्च निःश्रेय-

(१) कतमा सा जाति—पा० ३ पु० ॥
(२) विषयं विधेयतया निषेध्यतयेति शेषः ॥

साधिगम इति । तत्त्वज्ञानं तावदग्निहोत्रादिसाधनानां स्वागता-दि(१) परिज्ञानमनुपहतादिपरिज्ञानं च । निःश्रेयसाधिगमोऽपि स्वर्गप्राप्तिः तथाह्यत्र स्वर्गः फलं श्रूयते इति । अथ वार्तायां किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति । भूम्यादिपरिज्ञानं तत्त्व-ज्ञानं भूमिः कण्टकाद्यनुपहतेत्येतत्तत्त्वज्ञानं कृष्याद्याधिगमश्च निः-श्रेयसमिति तत्फलत्वात् । दण्डनीत्यां किं तत्त्वज्ञानं कश्च निःश्रेयसाधिगम इति । सामदानदण्डभेदानां यथाकालं यथादेशं यथाशक्ति विनियोगस्तत्त्वज्ञानं निःश्रेयसं पृथिवीजय इति । इह त्वध्यात्मविद्यायामात्मज्ञानं तत्त्वज्ञानं निःश्रेयसाधिगमोऽपवर्गप्रा-प्तिरिति । यत्पुनः प्रमाणादितत्त्वज्ञानान्निःश्रेयसं न तद्विवक्षितं मदमानादिनिमित्तत्वाद्वादादिपरिज्ञानस्य नाभिसम्बन्धो निःश्रे-यसेनेति केचित् । न चानाभिसम्बद्धं प्रतिपादयतीत्ययुक्तमुक्तं प्र-माणादितत्त्वज्ञानान्निःश्रेयसमिति । न । सूत्रार्थापरिज्ञानात् । सूत्रार्थं न व्यज्ञासीर्यदेवं प्रत्यपत्थाः । क एवं सूत्रार्थं वर्णयति प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसमिति । अपि तु यत्परि-ज्ञानान्निःश्रेयसं तदुत्तरसूत्रे वक्ष्यामः । उक्तं चात्मादेः प्र-मेयस्य तत्त्वज्ञानान्निःश्रेयसाधिगम इति । यच्चेदमुच्यते मद-मानादिनिमित्तं वादादय इति । एतच्च न । असति भा-वात् सति चाभावात् । असति वादादिज्ञाने रागादयः सनकादीनां भवन्ति(२) सति च तत्त्वविदां न भवन्ति तस्मान्न वादादिपरिज्ञानं रागादीनां निमित्तमिति ॥

न तत्त्वपरिज्ञानादपवर्ग उभयथा दोषात् । यदि तत्त्वज्ञाना-नन्तरमेवापवर्गः स्यात्तद्वामवस्थानं न स्यात् । तद्वतां चा-

---

(१) विशुद्धोपायेन द्रव्यागमः ॥

(२) सनको मदादिप्रधानो दासः । सम्भवन्ति—पा० ३ पु० ॥

वस्थानं दृष्टं, कुतः शास्त्रसम्प्रदायाऽविच्छेदात् सम्प्रदायो नाम शिष्योपाध्यायसम्बन्धस्याविच्छेदेन शास्त्रप्राप्तिः । यदि तत्त्वज्ञानादपवर्गः स्यात् शास्त्रसम्प्रदायो विच्छिद्येत यस्य यदा तत्त्वज्ञानं वृत्तं स तदैवापवृक्त इति । अथोत्पन्नतत्त्वज्ञानोऽवतिष्ठते न तत्त्वज्ञानं कारणं सद्भावात् । सत्यपि तत्त्वज्ञाने यस्याभावान्नापवृज्यते सोऽन्योर्थ इति । कारणं हि तद्भवति यस्मिन् सति यद्भवति यस्मिंश्चासति यन्न भवति । अनधिगतार्थपूर्वं वा शास्त्रं स्यात् । अथ तत्त्वज्ञानानन्तरमपवर्गे वातपुत्रीयं(१) शास्त्रं स्यात् न तत्त्वदृक्पूर्वकमिति । न । निःश्रेयसस्य परापरभेदात् । यत्तावदपरं निःश्रेयसं तत् तत्त्वज्ञानानन्तरमेव भवति । तथा चोक्तम् । जीवन्नेव हि विद्वान् संहर्षायासाभ्यां विमुच्यत इति । अयं शास्त्रार्थ इति । परं च निःश्रेयसं तत्त्वज्ञानात् क्रमेण भवति । क्रमप्रतिपादनार्थं चेदं सूत्रं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामित्येवमादि ॥

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः(२) ॥ २ ॥

एतत्सम्बन्धेनैवार्थवत्पदार्थस्तु वक्तव्यः तत्रात्माद्यपवर्गपर्यन्तं प्रमेयं ज्ञेयम् । तत्र मिथ्याज्ञानमनेकप्रकारकं वर्तते(३) । को वृत्त्यर्थो विषयार्थः । तत्रायं भेदः । तत्रात्मनि तावन्नास्तीति । आत्मा तावदस्तित्वेन प्रमाणसामर्थ्यादधिगतः ।

(१) धूर्त्तप्रणीतम् ॥

(२) तदनन्तराभावात्—पा० २ पु० ।

(३) तत्र प्रमेये मिथ्याज्ञानमनेकप्रकारं वर्तते प्रमेयविषयं भवतीत्यर्थः ॥

अस्तित्वेनाधिगते नास्तीति विज्ञानं मिथ्याप्रत्ययः । तस्यानुपपत्तिः सदसतोः सारूप्याभावादिति चेत् । न । प्रमाणगम्यतोपपत्तेः । न हि सदसती सरूपे यतोऽसत्सामान्याद्सद्धर्मारोपेणात्मनि मिथ्याप्रत्ययः स्यादिति । तच्च नैवं, प्रमाणगम्यतोपपत्तेः । सदसतोः प्रमाणगम्यत्वं सारूप्यं क्रियागुणव्यपदेशस्तद्राहित्यता च विशेषः । सोऽयमसद्धर्मान् सत्यात्मन्यारोप्य विपर्येति नास्त्यात्मेति । एवमनात्मनि शरीरे आत्मेति । किं पुनरनात्मनः शरीरादेरात्मना साधर्म्यं यत एतद्भवति अनात्मन्यात्मेति । अहङ्कारविषयत्वं सारूप्यम् । इच्छाद्याधारानाधारतेति(१) विशेषः । यथैवात्माहङ्कारस्य विषयस्तथा शरीरादयोऽपि । कथं पुनः शरीरे ऽहङ्कारः शरीरवाचकशब्दसामानाधिकरण्यात् शरीरे ऽहङ्कारो गौरोऽहमित्यादि । इच्छाद्याधार आत्मा न शरीरादय इति विशेषः । एतच्चोपरिष्टाद्वक्ष्यामः । सोऽयमात्मधर्मान् इच्छादीन् शरीरादिष्वध्यारोप्य विपर्येत्यहमेव इति । एवं सामान्यविशेषपरिज्ञाने सति तद्विपरीतधर्माध्यारोपेण विपर्ययः सर्वत्र भवति । कः पुनरयं विपर्ययः ? अतस्मिंस्तदिति प्रत्ययः । शेषं भाष्ये ।

त इमे दुःखादयो मिथ्याज्ञानपर्यवसाना अविच्छेदेन प्रवर्त्तमानाः संसार इति । कः पुनरयं संसारः ? दुःखादीनां कार्यकारणभावः । स चानादिः । पूर्वापरकालानियमात् । न च शक्यं वक्तुं पूर्वं दुःखादयः पश्चान्मिथ्याज्ञानोत्पत्तिरिति, पूर्वं वा मिथ्याज्ञानं पश्चाद्दुःखादय इति न शक्यं वक्तुमिति । यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति । कथमपायः ? समानविषये तयोर्विरोधात् । यस्मान्मिथ्याज्ञानं

(१) इच्छाद्याधारतानाधारतेति—पा० ३ पु० ॥

तत्त्वज्ञानं च एकस्मिन् विषये विरुध्येते वस्तुनो द्वैरूप्या-सम्भवात् । न ह्येकं वस्तु द्विरूपं भवति । तस्मान्मिथ्याज्ञानं तत्त्वज्ञानेन निवर्त्यत इति । कथं पुनः पूर्वोत्पन्नं मिथ्याज्ञानं पश्चादुत्पद्यमानेन तत्त्वज्ञानेन निवर्त्यते ? मिथ्याज्ञानस्याऽसहाय-त्वात् मिथ्याज्ञानमसहायमतो निवर्त्यते । सम्यग्ज्ञानस्य च विषयः सहायी भवति । कस्मात् ? तथात्वेनावस्थानात् तथाभू-तोऽसौ विषयो यथा तत्र तत्त्वज्ञानमिति । प्रमाणान्तरानु-ग्रहाच्च आगमानुमानादिप्रमाणं तत्त्वज्ञानस्य सहायो भवति । यदा ह्ययमनुमानागमयोः प्रतिसंहितयोर्विषयं भावयति समा-हितोऽनन्यमनाश्चिन्तयति(१) ततोऽस्य विपच्यमाने ध्याने वि-विक्तायां ध्यानभावनायां तस्मिन्नर्थे तत्त्वप्रतिबोधि ज्ञानं प्रत्य-क्षमुत्पद्यत इति । सोऽयमागमानुमानप्रत्यक्षाणां विषयं प्र-तिपद्यमानस्तत्त्वमेतदिति प्रतिपद्यते । तत्त्वप्रतिपत्तेरस्य मि-थ्याज्ञानं निवर्तत इति । निवृत्ते च मिथ्याज्ञाने न पुनस्त-द्विषयं मिथ्याज्ञानमुत्पद्यत इति विरोधादित्युक्तम् । कः पुनर्वि-रोधः ? सहासम्भवः । मिथ्याज्ञानाभावे रागादयोऽपयन्तीति का-र्यकारणभावादेव । कारणं मिथ्याज्ञानं कार्याः रागादयः । न च कारणं विना कार्यं भवितुमर्हति । ये तावदनुत्पन्ना रागादयस्ते कारणाभावान्नाभूवन् । ये तूत्पन्नास्ते कथं ? तेषामपि वैराग्या-न्निवृत्तिः । किं पुनर्वैराग्यं ? भोगानभिष्वङ्गलक्षणमित्युक्तं अस-क्तिश्च सक्तिं बाधते । तत्पुनर्वैराग्यं कथं भवति ? तत्त्वज्ञानाद्विषय-दोषदर्शनादिति । दोषाभावे प्रवृत्त्यभावः । यदाऽस्य सम्यग्-ज्ञानवतो दोषा अपयन्ति अथ दोषाभावे प्रवृत्तिर्निवर्तत इति । का पुनरियं प्रवृत्तिः ? धर्माधर्मौ, जन्मसाधनत्वात् । नास्मिन् सूत्रे

(१) आश्रयति—पा० ३ पु० ॥

क्रिया प्रवृत्तिशब्देनोच्यते, अपि तु धर्माधर्मौ, तत्साधनभावात् । जन्मसाधनं धर्माधर्मौ न प्रवृत्तिः क्रियायाः क्षणिकत्वात् । धर्माधर्मयोस्तु प्रवृत्तिशब्दः प्रवृत्तिसाधनत्वादिति । यौ तावदनागतौ धर्माधर्मौ तयोर्दोषाभावादभावो युक्तः । यौ तौ वर्तमानौ तयोर्न युक्तः। किं कारणं? निर्दोषस्यापि भावात् निर्दोषोप्ययमवतिष्ठते धर्माधर्मयोश्च फलं भुङ्क्ते इति । न । अनागतयोः साधनाभावेनेष्टत्वात् । न ब्रूमो यौ वर्तमानौ धर्माधर्मौ तौ दोषाभावान्न भवत इति । अपि तु यावनागतौ तौ कारणाभावान्नोत्पद्येते इति । वर्तमानयोः पुनः कार्यावसानात् प्रक्षयः यौ तौ वर्तमानौ धर्माधर्मौ तयोर्यदावसानिकं कार्यं तेन व्यावृत्तिः । प्रवृत्त्यभावे जन्मापायः अत्रापि धर्माधर्मयोर्व्यावृत्तयोर्यदन्यच्छरीरं तन्न भवाति न पुनर्वर्तमानं न भवतीति । अथ वर्तमानस्य कथं निवृत्तिः? संस्कारक्षयात् यावदस्य स्थितिहेतुः संस्कारो धर्माधर्मसमाख्यातोऽवतिष्ठते तावदवतिष्ठते इति । जन्माभावे दुःखाभाव इति निरायतनस्यानुत्पत्तेः न हि निरायतनं दुःखमुत्पत्तुमर्हति । एतच्च तदाहुर्यावदात्मनि धर्माधर्मौ तावदायुः शारीरमिन्द्रियं विषयाश्चेति । सोऽयं मिथ्याज्ञानादिकलापेन सर्वतो वियुक्तो(१) विमुक्त इत्युच्यते । तत्त्वज्ञानं तु खलु मिथ्याज्ञानविपर्ययेण व्याख्यातम् । स्वरूपतस्तु यथाव्यवस्थितपदार्थाधिगतिरित्युच्यते । कस्मात् पुनरयं हाता सुखदुःखे जहाति न पुनः सुखमादाय दुःखं जहातीति ? । विवेकहानस्याशक्यत्वात् । न हि विवेकहानं शक्यं कर्तुं अतः सुखमुपभोक्तुकामेन दुःखमपि भोक्तव्यम् । दुःखं वा जिहासता सुखमपि हातव्यं सविषान्नवदिति । सुखं दुःखानुषक्तमनादेयमिति ।

(१) विमुक्तो—पा० १ पु० ॥

अनुषङ्गोऽविनाभावः यत्रैकं तत्रेतरदिति । समाननिमित्तता वानुषङ्गः यान्येव सुखसाधनीनि तान्येव दुःखसाधनानीति । समाननिमित्तता वाऽनुषङ्गः यान्येव सुखसाधनानि तान्येव दुःखसाधनानीति । समानाधारता वाऽनुषङ्गः यत्र सुखं तत्र दुःखमिति । समानोपलभ्यता वानुषङ्गः येन सुखमुपलभ्यते तेन दुःखमपीति(१) ॥

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति भाष्यम । प्रवृत्तेस्त्रैविध्यं कुतः ? अर्थस्य तथाभावात् नामी पदार्था वक्त्रा त्रेधा व्यवस्थाप्यन्ते एवं भवतेति । किन्त्वर्थ एवायं तथाभूतो येन त्रेधा भवतीति । नामधेयेन पदार्थमात्राभिधानमुद्देश इत्ययुक्तं घ्राणादिसूत्रव्याघातात् । "घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणी"-ति लक्षणमुक्तम् । न चेदं नामधेयेनोद्देशमात्रात्क्रियते । मात्रग्रहणसामर्थ्यादप्रसङ्गः पदार्थमात्राभिधानमित्युक्तं न च घ्राणादीनां पदार्थाभिधानमात्रत्वं कारकशब्दत्वात्–कारकशब्दा एते घ्राणादीति। तस्मान्नोद्देशप्रसङ्गः। उद्दिष्टस्य विभागो द्वेधा भवति । लक्षितस्यालक्षितस्य । लक्षितस्य(२) छलादेरलक्षितस्य(३) प्रमाणादेरिति । अथोद्दिष्टविभागद्वारेण(४) सूत्रम । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति ॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ ३ ॥

सूत्रार्थो निगदेनैव व्याख्यातः । उद्दिष्टविभागानर्थक्यम् व्याघातात् । त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरित्युक्तमुद्दिष्टविभागश्च न त्रिविधायां शास्त्रप्रवृत्तावन्तर्भवतीति । तस्मा-

(१) इति द्विसूत्रीवार्त्तिकमित्यधिकं २ पु० ॥
(२) सामान्यतः ॥ (३) विशेषतः ॥
(४) विभागद्वारा प्रमाणसंख्यां नियन्तुं सूत्रम ॥

दुद्दिष्टविभागो न युक्तः । न । उद्दिष्टविभागस्योद्देश एवान्तर्भावात् । उद्दिष्टविभाग उद्देश एवान्तर्भवतीति । कस्मात् । लक्षणसामान्यात् । समानं लक्षणं नामधेयेन पदार्थाभिधानमुद्देश इति । किं पुनर्विभागेन प्रयोजनम् । नियमः । यदि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति विभागो न क्रियेत नियमो(१) न गम्यते चत्वार्येव प्रमाणानीति । लक्षणतश्चतुष्टाधिगतिरिति चेत् । न । लक्षणस्येतरव्यवच्छेदहेतुत्वात् । स्यादेषा बुद्धिः लक्षणतः प्रमाणचतुष्टं गम्यत इति, यस्माच्चतुर्णां लक्षणमुक्तमिति । न । लक्षणस्येतरव्यवच्छेदहेतुत्वात् । लक्षणं खलु लक्ष्यं समानासमानजातीयेभ्यो व्यवच्छिनत्ति नियमं तु न शक्नोति कर्तुमन्यार्थत्वादिति । अन्यासम्भवस्य ततोऽनधिगतेः । न हि लक्षणतोऽन्यासम्भवोऽधिगम्यते । ततश्चतुर्णामनभिधाने चतुर्णां लक्षणोपदेशात् संशयः स्यात्—किं विद्यमानानि न लक्षितानि आहोस्विदविद्यमानानीति । तस्मात् संशयनिवृत्त्यर्थं युक्तो विभागोद्देश इति । अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षमिति । अयं च सूत्रविवक्षायामव्ययीभावः समासः । अन्यथा तु वस्तुनिर्देशो न समासः, समासे हि अक्षस्येति षष्ठी न श्रूयेत । कः पुनरयं समासः ? प्रादिसमासोऽयं द्रष्टव्यः प्रति गतमक्षं प्रत्यक्षमिति यथोपगतो गोभिरुपगुरिति । एवमनुमानादिषु द्रष्टव्यम् । मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानमिति न युक्तम् । फलाभावात् । एतस्मिन् व्याख्याने ऽफलमनुमानमिति । किं कारणम्? अर्थस्य मितत्वात् । नैष दोषः । मितेन लिङ्गेन अर्थस्य पश्चान्मानं भवति यत इत्यर्थः । भवतु वाऽयमर्थो लैङ्गिकी प्रतिपत्तिरनुमानमिति । ननु च फलाभावो दोष उक्तः ? न दोषः ।

(१) नियमेऽपि – पा० ३ पु० ॥

हानोपादानोपेक्षाबुद्धीनां फलत्वात् । सर्वं च प्रमाणं स्वविषयं प्रति भावसाधनं प्रमितिः प्रमाणमिति । विषयान्तरं प्रति करण-साधनं प्रमीयते ऽनेनेति प्रमाणम् । यदि भावसाधनः प्रमाण-शब्दः किं फलं विषयस्याधिगतत्वात् । उक्तं फलं हानादिबु-द्धय इति । ज्ञाते तद्भावात् । ज्ञाते खल्वर्थे त्रिधा बुद्धिर्भवति हेयो वोपादेयो वोपेक्षणीयो वेति । केचित्तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति । न तन्न्याय्यं प्रमाणाभावात् । सन्निकर्ष एव प्रमाण-मिति न प्रमाणमस्ति । उभयं तु युक्तं परिच्छेदकत्वात् । उभ-यं परिच्छेदकं सन्निकर्षो ज्ञानं च । एकान्तवादिनस्तु दोष इति । सामीप्यमानमुपमानमिति न युक्तम् । उपमानस्यान्यथाव्याख्या-नात्(१) । समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थं(२) इत्युक्त-मिदानीं तूच्यते सामीप्यमानमुपमानमिति व्याघातः । नास्ति व्याघातः सामीप्यमानेन समाख्यासम्बन्धप्रतिपत्तेरिष्टत्वात् । य-स्मादयमुपयुक्तोपमानो गोदर्शी आगमप्रत्ययाहितस्मृतिपूर्वकं गवा सादृश्यं प्रत्यक्षेण प्रतिपद्यास्य गवयशब्दः संज्ञेति संज्ञासंज्ञि-सम्बन्धं प्रतिपद्यते तस्मान्न व्याघात इति । शब्दविषया प्रतिपत्तिः शाब्दप्रमाणं, फलं तदेव ।

केचित्तु क्रमप्रयोजनं वर्णयन्ति । आदौ प्रत्यक्षग्रहणं प्राधान्यात् । तदनन्तरमनुमानं तत्पूर्वकत्वात् । तदनन्त-रमुपमानं तत्साधर्म्यात् । अन्ते शब्दो महाविषयत्वात् । तच्चायुक्त-मित्यपरे मन्यन्ते । क्रमाभिधानस्य न्यायप्राप्तत्वात् । न्यायप्राप्तं क्रमाभिधानं क्रमवृत्तित्वाद्वाच इति । महाविषयत्वाच्च शब्दस्या-दावभिधानप्रसङ्ग इति । एतच्चायुक्तम् । क्रमवृत्तित्वाद्वाचो ऽयु-

(१) अन्यथाव्याख्यातत्वात्-पा० ३ पु० ॥

(२) उपमानम्-पा० ३ पु० ॥

गपदभिधानं युक्तं पूर्वापराभिधाने तु न साधनमेतत् । तस्मादन्यो न्यायो वक्तव्यः । स चायं न्यायः प्रत्यक्षं पूर्वं प्राधान्यादिति । महाविषयत्वादादौ शब्दोपदेश इति । न । उभयं महाविषयं शब्दः प्रत्यक्षं च । कथमिति ? प्रत्यक्षेणापि सामान्यविशेषतद्वतां ग्रहणं शब्देनापि । तत्र किं शब्दस्यादावुपदेशो भवतु आहोस्वित् प्रत्यक्षस्येति ? प्रत्यक्षस्येति युक्तम् । किं कारणम् ? सर्वप्रमाणानां प्रत्यक्षपूर्वकत्वादिति । किं पुनरेतानि प्रमाणानि संप्लवन्ते अथ प्रतिप्रमेयं व्यवतिष्ठन्त इति ? उभयथा दर्शनं, तच्च प्रमाणत इत्यत्रैव दर्शितम् । सेयं प्रमितिः प्रत्यक्षपरेति । प्रत्यक्षेणाधिगतेऽर्थे आकाङ्क्षाभावात् तत्परा । यथायं लौकिकोऽमुत्राग्निरित्याप्तोपदेशादग्निं प्रत्याहितप्रत्ययस्तं देशं गच्छति । प्रत्यासीदत् पुनर्धूमविशेषणं धूमाङ्गत्वेन व्यवस्थितं हुतभुजं प्रतिपद्यते । आसन्नतरस्त्विदानीमिन्द्रियार्थसन्निकर्षादाग्निप्रत्ययं करोति तदा निराकाङ्क्षो भवतीत्यतः प्रधानं प्रत्यक्षमिति । यत्र संप्लवस्तत्रैवम् । यत्र पुनर्व्यवस्था तत्र गुणप्रधानता न चिन्त्यत इति ।

इति त्रिसूत्रीवार्त्तिकम्(१) ॥

अथ विभक्तानां लक्षणवचनमिति तत्र प्रत्यक्षलक्षणमुच्यते । इन्द्रियार्थसन्निकर्षोत्पन्नमित्यादि सूत्रम् ॥

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ ४ ॥

सूत्रार्थः समानासमानजातीयविशेषकत्वम् । अथ पदानामर्थः कः इन्द्रियार्थसन्निकर्षोत्पन्नमिति ? इन्द्रियेणार्थस्य सन्निकर्षाद्यदुत्पद्यते ज्ञानं तत्प्रत्यक्षमिति । इन्द्रियाणि पुनर्वक्ष्यमा-

(१) इति श्रीपरमर्षिभारद्वाजश्रीमदुद्द्योतकरन्यायाचार्यप्रणीतन्यायत्रिसूत्रीवार्त्तिकं सम्पूर्णम्—पा० ३ पु० ॥

णानि। अर्थश्च। सन्निकर्षः पुनः षोढा भिद्यते। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभावश्चेति। तत्र चक्षुरिन्द्रियं, रूपवान् घटादिरर्थः। तेन सन्निकर्षः संयोगस्तयोर्द्रव्यस्वभावत्वात्। अद्रव्येण च तद्गतरूपादिना संयुक्तसमवायः। यस्माच्चक्षुषा संयुक्ते द्रव्ये रूपादि वर्तत इति। वृत्तिस्तु समवायः। रूपादिवृत्तिना सामान्येन संयुक्तसमवेतसमवायः सन्निकर्षः। एवं घ्राणादिषु गन्धवदादिद्रव्येण संयोगः। तत्समवेतेषु गन्धादिषु संयुक्तसमवायः तद्वर्तिषु च सामान्यादिषु संयुक्तसमवेतसमवायः। शब्दे समवायः। अयं खलु शब्दः संयोगविभागयोनिराद्यः। तत्र कतमः शब्दः संयोगयोनिः कतमश्च विभागयोनिरिति? आकाशगुणत्वात् शब्दस्याकाशवृत्तिः संयोगः कारणं गुणकर्मस्वारब्धव्येषु सापेक्ष इति सापेक्षो न निरपेक्ष इति। किमपेक्षते? भेर्याकाशसंयोगः तावत् शब्दस्य कारणं तस्यानुग्राहको भेरीदण्डसंयोगो दण्डगतवेगापेक्ष इति। यदि पुनर्भेरीदण्डसंयोग एव शब्दस्य कारणं स्यात् व्यधिकरणः संयोगः शब्दकारणमिति सर्वत्रोत्पत्तिप्रसङ्गः। विभागाच्छब्दः वंशदलविभागानुगृहीताद् वंशदलाकाशविभागाच्छब्द इति। स उत्पन्नः शब्दः सर्वदिक्कानि शब्दान्तराणि करोति। तान्यपि प्रत्येकं शब्दान्तराणि तावद् यावत् कर्णशष्कुलीमत्याकाशदेश इति। यः कर्णशष्कुलीमत्याकाशदेशे समवैति स समवायादुपलभ्यते। तद्गतेषु च सामान्येषु समवेतसमवायात्। समवाये चाभावे च विशेषणविशेष्यभावादिति। सोऽयं सन्निकर्षशब्दः संयोगसमवायविशेषणविशेष्यभावव्यापकत्वादुपात्त इति। सोऽयं सन्निकर्षः प्रत्यक्षस्य कारणं भवतीति लक्षणत्वेनोच्यते। यदीन्द्रियार्थसन्निकर्षः प्रत्यक्षस्य कारणत्वादुपदिश्यते असत्य-

मिदमुच्यते अन्यान्यपि बहूनि सन्ति तान्यपि वक्तव्यानि । तद्यथा । आत्ममनःसंयोगः, इन्द्रियमनःसंयोगो, विषयप्रकाशसंयोगो, विषयस्थं रूपं, विषयसंयोगिस्थं च महत्त्व,मनेकद्रव्यवत्त्व,मुपलब्धिफलः(१) संस्कार इति । कस्मात्? तद्भावे भावात् तदभावे चाभावादिति । तद्यदि कारणभावादिन्द्रियार्थसन्निकर्षग्रहणमेतान्यपि कारणानि वक्तव्यानि । न वक्तव्यानि । नेदं कारणावधारणार्थं सूत्रमपि तु समानासमानजातीयविशेषणार्थम् । यत्प्रत्यक्षस्यासाधारणं कारणं तदभिधीयते न पुनः साधारणं कारणं निवर्त्यत इति । इन्द्रियमनःसंयोगस्तर्ह्यसाधारणत्वादुपसंख्येयः न ह्ययमनुमानादिज्ञानानां कारणं भवति । न । अनेनैव तस्योक्तत्वात् । इन्द्रियार्थसन्निकर्षग्रहणेनेन्द्रियमनःसंयोग उक्तो वेदितव्यः । किं कारणम्? उभयोरसाधारणत्वात् । न च यावदसाधारणं कारणं तावत्सर्वमभिधातव्यमित्यर्थः । अपि त्वन्यतरेणापि भिद्यत इति अन्यतरोपादानम् । इन्द्रियार्थसन्निकर्षग्रहणं वा विशेषकत्वात् । यदिन्द्रियार्थसन्निकर्षादुपजायते विज्ञानं तस्यान्यतरद्विशेषकं भवति । इन्द्रियमर्थो वा तद्विशेषकं तेन व्यपदेशात् यस्मादिदं ज्ञानमिन्द्रियेण वा व्यपदिश्यते अर्थेन वा रूपविज्ञानमिति चक्षुर्विज्ञानमिति वा । न पुनरिन्द्रियमनःसंयोगेन व्यपदिश्यते । न हि भवति रूपालम्बने ज्ञाने मनोज्ञानमिति । यदा त्वात्ममनःसंयोगान्मानस्यो बुद्धयः प्रवर्तन्ते तदात्मना व्यपदिश्यन्ते मनसा च । यच्चासाधारणं तद्व्यपदेशभाग् भवति । तद्यथा । ऋत्वादिकारणसन्निधानात् प्रादुर्भवन्नङ्कुरो नर्त्वादिभिर्व्यपदिश्यते, अपि त्वसाधारणेन बीजेन व्यपदिश्यते यवाङ्कुर इति तथेहापीत्यदोषः । इन्द्रियमनःसंयोगस्य वाऽग्रहणं भेदे

(१) हेतुः—पा० २ पु० ।

ऽभेदात् । यस्मात् प्रत्यक्षज्ञानभेदे इन्द्रियमनःसंयोगो न भिद्यत इति । यद्यभेदादग्रहणं इन्द्रियार्थसन्निकर्षस्यापि तर्ह्यग्रहणम् एकेन्द्रियग्राह्येषु अभेदादिति प्राप्तं यथा शुक्लो गौर्गच्छतीति ? । न वक्तव्यम्(१) । उक्तोत्तरत्वात् । उक्तोत्तरमेतत् । नेदं कारणावधारणार्थं सूत्रमिति । अनभ्युपगमाच्च । इन्द्रियमनः-संयोगस्य चाऽग्रहणं समानत्वात् । केन समानत्वादिति वाच्यम् । आत्ममनःसंयोगेन समानत्वात् । किं पुनस्तत् ? व्यपदेशाभाव इत्युक्तम् । अतीन्द्रियाधारता वा सामान्यं, यथाऽऽत्ममनःसंयोगोऽतीन्द्रियाधार एवमिन्द्रियमनःसंयोगोऽपीति । विषयावृत्तित्वं वा । यथाऽऽत्ममनःसंयोगो विषयावृत्तिः तथेन्द्रियमनःसंयोगोपीति । मनोवृत्तित्वं वा । यथा वाऽऽत्ममनःसंयोगो मनोवृत्तिरेवमिन्द्रियमनःसंयोगोऽपीति । तस्मादिन्द्रियमनःसंयोगस्याऽऽत्ममनः-संयोगेन सामान्यादन्यतराभिधानेन वा चरितार्थत्वादनभि-धानमिति ।

इन्द्रियार्थसन्निकर्षोत्पन्नमित्ययुक्तम् इन्द्रियस्याप्राप्यकारित्वात् । अप्राप्यकारिणी चक्षुःश्रोत्रे इत्येके । तत्र च न्यायं ब्रुवते । अप्राप्यकारि चक्षुः सान्तरग्रहणात् पृथुतरग्रहणाच्चेति । सान्तरस्यार्थस्य विप्रकृष्टदेशावस्थितस्य ग्रहणं दृष्टम् । न च चक्षुषस्तेनार्थेन प्राप्तिरस्ति । भूतविशेषस्येन्द्रियभावात् । य एवायं कृष्णसारलक्षणो भूतविशेषः स बाह्यभूतविशेषप्रसादानुगृहीतस्तत्तृष्णापूर्वककर्मापेक्षः चक्षुरित्युच्यते । तथा चोक्तम् । "रूपोपलब्धिसंवर्तकेन कर्मणा तत्तृष्णापूर्वकेन चक्षुरभिनिर्वृत्तमतो रूपोपलब्धेः कारणं भवतीति" । एवं शेषेषु । न च भूतविशेषानुगृहीतस्य गोलकस्य प्राप्तिर्विषयेणास्ति । तस्मात् सा-

(१) न वक्तव्यः इति टीकासंमतः पाठः ।

न्तरग्रहणादप्राप्यकारीति । अपरे तु सान्तरग्रहणं हेतुं वर्णयन्ति । न हि प्राप्यकारिषु घ्राणादिषु सान्तर इति ग्रहणं दृष्टं, दृष्टं तु चक्षुषि । पृथुतरग्रहणाच्च । शाखानगादिरूपं च महदुपलभ्यते । न चाक्ष्णोस्तथा पृथ्वत्वभास इति युक्तम् । दिग्देशव्यपदेशाच्च । यदि प्राप्यकारि चक्षुर्भवेत् दिग्देशव्यपदेशो न स्यात् । न हि प्राप्यकारिषु घ्राणादिषु तद्भवति । सन्निकृष्टविप्रकृष्टयोस्तुल्यकालग्रहणाच्च । यत् खलु गतिमद्भवति तत्तां गतिमभिन्दत् सन्निकृष्टमाशु प्राप्नोति विप्रकृष्टं चिरेण । शाखाचन्द्रमसोस्तुल्यकालग्रहणं दृष्टं तस्मादप्राप्यकारीति । यत् तावत् सान्तरग्रहणादिति, तदयुक्तं विकल्पानुपपत्तेः । सान्तरग्रहणमिति कोऽर्थः ? किं तावत्सान्तरस्याप्राप्तस्य ग्रहणमित्ययमर्थः, आहोस्वित् सहान्तरेण ग्रहणं सान्तरग्रहणमिति । अस्तु तावत् पूर्वः पक्षः अप्राप्तस्य ग्रहणं सान्तरग्रहणमिति । नन्वयं प्रतिज्ञार्थ एव, ततश्च हेत्वभावः । किं कारणं ? हेत्वर्थस्य प्रतिज्ञार्थेनाऽऽक्षिप्तत्वात् । एतदुक्तं भवति । अप्राप्यकारि चक्षुः अप्राप्यग्रहणादिति न प्रतिज्ञार्थाद्भिद्यते । अथ ब्रूषे सहान्तरेण ग्रहणमिति । किं तदन्तरं नाम ? यच्चक्षुषा विषयेण सहोपलभ्यते इति । किमाकाशमभावो द्रव्यान्तरं वा । यद्याकाशं तन्न चक्षुषो विषयः । न ह्याकाशं चक्षुषा गृह्यते अरूपित्वात् वाय्वादिवत् । अथ रूपवद्द्रव्यमन्तरशब्दवाच्यं तस्य व्यवधायकत्वात् तेन सह ग्रहणमनुपपन्नम् । अथाभावोऽन्तरशब्दवाच्यः ? स स्वतन्त्रश्चक्षुर्विषयो न भवतीति तेन सहोपलब्धावनैकान्तिकम् ।* न चान्या गतिरस्ति । तस्माच्छून्यमभिधानं सान्तरग्रहणादिति । यैरपि विद्वस्यमानैः(१) सान्तरग्रहणादित्यस्य सान्तर इति ग्रहणमित्येतद्व्याख्यानं क्रियते ।

(१) लोहितादिडाज्भ्यः क्यष् इति क्यषन्तस्य रूपम् ।

तदप्ययुक्तम् । सान्तर इति ग्रहणस्यान्यनिमित्तत्वात् । अन्यथैतत्सान्तर इति ग्रहणं भवति । शरीरावधिनिमित्तत्वात् । शरीरमवधिं कृत्वा सान्तरनिरन्तरे भवतः । न पुनरिन्द्रियप्राप्त्यप्राप्तिनिमित्ते भवतः । यत्र शरीरमिन्द्रियं चोभयमर्थेन सम्बद्ध्यते तत्र निरन्तर इति ग्रहणं भवति । यत्र पुनरिन्द्रियमात्रं सम्बद्ध्यते तत्र सान्तर इति । तस्मात् सान्तर इति ग्रहणस्यान्यनिमित्तत्वान्न सान्तरमिति ग्रहणादप्राप्यकारिता सिद्ध्यतीति । यदपि पृथुतरग्रहणादिति, तदप्ययुक्तम् । सम्बन्धमात्रेण महदण्वोर्ग्रहणात् । सम्बन्धमात्रेणैव महति वाऽणौ वा विषयभेदानुविधायी प्रत्यय उपजायते तस्माददेश्यमेतदपीति । यत्पुनरेतदुक्तं दिग्देशव्यपदेशादिति, तदपि शरीरावधिनिमित्तत्वात् प्रत्युक्तम् । यत्रेन्द्रियं शरीरं चार्थेन सम्बद्ध्यते तत्र दिग्देशव्यपदेशो न भवति । दूरान्तिकानुविधानं वा । यत्र त्विन्द्रियमेव केवलं सम्बद्ध्यते तत्र शरीरमवधिं कृत्वा संयुक्तसंयोगाल्पीयस्त्वं भूयस्त्वं वाऽपेक्ष्यमाणस्य दिग्देशप्रत्ययाः सन्निकृष्टविप्रकृष्टप्रत्ययाश्च भवन्ति । यत्पुनरेतत् शाखाचन्द्रमसोः तुल्यकालग्रहणादिति, तदपि न । अनभ्युपगमात् । को हि स्वस्थात्मा शाखाचन्द्रमसोस्तुल्यकालग्रहणं प्रतिपद्यते । कालभेदाग्रहणान्मिथ्याप्रत्यय एष उत्पलदलशतव्यतिभेदवदिति । कथं पुनरवगम्यते कालभेदाग्रहणनिमित्त एष युगपत्प्रत्ययो न पुनरेककाल एव ? इदमनुमानं आवरणानुपपत्तेरिति । यद्यप्राप्यकारि चक्षुर्भवति न कुड्यकटादेरावरणस्य सामर्थ्यमस्तीत्यावरणानुपपत्तिः स्यात् । न च व्यवहितार्थोपलब्धिरस्ति । तस्मान्नाप्राप्यकारीति । दूरान्तिकानुविधानं चानुपलब्ध्युपलब्ध्योर्न स्यात् अप्राप्य चक्षुरर्थं गृह्णातीति यदिदमस्य दूरे अग्रहणमन्तिके च ग्रहणमुभयमेतन्न

स्यात् । दृष्टं तु, तस्मान्नाप्राप्यकारीति । विषयीभावादिति चेत् । न । सम्बन्धमन्तरेण विषयीभावानभ्युपगमात् । अथापीदं स्यात् यः चक्षुषोर्विषयीभवन्नर्थः स उपलभ्यते । यस्तु न भवति नासावुपलभ्यते इति । न च व्यवहितानां दूरावस्थितानां वाऽर्थानां चक्षुषो विषयीभावोऽस्ति तस्मान्न ते गृह्यन्त इति । तच्च नैवम् । सम्बन्धमन्तरेण विषयीभावानभ्युपगमात् । कः सम्बन्धव्यतिरेकेण विषयीभावः ? केवलं भवतः सञ्ज्ञामात्रं भिद्यते नार्थ इति । मयोच्यते सम्बन्ध इति भवताऽभिधीयते विषयीभाव इति न कश्चित् विशेष इति । अथ प्राप्यकारित्वे चक्षुषः किं प्रमाणम् ? इन्द्रियत्वमेव । प्राप्यकारि चक्षुरिन्द्रियत्वात् घ्राणादिवत् । घ्राणादीन्द्रियं प्राप्तकारि दृष्टं तथा च चक्षुस्तस्मात् प्राप्यकारीति । अथ पुनर्न किञ्चिदिन्द्रियं प्राप्यकारि प्रतिपद्यते तदा सर्वाणि पक्षीकृत्य करणत्वादिति वाच्यम् । करणं वास्यादि प्राप्यकारि दृष्टं तथा चेन्द्रियाणि तस्मात् प्राप्यकारीणीति । अथ पुनर्वैयात्यात् सर्वानेवार्थानप्राप्यकारिणः प्रतिपद्यते तदा कथं ? सोऽपि दृष्टसामर्थ्यानां कारणानां सर्वत्र कार्यानुत्पत्त्या प्रसवस्थेयः । यदि खल्वेतानि कारणानि परस्परमप्राप्यानपेक्षाणि स्वयमनुपजातशक्तिकानि कार्यमारभन्त इति कस्मात् कार्यं सर्वत्र न भवतीति वक्तव्यं अतो न कारणमप्राप्यकार्यस्तीति । अनेकदण्डचक्राद्युदाहरणं लोक इति । तस्माद्व्यवस्थितमेतदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ॥

अथ ज्ञानग्रहणं किमर्थं ? सुखादिव्यवच्छेदार्थम् । इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि भवतः तद्व्युदासार्थमाह ज्ञानमिति । तच्चेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं विषयनामधेयेनाभिधीयते इति भाष्यम् । तत्प्रतिषेधार्थमाह अव्यपदेश्यमिति । यदिदमनुपयुक्तशब्दा-

र्थसम्बन्धस्य विषयभेदानुविधायि विज्ञानं तत्प्रत्यक्षं, कृतशब्दार्थसम्बन्धस्यापि तदुत्पत्तिकाले तादृगेव। अपरे त्वव्यपदेश्यमित्यनेनानुमानं निराकुर्वन्ति । तच्च नैवम् । कस्मात् ? इन्द्रियार्थसन्निकर्षोत्पन्नमिति वचनात् । न ह्यनुमेयस्येन्द्रियेण सन्निकर्षादनुमानं भवति । अतो न प्रसङ्गोऽनुमान इति । ग्रीष्मे मरीचय इति भाष्यम् । तत्प्रतिषेधार्थमिदमुच्यते अव्यभिचारीति । किमिदं व्यभिचारीति ? यदतस्मिंस्तदिति भवति । किं पुनरत्र व्यभिचारि किमर्थः आहो ज्ञानमिति । एके तावद्वर्णयन्ति । अर्थस्य व्यभिचारः अर्थस्तु तथा न भवतीति, तद्व्यभिचारात् तद्विषयं ज्ञानमपि व्यभिचारीत्युच्यते इति । तच्च नैवम् । कस्मात् अर्थस्य तथाभावात् । यत्तदुदकादिज्ञानमुपजायते मरीचिषु स्पन्दमानेषु न तत्रार्थो व्यभिचरतीति । न हि ते न मरीचयो न वा स्पन्दन्ते किन्तु ज्ञानं व्यभिचरति । अतस्मिंस्तदिति भावादिति । न हि तत्रोदकमस्ति । तांस्तु मरीचीनिन्द्रियोपघातदोषादिन्द्रियेणालोच्य विपर्येति इति ज्ञानस्य व्यभिचारो नार्थस्येति । दूरात् चक्षुषाऽर्थं पश्यन्नावधारयतीति भाष्यम् । तदन्युदासार्थमाह व्यवसायात्मकमिति । न । संशयस्यानिन्द्रियार्थसन्निकर्षपूर्वकत्वात् । न हीन्द्रियार्थसन्निकर्षात् संशयज्ञानं भवति किन्तु मानसः प्रत्ययः । संशीतिः संशय इति । तच्च नैवम् । संशयस्योभयनिमित्तत्वात् । उभयन्तु संशयस्य निमित्तम् आत्माऽन्तःकरणसंयोग इन्द्रियार्थसन्निकर्षश्चेति । तत्र यदिन्द्रियार्थसन्निकर्षानवधारणपूर्वकं मनसाऽनवधारणं तदिह सम्बध्यते । तस्य हीन्द्रियार्थसन्निकर्षः कारणम् । पूर्वं तु न सम्बध्यते । यदात्मान्तःकरणसंयोगाद्भवतीति । तस्मादस्ति विषयो विशेषणस्येति युक्तं व्यवसायात्मकमिति ।

इन्द्रियार्थसन्निकर्षोत्पन्नमित्येवमादिलक्षणमात्मादिषु सुखादिषु च नास्ति मनसोऽनिन्द्रियत्वादव्यापकमेतत् प्रत्यक्षलक्षणमिति । कथं पुनरिन्द्रियं मनो न भवति ? इन्द्रियसूत्रेऽपठितत्वात् । परिपठितानि घ्राणादीनीन्द्रियाणि । न च तेषु मनः पठितम् । तस्मान्मनो नेन्द्रियम् । पृथक् चानभिधानान्नास्ति मनस इन्द्रियत्वे प्रमाणं ततश्च नेन्द्रियं मनः । न चैवं प्रत्यक्षाः सुखादयो भविष्यन्तीति । प्रत्यक्षाश्चैते नानुमानिकाः लिङ्गाभावात् । न हि लिङ्गमन्तरेणानुमेयार्थो गम्यते । नाप्यन्यत् प्रमाणं प्रतिपादकमस्ति सुखादीनाम् । न च तेषामनुमेयत्वम् । न चान्या गतिरस्ति । तस्मात्कर्तव्यं सुखादीनां प्रत्यक्षेण ग्रहणोपसंख्यानमिति । कश्चैवमाह न प्रत्यक्षाः सुखादय इति ? इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षत्वाद्याह । नैष दोषः । मनस इन्द्रियत्वादिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति । यत्तु सूत्रेऽनभिधानं तद्वैधर्म्यात् । किं तद्वैधर्म्यं ? सर्वविषयत्वासर्वविषयत्वे । सर्वविषयं मनोऽसर्वविषयाणीतराणि । सर्वविषयं तु मनः स्मृतिकारणसंयोगाधारत्वात् आत्मवत् सुखग्राहकसंयोगाधिकरणत्वात् समस्तेन्द्रियाधिष्ठातृत्वाच्च आत्मवत् । भौतिकाभौतिकत्वं तु न, विरोधात् । न हि भौतिकं मनो नाप्यभौतिकमिति । कार्यधर्मावेतौ भौतिकत्वमभौतिकत्वं च । न च कार्यं मनः । तस्मान्न भौतिकं नाप्यभौतिकमिति । श्रोत्रे चासम्भवः यदि भौतिकत्वाभौतिकत्वलक्षणाद्वैधर्म्यादपरिपाठः सूत्रे मनसः, श्रोत्रमपि सूत्रे न पठितव्यं तर्हि, न हि श्रोत्रं भौतिकं नाप्यभौतिकमिति । स्वार्थे प्रत्ययविधानमिति चेन्न । न । प्रत्ययवैयर्थ्यात् । स्यादेषा बुद्धिः स्वार्थिक एष प्रत्ययो भूतमेव भौतिकमिति । तच्च न । प्रत्ययवै-

यर्थ्यात् । न हि भौतिकमित्यनेन कश्चित्तद्भिन्नार्थो लभ्यते । तस्माद्व्यर्थमेतत्र स्वार्थे प्रत्ययविधानमिति । यत्पुनरेतत्र पृथगभिधानं नास्तीति । न नास्ति युगपज्ज्ञानानुपपत्तेरिति । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यते । तेन च प्रतिपादितमेतन्मनसः करणत्वमिति ? सगुणानामिन्द्रियभावो वैधर्म्यमित्येतदप्ययुक्तम् । श्रोत्रानभिधानप्रसङ्गादेव । तस्मात् सर्वविषयत्वासर्वविषयत्वमेव वैधर्म्यमित्येतदेव न्यायः । तन्त्रान्तरसमाचाराच्च । तन्त्रान्तरे मन इन्द्रियमिति पठ्यते । तच्चेह न प्रतिषिध्यते । अप्रतिषेधादुपात्तं तादिति ? न । शेषाभिधानवैयर्थ्यात् । शेषाण्यपीन्द्रियाणि तैः परिपठितानि तस्मात् तान्यपि न वक्तव्यानि यद्यप्रतिषेधादुपादानं स्यादिति । न । तन्त्रयुक्त्यनवबोधात् । न भवता तन्त्रयुक्तिः परिज्ञायते । परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः । न च यस्य स्वमतपरिग्रहो नास्ति तस्य स्वमतं परमतं वा भिद्यते । भवता च परमतानुरोधेन सर्वं स्वमतं निवार्यत इति । तन्निवारणात् स्वमतं परमतमित्येतदेव न स्यात् । तस्मादस्ति मन इन्द्रियं चेति । तदुपपन्नमिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति व्यापकं लक्षणम् ।

समस्तमसमस्तं चेति सन्देहः । किमिदं प्रत्यक्षलक्षणं समस्तमाहो असमस्तमिति सन्देहः, कुतः ? उभयथा दर्शनात् समस्तं लक्षणं भवति व्यस्तं च । इच्छाप्रयत्नद्वेषसुखदुःखज्ञानान्यात्मनो लिङ्गमिति व्यस्तलक्षणमेकशः प्रतिपादकत्वात् । तथा समानानेकधर्मोपपत्तेरित्येवमादि व्यस्तम् । समस्तं पुनः वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति । समस्तेनानेन छलं लक्ष्यते । प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति च । लक्षणं चेदमतः सन्देहः किं समस्तमुतासमस्तमिति । समस्तमित्याह । यस्मादेकशोऽनुमानसुखशाब्दविपर्ययसंशयज्ञानानि निवर्त्यन्त इति । यदीन्द्रियार्थ-

सन्निकर्षोत्पन्नमित्याद्येकशः पदमभिधीयते। योऽयमेकेन पदेनार्थः सङ्गृहीतः स प्रत्यक्षः स्यादिति तेन पूर्वोक्तानामनुमानादीनां प्रत्यक्षत्वप्रसङ्गः स्यादिति। एवं द्वयोः पदयोः उपादाने पदद्वयोपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं त्रयाणां पदानां उपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। एवं चतुर्णां पदानां उपादाने तैरुपात्तस्य प्रत्यक्षत्वप्रसङ्गः। तस्मादेकद्वित्रिचतुष्पदपर्युदासात् पञ्चपदपरिग्रहेण त्रिंशत्कोटीर्व्युदस्य समस्तं लक्षणमित्युच्यते। तत्रैकपदपरिग्रहेण तावत्पञ्च कोटयः, द्विपदपरिग्रहेण दश, त्रिपदपरिग्रहेणापि दशैव, चतुःपदपरिग्रहेण पञ्च। एकत्रिंशत्तमी पुनः समस्तपरिग्रहेणोपात्तेति। कस्मात्? विशेषविधिप्रतिषेधयोः शेषप्रतिषेधविध्यभ्यनुज्ञाविषयत्वात्। अयं खलु विशेषविधिः प्रवर्तमानः शेषं प्रतिषेधति यथा दक्षिणेनाक्ष्णा पश्यतीति। विशेषप्रतिषेधश्च शेषाभ्यनुज्ञाविषयो भवति। यथा वामेनाक्ष्णा न पश्यतीति। तथेहाप्येकदेशाभ्युपगमे शेषप्रतिषेधः शेषविधानं वा गम्यत इति व्यवस्थितं प्रत्यक्षमिति।

अपरे पुनर्वर्णयन्ति—ततोऽर्थाद्विज्ञानं प्रत्यक्षमिति। तन्न। ततोऽर्थादिति यस्यार्थस्य यद्विज्ञानं व्यपदिश्यते यदि तत एव तद्भवति नार्थान्तराद्भवति तत् प्रत्यक्षम्। एतेनानुमानादिज्ञानमपक्षिप्तं भवति। न हि तत एव तद्भवति। किं तर्हि? ततश्चान्यतश्च तद्भवति। तत्र तावदर्थग्रहणं न कर्तव्यमिति। ततो विज्ञानमित्युच्यमाने गम्यत एव तदर्थादिति। अवधारणार्थोऽर्थशब्द इति चेत्। स्यान्मतिरेषाऽवधारणार्थोऽर्थशब्दो भविष्यतीति। यदुक्तं भवति तत एवेति तदुक्तं भवति ततोर्थादिति। तन्न युक्तमेकपदस्यावधारणार्थस्य दृष्टत्वात्। अम्भक्ष(१) इति यथा। एतेनानुमानादिव्युदासोऽपि

(१) अनुस्वाररहितो'ऽब्भक्ष' इति टीकाकारसम्मतः पाठः।

प्रत्युक्तः । यत् पुनरेतत् संहतिज्ञानमनेनापक्षिप्तमिति तदेतन्न बुध्यामहे कथं तदपाक्षिप्तमिति । यदि ब्रूषे रूपादिभ्य उत्पन्नं ज्ञानं घटस्य व्यपादिश्यते न ततो भविष्यतीत्यपक्षिप्तं, तन्न युक्तम् । न हि रूपादिभ्य उत्पन्नं ज्ञानं घटस्य व्यपादिश्यते । रूपादिभ्य उत्पन्नं रूपादीनां घटादिभ्य उत्पन्नं ज्ञानं घटस्येति न प्रसङ्गः । अथाप्येवं मनोरथो न रूपादिभ्यो व्यतिरिक्ताः घटादय इति । मनोमोदकोपभोगमात्रमेतत् । यथा तद्व्यतिरिक्ता घटादयः तथोपरिष्टाद्वक्ष्यामः । सर्वं च स्वविषयाद् विज्ञानं भवतीति ? ततोग्रहणमनर्थकमिति । ननु च(१) मिथ्याज्ञानमतस्मादपि भवति । न ह्यतस्मात्तद्भवतीति । किं तर्हि ? अतस्मिंस्तद्भवतीति । न भवता मिथ्याज्ञानमपि व्यज्ञायि । ततो ग्रहणमर्थग्रहणं चान्तरेण विज्ञानमात्रमवशिष्यते । तथा च न लक्षणमुक्तं स्यात् । सर्वं च ज्ञानं प्रत्यक्षं स्यात् । यद्यप्येतत्सूत्रं यथाश्रुति भवति तथापि ग्राह्यग्राहकज्ञानयोरयुगपद्भावाज्ज्ञानं अप्रत्यक्षं स्यात् । नाशोत्पादौ सममिति चेत् । तच्च न, उदाहरणाभावात् । न हि समं नाशोत्पादे किञ्चिदुदाहरणमस्ति । विनष्टश्चार्थः प्रत्यक्ष इति स्यात् । तुल्यमिति चेत्—स्यान्मतिर्भवतां युगपदवस्थाने किमुदाहरणमिति । तच्च नैवमुक्तोत्तरत्वात् । उक्तोत्तरमेतत् स्फटिकादिसूत्र इति ।

अपरे तु मन्यन्ते प्रत्यक्षं कल्पनापोढमिति । अथ केयं कल्पना नाम ? जातियोजनेति । यत् किल न नाम्नाऽभिधीयते न च जात्यादिभिर्व्यपदिश्यते विषयस्वरूपानुविधायि परिच्छेदकमात्मसंवेद्यं तत् प्रत्यक्षमिति । त इदं प्रष्टव्याः । अथ प्रत्यक्षशब्देन कोऽर्थोऽभिधीयते इति ? यदि प्रत्यक्षं ? कथमवाच्यम् । अथ न प्रत्यक्षं ? अवाचकस्तर्हि प्रत्यक्षशब्दः । अथ प्रत्यक्षशब्देन सामान्यमुच्यत

(१) सर्वत्र—इत्यधिकम् २ पु० ॥

इति ? एतदपि सामान्यं किं प्रत्यक्षव्यतिरेक्याहोस्विदव्यतिरेकीति । यदि प्रत्यक्षव्यतिरेकि ? न प्रत्यक्षमुक्तम् । अथाव्यतिरेकि ? कथं नोक्तम् । कल्पनापोढशब्देनापि यदि प्रत्यक्षमुच्यते तदा व्याघातः । अथ नोच्यते तथापि कल्पनापोढवचनं व्यर्थं, प्रत्यक्षं कल्पनापोढमिति च वाक्यम् । अथास्य वाक्यस्य कोर्थो ? यदि प्रत्यक्षं ? व्याघातः । कथं ? प्रत्यक्षं कल्पनापोढमिति चानेन वाक्येनाभिधीयते । न चाभिधेयमिति कोन्यो भदन्ताद्वक्तुमर्हति । अथ न प्रत्यक्षमस्यार्थः वर्णोच्चारणमात्रं तर्ह्येतद्वाक्यं प्रत्यक्षं कल्पनापोढमिति । अनित्यादिशब्दविषयत्वाच्च न सर्वथाऽवाच्यम् । अनित्यं प्रत्यक्षं दुःखशून्यमनात्मकं च प्रत्यक्षमित्येषां चेच्छब्दानां विषयतामुपयाति कथमवाच्यम् । अथ नोपैति ? सर्वं संस्कृतमनित्यमित्येतत्तथागतेन नाख्यातव्यम् । अथ स्वरूपतो न व्यपदेश्यमित्येष कल्पनापोढशब्दार्थः ? सर्वे ऽर्थाः तर्हि प्रत्यक्षाः प्राप्नुवन्ति । किं कारणम् ? न हि कश्चित् सुशिक्षितोपि पदार्थानां स्वरूपं निर्देष्टुं शक्नोति । असामयिकत्वात् । सर्वस्य च वस्तुनो द्वावाकारौ सामान्याकारो विशेषाकारश्च । तत्र वस्तु सामान्येनैवाकारेणाभिधीयते न विशेषाकारेण । विशेषानभिधानान्नोक्तं भवति । न हि मनुष्यशब्दस्य ब्राह्मणो न वाच्यः । ये तु तस्यासाधारणधर्माः पुरुषान्तरव्यावृत्तप्रत्ययहेतवो न च तैः सहानभिधानान्नोक्तो भवति । एवं ज्ञानमपि(१) सामान्यविशेषाकारवत् तस्य विशेषाकारेण नाभिधानं सामान्याकारेण त्वभिधानमेव । यदि च विशेषाकारेणानभिधानं यत् तल्लक्षणं प्रत्यक्षस्य न केवलं प्रत्यक्षस्य त्रैलोक्यस्यैतल्लक्षणमिति । एवं प्रत्यक्षलक्षणं नोक्तं

(१) अत्रादर्शपुस्तकं कृमिभक्षितमिति 'ज्ञान'मित्यक्षरद्वयं टीकादर्शनात् समुद्धृतम् ॥

स्यात् । अथ कल्पनापोढशब्देन प्रत्यक्षस्य स्वरूपमभिधीयते? एवमप्यनिवृत्तो व्याघातः स्वरूपं चानभिधेयं इत्यनेन शब्देनाभिधीयते इति । अथानेन शब्देन नैव किञ्चिदभिधीयते । किमस्य शब्दस्योच्चारणसामर्थ्यं प्रत्यक्षं कल्पनापोढमिति । अप्रतिपादकत्वान्मूकस्वप्नसदृशमेतत् । एवं यथायथेदं लक्षणं विचार्यते तथातथा न्यायं न सहत इति । "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्ष"मिति(१) एतदपि संशयाद्युत्पत्तिनिमित्तत्वादलक्षणमिति । तथा चोक्तं प्रत्यक्षसूत्रं वर्णयद्भिरिति । एतेन प्रत्यक्षमिन्द्रियार्थसन्निकर्षमनःप्रकाशविशेषेषु सत्स्विति प्रत्युक्तम् । तथा श्रोत्रादिवृत्तिरिति । किं कारणम्? पञ्चपदपरिग्रहेण प्रत्यक्षलक्षणमुक्तं यत्रान्यतरपदपरिग्रहो नास्ति तत्प्रत्यक्षाभासमिति । एवमनेन न्यायेन यान्यप्यनुक्तानि लक्षणानि तान्येतस्माल्लक्षणान्न भिद्यमानानि न लक्षणानीति । व्याख्यातं प्रत्यक्षलक्षणमिति ॥

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च ॥ ५ ॥

अथ तत्पूर्वकं त्रिविधमनुमानमिति । अथेत्यानन्तर्ये । अनुमानविशेषणार्थं सूत्रं तत्पूर्वकमिति । अनेन समानासमानजातीयेभ्योऽनुमानं व्यवच्छिद्यत इति । तानि ते तद्वा पूर्वं यस्य तदिदं तत्पूर्वकम् । यदा तानीति विग्रहः तदा समस्तप्रमाणाभिसम्बन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति । पारम्पर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठत इति तत्पूर्वकत्वमुक्तं भवति । यदापि विवेकात्(२) ते पूर्वे यस्येति, ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य

(१) जैमिनिसूत्रम् १ अ० १ पा० ४ सू० ॥
(२) अत्रापि 'वेकादि'ति कृमिभक्षितमादर्शपुस्तके ॥

तदिदं तत्पूर्वकं प्रत्यक्षमिति । ते च द्वे प्रत्यक्षे(१) । लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षं, लिङ्गदर्शनं द्वितीयम् । बुभुत्सावतो द्वितीयाल्लिङ्गदर्शनात् संस्काराभिव्यक्त्युत्तरकालं स्मृतिः स्मृत्यनन्तरं च पुनर्लिङ्गदर्शनमयं धूम इति । तदिदमन्तिमं प्रत्यक्षं पूर्वाभ्यां प्रत्यक्षाभ्यां स्मृत्या चानुगृह्यमाणं परामर्शरूप(२)मनुमानं भवति । कः पुनरनुमानार्थः ? अनुमीयतेऽनेनेति करणार्थः । किं पुनरस्य फलम् ? अग्निविषया प्रतिपत्तिः । कथं पुनरन्यविषयं करणं अन्यविषयां क्रियां करोति ? (३)शाल्यादिविषयस्य मुशलादेः करणस्य श्यामाकेऽभिहतिर्भवति । न अनियमादिति । यद्विषयं करणं तद्विषया क्रियेति न नियमोऽस्ति । दृष्टा हि वृक्षादिविषयस्य छेदनस्यावयवे क्रियेति । वृक्षः छिद्यते अवयवे क्रियेति । क्वचित् पुनर्यद्विषयं करणं तद्विषयैव क्रिया । तद्यथा तण्डुलाः पच्यन्ते पाकस्तेष्वेव । क्वचित् पुनरात्मैव भवति कर्त्ता करणं क्रिया तस्यैव । तद्यथा वृक्षस्तिष्ठतीति । वृक्ष आत्मना तिष्ठति । किमुक्तं भवत्यात्मनैवेति । यस्मादयं स्वस्थितौ करणान्तरं न प्रयुङ्क्ते । एवमन्यविषयस्य करणस्यान्यविषया क्रियेति । क्वचित् पुनर्यद्विषयं प्रमाणं तद्विषयैव क्रिया यदा स एवार्थः प्रमीयते इति । किं पुनस्तस्य प्रमीयते ? प्रमितत्वात् । प्रमीयते । हेयत्वेनोपादेयत्वेनोपेक्षणीयत्वेन वाऽवगम्यत इति । तन्न । प्रमाणफलयोर्विषयभेदानभ्युपगमात् । यदा पुनस्तत्पूर्वं यस्य तदिदं तत्पूर्वकमिति तदा भेदस्याविवक्षितत्वात् लिङ्गलिङ्गिसम्बन्धदर्शनानन्तरं लिङ्गदर्शनसम्बन्धस्मृतिभिर्लिङ्गपरामर्शो विशि-

---

(१) कतरे द्वे इति टीकासंमतः पाठः ।

(२) लिङ्गपरामर्शरूपामिति—पाठः १ पु० ॥

(३) न हि इत्यपेक्षितम् ।

च्यते तस्य तत्पूर्वकत्वात् । किं पुनस्तैरनुमीयते ? शेषोऽर्थ इति । अनुमानमित्यत्र किं कारकं ? भावः करणं वा । यदा भावस्तदा हानादिबुद्धयः फलम् । यदा करणं तदा शेषवस्तुपरिच्छेदः फलमिति ।

लिङ्गलिङ्गिसम्बन्धस्मृतिर्लिङ्गदर्शनं वा इति सन्देहः । एके तावद्वर्णयन्ति लिङ्गलिङ्गिसम्बन्धस्मृतिरनुमानमिति इतरैर्लिङ्गलिङ्गिसम्बन्धदर्शनादिभिरनुगृह्यमाणा । अपरे तु मन्यन्ते लिङ्गपरामर्शोऽनुमानमिति । वयं तु पश्यामः । सर्वमनुमानमनुमितेस्तन्नान्तरीयकत्वात् । प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम् । कः पुनरत्र न्यायः ? आनन्तर्यप्रतिपत्तिः । यस्माल्लिङ्गपरामर्शादनन्तरं शेषार्थप्रतिपत्तिरिति । तस्माल्लिङ्गपरामर्शो न्याय्य इति । स्मृतिर्न प्रधानं । किं कारणं ? स्मृत्यनन्तरमप्रतिपत्तेः । न हि भवति यत्र धूममद्राक्षं तत्राग्निमद्राक्षमिति । एतस्याश्च स्मृतेरनन्तरं तस्मादग्निरिति शेषार्थग्रह(१) इति युक्तं वक्तुम् । तस्मात् स्मृत्यनुगृहीतो लिङ्गपरामर्शोऽभीष्टार्थप्रतिपादको भवतीति । एवं चोपनयस्यार्थवत्ता । यदि चायं स्मृत्यनुगृहीतो लिङ्गपरामर्शोऽनुमानं भवति, एवं सत्युपनयोऽर्थवानिति । एवं च सति वाक्याङ्गत्वमुपनयस्योक्तं भवति । तस्माद् व्यवस्थितमेतत् तत्पूर्वकमनुमानमिति । यदि प्रत्यक्षपूर्वकमनुमानं संस्कारे निर्णये च प्रसङ्ग इति । प्रत्यक्षपूर्वको भावनाख्यः स्मृतिहेतुः संस्कारः निर्णयश्च प्रत्यक्षपूर्वकत्वादनुमानं प्रसज्यत इति । नैष दोषो विज्ञानस्याधिकृतत्वात् । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ज्ञानाधिकारो वर्तत इति तेन न संस्कारेऽतिप्रसङ्गः । निर्णये तूभयथा कदाचित् प्रमाणं कदाचित् फलम् । स्वविषयपरिच्छेद-

---

(१) 'शेषार्थग्र' इति कृमिभक्षितमादर्शपुस्तके ।

कत्वात् प्रमाणमिति ।

त्रिविधमिति । अन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति । तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वाद् घटवदिति । अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनो यथा सर्वानित्यत्ववादिनामनित्यः शब्दः कृतकत्वादिति। अस्य हि विपक्षो नास्ति। व्यतिरेकी विवक्षितव्यापकत्वे सति सपक्षाभावे सति विपक्षावृत्तिः । यथा नेदं जीवच्छरीरं निरात्मकं अप्राणादिमत्त्वप्रसङ्गादिति । अथवा त्रिविधमिति । पूर्ववच्छेषवत्सामान्यतोदृष्टं चेति । पूर्वं साध्यं तद् व्याप्त्या यस्यास्तीति तत् पूर्ववत् । साध्यतज्जातीयः शेषः तद्यस्यास्तीति तत् शेषवत् । पूर्ववन्नाम साध्यव्यापकं शेषवदिति समानेऽस्ति । सामान्यतश्चादृष्टम् । चशब्दात् प्रत्यक्षागमाविरुद्धं चेत्येवं चतुर्लक्षणं पञ्चलक्षणमनुमानमिति ।

अथवा त्रिविधमिति । पूर्ववच्छेषवत् सामान्यतोदृष्टं चेति । तत्र पूर्ववन्नाम यत्र कारणेन कार्यमनुमीयत इति भाष्यम् । किं पुनरिदमुक्तं भवति कारणेन कार्यमनुमीयत इति ? यदि तावदयमर्थः कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति, तन्नास्ति, न हि कारणं गृहीत्वा स्वस्थात्मा कश्चित् कार्यं प्रतिपद्यत इति तथा च व्याहतं भवतीति । अथ पुनरेवमनुमीयते यत्र कारणं तत्र कार्यमिति । एतदपि नास्ति । कार्यकारणयोर्भिन्नदेशत्वात् । तन्तवः स्वावयवेषु अंशुषु, पटः तन्तुष्विति । कारणदर्शनाच्च कार्यमनुमीयते इति ब्रुवाणोऽनुमानमुद्रां भिनत्ति । का पुनरियमनुमानमुद्रा ? नानुपलब्धे न निर्णीते न्यायः प्रवर्तत इति । यदि कारणदर्शनात्

कार्यमनुमीयते अनुपलब्धेऽर्थे न्यायः प्रवर्तत इति स्यात् । तथा च व्याहतं स्यात् । नानभ्युपगमात् । क एवमाह कारणदर्शनात् कार्यास्तित्वं प्रतिपद्यत इति । को वा ब्रवीति यत्र कारणं तत्र कार्यमिति । कार्यं तु कारणविशेषणत्वेनोपयुक्तं गुणभूतमनुमीयत इति सूत्रार्थः । तथा च न मुद्राभेद इति । एवं शेषवदादिष्वपि द्रष्टव्यम् । अत्रापि कारणं कार्यस्याङ्गभूतमनुमीयत इति । कथं पुनः शेषशब्देन कार्यमुच्यते ? द्वयोरनुमानभावेनोपक्षिप्तयोः कारणस्योपयोगात् अनुपयुक्तं कार्यमिति कार्यं शेषशब्दवाच्यम् । उदाहरणं मेघोन्नत्या भविष्यति वृष्टिरिति कारणेन कार्यानुमानम् । कथं पुनरस्य प्रयोगः ? वृष्टिमन्त एते मेघाः गम्भीरध्वानवत्त्वे सति बहुलबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतिमत्त्वात् वृष्टिमन्मेघवदिति । नद्याः पूर्णत्वं शेषवदुदाहरणम् । कथं पुनरेतन्नदीपूरो नद्यां वर्तमान उपरि वृष्टिमद्देशमनुमापयति ? व्यधिकरणत्वात् । नैवोपरि वृष्टिमद्देशानुमानं नदीपूरः । किं तर्हि ? नद्या एवोपरि वृष्टिमद्देशसम्बन्धित्वमनुमीयते नदीधर्मेण । उपरि वृष्टिमद्देशसम्बन्धिनी नदी स्रोतःशीघ्रत्वे सति पूर्णफलकाष्ठादिवहनवत्त्वे सति पूर्णत्वात् पूर्णवृष्टिमन्नदीवदिति । भविष्यति भूता वेति कालस्याविवक्षितत्वात् यः कश्चित् काल उपादेय इति । सामान्यतोदृष्टं नाम अकार्याकारणीभूतेन यत्राविनाभाविना विशेषणेन विशेष्यमाणो धर्मी गम्यते तत् सामान्यतोदृष्टं यथा बलाकया सलिलानुमानम् । कथं पुनर्बलाकया सलिलानुमानम् ? यावानस्य देशो बलाकयाऽजहद्वृत्तित्वेन प्रसिद्धो भवति तावन्तमन्तर्भाव्य वृक्षादिकमर्थं पक्षीकृत्य बलाकावत्त्वेन साधयति ।

अपरे तु मन्यन्ते सामान्यतोदृष्टं आदित्यस्य गत्यनुमानमिति । तन्न बुध्यामहे । कथमनुमीयते ? यदि तावद् गतिमानादित्य इति अस्य

गतिरनुमीयते। तत्केन प्रतिपद्यते। न ह्यादित्यस्य गतेश्च किञ्चित् सम्बन्धि लिङ्गमस्ति। न चासम्बद्धोऽर्थोऽनुमातुं शक्यत इति सर्वं सर्वेणानुमीयेतेति। अथ देशान्तरप्राप्तिर्लिङ्गमिति? तन्न। अदृष्टत्वात्। न हि सवितुः कश्चिद्देशान्तरप्राप्तिं पश्यति। देशान्तरं खल्वाकाशादि दिग्देशो वा। उभयं चाप्रत्यक्षम्। न चान्या गतिरस्ति। तस्माद्देशान्तरप्राप्तिदर्शनमयुक्तम्। सर्वत्र खल्वयमादित्यस्य मण्डलमेव केवलमुपलभते। न च वस्तुमात्रदर्शनादनुमानं युक्तम्। अपि च केनचित् प्रकारेण आदित्यस्य गतिः शक्या द्रष्टुं उपलब्धिलक्षणप्राप्तत्वात्। न पुनर्देशान्तरप्राप्तिर्नित्यातीन्द्रियत्वात्। न हि कदाचित् प्रत्यक्षाप्रत्यक्षवृत्तिः संयोगो भवति प्रत्यक्षः। अथ देवदत्तस्य देशान्तरप्राप्तिदर्शनेनादित्यस्य गत्यनुमानं सामान्यतोदृष्टमिति मन्यसे न केवलमादित्यस्य सर्वार्थानां गत्यनुमाने हि भवानपि गच्छतीत्येवं किमिति नानुमीयते। नैवेदमादित्यगत्यनुमानं साक्षात्। किं तर्हि? देशान्तरप्राप्तिमनुमाय तया गत्यनुमानमित्यदोषः। देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसम्बन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्। प्रष्यादावेतत्सर्वमस्ति स च देशान्तरप्राप्तिमान् एवं चादित्यः तस्माद्देशान्तरप्राप्तिमानिति। अनया देशान्तरप्राप्त्या अनुमितया गतिरनुमीयते इति। देशान्तरप्राप्तिमत्त्वे वाऽनुमानं देशान्तरप्राप्तिमानादित्यः अचलचक्षुषो व्यवधानानुपपत्तौ दृष्टस्य पुनर्दर्शनाविषयत्वात् देवदत्तवदिति। एके तावद् दिक्प्रत्यक्षत्वे ऽनुमानं ब्रुवते। प्रत्यक्षा दिक् अङ्गुल्या व्यपदेशाच्चन्द्रवदिति। तच्च न। अरूपित्वात्। अरूपा दिक् कथं बाह्यकरणप्रत्यक्षा भविष्यति। कथं तर्हि अङ्गुल्या व्यपदेशो? दिग्देशसम्बन्धिषु द्र-

क्षादिषु दिग्व्यपदेशात् । ये दिग्देशसम्बन्धिनो वृक्षादयस्तान् दिगित्युपचरन्ति आदित्येन सहोपलब्धेः । प्राचीत्ययं शब्दः आदित्यसम्बन्धविशिष्टदिग्देशे वर्तते । तेनाद्येनादित्यदर्शनेन सह वृक्षादीनुपलभते तान् प्राचीत्युपचरन्ति उपचर्य चाङ्गुल्या व्यपदिशन्ति ।

अथवा त्रिविधमिति लिङ्गस्य प्रसिद्धसदसन्दिग्धतामाह । प्रसिद्धमिति पक्षे व्यापकं, सदिति सजातीये ऽस्ति, असन्दिग्धमिति सजातीयाविनाभावि । अथवा त्रिविधमिति नियमार्थं अनेकधा भिन्नस्यानुमानस्य त्रिविधेन पूर्ववदादिना संग्रह इति नियमं दर्शयति । कथमनेकधा भिन्नमिति ? अन्वयव्यतिरेकि द्विधा सजातीये सदेव सदसच्च । अन्वय्यपि द्विधैव । एवं व्यतिरेक्येकरूपम् सपक्षाभावात् । तदिदं पञ्चधा भिन्नमनुमानं कालभेदेन पञ्चदशधा भवति । तदपि पुनः पुरुषभेदानुविधानात् षाड्भेदं भवति । तस्य त्वान्तर्गणिको ऽनन्तभेद इति । सोऽयमनुमानभेदः एवंभिन्नस्त्रिविधमित्यनेन सङ्गृहीत इत्यतो नियमार्थं त्रिविधग्रहणमिति ।

पूर्ववदित्युक्तं किं पुनरत्र पूर्ववत् । किं कार्यं उत कारणं, यदि पूर्वमस्यास्तीति पूर्ववत् कार्यं पूर्ववत् प्राप्नोति । ततश्च कारणेन कार्यानुमानमिति व्याघातः । पूर्वमस्यास्तीति पूर्ववदिति ब्रूमो न पुनः कार्यम् । किं तर्हि ? ज्ञानं, ज्ञानस्य पूर्वं विषयः । तदिदं पूर्ववदिति तेन कार्यानुमानमिति । एवं शेषवदादिष्वपि तद्विषयाणि ज्ञानानीत्युक्तं भवति । अथवा पूर्ववदिति वतिप्रत्यय एषः यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थः तथानुमानेनापि तमेवार्थं प्रतिपद्यत इति पूर्ववद्दृष्टो भवति ।

अन्ये पुनरन्यथा वर्णयन्ति । यथा तेनैव धूमेनाग्नि

प्रतिपद्यत इति । किं पुनरनेन धूमेन प्रतिपद्यत इति ? किमग्निं उत देशं उत सत्ताम् उताग्निमन्तं देशम् । तत्र न तावदग्निं प्रतिपद्यते । धर्मधर्मिभावानुपपत्तेः । नाग्निर्धूमस्य धर्मः न वाग्निधर्मो धूमः प्रतीतत्वाच्चाग्नेर्नानुमेयत्वमस्ति । एतेन सत्ता देशश्च व्याख्यातः । अग्निसत्तायाः प्रतीतत्वात् देशस्य चेति । अग्निमान् देश इति चेत् । न धूमस्यातद्धर्मत्वात् । अथापीदं स्यात् अग्निमान् देशो धूमेनानुमीयत । तच्च नैवम् । कस्मात् ? अतद्धर्मत्वात् । न हि धूमोऽग्निमतो देशस्य धर्मः । न चाग्ने(१)र्देशमात्रसम्बन्धो न प्रतीतः । अयमग्निमानिति चेत् । न । तस्यादृष्टत्वात् । देशविशेषोऽग्निमत्तयाऽनुमीयते न देशमात्रं, न तस्यादृष्टत्वात् । न ह्ययं देशविशेषं पश्यति केवलं तु शून्यमभिधानमुच्चारयति । अयं देशोऽग्निमानिति । न च धूममात्रमग्निप्रतिपादकं धूममात्रे वायं पश्यति । अतो देशविशेषो नानुमेयः । अविनाभावेन प्रतिपादयतीति चेत् । अथापीदं स्यात् अविनाभावोऽग्निधूमयोरतो धूमदर्शनादग्निं प्रतिपद्यत इति । तन्न । विकल्पानुपपत्तेः । अग्निधूमयोरविनाभाव इति कोऽर्थः ? किं कार्यकारणभावः उतैकार्थसमवायः तत्सम्बन्धमात्रं वा । अस्तु तावत् पूर्वः कार्यकारणभाव इति । तन्न । अतद्वृत्तित्वात् । न हि धूमोऽग्नौ वर्तते नाप्यग्निर्धूमे । स्वकारणवृत्तित्वात् । अतो न कार्यकारणभावः । नैकार्थसमवायोपि । ताभ्यामन्यस्यानारम्भात् । न हि भिन्नजातीयाभ्यां द्रव्यमारभ्यते । न च तावन्यत्र वर्तेते स्वकारणवृत्तित्वादित्युक्तम् । सम्बन्धमात्रं तत्र वर्तत इति ? तदप्यनुमातुं न शक्यत इति । कथम् ? यदि तावदयं कुरुते(२) अस्ति सम्बन्धोऽग्नि-

(१) न वाग्ने—पा० १ पु० ।
(२) प्रयोगमिति शेषः ।

धूमयोरिति । तन्न । अप्रतीतत्वात् । अनग्निकस्यापि धूमस्य दर्शनान्न सम्बन्धानुमानम् । रूपस्पर्शवत् साहचर्यं भविष्यति ? न । उभयोर्व्यभिचारित्वात् । अनग्निर्धूमो दृष्टोऽधूमश्चाग्निरिति उभयं व्यभिचारि तस्मान्न साहचर्यमिति । यत्र धूमस्तत्र वह्निरित्यनेनैव प्रत्युक्तम् । न चान्या गतिरिति । तस्मान्न धूमेन वह्निरनुमीयते । लोक विरोध इति चेत् यदि धूमेनाग्नेरनुमानं न भवेत् ननु लोको विरुध्यत इति चेत् । नास्ति विरोधो धूमविशेषेणाग्निविशेषणस्य धूमस्य प्रतिपाद्यत्वात् । कथं पुनरयमग्निर्धूमविशेषणं भवति ? यदा गुणभूतो भवति । अनुमेयोऽग्निमानयं धूम इति । धूमविशेषेणासाधारणेनानुमीयत इति । उभयं हि तदा प्रत्यक्षं धूमश्च तद्गताश्च सातत्यसंहत्यूर्ध्वगतिस्वभावादयो धर्मा इति । ते चैते धूमधर्मा धूमवृत्तयोऽप्रसिद्धं धूमधर्ममनुमापयन्ति । सर्वस्यानुमेयस्य वस्तुनो धर्मी प्रतिपादकश्च धर्मः प्रसिद्धो भवति । यथा शब्दस्यात्मसत्ता प्रसिद्धा कृतकत्वं च धर्मस्त्वनित्यत्वलक्षणोऽप्रसिद्ध इति । तद्विशेषणोऽयमनुमीयत इति ।

शेषवन्नाम परिशेष इति भाष्यम् । न, कर्म शब्दः शब्दान्तरहेतुत्वादित्युभयव्यावृत्तेरसाधारणं न हि शब्दान्तरहेतुत्वं कर्मणि नाकर्मणीति । न आन्यर्थत्वात् । शब्दान्तरहेतुत्वमित्यस्य समानजातीयारम्भकत्वादित्यर्थः । तथा च न दोषः । सामान्यतोदृष्टं नाम यत्राप्रत्यक्षे लिङ्गलिङ्गिनोरिति भाष्यम् । लिङ्गलिङ्गिनोः सम्बन्धोऽप्रत्यक्ष इति किं ? यदाऽनुमीयते तदा अप्रत्यक्ष आहो न कदाचित्प्रत्यक्षो, यदि यदाऽनुमीयते तदाऽप्रत्यक्षः सर्वमनुमानमेवमिति विशेषणमनर्थकम् । अथ न कदाचित् प्रत्यक्षः ? कथं तर्ह्यनुमानमत्र प्रवर्तते । व्याहतं च भवति । नानुपलब्धे न निर्णीत इति । न । वि-

शेषणभूतस्याप्रत्यक्षस्य सर्वदानुमेयत्वात् । यदितरधर्मदर्शनात् धर्मिणोऽधिगतिसाधनं तत्सामान्यतोदृष्टं यथा इच्छादिभिरात्मा इच्छादयः खलु धर्मिणो भवन्ति । आत्मा च विशेषणं गुणभूत इति । इच्छादीनां गुणत्वं प्रतीतो धर्मः । तेन धर्मेणात्मगुणाविशिष्टानेव इच्छादीननुमिमीते । परतन्त्रा इच्छादयो गुणत्वात् रूपवत् । पारतन्त्र्यप्रतिपत्तिरस्मादनुमानात् आत्मतन्त्रता तु कुतः ? आत्मतन्त्रता परिशेषात् आत्मसंवेद्यत्वात् बाह्यकरणाप्रत्यक्षत्वाच्च। न पृथिव्यादिषु, पृथिव्यादिगुणाः आत्मपरात्मप्रत्यक्षाः बाह्यकरणप्रत्यक्षाश्च आत्माऽबाह्यकरणप्रत्यक्षाश्चेच्छादयः तस्मान्न पृथिव्यादिष्वाकाशान्तेषु, न दिक्कालमनःसु, तद्गुणानां तद्वदतीन्द्रियत्वात् । न च द्रव्यान्तरं शिष्यते । आत्मा शेषः । तस्मात् तत्तन्त्र इति ।

सद्विषयं च प्रत्यक्षं सदसद्विषयं चानुमानमिति भाष्यम् । किं तावद्धर्मिणमभिप्रेत्यायं भेद उत धर्ममिति । यदि तावद्धर्मिणमभिप्रेत्य ? न कदाचिदसद्विषयमनुमानम् । न ह्यनुपलब्धसामान्ये अर्थे अनुमानं प्रवर्तत इत्युक्तं न चासतः सामान्यदर्शनमस्ति। अथ धर्ममभिप्रेत्य ब्रूषे ? धर्मा अपि त्रिविधा भवन्ति । विधीयमानाः प्रतिषिध्यमानाः स्वतन्त्राश्चेति । तत्र विधीयमानो धर्मः पृथिव्यां गन्धवत्त्वं प्रतिषिध्यमानोऽपृथिव्यां गन्धवत्त्वं स्वतन्त्रः समवायिनां समवाय इति । कथं पुनः स्वतन्त्रः ? समवायान्तराभावात्। यद्धि यत्र वर्तते तद्वृत्त्या वर्तते । न च समवायस्य वृत्तिरस्ति । अथ समवायान्तरं स्यात् समवायस्य, तस्यापि समवायान्तरकल्पनायामनवस्था स्यात् व्यवस्थायामाद्य एव व्यवस्था । किमिदं श्रद्दधानेन प्रतिपत्तव्यमनाश्रितः समवाय इति आहोस्विन्न्यायो वाप्यस्ति । न सन्देहः, अस्त्येव न्यायः, पञ्चप-

दार्थवृत्तिशब्दविषयत्वात् । परमाणुवदनाश्रितः समवाय इति न्यायः व्यापकत्वे सतीहबुद्धिनिमित्तत्वात् आत्मवत् । यदि पुनराश्रितः समवायः स्यात् ? ततः किं स्यात् कार्यमनाधारं स्यात् । कथमिति ? पूर्वं तावत्कार्यमात्मानं लभते पश्चात् कारणेषु समवायेन वर्तत इति । प्रागुत्पत्तेरनाश्रितं प्राप्नोति । समवायश्च कार्यकारणयोर्वर्तत इति वृत्तिरस्य वाच्या । न हि वर्तमानं किञ्चिदवृत्तिमदृष्टम् । प्राप्तित्वात् संयोगवद्वर्तत इति चेत् । न । व्याघातात् । प्राप्तिः संयोगो वर्तत इति किमयं प्राप्तिधर्मः आहोस्वित् कार्यधर्म इति । वयं च ब्रूमः कार्यधर्मो न प्राप्तिधर्म इति । तथा कार्यान्तराण्यपि प्राप्तिमन्ति सन्तीति । यदि पुनरियं वृत्तिः प्राप्तिधर्मोऽभविष्यत् प्राप्तेरपि प्राप्त्य-न्तरमभविष्यदित्यनवस्थादोषः । प्राप्तेर्वृत्तिमत्त्वात् । न चैनामनव-स्थां कश्चिच्छक्तः प्रतिपादयितुं प्रमाणाभावादिति । समवायश्च समवायान्तरेण वर्तते इति ब्रुवाणः शास्त्रं बाधते "तत्त्वं भावेन व्याख्यात"मिति । सम्बन्धिनिवृत्तौ सम्बन्धोऽवतिष्ठति इति न प्र-माणमस्ति । न नास्ति । ख्यातिनिमित्तानां निवृत्तेः ख्यातिनि-मित्तान्यस्य निवर्तन्ते । न समवायः अकृतत्वात् । अकृतकः स-मवाय इति च कार्यस्याधारवत्त्वेनानुमीयते । यद्ययं कृतकः स्यात् कार्येण सहोपादानादनाश्रितं कार्यं स्यात् । अथ का-र्यात् पूर्वं भवतीति ? तथापि कस्येति वाच्यम् । अथ पश्चाद् भवतीति ? कार्यानाधारतादोषस्तदवस्थः । तस्मात् स्वतन्त्रः समवाय इति सिद्धम् । तत्र प्रतिषिध्यमानधर्मविषयमनुमानं असद्विषयं न पुनर्विधीयमानस्वतन्त्रविषयम् । भवतीत्यसद्विषयमिति चेत् भवति जायत इत्येकोर्थः । न । जायमानार्थानभ्युपगमात् भवति विद्यत इति । एवं तावद् व्यवस्थितमेतत् तत्पूर्वकमनुमानमिति ।

अपरे तु ब्रुवते नान्तरीयकार्थदर्शनं तद्विदोनुमानमिति । अस्यार्थः । योर्थो यमर्थमन्तरेण न भवति स नान्तरीयकः नान्तरीयकश्चासावर्थश्चेति नान्तरीयकार्थः । तस्य दर्शनं तद्विदो-नुमानं यस्तं वेद तन्नान्तरीयकोयमिति । अत्रार्थग्रहणमतिरिच्यते । न हि नान्तरीयकः स्यान्नार्थ इति । नान्तरीयकार्थ इति च समासपदमेतत् । तत्र यदि षष्ठीसमासो नान्तरी-यकस्यार्थ इति, नान्तरीयकं तावत् कृतकत्वं, तस्यार्थो धर्मः प्र-योजनं वा । यदि धर्मः कृतकत्वस्यार्थः । सत्त्वमेयत्वाभिधेयत्वा-द्यनुमानं प्राप्तम् । अथ प्रयोजनमनित्यत्वप्रतिपत्तिर्हेतुः प्राप्तः । अथ बहुव्रीहिः नान्तरीयकोर्थो यस्येति, तत्रापि कृतकत्वं नान्तरीयकं तद्यस्य स हेतुः प्राप्तः । तच्च कृतकत्वं घटादेः शब्दस्यानित्य-त्वस्य वा । यदि घटादेः, घटादिर्हेतुः प्राप्तोनित्यः शब्दो घटा-दिति । अथ शब्दस्य, शब्दो हेतुः प्राप्तः अनित्यः शब्दः श-ब्दात् । अथानित्यत्वस्य साधनभावेन कृतकत्वं धर्मः ? तथाऽप्य-नित्यः शब्दोऽनित्यत्वादिति प्राप्नोति अनित्यत्वस्यार्थः कृतकत्व-मिति । सर्वथा कृतकत्वमनित्यत्वे न हेतुः । अथ सामानाधिक-रण्यं नान्तरीयकश्चासावर्थश्चेति, तथाऽप्यसमर्थः समासः विशेषण-विशेष्यनियमासम्भवात् । उभयपदव्यभिचारे सति समानाधि-करणो भवति नीलोत्पलवत् । नीलशब्दस्याप्यनेकार्थवृत्तित्वात् उत्पलशब्दस्यापि तथाभावात् सामानाधिकरण्यं भवति । न पुन-रिह नान्तरीयक इत्युक्ते अस्ति व्यभिचारोऽर्थोऽनर्थ इति यतो-ऽर्थग्रहणं समर्थं स्यादिति । एकपदव्यभिचारेऽपि दृष्टं सामाना-धिकरण्यं । यथा पृथिवी द्रव्यं । अत्रापि उभयपदव्यभिचारः प्रधानाङ्गभावभेदेन द्रव्यशब्देन द्रव्यमुच्यते द्रव्यत्वं च । पृथिवी-शब्देनापि प्रधानाङ्गविवक्षायां द्रव्यमुच्यते पृथिवी पृथिवीत्वं

चेति उभयपदव्यभिचारात् पृथिवी द्रव्यमिति युक्तमुक्तम् । इदं पुनर्न युक्तं नान्तरीयकार्थदर्शनमिति । कस्मात् ? अर्थप्रत्यायनार्थत्वाच्च प्रयोगस्य—अर्थप्रत्यायनार्थं हि शब्दप्रयोगमिच्छन्ति । नान्तरीयकमित्युक्ते अर्थो गम्यते । अतो न युक्तो ऽर्थशब्द इति । तद्विद इति च न युक्तं नैवान्यथा नान्तरीयक इति । न हि नारिकेलद्वीपवासिनो धूमदर्शने नान्तरीयकमिति ज्ञानमस्ति । अतस्तद्विद इत्यपि न वक्तव्यम् । एतेन तादृगविनाभावि धर्मोपदर्शनं हेतुरिति प्रत्युक्तम् । कोऽतिदेशार्थः ? यथा नान्तरीयकार्थदर्शने ऽर्थग्रहणमयुक्तं तथा धर्मग्रहणमपीति । उदाहरणं तु यथा धूमोऽग्नेरिति । एतच्च न सम्भवतीत्यनेकधा वर्णितम् । अपरे तु मन्यन्ते—

"अनुमेये ऽथ तत्तुल्ये सद्भावो नास्तिताऽसती"

इत्यनुमानम् । एतेनानुमेयैकदेशवृत्तेरपि सङ्गृहीतत्वादलक्षणम् । यथाऽनित्याः परमाणवो गन्धवत्त्वाद् घटवत् । अनुमेये सद्भाव इत्यभिधानादप्रसङ्गः । नाप्रसङ्गः एकदेशवृत्तेस्तद्धर्मत्वात् विपक्षैकदेशवृत्तिवत् । यथा विपक्षैकदेशे वर्त्तमानो न विपक्षे नास्ति एवं पक्षैकदेशे वर्तमानो न पक्षे नास्तीत्येतद्व्युदासे यत्नः कर्तव्यः । न कर्त्तव्योऽवधारणान्निवृत्तेः । अनुमेये सद्भाव इत्यवधारणे द्वे । किमनुमेय एव सद्भावोऽथानुमेये सद्भाव एव । किं पुनरनेन पूर्वेणावधारणेन क्रियते किमसम्भवो निवर्त्यते अथ सम्भवो ज्ञाप्यते, उभयथापि नावधारणार्थो, विनापि तदधिगतेर्विनाप्यवधारणेनायमर्थो गम्यते अनुमेये सद्भावोऽसद्भावो नेति । न चैकदेशवृत्तिर्निराकृत इत्यवधारणं व्यर्थं उत्तरपदबाधा च । अथोत्तरमवधारणमवगम्यते तस्य व्याप्तिरर्थः तथाप्यनुमेयमवधारितं व्याप्त्या न धर्मो, यत एव करणं ततोऽन्यत्रावधारणमिति । स-

म्भवव्याप्त्या चानुमेयं नियतं, व्याप्त्यतिव्याप्तिभ्यां च सम्भवः प्रस्तुतः। द्वौ राशी शिष्यमाणौ तत्तुल्यो विपरीतश्च। तत्र नास्तिताऽसतीत्यनेन विपरीतान्निवर्त्यनाम् तत्तुल्ये सद्भाव इति किमर्थमारभ्यते। न ह्यनेनाप्राप्तं किञ्चित् प्राप्यते। तत्तुल्ये च सम्भवमात्रं विवक्षितमिति। सम्भवमात्रं च व्याप्त्यतिव्याप्तिभ्यामनियतेन सम्भवेन लभ्यते। अथ तत्तुल्ये सद्भाव इत्येतदप्यवधारणार्थमारभ्यते, किं पुनरत्रावधार्यते? किं तत्तुल्य एव सद्भावः तत्तुल्ये सद्भाव एवेति। यदि तत्तुल्य एव सद्भाव इति सद्भावोऽवधारितः। तदा पूर्वोत्तरपदे बाधिते भवतः। न हि भवति देवदत्तमेव भोजय यज्ञदत्तं च तथेहापि तत्तुल्य एव सद्भावः अनुमेये चेत्युन्मत्तवाक्यम्। अथ तत्तुल्ये सद्भाव एव तत्तुल्यैकदेशवृत्तेरहेतुत्वं यस्तज्जातीयस्यैकदेशवृत्तिः प्रयत्नानान्तरीयकत्वादिस्तेन स हेतुरिति प्राप्तं। असति नास्तितेति चासम्प्रधार्य प्रोक्तं यदसतस्स्वरूपमेव तन्नास्ति। न ह्यसदाधारो भवति यतस्तत्प्रतिषेधः स्यात्। एतदप्यवधारणार्थमारभ्यते? किमवधार्यते? नास्तितैवासत्येव वेति। यदि तावन्नास्तितैवाऽसतीति व्यर्थं अनुक्तेपि तदधिगतेः। अनुक्तेप्येतद्गम्यते ऽसति नास्तीति। अथ पुनरसत्येव नास्तिता? गौर्विषाणित्वादित्ययमपि हेतुः प्राप्नोति। एवं ह्यसत्येव नास्ति न पुनर्नास्त्येव। यदप्येकाद्विपदपर्युदासेन सप्तिकासम्भवे पट्प्रतिषेधमुक्त्वा त्रिलक्षणो हेतुरभिधीयते एतदपि द्विपदयुक्तयोरन्वयिनोर्हेतुत्वात् द्विपदयुक्तस्य च व्यतिरेकिण एकस्य हेतुत्वादयुक्तमनभ्युपगतानित्यपक्षस्य कृतकत्वप्रयत्नानान्तरीयकत्वे द्विपदयुक्ते एव विपक्षाभावाद्धेतू भवतः। व्यतिरेक्यपि तत्तुल्यासम्भवात् द्विपदयुक्तश्च भवति। हेतुश्चेति। यथा नेदं निरात्मकं जीवच्छरीरं अप्राणि-

त्वप्रसङ्गात् । अतोऽव्यापकत्वादलक्षणमेतदिति । एतेन सम्बन्धादेकस्मात् प्रत्यक्षाच्छेषसिद्धिरनुमानमिति लक्षणं प्रत्युक्तम् । कथमिति ? न ह्येकस्मात् प्रत्यक्षादनुमानं भवति । अथापि सम्बन्धादेकस्मात् प्रत्यक्षादिति । एतदपि नैव, न ह्ययं तदा सम्बन्धं पश्यति यदाऽनुमिमीत इति । अथ पूर्वं दृष्टमिति ? तथाप्यनुपलब्धलिङ्गस्यानुमानं(१) प्रसज्येत । न चान्या गतिरस्ति । रूपेण च स्पर्शानुमाने स्वदृष्टिव्याकोपः । न ह्ययं रूपस्पर्शयोः सम्बन्धमुपलभते । अथैकार्थसमवायः सम्बन्ध इति ? सोऽपि स्वदर्शनव्याघातादयुक्त इति । न हि रूपस्पर्शावेकस्मिन्नर्थे वर्तेते । यत्र रूपं तत्र स्पर्श इति एतदपि नास्ति । न कश्चिद्रूपं स्पर्शो वा । परस्पराधाराधेयत्वेन स्यादिति चेत् । परस्पराधाराधेयभावेपि न रूपं स्पर्शे न स्पर्शो रूप इति । एतेन सप्तविधः सम्बन्ध इति प्रत्युक्तम् । न हि कार्यकारणभावादीनां सम्बन्धानां रूपस्पर्शयोरन्यतरः सम्बन्ध इति रूपेण स्पर्शानुमानं युक्तमित्यतोऽव्यापकत्वादलक्षणमिति निश्चितमनुमानम् ॥

अथोपमानम् । प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति ॥

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ ६ ॥

सूत्रार्थः पूर्ववत्(२) । प्रसिद्धसाधर्म्यादिति-प्रसिद्धं साधर्म्यं यस्य, प्रसिद्धेन वा साधर्म्यं यस्य, सोऽयं प्रसिद्धसाधर्म्यो गवयः तस्मात् साध्यसाधनमिति । समाख्यासम्बन्धप्रतिपत्तिरुपमानार्थः(३) । किमुक्तं भवति ? आगमाहितसंस्कारस्मृत्यपेक्षं सारूप्य-

---

(१) तथाऽप्युपलब्धसम्बन्धस्य पूर्वमनुमानकाले चानुपलब्धलिङ्गस्यानुमानम् —इत्ययं पाठस्तात्पर्यटीकायाम् ।

(२) समानासमानजातीयव्यवच्छेद इत्यर्थः । (३) फलम् ।

ज्ञानमुपमानम् । यदा ह्यनेन श्रुतं भवति यथा गौरेवं गवय इति, प्रसिद्धे गोगवयसाधर्म्ये पुनर्गवा साधर्म्यं पश्यतोऽस्य भवत्ययं गवय इति समाख्यासम्बन्धप्रतिपत्तिः ।

प्रत्यक्षागमाभ्यां नोपमानं भिद्यते। कथमिति ? यदा तावुभौ गोगवयौ प्रत्यक्षेण पश्यति तदा ह्ययमनेन सरूप इति प्रत्यक्षतः प्रतिपद्यते। यदा ऽपि शृणोति यथा गौरेवं गवय इति, तदा ऽस्य शृण्वत एव बुद्धिरुपजायते केचिद् गोधर्मा गवये ऽन्वयिन उपलभ्यन्ते केचिद्व्यतिरेकिण इति। अन्यथा हि यथा तथेत्येव न स्यात्। भूयस्तु सारूप्यं गवा गवयस्य इत्येवं प्रतिपद्यते । तस्मान्नोपमानं प्रत्यक्षागमाभ्यां भिद्यत इति । गवा गवयसादृश्यं प्रतिपद्यते गवयसत्तां वेति अहो ? प्रमाणाभिज्ञता भदन्तस्य। गवा गवयसारूप्यप्रतिपत्तेस्तु सञ्ज्ञासञ्ज्ञिसम्बन्धं प्रतिपद्यत इति सूत्रार्थः । तस्मादपरिज्ञाय सूत्रार्थं यत्किञ्चिदुच्यते ॥

अथ शब्दः। आप्तोपदेश इति ॥

आप्तोपदेशः शब्दः ॥ ७ ॥

न शब्दमात्रमिति सूत्रार्थः । आप्तः खलु साक्षात्कृतधर्मा । साक्षात्करणमर्थस्याप्तिः तया सह वर्तत इत्याप्तः । स्वर्गापूर्वदेवतादिषूपदेशो न प्राप्नोति अतीन्द्रियत्वात्—यदि साक्षात्करणमर्थस्याप्तिः स्वर्गापूर्वदेवतादीन् न कश्चित् पश्यतीति तत्प्रतिपादको व्यवहारो न स्यात्, तस्मादाप्तश्चासावुपदेशश्चेति युक्तं नाप्तस्योपदेश इति । नैष दोषः । न ब्रूमोऽस्मदादीनां प्रत्यक्षाः स्वर्गादय इति । अपि तु यस्य प्रत्यक्षाः तस्योपदेश इति । कः पुनरत्र न्यायः स्वर्गादयः कस्यचित् प्रत्यक्षा इति ? ब्रूमः (१)सामान्यविशेषवत्त्वात् आश्रितत्वात् कस्यचित्प्रत्यक्षा इति । यदा-

(१) न्यायमिति शेषः।

श्चिन्तं तत्कस्यचित् प्रत्यक्षमिति । परार्थत्वात्—यत्परार्थं तदपि कस्यचित्प्रत्यक्षमिति । वस्तुत्वादागमविषयत्वात्—यद्वस्तु यच्च कथ्यते तत् कस्यचित्प्रत्यक्षं भवति यथा घटादि । अनित्यत्वात् कस्यचित्प्रत्यक्षा इति । असिद्धमपूर्वस्यानित्यत्वम् । न । प्रायणानुपपत्तेः । यदि धर्माधर्मौ नित्यौ भवतः कस्य प्रक्षयात्प्रायणमिति । यदि पुनरनित्यौ, विपच्यमानयोरुपभोगात् प्रक्षये सति विपच्यमानकर्माशयान्तराभावात् पूर्वशरीरात् प्रच्यवनं मनस, उत्तरशरीरे सम्प्राप्तिश्चेति जन्ममरणे स्तः तस्मान्न नित्याविति । नित्ये वाऽपूर्वे परिकल्पिते तस्य साधारणता असाधारणता वा वक्तव्या । यदि साधारणता ? सर्वप्राणिसाधारणोऽभ्युदयः स्यात् न वाऽन्यन्नियामकमस्ति क्रियालोपश्चेति । नित्यत्वे व्यञ्जकभेदाच्चोभयदोषः—नित्यत्वे साधारणत्वे वा अदृष्टस्य न साधारणोऽभ्युदयो नापि क्रियाविलोप इति । कस्मात् ? व्यञ्जकभेदात्, नित्यमप्यपूर्वं योऽभिव्यनक्ति तस्य फलमभिव्यक्त्यर्था क्रियेति । अतो न क्रियालोप इति । येन यदभिव्यज्यते तस्यैव तत्फलदातृ भवतीति दृष्टम् । न दृष्टम् । न हि देवदत्तप्रकाशितं घटं यज्ञदत्तो न पश्यति । नित्यस्य वाऽपूर्वस्य काऽभिव्यक्तिः ? किमुपलब्धिः अथफलप्रदानसामर्थ्यं आहोस्विदावरणापगमः । यद्युपलब्धिः सा नास्ति । न हि कदाचिदप्ययमपूर्वं पश्यति अतीन्द्रियत्वात् । अथ फलप्रदानसामर्थ्यमभिव्यक्तिः ? फलप्रदानसामर्थ्यं किमपूर्वमथापूर्वधर्म इति । यद्यपूर्वं न हि किञ्चित्कृतं, अथापूर्वधर्मः तद्व्यतिरेकेणाप्यन्यदपूर्वमित्यत्र किं प्रमाणम् ?, वयं तु पश्यामः यतः फलं तदपूर्वमिति । अथावरणाद्यपगमोऽभिव्यक्तिः ? किमस्यावरणमिति वक्तव्यं न ह्यतीन्द्रियाणामर्थानामावरणसम्भवासम्भवौ चिन्त्येते । एतेन प्रतिपुरुषं नित्यत्वं

त्मावधारणे दोषः । किं पुनरात्मा ऽवधार्यते–किमात्माद्येव प्रमेयम् अथ प्रमेयमेवात्मादीति । यद्यात्माद्येव प्रमेयं दिगादीनां(१) सामान्यविशेषसमवायानां सूत्रे ऽनभिधानादव्यापकम् । अथ पुनः प्रमेयमेवात्मादि तथा च प्रमेया च तुलाप्रामाण्यवदिति(२) व्याघातः । तत्र सुवर्णादि द्रव्यपरिच्छेदसाधनत्वात् परिच्छेद्यत्वाच्च प्रमाणप्रमेयशब्दाभिलाप्यम् । लोकविरोधश्च एकस्यानेककारकवाच्यत्वात् वृक्षस्तिष्ठतीति । यथा तत्रैकं वृक्षाख्यं वस्त्वनेकेन कारकशब्देनोच्यते तस्य तस्य निमित्तस्य सन्निपातात् । एवं प्रमेयं प्रमाणमिति । न । सूत्रार्थापरिज्ञानात् । आत्माद्येव प्रमेयं यथावत् परिच्छिद्यमानमपवृक्तये भवतीत्ययं सूत्रार्थो, न प्रमेयान्तरनिराकरणार्थः सूत्रारम्भः । प्रमेयमेवात्मादीति न दोषः । किमुक्तं भवतीति? मुमुक्षु-

---

तत्त्व परीक्षितस्वप्रमाणविशेषाधीनप्रतिपत्ति, लक्षणं चास्य प्रमाणविशेषः । न चावान्तरप्रमाणसामान्यप्रत्यक्षादिलक्षणमन्तरेणात्मादिप्रमाणावतारः कर्त्तुं शक्यः तस्य प्रत्यक्षादिसामान्यविशेषत्वादतः प्रत्यक्षादिलक्षणानन्तरं तदवतारः । अपरीक्षितं च न तत् तत्त्वनिर्णयाय पर्याप्तमिति परीक्षा विधायिष्यते । तत्परिकरश्च संशयादय इति युक्तं तेषां पश्चाल्लक्षणम् । तदिह प्रमेयलक्षणाय तद्विभागोद्देशसूत्रमवतारयितुं भाष्यकारः पृच्छति स्म । किं पुनरनेन प्रमाणेनेति । जात्यभिप्रायमेकवचनं प्रकृते प्रमेये यथायथं प्रमाणानामुपयोगात् । तदेतद्भाष्यमनूद्य वार्त्तिककार आक्षिपति । किं पुनरिति । प्रमेयनान्तरीयकत्वं प्रमाणानां सामर्थ्यम् । समाधत्ते । नेति । प्रत्यक्षादिलक्षणसामर्थ्यात् प्रमेयमात्रं सिद्धं विशिष्टं तु प्रमेयमद्यापि न सिद्ध्यतीति तदर्थं प्रश्नः । स च विशेषो यथावदिति दर्शित इति । अयमेव च सूत्रार्थ इति । येषां तत्त्वज्ञानातत्त्वज्ञानाभ्यामपवर्गसंसारौ भवतस्त एव न न्यूनानाधिका इत्यर्थः । इति तात्पर्यटीका ।

(१) दिगादीनामिति टीकासम्मतः पाठः ।

(२) सूत्रं तु "प्रमेयता च तुलाप्रामाण्यव"दित्थं पठितम् ।

णा प्रमेयमेवात्मादि बोद्धव्यमेव । नास्य प्रमेयत्वं विधीयते नान्यस्य च प्रमेयत्वं निराक्रियते । अपि तु मुमुक्षुणा बोद्धव्यमेवैतदित्यनूद्यते तस्मादुभयमवधार्यते । न च यथोक्तदोषः । उपेत्य ब्रूमो दिगाद्यप्यत्रैव लभ्यते उपपत्तिसामर्थ्यात् । का पुनरुपपत्तिः ? प्रवृत्तेर्विंशतिभेदात् तत्संस्कारकत्वेऽपि न दिगादयोऽपि लभ्यन्ते सामान्यविशेषसमवायाश्च विशेषणविशेष्यभावेन आत्मादयो विशेषत्वेनोपदिष्टाः तेषां चेतरेतरव्यवच्छेदकभावेन सामान्यविशेषसमवाया विशेषणं कृतं (१)सूत्रे इति । न पुनरिदं प्रमेयावधारणार्थं सूत्रं न तु प्रमेयविशेषावधारणार्थं प्रमेयमात्रावधारणार्थं च प्रवृत्तौ विहितविधानादकुशलः सूत्रकारः स्यात् । आद्येन वा सूत्रेण प्रमेयं विहितमिति पुनर्विधानादुन्मत्तवाक्यमिदं स्यात् एवं चार्थमेवार्थकं सूत्रकारस्तुशब्दमाह । अन्यदपि प्रमेयमस्ति । यस्य तु तत्त्वज्ञानान्निःश्रेयसं तदिदं प्रमेयमिति तुशब्देन ज्ञापयति । सुखं पुनः कस्मादत्र नोक्तम् ? किमभावादन्यत उपलब्धेर्वा, न तावदभावात् प्रत्यात्मवेदनीयत्वात् प्रत्यात्ममेव वेदनीयं सुखमुपलभ्यमानं न शक्यं नास्तीति वक्तुम् । न चान्यत उपलब्धिरस्मादेव । अनभिधानं तु वैराग्यज्ञापनार्थम् । कथं? नायं मोक्ष्यमाणः सर्वं दुःखं भावयेदिति तस्य दुःखभावनार्थः सुखस्यानपदेशः । सर्वं दुःखं भावयतस्त्रैलोक्यस्यानभिरतिसञ्ज्ञा भवति । तां चोपासीनस्य त्रैलोक्यविषया तृष्णा विच्छिद्यते । तृष्णा नाम पुनर्भवप्रार्थना । साऽस्य सर्वं दुःखमिति भावयतो न भवति न हि कश्चिद्दुःखं प्रार्थयते । तृष्णाप्रहाणाद्यानि पुनर्भवसाधनानि तानि नोपादत्ते । तदनुपादानादनागतौ धर्माधर्मौ न भवतः । यावत्युत्पन्नौ तावप्युपभोगात् क्षयं गच्छतः । सोऽयं धर्माधर्मलक्षणस्य

(१) भवन्तीति ते उक्ता भवन्तीत्यर्थाद्दिगादिग्रहणम् ।

संसारबीजस्य उच्छेदादपवृज्यते न पुनर्जायत इति अस्यार्थस्य प्रदर्शनार्थं सुखानभिधानमिति ॥

आत्मनः समानासमानजातीयविशेषणार्थं सूत्रम् । इच्छेति ॥

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ १० ॥

आगमस्यानुमानेन प्रतिसन्धानार्थं वा । आगमेन प्रतिपन्न आत्मा तस्यानुमानेन प्रतिसन्धानार्थम् । प्रमाणसंप्लवस्योदाहरणार्थं वा । यत्तदवोचाम प्रमाणानि संप्लवन्ते इति तस्यायं विषयः । यज्जातीयस्यार्थस्य सन्निकर्षादिति भाष्यम् । तत्रेच्छादीनां प्रतिसन्धानमात्मास्तित्वप्रतिपादकम् । तत्रेदं विचार्यते । कथमिच्छादि अनुपलभ्यमानमात्मानं गमयति? स्मृत्या सहैकविषयभावात् यस्मादेवेच्छादयः स्मृत्या सहैकविषया भवन्ति तस्मादेककर्तृकत्वं प्रतिपादयन्ति । न हि नानाकर्तृकाणां नानाविषयाणां नानानिमित्तानां(१) च प्रतिसन्धानमस्ति । न हि रूपरसगन्धस्पर्शप्रत्ययाः प्रतिसन्धीयन्ते । न हि भवति यद्रूपमद्राक्षं सोऽयं स्पर्श इति । नापि भवति यत् स्पर्शमस्प्राक्षं तद्रूपं पश्यामीति । नापि देवदत्तदृष्टे यज्ञदत्तप्रतिसन्धानं दृष्टम् । न हि भवति देवदत्तो यमद्राक्षीत् यज्ञदत्तस्तमद्राक्षमिति । किं कारणम् ? बुद्धिभेदानां प्रतिनियतविषयत्वादिति । प्रतिनियतविषया इतरेतरव्यावृत्तिरूपा नैरात्म्यवादिनो न भवन्तीति न युक्तं प्रतिसन्धानं तस्माद्यः प्रतिसन्धाता स आत्मेति ।

कार्यकारणभावात् प्रतिसन्धानमिति चेत् अथापि मन्येथा नैककर्तृकत्वात् प्रतिसन्धानं, किं तर्हि ? कार्यकारण-

(१) 'प्रत्ययाना'मित्यधिकं २ पुस्तके ॥

भावात् पूर्वपूर्वबुद्धिविशेषादुत्तरमुत्तरं बुद्ध्यन्तरं पूर्वबुद्धिशक्त्यनुविधानात् सकलाहितशक्तिकलापमुत्पद्यते, अतो नानात्वेपि बुद्धीनां कार्यकारणभावात् प्रतिसन्धानं बीजादिवदिति, तद्यथा शालिगुटिकाद्यनन्तरमङ्कुरः प्रादुर्भवति तस्य शालिशक्त्यनुविधानं तत्पूर्वकतया व्यवतिष्ठते, अनन्तरं महाभूतैरनुगृह्यमाणमुत्तरशालिबीजं जनयति न यवबीजं, अतत्पूर्वकत्वात्, तथेहाप्येकसान्तानिकीनां बुद्धीनां कार्यकारणव्यवस्थानात् प्रतिसन्धानं अतत्पूर्वकत्वात् न सन्तानान्तरबुद्धीनां, न पुनरेककर्तृकत्वात् प्रतिसन्धानप्रदर्शनात् तदिदं प्रतिसन्धानमन्यथाभवदात्मनः सत्तां प्रतिपादयितुं शक्नोति । न । नानात्वस्याबाधनात् कार्यकारणभावात् प्रतिसन्धानं ब्रुवन् न नानात्वं बाधते । किं कारणं? कार्यकारणभावः खलु नानात्वाधिष्ठानः उभयपक्षसम्प्रतिपन्ने च नानात्वे न प्रतिसन्धानं दृष्टं, कस्मात्? अन्येनानुभूतस्यान्येनास्मरणात् । न चास्मृतं प्रतिसन्धातुं शक्नोति । अकार्यकारणभावेऽनुपपत्तेः । न ब्रूपः कार्यकारणभावे दृष्टं प्रतिसन्धानं अपि त्वकार्यकारणभावे न दृष्टमिति अतत्पूर्वकत्वादित्युक्तम । तस्मादयथार्थोयमुपालम्भ इति । तदयुक्तम । विवादकारणाव्यतिरेकादिति । एवं ब्रुवाणो भवान् न कारणमतिरेचयति । मयोक्तं नानात्वे न दृष्टमिति । त्वं न ब्रूषे ऽकार्यकारणभावान्नानात्वे न दृष्टमिति अनैकान्तिकत्वाच्च विवादकारणमतिरिच्यते । तुल्यं भवतोऽपि नानात्वे ऽदर्शनादिति ब्रुवता न विवादकारणमतिरेचितं भवति । अभ्युपगमादनुत्तरं—तुल्यमिति ब्रुवताऽभ्युपगतं भवति । नासाधनात्—न मया कार्यकारणभावात् प्रतिसन्धानं साध्यते अपि त्वन्यथैव तद्भवतीति हेतोरसिद्धार्थतादोषोऽभिधीयत इति । न । हेत्वर्थापरिज्ञानात् । न भवता हेतुरूपं विशेषतो व्यज्ञायि

केवलं हेतुसामान्यात् अन्यथैव भवतीति हेतुदोषोऽभ्यधायि। विशेषितं चैतत् प्रतिसन्धानं—स्मृत्या सह पूर्वापरप्रत्ययैकविषयत्वेन प्रतिसन्धानं, सा च स्मृतिर्भवत्पक्षे ऽनुपपन्ना। कस्मात्? अन्येनानुभूतस्यान्येनास्मरणात्। न ह्यन्येनानुभूतस्यान्येन स्मरणं, न ह्यन्येनानुभूतमन्यः स्मरति, अस्ति च स्मृतिः, तस्मात् यस्मिन् पक्षे स्मृतिः सम्भवति तत्र प्रतिसन्धानमिति न्याय्यम्। भवानस्मान् स्मृत्यनुपपत्त्या भावयति न हि नः पक्षे स्मृतिर्न सम्भवति। कथमिति? कार्यकारणभावादेव(१) यत्कायचित्तसन्ताने स्मृतिरनुभवो वोत्पद्येते स कायचित्तसन्तानः स्मर्ता चानुभविता च भवति। न। अस्थिरत्वाद्बुद्धीनाम्। स्थिरं हि वासकेन वास्यमानं दृष्टं न च बुद्धीनां स्थिरत्वमस्ति, असम्बन्धाच्च—असम्बद्धं च वासकेन वास्यमानं(२) दृष्टं न च वासकेन सम्बन्धो बुद्धीनामस्ति। शक्तिविशिष्टचित्तोत्पादो वासनेति चेत्—अथाप्येवं कल्प्येत पूर्वचित्तसहजाच्चेतनाविशेषात् पूर्वशक्तिविशिष्टं चित्तमुत्पद्यते सोऽस्य शक्तिविशिष्टचित्तोत्पादो वासनेत्युच्यते। अत्रोक्तमस्थिरत्वाद्वासकेनासम्बन्धाच्चेति। यश्चासौ चेतनाविशेषः पूर्वचित्तसहभावी स नापि वर्त्तमाने चेतस्युपकारं करोति नाप्यनागते। कथमिति? वर्तमानं तावदविकार्यं यथाभूतं जायते तथाभूतमेव नश्यति, अनागते सोऽपि न सम्बध्यते न चासम्बद्धं वासयतीत्युक्तम्। तस्मात् कार्यकारणभावात् स्मृतिरित्यशिक्षितो वासनमिति(?)। इतश्च न भवत्पक्षे स्मृतिः भावस्य भवित्रपेक्षत्वात्। सर्वो हि भावो भवितारमपेक्षते क्रियात्वादुत्पत्तिवदिति। स्मृतेश्च भविता कर्म वा भवेत् कर्ता वा, तण्डुलानां पाचक इति

(१) यत्कायचित्तसन्ततिप्रभवोऽनुभवः स्मरत्यसावित्यधिकं २पु०॥

(२) वासमानं—पा० २ पु०।

कर्माणि, देवदत्तस्य गतिरिति कर्त्तरि। तत्र न तावत्कर्मण्यसतोऽपि सम्भवात्। यदा विद्यमानं स्मरति तदाऽनाधारा स्मृतिः प्राप्नोति। अथ कर्त्राधारा सा, तदाऽस्मत्पक्षे प्रयुक्ता न भवत्पक्षे। कस्मात्? कर्तुरनभ्युपगमात्। न हि भवन्तः कर्त्तारं स्मृत्यर्थकं प्रतिपद्यन्त इति। अनाधारैव स्मृतिरिति यदाऽयं पक्षो भवति तदाऽनुमानं नास्ति कार्यस्यानाधारस्यादर्शनादिति। कार्यं सर्वमाधारवत् दृष्टं रूपादि, तच्च स्मृतिः तस्मादाधारवती। कार्यकारणयोर्भावभवितृव्यवहारः कार्यक्षणो भावः कारणक्षणो भवितेति। एवं च किमन्येन भवित्रा कल्पितेनेति। तच्च न। कालभेदात् कार्यकारणयोर्भिन्नकालत्वादाश्रयाश्रितभावानुपपत्तेः कुण्डबदरादिवदिति। अथापीदं स्यात् उत्पत्तिर्भावः उत्पत्ता भवितेति स्मृतिरप्युत्पद्यते यस्मात् तस्या अप्युत्पत्तिर्भावो भविष्यति स्मृतिरप्युत्पत्त्री भवितेति। तच्च न। विरोधादनभ्युपगमाच्च। यदि स्मृतिव्यतिरिक्तोत्पत्तिर्व्याहतं भवति, स्वरूपं च(१) वक्तव्यं, न हि भवन्त उत्पत्तिमव्यतिरेकेणोत्पत्तिं मन्यन्ते। व्यतिरिक्तां चोत्पत्तिं मन्यमानेन भवता तस्याः स्वरूपं वक्तव्यम्। स्वरूपं च निरूप्यमाणं तन्त्रं(२)बाधते। कथमिति? उत्पत्तिः स्वकारणसत्तासम्बन्धः सत्ता वा स्वकारणसम्बन्धविशिष्टा, उभयं च तन्त्रेणाभ्युपगतमिति विरोधः। अथ स्मृत्यव्यतिरिक्तोत्पत्तिपूर्वकं? किं क वर्त्तत इति शून्यमभिधानम्। उत्पत्तिभाव उत्पत्त्री स्मृतिरिति। यदा सोत्पत्तिः स्मृतेर्भावत्वेन विवक्षिता भवति तदैवं वक्तुं न्याय्यम्। यदा तु स्मृतिर्भावस्तदा भवित्रा भवितव्यम्। कस्मात्? भावस्य भवित्रपेक्षत्वादित्युक्तम्। तस्मात् कथञ्च न भवत्पक्षे स्मृतिः सम्भवतीति स्मृतिमन्तरेण न प्रतिसन्धानमस्तीति। अस्ति चेदं प्रतिसन्धानं तस्मादेककर्तृकमेतत्सोऽर्थोऽन्य एक

(१) चोद्यत्वर्थं। (२) शास्त्रम्।

आत्मेति ।

अथवाऽन्वयेनान्यः सूत्रार्थोऽभिधीयते इति । देवदत्तस्य रूपरसस्पर्शप्रत्ययाः एकानेकनिमित्तकाः स्मृत्या सह मयेति प्रतिसन्धानात् कृतसङ्केतानां बहूनामेकस्मिन् नर्तकीभ्रूक्षेपे युगपदनेकप्रत्ययवत् । यथा नानाकर्तृकाणां कृतसङ्केतानां नानाभूताः प्रत्यया निमित्तस्य भ्रूक्षेपस्यैकत्वात् प्रतिसन्धीयन्ते तथेहापि नानाविषया निमित्तस्य एकत्वात् प्रतिसन्धास्यन्ते यत्तन्निमित्तं स आत्मेति । अथवेच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमित्यन्यथा वर्णयन्ति । गुणा इच्छादयः गुणाः परतन्त्रा भवन्तीति न्यायः गुणत्वं पारिशेष्यात् । न सामान्यविशेषसमवाया अनित्यत्वात् । न द्रव्यं कर्म वा व्यापकद्रव्यसमवायात् शब्दवदित्यादिसामान्यतोदृष्टमित्येतस्मिन्ननुमानं व्यवस्थितम् । एतेनानित्यत्वात् पारतन्त्र्यमिच्छादीनां कार्यत्वाच्च रूपादिवदित्युक्तम् । अयावद्द्रव्यभावित्वेन शरीरे गुणत्वप्रतिषेधः तत्प्रतिषेधाच्चात्मगुणत्वमिति परिशेषात् सिद्ध आत्मेति ।

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ ११ ॥

चेष्टेन्द्रियार्थाश्रयः शरीरमिति । का पुनरियं चेष्टा ? हिताहितप्राप्तिपरीहारार्थः स्पन्दः । सुखसाधनोपलब्धौ तदीप्साप्रयुक्तस्य यः परिस्पन्दः सा चेष्टेति गम्यते । एवं दुःखसाधनोपलब्धौ तज्जिहासानुष्ठानलक्षणः परिस्पन्द इति । कथमिन्द्रियाणां शरीरमाश्रयः ? स्वकारणवृत्तित्वादवृत्तित्वाच्च । यानि तावत्कार्याणीन्द्रियाणि तानि स्वकारणवृत्तीनि । यदकार्यं तदवृत्ति । घ्राणादीनि त्वक्पर्यन्तानि कार्याणि । श्रोत्रमनसी त्वकार्ये । न च घ्राणादिमनःपर्यन्तमिन्द्रियं शरीरवृत्ति तस्मादयुक्तमिन्द्रियाश्रयः शरीरमिति । शरीरानुविधानमिन्द्रियाश्रयत्वं ब्रूमः न पुनराधाराधेयभा-

येनेन्द्रियाणि शरीरे वर्तन्त इति । अपि तु शरीरस्योपघातानुविधानमिन्द्रियाश्रयत्वस्यार्थः। शरीरानुग्रहेणानुगृह्यन्ते तदुपघाते चोपहन्यन्ते इत्ययमाश्रयार्थः तस्मादयथार्थ आक्षेप इति । एतेनार्थानामाश्रयार्थ उक्तो वेदितव्यः। किं कारणं? न हि गन्धादयोऽर्थाः शरीरवृत्तयः । यत्तु तेषां कार्यं सुखदुःखोपलब्धिनिमित्तत्वं तत्त्वासति शरीरे भवतीति शरीराश्रया उच्यन्ते। यथा ग्रामीणा ग्रामण्यमाश्रिता इति । कथं पुनरेते चेष्टादयः सामान्यशब्दाः सन्तो विशेषवृत्तयो भवन्तीति? सामान्यशब्दानामपि विशेषवृत्तित्वं, सामर्थ्यात् सामर्थ्यं प्रकरणादि, ब्राह्मणान् भोजयेति यथाऽशेषब्राह्मणभोजनस्याशक्यत्वात् विशेषण सन्निधीयमानं प्रकरणापन्नं ब्राह्मणविशेषमाह। एवं चेष्टादिशब्दानामपि सामर्थ्याद्विशेषे ऽवस्थानम् । सामर्थ्यं च लोकतस्तदधिगतिः प्रमाणासम्भवो वा । लोकतस्तावत् चेष्टाशब्दं न क्रियामात्रे प्रयुङ्क्ते किन्तु विशेष इति। यथा स्पन्दते सर्पति धावतीति । यथैते स्पन्दादिशब्दाः क्रियावाचकाः सन्तः क्रियाविशेषेष्ववतिष्ठन्ते तथा चायं चेष्टाशब्दः सामान्यवाच्यपि प्रमाणासम्भवात् क्रियाविशेषे वर्तते न क्रियामात्राधारस्य शरीरव्यक्तिहेतुत्वं सम्भवतीति । एवं च घटादिष्वप्रसङ्गः । यैरप्यन्त्याद्यादिपदप्रयोगे घटादिष्वप्रसङ्ग इति दृश्यं क्रियते तदप्यनेन व्याख्यानेन प्रत्युक्तम् । सति तु प्रसङ्गे समस्तपदप्रयोगे ऽपि न परमाणुषु प्रसङ्गो वार्यत इति । यथा त्वस्माभिर्वर्णितं तथा न क्वचिदपि शरीरादन्यत्र वर्तत इति ।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥१२॥

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्य इति सूत्रम् । लक्षणसूत्राणि समानासमानजातीयविशेषणार्थानि सर्वाणीति सू-

वार्थो द्रष्टव्यः । उद्देशसामान्याल्लक्षणाभिधानं नामधेयेन पदार्थाभिधानमात्रमुद्देश इत्युद्देशलक्षणमुक्तं इदं च तथाभूतं तस्मादलक्षणमिति । नेदं तथा, करणभावात् स्वविषयग्रहणलक्षणत्वमिन्द्रियाणां, करणस्वभावकानीन्द्रियाणीति तेषामतीन्द्रियाणां यत् स्वविषयग्रहणं तेन लक्ष्यन्त इति स्वविषयग्रहणलक्षणत्वं वेदितव्यम्, असाधारणत्वादिति ।

भूतेभ्य इति पृथिव्यादिकारणोपदेशो नियमार्थः । कः पुनरयं नियमः ? भूतगुणविशेषग्रहणसाधनत्वं, न सर्वमिन्द्रियं सर्वभूतगुणविशेषं गृह्णातीति । अपि तु यज्जातीयमिन्द्रियं भवति तस्य यो गुणविशेष इतरेतरभूतव्यवच्छेदहेतुर्गन्धादिः स तेनैवेन्द्रियेण गृह्यत इत्ययं नियमः। ऐकात्म्ये पुनरयं नियमो न स्यात् । यदि पुनरिन्द्रियाण्येकात्मकानि एककारणकानि स्युः कारणस्वभावानुविधानादैकात्म्याद्विषयव्यवस्था न स्यात् सर्वं सर्वार्थमेकं वा सर्वार्थमिति स्यात् । एककारणानामपि स्वभावभेदो रूपादिवदिति चेत्—अथ मन्येथाः दृष्ट एककारणानां पाकजरूपादीनां स्वभावभेदः। कतमत् पुनरेकं कारणं रूपादीनाम्? अग्निसंयोग इति। न। सिद्धान्तापरिज्ञानात्—न ब्रूमोऽग्निसंयोगादेकस्माद्रूपादय इति, अपि तु पूर्वरूपादिविशेषापेक्षात् , यद्द्रव्यं पच्यतेऽग्निसंयोगेन तस्य ये पूर्वरूपादयस्तेषां यः स्वगतो विशेषः(१) तमपेक्षमाणोऽग्निसंयोग उत्तरान् रूपादीन् विशिष्टानारभते । एवं च कृत्वा परमाणोः पक्वतरतमादिभेदः। तस्मान्नैककारणपूर्वका रूपादय इति न किञ्चिदप्येककारणकं कार्यं दृष्टमिति । सर्वं हि कार्यं प्रादुर्भवत् समवाय्यसमवायिनिमित्तकारणेभ्यो भवतीति। एकं कर्म संयोगविभागकारणं दृष्टमिति चेत्। न अनभ्युपगमात्। स्यान्मतिर्ननु

(१) प्रध्वंस इत्यर्थः ।

च दृष्टं कर्म संयोगविभागकारणकमिति । न । अनभ्युपगमात्
नैतदभ्युपगच्छामो निरपेक्षं कर्म संयोगविभागयोः कारणमिति ।
यदि तर्हि कर्मापि सापेक्षं संयोगविभागौ करोति कर्मलक्षणहानिः
यन्निरपेक्षं संयोगविभागकारणं तत्कर्मेत्युक्तं तद्धीयेत लक्षणहानेश्च
न कर्म ततश्च संयोगविभागौ न कर्मपूर्वकाविति। नैष दोषः। नब्रूमो-
निरपेक्षं कर्म कारणमिति न किञ्चिदपेक्षत इति। अपि तु चरमभावि-
निमित्तान्तरं नापेक्षत इत्ययं निरपेक्षार्थः । यथा द्रव्यजातं समा-
नजातीयद्रव्यं संयोगं च चरमभाविनमपेक्षमाणं द्रव्यमारभते नैवं
कर्मजातीयं पश्चाद्भाविनिमित्तमपेक्षते। अपि तु कर्म सत्संयोगवि-
भागावारभते तस्मान्न कर्मलक्षणहानिः न चैकपूर्वकत्वं संयोगवि-
भागयोरिति ॥

पृथिव्यापस्तेजो वायुराकाशमिति भूतानि ॥१३॥

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः॥१४॥

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्था इत्येतत्सूत्रम् ।
पृथिव्यादिगुणा इत्येतस्मिन् पदे ऽनेकः समासः सम्भवति । क-
थमिति ? पृथिव्यादीनां गुणा इति षष्ठीसमासः । पृथिव्यादीनि
च गुणाश्चेति द्वन्द्वः । पृथिव्यादयो गुणा येषामिति बहुव्रीहिः ।
एवमनेकसमासोपपत्तेः संशयः । किमत्र तत्त्वमिति ? द्वन्द्वः समास
इति तत्त्वम् । षष्ठीसमासस्तावन्न, पृथिव्यादीनामनिन्द्रियार्थत्व-
प्रसङ्गात् । यदि पृथिव्यादीनां गुणा इति षष्ठीसमासः स्यात्
पृथिव्यादीनां गन्धादिगुणविशेषणत्वेनोपयुक्तानामिन्द्रियार्थत्वं न
स्यात् विशेषणवैयर्थ्यं च स्यादिति । गन्धरसरूपस्पर्शशब्दा
इत्युक्ते पृथिव्यादिगुणा गम्यन्ते ततश्च पृथिव्यादिग्रहणं व्यर्थम् ।
न हि गन्धादीनां द्वैराश्यमस्ति पृथिव्यादिगुणत्वं चान्यगुणत्वं च

यतो(१) विशेषणमर्थवत् स्यात् तस्मान्न षष्ठीसमासः। गुणिनामसिद्धेर्न बहुव्रीहिः पृथिव्यादयो गुणा येषां, के ते गुणिनो येषां पृथिव्यादयो गुणाः। न च पृथिव्यादीनां गुणत्वं शक्यं प्रतिपादयितुम्। न चान्यथा बहुव्रीहिः। प्रायेणायं समानाधिकरणपूर्वो भवति यथा चित्रगुरिति गोमत्तायां प्रसिद्धायां चित्रगुणसम्बन्धे सुप्रसिद्धे गवां चित्रगुरिति बहुव्रीहिः न पुनरिह गुणी प्रसिद्धः। नापि पृथिव्यादीनां गुणत्वं प्रसिद्धम्। विशेषणत्वाद्गुणाः पृथिव्यादय इति स्यात्। तन्न। सर्वो गुण एव स्यादेतस्यां कल्पनायां, न हि कस्यचित् कश्चित् विशेषणं विशेष्यो वा न भवतीति सर्वगुणत्वप्रसङ्गः तस्माद्बहुव्रीहिरपि न। उभयसमासप्रतिषेधादन्यसमासाभावाच्च द्वन्द्वः। यस्मात् षष्ठीतत्पुरुषबहुव्रीही प्रतिषिद्धौ समासान्तरं च न सम्भवतीति शिष्यमाणश्च द्वन्द्वः तस्मात् द्वन्द्वः समास इति। न द्वन्द्वः समासः शास्त्रयुक्त्योरभावात् यद्ययं द्वन्द्वो भवति शास्त्रं युक्तिर्वा पृथिव्यादीनामिन्द्रियार्थत्वे वक्तव्य इति। न। उभयस्याप्युपपत्तेरिति। उभयं पृथिव्यादीनां इन्द्रियार्थत्वे शास्त्रं युक्तिश्च सम्भवति। शास्त्रं तावत् दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति। युक्तिरपि दर्शनस्पर्शनयोरेकविषयत्वेन प्रतिसन्धानं, यमहमद्राक्षं तं स्पृशामीति दृष्टिस्पर्शनविषया युक्तिः। शास्त्रमप्यस्मिन् पक्षे सम्भवतीति। ऐन्द्रियकत्वाभिधानाच्च सामान्यस्येति। तस्मात् सिद्धं पृथिव्यादीनि च गुणाश्चेति द्वन्द्व समास इति। पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याण्युपादिश्यन्ते, गुणग्रहणेन च सर्व आश्रितो गुण इति सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहवेगकर्मसामान्यविशेषा अनाश्रितश्च समवायस्तद्धर्मत्वाद्गुण इति। गन्धरसरूपस्पर्शश-

(१) यतो—पा० २ पु०।

ब्दास्तर्हि पृथङ्न वक्तव्याः गुणग्रहणेन ग्रहणात् । पृथिव्यादिगुणास्तदर्था इति सूत्रे वक्तव्यम् । लघु चैवं भवतीति स एवार्थः सेत्स्यतीति । न कर्तव्यम्(१) । गन्धरसरूपस्पर्शशब्दानां पृथगभिधानमिन्द्रियविशेषनियमज्ञापनार्थम् । इन्द्रियाणि गन्धरसरूपस्पर्शशब्देषु तत्सामान्येषु नियतानि अन्यत्रानियतानि । तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः सत्तागुणत्वे च सर्वेन्द्रियग्राह्ये समवायोऽभावश्च तथा ।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतदमृष्यमाणः पर आह—स्पर्शग्रहणमेव स्पर्शनेन, रूपग्रहणमेव चक्षुषेति । स पर्यनुयोज्यः—अथ रूपस्पर्शौ चक्षुःस्पर्शनाभ्यां गृह्येते इति कथमवगम्यते? यस्माच्चक्षुःस्पर्शनाभ्यां तद्विशिष्टः प्रत्ययो भवति ? अनास्पदस्तर्हि प्रतिषेधः घटादावपि तद्विशिष्टप्रत्ययदर्शनात् । घटादिकमप्यर्थं दर्शनस्पर्शनाभ्यामुपलभमानश्च तद्विशिष्टं घटादिकमर्थं प्रतिपद्यते । तस्मादसम्प्रधारितः प्रतिषेध इति । रूपादिभ्यस्तथा सन्निविष्टेभ्यो घटादिप्रत्यय इति चेत्—यदिदं भवताऽपदिश्यते दर्शनस्पर्शनाभ्यामयं घटं प्रतिपद्यत इति । मिथ्यैतत् । रूपादय एव तेन तेनाकारेण सन्निविशन्ते तानयमुपलभ्य तथाकारान् प्रतिपद्यमानो घट इति प्रपद्यते, न पुना रूपादिव्यतिरिक्ता घटादय इति । न । आकारार्थानभिधानात्—अतथाभूतस्य तथाभूतेन सामान्यमाकारशब्दस्याभिधेयम् । तद्यथा स्थाण्वाकारः पुमानित्यपुरुषस्य स्थाणोराकारः पुरुषेण यत् सामान्यं स आकारशब्दस्यार्थः स्थाणुपुरुषप्रसिद्धौ सत्यां भवतीति । न पुनर्भवतां घटाकारा रूपादय इति रूपादिषु घटाकारबीजं किञ्चिदस्ति । तस्मात् घटाकारा रूपादय इति यत्किञ्चिदेतदिति ।

---

(१) लघुसूत्रम् । गन्धादीनां पृथगभिधानं कर्तव्यमित्यर्थः ।

रूपादिमात्रे च घटादिबुद्ध्यभावः—यस्य रूपादिमात्रं घटादयः तस्य तेषां समानत्वात् यास्ता(१) बुद्धयो विविक्ता गौरश्वो घट इति ता न प्राप्नुवन्ति, रूपादिगतस्य बुद्धिनियामकस्य विशेषस्य हेतोरभावात्। संस्थानभेदाद्भेदप्रत्यय इति चेत्—केनचित् संस्थानविशेषेणावतिष्ठमाना रूपादयः संस्थानभेदानुविधानाद् घटादिबुद्धिहेतवो भवन्तीति। नैतदस्ति संस्थानस्यान्यत्वेऽनन्यत्वे संज्ञाभेदमात्रत्वात् व्यर्थाभिधानप्रसङ्गाच्च। यदि संस्थानं रूपादिभ्योऽन्यत्, द्रव्यं तदिति संज्ञाभेदमात्रम्। अथानन्यत्तथापि रूपादीनां संस्थानभेदानुविधानात् घटादिप्रत्यया इति व्यर्थमभिधानम्। घटादिप्रत्यया मिथ्याप्रत्यया इति चेत्—स न मन्यते घटादिप्रत्ययाः सम्यक्प्रत्यया इति, किन्तु शब्दवासनावशान्मिथ्याप्रत्यया भवन्तीति। तदयुक्तम्। मिथ्याप्रत्ययानां सम्यक्प्रत्ययानुकारित्वात्—यत्र ते मिथ्याप्रत्यया लोके भवन्ति सर्वत्र ते सम्यक्प्रत्ययाऽनुकारिणो भवन्ति न पुनर्घटादिप्रत्ययानां मिथ्याप्रत्ययत्वेन कल्पितानां बीजमस्ति। न चैते निर्बीजाः प्रादुर्भवन्ति तस्मान्न मिथ्याप्रत्यया इति। मिथ्याप्रत्ययाश्चैत इत्यव्यतिरेके प्रमाणोपपत्तौ सत्यां सिध्यति, न चाव्यतिरेकप्रतिपादकं प्रमाणमस्ति। न नास्ति, तदग्रहे तद्बुद्ध्यभावात् यद्यस्मादनर्थान्तरं भवति तदग्रहे तस्याग्रहो दृष्टः तद्यथा यूपस्य पङ्क्तेश्च, यच्च यतोऽर्थान्तरं भवति तदग्रहे तस्य ग्रहो दृष्टः तद्यथा रूपाद्यग्रहे वालग्रह(?) इति। नायं हेतुरनैकान्तिकत्वात् ये घटादिभावमापन्नाः पृथिव्यादयस्तेषां पृथिव्यां संगृह्यमाणायामर्थान्तरभूतानामबादीनामग्रहणम्। अथ चार्थान्तरभूता अबादयो न दर्शनविषयभाजो भवन्ति तस्मादनेकान्तः। अथ न चत्वारि महाभूतानि तथा सन्निविष्टानीति पक्षस्तथापि रूपं चत्वा-

(१) यातामा—पा० २ पु०।

रि महाभूतानीति वचनं व्याहन्यते। अथ ब्रूषे नैव नो रूपादिव्यतिरिक्ताः पृथिव्यादय इति ? तथाप्यस्य वाक्यस्यायमर्थो भवति रूपादयो रूपमिति, ततश्च कामेऽष्टद्रव्यकोऽणुरिति व्याहन्येत। अथ पृथिव्यादीनां सङ्घातमात्रे रूपादिव्यवहारः ? तथापि न रूपं पृथिव्यादयो वस्तुतः सन्ति । कथमिति ? पृथिव्यादीनां सङ्घातो रूपं पृथिव्यादयश्च रूपादिसङ्घात इति संहन्यमानस्याभावान्न सङ्घातोऽस्ति, सर्वः सङ्घातः संहन्यमानतन्त्रो दृष्ट इति सर्वथा न व्याघातान्मुच्यते ।

तदग्रहे तद्बुद्ध्यभावादिति तच्छब्दार्थानुसृतावसम्बद्धार्थम् । यदा तच्छब्दस्यार्थोनुस्रियते तदा तदग्रहे तस्यैवाग्रह इति प्राप्तम् । तच्चासम्बद्धार्थं यदा पृथिव्यादि रूपादिविशेषणं साध्यते तदा तदग्रहे तद्बुद्ध्यभावादित्यस्य हेतोः पृथिव्यादिविशेषणानां रूपादीनां तच्छब्देनानभिसम्बन्धात् । एतेन पृथिव्यादिविशेषणा रूपादयः प्रत्युक्ताः । अत्रापि रूपाद्यग्रहे रूपादिबुद्ध्यभावादिति हेत्वर्थः प्राप्नोति तच्छब्दस्य प्रधानसम्बन्धित्वात् । एवं रूपादिमात्रं पृथिवी पृथिवीमात्रं रूपादय इति पृथिव्येव रूपादयो रूपादय एव पृथिवीति पूर्ववत् प्रसङ्गः । सर्वत्र प्रतिज्ञापदयोर्व्याघातो वचनभेदात्—पृथिवीत्येकवचनं रूपादय इति बहुवचनं, वचनभेदानुविधानं च यत्र तत्रार्थभेदः । तद्यथा नक्षत्राणि शशीति। अस्ति चात्रापि वचनभेदः तस्मादत्राप्यर्थभेदेन भवितव्यम्। नन्वेकस्मिन्नर्थे वचनभेदो दृष्टस्तद्यथा चत्वार आश्रमाश्चातुराश्रम्यमिति । तन्नानभ्युपगमात्—नायं वचनभेदः क्वचिदेकत्वे दृष्टः चातुराश्रम्यमिति चतुर्णामाश्रमाणां समानं धर्मसाधनत्वमभिधीयते । एतेन षडेव गुणाः षाड्गुण्यं विशेष एव वैशेषिकमिति प्रत्युक्तम् । तदग्रहे तद्बुद्ध्यभावादिति चासिद्धा-

ऽप्ययं हेतुः। कथमसिद्धः? रूपाद्यग्रहे द्रव्यग्रहात्—यस्मान्नीलाद्युपधानभेदानुविधायिनः स्फटिकमणे रूपानुपलब्धौ स्फटिक इति प्रत्ययो दृष्टः। योऽप्ययं दृष्टान्तो यूपवत् पङ्क्तिवच्चेति तत्र भवता यूपो व्याख्यायि न पङ्क्तिः। यूपो हि नाम उत्पन्नपाकजानां द्रव्याणां कालविशेषानुग्रहे सति द्रव्यान्तरसंपृक्तानां पाकजोत्पत्तौ यः संयोगः स यूप इति, स चार्थान्तरवादित्यसिद्धो दृष्टान्तः। एतेन पानककाञ्जिकत्रिरेकात्क्षारादयः प्रत्युक्ताः। पङ्क्तिरप्येकदिग्देशसम्बन्धिषु परस्परप्रत्यासत्त्यनुगृहीतेषु अवधारितानवधारितेयत्तेषु भिन्नभिन्नजातीयेष्वाधारेषु वर्तमाना बहुत्वसङ्ख्यैवोच्यते। एवमानियतदिग्देशसम्बन्धिषु गजतुरगस्यन्दनेषु परस्परप्रत्यासत्त्यनुगृहीतेषु अवधारितानवधारितेयत्तेषु वर्तमाना बहुत्वसङ्ख्यैव सेनेत्युच्यते। एवं जातिविशिष्टपुरुषोपग्रहेण वर्तमाना परिषत्, प्रव्राजिसविशेषोपग्रहेण वर्तमाना सङ्घः। एवं यथासम्भवं पूगवनयूथब्राह्मणगणशब्दा अपि द्रष्टव्याः। एवमानियतदिग्देशसम्बन्धिष्वनाद्यन्तेषु मध्यशून्येषु वर्तमाना कुण्डलकं बहुत्वसंख्यैवेति। तस्मात् पङ्क्तिरनर्थान्तरमित्यसिद्धो दृष्टान्तः। अथार्थान्तरे किं प्रमाणमिति? उपलभ्यस्य समस्तैरुपलभ्यैर्व्यपदेशः—यदिदं चन्दनमुपलभ्यते तस्य श्वेतं रूपं तिक्तो रसः पटुर्गन्धः शीतः स्पर्श इति। यश्चायं प्रत्यक्षस्य प्रत्यक्षेण व्यपदेशः सोऽर्थान्तरे दृष्टो यथा ब्राह्मणस्य कमण्डलुरिति। न खल्वयमेवं प्रतिपद्यते—यदिदं श्वेतं रूपं तदनुमीयमानरसगन्धस्पर्शानामिति। सेनावनादिभिरनेकान्त इति चेत्—अथापि स्याद्बुद्धिः दृष्टोऽनर्थान्तरेऽपि व्यपदेशः सेनाया हस्ती, काननस्य वृक्ष इति। न असिद्धत्वात्—असिद्धमेतत् अनर्थान्तरत्वं सेनायाः काननस्य च, यथा च तदर्थान्तरं सेना काननं वा तदुक्तमिति। तदसत्त्वमिति चेत्—अथाप्येवं कल्प्येत—सङ्ख्यैव नान्यास्ति कुतोऽर्थान्तरभाव इति?

नैवम् । सङ्ख्या नास्तीति ब्रुवता एकानेकप्रत्ययानां विधीयमानं
प्रतिषिध्यमानं वा निमित्तमुपादेयम् । कस्मात् ? एकानेकप्रत्ययाना-
मप्रत्याख्येयत्वात्–विशिष्टाश्च प्रत्यया भवन्तो न निमित्तप्रत्याख्या-
नेन भवितुमर्हन्ति । किं कारणम् ? कुम्भप्रत्ययनिमित्तान्यनिमित्तक
एकानेकप्रत्ययः कुम्भप्रत्ययविलक्षणत्वात् नीलादिप्रत्ययवत् तस्मा-
द्यत्तत्प्रत्ययनिमित्तं सा सङ्ख्येति । तत्प्रत्ययविषयनिमित्तप्रत्य-
यव्यतिरेकेण ततोऽन्यस्य तद्विशिष्टप्रत्ययस्योत्पत्तौ निमित्तान्तराका-
ङ्क्षित्वं दृष्टम् । तद्यथा वस्त्रचर्मकम्बलेषु वस्त्रचर्मकम्बलप्रत्ययास्तेभ्य
एव भवन्ति । तेषु तु योऽन्यो नीलमिति प्रत्ययः स निमित्तान्तरा-
ङ्क्षवान् दृष्टः तथा च घटादिष्वपि घटादिविषयनिमित्तव्यतिरेकभाजः
सन्त एकादिप्रत्ययाः तस्मात्तैरपि निमित्तान्तराङ्क्षवितव्यम् । य-
न्निमित्तं ते सङ्ख्यादय इति । महत्पुष्पितशब्दाभ्यां सामानाधिक-
रण्यान्न सङ्ख्या सेना वनं वा भवितुमर्हति–यदि सङ्ख्या सेना वनं
वा, महती सेना पुष्पितं वनमिति न प्राप्नोति, न सङ्ख्यायां महत्त्वम-
स्ति न पुष्पयोग इति । नैष दोषः । महती सेनेति किमुच्यते तानेव
गजादीन् सङ्ख्याधारानवधारितानवधारितेयत्तान् स्थान्यङ्गान्तरो-
पचये(१)ऽपि महती सेनेति व्यपदिशन्ति । तत्रेयं स्थानिषु गजादिषु म-
हच्छब्दवाच्यप्रचयोपचयोपकरणात् बहुत्वसङ्ख्या महतीत्युच्यते ।
पुष्पितमित्यत्रापि पुष्पसम्बन्धिषु वृक्षेषु पुष्पसम्बन्धैकार्थसमवा-
यमनुभवन्ती बहुत्वसङ्ख्यैवाभिधीयते । यथा मधुरो रसः । तिक्तो
गुडश्चेति । अत एव व्यपदेशात् सङ्ख्यादीनामप्यर्थान्तरभावः ।
असति दर्शनाच्च हेतुः यथा गर्तश्छिद्रमिति । न, अपरिज्ञानात्–गर्तो
हि नाम रूपादिमाङ्क्षः सावयवैरारम्भकार्यैर्मध्यशून्यैः संस्थानविशे-

(१) संख्याधारानवधारितावधारितेयत्तान् स्थादिन्यङ्गान्तरो-
पचते–पा० २ पु० स चायुक्तः ॥

षोपहितमाकाशमिति। एतेन छिद्रं व्याख्यातम्। एकस्मिन्नपि दर्शनात् व्यपदेशादर्थान्तरभावो न युक्तः—तद्यथा खदिरस्य स्थाणुरिति। बहुषु चाऽसंयुक्तेषु दर्शनात् तद्यथा प्रासादानां मालेति। संयुक्तेषु चाऽसजातीयेषु दर्शनात् विहृत्पृथिव्युदकतेजसां (१) विरेक(?) इति। यत्तावदेकस्मिन्नपि दर्शनादिति। तदयुक्तम्। खदिरशब्दस्य जातिविशिष्टद्रव्यवाचित्वात्—खदिरशब्देन जातिविशिष्टं द्रव्यमुच्यते स्थाणुशब्देनापि संस्थानविशेषोऽभिधीयते संस्थानविशेषश्च प्रचयाख्यः संयोगः स चार्थान्तरमिति। एतेन सर्पकुण्डलकं, प्रतिमायाः शरीरं, सुवर्णस्याङ्गुलीयकं, शिलापुत्रकस्य शरीर,मित्यादिकं भेदवाचकमित्युक्तं भवति। प्रासादानां माला पङ्क्तिवद्द्रष्टव्या। संयोगो विरेक इत्युक्तमेतत्। गुणसमुदायव्यतिरेकेणाग्रहणादिति चेत्—अथापि मन्येथाः यदि रूपादिव्यतिरिक्तं द्रव्यं स्यात् तद्रूपादीनन्तरेण पृथगुपलभ्येत न तूपलभ्यते तस्मान्नास्ति। अग्रहणस्य द्विनिमित्तत्वादनेकान्तः किमिदमग्रहणं ग्राह्यस्याभावादाहो ग्रहे हेत्वभावादिति सन्दिह्यते। ग्राह्याभावादिति चेत् प्रतिज्ञार्थेन हेत्वर्थस्याक्षेपादयुक्तो हेतुः। ग्रहणाभावादिति चेत् न व्यतिरेकप्रतिषेधः। यश्च तदग्रहे तद्बुद्ध्यभावादिति हेतोर्दोषः सोऽस्यापि द्रष्टव्य इति। सोयमनन्यत्ववादो यथा यथा विचार्यते तथा तथा स्पष्टमन्यत्वं प्रतिपादयति प्रमाणानामेकत्रोपपत्तेः एकत्र चानुपपत्तेरिति। तस्माद्व्यवस्थितमेतत् पृथिव्यादीनि गुणाश्चेति द्वन्द्वः समासः॥

अथ बुद्धेरवसरप्राप्ताया लक्षणापदेशद्वारेण सूत्रम्।

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्॥ १५॥

बुद्धिरुपलब्धिरित्यादि। एतैः पर्यायशब्दैर्योऽभिधीयते पदार्थः

(१) वृत्तान्युदकतेजांसि विवेक इति २ पु० पा०।

सा बुद्धिरिति । पर्यायशब्दाः कथं लक्षणम्? व्यवच्छेदहेतुत्वात् सर्वं हि लक्षणमितरपदार्थव्यवच्छेदकमेतैश्च पर्यायशब्दैर्नान्यः पदार्थोऽभिधीयत इत्यसाधारणत्वाल्लक्षणम् । उपपत्तिसामर्थ्याद् पर्यायशब्दाभिधानाद्बुद्धिवृत्तेर्निराकरणम् । 'य आहुः बुद्धेर्ज्ञानं वृत्तिरात्मन उपलब्धिर्वृत्तिरिति' तन्निराकरणार्थं समानार्था एते शब्दा इति बुद्धिवृत्तिः पृथङ्निराकृता भवति । का पुनरत्रोपपत्तिर्भवति? आत्मोपलभते बुद्धिर्जानीत इति ब्रुवाण उभयोश्चैतन्यं प्रतिपद्येत उभयचैतन्ये च प्रत्ययव्यवस्थानुमानं न स्यात् । यदि बुद्धिश्चेतना आत्मा चेतनो न बुद्ध्यवसितानर्थानात्मोपलभेत । किं कारणम्? चेतनान्तरोपलब्धानां चेतनान्तरस्याप्रतिपत्तेः । अस्ति च प्रतिपत्तिः तस्मादेकश्चेतन इति । बुद्धिवृत्त्यविशिष्टायां च ज्ञातृवृत्तौ कल्पितायामात्मनः स्वरूपं वक्तव्यम् । बुद्धिरध्यवस्यत्यात्मा चेतयत इति चेत्-अथापीदं स्यात् यथा बुद्धिरर्थानध्यवस्यति तथाऽऽत्माऽपि देशकालविकाले चोपलभत इति । अध्यवस्यत्युपलभत इति पर्यायशब्दौ । न च पर्यायशब्दैः पदार्थनानात्वं युक्तम् यथा ध्वनिर्नाद इति । अन्यथा हि ध्वनिर्नाद इत्यत्रापि नानात्वं स्यात् । अथात्मा चेतयते बुद्धिर्ज्ञापयतीति चेत्? अद्धा बुद्ध्या जानीते पुरुषो न बुद्धिः, बुद्धिर्ज्ञापयतीति, बुद्धिर्ज्ञानसाधनं भवतीति ।

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहा इति भाष्यम् । एते स्मृत्यादयो मनसो लिङ्गं भवन्ति । किमेत एव? न । किं तर्हि? इयं च युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १६ ॥

यस्मादिन्द्रियार्थसन्निकर्षे सत्यपि युगपज्ज्ञानानि न सम्भवन्ति । अतो गम्यते अस्ति तदिन्द्रियसंयोगसहकारि निमित्तान्तर-

मन्यापि, यस्य सन्निधानासन्निधानानुविधानात् ज्ञानस्योत्पत्त्यनु-त्पत्ती भवत इति । कुतः? कारणवैकल्ये कार्यप्रतिबन्धादिति सूत्रार्थः । कथं पुनः स्मृत्यादयो मनसो लिङ्गं भवन्त्यन्यत्र वर्तमाना इति? न ब्रूमः स्मृत्यादयो मनोवृत्तित्वान्मनसो लिङ्गं भवन्ति। अपि तु गन्धादिक्रियान्यत्वे सति क्रियात्वात् करणान्तरप्रयोजकत्वम्—या गन्धादिभ्योऽन्या क्रिया सा करणान्तरप्रयोज्या* दृष्टा। यथा रथादिक्रिया । क्रिया चेयं स्मृत्यादिका तस्मादियमपि करणान्तरं प्रयोजयति । सुखादयो वा गन्धादिभ्योन्यत्वे सति विषयत्वाच्चक्षुरादिव्यतिरिक्तकरणान्तरप्रयोजका रथादिवदिति । यथा रथादयो विषयाः चक्षुरादिव्यतिरिक्तं करणं वास्यादि(१) प्रयोजयन्ति विषयाश्च सुखादयः तस्मात्तेऽपि करणान्तरं प्रयोजयितव्यमिति । अथायुगपज्ज्ञानोत्पत्तिर्ज्ञानधर्मः सा कथं मनोलिङ्गं भवति? अथासम्बद्धमपि लिङ्गमिष्यते ? सर्वं सर्वस्य लिङ्गं स्यात् अस्यात्मा काकस्य कार्ष्ण्यादित्येतदपि स्यात्, न त्वेवं भवति । तस्मान्नासम्बद्धं लिङ्गं सम्भवति । असम्बद्धमपि लिङ्गं भवतीत्येके—यथा प्रत्यग्रशरावदर्शनं कुलालवृत्ति(२) कुलालसद्भावं गमयति भ्रान्तिमच्चक्रप्रदर्शनं चेति । तन्न । नैवात्र कुलालसद्भावो बोद्धव्यः किन्तु देश एवाविदूरकुलालवत्त्वेन साध्यः तस्य प्रत्यग्रशरावत्वं धर्मः भ्रान्तिमच्चक्रवत्त्वेनापि देशोऽविदूरकुलालवत्त्वेन साध्यते तस्मान्नासम्बद्धमनुमानं कश्चिदिति । युगपज्ज्ञानानुत्पत्तिस्तर्हि कथं मनसाऽसम्बद्धा मनोलिङ्गं भवति । युगपज्ज्ञानोत्पत्तेरेव पक्षीकरणान्नासम्बद्धम् । कथमिति ? रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठायकान्तरापेक्षाणि

---

* प्रयोजिका इति—पु०पा० । (१) वास्या स्यादिति पु० २ पा० ।
(२) कुलालजत्वेन साध्यवृत्ति इति—पुस्तकान्तरे पा० ।

अयुगपदुत्पत्तेः । तद्यथा अनेकशिल्पपर्यवदातस्य पुरुषस्या-नेकं वास्यादि युगपत् सन्निधानेनोपस्थितं हस्ताद्यधिष्ठाय-कापेक्षं न युगपदनेकरथादिक्रियां निर्वर्तयति तथा चक्षुरादि न युगपदनेकं ज्ञानं करोति तस्मात्तदप्यधिष्ठायकान्तरमपेक्षत इति । इन्द्रियाणि वा पक्षीकृत्य वक्तव्यम् । कथमिति ? चक्षुरादीन्द्रियं आत्मप्रवृत्तावधिष्ठायकान्तरापेक्षं अयुगपत्प्रवृत्तेः वास्यादिवदिति । यदि तर्हि चक्षुरादीन्द्रियं मनःसन्निधानापेक्षमर्थानामयुगपद्ग्राहि-य एकेन्द्रियग्राह्यास्तेषु कथमयुगपद्ग्रहणं ? न हि तत्रासन्निहितं मन इति । सम्बन्धभेदादिति चेन्न युगपत्सम्बन्धिषु कथम् । भवतु तावन्नीलादिभेदेषु एकेन्द्रियविषयेषु इन्द्रियविषयसम्ब-न्धिभेदादयुगपद्ग्रहणं, अथ ये युगपत्सम्बध्यन्ते तेषु कथं शुक्लो गौर्गच्छतीति प्रत्यया न युगपत्प्राप्नुवन्ति ? बुभु-त्साभेदादयुगपद्ग्रहणमित्येके— एके तावद् ब्रुवते सम्बद्धोऽप्यर्थो-ऽबुभुत्सितत्वान्न गृह्यत इति । तन्न । मनोऽनिवृत्तिप्रसङ्गात्—एवं तर्हि मनः परित्याज्यम् यदि बुभुत्साभेदादयुगपद्ग्रहणानि भवन्ति । अन्यत्रापि बुभुत्साभेदो न दण्डवारित इति मन इदानीमनर्थकं परित्याज्यम् । सत्यां च बुभुत्सायामयुगपद्ग्रहणे न्यायोन्योऽवधार-णीयः तस्मादन्यन्निमित्तमयुगपद्ग्रहणमिति । किं पुनर्निमित्तं ? कर-णत्वं—यथैवायं करणधर्मो नानधिष्ठितं करणं प्रवर्तत इति तथा सम्बद्धस्याप्यनेकक्रियाकारित्वं नास्ति, न हि किञ्चित् करणं सम्बद्धमपि सदेकदाऽनेकां क्रियां शक्नोति कर्तुम् । यदि पुनरात्मैवा-धिष्ठाता भवेत् तथाप्यात्मनो युगपदनेकेन्द्रियसम्बद्धस्याविशेषा-दयुगपज्ज्ञानोत्पत्तौ न्यायोऽन्योऽवधार्यः । स च नान्तरेण मन इति सिद्धं मनः ।

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति ॥ १७ ॥

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति । शरीरेण मनसा वाचा च । सेयं प्रवृत्तिः प्रत्येकं दशविधा पुण्या पापा च । पुण्या कायेन परित्राणं परिचरणं दानमिति । वाचा सत्यं हितं प्रियं स्वाध्यायश्च इति । मनसा दया स्पृहा श्रद्धा चेति । विपर्ययेण पापा दशविधैव । क्षणिकत्वात् प्रवृत्तेर्जन्मकारणत्वानुपपत्तिः सेयं प्रवृत्तिः क्षणिका सती जन्मकारणमिति न युक्तम्, ततश्च द्वितीयसूत्रव्याघातः । न । प्रवृत्तिफले प्रवृत्त्युपचारात् । प्रवृत्तिफले धर्माधर्मौ अस्मिन् सूत्रे प्रवृत्तिरित्युच्यते । कस्मात् ? तत्साधनत्वात् अन्नं वै प्राणिनःप्राणा इति यथा ।

प्रवर्त्तनालक्षणा दोषाः ॥ १८ ॥

प्रवर्त्तनालक्षणा दोषाः । का पुनरियं प्रवर्त्तना ? ययाऽवशः प्रवर्त्तते तं प्रवर्त्तमानं रागादयः(१) प्रवर्त्तयन्तीति । सेयं प्रवृत्तिहेतुत्वात् प्रवर्त्तनेत्युच्यते यथा कारणा दारणेति । सा पुनरियं प्रवर्त्तना कथं गम्यते ? प्रत्यात्मं प्रत्यक्षा, परशरीरे त्वानुमानिक्यात्मवदिति । यथाऽऽत्माऽहङ्कारविषयत्वेनात्मनिग्रुमानः प्रत्यात्मं प्रत्यक्षी भवति । न हीयमहङ्कारबुद्धिरानुमानिकी । नागमिकी । कथं नानुमानिकी ? लिङ्गाभावात् । कथं नौपदेशिकी ? अनुपदिष्टार्थप्रतिपत्तेः । तस्माद्रूपादिवत् प्रत्यात्ममात्मा प्रत्यक्ष इति । प्रवृत्तिनिवृत्त्यनुमेयस्तु परशरीर इति ॥

पुनरुत्पत्तिः प्रेत्यभावः ॥ १९ ॥

पुनरुत्पत्तिः प्रेत्यभावः । पूर्वोपात्तशरीरादिपरित्यागादन्यशरीरोपसंक्रान्तिः स प्रेत्यभाव इति । पुनर्ग्रहणं संसारानादित्वज्ञापनार्थम् । पुनः पुनर्जन्ममरणे भवत इत्यनादित्वं संसारस्य दर्श-

---

(१) वादयः– पा० २ पु० । स च प्रामादिकः ।

यति । कः पुनरयं संसारः ? दुःखादीनां मिथ्याज्ञानपर्यन्तानाम-विच्छेदेन यः कार्यकारणभावः स संसार इति। स चानादिः पूर्वापरकालनियमाभावात् । यदि पूर्वं दुःखं, तज्जन्मना विना न युक्तम् । अथ पूर्वं जन्म, तदा धर्माधर्मावन्तरेण न युक्तम् । अथ पूर्वं धर्माधर्मौ, तावपि विना रागद्वेषाभ्यां न युक्तौ । अथ पूर्वं रागद्वेषौ, न मिथ्याज्ञानादृते तयोः प्रादुर्भाव इति । मिथ्याज्ञानं तर्ह्यादिः ? तदपि शरीरादीनन्तरेण न युक्तम् । सोऽयं दुःखादीनां मिथ्याज्ञानपर्यन्तानां कार्यकारणभावोऽविच्छिन्नः संसार इति आजवञ्जवीभाव इति चोच्यते । सोऽयं संसारः किमात्मन आहो मनस इति ? यदि क्रियामधिकृत्योच्यते तदा मनसस्तद्धि संसरति । अथोपभोगमधिकृत्योच्यते तदात्मनः, स हि सुखदुःखे उपभुङ्क्त इति ॥

प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ २० ॥

प्रवृत्तिदोषजनितोऽर्थः फलम् । शरीरादि जन्यं सर्वं फलं, धर्माधर्मप्रवर्तकत्वात् । मुख्यकल्पनायां सुखदुःखोपभोग एव, तदवसानात् । यस्माद्धर्माधर्मयोः सुखदुःखोपभोग आवसानिकं फलं, तस्य तु नान्तरेण शरीरादीन् सम्भव इति कृत्वा शरीरादीन् धर्माधर्मावारभ्य सुखदुःखोपभोगं कुरुत इति । सोऽयं फलशब्दः सुखदुःखोपभोगे मुख्यः शरीरे गौण इति ।

बाधनालक्षणं दुःखमिति ॥ २१ ॥

बाधनालक्षणं दुःखम् । एतदेव शरीरादि बाधनानुषङ्गाद् दुःखमित्युच्यते। स्वभावतस्तु दुःखमेव दुःखं, लक्षणशब्दोऽनुषङ्गार्थः सर्वमिदं शरीरादि दुःखानुषक्तमिति । अत्र शरीरं दुःखस्य निमित्तं निमित्तार्थोऽनुषङ्गः । इन्द्रियाणि विषया बुद्धय इति सा-

धनं साधनार्थोऽनुषङ्गः । सुखं दुःखाविनाभावि, अत्राप्यविनाभावोऽनुषङ्गः स्वरूपतस्तु दुःखं दुःखमिति । सर्वं स्वरूपतो दुःखमिति केचित् । न । प्रत्यक्षविरोधात् । न हि प्रत्यक्षं सुखं शक्यं प्रत्याख्यातुम् । दुःखविकल्प इति चेत्—अथापीदं स्यात् दुःखविकल्प एव सुखमिति, न पुनः स्वरूपतोऽस्तीति । न । विकल्पे नञ्प्रयोगासंभावात् । नहि विकल्पे नञ् प्रवर्तमानो दृष्टः न हि ब्राह्मणविशेषे भवत्यब्राह्मण इति । एवं दुःखविशेषे ऽदुःखमिति न स्यात् । यदि च सुखं न स्याद्धर्मवैयर्थ्यम् । किं कारणम् ? सुखसाधनं धर्म इति । सुखं च नास्तीति व्यर्थो धर्मः । दुःखप्रतिषेधः फलमस्येति न युक्तम् । धर्मस्याभावफलत्वप्रसङ्गात् अभावफलो धर्म इति । प्रवृत्तिद्वैतं च लोके दृष्टं तन्न स्यात् । हितमाप्स्यामीत्येकः प्रवर्तते अनिष्टं हास्यामीत्यपरः प्रवर्तते । हितस्याभावात् प्रवृत्तिद्वैतं च न स्यात् । दुःखभावनोपदेशो न स्यात् प्रतिपक्षासम्भवात् । प्रवृत्त्यभावश्च, न हि कश्चिद्दुःखे सज्यत इति । तस्मान्न मुख्यतः सर्वं दुःखं दुःखभावनोपदेशेन च दुःखमित्युच्यते ॥

तदत्यन्तविमोक्षोऽपवर्गः ॥ २२ ॥

तदत्यन्तविमोक्षोऽपवर्ग इति । तेन शरीरादिना दुःखान्तेनाऽऽत्यन्तिको वियोग इति ।

आत्यन्तिकी सुखाभिव्यक्तिरित्येके—एकेन्त्वात्यन्तिकीं सुखाभिव्यक्तिं मुक्तिं ब्रुवते । तन्न । प्रमाणासम्भवात् । मुक्तस्यात्मनो नित्यं सुखमिति न प्रमाणमस्ति । न नास्ति नियामकत्वादिति चेत् अनेककारणनिष्पन्नसुखस्यात्मनि समवायो नियामकमन्तरेण न युक्तः तस्मादात्मनि नित्यं सुखमस्ति, येनेदं सुखं नियम्यमानमात्मानमाश्रयत इति चेत् । न । सर्वोत्पत्तिप्रसङ्ग-

ज्ञानं सुखवदात्मनि दुःखमपि नित्यं कल्पयितव्यं इच्छादयश्चेति । अनैकान्तिकता वा । अभिव्यक्त्यर्थानभिधानाच्च । नित्यं सुखमभिव्यज्यत इति कोऽभिव्यक्त्यर्थः ? ज्ञानमिति चेत् नित्यमनित्यं वेति कल्पनानुपपत्तिः । अनित्यमिति चेत् कारणं वक्तव्यम् । आत्ममनःसंयोगो वा कारणं(१) तस्यापेक्षाकारणं वक्तव्यम् । यदि मन्यसे आत्ममनःसंयोगो ज्ञानस्य कारणं तस्य तर्ह्यपेक्षाकारणं वक्तव्यम् । न हि द्रव्यगुणकर्मस्वारभ्यव्येषु संयोगो निरपेक्षं कारणमिति । आत्ममनःसंयोगः सुखापेक्षः कारणमिति चेत् । न । कैवल्यविरोधात् । अथ मन्यसे आत्ममनःसंयोगो नित्यमात्मनि व्यवस्थितं सुखमपेक्षमाणो ज्ञानकारणं भवतीति । तन्न युक्तं कैवल्यविरोधात् । यथाऽयमात्ममनःसंयोगो विषयमात्रमपेक्षमाणो निमित्तान्तरनिरपेक्षः सुखज्ञानं करोति, एवं रूपादीनपि विषयाननपेक्षमाणः तद्विषयाणि ज्ञानानि कुर्यात् । ततश्च कैवल्यं निवर्तते—सर्वानर्थानयमात्मा लभत इति । नित्योपलब्धिप्रसङ्गाच्चेति । योगजधर्मानुगृहीतो नित्ये सुखे ज्ञानं करिष्यतीति चेत् न युक्तम् । तत्क्षये तदभावात्—यदा योगजो धर्मः क्षीणो भवति तदाऽस्य किमनुग्राहकमिति वाच्यम् । योगजधर्मो न क्षीयते इति चेत् न युक्तम् । उत्पत्तिधर्मकस्य सर्वस्यानित्यत्वात् सर्वमुत्पत्तिधर्मकमनित्यं दृष्टमिति । नित्योऽसौ योगसमाधिजो धर्म इति चेत् योगजसमाधिजश्च नित्यश्चेति व्याहतम् । नित्यं ज्ञानमिति चेत् । न । सुखवत् प्रमाणाभावात् मुक्तसंसारस्थयोर(२)विशेषप्रसङ्गाच्च । सुखदुःखसंवेदनपर्यायश्च न स्यात् नित्यमयं सुखमुपलभेत ततश्च मोक्षार्थः प्रयासो व्यर्थः स्यात् । न चायं सुखं जिहासति विवेकहानस्याशक्यत्वात् दुःखं जिहासमानः सुखमपि

(१) संयोगः कावारणं—पा० २ पुस्तके स च प्रामादिकः ॥

(२) 'मुक्तसंसारिणोर्वा' 'मुक्तसंसारवतोः'—पा० २ पु० ।

जिहासति । न चायं कदाचिद्दुःखमुपलभत इति कस्य हानार्थं प्रवर्त्तते । शरीरादिप्रबन्धादप्रसङ्ग इति चेत् नित्यं-सुखमुपलभत इति नास्ति प्रसङ्गः-यस्माच्छरीरादयो नित्यसुखस्योपलब्धेः प्रतिबन्धका भवन्तीति । न । शरीरादीनामुपभोगार्थत्वात् नित्यं शरीरादिप्रसङ्गाच्च । यथा मुक्तस्य नित्यं सुखं कल्प्यते एवं शरीरादयोऽपि नित्याः कल्पयितव्याः एवमस्य कैवल्यं साधीयो भवति । शरीरादीनां नित्यत्वं दृष्टविरुद्धमशक्यं कल्पयितुमिति चेत् । न सुखस्यापि तर्ह्यस्मदादेर्दृष्टविरुद्धं नित्यत्वमशक्यं कल्पयितुम् । प्रमाणाभावादित्युक्तम् तच्च नास्ति । कस्मात्?इष्टार्थाधिगमार्थत्वात् इहायं लोकः प्रवर्त्तमान इष्टाधिगमार्थं प्रवर्त्तते, प्रवर्त्तन्ते च मोक्षमाणास्तेषामपीष्टाधिगमार्थया प्रवृत्त्या भवितव्यम्, सेयं प्रवृत्तिर्नित्यसुखे ऽर्थवती नान्यथेति । न । प्रवृत्तिद्वैतदर्शनात् । द्वे प्रवृत्ती लोके दृष्टे इष्टाधिगमार्थाऽनिष्टहानार्था च । तत्रेदं पारिव्राज्यं किमिष्टाधिगमार्थमाहोऽनिष्टहानार्थमिति सन्दिह्यते । आगमादिति चेत्-आगमादेतद्गम्यते मुक्तस्यात्मनो नित्यं सुखमिति मुक्तः सुखी भवतीति श्रूयते । आगमोऽप्येवं विचारणीयः किमयं नित्येन सुखेन योगमाह उत दुःखेनात्यन्तिकवियोगमाहेति । दृष्टश्च दुःखाभावेऽपि सुखशब्दप्रयोगो बहुधा लोक इति । एवं च ज्वरादिवियोगे लौकिका व्याचक्षाणा(१) भवन्ति सुखिनः संवृत्ताःस्म इति । यदि पुनरयं मुमुक्षमाणको मोक्षे नित्यं सुखमिति सुखरागेण प्रवर्त्तते न मुच्यत । कस्मात्? रागस्य बन्धनसमाज्ञानात्-बन्धनसमाज्ञातो राग इति । यद्यपि द्वेषात् प्रवर्त्तते दुःखं हास्यामीति तथापि न मुच्येत द्वेषस्य बन्धनसमाज्ञानादिति रागद्वेषौ हि बन्धनमिति । न । अप्रतिकूलत्वात् । अप्रतिकूलं दुःख-

(१) व्याचक्षमाणाः-पा० २ पु० प्रमादिकः ।

हानं भवति न पुनरयं दुःखं द्वेष्टि अद्विषंश्चायं प्रवर्तमानोऽप्रतिकूलं दुःखहानमधिगच्छतीति ।

चित्तं विमुच्यत इत्यन्ये रागादीनां तत्र सामर्थ्यात् । यस्माद्रागादिवशं चित्तमालम्बनान्तरं गत्यन्तरेषूत्पद्यते न पुनरात्मनि रागादीनां सामर्थ्यमस्ति । न । अपवर्गतः तत्सिद्धेः । ये चित्तस्यानुत्पादनं निरोधं वाऽपवर्गमिच्छन्ति तेषामपवर्गः सिद्धो मोक्षः । किं कारणं ? जन्मनो विनाशार्थत्वात् जातं विनष्टमित्यपवर्गासिद्धमेतादिति।सन्ततेरनुत्पादोऽपवर्ग इति चेत् । न।तस्याशक्यत्वात् । सन्ततेऽरनुत्पादो न शक्यते कर्तुम।कार्यकारणमात्रप्रवाहस्य सन्ततिभावात् । अनागतानुत्पादः क्रियत इति चेत् अनागतानुत्पादस्य विद्यमानत्वात् किं क्रियत इति सर्वथा न चित्तस्यापवर्गः सिद्ध्यतीति । कस्य तर्ह्यपवर्गः ? योऽपवृज्यते। कोऽपवृज्यते ? आत्मा । अथ काऽपवृक्तिः ? दुःखादिभिर्वियोग इति ॥

प्रमेयानन्तरं प्राप्तिः संशयस्य स्थानवतो लक्षणवचनमिति या प्रमेयानन्तरं क्रमप्राप्तिः साऽभिधीयते ॥

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ २३ ॥

समानानेकधर्मोपपत्तेरिति सूत्रम् । तत्र समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च(१) त्रिविध एव संशय इतरपदाविशेषणाद् भवतीति सूत्रार्थः । तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशयः समानधर्मादिभ्य उत्पन्नो विषयस्य विशेषं नावधारयति यः स संशय इत्युच्यते । प्रत्ययो ऽनवधारणात्मकश्चेति व्याहतं ? प्रत्ययस्यैतत् प्रत्ययत्वं यद्विषयावधारणा-

(१) संशय इत्यधिकं पुस्तकान्तरे ।

त्मकत्वं, न चेदयं विषयस्वरूपमवधारयति प्रत्ययत्वं तर्हि व्याहतं भवति। न। स्वरूपप्रत्यायनात् स्वरूपमस्य प्रतीयते, न पुनरयं विषयस्वरूपमवधारयति अतश्च संशयः प्रतीयत इति प्रत्यय इति उच्यते।

समानशब्दः साधारणार्थः समानस्य धर्मस्योपपत्तेरिति साधारणस्येति यावत्। किं पुनरत्र साधारणं किं गुण आहो सामान्यमिति? यदि गुणः स न साधारणः। कस्मात्? एकद्रव्यवृत्तित्वात् परिमाणस्य, एकद्रव्यवृत्ति परिमाणं तत् कथं साधारणं भविष्यतीति। सामान्यमपि न युक्तम् द्रव्यावृत्तित्वात् न ह्यूर्ध्वत्वं द्रव्ये वर्त्तते, किन्तु गुणे परिमाणे। न ह्यूर्ध्वत्वं परिमाणं वर्त्तमानं सामान्यं द्रव्ये संशयं कर्तुमुत्सहते। कस्मात्? गुणस्यावधारितत्वात् यद्वृत्ति सामान्यं सोऽर्थोऽवधारित इति। न। साधारणार्थस्यान्यथा व्याख्यानात्। न श्रमो गुणः साधारण इति। नापि सामान्यमपि तु सादृश्यार्थः यावहमर्थौ पूर्वमद्राक्षं तयोर्यो धर्मः ऊर्ध्वत्वलक्षणो वर्त्तते तेन धर्मेण सदृशोऽयं धर्म उपलभ्यत इति। तस्योपपत्तिरभ्यवसायः। यदुक्तं भवति सदृशस्य धर्मस्योपलब्धेस्तदुक्तं भवति समानस्य धर्मस्योपपत्तेरिति। कस्मात् पुनरेवं नोच्यते समानधर्मोपलब्धेरिति? अनुक्तमपि यस्माद् गम्यते(१) गम्यमानस्याभिधानं व्यर्थम्। केन पुनरेतद् गम्यते?(२) इति विशेषापेक्ष इति वचनेन। कथं? विशेषस्यापेक्षा आकाङ्क्षा सा चानुपलभ्यमानविशेषे युक्ता। यदि चायं विशेषं न पश्यति विशेषानुपलब्धेर्गम्यत एव सामान्यं पश्यतीति। अथ पुनरयं न सामान्यं न विशेषं पश्येत्तदा विशेषापेक्ष इति व्यर्थं वचनं स्यात् एतेन सामर्थ्येन गम्यते सामान्यमुपलभत इति। अथ वोपलब्धिपर्याय एवोपपत्तिशब्द इति। उपपत्तिः प्रमाणगम्यता सा चो-

(१) मन्यते—पा० २ पु०। (२) मन्यते—पा० २ पु०।

पलब्धिः । यः पुनरनुपलभ्यमानसद्भावो धर्मः सोऽविद्यमानव-त्खवतीति । का पुनर्विद्यमानस्याविद्यमानेन समानता ? प्रमाणा-नालम्बनत्वम् । अविद्यमानमपि प्रमाणस्यालम्बनं स्वतन्त्रं न भ-वति तदप्यनुपलब्धिलक्षणं प्राप्तमिति। विषयशब्देन वा विषयिणं प्रत्याह—समानधर्मोपपत्तिशब्देन वा विषयी प्रत्ययो विधीयते। लौकिकं वा न्यायमनेन वाक्येनावरुणद्धीति यथा लोके वक्तारो भवन्ति धूमेनाग्निरनुमीयत इति । न च वाक्ये दर्शनशब्दः श्रू-यते । अर्थप्रत्यायकत्वात् वाक्ये दर्शनशब्दमनुजानाति धूमं दृष्ट्वा-ऽग्निरनुमीयते इति ।

अव्यवच्छेदहेतोरिति वक्तव्यम्—यदिदं समानधर्मो-पपत्तेरिति पदमेतस्मिन्नव्यवच्छेदहेतोः समानस्य धर्मस्योपपत्तेरिति वक्तव्यम् । न हि केवला समानधर्मोपपत्तिः संशयकारणमन्यथा कृतकत्वादिनाऽपि संशयः स्यात् समानं हि कृतकत्वं सर्वानित्या-नामिति, व्यवच्छेदहेतुत्वान्न भवति । न । समानार्थापरिज्ञानात् । व्यवच्छेदहेतुश्च भवति समानश्च धर्म इति न युज्यते, व्य-वच्छेदहेतुर्नाम विवक्षिततज्जातीयवृत्तित्वे सति यो विजातीयावृत्तिः स व्यवच्छेदहेतुः तस्य च समानार्थता नास्ति । समानो हि धर्मो यो विवक्षिततज्जातीयवृत्तित्वे सति अन्यजातीयवृत्तिः । तस्मा-दव्यवच्छेदहेतोरिति न वक्तव्यम् ।

सोऽयं साधारणो धर्म उपलभ्यमानः संशयहेतुः । किं के-वल इति ? न केवलः । किं तर्हि ? उपलब्ध्यनुपलब्ध्यव्यवस्था-तश्च । यदि चोपलब्ध्यनुपलब्धी न व्यवस्थिते भवत इति । किमेतावन्मात्रं साधनमिति ? नेत्युच्यते । यदि विशेषाकाङ्क्षा भव-ति समानधर्ममुपलभते। उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया वाऽनिदन्तया वा । विशेषाकाङ्क्षायां च सत्यामर्थसन्देहो भवतीति ।

किमिदं समस्तं कारणमसमस्तं वा ? समस्तमिति ब्रूमः। यदि समानधर्मोपपत्तेरिति केवलमुच्येत उपलब्धिविशेषस्यापि सामान्यत उपलब्धिरस्तीति तस्याऽपि संशयः स्यादिति। यदि पुनरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च संशय इत्येतावदुच्येत अनुपलब्धिसामान्यस्यापि क्वचिदुपलब्ध्यनुपलब्ध्यव्यवस्थाऽस्तीति संशयः स्यात् इति। विशेषापेक्ष इत्येतावति चोच्यमाने ऽनुपलब्धिसामान्यस्यापि क्वचिद्विशेषस्मृतिरस्तीति संशयः स्यात्। एवं समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति पदद्वयेऽपि नौयानप्रेक्षादिगतस्य न भवति संशयः। एवमुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति पदद्वये ऽभिधीयमाने ऽत्यन्तानुपलब्धेऽर्थे संशयः स्यात्। समानधर्मोपपत्तेर्विशेषापेक्ष इति चोच्यमाने सामान्यधर्मदर्शने सत्यपि विशेषाकाङ्क्षायां च सत्यामुपलब्ध्यनुपलब्ध्योर्व्यवस्थानाम्न भवति संशयः। एवं च यदाऽयं द्रष्टा दृष्टपूर्वं सामान्यविशेषवन्तमर्थमुपलभते तत्र चोपलब्ध्यनुपलब्धी व्यवस्थिते भवतः। सोऽयं द्रष्टा तस्मात् स्थानात् यदाऽपैति, ततोऽस्यापगमाद्विषयविप्रकर्षान्निमित्तादल्पविषया विशेषा नाभासन्ते, महाविषयं सामान्यमवभासते, उपलब्ध्यनुपलब्धी पुनर्व्यवतिष्ठते, विशेषार्थस्मृतिश्च नास्ति, न च सन्दिग्धे तस्मादेकद्विपदपर्युदासेन समस्तं लक्षणमुच्यत इति। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्ष इति चैकपदपर्युदासः कृतः। समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च समानधर्मोपपत्तेर्विशेषापेक्ष इति च उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्ष इति च द्विपदपर्युदासः कृतः समस्तपदपरिग्रहेण। यस्मात् समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इत्याह। तेन ज्ञापयति समस्तमेतल्लक्षणमिति। वि-

मर्ष इति नानार्थावमर्षणं विमर्षः । उभावर्थौ स्पृशतीव(१) संशी-
तिः संशय इति भावसाधनम् । करणसाधनं वा संशेते ऽनेनात्मा
सुप्त इव भवति। क उपमार्थः ? अर्थानवधारणमुपमानार्थः। ए-
तेनानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति व्याख्यातम् । कोऽतिदेशार्थः
यथाऽऽद्यपक्षे त्रिपदपरिग्रहेण एकद्विपदपर्युदासः कृतः तथा-
नन्तरयोरपि द्रष्टव्यमिति ।

अनेकधर्मोपपत्तेः संशय इति—अनेकस्यानेकश्च धर्म
इति केचित्—अनेकस्य धर्मोऽनेकधर्मः अनेकस्य द्रव्यगुण-
कर्मलक्षणस्य संयोगजत्वं धर्मः अनेकश्च धर्मः संयोगजत्वनि-
र्गुणत्वनिष्क्रियत्वक्षणिकत्वानि शब्दे, तदेवमनेकधर्मोपपत्तेः
संशय इति केचित्। तदयुक्तम्। समानधर्मोपपत्तेरित्यत्र चरितार्थ-
त्वात् । समानधर्मोपपत्तेरित्यनेनैव यश्चैकोऽनेकवृत्तिः यश्चानेक-
एकवृत्तिः स लभ्यत इति चरितार्थत्वात् न पुनरनेकधर्माभि-
धानेन प्रयोजनमस्तीति । अथानेकधर्मशब्दस्य कोऽर्थः ? असा-
धारणो धर्मः। कथं पुनरसाधारणो धर्मोऽनेकधर्म इत्यनेन समा-
सपदेनाभिधीयते ? समानासमानजातीयविशेषकत्वात् समान-
जातीयमसमानजातीयं चानेकं तस्माद्विशेषो—विशेषको धर्मः अने-
कस्माद्विशेषोऽनेकधर्म इति तस्य चानेकस्य धर्मो यथा
स्व सोऽयमनेकधर्म इति । एकानेकप्रत्ययहेतुर्वा धर्मोऽने-
कधर्मः यत एष प्रत्ययो भवतीदमेकमिदमनेकमिति । तत्रै-
कप्रत्ययहेतुरभेदः अनेकप्रत्ययहेतुर्वा धर्मो विशेषः यथा श-
ब्दस्य विभागजत्वम् । सामान्यविशेषसमवायेभ्यः शब्दस्य
सदादिना विशेषेण निर्भक्तस्य तस्मिंस्तु द्रव्यं गुणः कर्म वेति
विभागजत्वात् संशयः। न हि किञ्चित् द्रव्यगुणकर्मणामन्यतमं

(१) स्पृशतीव—पा० २ पु०।

विभागाज्जायमानं दृष्टं सर्वत्रासम्भवात् विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेरिति । ननु च विभागजो विभागो विद्यते गुणः । सत्यम् अनभ्युपगतविभागजविभागस्यैतदेवं भवति । यः पुनरभ्युपगतविभागजविभागः तस्यायं निर्णयहेतुः गुणः शब्दो विभागजत्वात् विभागजविभागवदिति । अस्तु वा तस्यापि विभागजविभागासमवायिकारणकत्वात् विभागजविभागासमवायिकारणकः शब्दो नान्यः पदार्थ इति । तदेवं विभागजत्वं विभागजविभागासमवायिकारणत्वं नत्वे शब्दाद्भवतीति सर्वतो व्यावृत्तः संशयहेतुः । तत्पजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वादिति । समानधर्मोपयोगाद्वाऽसमानोऽनेकधर्मो भवति । यद्वा द्वयस्यापि संशयकारणत्वेनोपनीतस्य समानधर्मस्यासमानस्य च समानस्य धर्मस्योपयोगादनुपयुक्तोऽसमानः सोऽनेकशब्दस्य विषयविशेष इति ।

कस्मात् पुनरेवमेव नोच्यते समानासमानधर्मोपपत्तेरिति ? नैवं शक्यमभिधातुम् अनेकस्माद्व्यावृत्तो यो धर्म इति अयं विग्रहो न लभ्यते लाघवं वा प्रयोजनमेकाक्षरापचयात् लाघवं प्रयोजनमाश्रित्यैवमभिधानं वा । यद्यनेकधर्मार्थोऽसाधारणार्थः असाधारणश्च धर्मः संशयकारणमिति, नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादित्ययमप्यसाधारणत्वात् संशयहेतुः प्राप्तः । नैष दोषः यथैव साधारणो धर्मः संशयहेतुरिति नान्वयिनः साधारणत्वे सति संशयहेतुत्वं भवति अन्वयव्यभिचारात् । एवं व्यतिरेकिणोऽपि सत्यसाधारणत्वे विपर्ययसम्बन्धस्याव्यभिचाराद्धेतुभाव इति । तस्मान्नैकवृत्तित्वमनेकवृत्तित्वं संशयकारणत्वे निर्णयहेतुत्वे वा हेतुः । किं तर्हि ? साधारणासाधारणत्वे सति व्यभिचाराव्यभिचारौ संशयनिर्णयहेतू । यो व्यभिचारी स संशयहेतुः योऽव्यभिचारी

स निर्णयहेतुरिति । यदि तर्ह्युभयोर्व्यभिचारित्वात् संशयहेतुत्वं ननु समानधर्मोपपत्तेरित्यनेनैव गतमेतत् गतार्थत्वात् न संशयहेतुत्वेन पृथक् उपादेयमिति । सत्यम् । न व्यभिचारितामन्तरेणान्यत् संशयकारणमपि तु व्यभिचारितायां सत्यां विधीयमानव्यभिचारः प्रतिषिध्यमानव्यभिचारश्चेति भेदः समानधर्मोपपत्तेरित्यनेन विधीयमानव्यभिचार उपदिश्यते विभागजत्वादित्यनेन प्रतिषिध्यमानव्यभिचार इति । एतावता पृथगभिधानम् ।

नञः पर्युदासविषयत्वादव्यभिचारिधर्मद्वयोपनिपातोऽनेकधर्म इति केचित्—एके त्वनेकधर्म इत्यन्यथा व्याचक्षते एकस्मादन्योऽनेकधर्म इति । एवं च विरुद्धाव्यभिचारिधर्मद्वयोपनिपातो लभ्यते यं प्रति तर्कमाहुः स च संशयहेतुः यथा श्रावणत्वकृतकत्वे शब्दस्येति । तदयुक्तम् । असम्भवात् । न ह्यव्यभिचारिणौ विरुद्धावेकस्मिन्नर्थे धर्मौ सम्भवतः वस्तुनो द्वैरूप्यासम्भवात् यद्युभावव्यभिचारिणौ स्याताम् एकं वस्तु द्व्यात्मकं भवेत् । न चैतदस्ति तस्मान्नोभावव्यभिचारिणाविति । न चायं प्रयोगो युक्तः । कथमिति ? यदि तावदेवं प्रयुङ्क्ते यथा प्राक्तनो हेतुः तथाऽयमपीति । प्रसिद्धेन व्यपदेशा भवन्तीति सिद्धं पूर्वस्य हेतुत्वम् । विरुद्धार्थप्रतिपक्षबाधितत्वादुत्तरस्यानभिधानम् । अथैवं क्रियते यथेदं द्वितीयमनुमानं न भवति तथा प्राक्तनमपीति । एवमपि प्रतिपक्षाद्द्वितीयानुमानस्यासाधकत्वम् । अथ विरुद्धधर्मावेकत्र सम्भवत इति सम्भवाच्च विरुद्धौ । कश्च विरुद्धार्थः किं सहासम्भवः आहो विरुद्धार्थसाधकत्वम् अथ स्वरूपमिति । यदि सहासम्भवः स नास्ति दर्शनात् । अथ विरुद्धार्थ-

साधकत्वं विरोधः तदपि न युक्तम् वस्तुनो द्व्यात्मकत्वास-म्भवात्। यदि विरुद्धार्थसाधकत्वमनयोर्धर्मयोर्भवेत् एकं वस्तु द्व्यात्मकमापद्येत। अथ स्वरूपमनयोर्विरुद्धमिति न किञ्चिद्बा-धितं भवति यस्मात् कृतकत्वं न श्रावणत्वं श्रावणत्वं वा न कृत-कत्वं तस्मान्न संशय इति। उपेत्य वा विरोधं यदि विरुद्धा-भ्यां कृतकत्वश्रावणत्वाभ्यां शब्दे संशयः क्रियते स विशेषा-दर्शनादुपजातः कस्य दर्शनान्निवर्तते। न हि विशेषदर्शने सति विशेषाकाङ्क्षा भवति यथोपलब्धसामान्यस्य विशेषाका-ङ्क्षा भवति। प्रत्यक्षतो निवर्तिष्यत इति चेत्। न। योऽनुमानाभ्यां सन्निपतिताभ्यामर्थे संशयः स प्रत्यक्षान्निव-र्तिष्यत इति। तन्न युक्तम्। प्रत्यक्षाविषयत्वात्—नायमर्थः प्रत्यक्षस्य विषय इति किं शब्दो नित्योऽनित्यो वेति। आगमान्नि-वर्तिष्यत इति चेत्। न। आगमस्य च विचार्यमाणत्वात्—आगम एवायं विचार्यते किं शब्दो नित्योऽथानित्य इति। न चायं प्रत्यक्ष-विषयो नागमविषयः अनुमानोपमानाभ्यां च नायं परिच्छेत्तुं श-क्यते सोऽयमनिवर्त्यः संशयः प्राप्तः। भवतु किं नो बाध्यते? कथं न बाध्यते। यदा वस्त्वन्तरपरिच्छेदकमनुमानं न भवति यथा-ऽनित्या बुद्धिः कृतकत्वादिति इदं खलु कृतकत्वं शब्दे दृष्टं स चानवधारितस्वभावो नित्योऽनित्य इति। तत्र चोपलभ्यमानं कृतकत्वमन्यत्र बुद्ध्यादौ संशयहेतुरिति सर्वमनुमानमनित्यत्वसाधकं न स्यात्। सर्वं चानुमानमयं न्यायो बाधत इति। यश्च न्यायोऽ-नुमानमूलमुच्छिनत्ति नासौ न्यायविदा युक्तोऽभिधातुम्। नित्या-सम्भवात् नायमस्मान्न्यायो बाधते यस्य नित्यं किञ्चिदस्ति तस्य विरुद्धाव्यभिचारी भवति। अस्माकं तु पक्षे नित्यं किञ्चिन्नास्तीति। न। बाधापरिज्ञानात्—न भवता बाधविषयोऽवलोकितः किन्तु नि-

त्वयमस्माकं नास्तीति एतावन्मात्रमवलोक्य परपक्षे दोषो ऽभिधीयते इति भवतामपि पक्षे विरुद्धाव्यभिचारी कृतावकाशः । कथम् ? सप्रतिघं विज्ञानं सत्त्वाद्रूपवदित्येकः, अप्रतिघं विज्ञानं नीरूपत्वाद्वेदनावदित्यपरः । तदेवमव्यभिचारिधर्मद्वयोपनिपातान्न सप्रतिघं नाप्रतिघं सिद्ध्येत् तस्मादयन्यायोऽयं विरुद्धयोश्च धर्मयोः सन्निपाताच्छब्दे संशय इति । धर्मयोः सातत्यादभिलापानुपपत्तिः नायमतद्धर्मा कदाचिदपि शब्द उपलभ्यते सततं तु तद्धर्मैव भवति श्रावणः कृतकश्चेति अभिलापो न स्यात् नित्योऽनित्यो वेति । न हि कदाचिदयं द्रष्टा एकस्मिन् वस्तुनि स्थाणुपुरुषधर्मावुपलभमानः शक्नुयाद्वक्तुं स्थाणुर्वा पुरुषो वेति । नैवं भविष्यतीति । व्याहतमुच्यते । ननु च भवताभिधीयते नित्य इति मयाप्यभिधीयते अनित्य इति कथं नाभिलप्यते सोऽयं विरुद्धाव्यभिचारीन्यायो विचार्यमाणः सर्वथाऽनुमानं बाधत इति अलमनेन । अथ कृतकत्वश्रावणत्वे सहिते सम्भूय हेतू भवत इति ? तथापि कृतकत्वश्रावणत्वे सहिते न विभागजत्वादन्यत्रासम्भवाच्च संशयहेतू भवतः सोयमस्माद्भिद्यते यथैव विभागजत्वमन्यावृत्तित्वादसाधारणं शब्दे संशयं करोति तथा कृतकत्वश्रावणत्वे अपि शब्दवृत्तित्वादन्यत्रासम्भवाच्च संशयहेतू भवतः सोऽयमसाधारण एव न धर्मान्तरमतः तद्ग्रहणेनैवायं सङ्गृहीत इति तस्मादेकस्मादन्यो धर्मोऽनेकधर्म इति न वक्तव्यमिति । यदा पुनरेवम्भूतौ धर्मावेकस्य वस्तुनो भवतः तदोपलब्धा तस्य वस्तुनः किं प्रतिपत्तव्यमिति तदा तयोरेव धर्मयोः सामर्थ्याधिगमे यत्नः कर्तव्यः नोभावेतौ साधने, कतरोऽत्र साधनं कतरश्च न साधनमिति सामर्थ्याधिगमे यत्नः करणीय इति । यत्नश्च क्रियमाणोऽनित्यत्वसाधनेष्वेवावतिष्ठत इति । कुतः ? नित्यत्वस्य प्रमाणबाधितत्वात् तच्चोपरिष्टाद्वक्ष्यामः ।

तदेवं व्यवस्थितमेतत् अनेकधर्मोपपत्तेरसाधारणात् धर्मात् संशय इति ।

विप्रतिपत्तेः संशय इति व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थो व्याहतार्थप्रवादविषयत्वमुपलभमानस्योपलब्ध्यनुपलब्ध्योश्चाव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवतीति । तत्र समानोऽनेकश्च धर्मो ज्ञेयस्थ उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे इति भाष्यम् । तत्रोपलब्ध्यनुपलब्ध्योस्तावत् पृथक् संशयकारणत्वं न भवतीति चर्चितमेतत् । समानोऽनेकश्च धर्मो ज्ञेयस्थ इत्येतदपि न बुद्ध्यामहे । किमत्र धर्मः संशयकारणमथ ज्ञानमिति । न धर्मः संशयकारणमित्यनेकधा समर्थितम् । समानानेकधर्मज्ञानं तु संशय कारणं तच्च ज्ञातरि वर्तत इति नास्ति भेदः । समानानेकधर्मयोस्तु पृथगभिधाने उक्तं प्रयोजनम् विधीयमानप्रतिषिध्यमानधर्मभेदादिति । विप्रतिपत्तेरित्ययं वक्तृगतः संशयहेतुः । कोऽत्र सम्यक्प्रतिपन्नः के मिथ्येति श्रोतुः सन्देहो भवति एतावता भेदेन पृथगभिधानम् । समानधर्मः सर्व एवायमिति चेत् समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति(१) सर्व एवायं समानधर्मएवाऽभिधीयते तस्माद्वैयर्थ्यात् पृथगनेकधर्मोपपत्तेर्विप्रतिपत्तेश्च इति न प्रयोजनमस्ति । अत एवं कर्तव्यम् । समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति । न । सूत्रार्थापरिज्ञानात् सूत्रार्थमपरिज्ञायैवैतच्चोद्यते । यथा च भेदः समानानेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति तथा वर्णितम् । अपरे पुनः समानधर्मोपपत्त्यादिभिः पदैः पृथक् पञ्चविधं संशयं वर्णयन्ति । समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शः संशय इति एवं शेषेषु पदेषु । तच्च युक्तम् । उप-

---

(१) समानधर्मोपपत्तेर्विशेषापेक्षो विमर्शश्च प्रतिपत्तेश्चेति—पा० १ पु० । विमर्शश्चेति क्वचित् ।

लब्ध्यनुपलब्ध्यव्यवस्थायाः पूर्वपदविशेषणत्वात् समानधर्मोपपत्तौ सत्यामुपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्शः संशय इति सूत्रार्थः । एवमनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति वाच्यम् । तस्मान्नोपलब्ध्यनुपलब्ध्यव्यवस्था पृथक् संशयकारणमिति । उपलब्ध्यनुपलब्ध्योर्द्वैविध्यात्(१) संशयो न युक्तः, कुतः ? लोकविरोधात्—उपलब्ध्योर्द्वैविध्यात् संशयो भवतीति ब्रुवाणो लोकं बाधते । कथमिति ? यत्किञ्चिदयमुपलभते सर्वत्रास्य संशयेन भवितव्यम् । किं कारणम् ? उपलभ्यमानं द्वेधा भवति । उपलब्ध्योर्द्वैविध्यात्तु यः संशयो भवति तस्य कुतो निवृत्तिः ? विशेषदर्शनान्निवर्त्तते इति चेत् विशेषेष्वप्येवं—य एते विशेषा उपलभ्यन्ते किमेते सन्त आहोऽसन्त इति यावद्यावदुपलभ्यते सर्वत्रोपलब्धिद्वैविध्यात् संशय इत्यनिवर्ग्यः संशयः । एवमनुपलब्धिद्वैविध्ये ऽपि वक्तव्यम् । न चास्य कचित् समाश्वासः स्यात् । यदाऽयमपवरकादौ सर्पादीनुपलभते तदा सर्पवत् तद्देशम् उतासर्पवदिति संशयः अयमपि संशयोऽनिवर्त्त्य एवेति सर्वत्राऽऽश्वासो न स्यात् । येषां च पञ्चविधः संशय इति सूत्रार्थः तैरप्यस्य कारणकृतो भेदो वक्तव्यः स्वभावकृतो वा । तद्यदि कारणकृतो ? न पञ्चविधो ऽनेकरूपः संशय इति प्राप्तम् । अथ स्वभावभेदात् ? न, स्वभावभेदस्यासम्भवादेकरूपः संशयः संप्रतीतिः संशय इति । तस्मात् पञ्चविधः संशय इति न सूत्रार्थः ।

समानधर्मग्रहणान्न संशयो धर्मिविषयत्वात्—यदिदमुच्यते समानधर्मोपपत्तेः संशय इति । तदयुक्तम् । धर्मिविषयत्वात् । न हि समाने धर्मे उपलब्धे धर्मिणि संशयो (न) युक्तः धर्मधर्मिणोर्भेदात् । न हि गवि दृष्टे अश्वे संशयः (धर्मिणश्चा-

(१) अत्र 'च' इति तात्पर्यटीकातोऽधिकमवगम्यते ।

दृष्टत्वात् नानुपलब्धे न निर्णीतेऽर्थे संशयो भवतीति च व्याघातः । धर्मधर्मिभावात् संशय इत्येके तावत् परिहारं ब्रुवते—धर्मे दृष्टे धर्मिणि संशयः धर्मधर्मिभावात् । न पुनर्गवि दृष्टे अश्वे संशयो भवति) धर्मधर्मिभावानुपपत्तेः । न । नानात्वानिवृत्तेः, न हि धर्मधर्मिभावेन नानात्वं निवर्तते । अथ धर्मधर्मिभावो नियामकः ? इच्छादिसूत्रं तर्हि व्याहन्यते । कथमिति ? इच्छादयः प्रतिसन्धानादात्मानं गमयन्तीति सूत्रार्थः । अत्र परः सत्यवस्थितः कार्यकारणभावात् प्रतिसन्धानमिति नानात्वस्याबाधनादित्यनेन निवर्तेत । इह पुनर्भवता धर्मधर्मिभावादिति पुनर्ब्रुवता नानात्वमेव धर्मधर्मिभावनियामकमुच्यत इति शक्नुयात् परोऽपि वक्तुं कार्यकारणभावो नियामक इति । तस्मादपव्याख्यानमेतत् धर्मधर्मिभावात् संशय इति । अथ समानधर्मोपलब्धेरन्यस्मिन्ननुपलब्धे धर्मिणि संशयो भवतीति कः परिहारः ? । अयं परिहारः बहुव्रीहिः समासोऽसौ धर्मिणोऽभिधानं—समानधर्मोपपत्तेरित्यनेन पदेन बहुव्रीहिसमासे धर्म्येव व्यपदिश्यते । कथं ? समानो धर्मो यस्य स भवति समानधर्मा समानधर्मण(१) उपपत्तिः समानधर्मोपपत्तिः । किमुक्तम्भवति ? समानधर्मवतो धर्मिणो दर्शनादिति ।

विशेषापेक्षो विमर्शः संशय इति विशेषापेक्षो विशेषस्मृत्यपेक्ष इति । अथ सा विशेषस्मृतिः किंविशेषविषया(२) किं संशय-

( ) एतन्मध्यस्थः पाठोऽनुपयुक्त इति सूचितं २ पु० ।

(१) समानधर्मणत इति—पा० २ पु० । स च प्रमादिकः ।

(२) कश्चासौ विशेषश्चेति किंविशेषः अनुपलब्धपूर्वो विशेषोऽस्येत्यर्थ इति ता० टी० ।

विषयविशेषविषया उतान्यविषयेति ? योऽसौ संशयस्य विषयः तं समानधर्माणमुपलभते तस्यायं विशेषाननुस्मरति उतान्यस्येति । यदि तावत् तस्य ? तन्न युक्तं तद्विशेषाणां क्वचिदननुभूतत्वात्—योऽर्थः पूर्वमुपलब्धविशेषः तद्गतान् विशेषाननुस्मरतीति युक्तम् तद्विशेषाणामनुभूतत्वात्, यदा पुनरयमनुपलब्धपूर्वविशेषः सामान्यत उपलभ्यमानः सन्दिह्यते तत्र विशेषानुस्मृतिः कथम ? तद्विशेषाणामननुभूतत्वादिति । न । सामान्यवचनत्वात् । विशेषापेक्ष इति सामान्यवचनं पुनरनेनावधार्यते तस्य वान्यस्य वेति । यदा तद्गता विशेषाः सुस्मूर्षिता भवन्ति तदाऽनुभूतेषु विशेषविषया स्मृतिः, यदा त्वनुपलब्धपूर्वे ऽर्थे संशयः तदा सादृश्यादन्यगतान् विशेषान् सुस्मूर्षत इति । एवं तावद्व्यवस्थितं त्रिविधः संशय इति ।

अनेन च संशयलक्षणेन यान्यविरुद्धानि संशयलक्षणानि तान्यपि संगृहीतानि । यथा काश्यपीयम्(१) "सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशय" इति । अस्यार्थः सामान्यप्रत्यक्षादिति सामान्यवतः प्रत्यक्षाद्धर्मिण इति, न पुनरयं पदार्थः सामान्यस्य प्रत्यक्षादिति । विशेषाप्रत्यक्षत्वमव्यवस्थितविशेषत्वं नास्मिन् विशेषा व्यवस्थिता इति, विशेषस्मृतेश्च संशय इति समानम् । कथं पुनरनेन सूत्रेणासाधारणोऽपि लभ्यत इति ? लभ्यते व्यभिचारित्वात्—व्यभिचारि साधारणं तच्चासाधारणे ऽपि व्यभिचारित्वमस्तीति लभ्यते । अनेकधर्मोपपत्तिस्तर्हि पृथङ्न पठितव्या अन्वयव्यतिरेकभेदविवक्षायां पृथगभिधानं पुनः संशयकारणभेदाविवक्षयेति । ये त्वत्र विशेषाप्रत्यक्षाद्विशेषस्मृतेश्चेतिपदयोः

(१) कणादसूत्रम् २ अ० २ आ० १७ सू० ।

पौनरुक्त्यं वर्णयन्ति—सामान्यप्रत्यक्षाद्विशेषस्मृतेश्च संशय इत्यभिधीयमाने किल गम्यत एतद्विशेषाप्रत्यक्षादिति, न हि कश्चिद्विशेषान् प्रत्यक्षान् स्मरति । तन्न । सूत्रार्थापरिज्ञानात् । नायं सूत्रार्थः विशेषाणामप्रत्यक्षत्वमिति । अपि त्वव्यवस्थितविशेषत्वं—नास्मिन् विशेषा व्यवस्थिता इत्यतो नायं दोषः इति ।

अन्ये(१) तु संशयलक्षणमन्यथा व्याचक्षते—साधर्म्यदर्शनाद्विशेषोपलिप्सोर्विमर्षः संशय इति । तेषामपि साधर्म्यस्यावधारितत्वात संशयस्य विषयो वक्तव्यः । धर्मीति चेत्-ननूक्तः संशयस्य विषयो धर्मी ?। सत्यमुक्तो न पुनर्युक्तः । कथं न युक्तः ? यदि तावद्रूपादिव्यतिरिक्तं धर्मिणमभ्युपैति व्याहतं भवति । धर्मधर्मिणोश्च नानात्वाभ्युपगमे धर्मस्यावधृतत्वात धर्मिणश्चादृष्टत्वात् न संशयः । न ह्यन्यस्मिन् दृष्टेऽन्यत्र संशयो भवति । अथाप्यस्मद्दिशा साधर्म्याभिधानेन धर्म्येवोच्यते ? तन्न युक्तं सधर्मणो भावः साधर्म्यं, साधर्म्यमिति च भावाभिधानेन धर्मोऽभिधीयते न धर्मी, न च युक्तोऽन्यस्य दर्शनादन्यत्र संशय इति । अथार्थान्तरभावं नाभ्युपैति ? तथापि साधर्म्यस्यावधृतत्वात् क ? संशय इति । यदि चायं धर्मिणं नोपलभते कस्यायं विशेषमुपलिप्सेत । न हि साधर्म्यस्य विशेषाः सम्भवन्तीति । अथ सामान्यवतो विशेषा ? इति । तन्न, तस्यादृष्टत्वादित्युक्तम् । न सामान्यस्य विशेषाः सन्तीति सामान्यवतो विशेषा भवन्तीत्येवं ब्रुवता सामान्यविशेषवतां भेदोऽनुज्ञातो भवति । व्यर्थश्चाभिधानं न सामान्यस्य विशेषास्सन्तो विशेषा इति । उपलब्ध्यनुपलब्ध्यव्यवस्थाने च साध-

(१) बौद्धाः ।

र्मदर्शने सत्यपि विशेषोपलिप्सायां च न संशयो भवतीति उपलब्ध्यनुपलब्ध्यव्यवस्थात इति वक्तव्यम् अनेकधर्मदर्शना-दिति च ।

समानानेकधर्मोपपत्तेरित्येवमादिवाक्यं संशयलक्षणं तद्विचार्यते किन्तावदयं कारणोपदेश आहो संशयस्वरूपावधारणमिति ? । यदि कारणनिर्देशो ? ऽत्यल्पमिदमुच्यते समानानेकधर्मादिभ्य इति, अन्यान्यपि संशयकारणानि, तान्युपसंख्येयानि । यथाऽऽत्म-मनःसंयोग—आन्तरस्य आत्ममनःसन्निकर्ष, इन्द्रियार्थसन्निकर्षो बाह्यस्येति । अथ स्वरूपावधारणं ? कारणनिर्देशोऽनर्थकः संवीतिः संशय इति वक्तव्यम् । अस्तु तावत् कारणावधारणम् । ननूक्तं कारणान्तरमप्युपसंख्येयमिति ? न, नेदं कारणावधारणा-र्थमपि त्वसाधारणकारणनिर्देशोऽयम् । तस्मादिन्द्रियार्थसन्निक-र्षादीनामप्रसङ्गः । कुतः । सत्यक्षसाधारणत्वात् । स्वरूपनिर्देशो वा भवतु—इदमेवास्य स्वरूपं समानधर्मादिभ्यो जन्मेति । सोऽय-मेवम्भूतः संशयो विचाराङ्गतयोपादीयते । संशयवद्विपर्ययो-ऽपि विचाराङ्गम् सोऽपि पदार्थत्वेन वक्तव्यः ? सत्यमसौ प-दार्थो न तु विचाराङ्गमित्यतो नाभिधेयः । कथं न विचाराङ्गं ? यथा सन्दिग्धस्तद्विशेषप्रतिपत्तये यतते नैवं विपर्यस्त(१) इति इत्यतो न्यायविद्यानङ्गत्वात् नाभिधीयते ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् ॥ २४ ॥

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम् । यमर्थमधिकृत्येति व्यवसायोऽधिकारः । कस्य व्यवसायः ? सुखदुःखसाधनानाम् । इदं सुखसाधनमिति ज्ञात्वा दुःखाप्तये प्रयतते इदं दुःखसाधन-

(१) विपर्ययस्य—इति २ पु० ।

मिति चाधिगम्य दुःखहानायेति । सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रयुज्यत इति सुखदुःखाप्तिहानी प्रयोजनमिति । अनेन च प्रयोजनेन सर्वे ऽर्थाः सङ्गृहीता भवन्तीति । एतस्मिंश्च सूत्रार्थे परस्य दोषविवक्षया चोद्यमानस्य वक्तुमशक्तस्य व्याहारो लौकिकोऽयमर्थः प्रयुज्यतेऽनेनेति प्रयोजनमिति । न चानेन न्यायस्य(१) किञ्चित् क्रियत इति न्यायाङ्गभावो नास्तीति । यत्तावल्लौकिकोऽयमर्थ इति एतत् नर्ते(२) प्रकृष्टलौकिकादन्यो वक्तुमर्हति—अयमेव च पदार्थो लौकिको न प्रमाणादय इति । कश्चासौ लौकिक इति ? यदि प्रमाणोपपन्न इत्ययमर्थः ? अतिदोषोऽयं प्रमाणोपपन्नं न वक्तव्यमिति । अथान्यः लौकिकपदार्थः ? तन्न बुध्यामहे कथमन्य इति । यदपि प्रयोजनं न्यायस्याङ्गं न भवतीति । तदयुक्तम् । या खलु निष्प्रयोजना चिन्ता सा न न्यायाङ्गमिति परीक्षाविधेस्तु प्रधानाङ्गं प्रयोजनमेव, तन्मूलत्वात् परीक्षाविधेरिति ॥

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं
स दृष्टान्तः ॥ २५ ॥

लौकिकपरीक्षकाणामिति सूत्रम् । बुद्धिसाम्यविषयो दृष्टान्त इति सूत्रार्थः । एवं चाकाशाद्यवरोध इति । यदि पुनरेवमवधार्येत लौकिकानां परीक्षकाणां च यो विषयः स दृष्टान्त इत्यलौकिकार्थो न दृष्टान्तः स्यादाकाशादिरिति । उदाहरणत्वेन तु लौकिकपरीक्षकविषयस्याभिधानं न तु लौकिकपरीक्षकाणामेवेति ।

(१) न्यायस्येतिस्थाने परीक्षाविधेः इति पा० २ पु० ।
(२) न ऋते इति छेदः ।

सोऽयं दृष्टान्तः सारूप्यव्युत्पत्त्यर्थो वा स्यादसिद्धसाधनार्थो वा । यदि तावत् सारूप्यव्युत्पत्त्यर्थस्तदा नोपमानाद्भिद्यते । अथासिद्धसाधनार्थो नोदाहरणाद्भिद्यते । यद्युपमानं प्रमाणेऽन्तर्भावः । अथोदाहरणमवयव इति न पृथक् दृष्टान्तोऽस्तीति । इदं तूत्तरमप्रतिसमाधेयमिति पश्यामः । कस्मात् । त्रयस्याप्यपरिज्ञानात् । एवं ब्रुवता न दृष्टान्तो नोदाहरणं नोपमानं विज्ञातमिति । सारूप्यव्युत्पत्त्यर्थं तावदुपमानं न भवतीति वर्णितम् दृष्टान्तः सारूप्यव्युत्पत्त्यर्थः असिद्धसाधनार्थो वेति दृष्टान्तो न भवति । उदाहरणार्थमुदाहरणं वर्णयन्तो वक्ष्याम इति ॥

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः॥२६ ॥

सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

इदमित्थम्भूतं चेति भाष्यम् । इदमिति सामान्यतोऽवगममाह । इत्थम्भूतं चेति विशेषः । एतदुक्तम्भवति—सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्त इति । अस्यार्थस्य प्रदर्शनार्थं(१) सूत्रम् तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्त इति ।

किं पुनरिदं सूत्रं लक्षणार्थमाहो विभागार्थमिति । किं चातः ? यदि लक्षणार्थं तन्त्राधिकरणग्रहणं न कर्तव्यं एतावद्वक्तव्यभ्युपगमव्यवस्था सिद्धान्त इति । अथ विभागार्थं ? सर्वतन्त्रग्रहणं कर्तव्यं प्रतिज्ञादिवत् । यथा प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति समस्ताभिधानम्, एवं सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितिरिति वक्तव्यम् । लक्षणार्थं च सूत्रान्तरं वक्तव्यम् । सर्वतन्त्रप्रतितन्त्राभ्युपगमसंस्थित्यर्थान्तरभावादित्यस्य सूत्रार्थो(२)

(१) अस्यार्थप्रदर्शनार्थम्—पा० २ पु० ।(२) सूत्रस्यार्थो-इति साधुः ।

ऽन्यो वक्तव्यः । अथेदं विभागार्थं ? तथापि(१) पूर्वसूत्रं परित्यज्यताम् । अथ विभक्तानां पुनर्विभागः ? त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरिति व्याहतम् । विभागश्च नियमार्थः । विभक्तानां विभागः किमर्थः ? । यदि नियमार्थः आद्येन सूत्रेण कृतत्वान्न प्रयोजनमस्तीति । तस्मात् पूर्वमुत्तरं वा सूत्रमनार्षमिति । नानार्षम् । आद्यस्य लक्षणार्थत्वादुत्तरस्य विभागार्थत्वादिति । विभागश्च नियमार्थ इत्युक्तम् । एतेन अनेकधा भिन्नस्य सिद्धान्तस्य चतुर्धा संग्रह इति नियमं दर्शयति । अथाद्यं सूत्रं कथं लक्षणार्थमिति । तन्त्राधिकरणानामर्थानामभ्युपगम इति सूत्रार्थः । तन्त्रमधिकरणं येषामर्थानां भवति ते तन्त्राधिकरणाः तेषामभ्युपगमसंस्थिति(२)रित्थम्भावव्यवस्था । धर्मनियमः सिद्धान्तो भवतीति । किमुक्तम्भवति ? योऽर्थो न शास्त्रितः तस्याभ्युपगमो न सिद्धान्त इति ॥

सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ २८ ॥

सर्वेषां सम्प्रतिपत्तिविषयः(३) सर्वतन्त्रसिद्धान्त इति । यथा प्रमाणानि प्रमेयसाधनानि ।

न दृष्टान्तात् सर्वतन्त्रसिद्धान्तो भिद्यते तत्राप्यविप्रतिपत्तिरिहापीति । भिद्यत इत्याह—दृष्टान्तो हि वादिप्रतिवादिभ्यामेव निश्चितः न पुनरेवं सर्वतन्त्रसिद्धान्त इति । अनुमानागमयोराश्रयो दृष्टान्तो नैवं सर्वतन्त्रसि-

---

(१) यथापि—पा० २ पु० । अथापीति क्वचित् ।

(२) अभ्युपगमं स्थितिः—पा० २ पु० ।

(३) सम्प्रतिपत्तिविषय इति क्वचित् ।

द्धान्त इति। यद्यनुमानागमयोराश्रयो दृष्टान्त इति प्रत्यक्षेऽपि प्रसङ्गः प्रत्यक्षमप्यनुमानागमयोराश्रयः तत्कारणत्वात्। यः प्रत्यक्षविषयः सोऽर्थो दृष्टान्तोऽधिगतोऽर्थः कथ्यत इत्यनुमानागमयोराश्रयः, अधिगमसाधनं तु प्रत्यक्षं, तस्मान्न प्रत्यक्षे प्रसङ्गः॥

समानतन्त्रासिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः॥ २९॥

सामान्यविशेषवद्भूतानां नियमेनाभ्युपगमः प्रतितन्त्रसिद्धान्त इति। यथा भौतिकानीन्द्रियाणीति योगाना(१)मभौतिकानीति सांख्यानामिति॥

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः॥ ३०॥

वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति। तस्योदाहरणं भाष्ये। यथेन्द्रियव्यतिरिक्तो ज्ञाता दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति(२)॥

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः॥ ३१॥

अपरीक्षिताभ्युपगमादिति सूत्रम्। अपरीक्षितोऽसूत्रित इति। योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त इति। यथा नैयायिकानां मन इन्द्रियमिति। वैशेषिकाणां नैयायिकानां च श्रोत्रमाकाशमिति।

अपरीक्षितः शास्त्रानभ्युपगतः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाच्च प्रवर्तत इति न युक्तम्। कुतः? परावज्ञानस्यायुक्तत्वात्। यदि तावत् परस्यास-

---

(१) योगानां—वैशेषिकाणाम्। (२) गौ० सू० ३ अ० १ आ० १ सू०

मर्थ्यं बुद्ध्वा नायं समर्थ इति प्रवर्तते तदाऽनेन न परः प्रतिपादितो भवति, किन्तु विप्रतिपादितः । यश्चाज्ञः किं तस्य प्रतिपादयितव्यम् । अथ परिज्ञातसामर्थ्यं पुरुषमवजानाति ? तदपि न । अतिशयबुद्धिमतोऽवज्ञानस्यायुक्तत्वात् । तस्मान्नायं सूत्रार्थोऽशास्त्रिताभ्युपगमः सिद्धान्त इति ।

सर्व एवायं पक्षः स्वमुखेनार्थापत्त्या वा विधीयत इति किमनेनातिविस्तृतेनेति केचित् । पक्षपर्याय एव सिद्धान्त इत्यपरे । पक्षस्य किलायं पर्यायः सिद्धान्त इति । सिद्धान्तः पक्षपर्यायोऽयमिति न बुध्यामहे सिद्धान्त इत्युपपद्यमानकोऽयमर्थः तत्प्रत्ययादभ्युपगमः पक्ष इत्यन्यतरत्वादिविप्रतिपन्नस्यान्यतरं प्रति कर्मतया वस्तुनो यदुपादानं स पक्षः यश्च कारकशब्दो यश्च वस्तुशब्दो नैतौ पर्यायौ, अन्यथा परशुश्छेदनमिति । परशुरिति कदा अभिधीयते यदा पुरुषव्यापारनिरपेक्षं वस्तु सन्निधीयमानतयाऽवतिष्ठते, छेदनमिति च यदोद्यम्योद्यम्य दारुणि निपात्यते, तावेतौ छेदनपरशुशब्दौ वस्तुनः क्रियासम्बन्धापेक्षौ प्रवर्तेते इति । तथा सर्व एव कारकशब्दा न द्रव्यमात्रे न वा क्रियामात्रे प्रवर्तन्ते । किन्तर्हि ? क्रियासाधने क्रियाविशेषयुक्त इति । कारकशब्दश्च पक्षो न सिद्धान्तः । स कथं पर्यायो भविष्यतीति । सर्वतन्त्रसिद्धान्तश्च पक्षपर्याय इति अहो ? पर्यायशब्देषु कौशलं भदन्तस्य, पक्षो विचारणायामिष्टोऽर्थ इति चाभिधीयते अविचारणीयश्चार्थः पक्षोऽन्तर्भवतीति चित्रम् । अथ पुनः सर्वतन्त्रसिद्धान्तं नैव प्रतिपद्यते तेनापि सर्वतन्त्रसिद्धान्तं निह्नुवानेन तदसत्त्वप्रतिपादको न्यायोऽभिधेयः, यश्चासौ न्यायाभ्युपगमः स सर्वतन्त्रसिद्धान्त इति व्याहतं सर्वतन्त्र-

सिद्धान्तो नास्तीति । अथ न्यायमपि न प्रतिपद्यते, अनिवृत्तो व्याघातः वचने ऽवचने च, यदि तावन्न्यायोऽस्तीति ब्रवीति प्रतिपादयति च नास्ति चेति व्याहतम् । अथ ब्रवीति न अवचनेऽस्यार्थो न सिद्ध्यति । तस्मात् सर्वतन्त्रसिद्धान्तो नास्तीति सम्भ्रमव्याकृतम् । इदं च तावत् भवान् प्रष्टव्यो जायते किं पक्षः सिद्धान्तसामान्यं भवति, अथ संग्रहः पक्षशब्देन सिद्धान्तस्य, अथ सिद्धान्तस्य पक्षशब्दः पर्याय इति ? तद्यदि तावत् सिद्धान्तसामान्यं तन्नास्त्यव्यापकत्वात् । न हि पक्षः सर्वतन्त्रसिद्धान्तं व्याप्नोति असाध्यत्वात् । यथा सत्ता द्रव्यगुणकर्माणि व्याप्नोति व्यापकत्वात् सामान्यं भवति, नचैवं पक्ष इति पर्यायशब्दोऽपि न भवतीत्युक्तम् । यदि च पक्षः सिद्धान्तपर्यायः सर्वतन्त्रसिद्धान्तः साध्यो जायते । सर्वतन्त्रसिद्धान्तः साध्यश्चेति व्याघातः । अर्थापत्तितोऽधिकरणसिद्धान्तस्याभेद इति चेत्—अथापि मन्येथाः अर्थापत्तितोऽधिकरणसिद्धान्तो न भिद्यते, वाक्यार्थप्रतिपत्तौ तद्विपरीतवाक्यार्थप्रतिपत्तिरर्थापत्तिर्वाक्यानुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्त इति ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ ३२ ॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । अवयवानां विभागोद्देशार्थं सूत्रम् । विभागोद्देशश्च नियमार्थः । किं नियन्तव्यं ? दशावयवं ऽपञ्चावयवं च वाक्यं, एके तावद्ब्रुवते दशावयवं वाक्यम् । अपरे ऽपञ्चावयवमिति । उभयनियमज्ञापनार्थः प्रतिज्ञादीनां विभागोद्देश इति । कथं पुनर्जिज्ञासादयोऽवयवा न भवन्ति ? पराप्रतिपादकत्वात् । परप्रतिपादका ये वाक्याङ्गभूता इतरेतरागत्यापेक्षितेनार्थेनार्थवन्तो वाक्याङ्गतामुपयान्ति तेऽव-

यवाः । वाक्याङ्गत्वमवयवार्थः । किं पुनर्वाक्यम् ? यस्य प्रतिज्ञादिभिरुपकृतस्य(१) विशेषावस्थापनमर्थः तद्वाक्यं, वाक्यार्थं संहत्यैते पञ्च निष्पादयन्तीत्यवयवा इत्युच्यन्ते, न पुनर्जिज्ञासादयः परप्रतिपादका इत्यतो न वाक्यस्यावयवा इति । निश्चितत्वाच्च—निश्चितश्च साधयिता भवति । न तस्य जिज्ञासासंशयौ स्तः । प्रयोजनमपि साधनादेव गम्यते । शक्यप्राप्तिश्चेति—न ह्यशक्यमप्रयोजकं वा कश्चित् साधयतीति तस्मात् प्रयोजनशक्यप्राप्ती अपि न वाक्यावयवौ । प्रकरणे तु जिज्ञासादयः समर्था इति भाष्यम् । प्रकरणमेते उत्थापयन्तीति । न हि जिज्ञासादीनन्तरेण प्रकरणस्योत्थानमस्तीति प्रकरणोत्थापका नावयवाः जिज्ञासादय इति । परप्रतिपादकत्वात्तु प्रतिज्ञादीनामयमधिकार इति ते उपदिश्यन्ते । त्र्यवयवमपि वाक्यं यथा न भवति तथोपनयनिगमनयोरर्थान्तरभावं वर्णयन्तो वक्ष्यामः ॥

साध्यनिर्देशः प्रतिज्ञा ॥ ३३ ॥

तेषां त्ववयवत्वेन सामान्येन संगृहीतानामितरेतरविशेषकं लक्षणमुच्यत इति । साध्यनिर्देशः प्रतिज्ञेति । तत्र प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यस्तस्य निर्देशः प्रतिज्ञा—परिग्रहवचनम् । उदाहरणमनित्यः शब्द इति ।

सिद्धत्वाद्धर्मिणो न साध्यतेति केचित्—धर्मी किल धर्मलक्षणः सिद्ध एव सिद्धश्च साध्यो न भवति । नैष दोषः । प्रज्ञापनीयधर्मविशिष्टस्येति वचनात् । न ब्रूमो धर्मिमात्रं साध्यमपि तु प्रज्ञापनीयधर्मविशिष्टो धर्मीति । यदि प्रज्ञापनीयो ? न विशेषणम्, अथ विशेषणं ? न प्रज्ञापनीयः,

(१) उपस्कृतस्य इति क्वचित्पाठः ।

नासिद्धं विशेषणं भवतीति सिद्धेनायं विशिष्यते न साध्येनेति । सर्वमप्रज्ञातं विशेषणं न भवतीति, प्रज्ञातं त्विदमनित्यत्वं घटे शब्दस्य साध्यमिति । एवं तर्हि शब्दस्यानित्यत्वं साध्यं न शब्द इति ? शब्दस्येति विशेषणान्न दोषः—शब्दस्येति ब्रुवता नानित्यत्वमात्रं साध्यत्वेनानुज्ञायते न धर्मिमात्रं । किं तर्हि ? धर्मिणः शब्दस्य प्रज्ञातस्यानित्यत्वस्यान्यधर्मत्वेन योऽयं विशेषणविशेष्यभाव इतरेतरनियामकत्वेन नियमः स साध्यः स चोभयाश्रयो भवति । उभयाश्रयत्वे सति किमुक्तम्भवति ? धर्मी विशेषणं धर्मो वा विशेषणमिति(१) शब्दस्यानित्यत्वमनित्यत्वस्य वा शब्द इति । धर्मी विशिष्यत इति युक्तम् सामान्यतोऽधिगतत्वाद्विशेषतोऽनधिगतत्वाच्च विशेषप्रतिपादकत्वाच्चानुमानस्य । न च पुनर्धर्मस्य सामान्याधिगमोऽस्ति । न नास्ति किमयं धर्मः शब्दस्य उतान्यस्य घटस्येति । एवं तर्हि शब्देऽनित्यत्वमित्ययमर्थः साध्यः तस्य च न कृतकत्वादियोग इति युक्तम् प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः तस्य निर्देशः प्रतिज्ञा । उभयावधारणप्रसङ्गादन्यतरावधारणे च दोषः यदि साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञालक्षणं ततः पूर्वोत्तरे द्वे अवधारणे न कल्पेते । कथम् ? साध्यनिर्देश एव प्रतिज्ञेति प्रतिज्ञाऽवधृता, न साध्यनिर्देशः, प्रतिज्ञाऽन्यथा नास्ति, साध्यनिर्देशोऽन्यथाऽप्यस्तीति प्राप्तम् । ततश्च साध्यनिर्देशो न प्रतिज्ञाऽवधृताऽतोन साध्यनिर्देशः लक्षणं व्यतिरेकित्वादिति । अथ साध्यनिर्देशः प्रतिज्ञेति साध्यनिर्देशोऽवधृतः, न च प्रतिज्ञा, साध्यनिर्देशो ऽन्यथा नास्ति, प्रतिज्ञाऽन्यथा ऽप्यस्तीति ? एवमपि साध्यनिर्देशो न

(१) धर्मी विशेष्यो धर्मो विशेषणमिति २ पु० पा० ।

प्रतिज्ञालक्षणम् अव्यापकत्वात् । यदपि व्यतिरेकि तदप्य-लक्षणम् यथा विषाणित्वं गोः । यदप्यव्यापकं यथा गन्ध-वत्त्वं द्रव्यस्य । अथ पूर्वोत्तरे ऽवधारणे न क्रियेते ? तथापि किल वाक्यमनर्थकं भवति, न चान्या गतिरस्ति, तस्मात् साध्यनिर्देशः प्रतिज्ञेति न युक्तम् ।

सर्वस्मिन् वाक्ये ऽवधारणमिति तु न बुध्यामहे—यथा—गोपालकेन मार्गे ऽपदिष्टे एष पन्थाः स्रुघ्नं(१) गच्छतीति नाव-धारणस्य विषयं पश्यामः, अवधारणस्य तु विषयः सामान्यश्रुतौ नियमः—येन वाक्येन समानश्रुत्याऽनेकार्थो गम्यते तत्रातिप्रसक्ता-वतिप्रसङ्गनिराकरणार्थमवधारणमिति, न पुनः साध्यनिर्देशः प्रतिज्ञेत्युक्ते कचित् प्रसङ्गोऽस्ति यन्निराकरणायावधारणं क्रियेत । सर्वत्र च सावधारणं कुर्वाणो लोकं बाधत इति । यत्र च विशेषणस्यावकाशस्तत्रावधारणस्यापीति नायं दोषः पूर्वोत्तरेऽवधारणे न कल्प्येते इति । ननु साध्यनिर्देशः प्रतिज्ञेत्युक्ते साध्ययोर्हेतुदृष्टान्तयोरपि प्रसङ्गो यथा नित्यः शब्दश्चाक्षुषत्वात् नित्यः शब्दोऽस्पर्शत्वाद्बुद्धिवच्चेति । न । सू-त्रार्थापरिज्ञानात् साध्यनिर्देशः प्रतिज्ञेति प्रज्ञापनीयधर्मविशि-ष्टस्य धर्मिणः परिग्रहवचनम् । न च चाक्षुषत्वं प्रज्ञापनी-यधर्मविशिष्टस्य धर्मिणः परिग्रहवचनमपि तु धर्मनिर्देशो-ऽयम् चाक्षुषत्वादिति । तथा बुद्धेर्नित्यत्वमपि । अथ पुनः साध्यनिर्देशग्रहणादसाध्यनिर्देशनिवृत्तिः—साध्यनिर्देशग्र-हणात् किलासाध्यनिर्देशो निवर्त्यते । असाध्यं च द्वेधा सि-द्धमनुपपद्यमानसाधनं च । तत्र साध्यनिर्देश इत्यनेन व-चनेनोभयं निवर्त्तते सिद्धमनुपपद्यमानसाधनं च । तत्रानुप-

(१) स्रुघ्नं नगरम् ।

पद्यमानसाधनं शब्दाचाक्षुषत्वं बुद्धिनित्यत्वं च । तस्मान्न तत्र प्रसङ्गः । अथ पुनः कृतकत्वाद्यन्यतरपक्षासिद्धं साध्यतयाभ्युपाददीत तदा कृतकत्वादेः साध्यनिर्देशस्य प्रतिज्ञात्वं प्राप्तमिति । नैष दोषः विकल्पानुपपत्तेः यदि तावदेवं ब्रवीति कृतकत्वं साध्यमिति ? तदा सूत्रार्थापरिज्ञानादिति परिहारः । अथ कृतकः शब्द इत्येतत् साध्यमित्येवं प्रत्यवतिष्ठते, तदाभ्युपगम एव दोषत्वेन दर्शित इति न किञ्चिद्बाध्यते । यच्चेदमुच्यते—असाध्यनिर्देशनिवृत्तिद्वारेण साध्यनिर्देशः प्रतिज्ञेत्युच्यत इति, तद्विधीयमानप्रतिषिध्यमानशब्दार्थाभ्युपगमान्नियमो न युक्तः—क्वचिद्वाक्ये विधीयमानोऽर्थोऽभिधीयते क्वचित् प्रतिषिध्यमान इति, एकान्तवादिनस्तु दोषः यथा च न प्रतिषिध्यमान एव पदार्थो भवति तथोपरिष्टाद्वक्ष्याम इति । साध्यनिर्देश इति च प्रतिज्ञायां साध्ययोर्हेतुदृष्टान्तयोः प्रसङ्ग इति । न प्रसङ्गः सिद्धान्तविशेषणत्वात् साध्यशब्दस्य, सिद्धान्तविशेषणोऽयं साध्यशब्दः न साध्यमात्रं, तथा च कः प्रसङ्गो हेतुदृष्टान्तयोः, सिद्धान्तश्चानन्तरोक्त्या साध्यशब्दस्य विशेषणं भवति सिद्धान्तानन्तरमवयवाभिधानात् । यद्यनन्तरोक्त्या सिद्धान्तो विशेषणं तन्निर्देशः प्रतिज्ञेति कार्यं ? न, सर्वतन्त्रसिद्धान्तनिराकरणार्थत्वात् । यदि तन्निर्देशः प्रतिज्ञेत्युच्यते सर्वतन्त्रसिद्धान्तोऽपि प्रकृतत्वात् तच्छब्देनानुकृष्येतेति तन्निर्देशोऽपि प्रतिज्ञेति स्यात्, अतः साध्यग्रहणेन साध्यसिद्धान्तः सम्बध्यते न सर्वतन्त्रसिद्धान्त इति सामर्थ्यात् सर्वतन्त्रसिद्धान्तनिराकरणमिति । यद्यप्ययं सामान्यशब्दः तन्निर्देशः प्रतिज्ञेति तथापि सामर्थ्यात् सर्वतन्त्रसिद्धान्तो निराक्रियते सर्वतन्त्रसिद्धान्तस्यासाध्यत्वात् इतरस्य च प्र-

नितन्त्रादेरवस्थायां साध्यत्वादिति । उदाहरणम् ब्राह्मणान् भोजयेति अशेषब्राह्मणभोजनस्याशक्यत्वात् सामर्थ्यान्नियम इति । यदि सामर्थ्यमास्थीयते समस्तस्यानभिधानं तन्निर्देशः प्रतिज्ञेत्येतदपि न कर्तव्यम् प्रतिज्ञा प्रतिज्ञेति वक्तव्यम् सामर्थ्यतो नियमो गम्यत इति प्रत्यवोचः किन्नो बाध्यत इति कथं न बाध्यते यदभ्युपगतं तन्निवर्तते तन्निर्देशः प्रतिज्ञेति । जिज्ञासादिविशेषणाद्वा न प्रसङ्गः साध्यनिर्देशः प्रतिज्ञेति । जिज्ञासादिभिः प्रकरणोत्थापनावयवैर्विशेषितमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति । यस्मिन्नर्थे जिज्ञासादयः सोऽर्थः साध्य इति तस्य निर्देशः प्रतिज्ञेति । तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः । अर्हत्यर्थे वा कृत्याभिधानं—साध्यनिर्देशः प्रतिज्ञेत्यर्हत्यर्थे कृत्यः साधनमर्हतीति साध्यः तस्य निर्देशः प्रतिज्ञा । न च हेतुदृष्टान्तौ साधनार्हावतो न प्रसङ्गः । कर्मकरणयोर्धर्मभेदाद्वा—अन्यः कर्मधर्मोऽन्यश्च करणधर्म इति, "कर्तुरीप्सिततमं कर्मे"ति कर्मधर्मः साधकतमं करणमिति करणधर्मः । न चेतरस्य धर्म इतरधर्मो भवितुमर्हतीति । कर्मनिर्देशश्चायं साध्यनिर्देशः प्रतिज्ञेति करणनिर्देशश्चाक्षुपत्वादिति अतोऽपि न प्रसङ्गः । साध्यासिद्धसिद्धभेदाद्वा-अन्यत् साध्यमन्यत् सिद्धमन्यच्चासिद्धमिति । साध्यमन्यतरपक्षासिद्धमन्यतरं प्रति कर्मतया यदुपादीयते । उभयपक्षासम्प्रतिपन्नमसिद्धम् । उभयपक्षसम्प्रतिपन्नं सिद्धमिति । तेन यथा सिद्धमित्युक्ते न साध्ये नासिद्धे च प्रसङ्गः तथा साध्यमित्युक्ते नासिद्धे सिद्धे च प्रसङ्गः । अथाप्रसक्तमपि देश्यते सर्वे ऽर्थाः सिद्धा अपि प्रतिज्ञात्वेन देशनीया भवन्ति । अथवा साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञाद्यवयवविषयो योऽर्थः स साध्यः—यः प्रतिज्ञादीनामवयवानां विषयो धर्मी

प्रसिद्धधर्मविशिष्टः स धर्मान्तराधिकरणत्वेन साध्यते तथा च हेतुदृष्टान्तयोः कः प्रसङ्गः ।

न चेदयं प्रसङ्गोऽस्ति तस्मादिष्टग्रहणमनर्थकं--साध्यनिर्देशः प्रतिज्ञेति किल साध्यस्येष्टग्रहणेनाविशेषितत्वात् । साध्यत्वाद्धेतुदृष्टान्तयोः प्रसङ्ग इति मन्यमानैः कैश्चिदन्यथा पक्षलक्षणानि क्रियन्ते तद्यथा पक्षो यः साधयितुमिष्ट इति । अत्रेष्टग्रहणं तावदनर्थकं साध्यपदेन हेतुदृष्टान्ताभासोक्तेर्निराकृतत्वात् तन्निराकरणार्थमिष्टग्रहणमित्ययुक्तम् । कर्मग्रहणाच्चावाप्तमेतदिष्टमीप्सितमिति चानर्थान्तरम् । अथाप्यनिष्टपक्षव्युदासार्थमिष्टग्रहणं क्रियते अर्थतः किलास्य नेष्टं भवति यत् स्ववचनादिना विरुध्यत इति, यथा ऽवाचकाः शब्दा इति, अवाचकत्वं च शब्दानां प्रतिज्ञायते शब्दा एवार्थप्रत्यायनायोच्चार्यन्त इति व्याहतम् । अनुष्णोऽग्निरिति प्रत्यक्षविरोधः । अश्रावणः शब्द इति प्रत्यक्षविरोधं केचिद्वर्णयन्ति । तदयुक्तम् । इन्द्रियवृत्तीनामतीन्द्रियत्वात्--इन्द्रियवृत्तयोऽतीन्द्रिया इदमनेनेन्द्रियेण गृह्यते नेदमनेनेति न कस्यचित् प्रत्यक्षमस्ति किन्तु तद्भावाभावानुविधानात् । रूपादिज्ञानैरिन्द्रियवृत्तयोऽनुमीयन्ते तस्मान्नेदमुदाहरणम् । उदाहरणन्त्वनुष्णोऽग्निरिति युक्तम् । आगमविरुद्धमपि वैशेषिकस्य नित्यः शब्द इति यथा । इदमपि नागमविरुद्धमिति पश्यामः । न हि वैशेषिकेण शब्दानित्यत्वमागमतः प्रतिपन्नम्, अपि त्वनुमानात् कारणतो विकारात् इत्येवमादेः, एतदप्यनुमानविरुद्धमेव । अथ सूत्रकारवचनात् प्रतिपन्नं इत्यागमविरोधः ? ननु च नित्यो घट इत्ययमप्यागमविरोधः प्राप्तः तस्मात् ब्राह्मणेन सुरा पेयेत्यागमविरोधः प्रसिद्धिविरुद्धं तु न बुद्ध्या-

महे (१) कोऽयं प्रसिद्धिविरोध इति? प्रसिद्धिः प्रत्यक्षादीनां प्रमाणानामन्यतमेनार्थप्रतिपत्तिः यथा अचन्द्रः शशीति। तस्मात् पूर्वप्रमाणविरोध एवान्तर्भवतीति न प्रसिद्धिविरोधाभिधाने पृथक् प्रयोजनं पश्यामः। शक्यं तु प्रतिपत्तुम् सर्व एवायं प्रसिद्धिविरोध इति। एतदर्थनिराकरणार्थमिष्टग्रहणं पठन्ति।

एतच्च सर्वं न युक्तमिति पश्यामः। कथं? स्वार्थापवादादिदोषाणां प्रतिज्ञादोषत्वेनाभ्युपगमात् सर्व एते(२) स्वार्थापवादादिदोषाः प्रतिज्ञादोषत्वेन सम्भवन्ति, न पक्षदोषत्वेन। कथमिति? अर्थस्य तादवस्थ्यात्—तथाभूतोऽर्थोऽभिधीयमानः तथाभूत एवानभिधीयमान इति। वचनमपि तर्ह्येवमेवेति चेत्? वचनेऽप्येते दोषा माभूवन्। सत्यममी नार्थदोषाः, न वचनदोषाः, किन्तु पुरुषदोषाः, ये हि कर्तृदोषास्ते क्रियाद्वारेण उद्भाव्यन्ते इति क्रियायां कर्तृदोषमुपचर्य दुष्टा क्रियेत्युच्यते एवं वक्तृदोषान् वचने उपचर्य दुष्टं वचनमित्युच्यते। पुरुषस्तु नार्थे दोषो न वचन(३) इति। अर्थस्य स्वक्रियासामर्थ्यात् सर्वोऽर्थः स्वस्यां स्वस्यां क्रियायां समर्थः स तु स्वक्रियाव्यतिरेकेण क्रियान्तरे विनियुज्यमानः कर्तुरेवाकौशलं प्रकाशयति। एवं वचनमपि स्वस्मिन्नर्थे समर्थं विषयान्तरे तु प्रयुज्यमानं वक्तुः संमोहं प्रकटयति।

प्रतिज्ञायाः पक्षविषयत्वात् प्रतिज्ञादोषाः पक्षदोषा इत्युच्यन्ते। नैतद्युक्तम् हेत्वादिदोषाणामपि पक्षदोषत्वप्रसङ्गात्। एवं सति हेत्वादयोऽपि पक्षविषया इति कृत्वा हेत्वादिदोषा अपि पक्षदोषा भवन्तु ततश्च दूषणं पक्षदोषा इति वक्तव्यं न पुन-

(१) प्रमाणविरोधाद्भेदेन ता० टी०। (२) सर्वत्र ते– पा० २ पु०।
(३) वस्तुतस्तु पक्षदोषो नार्थे न वचन इति २ पु० पा०।

दूषणानि न्यूनतावयवोत्तरदोषाक्षेपभावोद्भावनानीति(१) । अथ वाच्यवाचकभावेन नियमो भविष्यतीति न साध्यसाधनभावेनेति ? नैतद् युक्तम्, प्रमाणाभावादिति साधनविषयत्वेनावतिष्ठते पक्षो वचनविषयत्वेन च, तत्र वाच्यवाचकभावनियमाद्वचनदोषाः पक्षे भवन्तु, मा भूवन् साध्यसाधकभावात् । साधनदोषाः पक्षदोषा इति न प्रमाणमस्ति । वचनदोषाश्च पक्ष उपचर्यन्ते । न हि सम्भवे मन्युपचारो लभ्यते । तद्यथा मञ्चाः क्रोशन्तीति क्रोशनक्रियाया मञ्चेऽसम्भवात् लौकिकप्रयुक्तवाक्याव्याख्यानं कुर्वता मञ्चस्थाः पुरुषा इति स्थानिषु पुरुषेषु(२)मञ्चशब्दमारोप्य प्रमाणासम्भवेनोपचारः क्रियते मञ्चाः क्रोशन्तीति । न पुनः प्रतिज्ञादिदोषाः प्रतिज्ञायां न सम्भवन्ति यतस्तत्रासम्भवन्तोऽवयवान्तराश्रेयतया व्यवस्थिताः पक्षे उपचर्यन्तेति । आकस्मिकं च मुख्यार्थव्यतिक्रमं कुर्वाणेन यदुक्तं नैयायिकहेतुप्रतिपत्तनाऽऽकस्मिको मुख्यार्थव्यतिक्रमो लभ्यते इति, तद्व्याहन्येत । अथेष्टग्रहणेन लौकिकोऽर्थोऽभिधीयते इष्टमभिप्रेतमिष्टमपि मे मतमिति । अयमप्यर्थः साधनादेव गम्यते न हि कश्चिद् निष्टं साधयति । योऽप्यनिष्टभयात् साधयति तस्याप्यनिष्टनिवृत्तिरिष्टेति नानिष्टं साधयति तस्मादिष्टग्रहणमनर्थकम् । एवं विचारणायामिष्टोऽर्थः पक्ष इत्यत्रापीष्टग्रहणमनर्थकम् (३)। का चेयं विचारणा ? यदि साधनदूषणप्रयोगः तत्रानेकार्थसन्निपाते न ज्ञायते कथमिष्टमिति ? किं साध्यत्वेन, साधनत्वेन, दूषणत्वेन, दूष्यत्वेन, वेति । अथ संशयो विचारणा? तद्यथा आत्मनोऽस्तित्वनास्तित्वविचारणायामिति ? आत्मनोऽस्तित्वनास्तित्व-

(१) उद्भाव्यमानानि—पा० १ पु० ।

(२) ग्रहणं प्रत्युक्तमिति २ पु० पा० ।

संशय इति यावदुक्तं भवति तावदिदमुक्तं भवति आत्मनो-ऽस्तित्वनास्तित्वविचारणायामिति संशयो (विचारणापदस्य नार्थः न विचारणा संशयपदस्य ।) विचारणा हि नाम संशयोत्तरकालभाविनी साधनदूषणप्रयोगरूपा अन्यतराधिकरणनिर्णयावसाना सा न संशय इति । संशयः पुनरनवधारणात्मकः प्रत्यय इति । न च वादे संशयो भवति तयोर्निश्चितत्वात् निश्चितौ हि वादं कुरुत इति । एतेन साध्यत्वेनेप्सितः पक्ष इति प्रत्युक्तम् । ईप्सितग्रहणस्यानिष्टनिराकरणार्थत्वात् विरुद्धार्थानिराकृत इति न वक्तव्यम् । पक्षो यः साधयितुमिष्ट इत्यत्रेष्टग्रहणेनानिष्टपक्षनिराकरणमितीहापीप्सितग्रहणादनिष्टपक्षनिरास इत्युत्तरकारिकार्द्धं न कर्त्तव्यं(१) विरुद्धार्थानिराकृत इति । अथ विरुद्धार्थानिराकृत इत्यनेनानिष्टाः पक्षदोषा निराक्रियन्ते ? ईप्सितग्रहणं तर्हि व्यर्थम् । अथोभयमीप्सितग्रहणं विरुद्धार्थानिराकृत इति च पक्षदोषाणां निराकर्तृ, यथाऽपि पक्षो यः साधयितुमिष्ट इत्यत्रापि विरुद्धार्थानिराकृत इति कर्त्तव्यम् । सर्वथैते पक्षलक्षणे विचार्यमाणे एकस्य न्यूनत्वमेकस्याधिक्यं ख्यापयत इति । स्वयं साध्यत्वेनेप्सित इति च स्वयङ्ग्रहणं न कर्त्तव्यम् । किङ्कारणम् ? कर्मणः कर्त्रपेक्षत्वात् यथा कर्त्ता वृक्षं छिनत्तीत्युक्ते स्वयमिति गम्यते न ह्यन्यस्य छेद्यमन्यश्छिनत्ति । एवं यस्य साध्यं स एव साधयितेति(२) स्वयमिति गम्यते । सोऽयं परस्याक्षराधिक्यदोषानविविच्य स्ववचनप्रयोगेषु संमूढ

( ) एतदन्तर्गतो ग्रन्थो नास्ति । २ पु०

(१) न वक्तव्यमिति २ पु० पा० ।

(२) स्वसाधयितेति—पा० २ पु० ।

इति। यदपि वादविधानटीकायां साधयतीति शब्दस्य स्वयं परेण च तुल्यत्वात् स्वयमिति विशेषणं, साधयतीति किलायं शब्दः प्रयोज्ये प्रयोक्तरि च तुल्यरूपो भवतीति। असम्। तुल्यरूप एव शब्दो न पुनः साधारणप्रयोगे प्रयोजनं पश्यामः। अत एवं वक्तव्यं—पक्षो यः साधयितुमिष्ट इति। तत्त्वभाक्तयोश्च तत्त्वसम्प्रतिपत्तेः प्रयोक्त्रर्थसम्प्रतिपत्तेः यद्यप्ययं तुल्यरूपः शब्दस्तथापि प्रयोज्य एव सम्भवति साधयतीति, न प्रयोक्तरि भाक्तत्वात्, प्रयोज्ये चासमत्वात्। तुमुनश्च समानकर्तृकेषु नियमात् साधयितुमिति तुमुनः प्रयोगोऽयम स चायं समानकर्तृकेष्वेव दृष्टः। तद्यथा स्नातुं गच्छामीति। न पुनरनुन्मत्त एवं ब्रूयात् स्वयं स्नातुं यामीति तथेहापि। यद्यपि साधयतिशब्दस्तुल्यरूपस्तथापि तुमुना विशेषितत्वात् प्रयोक्त्रर्थेनतिप्रसङ्गः। यदपि स्वयं शब्देन(१) शास्त्रानपेक्षमभ्युपगमं दर्शयतीति, अत्रोक्तम्। किमुक्तम्? परावज्ञानस्यायुक्तत्वादित्येवमादि। किं पुनः शास्त्रं यदनपेक्षमभ्युपगमं दर्शयति? ननु शास्त्रं प्रत्यक्षागमाभ्यामविरुद्धं आगमस्तदनपेक्षमभ्युपगमं दर्शयतीति ब्रुवताऽप्रमाणकमर्थमभ्युपैतीत्युक्तम्। यश्चाप्रमाणकोऽभ्युपगमो नासावभ्युपगन्तुं स्वस्थात्मना(२) युक्तः नापि प्रतिपादयितुं युक्त इति। यद्यपि वादविधौ साध्याभिधानं प्रतिज्ञेति प्रतिज्ञालक्षणमुक्तं तदप्युभयथा दोषान्न युक्तम्। कथमिति। यदि तावत् पूर्वप्रकृतपक्षमपेक्षमाणेनेदमुच्यते साध्याभिधानं प्रतिज्ञेति? तदा साध्यग्रहणानर्थक्यम्। प्रकृतः पक्षस्तच्छब्देनाभिसम्भन्त्स्यत इति

(१) स्वयं शब्देन—इति क्वचित्।

(२) सुस्थात्मना—पा० १ पु०।

तदभिधानं प्रतिज्ञेति वक्तव्यम् । अथ पक्षानपेक्षं स्वतन्त्रमेतल्लक्षणं तथापि यो नैयायिकप्रतिज्ञायां दोष उक्तः स इह प्रसक्तः यस्तु तत्र भवता परीहारः(१) क्रियते ममापि स एव परीहारो भविष्यतीति न वक्तव्यम् । मयानभ्युपगमात् भवता चाभ्युपगतत्वात् यथा नाम कश्चित्परं ब्रूयात् माता तव*बन्धकी(२) स्त्रीत्वादिति स तस्योत्तरं ब्रूयात् । न बन्धकीत्वे स्त्रीत्वं हेतुः किन्तु स्वपुरुषव्यतिरेकेण पुरुषान्तरसम्बन्ध इति । स्त्रीत्वाद्बन्धकीत्वं ब्रुवाणस्य मातुर्बन्धकीत्वमपरिहार्यम् । अथ परपुरुषसम्बन्धं हेतमभ्युपेयात् स्त्रीत्वाद्बन्धकीत्वं व्याहतमिति तथा । भवतोऽपि व्याघातः साध्ययोर्हेतुदृष्टान्तयोः निर्देशं प्रतिज्ञा प्राप्नोतीति तस्माद्पेतसर्वदोषमिदं वाक्यं साध्यनिर्देशः प्रतिज्ञेति ॥

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ॥ ३४ ॥

हेतोरवसरप्राप्तस्य लक्षणापदेशद्वारेणोदाहरणसाधर्म्यादिति सूत्रम् । उदाहरणेन साधर्म्यमुदाहरणसाधर्म्यम् । किं पुनरुदाहरणं वक्ष्यमाणकं तेन साधर्म्यं समानधर्मता यो धर्मः साध्ये भवति तथाभूत एवोदाहरणे ऽपीति न पुनः स एव. अन्यधर्मस्यान्यत्रावृत्तेः—न ह्यन्यस्य धर्मो ऽन्यत्र वर्तते किन्तु तत्तुल्यः स एवेत्युच्यते इति । यदि पुनः साधर्म्यं हेतुरित्येतावन्मात्रमुच्येत भवत्येवं विवक्षितार्थसिद्धिर्निग्रहनिषेधस्तु न स्यात् साधर्म्यमात्रं हेतुरित्यतोऽनिष्टार्थनिषेधार्थमुदाहरणसाधर्म्यग्रहणम् । उदाहरणसाधर्म्यग्रहणादनुदाहरणसाधर्म्यमर्था-

---

(१) 'परिहार'शब्दस्य स्थाने तालपत्रपुस्तके सर्वत्र परीहार इति पाठः । * तवस्थाने मे इति २ पु०पा० ।

(२) बन्धकी पुंश्चली ।

न्निराकृतं भवति । अवधारणेन वा निराक्रियते उदाहरणेनैव साधर्म्यं न पुनरनुदाहरणेनापि साधर्म्यमेव(१) न पुनर्वैधर्म्यमपीति । कस्य पुनरुदाहरणेन साधर्म्यं ? कस्यान्यस्य पुनः स्यात् साध्यस्य प्रकृतत्वात् प्रत्यासत्तेश्च—प्रकृतं प्रत्यासन्नं च साध्यं तस्मादुदाहरणसाधर्म्यं साध्यस्य । अत्रापि च साध्येन साधर्म्यमिति साधर्म्यमेवेत्यवधार्यते । किं पुनरनेनावधारणेन लभ्यते ? साध्यैकदेशवृत्तिरहेतुरिति लभ्यते । सोऽयं हेतुः साध्योदाहरणाभ्यां प्रतिसंहितः । किं पुनरस्य प्रतिसन्धानं ? साध्ये व्यापकत्वम् उदाहरणे चासम्भवः । एवं द्विलक्षणस्त्रिलक्षणश्च हेतुर्लभ्यते उदाहरणेनैव साधर्म्यमित्येवं ब्रुवताऽनभ्युपगतविपक्षस्याप्युदाहरणेनैव साधर्म्यमिति द्विलक्षणोऽपि हेतुर्भवतीत्युक्तम् । यदा पुनर्विपक्षमभ्युपैति तदाप्युदाहरणेनैव साधर्म्यं नानुदाहरणेनेति त्रिलक्षणो हेतुरित्युक्तं भवति । तदेवं द्वावप्यन्वयव्यतिरेकिणौ यथा वैशेषिकस्यानित्यः शब्दः कृतकत्वात् सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षविषयत्वाद्वेति । द्वावन्वयिनौ यथा सर्वानित्यतावादिनः अनित्यः शब्दः प्रमेयत्वात् अमूर्तत्वाच्च । तदेवमन्वयव्यतिरेकिभेदेनानन्वयभेदेनाश्चतुःप्रकारो हेतुरित्युक्तं भवति । तदेवं हेतुस्वरूपावधारणाद्धेत्वाभासा निराकृता भवन्ति । तत्रोदाहरणेनैव साधर्म्यमित्यनेन विपर्ययहेतोरनैकान्तिकस्य च निराकरणम् । साधर्म्यमेवोदाहरणेनेत्यनेनावधारणेन साध्यावृत्तिः साध्यैकदेशवृत्तिश्च निराकृत इति । तत्र तावद्विपर्ययहेतुरश्वो विषाणित्वात् गौर्विषाणित्वादित्यनैकान्तिकः साध्यावृत्तिश्चाक्षुषत्वादनित्यः शब्द इति । साध्यैकदेशावृत्तिरनित्याः परमाणवो

(१) साधर्म्यमिवेति क्वचित् ।

गन्धवत्त्वादिति। स्वरूपतस्तर्ह्यनैकान्तिकादिग्रहणं न कर्त्तव्यम्। यस्मादनेन हेतुलक्षणेन एवंभाव्यमानेनार्थादनैकान्तिकहेत्वादयो निराक्रियन्ते नन्वनैकान्तिकः सव्यभिचार इत्येवमादिसूत्रानारम्भः। नातिप्रसक्तस्य नियमार्थत्वात् अनेकधा हेत्वाभासा भिन्ना इति तेषां नियमज्ञापनार्थमनैकान्तिकादिग्रहणमिति।

उदाहरणसाधर्म्याच्च किमन्यत्साध्यसाधनमित्येके। न किलोदाहरणसाधर्म्यव्यतिरेकेण साध्यसाधनमस्तीत्यत एवं सूत्रं कर्त्तव्यं "उदाहरणसाधर्म्यं हेतु"रिति। अथ पुनः साध्यसाधनशब्दोपादानमुदाहरणसाधर्म्यविशेषणार्थमेवमपि पञ्चम्यपदेशोऽनर्थक इति। न हि भवति नीलादुत्पलमिति। अन्ये तु पञ्चम्यपदेशानर्थक्यमन्यथा वर्णयन्ति। अर्थान्तरे दृष्टत्वादिहानर्थक इति। अर्थान्तरे किल पञ्चमी दृष्टा यथा ग्रामादिति। न पुनरिहोदाहरणसाधर्म्यव्यतिरेकेण साध्यस्य साधनमस्तीत्यतः पञ्चम्यपदेशोऽनर्थक इति। साध्यसाधनविशिष्टे चोदाहरणे साधर्म्यहेतुत्वेन ब्रुवाणेनाभिधेयो हेतुरित्युक्तं भवति। तथा च साध्यनिर्देशः प्रतिज्ञेति व्याहतं भवति। न चाभिधानाभिधेयात्मकः समुदायो दृष्ट इति नैवोभयेषामवयवत्वम्। तत्रैष दोषो न परिहारान्तरं प्रयोजयति तेनैवापाकृतत्वात् उदाहरणसाधर्म्यात् साध्यसाधनवचनं हेतुरित्येवं व्याचक्षाणेन समस्त एव दोषोऽपाकृतो भवतीति। अतो न परिहारान्तरं प्रयोजयति। साधर्म्यस्य व्यभिचार्यव्यभिचारित्वात् विशेषणयोगो न तद्वचनस्याकारकत्वात् यत्तत्प्रकारवत्तद्विशेष्यते साधर्म्यं चैतदस्ति न च वचमीति। वचसः कारकत्वं न भवतीति न बुद्ध्यामहे यथेवार्थः प्रकारवान् तथा वचनमपीति। अर्थस्तावत् कथं प्रकारवान् ?

उभयथाभावात्—यस्मादयमर्थ उभयथा भवति नित्योऽनित्यः मूर्तोऽमूर्तश्च । वचनमपि तदुभयथा भवतीति तुल्यं नित्यानित्यमूर्तोऽमूर्तशब्दाभिधेयमिति । दृष्टश्च शब्दे विशेषणयोगः यथा किमयमाह गौरित्ययमाह इतिपरतया शब्दः शब्दान्तरादुपवच्छिद्यते । स्वयं वचनविशेषकाणि बहूनि वाक्यानि प्रयुक्तानि । तद्यथा स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति । अथ वचनं नैवंविधमिति(१) सिद्ध्यसिद्ध्यर्थं वचनं वाद इत्येवमादि व्याहतम् । सोऽयं सूक्ष्मेक्षिकया परस्य दोषानभिदधानो लोकादप्यपभ्रष्ट इति । यदप्यर्थान्तरे दृष्टत्वादित्यनर्थकः पञ्चम्यपदेश इति ? एवं ब्रुवाणः स्वसिद्धान्तं बाधते, न हि भवन्तः सेनावनादीन्यर्थान्तरभूतानि प्रतिपद्यन्ते । अथ च पञ्चम्यपदेशो भवति वनादयं वृक्ष आनीतः सेनातोऽश्व इति । दृष्टश्च तन्त्रान्तरे पञ्चम्यपदेशोऽनर्थान्तरे सन्धिविग्रहाभ्यां षाड्गुण्यं सम्पद्यते इति । अनभ्युपगतार्थान्तरविपक्षस्य(२) च हेतुर्विपक्षाद्विशेष इति पञ्चम्या अर्थान्तरवाचकत्वं कुतः । यदप्युदाहरणसाधर्म्यस्येति वक्तव्यं नोदाहरणसाधर्म्यादिति । तदपि न । विवक्षातः कारकशब्दप्रयोगात्—यदा साधर्म्यमभिधीयमानतया विवक्षितं भवति उदाहरणसाधर्म्यस्येति युक्तम् । यदा तूदाहरणसाधर्म्यस्य निमित्तभावो वचनेऽपि विवक्षितस्तदोदाहरणसाधर्म्यादिति निमित्तपञ्चमी युक्ता । कथं पुनरुदाहरणसाधर्म्यस्य निमित्तभावः ? सति भावात् यस्मादुदाहरणसाधर्म्यं बुद्ध्वा विवक्षाप्रयत्नवायूदीरणताल्वाद्यभिघातादयः शब्दस्य निमित्तं भवन्ति अतः पारम्पर्येणोदाहरणसाधर्म्यमपि निमित्तमिति । तस्मात् पञ्चम्यभिधानमेव ज्यायः ।

---

(१) नैवंविध्यम्—पा० २ पु० । (२) विशेषस्येति ३ पु० पा० ।

उदाहरणमनित्यः शब्द उत्पत्तिधर्मकत्वात् उत्पत्तिधर्मकम-नित्यं स्थाल्यादि दृष्टमिति । किं पुनरनित्यं नाम ? यस्यानित्यत्वं तदनित्यम् । अथानित्यत्वं किम् ? उभयान्तावच्छिन्नवस्तुसत्तास-म्बन्धः सत्ता वा तद्विशेषणा । अथोत्पत्तिधर्मकं किम् ? उत्पत्तिधर्मो यस्य स उत्पत्तिधर्मा उत्पत्तिधर्मैवोत्पत्तिधर्मकः । का पुनरियमुत्प-त्तिः ? असद्विशेषणस्य सतोऽत्यन्तमभावभावप्रतिषेधः—यद-सद्विशेषणं सद्भवति तत्पूर्वं नासीत् पश्चाद्भवतीति ग-म्यते तस्यात्यन्तमभावोऽत्यन्तश्च भाव इति प्रतिषेधो यः स उत्पत्तिशब्दार्थः सत्ता वैवंविशेषणा । वाक्यार्थाभ्यनु-ज्ञानाच्च पदार्थोऽभ्यनुज्ञातो भवति यो वाक्यस्यार्थोऽभूत्वा भवतीति स पदस्यार्थ उत्पद्यत इति । सोत्पत्तिधर्मो यस्य स भवत्युत्पत्तिधर्मक इति ॥

तथा वैधर्म्यात् ॥ ३५ ॥

किमेतावद्धेतुलक्षणमिति ? नेत्युच्यते । किं तर्हि ? "तथा वैधर्म्यात्" । अत्राप्युदाहरणवैधर्म्यादित्युदाहरणेनैव वैधर्म्यं नानुदाहरणेनेति, वैधर्म्यमेवो(१)दाहरणेन न साधर्म्यमपीति । उदाहरणमनित्यः शब्दः उत्पत्तिधर्मकत्वात् अनुत्पत्तिधर्मकं नित्यं दृष्टं आत्मादिद्रव्यमिति भाष्यम् । एतत्तु (२) न स-म्यक्समिति पश्यामः प्रयोगमात्रभेदात् प्रयोगमात्रं हि भि-द्यते नार्थ इति । न च प्रयोगमात्रभेदाद्वस्त्वन्तरं भवि-तुमर्हतीति । उदाहरणमात्रभेदाच्च—उदाहरणमात्रं केवलं भिद्यते आत्मा घट इति । यदि चोदाहरणभेदाद्भेदो भवति "तथा वैधर्म्या"दिति न पठितव्यम् । किं कारणम् ? उ-

---

(१) वैधर्म्यमिवेति क्वचित् ।

(२) यतच्चेति टीकानुसारेण युक्तम् ।

दाहरणभेदादेव भेदो गम्यते । उदाहरणसूत्रं च भेदकमस्ति "तद्विपर्ययाद्वा विपरीत"मिति । तस्मान्नेदमुदाहरणं न्याय्यमिति ।

उदाहरणं तु नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादिति । यदुभयपक्षसम्प्रतिपन्नमप्राणादिमत् तत्सर्वं निरात्मकं दृष्टम् । न चेदमप्राणादिमद्भवति तस्मान्नेदं निरात्मकमिति । सोऽयमवीतः परपक्षप्रतिषेधार्थ एव भवति । तावेतौ वीतावीतहेतू लक्षणाभ्यां पृथगभिहिताविति । तत्र स्वरूपेणार्थपरिच्छेदकत्वं वीतधर्मः अवीतः पुनः परपक्षप्रतिषेधेनैव प्रवर्तत इति । एकस्य विधीयमानोऽर्थ इतरस्य प्रतिषिध्यमानः । कथं पुनरयमवीतोऽर्थपरिच्छेदक इति । अथ योऽभ्यनुज्ञातो ऽर्थपरिच्छेदकः स कथम् ? वीतोऽन्वयादिति चेत् ? वीतो हेतुरन्वयेन प्रतिपादयति । अथ प्रमेयत्वं कस्मान्न हेतुः यद्यन्वयस्यैतत् सामर्थ्यम् ? व्यभिचारात् प्रमेयत्वं न हेतुः ? न तर्ह्यन्वयः प्रतिपादकः अपि त्वव्यभिचारः । यदि चाव्यभिचाराद्धेतुरर्थं प्रतिपादयति तदा अदेश्यमेतत् कथमवीतः प्रतिपादक इति अवीतस्यापि व्यतिरेकाव्यभिचारित्वात् प्रतिपादकत्वमिति । कथं ? यावदप्राणादिमत् तत् सर्वं निरात्मकं दृष्टमिति अप्राणादिमत्त्वं च जीवच्छरीरान्निवर्तते तस्मात्तदव्यभिचारि निरात्मकत्वमपि निवर्तयतीति । अथ पुनरप्राणादिमत्त्वनिवृत्तिरेव प्रतिपाद्यते न पुनर्निरात्मकत्वस्य ? न युक्तमेवं भवितुम् । किं कारणम्? पक्ष एवं सति व्यभिचारो दर्शितः स्यात् पक्षव्यभिचारोपदर्शने सति शक्यं वक्तुम् । अन्वयिनि तु हेतौ शब्दे नित्यत्वमस्तु सति कृतकत्व इति । तस्माद्यथान्वयिनोऽन्वयसम्बन्धाव्यभिचारः प्रतिपादकः तथा व्यतिरेकिणोऽपि व्य-

तिरेकाव्यभिचार इति । एतेन यथा वीतहेतोरव्यभिचारिण एकस्य धर्मस्य दर्शनादितरधर्मानुमानमेवमवीतहेतावपि एकधर्मनिवृत्तिदर्शनादितरधर्मानिवृत्त्यनुमानमिति । सर्वात्मकत्वप्रसङ्ग इति चेत् । न । विकल्पानुपपत्तेः । यद्येकधर्मनिवृत्तिदर्शनादितरधर्मनिवृत्तिरनुमीयते तन्निवृत्त्या च सात्मकत्वं सिद्ध्यतीति मन्यसे एवं च सर्वात्मकं शरीरं प्राप्नोति । किङ्कारणम् ? अप्राणादिनिवृत्तेरडित्थादिनिवृत्तिप्रतिपादकत्वात् नेदमडित्थवच्छरीरमप्राणादिमत्त्वप्रसङ्गादेवमडित्थादिप्रतिषेधोऽपि वक्तव्य इति । तच्च नैवं विकल्पानुपपत्तेः इदं तावत् भवान् पृष्टो व्याचष्टाम्—किमवधारितकार्यस्वभावः पदार्थो डित्थशब्दवाच्यः आहो नेति । यद्यवधारितकार्यस्वभावः संज्ञाभेदमात्रमात्मा स इति । अथानवधारितकार्यस्वभावः तस्य व्यावृत्तिरशक्या प्रतिपादयितुम् । व्यावृत्तिप्रधानं चेदं वाक्यं तस्मादवीतहेतोरर्थप्रबुद्धा सर्वात्मकता दृश्यत इति ।

यदि तर्ह्यसाधारणो धर्मो हेतुर्नित्या पृथिवी गन्धवत्त्वादित्यादयो हेतवः प्राप्नुवन्ति । न । हेत्वर्थापरिज्ञानात्—सत्यमसाधारणो वैधर्म्यहेतुः न पुनर्वैधर्म्यं व्यभिचारि गन्धवत्त्वं च नित्यानित्यव्यभिचारि तस्मादन्वयिनो व्यतिरेकिणश्च नान्वयव्यतिरेकौ हेतुभावनिमित्तम् किन्त्वन्वयव्यतिरेकयोरव्यभिचार इति । यः पुनरसाधारणो धर्मः पक्ष एव केवलं यस्य तत्तुल्यविपक्षौ न स्तः स कस्मान्न हेतुः यथा सर्वं नित्यं सत्त्वात् । सत्यमयमसाधारणो न तु व्यावृत्तः अव्यावृत्तेरहेतुरिति । एतेन यः पक्षैकदेशवृत्तिरविद्यमानसपक्षविपक्षः स न हेतुरित्युक्तं भवति यथा सर्वं नित्यममूर्त्तत्वादिति । यः पक्षैकदेशे वर्तते अविद्यमानसपक्षो विपक्षाच्च निवर्तते यथाऽनभ्यु-

पगतानित्यपक्षस्य नित्ये वाङ्मनसे श्रावणत्वादिति स क-स्मान्न हेतुः ? अयमपि न हेतुः सूत्रार्थेनापोदितत्वात्—सूत्रार्थस्तथा वैधर्म्यादिति। अत्र च वैधर्म्यमुदाहरणेनैव, वैधर्म्यमेव चोदाहरणेन, न पुनरिदं वैधर्म्यमेव तस्मान्न प्रसङ्गः। एवमनयोर्वीतावीतहेत्वोः पृथगर्थप्रतिपादकत्वस्याऽऽकुमारं प्रसिद्धेः यदुक्तं वीतावीतौ न पृथक् प्रतिपत्तिहेतू इति तत्संमूढेनोक्तम्।

हेतुर्विपक्षाद्विशेष इत्यन्ये—अन्ये त्वन्यथा लक्षणं व्याचक्षते हेतुर्विपक्षाद्विशेष इति। यदि पुनरेतावन्मात्रमुच्यते हेतुर्विशेष इति ? किं स्यात्, विशेषमात्रं हेतुः स्यात् साधर्म्यमात्रनिराकरणं च स्यात् साधर्म्यमात्रनिराकरणे विशेषमात्रपरिग्रहे च इष्टानिष्टमङ्गः इति। अतोऽनिष्टहेतुनिराक्रियायै विपक्षग्रहणम्(१) विपक्षाद्यो विशेषः स हेतुः। विपक्षाद्विशेषो हेतुरित्येतावति चोच्यमाने विपक्षाद्विशेषमात्रस्य हेतुत्वं स चानेकभेदः तन्निवृत्त्यर्थं विपक्षादेवेत्यवधार्यते। अवधारणे चैतस्मिन् विपक्षैकदेशवृत्तिरेकोऽनुपपद्यते गौर्विषाणित्वात् स हि विपक्षादेव विशेष इति नायमनेनावधारणेन निराक्रियत इति तन्निराक्रियायै द्वितीयमवधारणं विशेष एव च विपक्षान्न त्वयं विशेष एव विपक्षैकदेशवृत्तित्वात् सामान्यमपि। तदेवमाभ्यामवधारणाभ्यामन्वयव्यतिरेकी त्रिलक्षणो हेतुर्लभ्यत इति।

सत्यमेकस्त्रिलक्षणो हेतुर्लभ्यते समानपक्षैकदेशवृत्तिश्च एकस्त्रिलक्षण एव निराक्रियत इति। कथमिति। आद्येनावधारणेन विपक्षादेव यो विशेषः स हेतुरिति ब्रुवता यस्तुल्यैकदेशवृत्तिः स निवर्तितो भवति। न ह्ययं विपक्षादेव विशेषः किन्तु

(१) विपक्षादवधारणमिति ३ पु० पा०।

सपक्षैकदेशादपीति । विपक्षैकदेशवृत्तिप्रतिषेधात् समानपक्षाद्यो विशेष एव स न हेतुरित्युक्तम्भवति यथाऽश्वोऽयं विषाणित्वात् न पुनरयं प्रयत्नानन्तरीयकत्वादिर्विशेष एव न भवति अपि पक्षैकदेशवृत्तित्वात्सामान्यमपीति । यद्येवं विपक्षादेव यो- विशेषः स हेतुरित्येतदवधारणं बाधितं भवति । न चायं प्रयत्नानन्तरीयकत्वादिर्विपक्षादेव विशेषः किन्तु तत्तुल्यैकदे- शादपि । अथाश्रूयमाणेनार्थे(१)नावधारणे ऽर्थवती । एवञ्च सति तुल्यैकदेशवृत्तिवत् साध्यैकदेशवृत्तेरपि हेतुत्वप्रसङ्गः येनैव सा- मर्थ्येन तत्तुल्यैकदेशवृत्तिर्लभ्यते तेनैव सामर्थ्येनानुमेयैकदेश- वृत्तिरपि हेतुः प्राप्तः । यथाऽनित्याः परमाणवो गन्धवत्त्वादिति । ते एतेऽवधारणे यदि तावद्यथाश्रुते भवतस्तत इष्टः प्रयत्नानन्तरी- यकत्वादिर्न हेतुः । अथान्यथा श्रूयते अन्यथा प्रकल्प्यते अभि- प्रेतार्थसिद्ध्यर्थं तथाप्यभिप्रेतप्राप्तिवदनिष्टोऽपि गन्धवत्त्वादिर्ल- भ्यते इति उभयं च लक्षणदोषः अभिप्रेतहानिरानिष्टप्रसङ्गश्च । नैष दोषः वृत्तौ विशेषितत्वात्–अनिष्टस्य गन्धवत्त्वादेः प्राप्तिरि- त्यदोषः यस्माद्वृत्तावाह । यो धर्मः पक्षस्येति अनेन चाक्षुषत्वादिः पक्षासम्भवी निराक्रियते पक्षैकदेशवृत्तिस्तु कथम्? न ह्यसौ पक्षधर्मो न भवति तथा विपक्षैकदेशवृत्तिर्न विपक्षस्य न धर्म इति तस्मादन्यथा निराकरणे यत्नः कर्त्तव्य इति । न कर्त्त- व्योऽवधारणान्निवृत्तेः–अवधारणादेकदेशवृत्तिर्निवर्त्तिष्यते । किं पुनरवधार्यते किं धर्म एव पक्षस्य उत पक्षस्यैव धर्म इति । अस्तु तावद्धर्म एव पक्षस्येति । किं पुनरस्यावधारणस्य सामर्थ्यं ? किमनेन सम्भवो ज्ञाप्यते, उतासम्भवो व्यावर्त्यते, उभयथापि ना- वधारणस्य सामर्थ्यमस्ति सम्भवज्ञप्तेरसम्भवनिवृत्तेश्चावधारण-

(१) अथाश्रूयमाणकेनार्थेन इति २ पु० पा० ।

मन्तरेणाप्यवगतेः । न चैकदेशवृत्तिर्निराक्रियत इति व्यर्थमवधारणम् । अथ पुनर्व्याप्तिरस्यावधारणस्यार्थः धर्म एव पक्षस्येति न पुनरधर्मोऽपि यः पुनः पक्षैकदेशवृत्तिरसावधर्मोऽपि । सत्यमनेनैकदेशवृत्तिर्निराक्रियत इति । एतस्मिन्नप्येकं सन्धित्सत इदमन्यत् प्रच्यवते । भवत्वेकदेशवृत्तेर्निराकरणं सपक्षे सिद्धे एतत्पदं किमर्थमारभ्यत इति । कथं पुनरिदमनारभ्यं यस्माद् व्याप्त्यर्थेनावधारणेन चरितार्थत्वात् । धर्म एव पक्षस्येति पक्षो नियतो, धर्मोऽनियतः तस्यानियतस्य व्याप्त्यतिव्याप्तिभ्यां तत्तुल्यविपक्षगतिः तत्र विपक्षे नास्तीति प्रसक्तस्य प्रतिषेधो भवतु, सपक्षे सिद्ध इत्येतत्पदं माभूत् । अथ पुनरिदमवधारण(१)मन्यथा क्रियते पक्षस्यैवेति । एवमप्यनन्तरे द्वे अपि पदे सपक्षे सिद्धो विपक्षे नास्तीति च बाधिते भवतः । कथं? सपक्षे सिद्ध इत्येतदवधारणार्थबाधितम् पक्षस्यैव धर्मः सपक्षे सिद्ध इति । न हि लोक एवं प्रकाराणि वाक्यानि प्रवर्तन्ते देवदत्तमेव भोजय यज्ञदत्तं च । उत्तरं तु पदं विपक्षे नास्तीति गम्यमानत्वादकार्यं । केन गम्यमानत्वादिति । अवधारणेन पक्षस्यैव धर्मः सामान्यस्येति गम्यत एव इति विपक्षे नास्तीत्येतन्न कर्तव्यमिति । न च पक्षैकदेशवृत्तिर्निराक्रियत इति यदर्थमवधारणं स एवार्थो हीयत इति । अथ पुनः सपक्षे सिद्ध इत्येतदपि पदमवधारणार्थमेवारभ्यते सपक्ष एव सिद्धः सिद्ध एव सपक्ष इति । किं पुनरस्मिन् पदेऽवधारणेन लभ्यते यदि सम्भवः सोऽनवधारितोऽपि गम्यते सपक्षे सिद्धः । अथ व्याप्तिः तज्जातीयस्यैकदेशवृत्तिरहेतुरिति प्राप्तम् । अथ सपक्ष एव सिद्ध इति तथापि पूर्वोत्तरे पदे व्याहते भवतः पक्षस्य धर्मो विपक्षे नास्तीति अधारणार्थबाधितत्वात् पूर्वमनारभ्यं गम्यमानत्वादुत्तरमपि । अथ

(१) अवधारणाभ्यां—पा० २ पु० ।

विपक्षे नास्तीत्येतदप्यवधारणार्थमेवेति । अत्रापि किमवधार्यते विपक्ष एव नास्तीति नास्त्येव विपक्ष इति । यदि विपक्ष एव नास्ति तदा गौर्विषाणित्वादिति हेतुः प्राप्तः स हि विपक्ष एव नास्तीति । अथ विपक्षे नास्त्येवेति न पुनर्मध्यमस्य पदस्यानारम्भः तत्र पूर्वपदं व्याप्त्यर्थं उत्तरपदं विपक्षैकदेशवृत्तिप्रतिषेधार्थम् । अथ सपक्षे सिद्ध इत्येतत्पदं किमर्थमारभ्यत इति । यदि सम्भवार्थं व्याप्त्यर्थेनाद्यावधारणेन(१) सम्भवो लभ्यत इति व्यर्थम् । तदेतस्मिन् लक्षणे महत्त्वया विचार्यमाणे ऽनिष्टहेतूपनिपातो वा इष्टहेतुपरित्यागो वाभिप्रेतग्रन्थहानिर्वेति दोषाः। हेतुर्विपक्षाद्विशेष इति च यदा सौत्रान्तिकपक्षमाश्रित्य लक्षणं विचार्यते तदा विपक्षासम्भवाद्धेतुर्विपक्षाद्विशेष इति विपक्षार्थो वक्तव्यः न चामाति विपक्षार्थं पश्याम इति । न चामाति पञ्चम्याः प्रयोगः सम्भवति इति विपक्षे नास्तीति सप्तम्यर्थो वक्तव्यः विपक्षासम्भवे सति पक्षतज्जातीयव्यापकत्वात् कृतकत्वादेर्विशेषोऽर्थश्चिन्त्यः । कृतकत्वादिति (तदा)साधारणत्वात् सामान्यं न विशेष इति । तदेतल्लक्षणं स्वसिद्धान्तेनासङ्गतत्वादलक्षणमिति । यदपि हेतुवार्त्तिकं ब्रुवाणेनोक्तम्(२) सप्तिकासम्भवे षट्प्रतिषेधादेकाद्विपदपर्युदासेन त्रिलक्षणो हेतुरिति । एतदप्ययुक्तम् । द्विपदलक्षणयुक्तयोर्हेतुत्वात्— तत्र किल सप्तिका सम्भवति पक्षस्यैव धर्मः समान एव सिद्धः विपक्ष एव नास्ति । पक्षस्य धर्मः समाने च सिद्धः पक्षस्य धर्मो विपक्षे नास्ति । समान एव च सिद्धः विपक्षे नास्ति, पक्षस्य धर्मः समाने च सिद्धो वि-

---

(१) आद्यवधारणेनेति—पा० २ पु० ।

(२) हेतुवार्त्तिकं—पा० २ पु० । वार्त्तिकं कुर्वाणेनेति तु महाभाष्ये गोनर्दीयस्त्वाहेतिवदित्यनुमीयते विस्तरस्तु भूमिकायाम् ।

पक्षे च नास्तीति । तदेवं सन्निकासम्भवे सति पदप्रतिषेधमुक्त्वा यदयं त्रिपदपरिग्रहेण त्रिलक्षणस्य हेतुतां शास्ति तेनैकाद्विद्विपर्युदासं ज्ञापयतीति । तच्च नैवम् । द्विलक्षणयुक्तयोर्हेतुत्वादिति अनभ्युपगताऽनित्यपक्षस्य कृतकत्वादित्ययं द्वाभ्यां लक्षणाभ्यां युज्यते प्रयत्नानन्तरीयकत्वादिति चानयोर्हेतुभावो न स्यात् । यश्चायं व्यतिरेकी हेतुः नेदं निरात्मकं जीवच्छरीरं अप्राणादिमत्त्वप्रसङ्गादित्येवमादिः स न हेतुः स्यात् द्विपदयोगादिति । तस्माद्धेतुर्विपक्षाद्विशेष इत्येतल्लक्षणं विचार्यमाणमनभिमतं वा हेतुमापादयति इष्टं वा बाधते ग्रन्थं वा निराकरोति शास्त्रं बाधत इति ।

"तत्र यः सन् सजातीये द्वेधा चासँस्तदत्यय" इति । अन्यनेन(१)--सन् सजातीये द्वेधा चासँस्तदत्यय इत्यसपक्षे नास्ति । एतावता च किल लक्षणेन त्रिलक्षणो हेतुर्लभ्यत इति । यथाश्रुति न लभ्यते । यदि तावदेतल्लक्षणं यथाश्रुति भवति पक्षे(२) विद्यत इति केनैतल्लभ्यते इति । ननु चोक्तं हेतुः तदाभासो वा प्रायः पक्षधर्म एव भवति । उक्तमेतत्र पुनरनेन पक्षधर्मो हेतुरिति लभ्यते, किं त्वपक्षधर्मो न हेतुः न हेत्वाभास इति । अथाप्यर्थतो लभ्येतापक्षधर्मा हेतुर्न हेतुर्न हेत्वाभास इत्ययं यदि वाक्यार्थो भवति अर्थाद् गम्यते हेतुर्हेत्वाभासश्च पक्षधर्म इति । सत्यमर्थात् पक्षधर्मो गम्यते न तु व्यापको नियतो लभ्यत इति । अपक्षधर्मनिवृत्तिमात्रत्वेन सम्भवमात्रं लभ्यते इति । तच्च द्वेधा व्यापकमव्यापकं च ।

(१) इत्यन्ये सन् इति- पा० २ पु० ।

(२) विपक्षे इति- पा० २ पु० ।

तत्राव्यापकोऽनिष्टो हेतुः प्राप्तः। न प्राप्तः पक्षधर्म एवे-त्यभिधानात् यः पक्षस्य धर्म एव स हेतुः प्राप्तः न त्वयं पक्षधर्म एव एकदेशवृत्तित्वादिति। नावधारणस्यान्यार्थत्वात्—अन्यार्थमवधारणं भवन्तः कल्पयन्ति। किमर्थं? हेतुहेत्वाभास-नियमज्ञापनार्थम्। तदवधारणमन्यार्थं सत् कथमव्यापकं नि-वर्तयिष्यति। अथोभयकारि भवत्यव्यापकनिवृत्त्यर्थं हेतुहेत्वाभा-सनियमज्ञापनार्थं च तथापि सन्सजातीये द्वेधा चेत्यकरणी-यम्। कथम्, व्याप्त्यर्थेनावधारणेन पक्षोऽपि नियतो धर्मश्च नियत इति। अनियतस्य व्याप्त्यव्याप्तिभ्यां धर्मस्य द्वौ राशी शिष्यमाणौ सजातीयस्तदत्ययश्च तत्रातिप्रसक्तेरसँस्तद-त्यय इति युक्तम्। सन् सजातीय इति किमर्थम्। यदि सम्भवार्थं तन्न। अनियमात्—व्याप्त्यव्याप्त्योः सम्भवो गम्यत इति किमनेन सन् सजातीय इति। द्वेधा चेति सर्वथा न व-क्तव्यम्। इदं तावत् गम्यमानत्वात् सन् सजातीय इति न कर्तव्यम्। स्वच्छन्देन व्याप्त्यव्याप्त्योः सामान्येनाभि-धानात् द्वेधा चेति प्रमत्तवाक्यम्। अथ मन्येत सन् सजातीय इत्यवधारणार्थमारभ्यत इति? अवधारणाऽर्थो युक्त आरम्भः अवधारणं न युक्तम्। कथमिति? यदि ताव-देवमवधार्यते सन्नेव सजातीय इति? प्रयत्नानन्तरीयकत्वादिस्तेन हेतुः यस्मात् प्रयत्नानन्तरीयकत्वादिः सन्नसन्नपि द्विधा चेति एतदवधारणार्थबाधितम्। न हि भवति ब्राह्मणमेव भोजय क्षत्रियं चेति। अथ सजातीय एव सन्नित्यवधार्यते तथापि पूर्वोत्तरे बाधिते भवतः। कथम्। एकमवधारणार्थ-बाधितं एकं गम्यमानत्वात्। अथ पुनर्द्वेधा चेत्यवधा-रणार्थम्? अत्रापि किमवधार्यते किं सजातीय एव द्विधा

द्विधैव सजातीय इति । यदि तावत् सजातीय एव द्विधा नान्यत्र पक्षे(१) तदत्यये तद्द्विधेत्युक्तं भवति । यद्येवं सन् सजातीय इति न कर्त्तव्यम्—प्राप्त्यर्थेनावधारणेनाऽऽग्रपदे सजातीये सम्भवस्योक्तत्वात् । द्विधा चेत्यन्यपदं द्विधा निवृत्तिपरत्वात् द्विधा चेत्यभिधानात् सम्भवो गम्यत इति सन् सजातीय इति सर्वथा न वक्तव्यम् । सजातीय एव द्विधा चेत्यनेनैवावधारणेन पक्षवृत्तिर्लभ्यते इति धर्म एव पक्षस्येति व्याप्त्यर्थमवधारणमयुक्तम् । अथमाभूत् सर्वपदावधारणव्याघात इति नावधारणं तथापि मध्यमे द्वे पदे अपि न कर्तव्ये । सोऽयं गृहप्रवेशाक्षितारकानिर्गमन्याय इति । अथ पुनर्द्विधैव सजातीय इति । तथापि कृतकत्वादिर्न हेतुः न ह्यसौ सजातीये द्विधैव । त्रिलक्षणं च हेतुं ब्रुवाणेन स्वसिद्धान्तोपात्तयोर्द्विपदयुक्तयोरहेतुत्वमिति प्राप्तम् । व्यतिरेकी च न हेतुरिति प्राप्तम् । नैव हेतुरिति चेन् कुतस्तस्य हेतुत्वे यत्न इत्यनुत्तरम् । अथ पुनरवधारणानि न क्रियन्ते तथापि पक्षैकदेशवृत्तिरनैकान्तिकश्चानुपक्त इति ।

एतेन ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरिति प्रत्युक्तम् । अनेनाव्यापकादिर्लभ्यत इति उक्तोत्तरमेतदपीति । असँस्तदत्यय इत्येतदपि विपक्षे नास्तीत्यनेन समानमिति ।

तादृगविनाभाविधर्मोपदर्शनं हेतुरित्यपरे—तादृशा विना न भवतीत्यनेन किल द्वयं लभ्यते विपक्षासत्त्वं तादृशासत्त्वं च उपदर्शनग्रहणेन किल पक्षे सत्त्वं लभ्यत इत्येवं त्रिलक्षणप्रविभावितात्मा पक्षो लभ्यत इति । यत्तावत्तादृगविनाभाविग्रहणाद्विपक्षेऽसत्त्वं तादृक्सत्त्वं च लभ्यत इति तत् न युक्तम् ।

---

(१) न इत्यधिकम् क्वचित् ।

तादृशाविना न भवतीति एतस्माद्विपक्षेऽसत्त्वं गम्यते तादृशे तु सम्भव इत्येतदेव कुतः न ह्ययं नियमो यो विपक्षे नास्ति सोऽवश्यं तज्जातीयेऽस्तीति। एवं च श्रावणत्वाद्यपि हेतुः प्राप्तः श्रावणत्वाद्यपि तादृशाविना न भवतीति। भवतु तावत्तादृगविनाभाविग्रहणे तत्तज्जातीये सम्भवः स पुनः पक्षे सम्भवतीत्येतत् कुतः। ननूपदर्शनग्रहणादेतल्लभ्यते? न तल्लभ्यते उपदर्शनग्रहणस्याभिधानार्थत्वात् उपदर्शनग्रहणमभिधानार्थम्। उपदर्श्यतेऽनेनेति न पुनरस्यैतत् सामर्थ्यमस्ति पक्षे ऽन्यत्र चेति। क पुनरन्यत्र स्यादत्र सम्भवः क चास्य सम्भवः तज्जातीये। तस्मादेतदुक्तम्भवति तज्जातीयाविनाभाविनः तज्जातीय एवाभिधानहेतुरिति। एवं च ते चाक्षुषत्वं हेतुर्भवति। न हि चाक्षुषत्वमनित्यत्वेन विनाभावि। उपेत्य वा भवतु तादृगविनाभाविनो धर्मस्य पक्ष उपदर्शनमिति। तथापि पक्षैकदेशवृत्तिं केन निराकरोषि। उपदर्शनग्रहणेनेति चेत्। न। तस्य सम्भवमात्रज्ञापनार्थत्वात्। अथ मन्यसे उपदर्शनग्रहणेन व्याप्तिर्लभ्यत इति न युक्तम् उपदर्शनग्रहणस्य सम्भवमात्रज्ञापनार्थत्वात् उपदर्शनग्रहणेन सम्भवमात्रं ज्ञाप्यते पक्षे स पुनर्व्यापक इति न युक्तम्। अथात्रापि केनचिन्न्यायेनावधारणानि क्रियेरन् तान्यव्यापकहेतुनिराकरणेन ऽसमर्थानीति पूर्ववत् प्रसङ्गः। यच्चेदमुदाहरणमेतस्मिन् प्रयत्नानन्तरीयकत्वादिरनित्यत्वस्याग्नेर्धूम इति। तत्र धूमस्याग्नेरप्रतिपादक इत्युक्तम्। प्रयत्नानन्तरीयकत्वमप्यहेतुः कुतः प्रयत्नानन्तरीयकत्वस्य पक्षावृत्तित्वात् न हि प्रयत्नानन्तरीयकत्वं शब्दधर्मः न हि कश्चिच्छब्दः प्रयत्नानन्तरीयकोऽस्ति संयोगविभागयोनित्वाच्छब्दस्य। अथ पारम्पर्यक्रमेण प्रयत्नः शब्द-

कारणम् पारम्पर्येण सर्वेऽर्थाः शब्दकारणमिति विशेषणमयुक्तं प्रयत्नानन्तरीयकत्वादिति अनित्यः शब्दो यत्नस्तदुत्पत्तेरिति वक्तव्यम्। यच्चेदं प्रयत्नानन्तरीयकत्वं शब्दस्यानित्यत्वे कारणं भावाभिधानेनोच्यते किं पुनस्तत् किं जन्म उतोपलब्धिरिति। यदि तावज्जन्म तन्नैव समर्थमिति प्रयत्नानन्तरीयकत्वग्रहणं व्यर्थम्। न हि भवत्यनित्यः शब्दो देवदत्तकृतकत्वादिति। अत एवं वक्तव्यं जन्मवत्त्वादिति। यदि चेदं जन्म व्यभिचारि भवेत् ततः प्रयत्नानन्तरीयकत्वग्रहणमर्थवत्। किं कारणम्? व्यभिचारिणि विशेषणान्यर्थवन्ति भवन्ति। अथोपलब्धिः प्रयत्नानन्तरीयकत्वादित्यनेन भावाभिधानेनोच्यते एवमप्युपलब्धेरेव सामर्थ्यमस्तीति व्यर्थं विशेषणम्। न ह्युपलभ्यमानं द्वेधा भवति नित्यमनित्यं प्रयत्नानन्तरीयकमन्यथा चेति। अथ ब्रूषे प्रयत्नानन्तरमुपलभ्यमानं घटत्वं नित्यमिति त्वयैवैतद्व्यभिचारितमिति शब्दानित्यत्वानुमितौ प्रयत्नानन्तरीयकत्वं न हेतुः अव्यापकं च प्रयत्नानन्तरीयकत्वं शब्दराशेः पक्षीकृतत्वात्। अथ शब्दविशेषं पक्षीकृत्योच्यते तत्राप्याद्य एव प्रयत्नानन्तरीयकत्वं सम्भवति न द्वितीयादिष्विति अव्यापकत्वमनिवृत्तम्। अथ यः प्रयत्नानन्तरीयकः सोऽनित्य इति तथाप्यन्यो हेतुर्वक्तव्यः। हेतोः पक्षविशेषणत्वेनोपात्तत्वात्। यदप्युक्तमप्रयत्नानन्तरीयकस्य त्रयी गतिरिति किञ्चिन्नित्यमाकाशाद्येकेषां किञ्चिदनित्यं विद्युदादि किञ्चिदसदेवाकाशकुसुमादि। इदं महानैयायिकत्वं महात्मादित्वं च यत्तावदसदप्रयत्नानन्तरीयकं च किञ्चिच्चेति चित्रम्। नित्यं तु किञ्चिद्भवति न पुनरप्रयत्नानन्तरीयकत्वम्। न ह्याकाशं न प्रयत्नानन्तरीयकमिति शक्यं वक्तुम् अप्रयत्नानन्तरीयकस्य जन्म-

विशेषितत्वात् न चाकाशस्य जन्मास्ति तस्मान्न प्रयत्ना-
नन्तरीयकं नाप्यप्रयत्नानन्तरीयकमाकाशमिति । एतेनाभावो
व्याख्यातः—अभावेऽप्येवमेवेति । तदेवमेतानि न हेतुलक्षणानि
सम्भवन्तीदमेवार्षं हेतुलक्षणं न्याय्यमिति ॥

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ॥३६॥

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति सू-
त्रम् । अस्योदाहरणोपलक्षणमर्थः । साध्यस्य साधर्म्यं सा-
ध्येन समानधर्मता । अत्रापि साध्येनैव साधर्म्यं न पुनरसा-
ध्येनापि साधर्म्यमेव साध्येन न पुनर्वैधर्म्यमपि यस्मात् साध्य-
साधर्म्यात् तद्धर्मभावी भवति । किं कुतश्चित् साध्यसा-
धर्म्यात् तद्धर्मभावी न भवति ? न भवत्यपि यथा अमू-
र्त्तत्वादेः कर्मणः तस्मात् साध्यसाधर्म्याद्यत्र तद्धर्मो भवति स
भवति तद्धर्मभावी सोऽयं दृष्टान्तः साध्यसाधर्म्यात् तद्धर्म-
भावित्वेन विशेषणेन युज्यमान उदाहरणं भवति उदाह्रियते-
ऽनेन धर्मयोः साध्यसाधनभावः इत्युदाहरणम् । ननु च क-
रणकारकपरिग्रहाद्वचनमुदाहरणं दृष्टान्तश्चार्थो न चानयोः
सामानाधिकरण्यं युज्यते न हि विषाणादिमदित्यभिधानं गवा
समानाधिकरणं भवति । नैष दोषः वचनविशेषणत्वेन दृष्टान्त-
स्योपादानान्न स्वतन्त्रो दृष्टान्त उदाहरणम् । किन्तु साध्य-
साधर्म्यात् तद्धर्मभावित्वे सति अभिधीयमान इति । तद्धर्म-
भावी तस्य धर्मः तद्धर्मः तस्येति साध्यस्य । साध्यञ्च
द्वेधा भवति धर्मो धर्मी च । एकदा धर्मो विशेषणत्वेनान्यदा
धर्मी विशेषणत्वेनेति तस्येति धर्मिग्रहणं युक्तम् । न पृथक्
धर्मस्य ग्रहणात् यस्माद्धर्मिणो धर्मा उत्पत्तिधर्मकत्वादयः न
धर्मस्य, धर्मे च साध्यमुदाहरणसाधर्म्यादिति व्याघातः नाहि धर्म-

स्योदाहरणेन किञ्चित्साधर्म्यं किन्तु धर्मिणः साध्यसाधर्म्यंचोदाहरणस्य धर्म्यंश एव साध्ये चोपसंहारो धर्मिण्येव तस्माद्धर्मी साध्य इति तस्य धर्मिणः साध्यस्य यो धर्मः साध्यः स यस्मिन् दृष्टान्ते भवति विद्यते स दृष्टान्त उदाहरणम् । उदाहरणं स्थाल्यादिद्रव्यमिति तदुत्पत्तिधर्मकं चानित्यं दृष्टमिति ॥

तद्विपर्ययाद्वा विपरीतम् ॥ ३७ ॥

तद्विपर्ययाद्वा विपरीतम् । साध्यवैधर्म्यादतद्धर्मभावी दृष्टान्त उदाहरणमिति । उदाहरणमनित्यहेतौ द्रव्यमिति ।

अन्ये तु साध्यसाधर्म्यात् तद्धर्मभावित्वं दृष्टान्तस्येति सूत्रं पठन्ति । तेषां त्वयमभिप्रायः दृष्टान्तोदाहरणयोर्माभूदैक्यमिति । किं पुनस्तद्धर्मभावित्वं साध्यसाधनाभ्यां योगः साध्यसाधनयोगे च तद्धर्मभावी भवति अतो भावाभिधानेन साध्यसाधनाभ्यां योगोऽभिधीयत इति । एतच्च सूत्रमपरे दूषयन्ति । अस्माकन्तु नायं सूत्रपाठः तस्मान्नायं दोष इति । एतस्मिन्नपि पाठे किल भाविग्रहणमनर्थकम् । कस्मात् ? सर्वावयवानां साध्यधर्मभावित्वात् । यस्मात् किल सर्वावयवाः साध्यधर्मभाविनो भवन्ति भावयन्ति गमयन्तीति नायं सूत्रार्थ इति ।

अन्ये तु तद्धर्मभावीत्येतत्पदमन्यथा निराकुर्वन्ति तद्धर्मभावी भवन्नुष्णभोजिन्यायेन(१) वा भवेत् दण्डिन्यायेन वा भवेत् । तद्यदि तावदुष्णभोजिन्यायेन उष्णं भोक्तुं शीलमस्येत्युष्णभोजी तद्धर्मं वा भावयितुं शीलमस्येति तद्धर्मभावी । अत्रापि भावयितुं गमयितुं यावदुक्तं

(१) उष्णभोजीति क्वचित् ।

स्यादिति नायं सूत्रार्थ इति न किञ्चिदेतत् । दण्डिन्यायस्तु दण्डो यस्यास्तीति स दण्डी तद्धर्मभावो यस्यास्ति स भवति तद्धर्मभावी । अत्र भाविग्रहणमनर्थकं तद्धर्मभावीति । कथमिति ? तद्धर्मश्चासौ भावश्चेति तद्धर्मभावः स यस्यास्ति स भवति तद्धर्मभावी । एवं सति विशेष्यविशेषणभावानुपपत्तेः तद्धर्मभावीति युक्तम् । न हि तद्धर्मश्च स्याद्भावश्च स्यात्ततो विशेषणविशेष्यभावः समर्थितः स्यादिति । अतस्तद्धर्मीति किल वक्तव्यम् । न वक्तव्यम् । तद्धर्माणामुभयथाभावात्—उभयथा भवन्ति धर्मा विधीयमानाः प्रतिषिध्यमानाश्च । तत्रान्वयिनि विधीयमानधर्मवान् दृष्टान्तउदाहरणम् यथा स्थाल्यामुत्पत्तिधर्मकत्वमनित्यत्वं च विद्यमानौ धर्मौविति । तस्मात्तद्धर्मश्चासौ भावश्चेति युक्तं सामानाधिकरण्यम् । यत् पुनरेतत्तद्धर्मीति वक्तव्यम् एतदपि न परिज्ञातम् । न हि बहुव्रीहौ पुनर्मत्वर्थीयो लभ्यत इति । अथावश्यं वयं शिक्षयितव्याः । तत एव च तद्धर्मेति वक्तव्यमिति । सन्ति चैवं वादिनो येषां कृतकत्वानित्यत्वेऽभाव इति । तन्निराकरणार्थं चेदं वक्तव्यं तद्धर्मश्चासौ भावश्चेति ।

तदेतस्मिन्नवयवत्रये एवं लक्षणेनोपपादिते तेषां त्रयो दुर्विहिता इति । अनेन वाक्येन महानैयायिकत्वमात्मनः ख्यापितं भवति ।

तथा सिद्धो दृष्टान्त इत्यन्ये । कः पुनरस्यार्थः यथा साध्यः साधयितुमिष्टस्तथायमसिद्धोऽनित्यत्वेन यथा च स एव साध्योविशिष्टः प्रत्ययभेदभेदित्वेन तथा यः सिद्धः स दृष्टान्तः साध्यसाधनवानिति । अत्र विस्फूर्जतापि स्वसिद्धान्तमत्यजता कृतकत्वानित्यत्वयोः न शक्यः सम्बन्धो दर्शयितुं कृ-

तकत्वानित्यत्वयोः कालभेदाद्वस्तुव्यवधानाच्च । अन्यदा कृतकत्वमन्यदा चानित्यत्वमिति । यदा च वस्तु न तदा प्रागूप्रध्वंसाभावौ स्त इति । एतेन तयोः सम्बन्धिनिदर्शनं दृष्टान्त इति प्रत्युक्तम् ।

"साध्येनानुगमो हेतोः साध्याभावे च नास्तितेति" च ॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ ३८ ॥

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः । एवं चायं कृतक इति । यथा तथेति प्रतिबिम्बनार्थम् । किं पुनरत्र प्रति बिम्बनम् ? दृष्टान्तगतस्य धर्मस्याव्यभिचारित्वे सिद्धे तेन साध्यगतस्य तुल्यधर्मता एवं चायं कृतक इति । साध्ये वा सम्भव उपनयार्थः । ननु च कृतकत्वादित्यनेन सम्भव उक्तः ? नोक्तः साध्यसाधनभावनिर्देशात्—साध्यसाधनभावमात्रनिर्देशः कृतः कृतकत्वादनित्यः शब्दो भवति । तत्र पुनः शब्दे कृतकत्वमस्ति नास्तीत्युपनयेन सम्भवो गम्यते अस्ति च शब्दे कृतकत्वमिति । स यदा साधर्म्येणोदाहरणं तदा तथेति, यदा वैधर्म्येण तदा न तथेति ॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥३९॥

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् । प्रतिज्ञायाः पुनर्वचनमिति । प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ साध्यविपरीतप्रसङ्गप्रतिषेधार्थं यत् पुनरभिधानं तत् निगमनमिति । एतस्मिन् सूत्रार्थे परस्यावकाशो नास्तीति । अभ्युपेत्य तद्दोषनिराचिकीर्षया वाक्यमुपक्षिप्यते—

"उपनयनिगमने नावयवान्तरे अर्थाविशेषात्" । इति

इदं तावद्वाक्यं यथाश्रुति न केनचिदर्थेन सम्बध्य-

ते । अथ हेतूपनयावेकत्वेन पक्षीकृत्यार्थाविशेषादिति हेतुः ? स विपक्षवृत्तित्वाद्विपर्ययहेतुरर्थाविशेषस्यैकत्वे ऽदर्शनादिति नानात्वे च दर्शनादिति । यथा बहूनां घटानामेकोऽर्थो जलाहरणादिर्न चैकत्वमिति । अथैकप्रयोजनकत्वेन पक्षीकृत्य ब्रूयादेकत्वमेकप्रयोजनत्वमिति ? तथापि हेतुर्नास्ति प्रतिज्ञार्थेनाक्षिप्तत्वात् हेतूपनययोरेकार्थत्वमिति प्रतिज्ञार्थः । अर्थाविशेषादिति हेत्वर्थोऽपि स एव । अन्यश्च हेत्वर्थः अन्यश्चोपनयार्थ इत्यसिद्धोऽप्ययं हेतुस्तद्वर्णितम् ।

"पक्षधर्मत्वसम्बन्धसाध्योक्तेरन्यवर्जनम्" ।

इत्येतदनेनैव प्रत्युक्तम् । यदपि 'यथा तथेत्युपसंहारे कृते तथेत्यनेन शब्देन सर्वसामान्यं वा कृतकत्वसामान्यं वाऽभिधीयेत कृतकत्वविशेषो वा, सर्वसामान्यं तावन्न युक्तम् तथेतिव्यपदेशाशक्यत्वादिति । कृतकत्वविशेषोऽपि न युक्तः अन्यथा शब्दस्य कृतकत्वात् । परिशेषात् कृतकत्वसामान्यं तच्च हेतुनैवोक्तमिति' । तदप्ययुक्तम् । उपनयस्योपमानार्थत्वात्—उपमानार्थ उपनय इति, तच्चोपमानं न सर्वथा साध्यसाधनभावमाश्रित्य प्रवर्तत इति यत्किञ्चिदेतत् । कृतकत्वसामान्यं तु शब्दसन्निधावभिधीयत इति चित्रमिदम् । कृतकत्वं खलु शब्दसन्निधावभिधीयत इति शब्देन च विशिष्यमाणं कथं सामान्यं भविष्यति । तस्मात् सामान्यविशेषवान् हेतुरिति गतार्थत्वान्नोपनय इत्यनेन प्रत्युक्तम् । यदप्युक्तं यथा तथेत्युपमानमेतत्, उपमानं चोपनयो न दृष्टान्त इति एतेन निगमनं प्रत्युक्तम् । ते एते वीतावीतवाक्ये स्वतन्त्रे पञ्चावयवे न पुनरेकमन्वयव्यतिरेकि चेति ॥

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ॥ ४० ॥

अविज्ञाततत्त्वे ऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इति सूत्रम् । अस्यार्थः पूर्ववत् । अविज्ञाततत्त्वेऽर्थे इति । यथा सोऽर्थो भवति सोऽस्य तथाभावस्तत्त्वम् । एतस्मिन्नविज्ञाते सामान्यतो ज्ञाते (१) । कुतः पुनरेतत् सामान्यतोऽवगतमिति ? अविज्ञाततत्त्वेऽर्थे इत्यभिधानात्—यस्मादयमाहाविज्ञाततत्त्व इति, तेन ज्ञापयति सामान्यमवगतमिति । यदि पुनः सामान्यमपि नाधिगतं स्यान्न ब्रूयादविज्ञाततत्त्व इति, अविज्ञात इत्येवं ब्रूयादिति।

अविज्ञाततत्त्व इति समासोऽयं न चार्थो गम्यते किमविज्ञातं तत्त्वं येन उताविज्ञातं तत्त्वं यस्येति । कश्चात्र विशेषः ? यद्यविज्ञातं तत्त्वं येन सोऽयमविज्ञातत्त्वः परिच्छेत्ता तस्मिन्नविज्ञाततत्त्वे परिच्छेत्तरि तदवगमार्थमूहस्तर्क इति प्राप्नोति । अथाविज्ञातं तत्त्वं यस्य तदविज्ञाततत्त्वं तस्मिन्नविज्ञाततत्त्व इति ? षष्ठीविग्रहेण युक्तमेतत् । विशेषहेत्वभावान्नार्थाधिगमः नात्र विशेषहेतुरिति किमयं तृतीयाविग्रहेण समास उत षष्ठीविग्रहेणेति। युक्तम् अर्थग्रहणसामर्थ्यात्–यस्मादविज्ञाततत्त्वेऽर्थ इति, अर्थश्चार्यमाणत्वात् कर्म, तेन ज्ञापयति षष्ठीसमासोऽयं न तृतीयाविग्रह इति । अर्थग्रहणमन्तरेणापि सामान्यतोऽवगतेरविज्ञातं तत्त्वं यस्येत्यनुक्तेऽप्यर्थे गम्यत एवैतदर्थ इति । एवमपि समासे सन्देहतादवस्थ्यम् । माभूत् समासो वाक्यमेवास्तु अविज्ञातं तत्त्वमस्येति । भवत्येवाभीष्टार्थप्राप्तिः लाघवार्थं तु समासकरणम् । अनुक्तेऽप्यर्थे सामर्थ्याद् गम्यते अविज्ञातं तत्त्वमस्येति । अत्रोक्तं सन्देह एवं स्यादिति समस्तानभिधानप्रसङ्गाच्च । यदि च सामर्थ्यमाश्रित्यार्थग्रहणं प्रतिषिध्यते तदेवं युक्तमूहस्तर्क इति, सामर्थ्यतः शेषं गम्यत इति, तस्मादर्थ-

(१) ऽवगम्यते इति २ पु० पा० ।

ग्रहणं ज्ञातृनिराकरणार्थमिति ।

अविज्ञाततत्त्व इति न वक्तव्यं गम्यमानत्वात् कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्क इत्युक्ते गम्यते एतत् अविज्ञातं तत्त्वमस्येति । अत्र तावदुक्तं समस्तानभिधानप्रसङ्गादिति । माभूत् समस्ताभिधानं किं नो बाध्यते । न । बुद्धिधर्मनिराकरणार्थत्वात्—उभयथा खल्वयमूहो भवति विज्ञाततत्त्वेऽविज्ञाततत्त्वे च, तत्र तावद्विज्ञाततत्त्व ऊहः शुश्रूषाश्रवणधारणविज्ञानोहापोहतत्त्वाभिनिवेशा बुद्धिधर्मा इति तत्त्वमवधृतं विजानाति विज्ञातमूहत इति किमुक्तम्भवति । योऽसावर्थः पूर्वमनेन विज्ञातस्तमेवोहत इति पूर्वानुभूतपरिच्छेदक ऊह इत्युच्यते न त्वयं तर्कः । यः पुनरविज्ञाततत्त्वेऽर्थे ऊहः स तर्कः ।

पञ्चम्यभिधानमधिकरणार्था(१)सम्भवादविज्ञाततत्त्वस्यार्थस्येति वक्तव्यम् अविज्ञाततत्त्वोऽर्थो ज्ञायमानः कर्म भवति कर्मणि च षष्ठ्येव ज्यायसी यथा घटस्य विज्ञानमिति । न । विभक्तिव्यत्ययात् । षष्ठीस्थले एषा सप्तमी द्रष्टव्या यथाऽन्यत्र

"इषावयुगपत् संयोगविशेषाः कर्मान्यत्वे हेतवः"(२) ।

इति व्यत्ययः । कस्मात् ? यदि व्यत्ययेन कश्चिदर्थो लभ्यते युक्तो व्यत्ययः यथा तस्मिन्नेव "इषावयुगपत् संयोगविशेषा" इति अधिकरणार्थ इषोरपि येऽवयवास्तेषामपि संयोगविशेषास्तेऽपि कर्मान्यत्वे हेतव इति । न पुनरिह व्यत्ययेन फलं पश्यामः तस्मादयुक्तो विभक्तिव्यत्यय इति । न युक्तः । सामान्याधिगतस्य विशेषज्ञापनार्थ—यस्यैव सामान्यमधिगतं तद्वृत्तिनो विशेषा अभ्यवगन्तव्या

---

(१) पञ्चम्यनभिधानमधिकरणार्था—पा० २ पु० ।

(२) वैशेषिकसूत्रम् ।

इति । ते च विशेषाः संयोगिनः समवायिनश्च भवन्तीति ।

कारणोपपत्तितः प्रमाणोपपत्तितः । उपपत्तिः सम्भवः—सम्भवत्यस्मिन्नर्थे प्रमाणमिति—भवेदयमर्थ इति । उदाहरणं योऽयं ज्ञाता ज्ञातव्यमर्थं जानाति तं तत्त्वतो जानीयेति किमुत्पत्तिधर्मकोऽथानुत्पत्तिधर्म इति । एकतरमनुजानातीति भाष्यम् । अनुत्पत्तिधर्मकेनानेन भवितव्यमिति य ऊहः स तर्क इति । नन्वेतत् तत्त्वज्ञानमेव, किमुच्यते तत्त्वज्ञानार्थमिति । नेदं तत्त्वज्ञानमनवधारणात् न ह्ययमवधारयत्येवमेवेति । किं त्वनुत्पत्तिधर्मकेन ज्ञात्रा भवितव्यमिति प्रमाणविषयमनुजानाति। कथं पुनरयं तत्त्वज्ञानार्थं भवति? प्रमाणविषयविवेचनात् । प्रमाणविषयमनेन विविनक्ति अयमर्थो युक्त इति। प्रमाणानि पुनः प्रवर्तमानानि तर्कविविक्तमर्थं तथाभूतमवगमयन्तीति ।

ऊहः संशयनिर्णयाभ्यां न भिद्यत इति केचित् । अयं किलोहः संशयो वा स्यान्निर्णयो वा ? यदि संशयस्तदा तेन सङ्गृहीतत्वात् पृथक् न पठितव्यः । अथ निर्णयस्तदा तेन सङ्गृहीत इति । अपरे त्वनुमानं तर्क इत्याहुः । हेतुस्तर्को न्यायोऽन्वीक्षा इत्यनुमानमाख्यायत इति । अपरे त्वनुमानमेव तर्कं युक्त्यपेक्षं वर्णयन्ति ।

यत्तावन्निर्णयसंशयाभ्यां नोहो भिद्यत इति । तन्न । प्रत्ययस्वरूपानवबोधात् । अविज्ञाततत्त्वेऽर्थे भवतीति सामान्येनाक्षिप्तो भवान् । सत्यमविज्ञाततत्त्वे भवतीति, न पुनः प्रत्ययस्वरूपं व्यज्ञायि भवता । अनवधारणात्मकः प्रत्ययः संशयः किंस्विदिति । अवधारणात्मकः प्रत्यय एवमिदमिति निर्णयः । अयन्तु संशयात् निर्णयात् । प्रच्युतः कारणोपपत्तिसामर्थ्यात् । संशये करणोपपत्तिरस्ति निर्णयं चाप्राप्तो

विशेषादर्शनाद्विशेषदर्शनान्निर्णयो भवति न चास्मिन् विशेषदर्शनमस्ति। एतेनानुमानं तर्क इत्येतदपि प्रत्युक्तम्। विशेषादर्शनादिति। किं पुनरस्य स्वरूपं? भवेदित्येष प्रत्यय इत्येतस्य स्वरूपमिति। यैरप्यनुमानं युक्त्यपेक्षं तर्क इत्युच्यते तैरप्यनुमानात् तर्कभेदः स्वयं उक्तः। युक्तिः-प्रमाणोपपत्तिः प्रमाणोपपत्तिमपेक्षमाणो यः प्रत्ययः स तर्क इति केवलं सञ्ज्ञाभेदमात्रम्। अथ न प्रमाणोपपत्तिर्युक्तिः? अनुमानं युक्त्यपेक्षमित्यपेक्षासामर्थ्यं वक्तव्यम्। स्वविषयाधिगमे चानुमानं किमपेक्षते। अथेतरप्रमाणापेक्षा युक्तिरित्युच्यते? एवमप्यनुग्रहार्थो वक्तव्यः- कथं प्रत्यक्षागमाभ्यामनुमानमनुगृह्यत इति। अथानुमानस्य प्रत्यक्षागमैकविषयत्वं? तत्रापि कः तर्कः? त्रीण्येतानि प्रमाणविषयतया प्रतिसंहितानीति। भवेत्-अवधारण-प्रत्ययौ भिन्ननिमित्तौ विशेषवत्त्वात् प्रत्यक्षानुमानप्रत्ययवत्। अनुमानं तर्कः लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वात् अनुमानवत्। न। तर्कस्वरूपानवबोधात्-नैव लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षः तर्कः। कथमिति? द्वयस्यानधिगतेः। यत्र द्वयमधिगम्यते धर्मी साधनधर्मश्च तत्रानुमानं प्रवर्त्तते यत्र पुनर्द्धर्मिमात्राधिगतिर्न लिङ्गाधिगतिरस्ति स तर्कविषय इति। तस्मात् लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वमनुपन्नम्(१)। अनुमानं धर्मिगतधर्मोपलब्धौ प्रवर्त्तते न पुनस्तर्कः, तर्कस्त्वन्यगतधर्मदर्शनेनापि प्रवर्त्तते यथा भवितव्यमत्र(२) पुरुषेणेति, यथाऽस्मिन् देशेऽश्वा वाह्यन्त इति अश्ववाहनं न पुरुषधर्मः सोऽयमन्यगतधर्मोपपत्त्या स्थाणुव्यवच्छेदमात्रमूह इति। सोऽयं तर्कः प्रमाणानि सन्धत्त इति प्रमाणसहितो वादेऽपदिष्टः न पुनरयं प्रमाणमपरिच्छेदकत्वादिति॥

(१) अयुक्तमिति २ पु० पा०। (२) मननेति २ पु० पा०।

विमृष्य(१) पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥४१॥

एतस्मिन् तर्कविषये "विमृष्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय" इति सूत्रम् । सम्बन्धोऽर्थश्च पूर्ववदिति । विमृष्येति विमर्षं कृत्वा । पक्षप्रतिपक्षाभ्यां—पक्षशब्देन पक्षविषयं साधनमुच्यते प्रतिपक्षशब्देन पक्षविषयस्य साधनस्योपालम्भः ताभ्यां साधनोपालम्भाभ्यां यदर्थावधारणं स निर्णय इति ।

क पुनरयं नियमः ? किं तावन्निर्णये ? आहोस्वित् ? पक्षप्रतिपक्षाभ्याम् ? अथ विमृष्यैवेति ? । यदि विमृष्य पक्षप्रतिपक्षाभ्यामेव निर्णय इति निर्णये नियम ? इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमित्यस्य व्याघातः । एतेन विमृष्यैवेति प्रत्युक्तम् । अथ पक्षप्रतिपक्षाभ्यां निर्णय एव ? उभयाश्रयो निर्णयः प्राप्नोति । तर्कविषये एव नियमो नान्यत्र, योऽयं तर्कस्य विषय एतस्मिन् तर्कविषये नियमो नान्यत्र,–योऽयं तर्कस्य विषय एतस्मिन् तर्कविषये विमृष्य पक्षप्रतिपक्षाभ्यामेव निर्णयो भवति न पक्षप्रतिपक्षाभ्यामेव निर्णयो विमृष्यैवेति सामान्यनिर्णयलक्षणमेतत् । कुतोऽयं नियमस्तर्कविषय इति ? तर्कस्यानन्तरोद्देशात् तर्कविषय इति नियमः । अन्यथापि निर्णयस्य भावान्न निर्णय इति । अथ निर्णयस्य किं लक्षणम् ? अर्थपरिच्छेदोऽवधारणं निर्णय इति । सोऽयं निर्णयः प्रमाणविषये भवन्नेकशः प्रमाणैः क्रियते संहत्य च, तर्कविषये संहत्यान्यत्रैकश इति । वादे शास्त्रे च विमर्षवर्ज–वादे पक्षप्रतिपक्षाभ्यामेव, न शास्त्रे वादे वा विमर्षोऽस्ति उभयोर्निश्चितत्वात् शास्त्राभ्युपगतपदार्थस्य निश्चितत्वाच्च ।

पक्षप्रतिपक्षशब्देन साधनोपालम्भयोर्ग्रहणमित्ययुक्तं प्रमाणाभावात्—पक्षप्रतिपक्षशब्देन साधनोपालम्भावुच्येते इति किं

---

(१) विमृश्येति क्वचित् ।

प्रमाणम् ? कस्मात् पुनर्यथाश्रुतं न भवति पक्षप्रतिपक्षयोः कर्मत्वात् न च कर्मार्थपरिच्छेदकं परिच्छेद्यत्वात्, तस्मात् पक्षप्रतिपक्षशब्देन परिच्छेदकयोः साधनोपालम्भयोर्ग्रहणम् तयोरककर्मकत्वात् । तयोरेव कस्मान्न ग्रहणमेवं चोक्तम् विमृश्य साधनोपालम्भाभ्यामर्थावधारणं निर्णय इति । एवं सति विस्पष्टोऽर्थो भवति । न च लाघवकृतः कश्चिद्विशेष इति । नैकविषयज्ञापनार्थत्वात्—यद्विषयौ साधनोपालम्भौ तद्विषयो निर्णयः । अन्यथा हि साधनोपालम्भाभ्यां निर्णय इत्युक्ते न ज्ञायते क्व पुनर्निर्णय इति । पक्षप्रतिपक्षशब्दाभ्यां च साधनोपालम्भयोर्ग्रहणं तद्विषयस्य चेति । अर्थग्रहणं तर्हि न कर्तव्यम् गम्यमानत्वात् । केन ? विमृश्य पक्षप्रतिपक्षाभ्यामेवावधारणमित्युक्ते गम्यते ऽर्थस्येति, तस्मादर्थग्रहणं न कर्तव्यम् । न, कर्तव्यं—श्रुतिसामर्थ्यादन्यतरनिर्णयज्ञापनार्थं गम्यमानार्थग्रहणं यत् करोति तेन ज्ञापयत्यन्यतरस्मिन् पक्षे निर्णय इति । पक्षप्रतिपक्षाभ्यामर्थावधारणमित्ययुक्तम् ! कस्मात् ? अधिगतेः नेदं पक्षप्रतिपक्षाभ्यां सहिताभ्यामवधारणं, किं तर्ह्येकस्माद्योऽवतिष्ठत इति । उभाभ्यामेवेत्याह । कथमिति ? उभयनिवृत्तावनिवृत्तो हि विमर्षः उभयावस्थाने चानिवृत्त इति । यदा त्वेकोऽवतिष्ठत एको निवर्तत इति तदा निर्णय इति । अतः संहत्य पक्षप्रतिपक्षौ निर्णयहेतू इति । एतस्मिन् विषये कदा निर्णयो भवति किं प्रथमे उत द्वितीये उत तृतीये इति । सर्वत्र भवत्यर्थस्य तथाभावात् अथवा तृतीय इति युक्तम् । कथमिति । एकस्तावत् साधनेन पक्षमवस्थापयति *द्वितीयः साधनं दृष्ट्वा निवर्तते साधनाभासं वा बुद्ध्वा साधनदोषोद्भिभावयिषया प्रवर्तते तस्मिन्निवर्त्य साधनं ब्रूते । प्रथम*

इदानीं निश्चितं साधनमिति यदि मन्यते न प्रवर्तते । अथ दूषणाभासमिति बुद्ध्यते तदुद्भावनार्थं प्रवर्तते । तन्निवृत्तौ द्वितीयपक्षसाधनमपि निवर्तते । किं कारणम् ? प्रथमपक्षसाधनस्य निर्दोषत्वात्, निर्दोषे च प्रथमपक्षसाधने न द्वितीयस्यावकाश इति निवर्तते द्वितीयः पक्ष इति योऽत्रावतिष्ठते तस्मिन्निर्णयः । सोऽयं निर्णयः सम्भवासम्भवाभ्यां पक्षप्रतिपक्षयोः संहृत्य क्रियते ।

निर्णयोऽनुमानमेवेति केचित्— केचिद्वर्णयन्ति निर्णयोऽनुमानमेव न पदार्थान्तरमिति । न । लिङ्गलिङ्गिसम्बन्धस्मृत्यपेक्षत्वादनुमानस्य, निर्णये च तदभावः प्रमाणफलत्वात्, प्रमाणमनुमानं, प्रमाणफलं तु निर्णयः । निर्णयः स्वविषय एव, अनुमानं तु स्वविषये ऽन्यत्र च । यथा धूमदर्शनं धूमपरिच्छेदे नानुमान,मपि तु निर्णय इति । यदा च परिच्छिनत्ति धूमेन तदाऽनुमीयते ऽनेनेत्यनुमान,मग्निपरिच्छेदः फलम् । यदा च भावसाधनमाश्रित्योच्यते ऽनुमानं निर्णय इति तदाऽभ्यनुज्ञया वर्तितव्यम् । यदा (च) तु करणसाधनमाश्रित्योच्यते ऽनुमानं निर्णय इति, तदा प्रतिषेधो वक्तव्यः कार्यकारणयोर्भेदात्--कारणमनुमानं, कार्यं निर्णयः, तस्मान्नानुमानं निर्णय इति ॥

इति—श्रीमदुद्योतकरे न्यायवार्त्तिके(१)
प्रथमस्याध्यायस्याद्यमाह्निकम् ॥

---

(१) परमर्षिभारद्वाजोद्योतकरीये न्यायसूत्रवार्त्तिके-इति क्वचित् ।

अथ प्रथमेऽध्याये द्वितीयमाह्निकम् ।

तिस्रः कथा भवन्ति वादो जल्पो वितण्डेति । नायं कथानियमः, किं तर्हि ? विचारवस्तुनियमः—यद्वस्तु विचार्यते तत् त्रेधा विचार्यते । तत्र विचारो वादो जल्पो वितण्डेति । तत्र गुर्वादिभिः सह वादः । विजिगीषुणा सह जल्पवितण्डे । तत्र यथोद्देशं लक्षणापदेश इति वादस्य लक्षणमुच्यते । तत्र प्रमाणतर्कसाधनोपालम्भोवाद इति सूत्रम् ॥

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥

तत्र वादः पक्षप्रतिपक्षपरिग्रहः । कौ पुनरेतौ पक्षप्रतिपक्षौ ? वस्तुधर्मावेकाधिकरणौ विरुद्धावेककालावनवसितौ । वस्तुधर्माविति वस्तुविशेषौ—वस्तुनः सामान्येनाधिगतत्वात् विशेषतोऽनधिगतत्वाच्च विशेषावगमनिमित्तो विचारः तस्माद्वस्तुधर्मौ विशेषावेकाधिकरणौ, नानाधिकरणौ विचारं न प्रयोजयतः उभयोः प्रमाणोपपत्तेः तद्यथा अनित्या बुद्धिर्नित्य आत्मेति । अविरुद्धावप्येवम् । यौ विरुद्धौ तौ विचारं प्रयोजयतो नाविरुद्धाविति तद्यथा क्रियावद्द्रव्यं गुणवच्चेति । एककालाविति भिन्नकालयोर्न विचारप्रयोजकत्वं प्रमाणोपपत्तेः, यथा क्रियावद् द्रव्यं निष्क्रियं चेति कालभेदे सति । अनवसिताविति—अनिश्चितौ विचारं प्रयोजयतो नावसिताविति निर्णयोत्तरकालं विचाराभावात् । तावेतौ विरुद्धावेवंविशेषणौ धर्मौ पक्षप्रतिपक्षौ । तयोः परिग्रह इत्थम्भावनियमः । एवंधर्माऽयं धर्मी नैवंधर्मेति । सोऽयंपक्षप्रतिपक्षपरिग्रहो वादः । अस्य च कथामार्गत्रयेऽपि समानत्वात् विशेषणार्थं प्रमाणतर्कसाधनोपालम्भ इति । प्रमाणैस्तर्केण च साधनमुपालम्भश्चास्मिन् क्रियत इति—अस्मिन् भवतीति । अस्मिन्निति

सप्तमीनिर्देशो विषयज्ञापनार्थः अस्मिन्–विचारे ।

कथं पुनः तर्केण साधनमुपालम्भश्च अप्रमाणत्वात्—प्रमाणानुग्राहकत्वात् न प्रमाणसङ्गृहीतस्तर्को न प्रमाणान्तरमित्युक्तं, सोऽयमप्रमाणात्मकः सन् कथं सिद्ध्युपालम्भयोः कारणं भविष्यति ? न ब्रूमस्तर्कः सिद्ध्युपालब्ध्योः कारणमपि तु प्रमाणविषयविवेचनात्तर्कः प्रमाणान्यनुगृह्णातीति तर्कविविक्तं विषयं प्रमाणानि प्रवर्तमानानि परिच्छिन्दन्ति । सोऽयं प्रमाणानामनुग्राहकत्वात् प्रमाणसहितो वादेऽपदिष्ट इति। साधनमुपालम्भश्चास्मिन् भवतीति किं तावत्? सिद्धिः साधनमुपालम्भनमुपालम्भः अथ साध्यतेऽनेनेति साधनम्, उपालभ्यते ऽनेनेत्युपालम्भः ? यदि तावद्भावसाधनौ साधनोपालम्भशब्दौ ? तदा प्रमाणैस्तर्केण च न युक्तौ प्रमाणानां तर्कस्य च पराप्रतिपादकत्वात् प्रमाणान्यात्मप्रतिपत्तिसाधनानि, परप्रतिपादनार्थश्चायं विचारः तस्मान्न प्रमाणैस्तर्केण च सिद्ध्युपालब्धी भवतः । अथ करणसाधनौ? तथापि पञ्चावयवोपपन्न इति पृथक् न पठितव्यं, किं कारणम् ? प्रमाणतर्कसाधनोपालम्भ इति करणसाधनेन पदेनावयवार्थस्योक्तत्वात् । न । अन्यार्थत्वात्–पञ्चावयवोपपन्न इत्यस्यान्योऽर्थः तथा च वक्ष्यामः । अथैतो साधनोपालम्भशब्दौ भावसाधनौ किंविषयौ प्रमाणैस्तर्केण च क्रियेते? । ननूक्तं पक्षप्रतिपक्षविषयाविति–पक्षविषयं साधनम्, प्रतिपक्षविषय उपालम्भः ? सत्यमुक्तम् न पुनर्युक्तमुक्तम् । का पुनर्युक्तिहानिरत्र ? उपालम्भस्य प्रतिपक्षाविषयत्वात्, प्रमाणतर्कसाधना सिद्धिः पक्षस्य भवतु, न पुनरुपालम्भस्य प्रतिपक्षो विषयः, ? न ब्रूमः प्रतिपक्षविषय उपालम्भ इति, किन्तु साधनविषयः, प्रतिपक्षस्य यत् साधनं तद्विषय उपालम्भ इति । कथं पुनः प्रतिपक्षसन्निधावुपादिश्यमान उपालम्भशब्दः

प्रतिपक्षव्यतिरेकेण साधनेन सम्बध्यते? सामर्थ्यादसामर्थ्याच्च, यदु-पालम्भयोग्यं तदुपालभ्यते न च प्रतिपक्ष उपालम्भयोग्यः। कथमिति? उपालभ्यमानस्य चानुपालभ्यमानस्य च वस्तुनस्तथाभावात् तथाभूतमेव वस्तूपालभ्यमानं तथाभूतमेवानुपालभ्यमानम्। साधनेऽपि तर्हि तुल्यम्? साधनमपि करणं तदपि स्वरूपं न कदाचिज्जहाति, तस्मात् साधनस्याप्युपालम्भो न युक्त इति?। एवमेतत् नोपालम्भः करणे न कर्मणि, कर्मणः स्वविषये सामर्थ्यात्—सर्वं कर्म स्वविषये समर्थं, करणमप्येवं तस्य तु विषयान्तरे न सामर्थ्यमस्ति। यच्च विषयान्तरेऽसमर्थं न तेन कर्मणः करणस्य वा वैगुण्यम्। कस्य तर्ह्ययमुपालम्भो? यो निगृह्यते। कश्च निगृह्यते? पुरुषः। अप्रतिपत्तिविप्रतिपत्ती पुरुषस्य, न कर्मणो न करणस्य, सोऽयं प्रतिपादयिता ऽसमर्थयोः कर्मकरणयोरुपादानान्निगृह्यते। प्रतिपत्तापि यथाभिहितपदार्थाप्रतिपत्त्या। सोऽयं पुरुषधर्मो वचनद्वारेणोद्भाव्यत इति वचन उपचर्य्य पुरुषधर्मं वचनमुपालभ्यत इति। कथं पुनरयमर्थः सूत्रपदेन लभ्यते? लभ्यत इत्याह। कथम्? प्रमाणतर्कसाधनः प्रमाणैस्तर्केण च साधनस्योपालम्भः प्रमाणतर्कसाधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः एकस्य साधनशब्दस्य गम्यमानार्थत्वाल्लोपः यथोष्ट्रमुखीति।

अथ प्रमाणतर्कसाधनोपालम्भ इत्यनेन पदेन जल्पवितण्डाभ्यां कथं वादो विशिष्यते ननिवदं पक्षप्रतिपक्षपरिग्रहवत् त्रयाणामपि समानं भवति। न समानम्—वादे प्रमाणतर्कसाधनोपालम्भस्य नियतत्वात् प्रमाणतर्कसाधनोपालम्भ एव वादः (१) छलादिसाधनोपालम्भे जल्पवितण्डे। यथा विषाणित्वं गवि गवये च समानमपि संवृतकण्ठतया सास्नादिमत्तया च विशिष्यमाणमुभौ गोगवयौ वि-

(१) छलादिसाधनोपालम्भ एव वादः इत्यधिकः पाठः पुस्तकान्तरे।

शिनष्टि तथा प्रमाणतर्कसाधनोपालम्भ इति ।

छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इत्यभिधानाद्वादे निग्रहस्थानप्रतिषेधो विशेषविधानात् ततश्चानुपालम्भो वाद इति ? । प्रमाणतर्कसाधनोपालम्भ इत्यभिधानाद्वादे ऽपि निग्रहस्थानानीत्यदोषः । उपालम्भग्रहणात् समस्तनिग्रहस्थानप्रसक्तौ सञ्ज्ञाभेदमात्रम् ?—यद्युपालम्भग्रहणाद्वादे निग्रहस्थानानि विद्यन्ते इति मन्यसे ननु सञ्ज्ञाभेदमात्रं जल्पाद्वादस्य न विशेषः तत्रापि निग्रहस्थानानीहापीति ? नोत्तरयोर्नियमार्थत्वात् । यस्माद्वेोपालम्भशब्देन समस्तानि निग्रहस्थानानि लभ्यन्ते अत एव नियमार्थे उत्तरे पदे आरभ्येते सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नश्चेति । सिद्धान्ताविरुद्ध इत्यनेन किल पदेन विरुद्धो हेत्वाभासो लभ्यते । तन्न अन्यतोऽधिगतेः—अन्यत एवायं लभ्यते । पञ्चावयवोपपन्न इति पञ्चग्रहणात् न्यूनाधिके लभ्येते अवयवग्रहणात् तदाभासा लभ्यन्त इति लभ्यमानस्यार्थस्य पुनरभिधाने पिष्टं पिष्टं स्यात् तस्मान्नायमर्थः । अथ किमिदं पदं सिद्धान्ताविरुद्ध इत्यनर्थकमेव ? नानर्थकमपसिद्धान्तावरोधात्—

"सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः" *

इति सोऽनेनावरुध्यते तस्मान्नानर्थकम् । कस्मात् पुनरयं नियमो वादे अवयवाभासोऽपसिद्धान्तश्च निग्रहस्थानमिति ? । गुर्वादिभिः सह वादोपदेशान्नियमः—यस्मादयं तत्त्वबुभुत्सुर्गुर्वादिभिः सह त्रिविधं फलमाकाङ्क्षन् वादं करोति ततोऽस्य तत्त्वबुभुत्सावतस्तावत्सा धनं वक्तव्यं यावदनेन ज्ञातव्यमप्रतिद्वन्द्वित्वात् । प्रतिद्वन्द्विना सह न वादः, किं तु जल्पः तत्र समस्तनिग्रहस्थानप्रयोग इति युक्तम् । प्रमाणतर्कसाधनोपालम्भ इत्यभिधानात् उभयोः सिद्ध्यसि-

* गौ० सू० अ० ५ आ० २ सू० २३ ।

द्धिप्रसङ्गः ?-यदि प्रमाणतर्कसाधनोपालम्भो वादः उभयोर्वादि-प्रतिवादिनोः प्रमाणतर्कसाधनोपालम्भाभिधानेऽधिकार(१) इत्युभयपक्षसिद्ध्यसिद्धिप्रसङ्गः । नैष दोषः अप्रतिज्ञानात्-नेदं प्रतिज्ञायते उभयोर्वादिनोः प्रमाणानि सन्तीति, अपि तूभाभ्यां साधनं वक्तव्यमेतन्नियम्यते न पुनः साधनमेवैतद् भवतीति, दूषण-मप्येवम् ।

अपरे तु स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति वादलक्षणं वर्णयन्ति । अत्र च पक्षविशेषणार्थमुपात्तयोः स्वपर-शब्दयोरनुपपत्तिर्विकल्पानुपपत्तेः समासासम्भवाच्च । एतौ खलु स्वपरशब्दौ परिग्रहवर्जनार्थौ ? वा स्याताम्, ? साधनीयदूषणीयार्थौ वा, ? पूर्वोत्तरपक्षार्थव्यवस्थापकौ वा ? पक्षप्रतिपक्षावद्योतकौ वा ? प्र-थमद्वितीयपक्षाभिधायकौ वा ? एकस्य वाऽनेकविशेषणाभिसम्बन्धि-नोऽनेकशब्दाभिधानमिति ? । तत्र परिग्रहपरिवर्जनार्थता तावदनु-पपन्ना, किमोर्थासम्भवात् । न परिग्रहार्थतायां किमोर्थः सम्भ-वति 'कस्यायं स्वो भविष्यति कश्च स्वार्थ' इति स्वीकरणं परि-ग्रहार्थः यस्य स्वीकारो भवति तस्य स्व इति । तदेव चिन्त्यते किं तत् स्वीकरणमिति । प्रमेति प्रत्ययोत्पत्तिकारणभावाभावौ स्वपर-शब्दार्थः ? निर्दिष्टः स्वार्थो न पुनरस्य स्वार्थो, न हि शास्त्रकारस्य स्वः परो वा सम्भवति यदर्थमिदं स्यादिति । यच्च यस्य स्वं भव-ति तत्तस्यसिद्ध्यर्थं कञ्चिदुपकारं करोति, न पुनः स्वामिनः पक्षे-ण कश्चिदुपकारः क्रियते तस्मात् परिग्रहवर्जनार्थौ तावत् स्वप-रशब्दौ न भवतः । साधनीयदूषणीयार्थौ स्वपरशब्दाविति चेत्-अथापीदं स्यात् साधनीयः स्वपक्षो दूषणीयः परपक्ष इति । अहो शब्दार्थकौशलं साधनीयः साध्यः स्यात् साधनीयः स्वपक्ष

(१) नाधिकार २ इति पु० पा० ।

इति कुत एतत् ? लक्षणं चैतत् पक्षस्य साधयितुमिष्टः पक्ष इति साधनीयशब्देनापि तदेवोच्यते, व्यवच्छेदार्थं चेदमुच्यते स्वपक्षः परपक्ष इति । परपक्षाच्चायं स्वशब्देन व्यवच्छेद्यमानोन समानमर्थं शक्नोति वक्तुम्, व्यर्थं वा विशेषणम् । सामान्यशब्दा अपि विशेषे वर्तन्त इति(१) इष्टमेतत् ? न ते सामान्यशब्दा ये विशेषेषु वर्तन्त इति । किन्तु प्रकरणादिभेदानुविधायिनो विशेषशब्दा एव । अपि च साधनीयः पक्षः स्वपक्षः दूषणीयः पक्षः परपक्षः । तदेतदपि न बुध्यामहे साधनीयशब्दस्य पक्षविषयत्वात् साधनीयः पक्षःस्वो भवतु, दूषणं तु न कदाचित् परपक्षेण सम्बध्यते परपक्षस्य तादवस्थ्यात् । अथ दूषणस्य को विषयः ? कस्यचित् स्थापना विषय इति किञ्चिद्दूषणं स्वपरपक्षाभ्यामसम्बद्धमेव । कतमद्दूषणं स्थापनया सम्बद्ध्यते ? । का चेयं स्थापनेति ? स्थापना नाम पञ्चावयवं पक्षसाधकं वाक्यम्, वाक्यदोषो दूषणं, तद्वाक्यं न्यूनमधिकं च भवति अवयवाभासोपपन्नञ्च, तदुद्भावनं दूषणमेतत् स्थापनया सम्बध्यते तद्विषयत्वात् । शेषं तु दूषणं न स्थापनया न स्वपरपक्षाभ्यां सम्बद्धम् उत्तरदोष आक्षेपमात्राश्चेति । सत्यं न साक्षात् पक्षस्य दूषणेनाभिसम्बन्धः स्थापनानिवृत्तिद्वारेण तु प्रवर्तमानं दूषणं (न पक्षं निवर्तयति) स्थापनानिवृत्तेः परपक्षं दूषयतीत्युच्यते ? उपचरितशब्दप्रयोगो लक्षणेऽनुपपन्नो लक्षणस्य तत्त्वविनिषयत्वात् तत्त्वव्यवच्छेदकं लक्षणम् न पुनरुपचरितशब्दप्रयोगेन व्यवस्थास्ति । यदि च पारम्पर्येण प्रवृत्त्या प्रवर्तमानं दूषणं परपक्षं निवर्तयति तदैवं युक्तं कर्त्तुं परपक्षासिद्ध्यर्थं वचनं वाद इति । एवमभिधीयमाने किं भविष्यतीति ? लघु च सूत्रं भवतीत्युभयोश्च साधनदूषणयोः पारम्पर्येण परपक्षासिद्ध्यर्थतेति । अथ माभूदुभय-

---

(१) इत्यदृष्टमेतत् इति २ पु० पा० ।

त्र पारम्पर्यमिति ? स्वरूपत एवं वक्तव्यं— पक्षस्थापनयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति। एवं हि विस्पष्टता लक्षणस्य यथाविषयं चाभिसम्बन्ध इति । स्थापनयापि न सर्वं दूषणं सम्बध्यत इति दोषतादवस्थ्यम् ? न दोषतादवस्थ्यं कस्यचित् सम्भवात् । किञ्चिद् दूषणं स्थापनया सम्बध्यत इति, सामान्याभिधानेऽपि सामर्थ्यान्नियमः तस्मादिदमनुपपन्नं साधनीयदूषणीयार्थौ स्वपरशब्दाविति। स्वपरशब्दौ पूर्वोत्तरपक्षार्थौ भविष्यत इति ? यदुक्तम्भवति पूर्वोत्तरपक्षाविति तदुक्तं भवति स्वपरपक्षाविति । न युक्तमेतदपीति साधनदूषणयोर्नियमाभ्युपगमात्-ते साधनदूषणैरिति तस्मिन् सूत्रे साधनदूषणयोर्नियमाभिधानं स्वपक्षसाधनं परपक्षे दूषणमिति । एतस्मिंश्च नियमे उत्तरपक्षविषयं दूषणं प्राप्नोति तेनोत्तरपक्षवादी स्वमेव पक्षं दूषयतीति(१) प्राप्तम् । स्वपक्षश्चोत्तरवादिनः पूर्वपक्षादन्य इति स्वपरशब्दाभ्यां पूर्वोत्तरपक्षयोरभिधानमिति न पदार्थो न परिभाषा न च रूढिः । एतेन पक्षप्रतिपक्षार्थता प्रथमद्वितीयपक्षार्थता च व्याख्याता । एक एवायं पक्ष इति विशेषणद्वययोगात् साध्यतया दूष्यतया च विशेष्यमाणः स्वपरशब्दवाच्य इति ? युक्तमेतद्द्विवचनं तु न युक्तम् । एकस्यानेकविशेषणयोगो न प्रतिषिध्यते द्विवचनं तु न भवतीति ब्रूमः न ह्येकस्यानेकविशेषणाभिसम्बन्धे सति द्विवचनबहुवचने भवतः नहि देवदत्तं छत्रदण्डाभ्यां सम्बद्धं समुपलभ्य वक्तारो भवन्ति छत्रिदण्डिनावागताविति । तदेवं विकल्पानुपपत्तेः स्वपरशब्दानुपपत्तिः ।

समासासम्भवाच्च— स्वपरपक्ष इति समासपदमेतत् तत्र तावद्विशेषणविशेष्यस्वरूपानवगमेन षष्ठीसमासः यत्र पुनः षष्ठी

(१) तेनोत्तरपक्षं साधयतीति प्राप्तमिति २ पु. पा. ।

समस्यते तत्र विशेषणं विशेष्यात् पृथगवधार्यते यथा राजपुरुष इति । भेदाच्च—यत्र च विशेषणविशेष्यभावो भवति तत्र भेदो दृष्टो राजपुरुषवदेव । असत्यपि भेदे दृष्ट इति चेत् असत्यपि भेदे दृष्टः षष्ठीसमासः तद्यथा सेनापतिः पानकाङ्गमिति ? तच्च नानभ्युपगमात्—को हि सुस्थात्मा(२) पानकशब्दार्थमङ्गेभ्यो नार्थान्तरं प्रतिपद्यते सेनां च सैनिकेभ्य इति । यथा च सेनादीन्यर्थान्तरभूतानि तथोक्तं गुणगुणिवाद इति । अथ मन्यसे स्वार्थः स्वशब्दस्यार्थः साधनीयोऽर्थश्च पक्षशब्दस्येति ? तन्नापोदितत्वात् । यथा स्वार्थवाचकः शब्दो न भवति तथोक्तम्, तस्मान्न षष्ठीसमासः । एतेन कर्मधारयः प्रत्युक्तः स्वश्चासौ पक्षश्चेति विशेषणस्वरूपासिद्धेर्भेदाभावाच्च । एतेन बहुव्रीहिरपि प्रत्युक्तः । साधयितृविषयं च साधनं प्राप्नोति अतो न बहुव्रीहिः । ननु च साधनीयार्थता स्वार्थः पक्षविशेषणत्वेन सम्भवति ? न सम्भवति पर्यायत्वात्—साधनीयः पक्ष इति पर्याय एव, न च पर्यायशब्दैः समानाधिकरणो बहुव्रीहिः सम्भवति । नहि भवति वृक्षतरुं छिनत्तीति । विरोधाच्च । यदि तावदयं पक्षशब्दः स्वपक्षाद्भिद्यते (पर)पक्षवचनं प्रतिज्ञेति व्याघातः । किं कारणम्, प्रतिज्ञायाः स्वपक्षविषयत्वात् । अथाभिन्नस्तथापीदं न प्राप्नोति स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वाद इति । न चान्यः समासः सम्भवति । न चेदं वाक्यम्, तस्मात् स्वपरपक्षयोरित्यसारम् ।

आस्तां तावत् स्वपरशब्दार्थो विशेषणविशेष्यभावश्च स्वपरशब्दयोः । अथ समासः कस्मान्न क्रियते स्वपरपक्षसिद्ध्यसिद्ध्यर्थं वचनं वाद इति ? किमेवं कृते भवति ? स एवार्थो लाघवं च ।

अत्र केचित् परिहारं ब्रुवते—यदि किल समासः क्रियते उभ-

(२) स्वस्थात्मा इति २ पु० पा० ।

याश्रिते सिद्ध्यसिद्धी भवतः । न । दोषतादवस्थ्यात्—नायं दोषोऽसमासकरणेन परिहियते । कथमिति ? स्वपक्षसिद्ध्यसिद्ध्यर्थं वचनं परपक्षसिद्ध्यसिद्ध्यर्थं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थमिति । नासामर्थ्यात्—न ह्ययं समासः समर्थः स्वपक्षसिद्ध्यसिद्ध्यर्थमिति ! कस्मात् ? व्याहतत्वात् यदि सिद्ध्यर्थं यतते असिद्ध्यर्थमिति व्याघातः यद्यसिद्ध्यर्थं यतते सिद्ध्यर्थमिति व्याघातः ? । यद्यसामर्थ्यान्न समासः समासेऽपि तर्ह्यसामर्थ्यात् नोभयपक्षसिद्ध्यसिद्धिप्रसङ्गः ।

एकवचनबहुवचनप्रसङ्ग इत्यन्ये—यदि किल समासः क्रियेत समासोऽनभिव्यक्तवचनभेदः तस्माद्वचनभेदव्यक्तिनिमित्तोऽसमासः । कथं नाम स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः स्यात् न स्वपरपक्षाणां न स्वपरपक्षस्येति । नासम्भवात्कस्य तावत्सिद्ध्यसिद्ध्यर्थं वचनं नैवास्ति, स्वपरपक्षाणां साधनमनुमानमेकमिति कथाप्येषा नास्त्यतोऽस्थाने आशङ्का ।

अनित्यः समासविधिरित्यपरे—अपरे समासविधेरनित्यतां वर्णयन्त एवमाहुः—नायमवश्यं विधिः सर्वत्र समास इति । क्वचित् समासः क्वचिच्च वाक्यम् यथा च राज्ञः पुरुषः, राजपुरुष इति च समासः । यदि उभयप्राप्तिरसमासः कस्मात्—अनित्यः समासविधिरिति एवं ब्रुवतोक्तं भवति प्राप्तमुभयम् । अथोभयप्राप्तौ कस्मादसमास इति । समासः कस्मादित्यनिवृत्तोऽनुयोगः ? नानिवृत्तो लाघवार्थत्वात् समासे लाघवमेवासमासे गौरवम् । अनुग्रहार्थं च शब्दानामुपादानमिति गुर्वभिधाने प्रयोजनं वाच्यम् । वर्णे गुरुलाघवानभ्युपगम इति चेत् ? नायं परिहारोऽनुयोगस्यानिवृत्तेः । वर्णे गुरुलाघवानुयोगं न प्रतिपद्यामह इति चेत् न निवर्ततेऽनुयोगः कस्मादिति ? । शास्त्रत्वेन च वादविधानम-

भ्युपगम्यते न च वर्णे गुरुलाघवमाश्रीयत इति न युक्तम् ।

सिद्ध्यसिद्ध्यर्थमित्येतदपि न युक्तम् । कस्मात् ? द्वेधाऽनुपपत्तेः अयं खलु सिद्धिशब्दः कल्प्यमानो द्वेधा कल्प्येत व्यक्तावुत्पत्तौ वा, तत्र तावदुत्पत्तौ युज्यते प्रतिज्ञादिकस्य साधनस्य साधनभावहानिप्रसङ्गात् नहि प्रतिज्ञादिसाधनेन वस्तूत्पाद्यते, किं तु विद्यमानप्रकाशकत्वं साधनार्थः स हीयते सिद्धावुत्पत्तौ कल्पितायामिति । व्यक्ताविति चेत् नाधिकरणाधारत्वात्— अथ मन्यसे सिद्धिर्व्यक्तिर्नोत्पत्तिः ? युक्तमेतदुत्तरं तु व्याहतं भवति अधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति । ये चैतेऽधिकरणप्रत्यायनलक्षणे सिद्ध्यसिद्धी तेऽधिकरणे वर्तमाने कथं पक्षस्य भवत इति षष्ठ्यर्थो वाच्यः । नायं(१) दुर्वचः तद्विषयत्वात्—तयोः सिद्ध्यसिद्ध्योः पक्षो विषयः अतस्तद्विषयत्वात्तस्येति ? । न युक्तमेतत् । ये ते सिद्ध्यसिद्धी पक्षविषये ते किं तावत् पक्षे सिद्धे उतासिद्धे ? यदि तावत् सिद्धे, नाधिकरणप्रत्यायनं सिद्धिः, किन्तर्हि ? यतस्तत्प्रत्यायनं सा सिद्धिः । कुतश्च तद्भवति ? अर्थस्य तथाभावात्—यस्मात् सोऽर्थस्तथा भवति । कथं तथा भवति ? यथा प्रमाणैरभिसम्बद्ध इति— यत् प्रमाणैरविसंवादित्वं स तथाभावः । अथासिद्धे पक्षेऽधिकरणप्रत्यायनं भवति ? साधनप्रयोगात् प्रागधिकरणप्रत्यायनमस्तीति वादवैयर्थ्यं स्यात् । पक्षस्य सिद्धिरधिकरणप्रत्यायनम् असिद्धिस्तु कथम् ? नहि परपक्षासिद्धिर्दूषणेन क्रियत इत्युक्तम् । स्थापनानिवृत्तेरुपचार इति चेत्—स्यान्मतिर्दूषणं प्रयुज्यमानं साक्षात् स्थापनां निवर्तयति स्थापनानिवृत्तेस्तु परपक्षनिवृत्तिरुपचर्यत इति ? न । प्रयोजनाभावात्— नहि प्रयोजनव्यतिक्रमेण मुख्यार्थव्यतिक्रमो लभ्यते,

(१) स चायमिति २ पु. पा ।

अपि तु प्रमाणासम्भवेनोपचारो मञ्चाः क्रोशन्तीति यथा, लोकप्रयुक्तशब्दविषयश्चोपचारः लोकगत्या शब्दार्थः, न चेदं लौकिकं वाक्यं स्वपरपक्षयोः सिद्ध्यसिद्ध्यर्थं वचनं वादः।

अपरे तु प्रतिज्ञातार्थाज्ञापनं पक्षस्यासिद्धिं वर्णयन्ति। तद्व्यधिकरणविषयं, न निवर्तते प्रसङ्गः, कथं– पक्षस्यासिद्धिरिति सिद्धिवत्प्रसङ्गः तस्मात् सिद्ध्यसिद्धी पक्षधर्मावेव यत एतद्भवति सिद्धः पक्षोऽसिद्धश्चेति। एवं सति द्रष्टृस्थे सिद्ध्यसिद्धी इति व्याघातः। यदि सिद्ध्यसिद्धी पक्षधर्मौ द्रष्टृस्थे सिद्ध्यसिद्धी इति व्याहतं भवति। अथ माभूद्व्याघात इति द्रष्टृस्थे एव ते? तथापि पक्षस्य व्यक्त्यव्यक्ती सिद्ध्यसिद्धी इति व्याहतं भवति। अथ तथातथाते पदार्थस्य सिद्ध्यसिद्धी? तथाप्यधिकरणप्रत्यायनं सिद्ध्यसिद्धी इति व्याहतं भवति। के पुनरेते व्यक्त्यव्यक्ती? वस्तुधर्मावभिधानप्रत्ययहेतू यत एव तावभिधानप्रत्ययौ व्यक्तो ऽव्यक्तश्चेति भवतः ते व्यक्त्यव्यक्ती इति। अर्थशब्दानुपपत्तिर्विकल्पानुपपत्तेः–अर्थशब्दः खलु प्रवर्तमानस्त्रेधा प्रवर्तते उद्देशप्रयोजनाभिधेयविषयत्वेन, उद्देशे तावदर्थशब्दो यथा ब्राह्मणार्थं भक्तमिति। एवं चतुर्विधवाक्यामङ्ग्रहः। प्रयोजनेऽर्थशब्दः किमर्थमागतोसीति। अभिधेयेऽर्थशब्दो यथा गौरित्यभिधानस्य कोऽर्थ इति। तन्न तावदुद्देशे सम्भवति युक्तायुक्तत्वेनेति विशेषितत्वात्–स्वपक्षस्य युक्तत्वेन परपक्षस्यायुक्तत्वेनेत्येवं विशेषिते कुत उद्देशशब्दार्थः न ह्ययं युक्तायुक्तशब्दो दूषणाभासे साधनाभासे वा सम्भवति साधनयोगो युक्तता दूषणयोगोऽयुक्ततेति। अथ पुनः पदार्थस्य तथात्वातथात्वे युक्तायुक्तत्वे युक्तत्वं तथाभावोऽयुक्तत्वमतथाभाव इति? तथापि उभयोः कर्मतयोपादानात् युक्तत्वेनाधिकरणप्रत्यायनमयुक्तत्वेन वेति व्याघा-

तः नहि प्रत्याय्यं प्रत्यायनं भवतीति । अथ प्रयोजनेऽर्थशब्दः ? त-
थापि साधनदूषणाभासवादिनोऽवादिता स्यात् । किं कारणम्, सा-
धनदूषणाभासयोः सिद्ध्यसिद्ध्यप्रयोजनत्वात् नहि साधनदूषणाभा-
सयोः सिद्ध्यसिद्धी प्रयोजनम् । एवं च तद्वादी अवादी स्यात् तथा-
चावादी निगृह्यत इति दोषः । अथाभिधेयेऽर्थशब्दप्रयोगः अ-
भिधानस्वभावानवधृतेरिति ? अयुक्तमेतदपि, नहि ग्रन्थकारभाष्य-
काराभ्यां विशेषितमेवं प्रकारमभिधानं सिद्ध्यसिद्ध्योर्वाचक-
मिति । ननु विशेषितं येन सिद्ध्यसिद्धी अभिधीयेते तत्तयो-
र्वाचकमिति ? सत्यमुक्तम्, एवं तु सिद्ध्यसिद्धी इत्येतेऽभिधाने
वादः प्राप्तः । न चान्योऽर्थशब्दस्यार्थ इति, तस्मादर्थशब्दोऽ-
प्ययुक्त इति । सिद्ध्यसिद्ध्यर्थं वचनं वाद इति ब्रुवाणेन पूर्वमुत्तरं
वा नालोचितम् । नैयायिकहेतुप्रतिषेधेन विशेष्यं वचनमित्य-
भ्युपगमसिद्धं इदं पुनः सूत्र(मिति) समस्तं वचनविशेषणार्थमिति
व्याघातः । तदेवमेतानि सूत्रपदानि विचार्यमाणानि स्वतन्त्र-
(व्या)घातकानीति लोकं च बाधन्त इति । एवं तावत् सौत्रा-
णि पदानि स्वेन न्यायेनासम्बद्धानि । यथा च वृत्तिपदानि अ-
सम्बद्धानि तथेदमुच्यते । स्वस्य पक्षस्येति स्वार्थासिद्धेरयुक्तम्,
स्वार्थश्च प्रतिषिद्धः अतोऽयुक्तं स्वस्य पक्षस्येति । यदपि षष्ठीसप्त-
मीद्विवचनयोस्तुल्यरूपत्वात् षष्ठीत्वज्ञापनार्थं स्वस्य पक्षस्येति त-
दप्ययुक्तम् । अधिकरणार्थासम्भवात्—नहि पक्षव्यतिरेकेण पक्षे
किञ्चित् साध्यं सम्भवति तस्मादप्रसक्तः सप्तम्यर्थः तदप्रस-
क्तौ विशेषणानर्थक्यमिति ।

युक्तायुक्तत्वाऽनुपपत्तिश्च विकल्पानुपपत्तेः—युक्तायु-
क्तत्वे खलु साधनदूषणे वा स्याताम्, साधनदूषणा-
भ्यां वा योगः, पदार्थस्य वा तथातातथाते इति । तत्र ताव-

त् साधनदूषणे युक्तायुक्तत्वे, कस्मात् ? साधनदूषणयोः पृथगभिधानात्—ते साधनदूषणैरिति पृथगुक्ते साधनदूषणे, युक्तायुक्तत्वशब्दाभ्यां च साधनदूषणयोरभिधानमिति ते साधनदूषणैरिति सूत्रमनुच्चार्यं चरितार्थत्वादिति । अथ मन्यसे तयोरेव युक्तायुक्तयोर्विशेषणार्थं ते साधनदूषणैरिति । न । प्रथमाभिधानप्रसङ्गात् । यदि युक्तायुक्तत्वविशेषणार्थं ते साधनदूषणैरिति सूत्रं ? प्रथमैव न्याय्या ते साधनदूषणानीति । नहि विशेषणविशेष्यभावे भवति नीलमुत्पलैरिति । योग इति चेत्—अथ साधनदूषणाभ्यां योगो युक्तत्वायुक्तत्वे इत्येवं चेन्मन्यसे तन्नानिर्देशात् न साधनदूषणाभ्यां योगो निर्दिष्ट एवं विध इति, अनिर्देशादयुक्तमेतत् । साधनेन योग इति च कदा भवति यदासौ निर्णीतः पदार्थः तदा च न साधनार्थः कश्चिदस्तीति न युक्तायुक्तत्वेनाधिकरणप्रत्यायनमिति व्याघातादतो न युक्तो योगः । अथ पदार्थस्य तथातातथाते युक्तायुक्तत्वे ? । तदपि न । करणार्थस्यासम्भवात्—ये तथात्वातथात्वलक्षणे युक्तायुक्तत्वे ते व्यवच्छेद्ये न तु व्यवच्छेदस्य साधने । तस्मात् करणार्थो नास्त्यतो युक्तायुक्तत्वस्येति युक्तं वक्तुमिति ।

अधिकरणप्रत्यायनमिति च न युक्तम् शास्त्रप्रबन्धानङ्गत्वात्—शास्त्रप्रबन्धं कुर्वाणेनोक्तं सन्देहविपर्ययप्रतिपत्त्यर्थः शास्त्रस्यारम्भ इत्येतन्निरपेक्षेणेदमुच्यते अधिकरणप्रत्यायनं सिद्धान्तसिद्धी इति । न च प्राश्निकेषु संशयविपर्ययौ स्तः परिच्छेदकत्वात्—तस्मान्न प्राश्निकाः प्रत्याय्या इति । यच्चोक्तं प्राश्निकप्रत्यायनादेव वादिप्रत्यायनं कृतं भविष्यतीति । तत्प्रत्यायनाद्वादिप्रत्यायनं भविष्यतीति किं कारणम्, प्रतिवादी किल स्वपक्षरागात् सन्तमप्यर्थं न प्रतिप-

द्यते ? । सन्तमप्यर्थं न प्रतिपद्यते इति व्याहतमुच्यते । कथं चान्यथा प्रतिपन्नः साक्षित्याभिधीयते । अथ प्रतिपद्यमानोऽपि परस्य न कामकारं ददाति तथापि न प्रतिपद्यत इति व्याहतमुच्यते । यच्च प्राश्निकप्रत्यायनात् तत्प्रसाधनमिति । तदपि न, प्रतीतेः कारणभेदात्—प्राश्निकप्रतीतेरन्यानि कारणानि अन्यानि प्रतिवाद्प्रतीतेरिति । न चान्यविषयस्य करणस्यान्यत्र क्रियेति । नियमाभावाच्च । न चायं नियमः प्राश्निकप्रत्यायनार्थ एव वादः प्राश्निकानन्तरेणापि गुर्वादिभिः सह वादो दृष्ट इति । यदा तु नायं(१) तत्त्वबुभुत्सुर्लाभपूजाख्यातिकामो वादमारभते तदा प्राश्निकैः प्रयोजनमस्तीति । सत्यमस्ति प्रयोजनं वादस्तु न भवतीति । न । त्रैविध्यानभ्युपगमात्— एक एवायं कथामार्गः तस्य प्रयोजनं तत्त्वावबोधो लाभादयश्च । न । प्रतिषेधात्— प्रतिषिद्धः स्तुतिमानलाभलिप्सोर्वादः । यदपीदमुच्यते ।न। त्रैविध्यानभ्युपगमादिति ? नानभ्युपगमायत्तः पदार्थसद्भावः अपि तु सद्भावे सत्यभ्युपगम इति यथा च त्रैविध्यं कथामार्गस्य तथा लक्षणभेदाद्वादात् जल्पवितण्डयोर्भेदमुपपादयिष्यामः । तस्मादज्ञात्वा विशेषमुच्यते त्रैविध्यानभ्युपगमादिति । यच्चोक्तं पक्षसिद्धिविषयं प्रसाधनं पक्षसिद्धिशब्देनोपचरितं यथा शून्यताविषयः समाधिः शून्यतेति । न कामत उपचारो लभ्यते अपि तु प्रमाणासम्भवेन, लोकप्रयुक्तशब्दान्वाख्यानमुपचारः उक्तं च नोपचारितशब्दप्रयोगो लक्षणे उपपन्न इति । तदर्थं वचनमित्येतदपि किल चतुर्विधवाक्यज्ञापनार्थमुक्तम् साधनं साधनाभासो दूषणं दूषणाभासश्च सम्पत्स्यत इति । तदयुक्तम् युक्तायुक्तत्वेनाविशेषितत्वात् एवं विशेषिते एतस्मिन् कुतश्च-

(१) त्वयं इति २ पु. पा. ।

तुर्विधवाक्यसंग्रह इति । अधिकरणं पुनर्यो वादिप्रतिवादिभ्या-मधिकृत इत्यधिकरणार्थो वक्तव्यः न हि वादे प्राश्निकाधारं किञ्चिदस्तीति । प्रत्यायनाधारत्वादधिकरणमिति चेत् नोक्तोत्तर-त्वात्-उक्तोत्तरमेतत् पक्षविषयं प्रत्यायनं न प्राश्निकविषयमिति। तस्मिन् सति भावादिति चेत् नान्यथापि दर्शनात्-अन्यथापि गु-र्वादिभिः सह दृष्टो वाद इति । (१)तद्वादे परीक्षा का कस्य केति वक्तव्यम्? । साधनदूषणप्रयोगः पक्षस्थापनाविषयो वाद इति, तस्य परीक्षा साधनदूषणतदाभासपरिज्ञानम्, तदर्थमधिकारः उभयोः त-स्मिन्निति सप्तम्यर्थो नास्ति । यदपि प्राश्निकप्रतिवादिनोः प्रिया-प्रियवचसि वादप्रसङ्ग इति चोद्यं कृत्वा प्रतिसमाधानमुक्तम् तत्सिद्ध्यसिद्धिभ्यां साक्षात् पारम्पर्येणासम्बन्धाद्युक्तायुक्तवि-शेषणाच्चासम्बद्धमुत्तरेण त्वमङ्गतपदार्थाभिधायिनो दत्तः स्व-हस्तः पूर्वापरयोरसम्बन्धादिति । यदि त्वमङ्गतस्याप्युत्तरं वाच्यम् तत एवं वक्तव्यम् न सूत्रार्थापरिज्ञानादिति । तदेत-त्सूत्रं विचार्यमाणं सह वार्त्तिकं न युक्त्या सङ्गच्छत इति यथा-न्यायमेवास्तु ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपाल-म्भो जल्पः ॥ २ ॥

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः । समस्तं वादलक्षणं छलजातिनिग्रहस्थानसाधनोपालम्भश्च जल्प इति(२) । यथोक्तोपपन्न इति न युक्तम् जल्पे निग्रहस्थाननि-यमस्यानभ्युपगमात्- यद्येवमुच्येत प्रमाणतर्कसाधनोपालम्भः सि-

(१) यदि प्राश्निका न सन्ति इति ता. टीकाऽनुसारेणाधिक-मपेक्षितम् ।

(२) साधनोपालम्भश्छलजल्प—पा० २ पु० ।

द्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति ? न युक्तमेवं भवितुम् । सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च पदयोरुपालम्भश्रवणात् समस्तनिग्रहस्थानप्रसक्तौ नियमार्थत्वात्—नियमार्थे एते पदे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति । जल्पे च नियन्तव्यं न किञ्चिदस्ति, तस्मान्नियमार्थे एते पदे नातिदेष्टव्ये इत्यतो न वक्तव्यं यथोक्तोपपन्न इति । नैष दोषः । सम्भवतोऽतिदेशात्—यदत्र सम्बध्यते तदतिदिश्यते । किञ्च सम्बध्यते ? प्रमाणतर्कसाधनोपालम्भ इत्येतत्, तस्माद्यथोक्तोपपन्न इति लक्षणमात्रस्यातिदेशः—यथाऽन्यत्र "अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिरिति"(१) "अनेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यात"मिति (२)न स्वरूपविशेषोऽतिदिश्यत इति, अपि त्वनेकद्रव्यसमवायमात्रं स्वगतो विशेषः सामर्थ्यात्, तथेहापि यत्र समर्थं तदतिदिश्यते समर्थं च लक्षणं, तस्मात् तदतिदिश्यते । न नियमार्थे पदे नियन्तव्यस्याभावात् । अथवा यथोक्तोपपन्नेनोपन्नो यथोक्तोपपन्नोपपन्न इति प्राप्ते गम्यमानत्वादेकस्योपपन्नशब्दस्य लोपः यथा गोरथ इति । केन पुनरयं गम्यत इति? उक्तं सामर्थ्येनेति । न हि नियमार्थयोः पदयोर्जल्पे सम्भवः तस्मान्न ते अतिदिश्येते इति । भाष्यमिदानीं कथं ? न । सूत्रपाठानुक्रमज्ञापनार्थत्वाद्भाष्यस्य— एतस्मिन् सूत्रे यदुपपन्नं लक्षणत्वेन तदतिदिश्यत इति । छलजातिनिग्रहस्थानैर्न कस्यचित् साधनमुपालम्भो वा युक्तोऽयुक्तोत्तरत्वात् । छलं तावत् न साधनोपालम्भायालम् कस्मात् ? अयुक्तोत्तरत्वात्— अयुक्तमुत्तरं छलं तन्न साधनोपा-

---

(१) वैशेषिक—सू० अ० ४ आ० १ सू० ८ ।
(२) वैशेषिक—सू० अ० ४ आ० १ सू० ९ ।

लम्भायेति, एवं जातिः। अङ्गभाव इति चेत्— अथापीदं स्यात् यत्तत् प्रमाणतर्कैः साधनं यो वा उपालम्भः तस्यैतानि प्रयुज्यमानानि छलजातिनिग्रहस्थानानि रक्षणार्थत्वादङ्गं भवन्तीति? एतदप्युक्तोत्तरत्वादनुपपन्नम्। किमर्थं तर्हि प्रयोगः?— यद्येतानि छलजातिनिग्रहस्थानानि साधनोपालम्भयोर्न साधनमङ्गं वा किमर्थमेतेषामुपपादनमिति? साधनविघातार्थम्— साधनं विहनिष्यामीति अनया धियाऽपहृतः प्रवर्तते। यत्र चैतानि छलजातिनिग्रहस्थानानि प्रयुज्यन्ते न स वादः, न पुनरेतदभिधीयते छलजातिनिग्रहस्थानानि साधनमङ्गानि वेति, साधुसाधनोपादाने च परेणाकुलितबुद्धिः छलादीनि प्रयुङ्क्ते कदाचिच्छलादिभिराकुलीकृतस्य पराजयोऽपि स्यात्, न पुनरेतानि तत्त्वबुभुत्सुना वक्तव्यानि, किं तु विजिगीषुणेति। सोऽयं पक्षप्रतिपक्षपरिग्रहश्छलजातिनिग्रहस्थानप्रयोगाप्रयोगाभ्यां भिद्यमानो वादो जल्पो वितण्डा च भवति।

अत्रापि विरुद्धौ धर्मावेकाधिकरणस्थाविति समानम्। विरुद्धयोर्धर्मयोरेकाधिकरणत्वानुपपत्तिः उभयस्वभावासम्भवात्—यदि विरुद्धावेकाधिकरणौ धर्मौ भवतः तदेकं वस्तूभयस्वभावं प्राप्तम्, न चैतदस्ति, तस्मान्न विरुद्धौ धर्मावेकाधिकरणाविति? नाध्यारोपितस्वरूपधर्मप्रतिपत्त्या तदुपपत्तेः—एकस्तत्र धर्मः स्वरूपत एकस्तत्राध्यारोपितस्वरूपप्रवृत्तिः तस्मादुभयधर्मा धर्मीति युक्तम्। एकधर्मिस्थौ विरुद्धार्थावित्येतदपि न बुद्ध्यामहे को विरुद्धार्थ इति?। (न)। स्वरूपाविपर्ययोपपत्तेः स्वरूपमात्रविपर्ययोविरोधः न पुनर्बाधा वध्यघातकभावो वेति॥

स प्रतिपक्षस्थापनाहीनो वितण्डा॥ ३॥

स प्रतिपक्षस्थापनाहीनो वितण्डा। प्रतिपक्षस्थापनाहीन

इति यावदुक्तम्भवति द्वितीयपक्षवादी वैतण्डिको न कश्चित् पक्षं स्थापयतीति ।

अपरे तु ब्रुवते दूषणमात्रं वितण्डेति—दूषणमात्रमिति मात्रशब्दप्रयोगाद्वैतण्डिकस्य पक्षोऽपि नास्तीति । अयुक्तं चैतत् चतुर्वर्गस्याभ्युपगमात् दूषणमभ्युपगच्छन् दूष्यमभ्युपैति अयथार्थावबोधं प्रतिपद्यते प्रतिपादयितारं प्रतिपत्तारं च, दूषणमात्राभ्युपगमे सति सर्वमेतन्न स्यात् दूषणमात्राभ्युपगमाच्छेषमर्थतोऽवगम्यत इति वितण्डा वितण्डेत्येव वक्तव्यम्—यया वितण्ड्यते सा वितण्डेत्यनुगतार्थया सञ्ज्ञयैव परप्रतिपत्तिविघातः क्रियत इति । तस्मात् यथान्यासमेवास्तु न्याय्यम् ॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ ४ ॥

हेतुलक्षणाभावादहेतवो हेतुसामान्याद्धेतुवदाभासमानास्त इमे सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः । किं पुनर्हेतुभिरहेतूनां सामान्यं येन हेतुवदाभासन्त इति ? प्रतिज्ञानन्तरं प्रयोगः सामान्यं—यथैव हेतवः प्रतिज्ञानन्तरं प्रयुज्यन्ते एवं हेत्वाभासा अपीत्येव सामान्यम् । अन्यतमलिङ्गधर्मानुविधानं वा—यद्वा यत्साधनस्य लिङ्गस्य त्रैविध्यं तदेकतमधर्मानुविधानम्, द्विलक्षणस्यान्यतरधर्मानुविधानं वा विवक्षितम् । साधकासाधकत्वे तु विशेषः हेतोः साधकत्वं धर्मोऽसाधकत्वं हेत्वाभासस्य । किं पुनस्तत् ? समस्तलक्षणोपपत्तिरसमस्तलक्षणोपपत्तिश्च । कः पुनरस्य सूत्रस्यार्थः ? विभागोद्देशो नियमार्थ इत्युक्तम् । किं पुनर्विभागोद्देशेन नियन्तव्यम् ? अनेकधा प्रसृतस्य हेतुहेत्वाभासस्य विस्तरः सङ्क्षेप्तव्य इति । कियता पुनर्भेदेनायं हेतुहेत्वाभासः प्रसृत इति ? कालपुरुषवस्तुभेदानुविधानेनापरिसंख्येयः सामान्यतः साधव-

स्तूपग्रहेण हेतुहेत्वाभासभेदः प्रपञ्चयमानः षट्सप्ततिशतम् । तत्र साध्यव्यापकधर्मभेदः षोडशधा । साध्यैकदेशवृत्तिधर्मोऽप्येवम् । एवं साध्यावृत्तिधर्मभेद इति । विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्टिः । एवं समर्थासमर्थविशेषणविशेष्यभेदादिति ।

तत्र साध्यव्यापकधर्मभेदानां षोडशानामुदाहरणानि—तत्र साध्यतज्जातीयान्यव्यापकः प्रमेयत्वान्नित्योऽनित्यो वेति १ । साध्यतज्जातीयव्यापको विपक्षैकदेशवृत्तिः गौरयं विषाणित्वात् २ । साध्यतज्जातीयव्यापको विपक्षावृत्तिः अनित्यः शब्द उत्पत्तिधर्मकत्वात् ३ । साध्यव्यापकस्तज्जातीयावृत्तिः विपक्षव्यापकः नित्यः शब्दः उत्पत्तिधर्मकत्वात् ४ । साध्यव्यापकस्तज्जातीयावृत्तिः विपक्षैकदेशवृत्तिः नित्यः शब्दः सामान्यविशेषवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात् द्व्यणुकवत् ५ । साध्यव्यापकस्तज्जातीयविपक्षावृत्ति(१)र्यथा नित्यः शब्दः सामान्यविशेषवत्त्वे सति श्रावणत्वात् घटादिवत् ६ । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिः विपक्षाव्यापकश्च अगौरयं विषाणित्वात् ७ । साध्यव्यापकस्तज्जातीयविपक्षैकदेशवृत्तिः नित्यः शब्दोऽस्पर्शवत्त्वात् ८ । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिर्विपक्षावृत्तिः अनित्यः शब्दः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् सामान्यविशेषवत इति सामान्यविशेषसमवायानां निराकरणम्, अस्मदादिप्रत्यक्षत्वादिति परमाणूनां, बाह्यकरणप्रत्यक्षत्वादित्यात्मनः ९ । साध्यतज्जातीयव्यापकोऽविद्यमानविपक्षः सिद्धान्तभेदेनैकान्तवादिनः अनित्यः शब्द उत्पत्तिधर्मकत्वात् १० । साध्यव्यापकस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः अनित्यः शब्दो बाह्य(क-

(१) तज्जातीयश्च विपक्षश्चेति द्वन्द्वः तयोरवृत्तिः तथा चाविद्यमानसपक्षविपक्ष इत्यर्थः ।

रण)न्द्रियप्रत्यक्षत्वात् ११। साध्यव्यापकस्तज्जातीयावृत्तिरविद्यमा-
विपक्षः अनित्यः शब्दः श्रावणत्वात् १२। साध्यव्यापकोऽविद्यमा-
नसजातीयो विपक्षव्यापकः नित्यः शब्द उत्पत्तिधर्मकत्वात् १३।
साध्यव्यापकोऽविद्यमानसजातीयो विपक्षैकदेशवृत्तिः नित्यः शब्दो
बाह्येन्द्रियप्रत्यक्षत्वात् १४। साध्यव्यापकोऽविद्यमानसजातीयो वि-
पक्षावृत्तिः नेदं निरात्मकं जीवच्छरीरम् अनिन्द्रियाधिष्ठानकत्व-
प्रसङ्गात् १५। पक्षव्यापकोऽविद्यमानसपक्षविपक्षः सर्वं नित्यं प्रमेय-
त्वात् १६। त एते पक्षव्यापकाः षोडश। एषां पञ्च हेतवः, शेषा
हेत्वाभासाः, तत्रान्वयव्यतिरेकिणौ द्वौ विपक्षावृत्ती तृतीयनवमौ
एकान्तवादिनोऽन्वयिनावेव दशमैकादशौ व्यतिरेकी(१)पञ्चदश इति।

अथ साध्यैकदेशवृत्तयः—साध्यैकदेशवृत्तिस्तज्जातीयविपक्ष-
व्यापकः पृथिव्यप्तेजोवाय्वाकाशानि अनित्यानि अगन्धवत्त्वा-
दिति १। साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च
सामान्यविशेषवदस्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे अनित्यत्वात् २।
साध्यैकदेशवृत्तिस्तज्जातीयव्यापको विपक्षावृत्तिः अनित्ये वाङ्म-
नसे उत्पत्तिधर्मकत्वात् ३। साध्यैकदेश(शा)वृत्तिस्तज्जातीयावृत्तिः
विपक्षव्यापकः (अ)नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात् ४। साध्यैक-
देशवृत्तिस्तज्जातीयावृत्तिः विपक्षैकदेशवृत्तिः सामान्यविशेषवद-
स्मदादिबाह्यकरणप्रत्यक्षे वाङ्मनसे नित्यत्वात् ५। साध्यैकदेशवृ-
त्तिस्तज्जातीयविपक्षावृत्तिः अनित्यः शब्दो विभागजविभागासम-
वायिकारणकत्वात् ६। साध्यतज्जातीयैकदेशवृत्तिः विपक्षव्यापकः
अनित्याः परमाणवोऽगन्धवत्त्वात् ७। साध्यतज्जातीयविपक्षैकदेश-
वृत्तिः अनित्ये वाङ्मनसे अमूर्तत्वात् ८। साध्यतज्जातीयैकदेशवृत्ति-
र्विपक्षावृत्तिः अनित्ये वाङ्मनसे सामान्यवतोऽस्मदादिबाह्यकरण-

(१) अनन्वयी इति २ पु. पा.।

प्रत्यक्षत्वात् ९ । साध्यैकदेशवृत्तिः तज्जातीयव्यापकः अविद्यमान-विपक्षः सिद्धान्तभेदाश्रयेण अनित्ये रूपविज्ञाने अमूर्तत्वात् वेदनादिवत् १०। (साध्यतज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः अनित्ये शब्दनभसी श्रावणत्वात् १०।) साध्यैकदेशावृत्तिर-विद्यमानसजातिः अनित्ये चक्षुर्विज्ञाने (अ)मूर्तत्वात् रूपादिव-दिति ११। साध्यैकदेशवृत्तिस्तज्जातीयावृत्तिरविद्यमानविपक्ष अनित्ये शब्दनभसी श्रावणत्वात् १२। साध्यैकदेशावृत्तिरविद्यमान-सजातिर्विपक्षव्यापकः (अ)नित्ये वाङ्मनसे उत्पत्तिधर्मकत्वात् १३। साध्यैकदेशवृत्तिरविद्यमानसजातिर्विपक्षैकदेशावृत्तिश्चानित्ये चक्षु-र्विज्ञाने मूर्तत्वात् १४। साध्यैकदेशवृत्तिराविद्यमानसजातिर्वि-पक्षावृत्तिश्च नेदं निरात्मकं शरीरमनिन्द्रियाधिष्ठानत्वप्रसङ्गात् १५। साध्यैकदेशवृत्तिरविद्यमानसपक्षविपक्षः सर्वमनित्यं मूर्त-त्वादिति १६। एते च साध्यैकदेशवृत्तयः षोडश यथोक्ताः सर्वे हेत्वाभासाः ॥

अथ साध्यावृत्तयः । साध्यावृत्तिस्तज्जातीयविपक्षव्यापकः अनित्या पृथिवी अगन्धवत्त्वात् १। साध्यावृत्तिस्तज्जातीयव्यापको विपक्षैकदेशवृत्तिश्च अनित्यः शब्दोऽश्रावणत्वात् २। साध्यावृ-त्तिस्तज्जातीयव्यापको विपक्षा(क्ष)वृत्तिः अर्थः शब्दः अश्रो-त्रग्राह्यसामान्यवत्त्वात् ३। साध्यतज्जातीयावृत्तिर्विपक्षव्यापकः अर्थः शब्दः असामान्यवत्त्वात् ४। साध्यतज्जातीयावृत्तिर्विपक्षवृत्तिश्च(१) कारणवान् शब्दोऽनर्थत्वात् ५। साध्यतज्जातीयविपक्षावृत्तिः नित्यः शब्दोऽसत्त्वात् ६। साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिर्विपक्ष-व्यापकः अस्पर्शः शब्दो द्रव्यत्त्वात् ७। साध्यावृत्तिस्तज्जाती-यविपक्षैकदेशवृत्तिः कारणवान् शब्दो मूर्तत्वात् ८। साध्यावृ-

(१) विपक्षैकदेशावृत्तिश्च इति २ पु० पा०।

त्तिस्तज्जातीयैकदेशवृत्ति(१)र्विपक्षावृत्तिः आश्रयवान् शब्दश्चा-क्षुषत्वात् ९ औलूक्यपक्षे । साध्यावृत्तिस्तज्जातीयव्यापकोऽवि-द्यमानविपक्षः सिद्धान्तभेदाश्रयेण अनित्यः शब्दोऽश्रावणत्वा-त् १० । साध्यावृत्तिस्तज्जातीयैकदेशवृत्तिरविद्यमानविपक्षः अ-नित्यः शब्दो मूर्तत्वात् ११ । साध्यतज्जातीयावृत्तिरविद्यमानवि-पक्षःअनित्यः शब्दोऽसत्त्वात् १२ । साध्यावृत्तिरविद्यमानसजाति-र्विपक्षव्यापकः नित्यः शब्दोऽश्रावणत्वात् १३ । साध्यावृत्तिरवि-द्यमानसजातिर्विपक्षैकदेशवृत्तिः नित्यः शब्दो मूर्तत्वात् १४ । साध्या-वृत्तिरविद्यमानसजातिर्विपक्षावृत्तिः नित्यः शब्दोऽसत्त्वात् १५ । साध्यावृत्तिरविद्यमानसमानविपक्षः अनित्यं सर्वमसत्त्वात् १६ । त एते षोडश साध्यावृत्तयो हेत्वाभासाः विशेषणविशेष्यासिद्धिभेदाच्चतुः-षष्टिर्भवन्तीत्युक्तम् । तत्कथं ? व्यापकाव्यापकविशेषणयोगात् य एव साध्यव्यापकाः षोडश ये च पक्षैकदेशवृत्तयः ते विशेषणविशेष्यासिद्धिभेदेन चतुःषष्टिर्भवन्तीति ।

तत्र व्यापकानां तावदुदाहरणानि । अनित्यः शब्दोऽनभिधे-यत्वे सति प्रमेयत्वात् विशेषणासिद्धः । प्रमेयत्वे सत्यनभिधेयत्वा-दिति विशेष्यासिद्धः । एवं सर्वेषु साध्यव्यापकेषु विशेषणविशे-ष्यासिद्धभेदो द्रष्टव्यः । तान्येव चोदाहरणानि । साध्यैकदेशवृत्ती-नान्तूदाहरणम्—पृथिव्यप्तेजोवाय्वाकाशान्यनित्यानि अनभिधेयत्वे सति अगन्धवत्त्वात् विशेषणासिद्धः । अगन्धवत्त्वे सत्यनभिधे-यत्वादितिविशेष्यासिद्धः । एवं सर्वेषु साध्यैकदेशवृत्तिषु । एवमस-मर्थविशेषणासमर्थविशेष्याश्चतुःषष्टिरेव द्रष्टव्याः । यथा अनित्यः शब्दः कृतकत्वे सति प्रमेयत्वात् प्रमेयत्वे सति कृतकत्वादिति । एवं शेषेषूदाहरणेषु । एवं सन्दिग्धविशेषणविशेष्यभेदा अपि द्रष्टव्याः ।

(१) एकदेशवृत्तिरिति २ पु० पा० ।

यथा मयूरशब्दोऽयं षड्जादिमत्त्वे सति अवर्णात्मकत्वात् अवर्णात्मकत्वे सति षड्जादिमत्त्वात् । त एते उभयपक्षसम्प्रतिपन्ना विद्यमानसाध्यधर्मा उदाहृता इति। एवमन्यतरासिद्धा इति व्यापकाव्यापकभेदेन द्वात्रिंशकं(१) शतम्। ते च पुनर्व्यधिकरणसन्दिग्धासमर्थविशेषणविशेष्यभेदेन द्वानवतं शतम्।एवमप्रासिद्धाश्रयोभयान्यतरपक्षाप्रसिद्ध्या द्वात्रिंशकं शतं ते च पुनः पूर्ववदेव द्वानवतं शतम्। यथाऽग्निमान् देशो धूमवत्त्वात् अस्ति चात्मा इच्छादिगुणत्वात् । असमर्थाव्यापकासिद्धविशेषणानामुदाहरणम्—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वे सति कृतकत्वात् । अव्यापकासमर्थविशेष्याणामुदाहरणम्—अनित्यः शब्दः प्रत्ययभेदभेदित्वे सत्युपलभ्यमानत्वात् । व्यधिकरणविशेष्याणामुदाहरणम्—अस्ति प्रधानं भेदानामन्वयदर्शनात् । व्यधिकरणविशेषणानामुदाहरणम्—रूपादिशब्दाश्चन्दनशब्दादनन्ताभिन्नार्थाः समुदायसमुदायसम्भवे सति तेन व्यपदेशात्।एतदेव व्यधिकरणविशेषणविशेष्यस्योदाहरणं विपर्ययेण । अन्यथासिद्धोदाहरणम् । अन्येषां अभ्यासान्नित्यः शब्दः । सन्दिग्धाप्रसिद्धविशेषणानामुदाहरणम् यथा सन्दिह्यमानधूमादिभावोऽग्निमान् देशो धूमवत्त्वे सति प्रकाशकत्वात् विपर्ययेण सन्दिग्धविशेष्या वक्तव्याः । एवं सन्दिग्धाप्रसिद्धाप्रसिद्धा उभयान्यतरासिद्धा व्यापकाव्यापकभेदेन चतुःषष्टिर्भवन्तीति । ते च पुनः पूर्ववद्भेदेन शतत्रयं चतुरशीतम्। एवमन्यथासिद्धभेदो द्रष्टव्यः । एवं विरुद्धविशेषणविरुद्धविशेष्याश्च सर्वत्र द्रष्टव्या इति । एषां तूदाहरणानि हेत्वाभासवार्त्तिके द्रष्टव्यानि स्वयं चाभ्यूह्यानि । त एते

---

(१) द्वाभ्यामूना त्रिंशदिति व्याख्यातं तात्पर्यटीकायां वाचस्पतिमिश्रैः ।

हेतवो(१) हेत्वाभासाश्चासङ्कीर्णविशेषणाविशेष्यभेदेन द्वे सहस्रे द्वात्रिंशके(२) असिद्धादिसमुच्चयेनानन्तो भेद इति । साध्याद्यत्तपरस्त्वसत्त्वान्न विशेषणयोगिन इत्यतो नाभिधीयन्ते । त एते विद्यमानसाध्यव्यापकाव्यापकधर्माः(३) प्रपञ्चत उक्ताः । तत्र मुख्यासिद्धभेदाः षोडश ये (ते) पक्षावृत्तयः । अनैकान्तिकास्त्वसङ्कीर्णा मुख्यतः षडेव । साध्यव्यापकवर्गे विरुद्धाश्चत्वार एव । (तस्मिन्) अन्तिमस्तु पक्षमात्रधर्मत्वात् अनुपसंहार्येव । शेषा हेत्वाभासाः तेऽसिद्धानैकान्तिकविरुद्धा अव्यापकासिद्धभेदेन(४) सङ्कीर्णा उदाहरणेषु स्वयमूह्या इति ।

केचित्तु विरुद्धाव्यभिचारिणमनैकान्तिकं वर्णयन्ति । तन्नासत्त्वात्—नायमस्तीत्युक्तम् । उपेत्य तस्य पञ्चविंशतिधा भेद पञ्चानां हेतूनां सरूपासरूपप्रतिसन्धानात् पञ्च पञ्चका भवन्तीति । तेषां तु सर्वेषां नोदाहरणानि सन्तीति नोदाह्रियन्ते । त एते हेत्वाभासाः सङ्क्षेपेणैतावता भेदेन भेदवन्तस्तेषां सङ्ग्रहार्थं हेत्वाभासानां विभागोद्देशार्थं सूत्रम् । लक्षणत एव पञ्चत्वं गम्यत इति चेत्—यान्येतानि पञ्च हेत्वाभासानां लक्षणसूत्राणि तैरेव पञ्चत्वं गम्यत इति नियमार्थं सूत्रमनर्थकम् ? । नानर्थकम् लक्षणस्येतरेतरव्यवच्छेदकत्वात्—व्यवच्छेदकं लक्षणं न पुनर्नियमार्थम्—न हि नियमो लक्षणेन गम्यत इति ॥

अनैकान्तिकः सव्यभिचारः ॥ ५ ॥

---

(१) तत्र तत्र हेत्वभावो—पा० २ पु० । एत्वाभावो—इति क्वचित् ।
(२) द्वात्रिंशे द्वे सहस्रे भवत इति तात्पर्यटीकायाम् ।
(३) अव्यापक इति २ पु० नास्ति ।
(४) तेऽसिद्धानैकान्तिका विरुद्धाव्यापकप्रसिद्धाव्यापकभेदेन इति २ पु० पा० ।

तेषामनैकान्तिकः सव्यभिचारः । एकस्मिन्नन्ते नियत ऐ-कान्तिकः विपर्ययादनैकान्तिकः । कः पुनरयं व्यभिचारः ? साध्यतज्जातीयान्यवृत्तित्वम्—यत् खलु साध्यतज्जातीयवृत्तित्वे सति अन्यत्र वर्तते तद्व्यभिचारि, तद्वृत्तित्वं व्यभिचारः सर्वोऽयं पदार्थभेदोऽन्तद्वयेऽवतिष्ठते अन्यत्र प्रमेयात्,(१) नित्यश्चानित्यश्च व्यापकश्चाव्यापकश्च इत्येवमादिः।तत्र यो हेतुरुपात्त उभावन्तावा-श्रित्य प्रवर्तते सोऽनैकान्तिकः ।

अनैकान्तिक इति किं पुनरयं पर्युदास उत प्रसज्यप्रतिषेध इति ? किं चातः ? यदि पर्युदासः सर्वानैकान्तिकता—ऐकान्तिकादन्योऽनैका-न्तिक इति ब्रुवतां भवतां सर्वोऽनैकान्तिकः प्राप्तः, एवं चैको हेत्वाभा-स इति प्राप्तम् । अथ प्रसज्यप्रतिषेधः ? तथाप्यैकान्तिकाभावोऽनै-कान्तिक इति प्राप्तम्—तस्य व्यभिचारोऽर्थो नास्तीति अयुक्तोऽनै-कान्तिको हेत्वाभासः ?। नायं पर्युदासपक्षः किन्तु प्रसज्यप्रतिषेधः। प्रसज्यप्रतिषेधो ऽभाव इति चेत् ? नाभावो धर्मविशेषकत्वात्—ध-र्मोऽयं विशिष्यते—य एकान्ते सन्नियतो धर्म इति न भवति,(२) न पुनरभावः—अभावे विशेषणविशेष्यासम्भवान्नाभाव एकान्तसन्नि-यतो नानैकान्तिकः(३) सन्नियतः । कथम् ? अब्राह्मणवदिति—यथा अब्राह्मणशब्दः प्रसज्यप्रतिषेधविषयत्वेन प्रवर्तमानो यदुत्तरपदं त-त्प्रतिषेधतीति न पुनरभावं प्रतिपादयति तथेहापीत्यदोषः । उ-दाहरणं—नित्यः शब्दः अस्पर्शवत्त्वात् शब्दस्यास्पर्शत्वमिति ष-ष्ठ्या भेदः प्रदर्श्यते । किं पुनस्तत् ? स्पर्शानाश्रयस्य स्वात्मसत्ता-नुभवोऽस्पर्शत्वम् स्पर्शानाधारस्य सत्तासम्बन्धो वा, उभयं च

(१) प्रमेयत्वादिति २ पु० पा०। टीकासंमतस्तु प्रमेयादित्येव ।
(२) स नियतो धर्मो भवति इति २ पु० पा० ।
(३) एकान्तसन्नियतोऽतो ऽनैकान्तिक इति २ पु० पा० ।

शब्दव्यतिरिक्तमित्यर्थवती षष्ठी । कुतः पुनरेतत् ? तद्भावे भावात् तदभावेऽभावादिति—यत्र खलु स्पर्शवत् सत्तामनुभवति न तत्रास्पर्शशब्दः प्रयुज्यत(१)इति । यच्चासत् तत्रापि न प्रयुज्यते यदस्पर्शं सत्तानुभावि तत्र प्रयुज्यत इति । वाक्यार्थाभ्यनुज्ञानाच्च पदार्थाभ्यनुज्ञा—स्पर्शानाधारस्य वस्तुनः सत्तासम्बन्ध इति यो वाक्यार्थः स एवास्पर्शत्वशब्दस्यार्थः । अतिदेशानुपपत्तिरनुक्तत्वादिति चेत्—अनैकान्तिकः सव्यभिचार इति न क्वचिदनैकान्तिक उक्तः इहानैकान्तिकग्रहणात् सव्यभिचारो गम्येत(२) अतो न युक्तमनैकान्तिकः सव्यभिचार इति ? नेदमयुक्तम्—लोकतस्तदधिगतेः—यत्र पुनर्लोकतो न गम्यते तत्र शास्त्रमर्थवत्, यत्र पुनर्लोकत एव गम्यते तत्रोपदेशोनर्थकः लोकतश्चैतद्गम्यते उभयान्तमनियतोऽनैकान्तिक इति । यदि च यल्लोकतो गम्यते तदनुक्तमिति मन्यसे दुःखादीन्यपि देशयितव्यानि किमिदं दुःखमिति, तस्मात् पेलवमेतदिति । अव्यापकत्वादलक्षणमेतदिति चेत्—अथापीदं स्यादनैकान्तिकलक्षणेन न सर्वोऽनैकान्तिको व्याप्यते यथा असाधारणमिति । नानेनैव सङ्ग्रहात् । कथमिति ? व्यावृत्तिद्वारेणाभिधीयमानोऽयमुभयान्तव्यावृत्तेरनैकान्तिक इति ।

अपरे पुनः प्रकरणसममनैकान्तिक एवान्तर्भावयन्ति । कथमिति ? अनित्य आत्मा शरीरादन्यत्वादिति शरीरादप्यन्यन्नित्यमनित्यं च दृष्टमतोऽनैकान्तिक इति । तैस्तु न लक्षणव्यभिचारोऽवगतो नोदाहरणव्यभिचार इति, अनैकान्तिकः सव्यभिचार इत्येतल्लक्षणं

---

(१) प्रयुज्यत इत्यस्य स्थाने सर्वत्र प्रसज्यत इति २ पु० पा० ।

(२) यत इहानीमनैकान्तिकग्रहणानुपपत्तिरनुक्तत्वात्सव्यभिचारो गम्येत इति २ पु० पा० ।

व्यभिचारिणः, यदि चानेन प्रकरणसमसङ्ग्रहो भवति प्राप्तस्तर्हि लक्षणस्य व्यभिचारः न पुनरुदाहरणव्यभिचारोऽनैकान्तिक-लक्षणव्यभिचार इति। (न) लक्षणस्य तूभयं दोषः लक्ष्याव्याप्तिर-लक्ष्यव्याप्तिश्चेति वक्ष्यमाणकं च प्रकरणसमस्य लक्षणमीक्षितव्यम्।

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ ६ ॥

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति । कोऽस्य सूत्र-स्यार्थः ? अभ्युपगतार्थविरोधी विरुद्धः । एवं च सर्वानुक्तवि-रुद्धसङ्ग्रहः-यावान् कश्चन विरुद्धभेदः सर्वोऽसावनेन सङ्गृहीत इति । यस्मादभ्युपगतं बाधते अभ्युपगतेन बाध्यते । नन्वेवमेको हेत्वाभासो विरुद्धः प्राप्नोति ? सत्यमेक एव हेत्वाभासो विरुद्धः तस्य तु सामान्येन विरुद्धत्वेन संगृहीतस्य पञ्चधोपदेशो यथा प्रमेय-मित्यनेन षोडशपदार्था इति । पृथगभिधानं तर्हि विरुद्धस्य न कर्त-व्यम् ? न नकर्तव्यं—सामान्यतोऽधिगतस्य विशेषज्ञापनार्थं—यथा प्रमे-यस्यैव । तत्रानैकान्तिकादिर्हेत्वाभासो द्विरूपोऽनैकान्तिकादिर्विरु-द्धश्च। एतस्मिंस्तु विरुद्धत्वेनैवत्यसाधारणतया तृणोलपादिन्यायेन नि-ष्कृष्याभिधीयते । तस्मादनैकान्तिकादिषु निमित्तद्वयसमावेशात् संज्ञाद्वयसमावेशः विवक्षिततज्जातीयान्यवृत्तित्वेनानैकान्तिकत्वम् हेतुविषयस्वरूपबाधारूपेण तु विरुद्धः । एवं सर्वत्र । उदाहरणम् "तदेतत् त्रैलोक्यं व्यक्तेरपैति नित्यत्वप्रतिषेधात्, अपेतमप्यस्ति वि-नाशप्रतिषेधात्"(१) विनाशप्रतिषेधादित्यनेन (न) नित्यमभ्यनुज्ञातं नित्यत्वप्रतिषेधादित्यनेन प्रतिषिद्धम् । एते ते वाक्ये परस्परार्थबा-धिते तयोश्च परस्परार्थबाधा विरोधः । प्रतिज्ञाहेत्वोर्वा विरोधः— यो वा प्रतिज्ञाहेत्वोर्विरोधः स विरुद्धो हेत्वाभासः । ननु प्रतिज्ञा-विरोधः पृथगुपदिष्टो निग्रहस्थाने पृथक् क हेत्वाभासः तस्मान्न

(१) योगभाष्यस्थमेतद्वाक्यम् ।

प्रतिज्ञाहेत्वोर्विरोधो वक्तव्य इति । नैष दोषः । उभयाश्रितत्वाद्विरोधस्य । विवक्षातोऽन्यतरनिर्देशः प्रतिज्ञाहेत्वोर्विरोध इति प्रतिज्ञाहेतू आश्रित्य उभयाश्रितो भवति, तत्र यदा प्रतिज्ञया विरोधो विवक्षितस्तदा प्रतिज्ञाविरोध इत्युच्यते यदा प्रतिज्ञाया हेतुविरोधो हेतोर्वा प्रतिज्ञाविरोधकत्वं तदा विरुद्धो हेतुरित्यतः प्रतिज्ञाविरोधो हेतुविरोधो वेत्यदोषः । हेतुविरोधोदाहरणम्—नित्यः शब्द उत्पत्तिधर्मकत्वात्, प्रतिज्ञाविरोधस्योदाहरणम्—नास्त्यात्मेति, प्रतिज्ञाहेतुविरोधोदाहरणम्—गुणव्यतिरिक्तं द्रव्यम् अर्थान्तरस्यानुपलब्धेः, हेतुविरोधोदाहरणम्—नास्त्येको भावः समूहे भावशब्दप्रयोगादिति समूह इति ब्रुवाणेनैकोऽभ्युपगतो भावो भवति एकः समुच्चयो हि समूह इति ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ॥ ७ ॥

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः । कस्मात् प्रकरणचिन्ता ? तत्त्वानुपलब्धेः—यस्मादुपलब्धतत्त्वेऽर्थे निवर्तते चिन्ता तस्मात् सामान्येनाधिगतस्य या विशेषतोऽनुपलब्धिः सा प्रकरणचिन्तां प्रयोजयति । उदाहरणं—नित्यः शब्दोऽनित्यधर्मानुपलब्धेः अत एव प्रकरणमित्यतो न हेतुः । नन्वयं साध्याविशिष्ट एव यथा शब्दस्य नित्यत्वं साध्यं तथाऽनित्यधर्मानुपलब्धिरपीति ? नाविशिष्टः तस्यैव प्रकरणप्रवृत्तिहेतोर्धर्मस्य हेतुत्वेनोपादानात् यत्र साध्येन समानो धर्मो हेतुत्वेनोपादीयते स साध्याविशिष्टः, यत्र पुनः प्रकरणप्रवृत्तिहेतुरेव स प्रकरणसमः ।

ये तु संशयहेतुत्वात् प्रकरणसमानैकान्तिकयोरभेदं वर्णयन्ति—तेषां प्रत्यक्षानैकान्तिकप्रकरणसमानामभेदः प्राप्नोति

प्रत्यक्षमपि संशयकारणमिति। समूहः संशयस्य कारणमित्यतो न प्रत्यक्षे प्रसङ्गः ?—सामान्यदर्शनं विशेषाव्यवस्था विशेषस्मृतिश्च समूह इति संशयस्य कारणम्, नैकं प्रत्यक्षमतो न प्रत्यक्षप्रसङ्गः ? समूहः कारणमित्यभिधानादप्रतिषेधः—समूहः कारणमित्येवं ब्रुवता न प्रत्यक्षस्य संशयकारणत्वं प्रतिषिद्धं भवति तस्मात् प्रसङ्गस्तदवस्थ एवेति। उभयधर्मानुपलब्धावन्यतरधर्मोपादानं प्रकरणसमार्थः। यत्र खलूभयविशेषानुपलब्धिस्तत्रान्यतरविशेषस्योपादानं यत्प्रकरणापनोदाय स प्रकरणसमो हेत्वाभासः उभयविशेषानुपलब्धेरभिधानाशक्यत्वात् न ह्युभयविशेषाऽनुपलब्धिः शक्या दर्शयितुम्। शरीरादन्यत्वं तु न सूत्रार्थः न ह्ययं शरीरादन्यत्वमुपलभमानोऽपि यदा तत्त्वमुपलभते तदा प्रवर्तत इति, यदा तत्त्वं नोपलभते शरीरारादन्यत्वमुपलभमानोऽपि तदा प्रवर्तत इति। शरीरादन्यत्वं चाऽनैकान्तिकं अतश्च न सूत्रार्थः॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः॥ ८॥

साध्याविशिष्टः साध्यत्वात् साध्यसमः। साध्येनाविशिष्टो यः साधनधर्मः साध्यवत् प्रज्ञापयितव्यः स साध्यसमो हेत्वाभासः। तस्योदाहरणम्—द्रव्यं छाया गतिमत्त्वादिति। यथैव द्रव्यत्वं छायायाः साध्यं तथा गतिमत्त्वमपीति। गतिमत्त्वं देशान्तरदर्शनादिति चेत्—अथापीदं स्यात् गतिमतीयं छाया देशान्तरे दर्शनादिति—यत् खलु देशान्तरेषूपलभ्यते तद्गतिमत् यथा कुम्भः तथा छाया तस्माद् गतिमतीति ? नाश्रयासिद्धत्वात्—एवमप्याश्रयासिद्धो हेतुः सति द्रव्यभावे छायाया देशान्तरे दर्शनं समर्थं स्यात् द्रव्यभावस्त्वसिद्धः तस्मादाश्रयासिद्धो हेतुः। उपेत्य देशान्तरे दर्शनं तस्यान्यथासिद्धेरसिद्धेः—यत्तु देशान्तरे दर्शनं छायायास्तदन्यथा

भवति अन्यथाभवन्नार्थं साधयति । कथमन्यथा ? आवरणसन्तानादसान्निधिसन्तानस्तेजस इति । आवरके द्रव्ये सर्पति तेजसोऽसन्निधिविशिष्टं द्रव्यं यदुपलभ्यते तत्तु छायेत्युच्यते ।

सोऽयमसिद्धस्त्रेधा भवति प्रज्ञापनीयधर्मसमान आश्रयासिद्धः अन्यथासिद्धश्चेति । नित्यः शब्दोऽस्पर्शवत्त्वादित्येतत्त्न नोदाहरणम्—न ह्यस्पर्शत्वं शब्दस्य ज्ञापनीयं नाश्रयासिद्धं नान्यथासिद्धमिति । यथा चास्माभिः सूत्रं वर्णितं तथा चोदाहृतम् । तथायमसम्बद्धो दोषः न सूत्रार्थो विज्ञातो नाक्षरार्थो न हेत्वाभासो न दृष्टान्ताभास इति ॥

कालात्ययापदिष्टः कालातीतः ॥ ९ ॥

कालात्ययापदिष्टः कालातीतः । यस्यापदिश्यमानस्य कालात्ययेनैकदेशो युज्यते स एकदेशात्ययात् कालात्ययापदिष्टः कालातीत इत्युच्यते । उदाहरणं–नित्यः शब्दः संयोगव्यङ्ग्यत्वादिति उपलब्धिकाले संयोगो नास्ति, सोऽयं संयोगो हेतुविशेषणत्वेनोपात्त उपलब्धिकालमत्येति यदोपलभ्यते तदा संयोगो नास्ति दारुव्रश्चने दारुपरशुसंयोगनिवृत्तौ शब्दोपलब्धिरिति । नन्वयमनैकान्तिक एव संयोगव्यङ्ग्यत्वादिति–अनित्यमपि संयोगेन व्यज्यमानं दृष्टम् यथा घट इति ? न, संयोगव्यङ्ग्यत्वेनावस्थानस्य साध्यत्वात्–न ब्रूमो नित्यः शब्द इति, अपि त्ववतिष्ठते शब्द इति प्रतिज्ञार्थः, तथा च संयोगव्यङ्ग्यत्वादित्ययं हेतुर्नानैकान्तिकः, न ह्यनवस्थितं किञ्चित् संयोगेन व्यज्यमानं दृष्टमिति ।

अवयवविपर्यासवचनमपि न सूत्रार्थः सामर्थ्यात् न हि पश्चादभिधीयमानो हेतुरुदाहरणसाधर्म्यादित्येतद्धेतुलक्षणं जहाति अजहद्धेतुलक्षणं न हेत्वाभासो भवितुमर्हतीति । अवयवविपर्यासवचन-

मप्राप्तकालमिति(१) निग्रहस्थानमुक्तम्, तदेव पुनरुच्यत इति । स-मीकृतेऽभिधानान्निग्रहस्थानमिति चेत् ?—अथ मन्यसे यस्मात् समी-कृते पश्चादभिधीयते ततो न निग्रहस्थानमिति ?, केन समीकृत इति वक्तव्यम् ? यदि हेत्वनभिधानेन समीकृतः ? किमत्र हेतोरसाम-र्थ्यम् ? एतदस्यासामर्थ्यं यदयं पश्चादभिधीयत इति ? नैतद्धेतो-रसामर्थ्यं यदयं पश्चादभिधीयत इति, अपि तु वक्तुरिति, न हि स्वतन्त्रो हेतुः साधनमपि तु साधयितृतन्त्रत्वान्न हेतुदोषः साम-मर्थ्याच्चेत्युक्तम् । तस्मादवयवविपर्यासवचनं न सूत्रार्थो न समी-कृताभिधानमिति ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ १० ॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । वचनविघातो यः क्रियते सामान्यशब्दस्य विशेषानेकसम्बन्धित्वे सति अविव-क्षिताध्यारोपेण छलं तद्वेदितव्यम् ।

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छ-लं चेति ॥ ११ ॥

तत्त्रिविधमिति नियमार्थम्--पूर्ववदनेकधा भिन्नं छलं संगृह्यत इति ।

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरक-ल्पना वाक्छलम् ॥ १२ ॥

अविशेषाभिहितेऽर्थे इति सूत्रम् । अविशेषाभिहितं सामान्यश्रुति वाक्यं पदं वा अविशेषाभिहितमित्युच्यते । वाक्यं सामान्यश्रुति यथा नवकम्बलोऽयमिति । पदं सा-मान्यश्रुति यथा अश्वोऽश्व इति । अविशेषशब्दानभिधा-नं प्रयोगाभावात्—न ह्यविशेषशब्देन कस्यचिदभिधानं सम्भ-

(१) गौ० सू० ५ अ. २ आ. ११ सू० ।

वति, न चास्य प्रयोगो युक्त इति, वाक्यं च सर्वमुच्चरद्विशेषमेव प्रत्याययतीति सामान्यप्रत्यायनमयुक्तम् ? न, प्रकरणादीनन्तरेण श्रुतिमात्रात्तदुपपत्तेः—यदा प्रकरणादिनिरपेक्षं वाक्यमुच्चार्यते श्वेतो धावतीति तदा वाक्यं श्रुतिसामान्यात् श्रोतुः सम्मोहः सम्मोहे सत्यविवक्षितमर्थमध्यारोप्य प्रतिषेधति । एवं पदेऽपीति । अर्थग्रहणं शब्दनिराकरणायार्थविषयं छलं न शब्दविषयमिति, न ह्ययं प्रतिषेद्धुं शक्नोति नायं नवकम्बलशब्द इति । तस्य प्रत्यवस्थानं—ज्ञात्वाऽज्ञात्वा वा प्रयोगात् प्रतिषेधानुपपत्तिः—यदि तावन्नवकम्बलस्यार्थं बुद्ध्वा नायं नवकम्बल इति प्रत्यवतिष्ठते तदार्थान्तरमाह अन्यद्बुध्यतेऽन्यत्प्रतिषिध्यत इति । अथ पुनर्नैव नवकम्बलस्यार्थं बुद्ध्यते तथाप्यज्ञानमिति ।

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् ॥ १३ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम् । सामान्यस्य विवक्षितार्थातिक्रमोऽतिसामान्यमुदाहरणम् विद्याचरणसम्पन्नो ब्राह्मण इति । परन्तु ब्राह्मण्यं विद्याचरणसम्पन्नत्वे हेतुरिति कृत्वा प्रत्यवतिष्ठते स्तुत्यर्थे वाक्येऽन्यथाकारं प्रत्यवस्थानम् । उभयथा दोषो बुद्ध्वाऽबुद्ध्वा वेति ॥

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥ १४ ॥

धर्मविकल्पनिर्देश इति सूत्रम् । धर्मविकल्पनिर्देशशब्देनाभिधानधर्मो द्वेधाऽभिधीयते प्रधानं भाक्तश्च, मञ्चा इति काष्ठसंघातेषु प्रधानम्—मञ्चशब्दः क्रोशनक्रियाया असम्भवमीक्षित्वा स्थानिषु पुरुषेषु भाक्तः । सोऽयमभिधानाभिधेयव्यहार एवं व्य-

वतिष्ठते(१) य एतस्मिन्नन्यथाकारप्रतिषेधः तदुपचारच्छलमिति। अस्यापि पूर्ववत् प्रतिषेधो ज्ञात्वाऽज्ञात्वा वेति॥

वाक्छलमेवोपचारच्छलं तदविशेषात्॥ १५॥

न तदर्थान्तरभावात्॥ १६॥

वाक्छलमेवोपचारच्छलमिति सूत्रम्। एकत्वमविशेषात्। कोऽविशेषः? इहाप्यर्थान्तरकल्पना तत्रापीति? न, तदर्थान्तरभावात्। अविशेषादित्यस्य हेतोरनेन सूत्रेणासिद्धतामुद्भावयति। कथमसिद्धिः? एकत्र वस्तुसद्भावः प्रतिषिध्यते नैव क्रोशन्ति मञ्चा इति एकत्र वस्त्वभ्यनुज्ञाय कम्बलयोगमभ्युपगम्य कम्बलस्यानेकता धर्मः प्रतिषिध्यत इति। यत्र धर्मः प्रतिषिध्यते त्रय धर्मी सोऽयमतिमहान् विशेषः।

अथ मन्यते किं नोऽनेन(२) विशेषेण इहाप्यर्थान्तरकल्पना तत्रापीति।

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः॥१७॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः। कोऽस्य सूत्रस्यार्थः? विरोधः द्वित्वमभ्यनुज्ञायमानं निवर्तयति। कतमेन पुनर्न्यायेन द्वित्वमभ्यनुज्ञायमानं वाक्छलमेवोपचारच्छलं तयोरेकत्वं ब्रुवता सामान्यच्छलमन्यदित्यभ्यनुज्ञातं भवति विशेषणानर्थक्यं वा, यदि सर्वं छलमेकमेवेत्यभ्युपगमः वाक्छलमेवोपचारच्छलं तदविशेषादिति व्यर्थं विशेषणम्। कथमेकत्वप्रसङ्गः? किञ्चित्साधर्म्याद्यथनर्थान्तरकल्पना अविशेषादेकत्वम् (सर्वच्छलमेकं) प्राप्नोति किञ्चित्साधर्म्यादिति। किं पुनस्तत्? वचनविघातः अर्थविकल्पोपप-

---

(१) व्यवस्थित इति २ पु० पा०।

(२) कथं मन्यसे किं तेऽनेन इति २ पु० पा०।

त्तिश्च तत् सर्वस्मिँश्छल(१) इति ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः । साधर्म्येण प्रत्यवस्थानं वैधर्म्येण प्रत्यवस्थानं जातिरिति । प्रथमपक्षानुयोगं(२) दर्शयति स्थापनायां सत्यां प्रतीपमवस्थानं प्रत्यवस्थानं प्रतिपक्षवदिति । सूत्रार्थस्तु यथाश्रुति न पुनरुदाहरणसाधर्म्येण उदाहरणवैधर्म्येण चेति । किमर्थमिदमुच्यते ? व्यापकार्थ—यदि यथाश्रुति सूत्रार्थो भवति तदा सर्वजातयो व्याप्यन्ते येन केनचित् साधर्म्यं येन केनचिद्वैधर्म्यमिति । लक्षणे जातीनामव्यापकत्वं तु दोषः । भाष्ये उदाहरणसाधर्म्यमुदाहरणवैधर्म्यं चोदाहरणार्थमिति यथा चोदाहरणेन एवमनुदाहरणेनापीति ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १९ ॥

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । अन्यथा स्थितस्यान्यथाऽभिहितस्य अप्रतिपत्तिर्विप्रतिपत्तिश्च स्वपरार्थोत्तरा संवित्तिरप्रतिपत्तिः(३) समर्थे साधने । निग्रहस्थानप्राप्तौ कथमप्रतिपत्तिः विप्रतिपत्तिः ?—यदायं साधयिता समर्थेन साधनेनोपात्तेन परेण जात्यादिभिराकुलीकृतः उत्तरं न प्रतिपद्यते तदा कथमप्रतिपत्तिः कथं वा विप्रतिपत्तिरिति ? तदाऽपि साधनस्यैव सामर्थ्यापरिज्ञानादसमर्थमेतत् साधनमित्यप्रतिपत्तिर्विप्रतिपत्तिरिति ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् । ता एता जातयः कि-

---

(१) तस्मिँश्छल इति २ पु० पा० ।

(२) प्रथमपक्षाप्रयोगमिति २ पु० पा० ।

(३) सम्प्रतिपत्तिरिति २ पु० पा० ।

पक्षो भवन्ति कियन्ति वा निग्रहस्थानानि इत्यवधारणार्थमाह ।
तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वमिति । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात् तयोश्च विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पाद्बहयो जातयो बहूनि निग्रहस्थानानि भवन्ति। कतमा जातयः साधर्म्यप्रत्यवस्थानात् कतमाश्च वैधर्म्यप्रत्यवस्थानात् कतमानि निग्रहस्थानानि विप्रतिपत्तिविकल्पात् कतमानि वाऽप्रतिपत्तिविकल्पाद्भवन्तीति प्रतियोगं(१) विशेषलक्षणेषूत्प्रेक्षणीयानीति । एते प्रमाणादयः पदार्था उद्दिष्टा लक्षिताश्च यथोद्देशं च यथालक्षणं च परीक्षा वर्त्तिष्यत इति ॥

तन्त्रप्रतिज्ञा संसारस्तन्निवृत्तिश्च संविदा ।
उद्देशो लक्षणं चैव तत्त्वानामिह कीर्तितम्(२) ॥

इति—औद्द्योतकरे न्यायसूत्रवार्त्तिके प्रथमाध्याये द्वितीयमाह्निकम्(३) ॥

समाप्तश्चायं प्रथमोऽध्यायः ॥

---

(१) पर्यनुयोगमिति क्वचित् ।
(२) कीर्तनम्—पा० २ पु० ।
(३) औद्द्योतकरे न्यायवार्त्तिके प्रथमोऽध्यायः समाप्तः—पा० २ पु० ।

न्यायवार्त्तिके

द्वितीयोऽध्यायः।

ॐ नमः परमात्मने।

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेत्युक्तम्। तत्रोद्देशलक्षणे पूर्वाध्याय एव व्याख्याते परीक्षा वर्तिष्यत इति। तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवती परीक्षावचनमिति। पूर्वं प्रमाणमुद्दिष्टं लक्षितं च पूर्वमेव तत्परीक्ष्यत इत्यवसरप्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते। किमर्थं क्रमभेदः? परीक्षाङ्गत्वात् पूर्वं संशयः परीक्ष्यते तथा चोक्तम्—"विमृष्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः"। ननु चोक्तं नायं निर्णये नियमो विमृष्य पक्षप्रतिपक्षाभ्यां सर्वत्र निर्णय इति, वादे पक्षप्रतिपक्षाभ्यामेव, शास्त्रे च विमर्षवर्जमिति। शास्त्रे चायं विचारः तस्मान्न संशयपूर्वक इति, संशयपूर्वको हि विचारस्तर्कविषय एव, नायं तर्कविषय इति। सत्यम् न निर्णये नियमो, विचारे(तु) हि नियमो, निर्णय एवं चान्यथा च, विचारः संशयपूर्वक एव। यदप्युक्तम् वादे शास्त्रे च विमर्षवर्जमिति, वादिप्रतिवादिनावधिकृत्य तदुक्तम्। शास्त्राभ्युपगमे च वादिप्रतिवादिनोर्न संशयः उभयोर्निश्चितत्वात्। शास्त्रे च न संशयः। निश्चितस्य वस्तुनः शास्त्राभ्युपगमेनाभ्युपगमात्। तत्र वादिप्रतिवादिनौ तावद्विचारयतः किं नित्यसाधनं बलीयः आहोऽनित्यसाधनमिति। शास्त्रेऽपि च विचारः साधनसामर्थ्यासामर्थ्यपरिज्ञानार्थम्। तत्र संशय इति। तस्मात् संशयपूर्वक एव विचारस्तन्मूलकत्वात् परीक्षा-

विधेः संशयः पूर्वं परीक्ष्यत इति। तत्र संशयो वस्तुस्वरूपानवधारणात्मकः प्रत्ययः। निरुक्तिव्याघात इति चेत्—अनवधारणात्मकश्च प्रत्ययश्चेति व्याहतम्। न। प्रत्ययस्य स्वरूपानवधारणाद्व्यवच्छेदात्मकत्वं स्वरूपमस्य (व्यव)परिच्छिद्यते। न पुनरनेन विषयस्वरूपमवधार्यत इति सोऽयं संशयः। समानधर्मोपपत्तेरित्येवमादिभ्यस्तस्याक्षेपः॥

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः॥ १॥

समानानेकधर्माध्यवसायादित्येवमादि सूत्रम्। तस्य यथाश्रुत्युत्थानमिति। समानस्य धर्मस्याध्यवसायात् संशयो न समानधर्ममात्रादुपलभ्यमानो धर्मः संशयहेतुरिति धर्मधर्मिग्रहणे वा संशयाभाव इति। समानमनयोर्धर्ममुपलभ इति धर्मधर्मिग्रहणे क संशय इति। धर्मिणोऽर्थान्तरभावाद्वा न संशयः न ह्यन्यस्मिन्नुपलब्धे ऽन्यत्र संशय इति। अथवा न समानधर्माध्यवसायः संशयस्य कारणं व्यवच्छेदात्मकत्वात् संशये च तदभावादिति। एतेनानेकधर्माध्यवसायादिति व्याख्यातम्। अधिगतानधिगतयोर्न संशयः अधिगते वस्तुनि संशयो न युक्तः निर्णीतत्वात् नानधिगते अदृष्टत्वात्। न समानधर्माध्यवसायात् एव संशयः सत्यप्यभावात्—सत्यपि समानधर्माध्यवसाये न दृष्टः संशयः यथा कृतकत्वाच्छब्दे। न। समानधर्माध्यवसायादेव संशयोऽन्यथापि भावात्—अन्यथापि दृष्टः संशयः यथा विरुद्धाव्यभिचारिधर्मद्वयसन्निपाते। तत्त्वानुपलब्धेश्च संशयः यथा प्रकरणसमे। एकवृत्तित्वाच्च न समान—एकवृत्तिरयं धर्मो न चैकवृत्तिः समानो भवितुमर्हतीति॥

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ २ ॥

एतेन विप्रतिपत्त्यव्यवस्थाध्यवसायादिति प्रत्युक्तम् । विप्रतिपत्त्यव्यवस्थाध्यवसायाद संशयो न विप्रतिपत्तिमात्राद-व्यवस्थामात्राद्वा ॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः ॥ ३ ॥

विप्रतिपत्तौ च सम्प्रतिपत्तेः न विप्रतिपत्तिरस्तीति सूत्रार्थः ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया नाव्यवस्था विद्यत इति सूत्रार्थः ॥

तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ॥ ५ ॥

तथाऽत्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः समानधर्मादीनां सातत्यान्नित्यः संशय इति सूत्रार्थः ॥

अस्योत्तरम् ।

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशये नासंशयो नात्यन्तसंशयो वा ॥ ६ ॥

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात संशये नासंशयो नात्यन्तसंशयो वा । न सूत्रार्थापरिज्ञानादिति सूत्रार्थः । यत्पुनरेतद्धर्मधर्मिग्रहणे संशयाभाव इति ? तन्नापरिज्ञानात्—न ब्रूमो योऽसौ धर्म्युपलभ्यते तस्य धर्ममुपलभ इति, अपि तु यौ मया पूर्वं स्थाणुपुरुषावुपलब्धौ तयोरयं समानो धर्म उपलभ्यत इति । एतेनैकत्वाच्चित्तत्वादिति परिहृतम् । यत्पुनरेतन्नार्थान्तराध्यवसायादन्यत्र संशय इति ? नानभ्युपगमात् ।

अपरे न अर्थान्तरभावमात्रं मया संशयहेतुत्वेनोपादीयते, किं त्वर्थान्तरं विशेषः । कः पुनरयं विशेषः ? धर्मधर्मिभावः—धर्म उपलब्धे धर्मिणि संशय इति परिहारं मन्यन्ते । न

पुना रूपस्पर्शयोर्धर्मधर्मिभाव इति । अयं च न परिहार इति (तच्च न) पश्यामः । किं कारणम् ? । अर्थान्तरभावस्यानिवृत्ते-र्यथैव रूपस्पर्शयोरर्थान्तरभावस्तथा धर्मधर्मिणोरपीति । न यु-क्तोऽर्थान्तरदर्शनादर्थान्तरे संशयः । अत्रापि तदेवोत्तरम् ना-नभ्युपगमादिति । न ब्रूमोऽर्थान्तरदर्शनादर्थान्तरे धर्मिणि स-न्देहः अपि तु समानधर्मादिविशिष्टधर्मिदर्शनात् विशेषवति ध-र्मिण्येव संशय इति । यदप्येतत्सारूप्याभावादिति ? विशेषा-नवधारणमुभयोः सारूप्यम्—यथैव समानधर्मदर्शनेन विशेषो नावधार्यत इति तथा संशयेनापीति । कारणसद्भावात् कार्य-सद्भाव इति न सारूप्यनिर्देशोऽयमपि तु कार्यकारणधर्मनिर्दे-शः । तथा च कार्यान्तरेष्वप्येतदस्तीति । न हि किञ्चित् कार्यं कारणसद्भावमन्तरेण सम्भवतीति । एतेनानेकधर्माध्यवसाया-दिति प्रतिषेधः परिहृतः । य एव समानधर्माध्यवसाये परिहारः स एवानेकधर्माध्यवसायेऽपीति । यत्पुनरेतदधिगतानधिगतयो-रभावादिति ? तन्नापरिज्ञानादिति—न ब्रूमोऽन्यस्मिन्नधिगते ऽन्यत्र संशय इति, अपि तु सामान्यतोऽधिगते धर्मिणि विशेषानवधा-रणात्मकः प्रत्ययः संशय इति । यत्पुनरेतत् सत्यप्यभावादिति ? न समानार्थापरिज्ञानात् । न हि कृतकत्वं समानो धर्मोऽन्य-था समानधर्मस्याभिधानात् । समानो धर्म इति विवक्षितत-ज्जातीयान्यवृत्तिर्यः स समानो न पुनः कृतकत्वमेवम् । यत्पुनरे-तन्न समानधर्माध्यवसायादेवान्यथाऽपि दर्शनादिति ? तन्न, प्र-तिषेधादनवधारणाच्च । विरुद्धाव्यभिचारिधर्माध्यवसायात् संशय इति प्रतिषिद्धमेतदनवधारणेनैव तत्त्वानुपलब्धेरिति प्रत्युक्तम् । न चैतदवधार्यते समानधर्मदर्शनादेव नान्यस्मादिति अन्यस्मा-दपि संशयोऽनेकधर्माध्यवसायादित्युक्तम् । विप्रतिपत्त्यव्यव-

स्याध्यवसायादित्यनेनैव प्रत्युक्तम् । नैवं ब्रूमो विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा (संशय इति)। न चाव्यवस्थातः संशय उपलब्ध्य (नुपलब्ध्य) व्यवस्थायाः पूर्वपदविशेषणत्वात् पूर्वपदविशेषणमुपलब्ध्यनुपलब्धी न स्वतन्त्रे संशयकारणम् । तच्च सूत्र एवोक्तमिति । यत्पुनरेतत् "विप्रतिपत्तौ च सम्प्रतिपत्ते"-रिति ? न, संज्ञान्यथात्वादर्थस्यान्यथात्वम्—यस्माद्विप्रतिपत्तिशब्दार्थस्य निमित्तान्तरसन्निपाते सम्प्रतिपत्तिरिति नाम कृतम्, न तावता विप्रतिपत्तिर्नास्ति। विप्रतिपत्तेस्तु तथाभावात् संशयहेतुत्वमिति। यत्पुनरेतत् "अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थाया" नाव्यवस्थास्तीति ? तदपि न, व्याघातात् अव्यवस्था नास्त्यव्यवस्थात्मनि च व्यवस्थितेति (त्वाच्च) व्याघातः। न च निमित्तान्तरसन्निपातेनार्थस्य संज्ञान्तरकरणमर्थतथाभावं बाधते यथाभूत एवार्थः संज्ञान्तरकरणे तथाभूत एवाकरणेऽपीति ।

यत्पुनरेतत् " तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्ते"रिति ! तदपि न, सूत्रार्थापरिज्ञानादित्युक्तम्। नायं समानधर्मादिभ्य एव संशयः, किं तु तद्विषयाध्यवसायादुपलब्ध्यनुपलब्ध्यव्यवस्थापने च सति विशेषस्मृतिसहितादेवं च सति नासंशयोपि नात्यन्तसंशयः । अन्यतरधर्माध्यवसायादिति न युक्तम् नैतस्मात् संशय इति—न हि कदाचिदन्यतरधर्माध्यवसाये सति संशयः अन्यतरधर्माध्यवसायस्य निर्णयहेतुत्वादिति ॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः । कोऽस्य सूत्रस्यार्थः ? स्वयं न संशयः प्रतिषेद्धव्यः परेण तु संशये प्रतिषिद्धे एवमुत्तरं वाच्यमिति शिष्यं शिक्षयति ॥

(इति संशयपरीक्षा ।)

अथेदानीमवसरप्राप्तानि प्रमाणानि परीक्ष्यन्ते इति । किं पुनरेषां परीक्ष्यम् ? । आदौ तावत् सम्भवः—किं प्रमाणानि सन्त्युत न सन्तीति ? । सदसतोः सामान्यात् प्रमेयत्वाद्विशेषादर्शनाच्च संशयः ॥

व्युदस्य संशयं परः पक्षपरिग्रहेण प्रत्यवतिष्ठते—

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति । अस्यार्थः त्रिष्वपि कालेषु प्रमाणानि नार्थं साधयन्तीति ॥

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः ॥ ९ ॥

पूर्वं हि प्रमाणसिद्धाविति सूत्रम् । नेन्द्रियार्थसन्निकर्षात् प्रत्यक्षं ज्ञानमुत्पद्यत इति सूत्रार्थे व्याघातो दोषः यदि पूर्वं ज्ञानं नेन्द्रियार्थसन्निकर्षस्तस्य कारणमिति यदुक्तमिन्द्रियार्थसन्निकर्षोत्पन्नमिति तद्व्याहन्यते ॥

पश्चात् सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

पश्चात् सिद्धाविति सूत्रम् । न प्रमाणनिमित्ता प्रमेयसंज्ञेति व्याघातः न प्रमाणमन्तरेण प्रमेयमात्मानं लभत इति न प्रमाणायत्ता प्रमेयसिद्धिः ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ ११ ॥

युगपत्सिद्धाविति सूत्रम् । इन्द्रियार्थानां बुद्धीनां च सन्निपाते सति युगपज्ज्ञान इति क्रमवृत्तित्वं दृष्टं न स्यादिति व्याघातो दोषः युगपत् ज्ञानानुत्पत्तिरिति च उक्तं तदुव्याहन्यते ।

अत्र समाधिः । उपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वा-

परसद्भावावानियमादिति वाक्यस्यासिद्धार्थेनोद्धावनमर्थः । प्रत्यक्षा-दीनामप्रामाण्यमिति च प्रतिज्ञापदयोर्व्याघातः—प्रत्यक्षादीनि नार्थं साधयन्तीत्ययमर्थः अयं च, व्याघातः । कथमिति ? प्रत्यक्षा-दीनि च नार्थं साधयन्ति इति च । यथेदं वस्तु नोपलभ्यत इति । इदं च, नोपलभ्यते च, इति व्याघातः । एवं प्रत्यक्षादीनि च नार्थं साधयन्तीति च । कथं चान्यथा प्रत्यक्षादीनि । न ह्येते प्रत्यक्षादिशब्दा अर्थासाधकत्वेन (त्वमन्तरेण) कृतार्था भवन्ती-ति । धर्मप्रतिषेधाच्च प्रत्यक्षाद्यभ्युपगमः । प्रत्यक्षादीनामप्रामाण्यमि-त्येवं ब्रुवता न प्रत्यक्षादीनि प्रतिषिद्धानि, अपि तु प्रमाणत्वं धर्म इति । अथ भावस्यास्वतन्त्रत्वात् तान्यपि प्रतिषिद्धानि, प्र-त्यक्षादीनामप्रामाण्यमिति भावाभिधानमेतत्, अस्वतन्त्रश्च भाव इति भावप्रतिषेधात् तद्वतां प्रतिषेध इति ? एवमप्यनिवृत्तो व्या-घातः—प्रत्यक्षादीनामभावः प्रतिपाद्यः प्रत्यक्षादीनि च न सन्ती-ति केनाभावं प्रतिपादयसि ? न च प्रत्यक्षाद्यभावेऽन्यः प्रतिपाद-नोपायः कश्चिदस्ति । विशेषप्रतिषेधाच्च प्रमाणान्तराभ्यनुज्ञा— प्र-त्यक्षादीनामप्रामाण्यमित्येवं ब्रुवता प्रत्यक्षादिव्यतिरिक्तं प्रमाणम-भ्यनुज्ञातं भवति । व्यर्थं वा विशेषणं प्रत्यक्षादीनामप्रामाण्यमि-ति । अथ न प्रमाणान्तरमभ्यनुज्ञायते ? किमस्य विशेषणस्य साम-र्थ्यं प्रत्यक्षादीनि न प्रमाणानीति । नैव प्रमाणानि सन्तीत्येवं व-क्तव्यमिति । एतदपि व्याहतम् प्रमाणानि नैव सन्ति प्रतिपादयसि चेति । यदापि तत्प्रमाणान्तरमभ्यनुज्ञायते तत्रापि त्रैकाल्यासिद्धे-रित्ययमनुपपन्नो हेतुः । यच्च त्रिष्वपि कालेषु न प्रतिपादयति कथं तस्य प्रमाणत्वमित्यनिवृत्तो व्याघातः । अथ धर्मप्रतिषेध एवायं ? तथापि यानि प्रामाण्यव्यतिरिक्तानि प्रत्यक्षादीन्यभ्यनुज्ञायन्ते रा-जपुरुषप्रतिषेधन्यायेन कस्तेषां स्वभाव इत्यनिवृत्तोऽनुयोगो व्या-

घातश्च । अर्थान्तरानभ्युपगमे षष्ठयास्तद्धितस्य चार्थो वक्तव्यः यदि प्रत्यक्षादिव्यतिरिक्तं न प्रामाण्यमस्ति प्रत्यक्षादीनामिति षष्ठ्यर्थः कः ? ततोऽवश्यं विधीयमानः प्रतिषिध्यमानो वा धर्मोऽभ्युपेयः तदभ्युपगमे च प्रत्यक्षादीनां पृथक् स्वरूपं वक्तव्यमित्यनिवृत्तो व्याघातः । एतेन तद्धितार्थो व्याख्यातः । यश्चायं हेतुस्त्रैकाल्यासिद्धेरित्ययमपि व्यधिकरणस्त्रैकाल्यविषयत्वात्—त्रिकालस्य भावस्त्रैकाल्यं तस्यासिद्धिरिति न प्रमाणधर्मः । अथायमर्थस्त्रिष्वपि कालेषु न प्रमाणान्यर्थं(१) साधयन्तीति? तथापि हेत्वर्थो नास्ति प्रतिज्ञार्थेऽऽक्षिप्तत्वात्—य एव प्रतिज्ञार्थो न प्रमाणान्यर्थं(२) साधयन्तीति स एव हेत्वर्थस्त्रिषु कालेषु नार्थं साधयन्तीति ।

यत्पुनरेतत्प्रमाणेन प्रमीयमाणोऽर्थः प्रमेयमिदमिति भवतीति समाख्याहेतोस्त्रैकाल्ययोगादप्रतिषेधः प्रमाणं प्रमेयमिति चास्याः समाख्याया निमित्तं त्रिकालयोगि, प्रमास्यते प्रमीयते प्रमामि वानेन इति प्रमाणं, प्रमास्यते प्रमीयते प्रमामि वेति प्रमेयम् । एवं च सति प्रमास्यते अयमर्थः भविष्यत्यस्मिन् हेतुकलापेरितिप्रमेयमिदमिति सिध्यति । अनभ्यनुज्ञाने व्यवहारानुपपत्तिरिति विरोधो दोषः । यस्तु त्रैकालिकं प्रमाणप्रमेयव्यवहारं न प्रतिपद्यते तस्य पाचकमानयेत्यादिव्यवहारो विरुद्ध्यत इति ।

"प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रित्येवमादिवाक्यं प्रमाणप्रतिषेधः । अथानेन प्रत्यक्षादीनां किं क्रियते किं सम्भवो निवर्त्यते अथासम्भवो ज्ञाप्यते ? किञ्चातः ? यदि तावत्

(१) प्रमाणान्यत्वं—पा० १ पु० ।
(२) प्रमाणान्यत्वमिति क्वचित् ।

सम्भवो निवर्त्तते ? तन्न युक्तम्—व्याघातात् प्रतिषेधार्थापरिज्ञानानाच्च । सम्भवो निवर्त्तत इत्येवं ब्रुवाणेन प्रमाणान्यभ्युपगतानि भवन्ति न ह्यसतां निवृत्तिर्भवतीति । न च प्रतिषेधस्यैतत्सामर्थ्यं यद्विद्यमानं पदार्थमन्यथा कुर्यात् । ज्ञापकत्वाच्च न सम्भवनिवृत्तिः ज्ञापकोऽयं प्रतिषेधो न सम्भवनिवर्त्तक इति । अथासम्भवो ज्ञाप्यत इति ? प्रमाणलक्षणप्राप्तस्तर्हि प्रतिषेधः एवं च

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरिति । अयमपि प्रतिषेधस्त्रिष्वपि कालेषु नोपपन्न इत्ययं सूत्रार्थः अतो व्याघात इति प्रमाणानि नार्थं साधयन्तीति प्रतिषेधस्य प्रमाणलक्षणाभ्यनुज्ञानादिति । त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिरित्येवमभिदधानेनाभ्युपगतं भवति प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति ?, नैष दोषः तस्य स्ववचनव्याघातदेशनात्—स्ववचनव्याघातो यथा दृश्यते नाभ्युपगम्यते । कथमिति ? । यत् खलु त्रिष्वपि कालेषु न साधकं तदसाधनमिति ब्रुवता प्रतिषेधस्यासाधकत्वं स्ववाचैवाभ्युपगतं भवति । यथा कश्चित् स्वाङ्गुलिज्वालया परं दिधक्षुः स च परं दहेद्वा न वा स्वाङ्गुलिदाहं तावदनुभवति ।

यश्चायं प्रतिषेधः प्रत्यक्षादीनि नार्थं साधयन्तीति किमयं प्रत्यक्षादीनां सामर्थ्यप्रतिषेधः उत सत्ताप्रतिषेध इति ? । यदि सामर्थ्यप्रतिषेधः ? न प्रत्यक्षादीनि प्रतिषिद्धानि तेषां च सामर्थ्यप्रतिषेधात् प्रत्यक्षादीनां स्वरूपं वक्तव्यमिति पूर्ववत्प्रसङ्गः । अथ सत्ताप्रतिषेधः ? तत्रापि कथं न सन्तीति । किं सामान्यतोऽथ विशेषत इति । यदि सामान्यतः ? प्रत्यक्षादिग्रहणं व्यर्थम् । एवं वक्तव्यं न प्रमाणानि सन्तीति । न च धर्मिणा

प्रतिषेधे कश्चिन्न्याय इति । अथ विशेषप्रतिषेधः ? तथापि प्रमाणान्तराभ्युपगमः—न ह्यनभ्युपगतसामान्यस्य विशेषप्रतिषेधोऽवकाशं लभत इति ।

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यसिद्धेरिति च वाक्ययोरेकार्थता वा स्यात् भिन्नार्थता वा ?। यद्येकार्थता ? प्रत्यक्षादीनां प्रामाण्यं त्रैकाल्यसिद्धेरित्येवमेव वक्तव्यम् । अभिन्नार्थे च एते वाक्ये इति कुतः प्रतिपत्तिरिति ! यदि प्रमाणतोऽनिवृत्तो व्याघातः। अथान्यतस्तत्प्रमाणमिति संज्ञाभेदमात्रम्। अथ भिन्नार्थे ? तत् केनावगतं—त्रैकाल्यासिद्धेः त्रैकाल्यसिद्धेरिति चानयोर्वाक्ययोर्भिन्नोऽर्थ इति । प्रत्यक्षादीनि न सन्तीति च नास्तिना समानाधिकरणः प्रत्यक्षादिशब्दश्च न प्रत्यक्षादीनामभावं शक्नोति वक्तुम्। न ह्ययं नास्तिना समानाधिकरणो घटादिशब्दो घटाभावं प्रतिपादयति, अपि तु गेहघटसंयोगं वा कालविशेषं वा घटस्य सामर्थ्यं वा प्रतिषेधति । एवमनेनापि प्रमाणसमानाधिकरणेन नास्तिना प्रमाणानां नाभावः शक्यः प्रतिपादयितुम् । अपि त्वनेनापि तन्त्रान्तराभ्युपगतानां प्रतिषेधः स्यात् सामर्थ्यप्रतिषेधो वा कालविशेषप्रतिषेधो वेति सर्वथा प्रमाणानि अभ्युपगतानि भवन्ति । तानि चाभ्युपगतान्यनेन प्रतिषेधेन प्रतिषिध्यन्त इति व्याघातः । प्रमाणानां वाऽसत्त्वं प्रतिपाद्यमानं कथं कस्य प्रतिपाद्यते, कश्च प्रतिपादयिता । अप्रतिपन्नः प्रति पाद्यत इति प्रतिपन्नश्च प्रतिपादयतीति । केन प्रतिपन्नः ? यदि प्रमाणेन, व्याघातः प्रमाणाभ्युपगमात् । अथान्यथा ? न दृष्टान्तोऽस्ति । प्रतिपाद्यप्रतिपादकयोश्च भेदाभ्युपगमे व्याघातः ? यदि प्रतिपाद्यं प्रतिपादयितारं च भेदेन प्रतिपद्यते भेदप्रतिपादकप्रमाणाभ्युपगमाद्व्याघातः । अथ भेदं

न प्रतिपद्यते ? क किं प्रतिपाद्यत इत्यनिवृत्तो व्याघातः । प्रमाणानि न सन्तीति प्रतिजानानः पर्यनुयोज्यः कथं न सन्तीति, ? यदि प्रमाणं ब्रवीति ? व्याहतम् । अथ न ब्रवीति ? अर्थो नास्य सिध्यति(१) तदेवमेतद्वाक्यं यावद्यावद्विचार्यते तावत् तावत् प्रलीयत इति ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ १३ ॥

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः । त्रैकाल्यासिद्धेरित्यस्य हेतोरुदाहरणमुपादीयते न वा ? यद्युपादीयते ? व्याघातो भवति । प्रत्यक्षादीनां चाप्रामाण्याभ्युपगमादुपादीयमानमपि नार्थं साधयतीति (व्यर्थम् ।) अथ साधयति ? व्याघातः । अथ नोपादीयते ? अप्रदर्शितं हेत्वर्थस्य साधकत्वमिति अप्रदर्शितदृष्टान्तो हेतुर्न साधक इति सोऽयं हेतुः सर्वैः प्रमाणैर्विप्रतिषिद्धो विरुद्धो भवति । "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध" इति वाक्यार्थो ह्यस्य सिद्धान्तः स च वाक्यार्थः प्रमाणानि नार्थं साधयन्तीति । इदं च प्रमाणानामुपादानमर्थसाधनाय "प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रिति । बुद्धिविवक्षाप्रयत्नवायुदीरणताल्वभिघातौष्ठप्रस्पन्दादीनि अवर्ज्जयन् बुद्ध्या वाक्यमुच्चारयसि । स्थाणुकण्टकसर्पादीन् परिहरन् पादविहरणादीनि करोषि । ते एते वाक्यप्रवृत्ती प्रमाणप्रतिषेधान्न सम्भवत इति ॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः । अथ स्ववाक्याश्रितप्रमाणव्यतिरेकेण प्रमाणानि प्रतिषिध्यन्ते ? एवं सति न सर्वं प्रमाणं प्रतिषिद्धं भवति । यश्च न्यायः स्ववाक्याश्रितप्रमाणा-

(१) नास्य स्यात्—पा० ६ पु० ।

भ्युपगमे स एवान्याश्रितप्रमाणाभ्युपगमेऽपीति। वीक्षयमुपमर्गो विशेषप्रतिषेधेन व्याघाते। (इति) किमुक्तं भवति? कानिचित्प्रमाणानि प्रतिषिध्यन्ते कानिचिदभ्यनुज्ञायन्त इति। यानि स्ववाक्याश्रितानि तान्यभ्यनुज्ञायन्ते यानि परवाक्याश्रितानि तानि प्रतिषिध्यन्त इति। यच्चेदं वाक्यं "प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धे"रिति किमिदं प्रमाणस्वरूप(१)मथ नेति? यदि प्रमाणस्वरूपं(२) तदा व्याघातः। अथ न? तथापि नानेन कश्चिदर्थः प्रतिपाद्यत इति व्यर्थम्॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत् तत्सिद्धेः॥ १५॥

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवदिति सूत्रम्। यत्तत् पूर्वमुक्तमुपलब्धिहेतोरुपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमाद्यथादर्शनं विभागवचनमिति तदुत्थानज्ञापनार्थमतः सूत्रान्तरस्योत्थानमिति। कस्मात् पुनस्तत्रैवेदं सूत्रं नोक्तमिति?। अविशेषात्—तत्र वाभिधीयते इह वा न कश्चिद्विशेष इति सर्वथा तावदयमर्थः प्रकाशयितव्य इति। एकां च विधामुदाहरति शब्दादातोद्यसिद्धिवदिति। शेषयोस्तु विधयोर्यथोक्ते उदाहरणे वेदितव्ये। यथा पूर्वसिद्धमातोद्यं पश्चात् सिद्धेन शब्देनानुमीयते वीणा वाद्यते वेणुः पूर्यत इति—योऽसौ वीणावेणुशब्दयोरसाधारणो धर्मः वीणादिनिमित्तत्वं तदुपलभमानः शब्दस्य वीणाशब्दो वेणुशब्द इति प्रतिपद्यते पूर्वसिद्धमातोद्यं पश्चात् सिद्धः शब्द इति। सहभावस्योदाहरणम्—धूमदर्शनादग्निं धूमविशेषणं प्रतिपद्यते। पूर्वसिद्ध उपलब्धिहेतुरादित्यः पश्चात् सिद्धानां प्रकाशक इति। प्रमाणं प्रमेयमिति चेयं समाख्या समावेशेन

(१) प्रमाणरूप—पा० ६ पु०। (२) प्रमाणरूपं—पा० ६ पु०।

भवति समाख्यानिमित्तवशात् समावेशोऽनियमः समाख्यानिमित्तवशात् समाख्यानिमित्ततन्त्रत्वादिति । प्रमाणप्रमेयसंज्ञयोर्निमित्तमुपलब्धिहेतुत्वमुपलब्धिविषयत्वं च । यदा पुनरेकं वस्त्वनेकनिमित्तसम्बन्धि भवति तदा कथम् ? तदा निमित्ततन्त्रत्वात् समाख्यायास्तद्वस्तु अनेकेन निमित्तेन सम्बन्धेन सति(१) अनेकशब्दाभिलाप्यम् । अस्य चार्थस्य ज्ञापनार्थं सूत्रम् ॥

प्रमेयता(२) च तुलाप्रामाण्यवत् ॥ १६ ॥

प्रमेयता(३) च तुलाप्रामाण्यवदिति । किमुक्तं भवति ? यथा गुरुत्वपरिमाणज्ञानसाधनं तुलाद्रव्यं समाहारगुरुत्वस्येयत्तापरिच्छेदनिमित्तत्वात् प्रमाणं, सुवर्णादिना च परिच्छिद्यमानेयत्तेषा तुलेति परिच्छेदविषयत्वेन व्यवतिष्ठमाना प्रमेयम् । उदाहरणमात्रं चैतत् । एवमवनवयवेन तन्त्रार्थो वेदितव्यः । यथा च प्रमाणप्रमेयसमाख्ये तथा कारकशब्दाः सर्वे निमित्तसमावेशनियमेन(४) वर्तन्ते तथा च लौकिकमुदाहरणम्— एकमनेकेन कारकशब्देनाभिधीयते वृक्षस्तिष्ठतीति स्वस्थितौ स्वातन्त्र्यात् कर्ता । किं पुनर्वृक्षस्य स्वस्थितौ स्वातन्त्र्यं ? कारकान्तरानपेक्षत्वम्—न हि वृक्षस्तिष्ठन् स्वस्थितौ कारकान्तरं प्रयुङ्क्ते इति । यदायं स्थितिशब्दो गतिनिषेधवचनो भवति तदेवं, यदाप्ययं स्वरूपाभिधायकस्तदाऽप्यस्त्यर्थक्रियानिमित्तत्वेनावतिष्ठमानोऽस्ति व्यवतिष्ठतीति कर्तेत्युच्यते । यदा तु गेहसम्बन्धा(५)र्थाभिधायको भवत्यस्तिशब्दो यथा गेहे देवदत्तस्तिष्ठतीति प्रतीतिर्हि...

---

(१) पुस्तकान्तरे नास्ति । (२) प्रमेया च इति क्वचित् ।
(३) प्रमेया--पा० १ । ६ पु० ।
(४) समावेशनियमात्—पा० ६ पु० ।
(५) गेहे सम्बन्धा—पा० ६ पु० ।

ऽस्तीति गम्यते तदा न सत्तामाह न गतिप्रतिषेधम्। अपि तु(१) गेहसम्बन्धं तदा(पि) (देवदत्त) गेहसम्बन्धानुभवक्रिया। तस्यामपि न कारकान्तराणि प्रयुङ्क्त इति स्वतन्त्रो भवति। यदा त्वयमभग्नवचनः स्थितिशब्दस्तिष्ठति वृक्षो न भग्न इति, तदापि स्वास्थितौ न कारकान्तराणि प्रयुङ्क्त इति स्वतन्त्रो भवति। समुदायैकदेशं वा स्वास्थितौ प्रयुङ्क्ते। वृक्षो मूलैस्तिष्ठतीति प्रासादः स्तम्भैर्ध्रियत इति।

पूर्वापरप्रत्ययैकविषयता वा स्थितिः यद्वस्तु प्राक् सिद्धं पुनर्निमित्तान्तरसन्निधाने सति उपलभ्यते यत्र तस्यानेकायुगपत्कालप्रत्ययविषयत्वं सा स्थितिः तस्यां स्थितावस्य यत्सहकारिसाधनं चक्षुरादि तत्करणमिति। चक्रभ्रान्तिप्रदीपप्रत्ययवन्मिथ्याप्रत्ययः स इति चेत्। न, प्रमाणाभावात्। अथ मन्यसे(२) नैवैकं किञ्चित् वस्त्वयुगपत्कालानेकप्रत्ययविषयो भवति? यदि न भवति, कथं तर्हि स एवायं वृक्षस्तिष्ठतीति प्रत्ययः? न हि कदाचिदाद्येन(च) दर्शनेन स एवायं वृक्षस्तिष्ठतीति प्रत्ययो भवति। दृष्टोऽन्यत्वेऽपि(३) स्थितिप्रत्ययः चक्रं भ्रमत्तिष्ठतीति प्रदीपो ज्वलंस्तिष्ठतीति। अनवस्थितेषु नानाभूतेषु चक्रभ्रान्तिप्रदीपादिषु य एते तद्भावप्रत्यया अतस्मिंस्तदिति मिथ्याप्रत्यया एते। यथा चैते मिथ्याप्रत्यया एवं वृक्षादिस्थितिष्वपीति। न। प्रमाणाभावात्। नहि भवता प्रमाणं किञ्चिद्वृक्षादीनां नानात्व(४)प्रतिपादकमभिधीयते मिथ्याप्रत्ययाश्च सम्यक्प्रत्ययानुसारेण भवन्तीति कामी सम्यक्प्रत्यया भवन्तीति वक्तव्यम्। अथ भवतः का-

---

(१) देवदत्त—इत्यधिकम् ६ पु०।

(२) मनुषे इति ६ पु० पा०। (३) ऽन्यत्र इति ६ पु० पा०।

(४) वृक्षादीनामसत्त्व—पा० १ पु०।

लान्तरावस्थाने किं प्रमाणम् ? उक्तं प्रमाणम्—रूपरसस्पर्शप्रत्ययानामेकानेकप्रत्ययनिमित्तत्वं प्रतिसन्धानादिति। कार्यस्याधारत्वेन वा कारणस्य कार्यकालानुभवनमिति । यद्यस्याधारो भवति तत् तस्य सद्भावकालमनुभवति यथा क्षीरस्य कुण्डम् । कारणं च कार्याधिकरणमतस्तेनापि कार्यकालोऽनुभवनीय इति । अनाधारमेवेति चेत्—अथ मन्यसे ऽप्रतीत्य कारणं कार्यमुत्पद्यते इति क्व किं वर्तत इति ? तन्न । दृष्टान्ताभावात्—नाहि कश्चिदुभयपक्षसम्प्रतिपन्नो दृष्टान्तः कार्यमनाधारमस्तीति । कार्यमधारवदित्यत्रापि न दृष्टान्तोऽस्तीति समानम् ? । समानमित्यनुत्तरमभ्युपगमात्—अभ्युपगतं तावद्भवता नास्मत्पक्षे दृष्टान्तोऽस्ति किं तु भवत्पक्षेऽपि नास्तीति । विरोध इति चेत् ? अथ मन्यसे न मयाभ्युपगम्यते दृष्टान्ताभावः किं तु भवत्पक्षे विरोधो दृश्यते । कथमिति ? योऽनुपपद्यमानदृष्टान्तः स पक्षोऽसाधीयानित्येवं ब्रुवाणः स्वसिद्धान्तं बाधते । तन्नापरिज्ञानात् न भवताऽस्मत्पक्षो ज्ञायि न स्वपक्षः । अस्मत्पक्षे तावत् कार्यमाधारवदिति एतत्प्रसिद्धं(१) भवत्पक्षेऽपि रूपादयः कार्याश्चाधारवन्तश्चेत्यभ्युपगमविरोधः । भूतभौतिकसमुदायो द्रव्यमिति यदि रूपादीननाश्रितान् मन्यसे ? कोऽस्य तद्धितस्यार्थो भौतिका रूपादय इति । यच्चोक्तं मणिः प्रभाया आश्रयस्तद्गतिस्थितिविकारानुविधानात् । कुण्डं बदराणामाश्रयस्तद्देशेनापातात्(२) तैलस्य तिल आश्रयस्तद्देशेनास्पन्दनादित्येवमादि तच्चाहन्यते, अनाश्रिताश्च रूपादयः स्वतन्त्रा एकमुपनिबन्धनं वस्त्वन्तरमन्तरेण तिलमुद्गमाषादिवद्विभज्येरन्, न तु विभज्यन्ते, तस्मात्

(१) एतत् सिद्धम्—पा० ६ पु० ।

(२) तद्देशेनापतनादिति सम्यक् ।

परतन्त्रा इति, तस्माद्व्यवस्थितमेतत् स्मृत्या सह पूर्वापरप्रत्ययैकविषयता वा स्थितिरिति।

दर्शनेनाप्तुमिष्यमाणत्वात् वृक्षः कर्म। कर्मणि कः कारकार्थः? क्रियाविषयत्वं—यत् खलु क्रियाया विषयभावेन व्यवतिष्ठते (इत्येव) तत्कर्म। एतेन कर्मलक्षणेन "तथा युक्तं चानीप्सित"मिति संगृहीतम्। आनन्तर्यप्रतिपत्तिः करणस्य साधकतमत्वार्थः। वृक्षेण चन्द्रमसं ज्ञापयतीति वृक्षं गृहीत्वानन्तरं चन्द्रमसं प्रतिपद्यत इति वृक्षः करणकारकशब्दवाच्यः। कर्मणाऽऽप्तुमभीष्टं सम्प्रदानम्—यद्यस्तु कर्मणा प्राप्तुमभिप्रेतं भवति तत् सम्प्रदानसंज्ञकम्। वृक्षायोदकमासिञ्चतीति आसिच्यमानमुदकं कर्म तेन कर्मणोदकेन वृक्षं प्राप्नोतीति वृक्षः सम्प्रदानं भवतीति। अपगच्छन्यवतिष्ठते(१) यत् तदपादानम्—यथा वृक्षात् पततीति वृक्षोऽपादानसंज्ञकः। पतत् पतति तदपगच्छति तस्मिन्नपगच्छति अवतिष्ठते वृक्ष इति। धृतिहेतुरधिकरणम्—यस्मिन् पदार्थेयं तदाधेयस्य यद्धृतिहेतुस्तदधिकरणम् वृक्षे वयांसीति वृक्षसम्बन्धो वयसां गुरुत्वप्रतिबन्धे कारणमिति वृक्षोऽधिकरणशब्दवाच्यः। एवं च सति न द्रव्यमात्रं कारकं न क्रियामात्रम्। किमुक्तं भवति? नायं कारकशब्दः क्रियामात्रे वर्तते न द्रव्यमात्रे, नहि द्रव्यं शुद्ध(२)मुपलभमानः कारकशब्दं प्रयुङ्क्ते। नापि क्रियां केवलाऽपि तु यदा क्रिया द्रव्यसम्बन्धमुपलभते तदा सामान्येन कारकशब्देनाभिधत्ते(३) कारकमिति। सामान्यं च कारकाणां क्रियानिमित्तत्वम्

(१) अपगच्छद्व्यवतिष्ठते—पा० ६ पु०।

(२) द्रव्यस्वरूप—पा० ६ पु।

(३) कारकशब्दानभिधत्ते—पा० १ पु०।

अविवक्षिते विशेषे क्रियानिमित्तत्वे केवले विवक्षिते कारकमितिशब्दः प्रवर्तते। यदा तु विशेषो विवक्षितस्तदा तत्साधारणेन कारकधर्मेणेतरव्यावृत्तेन स्वातन्त्र्यादिना विशेषेण विशिष्यमाणं वस्तु कर्ता कर्म करणमिति व्यपदिश्यते। सर्वस्य च कारकस्य स्वक्रियानिमित्तः कर्तृव्यपदेशः प्रधानक्रियासव्यपेक्षस्तु कारकशब्दप्रयोगः। एवं च शास्त्रं "कारके"-जनके-निर्वर्तके। कस्याः? क्रियाया इति तथा व्यपदेशः। तस्मान्नेदं स्वक्रियामात्रमपेक्ष्योक्तम्, किं तु प्रधानक्रियाम्। तस्यामेव प्रधानक्रियायां किञ्चिदाराादुपकारकं किञ्चिदासन्नोपकारकमिति किञ्चित्कथञ्चिदुपकरोति तदपेक्षाश्च कर्त्रादिशब्दा इति। तदुक्तं पुरस्तात्।

यदि क्रियासम्बन्धनिमित्तकः कारकशब्दप्रयोगः पचत्येव पाचकशब्दः प्रवर्तेत (ते) नापाक्षीत् पाचकः पक्ष्यतीति पाचक इति। न। शक्तेस्त्रिकालावस्थानात्—शक्तिस्त्रिष्वपि कालेष्ववतिष्ठते। शक्त्यपेक्षश्चातीतानागतयोः कारकशब्दव्यपदेशः पचत्यपाक्षीत् पक्ष्यतीति शक्तेस्त्रिकालावस्थानात्। त्रैकाल्यव्यक्तिरयुक्ता यथैव द्रव्यं त्रिकालयोगि तथा शक्तिरपीति, यथा द्रव्ये त्रैकाल्यं न व्यज्यते तथा शक्तावपीति अपचन्नपि पचतीति स्यात् पक्ष्यति पाचकोऽपाक्षीत् पाचक इति च न स्यात्। नैष दोषः। क्रियासम्बन्धस्य शक्तिव्यक्तिहेतुत्वात्-क्रियेत्यनेन शब्देन धात्वर्थोऽभिधीयते तस्य यत् प्रधानसाधनं स कर्ता। सोऽयं कर्ता यदा क्रियया सम्बध्यते तदा शक्तिं व्यनक्ति। का पुनरियं शक्तिः? क्रियाकर्तृव्यतिरिक्तः कर्तृधर्मः सामर्थ्यमुपायपरिज्ञानं च क्रियासम्बन्धेन व्यवतिष्ठते(१)

(१) व्यज्यते—पा० ६ पु०।

यदोपायविज्ञानसामर्थ्यक्रियासम्बन्धस्तदा(१) मुख्यतः कारकशब्दः प्रवर्तते पचति पाचक इति। यदा तु क्रियासम्बन्धमन्तरेणोपायपरिज्ञानसामर्थ्यमात्रोपादानेऽन्यतमवैकल्यात् पाचकशब्दः प्रवर्तते तदोपचारतोऽपाक्षीत् पाचकः पक्ष्यति पाचक इति। कारकशब्दश्चायं प्रमाणं प्रमेयमिति। कुतः? क्रियाविशेषयोगात्—यथैवामी पाचकादिशब्दाः क्रियाविशेषयोगे सति प्रवर्तन्ते तथा प्रमाणप्रमेयशब्दावपीति। अस्तिभोः कारकशब्दानां निमित्तसमावेशान्नियमः प्रत्यक्षादीनि प्रमाणानि संवेद्यमानानि च प्रमेयं उपलब्धिविषयत्वात्।

तत्रेदं चिन्त्यते—किमेतानि प्रत्यक्षादीनि स्वोपलब्धौ प्रत्यक्षादिव्यतिरिक्तं प्रमाणान्तरं (प्रसिद्धेर्यदि प्रमाणं साधनं प्रमाणान्तरं प्राप्नोति) प्रयोजयन्ति अथ निःसाधनैव प्रमाणोपलब्धिरिति?।

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः॥ १७॥

किं चातः? प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः प्रमाणविषयायाः सिद्धेर्यदि प्रमाणं साधनं प्रमाणान्तरं प्राप्नोति प्रत्यक्षादीनां साध्यत्वान्न साध्यं साधनं भवतीति।

अथ प्रमाणान्तरमन्तरेण निःसाधनैव प्रमाणेषूपलब्धिः?॥

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः॥१८॥

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः। यथा प्रमाणानि स्वोपलब्धौ निवर्तन्ते एवं प्रमेयसिद्धावपि॥

---

(१) यदोपायविज्ञानं च सामर्थ्यं क्रियासम्बन्धस्तदा—पा० १ पु०। स च प्रामादिकः।

अस्योत्तरम् ।

न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥

न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेरिति । प्रदीपप्रकाशो घटाद्युपलब्धिसाधनस्याङ्गत्वात् प्रमाणम् । स च प्रत्यक्षादिभिरेवोपलभ्यते । नाभावात्मोपलब्धौ प्रत्यक्षादिव्यतिरेकि प्रमाणं प्रयोजयति तैरेव उपलभ्यते, तथा प्रमाणान्यपि प्रत्यक्षादिभिरेवोपलप्स्यन्ते इति । दृष्टान्तमात्रमेतत् कोऽत्र न्याय इति । अयं न्याय उच्यते । प्रत्यक्षादीनि स्वोपलब्धौ प्रमाणान्तराप्रयोजकानि परिच्छेदसाधनत्वात् प्रदीपवत्—यथा प्रदीपः परिच्छेदसाधनं स्वोपलब्धौ न प्रमाणान्तरं प्रयोजयतीति तथा प्रमाणानि । तस्मात् तान्यपि प्रमाणान्तराप्रयोजकानीति सिद्धम् । सामान्यविशेषवत्त्वाच्च(१) यत् सामान्यविशेषवत् तत् स्वोपलब्धौ न प्रत्यक्षादिव्यतिरेकिप्रमाणं प्रयोजयति यथा प्रदीप इति । संवेद्यत्वात्—यत् संवेद्यं तत् प्रत्यक्षादिव्यतिरेकिप्रमाणान्तराप्रयोजकं यथा प्रदीप इति । आश्रितत्वात्—करणत्वाद्वेत्येवमादि प्रदीपवदिन्द्रियादयोऽपि प्रत्यक्षाङ्गत्वात् प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तराप्रयोजका इति समानम् । तेनैव तस्याग्रहणमिति चेत्—अथ मन्यसे प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धौ तेनैव तदेव गृह्यत इति प्राप्तम् न चैतदस्ति नाहि साध्यं साधनं भवतीति ? नैष दोषः । अर्थभेदस्य लक्षणसामान्यात् प्रमाणलक्षणेनानेकोऽर्थः संगृहीतः तत्र केनचित्कस्यचिद्ग्रहणमित्यदोषः । यथोद्धृतेनोदकेनाशयस्थस्य यथोद्धृतमुदकं गृहीत्वा आशयस्थमप्येवं भूतमिति प्रतिपद्यत इति । न पुनरेवम-

(१) विशेषवद्भावाच्च—पा० ६ पु० ।

भिधीयते तेनैव तस्य ग्रहणमपि तु तथाभूतेन तथाभूतस्य। न चायमेकान्तः न तेनैव तस्य ग्रहणं भवतीति। भवत्यपि कदाचित् यथात्मनि स एव ज्ञाता ज्ञेयो भवति यदात्मानं जानीत इति। निमित्तभेदोऽत्रेति चेत्—अथ मन्यसे यदायमात्मा ज्ञाता तदान्यन्निमित्तम् यदा ज्ञेयस्तदान्यदिति समानम् यथैव ज्ञाता सुखादिसम्बन्धापेक्षस्तद्विशेषणमात्मानं प्रतिपद्यते अहं सुखी अहं दुःखी चेति तथा प्रमाणमपि प्रमाणविषयत्वेनावतिष्ठमानं प्रमेयमिति प्रत्यक्षादीनां चाविषयस्यानुपपत्तेः। यदि कश्चिद्विषयः प्रत्यक्षाद्यविषयः स्यात् प्रतिपद्येमाहि प्रत्यक्षादिव्यतिरिक्तं प्रमाणं स च न शक्यः केनचित्प्रतिपादयितुम्। सर्वमिदं सच्चासच्च प्रत्यक्षादीनामेव विषयः तस्मात् प्रत्यक्षादिभिरेवोपलभ्यते इति। अपरे तु हेतुविशेषपरिग्रहमन्तरेण दृष्टान्तमात्रं प्रदीपप्रकाशसूत्रेणोपाददते यथा किल प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते तथा प्रमाणान्यपि प्रमाणान्तरमन्तरेण ग्रहीष्यन्त इति तान् प्रतीदमुच्यते॥

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः। (१) यथा प्रदीपप्रकाशस्तथा प्रमाणानि न पुनर्यथा स्थाल्यादिरूपं तथा प्रमाणानीति कोऽत्र नियमहेतुः। स्थाल्यादिरूपप्रकाशने च प्रदीपप्रकाशो न निवर्तते कस्मादेवं न प्रमाणानीति अयं च प्रदीपप्रकाशदृष्टान्तः प्रमाणपक्षे भवतु माभूत् प्रमेयपक्ष इति तत्रापि (२) नियमहेतुर्वक्तव्यः प्रदीपप्रकाशो दृष्टान्तो भवतु माभूत् स्थाल्यादिदृष्टान्त इत्यत्रापि नियमहेतुर्वक्तव्यः। सोऽयमुभयथानेकान्तो विशेषहेतुमन्तरेण दृष्टान्तः प्रसक्तः विशेषहेतुप-

(१) न्यायसूचीनिबन्धे इदं वाक्यं सूत्रत्वेनाभ्युपगतम्।
(२) अत्रापि—पा० ६ पु०।

रिग्रहे सत्युपसंहाराभ्यनुज्ञानादप्रतिषेधः। यदि पुनरयं प्रदीपप्रकाशो दृष्टान्तो विशेषहेतुना प्रकाशत्वादिना संगृहीतः ? तत एकस्मिन् पक्षेऽभ्यनुज्ञायमानो न शक्यः प्रतिषेद्धुमित्यनेकान्त इत्ययं दोषो न भवति ।

प्रत्यक्षादीनां प्रत्यक्षादिभिरुपलब्धावनवस्था स्यादिति चेत् ?—यदि प्रत्यक्षादीनि प्रत्यक्षादिभिरुपलभ्यन्ते तान्यप्यन्यैस्तान्यप्यन्यैरित्यनवस्था, अनवस्थायां चाऽऽद्यप्रमाणाधिगमो न स्यात्, अथ व्यवस्थाऽस्ति ? आद्यप्रमाणाधिगतिरप्रमाणा(१) प्रसज्येत ?, नैष दोषः । संवित्तिविषयनिमित्तानामुपलब्ध्या व्यवहारसिद्धेः—संवित्तिविषयं संवित्तिनिमित्तं चोपलभमानस्य । संवित्तेर्विषयम्—प्रमेयं, संवित्तिनिमित्तं—प्रमाणं, प्रमाणप्रमेययोरुपलब्धौ सर्वो व्यवहारः सिद्ध्यति धर्मार्थसुखापवर्गप्रयोजनस्तत्प्रत्यनीकपरिवर्जनप्रयोजनश्च, न त्वनवस्थासाधनीयं किञ्चित् प्रयोजनमस्ति, येनायं प्रयुक्तोऽनवस्थामुपाददीत । तस्मात्प्रत्यक्षादिभिः प्रत्यक्षादीनामुपलब्धिः न चानवस्थेति ॥

(इति सामान्येन प्रमाणपरीक्षा ।)

एवं तावत् सामान्यतः समधिगतमेतत् सन्ति प्रमाणानि प्रमेयसाधनानि । अथेदानीं सामान्यतोऽधिगतानां विशेषपरीक्षा । तत्र प्रत्यक्षमादावुक्तं तत्परीक्ष्यत इति—

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ॥ २० ॥

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् । यदिदं भवता प्रत्यक्षलक्षणमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नमिति, तदसमग्रम्, कस्मात् ? अन्यान्यपि प्रत्यक्षस्य कारणानि सन्ति,तानि नोक्तानि, यथाऽऽत्म-

(१) अप्रमाणं--पा० ६ पु० ।

मनःसंयोग इत्येवमादीनि । अथेन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षणमिति? लक्षणमप्येतन्न भवति। कस्मात्? उत्पत्तिकारणापदेशात् इन्द्रियार्थसन्निकर्षोत्पन्नमित्येतत् कारणमपदिश्यते, न च कारणापदेशो वस्तुनो लक्षणम् । नहि घटादेः कार्यस्य मृत्पिण्डादिक्रमोत्पत्तिस्तल्लक्षणमिति ?,

न । उभयथाप्यदोषः—यदि कारणं ? तथापि न दोषः । अथ लक्षणं ? तथापि न दोषः । कथं ? कारणपक्षे तावदुक्तं भवति—नेदं कारणावधारणार्थं सूत्रम्, अपि तु प्रत्यक्षस्य प्रमाणस्य यदसाधारणमनुमानादिव्यवच्छेदकं तदुक्तमिति—नात्ममनःसंयोगादिषु प्रसङ्गः। इन्द्रियमनःसंयोगस्तर्ह्युपसंख्येयः ?—यद्यसाधारणत्वादिन्द्रियार्थसन्निकर्षस्य ग्रहणम्—नन्वेतस्मादेवेन्द्रियमनःसन्निकर्षोऽप्युपसंख्येय इति ?, उक्तमत्रापि न यावदसाधारणं तत्सर्वं वक्तव्यम् (१) अपि त्वन्यतरग्रहणेनापि विशेषितमेतत् । लक्षणपक्षेऽपि न दोषः—असाधारणत्वादिन्द्रियार्थसन्निकर्षस्य। इन्द्रियार्थसन्निकर्षः प्रत्यक्षोत्पादकत्वात् कारणं च समानासमानजातीयेभ्यो विशेषकत्वात् लक्षणं चेति । अर्थतो वाऽभिधानं आत्ममनःसंयोगस्य इन्द्रियमनःसंयोगस्य च। कथमिति ? ज्ञानोत्पत्तिदर्शनात्—नासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति । मनःसंयोगानपेक्षं चेदिन्द्रियं प्रवर्तेत इति युगपदनेकोपलब्धिः स्यात्, न च भवत्यतो मनःसन्निकर्षोऽपि कारणमिति ॥

तदिदं (२) सूत्रमुक्तभाष्यम्—

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः॥२१॥

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिरिति । आत्ममनसोः

(१) व्यक्तम्—पा० ६ पु० :

(२) नात्ममनसोरित्यादि—पा० ६ पु० ।

सन्निकर्षाभावे नोत्पद्यते बुद्धिरिन्द्रियार्थसन्निकर्षाभाववदिति ।

न । उक्तोत्तरत्वात्-उक्तोत्तरमेतदिति-नेदं कारणावधारणार्थं सूत्रमपि तु विशिष्टकारणवचनमिति ॥

ये च सति भावात् कारणभावं वर्णयन्ति-यस्मात् किलेन्द्रियार्थसन्निकर्षे सति ज्ञानं भवति तस्मादिन्द्रियार्थसन्निकर्षः कारणमिति, तेषां—

दिग्देशकालाकाशेष्वप्येवंप्रसङ्गः ॥ २२ ॥

दिग्देशकालाकाशेष्वप्येवंप्रसङ्गः । दिग्देशकालाकाशेषु सत्स्वपि ज्ञानं भवति, सति भावात् तान्यपि कारणमिति प्राप्तम् । कतमेन पुनर्न्यायेन दिगाद्यकारणं ? सामर्थ्यानुपलब्धेः-नहि ज्ञानोत्पत्तौ दिगादेः सामर्थ्यमुपलभ्यते, तस्मादकारणम् । सन्निधिमात्रादिति चेत् ?-अथ मन्यसे दिगादि सन्निधिमात्रेण(१) ज्ञानोत्पत्तेः कारणमिति ? तदयुक्तम्, सन्निधेरवर्ज्जनीयत्वात् । नित्यं दिगादि व्यापकं चेति-नित्यत्वाद्व्यापकत्वाच्च न शक्यः सन्निधिः परिवर्जयितुमिति तत्र कारणभावे हेतुर्वक्तव्यः । नहि सन्निधिमात्रं हेतुत्वे कारणम् । कथं ? रूपोपलब्धेः तेजःस्पर्शसद्भाववदिति-यथा रूपोपलब्धौ तेजसो रूपविशेषो हेतुः, न पुनस्तेजस्पर्शः सन्निधिमात्रेण, सामर्थ्यादर्शनात् । रूपस्य पुनर्दृष्टं सामर्थ्यं तद्भावाभावानुविधानादुपलब्धेः-यस्माद्यत्र रूपं भवति तत्रोपलब्धिः यत्र न भवति न तत्रोपलभ्यते, तस्माद्रूपमेवोपलब्धेः कारणं न स्पर्श इति । यथा चान्द्रमसं रूपं विना तेजःस्पर्शेनौष्ण्येन प्रकाशयति, अपवरकादिस्थितं चौष्ण्यं विना रूपेण न प्रकाशयति, एवमात्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो ज्ञानं भवच्च दिगादि-

(१) सम्बन्धिमात्रेण—पा० १ पु०।

न्यो भवति सन्निधिमात्रत्वात् । इतरेषां च सामर्थ्यदर्शनादिति ।

यद्येवमात्ममनःसंयोगस्तर्ह्युपसंख्येयः ? नोपसंख्येयो गम्यमानत्वात् । केन गम्यमानत्वात् ?

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

ज्ञानलिङ्गत्वादात्मनो नानवरोधः । ज्ञानमात्मलिङ्गमित्युक्तम् । तेनाऽऽत्ममनःसंयोगोऽनुक्तोऽप्यनुमेयः । कथं पुनर्ज्ञानमात्मलिङ्गं ? तद्गुणत्वात् । गुणभावासिद्धिरिति चेत् ?–अथ मन्यसे गुणभाव एव ज्ञानस्यासिद्धः कुत आत्मगुणत्वं सेत्स्यतीति ?, न आत्मसमवायात् सुखादिवदिति । नहि द्रव्यं कर्म वाऽऽत्मनि समवैति, तस्मान्न द्रव्यं न कर्म, आत्मनि तु समवायो ज्ञानस्य सुखादिवत्, तस्मादात्मगुणो, न पृथिव्यादिगुणः स्वसंवेद्यत्वात्(१)–यत्प्रत्यक्षं स्वसंवेद्यं न तत् पृथिव्यादिगुणः यथा सुखादि, यच्च प्रत्यक्षं स्वपरसंवेद्यं तत् पृथिव्यादिगुणः यथा रूपादि, न चैवं ज्ञानं तस्मादात्मगुण इति । उक्तं चात्र । किमुक्तं ? न यावत् प्रत्यक्षस्य कारणं तावत् सर्वं वक्तव्यमिति(२) ।

अथेन्द्रियमनःसन्निकर्षः(३) कस्मान्नाभिधीयते ?

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ २४ ॥

तदयौगपद्यलिङ्गत्वाच्च न मनसः । युगपज्ज्ञानानुत्पत्ति(४)र्मनसो लिङ्गमित्युक्तम्, तेन मनसोऽप्यवरोध इति । न, युगपदनुत्पत्तिसूत्रस्यान्यार्थत्वात्–यदिदमुच्यते युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्यनेन ज्ञानकारणं मन इति ? तदयुक्तम्, अन्यार्थत्वात्—अ-

(१) स्वसंवेद्यार्थत्वात् इति २ पु० पा० ।

(२) कारणं सर्वं तद्वक्तव्यमिति २ पु० पा० ।

(३) मनःसंयोगः—पा० ६ पु० ।

(४) भानानुत्पत्तिः—पा० ६ पु० ।

न्यार्थं सूत्रं न पुनस्तेन ज्ञानकारणत्वं मनसोऽभिधीयते—गम्यते । नहि ज्ञानं स्वतन्त्रम् । अन्यार्थस्यापि तदर्थप्रकाशकत्वमुपपत्तिसामर्थ्यात् । यद्यपि तस्मिन् सूत्रे मनसो ज्ञानकारणत्वं न साक्षादुक्तम्—तथाप्युपपत्तिसामर्थ्यात् ज्ञानकारणं मन इति गम्यते । नहि ज्ञानं स्वतन्त्रम् न चक्षुरादि स्वतन्त्रमिति ।

अथ कस्मादिन्द्रियार्थसन्निकर्षोऽभिधीयते कथं च नात्ममनः सन्निकर्षोऽभिधीयते इन्द्रियमनःसन्निकर्षो वेति ?—

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् ॥ २८ ॥

प्रत्यक्षनिमित्तत्वाच्च इन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम् । इन्द्रियार्थसन्निकर्षः प्रत्यक्षस्यैव निमित्तमात्मनःसन्निकर्षः(१) प्रत्यक्षस्य चान्यस्य चेति । इन्द्रियार्थसन्निकर्षेण समानत्वादिन्द्रियमनःसंयोगो वक्तव्यः ?—यदि साधारणत्वादात्ममनःसन्निकर्षो(२) नाभिधीयते, इन्द्रियमनःसंयोगोऽसाधारणत्वादिन्द्रियार्थसन्निकर्षवद्वक्तव्य इति ?। नेदं कारणावधारणार्थमित्युक्तम्—न यावदसाधारणं सर्वं तद्वक्तव्य, मपि तु न साधारणं वक्तव्यमित्ययं सूत्रार्थः ॥

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ॥ २९ ॥

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् । इन्द्रियार्थसन्निकर्षस्य प्राधान्यपरमिदं सूत्रम्(३) । शेषं भाष्ये ॥

(१) संयोगः—पा० ६ पु० । (२) संयोगो—पा० ६ पु० ।

(३) वार्त्तिककारेण प्रत्यक्षनिमित्तत्वादित्यादिसूत्रं सुप्तव्यासक्तमनसामित्यादिसूत्रं चावधृतम् । वाचस्पतिमिश्रेणापि न्यायसूचीनिबन्धे सूत्रत्वमेवावधारितम् ।

प्राधान्ये च हेत्वन्तरम्—

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ २७ ॥

तैश्चापदेशो ज्ञानविशेषाणाम् । यस्मादिदं प्रत्यक्षज्ञानमुत्पद्यमानं विषयेण कारणेन वा व्यपदिश्यते । यच्चासाधारणं तेन व्यपदेशो दृष्टः यथा शाल्यङ्कुर इति ॥

व्याहतत्वादहेतुः ॥ २८ ॥

व्याहतत्वादहेतुः । व्याहतत्वादित्यनेन त्रिसूत्रीं प्रत्याचष्टे । "प्रत्यक्षनिमित्तत्वादिन्द्रियार्थयोः सन्निकर्षस्य, सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्, तैश्चापदेशो ज्ञानविशेषाणा"मिति इयं किल त्रिसूत्री आत्ममनःसन्निकर्षस्य ज्ञानकारणत्वं प्रतिषेधतीति व्याहतमिदं भवति— "ज्ञानलिङ्गत्वादात्मनो नानवरोधः तदयौगपद्यलिङ्गत्वाच्च न मनस" इति मनःसंयोगानपेक्षायां युगपज्ज्ञानोत्पत्तिप्रसङ्ग इति दृष्टव्याघातः । अथ माभूद्व्याघात इति ज्ञानमात्ममनःसन्निकर्षादुत्पद्यते ? हेश्यावस्थमेवैतत्—कस्मादात्ममनःसंयोगो नाभिधीयते । अत्रोक्तम् । किमुक्तम् ? नेदं कारणावधारणार्थं सूत्रम्, अपि तु विशिष्टकारणवचनमिति ।

यापीयं त्रिसूत्री प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्येत्येवमादि, इयमपि—

नार्थविशेषप्राबल्यात् ॥ २९ ॥

नार्थविशेषप्राबल्यात् । नानया त्रिसूत्र्या आत्ममनःसन्निकर्षस्य(१) कारणभावः प्रतिषिध्यते, अपि तु प्राधान्य(२)मिन्द्रियार्थसन्निकर्षस्योपपाद्यते । प्राधान्यं चोपपादयन्त्या ना-

(१) संयोगस्य—पा० ६ पु० । (२) प्राबल्य—पा० ६ पु० ।

त्ममनःसंयोगः प्रतिषिद्धो भवति । मनसि क्रियाकारणाभिधानं सुखाद्यासक्तमनसामिन्द्रियार्थयोः सन्निकर्षनिमित्तत्वादित्यभिधाने-नाऽऽत्ममनःसंयोगोऽपि कारणमित्युक्तम् । तत्र मनसि क्रियाकारणं वाच्यमिति ?। अथ(१) सुखदुःखोपभोगस्यादृष्टनिमित्तत्वाददृष्टं कारणम्– यथैवात्मनि गुणान्तरमिच्छाजनितं प्रयत्नलक्षणं क्रियाहेतुस्तथाऽऽत्मनि संस्कारो धर्माधर्मसमाख्यातो वर्तते, तेन प्रेरितं मनः संयुज्यते विभज्यते वा, तेन ह्यप्रेर्यमाणे मनसि ततोऽन्यस्य क्रियाहेतोरभावात् सर्वार्थता तस्य निवर्तेत । नहि धर्माधर्मावन्तरेण मनसि कश्चिदन्यः क्रियाहेतुरादौ सम्भवतीत्यतो ऽदृष्टं कारणमिति ॥

(इति प्रत्यक्षलक्षणपरीक्षा ।)

एवं तावत्प्रत्यक्षलक्षणं समाहितम्(२) अतः परमिदानीं प्रत्यक्षस्यानुमाने ऽन्तर्भावं कुर्वाण इदमाह—

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३० ॥

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः । यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम् अयं वृक्ष इति, एतत् किल प्रत्यक्षम्, तदनुमानमेव, कस्मादेकदेशग्रहणाद्वृक्षोपलब्धेः–एकदेशमयं गृहीत्वा वृक्षमुपलभते, न चैकदेशो वृक्षः, तत्र यथाऽन्यस्य दर्शनादन्यप्रतिपत्तिरनुमानम्, एवमेकदेशग्रहणाद्वृक्षप्रतिपत्तिरनुमानमिति । यथा धूमं गृहीत्वाऽग्निप्रतिपत्तिरेवमेकदेशं गृहीत्वा वृक्षप्रतिपत्तिरिति।

न, यथासम्भवं विकल्पानुपपत्तेः–एकदेशग्रहणादर्थान्तरं प्रतिपद्यत इति किं तदर्थान्तरं ? यदेकदेशग्रहणात् प्रतिपद्यत इति। अवयवसमूहपक्षे तावदवयवान्तराणि, द्रव्यान्तरोत्पत्तिपक्षे तानि

(१) अथेति नास्ति—पा० ६ पु० ।
(२) समधिगतम्—पा० ६ पु० ।

चावयवीति चेन्न। यदि तावदवयवसमूहमात्रं वृक्षमधिकृत्योच्यते ? एतस्मिन् पक्षे गृह्यमाणावयवव्यतिरेकेण यान्यगृह्यमाणान्यवयवान्तराणि स वृक्षः । अथ द्रव्यान्तरोत्पत्तिपक्ष आश्रीयते ? तथाप्यर्वाग्भागव्यवहितानि अवयवान्तराणि, अर्थान्तरं च स वृक्ष इति । किं पुनरत्रैकदेशग्रहणादयं प्रतिपद्यते ? किमवयवान्तराणि उत द्रव्यान्तरमिति ? । अवयवसमूहपक्षे तावद्वृक्षबुद्धेरभावः परभागस्यावृक्षत्वात् अर्वाग्भागवत् । यथैवायमर्वाग्भागो न वृक्षः एवं मध्यपरभागावपि न वृक्षः, सेयमवयवसमूहपक्षे (ऽवृक्षे) वृक्षबुद्धिरुत्पद्यमाना निर्विषया, अर्वाग्भागः परभागो मध्यभाग इत्येतच्च नास्ति । कथं ? भाग इत्येतदवयवस्यैव नाम, यः पुनरर्थान्तरमवयविनं न प्रतिपद्यते तस्यावयव इति निरभिधेयं वाक्यम्, अवयवश्च परभागोऽर्वाग्भागः स चावयविप्रत्याख्याने न युक्त इति । अथैकदेशो भाग इत्युच्यते ? कोऽयमेकदेशः ? एकदेशो ह्यवयविन आधारः, अवयविनं च प्रत्याचक्षाणेन एकदेशोऽपि प्रत्याख्यातः । अथाकार्यकारणभूतानां परस्परप्रत्यासत्त्युपग्रहेणैकदेशावस्थानमवयवार्थः ? । अहो ? शब्दार्थकौशलम्—अकार्यकारणभूताश्च परस्परप्रत्यासत्त्युपग्रहेण च वर्तन्त इति । न च परस्परोपकारं कुर्वन्त्यवयवाश्चाभिधीयन्त(१) इति चित्रम् ।

अपरे त्वर्वाग्भागदर्शनेन परभागानुमानं कृत्वा प्रतिसन्धानप्रत्ययजामवृक्षे वृक्षबुद्धिमध्यवस्यन्ति । एतस्मिन् पक्षे वृक्षबुद्धेरभाव एव । कथम् ? अर्वाग्भागस्य परभागस्य चावृक्षत्वात् । न चावृक्षप्रतिसन्धानजा वृक्षबुद्धिरुत्पत्तुमर्हति । न चैतस्मिन् पक्षेऽनुमानं भवति— अर्वाग्भागमयं

(१) अवयवाश्च विधीयन्ते—पा० १ पु० ।

गृहीत्वा परभागमनुमिमीते इति नानुमानस्य विषयो ज्ञातः । कथं न ज्ञातः ? यदि तावदेवमनुमिमीते वृक्षोऽयमर्वाग्भागवत्त्वात् ? । कतमोऽसौ वृक्षो ? यस्यार्वाग्भागवत्त्वं धर्मः, अनभ्युपगतार्थान्तरावयविनोऽर्वाग्भागमात्रं प्रत्यक्षम् । न च धर्मिण्यनुपलब्धे ऽनुमानं प्रवर्तते । न चायं जात्वपि धर्मिणमुपलभते अविद्यमानत्वेनाभ्युपगमात् । न चानुमानम्, अनुमाने एवंविधस्य प्रतिसन्धानस्याभावात् –न ह्यनुमाने एवंविधं प्रतिसन्धानमस्ति । नायमनुमाता पूर्वमनुपलभ्याग्निं धूमविशेषणं प्रतिसंधत्ते प्रतिपद्यते अयं धूमोऽयं चाग्निरिति । न च प्रतिसन्धायानुमिमीते अग्निमात्र भवितव्यमिति । किं कारणं ? वैयर्थ्यात्–व्यर्थमनुमानमेतस्यामवस्थायामग्नेर्विशेषणभूतस्य प्रतीतत्वात् । तस्मान्नानुमाने प्रतिसन्धानमस्ति । प्रतिसन्धायापि च न समुदाये प्रतिसन्धानम्, न च वृक्षे । न ह्ययमेकदेशदर्शनात् समुदायं प्रतिपद्यते न वृक्षं, किन्तु शेषं समुदायिनमेव । किं कारणम् ? समुदायिव्यतिरेकेण समुदायस्यानभ्युपगमात्(१) न हि भवन्तः समुदायिव्यतिरिक्तं समुदायं प्रतिपद्यन्ते इति । न चासन् समुदायोऽनुमातुं शक्यः ।

किं चार्वाग्भागमयं गृहीत्वा किमन्यदनुमिमीते अयमर्वाग्भागः परभागवान् इति ? । न युक्तमनुमातुम–अर्वाग्भागस्य परभागवत्त्वासम्भवात् । न ह्यर्वाग्भागः परभागवान् भागस्य भागवत्त्वासम्भवात्, न हि भागस्यापरभागो विद्यत इति । अथ भागं भागवन्तं प्रतिपद्यसे ? न स भागो भागवान्, भाग्येवासौ, भागिविषयं चानुमानमित्ययुक्तमुभयस्य प्रत्यक्षत्वात्—उभयं ह्यत्र प्रत्यक्षम्–अर्वाग्भागो भागी च । अत्रार्वाग्भागवत्त्वेन भागिनः

(१) समुदायस्याप्यसत्त्वाभ्युपगमात्—पा० ६ पु० ।

परभागानुमानमस्मत्पक्षे युक्तं, भवत्पक्षे तु भागमात्रदर्शनान्न युक्तमिति । यश्च तदर्वाग्भागदर्शनं ? न तस्य लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहोऽस्ति, सम्बद्धयोश्चार्वाग्भागपरभागयोरदृष्टत्वात् । न ह्ययं दृष्टा अर्वाग्भागपरभागयोः सम्बन्धं पश्यति । नार्वाग्भागपरभागौ सम्बद्धौ । न चानुभवमन्तरेण स्मृतिः । न च स्मृतिमन्तरेण लिङ्गदर्शनं केवलमनुमानम् (म) । कथं पुनरयमर्वाग्भागपरभागौ सम्बद्धौ न पश्यति?—नित्यमर्वाग्भागेन परभागस्य(च) व्यवधानात्(१) नित्यमर्वाग्भागमेव केवलमुपलभते, परभागं तु न कथञ्चन, अर्वाग्भागव्यवहितत्वात् ? । सत्यम् । नोभयोरुपलब्धिरस्ति, उभौ च सम्बद्धौ ?, सत्यं सम्बद्धौ, अनुमानं त्वशक्यम् उभयोरदर्शनात् । अर्वाग्भागपरभागयोश्च धर्मधर्मिभावानुपपत्तेर्नानुमानम्—यत्र खल्वनुमानं भवति तत्र धर्मिणो धर्मप्रसिद्धौ धर्मान्तरविषयमनुमानम्, न पुनरर्वाग्भागस्य परभागो धर्मः, परभागस्य चार्वाग्भागः, ततश्च नानुमानम् । यच्चेदमुच्यते प्रतिसन्धानप्रत्ययजा वृक्षबुद्धिरिति ? तदयुक्तम्—वृक्षस्यासिद्धत्वेना(२)भ्युपगमात् न प्रतिसन्धानम्—प्रतिसन्धानं हि नाम पूर्वप्रत्ययानुरञ्जितः प्रत्ययः पिण्डान्तरे भवति । यथा रूपं च यथोपलब्धं रसश्चेति । भवत्पक्षे पुनरर्वाग्भागं गृहीत्वा परभागमनुमायार्वाग्भागपरभागाविस्तेतावान् प्रतिसन्धानप्रत्ययो युक्तः, वृक्षबुद्धिस्तु कुतः ? न तावदर्वाग्भागो वृक्षो न परभाग इति । अर्वाग्भागपरभागयोश्चान्वृक्षभूतयोर्या वृक्षबुद्धिः सा अतस्मिंस्तदिति प्रत्ययो नानुमानाङ्गं भवितुमर्हतीति । प्रमाणस्य यथाभूतार्थपरिच्छेदकत्वात् । यश्चायमतस्मिंस्तदिति प्रत्ययः स

(१) व्यवहितत्वात्—पा० ६ पु० ।
(२) वृक्षस्यासत्त्वेन—पा० ६ पु० ।

प्रधानानुकारेण भवतीति वृक्षबुद्धिः प्रधानं वक्तव्यम्, न ह्यगृहीतसामान्यस्यानध्यारोपित(१)तद्विपरीतधर्मस्य वा अतस्मिँस्तदिति प्रत्ययो भवति, प्रधानं च नास्ति वृक्षस्यानभ्युपगमात्। तस्मान्नानुमानप्रतिसन्धानाद् वृक्षबुद्धिः ।

एतेनार्वाग्भागपरभागप्रत्यया अपि प्रत्युक्ताः । अनभ्युपगतान्यावयविन(२)श्चार्वाग्भागः परभाग इत्येतदपि नास्ति । कस्मात् ? महतो द्रव्यस्योपलब्धिलक्षणप्राप्तस्य परभागव्यवधायकस्यैतन्नाम अर्वाग्भाग इति । तथाभूतस्य च व्यवहितस्य परभाग इति । न च भवता किञ्चिद्द्रव्यमवयविभूतं प्रतिपद्यते यदर्वाग्भागपरभागशब्दवाच्यं स्यादिति । परमाणुषु तथासन्निविष्टेष्वर्वाग्भागपरभागवृक्षादिप्रत्यया इति चेत् ?—अथ मन्यसे नास्माभिरवयविद्रव्याणि कानिचित्प्रतिपद्यन्ते, किन्तु तेष्वेव परमाणुषु परस्परप्रत्यासत्त्युपसंग्रहेण संस्थानविशेषावस्थितेषु एते शब्दाः प्रवर्तन्ते अर्वाग्भागः परभाग इति वृक्ष इति च इति । न, तथाशब्दस्यार्थानभिधानात् तथासन्निविष्टेषु तथाभिधानं(३) प्रवर्तेत पूर्वप्रसिद्धौ सत्याम् । न च परमाणुषु पूर्वापरादिशब्दप्रवृत्तेर्बीजमस्ति तथाप्रसिद्धे गावि गवयस्तथारूप इति । एवं तावदवयवसमूहपक्षे वृक्षबुद्धेरभाव इत्युक्तम् । द्रव्यान्तरोत्पत्तिपक्षे तु नावयव्यनुमेयः प्रत्यक्षत्वादर्वाग्भागवदिति । यथैवायमर्वाग्भागमिन्द्रियसम्बद्धं प्रत्यक्षत उपलभते तथा वृक्षमपीति नानुमेयो वृक्षः । अथेन्द्रियसम्बद्धमपि वृक्षमनुमेयमेव प्रतिपद्यते ! वृक्षवदर्वाग्भागोऽप्यनुमेयः स्यात्, तथा

---

(१) आरोपितात्—पा० १ पु० ।

(२) अनभ्युपगतार्थान्तरावयविन—पा० ६ पु० ।

(३) तदाभिधानमिति २ पु० पा० ।

च व्याहतं भवति अर्वाग्भागमयं गृहीत्वा वृक्षं प्रतिपद्यत इति। सर्वमेवानुमानमित्येतस्मिन् पक्षे ऽनुमानाभावः प्रत्यक्षतो ऽनवगतत्वाद्धर्मिणः, न धर्मिणि प्रत्यक्षतोऽनाधिगते ऽनुमानं प्रवर्तते। यदप्यतीन्द्रियेष्वर्थेष्वनुमानमुक्तम्? तन्नास्ति न ह्यतीन्द्रियार्थोऽनुमातुं शक्यः। कथमिति? धर्मिणोऽनधिगतत्वादित्युक्तम्। कः पुनः सामान्यतो दृष्टस्य प्रत्यक्षपूर्वकानुमानाद्विशेषः?–यदि सर्वं प्रत्यक्षपूर्वकमेवानुमानमिति? अयं विशेषः प्रत्यक्षपूर्वकं त्रिकप्रसिद्धौ प्रवर्तते साध्यसाधनधर्म्युपलब्धौ–यत्रायं साध्यं साधनं च धर्मिणं च पूर्वं गृहीत्वा पुनर्धर्मधर्मिदर्शनेन धर्मान्तरमनुमिमीते तत्प्रत्यक्षपूर्वकम्, यत्र पुनः साधनधर्मं धर्मिणं चोपलभ्यात्यन्तापरोक्षं धर्मान्तरमनुमिमीते तत् सामान्यतोदृष्टमिति। भवत्पक्षे तु न सामान्यतोदृष्टादनुमानादुत्पत्तिर्बुद्धेर्न प्रत्यक्षपूर्वकाद्धर्मिणोऽनभ्युपगमात् प्रत्यक्षप्रतिषेधाच्चेति।

विरुद्धश्चायं हेतुरेकदेशग्रहणाद् वृक्षोपलब्धेरिति। कथमिति?,

न प्रत्यक्षेण यावत् तावदप्युपलम्भात् ॥ ३१ ॥

न प्रत्यक्षेण यावत् तावदप्युपलम्भात्। प्रत्यक्षमनुमानमेवं ब्रुवता प्रत्यक्षमपन्हुवता प्रत्यक्षापन्हवाच्च यदेकदेशग्रहणं प्रत्यक्षं तद्व्याहतं भवति। कथमिति?। यत्तदेकदेशग्रहणं भवता आश्रीयते प्रत्यक्षं तत्, तावतापि च प्रत्यक्षस्य लक्षणं सिद्ध्यति। न चैवं प्रतिज्ञायते सर्वं प्रत्यक्षस्य विषयः। किन्तु यावदिन्द्रियार्थसन्निकर्षादुपलभ्यते(१) तावत्प्रत्यक्षस्य विषय इति।

अन्यथापि–न प्रत्यक्षमनुमानमप्रकारवत्त्वात्, प्रकारवदनुमानम्, अप्रकारवत् प्रत्यक्षम्, उक्तमनुमानसूत्रं वर्णयद्भिरिति। त्रिकालविषयत्वाच्चानुमानं न प्रत्यक्षम्, त्रिकालविषयमनुमानम्, न

(१) उत्पद्यते—पा० ६ पु०।

त्यैवं प्रत्यक्षमपीति । लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहापेक्षत्वाच्च नानुमानं प्रत्यक्षम्, लिङ्गपरामर्शज्ञानस्य लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहोऽस्ति, न चैवं प्रत्यक्षस्य, तस्मान्न प्रत्यक्षमनुमानम् । इतश्च प्रत्यक्षस्य नानुमानत्वप्रसङ्गः तत्पूर्वकत्वात्—प्रत्यक्षपूर्वकमनुमानम्, न तु प्रत्यक्षम्, अयं चानयोर्विशेष इति । इन्द्रियसम्बन्धाच्च—नेन्द्रियस्यानुमेयेनार्थेन सम्बन्धादुत्पद्यते ज्ञानं, यस्मादनुमानमित्युच्यते । सोऽयं प्रमाणहेतुः प्रत्यक्षानुमानयोरेकत्वमासञ्जयता भेदः प्रत्याख्यायत इति ॥

न चैकदेशोपलब्धिरवयविसद्भावात् ॥ ३२ ॥

न चैकदेशोपलब्धिरवयविसद्भावात्(१) । यदिदं भवताऽभिधीयते एकदेशग्रहणादयं वृक्षः प्रतिपद्यत इति ? तदनुपपन्नम्, यस्मादेकदेशोपलब्धिश्च तत्सहचरितावयव्युपलब्धिश्च । न हीन्द्रियेण सन्निकृष्यमाण एकदेशे तत्सहचारितोऽवयवी न सन्निकृष्टस्तेन यथैकदेशः सन्निकर्षादुपलभ्यते एवमवयव्यपि सन्निकर्षादुपलभ्यत इति । कस्मात् ? अवयविसद्भावात्—अस्ति ह्ययमेकदेशव्यतिरिक्तोऽवयवी, तस्यावयवस्थानस्योपलब्धिलक्षणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्ना । किं कारणम् ? महदनेकद्रव्यवत्त्वाद्युपलब्धि(२)कारणानि, तान्येकदेशवदेकदेशिन्यपि विद्यन्ते, तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम् ।

नावयविन उपलब्धिर्युक्ता, कस्माद्विकल्पानुपपत्तेः—अयं खल्ववयवेषु वर्तमान एकस्मिन् कार्त्स्न्येन वा वर्तते एकदेशेन वा ? यद्येकस्मिन् कार्त्स्न्येन वर्तते ? शेषावयववैयर्थ्यम्—नहि शेषैरवयवैः किञ्चनावयविनः क्रियते । एकद्रव्यश्चासाववयवी प्रसक्तोपलभ्ये-

(१) अवयविसम्भवात्—इति पाठः क्वचित् ।

(२) रूपाण्युपलब्धि—पा० १ पु० ।

त। किं कारणम्? महदनेकद्रव्यवत्त्वस्योपलब्धिकारणत्वात्। न चास्य विनाशः(१) प्राप्नोति कारणद्रव्यविभागासम्भवात्—नह्येकस्य विभागः सम्भवति। न चैकेनारभ्यमाणस्य महत्त्वं युक्तं कारणबहुत्वमहत्त्वप्रचयासम्भवात्। तस्मान्नैकस्मिन् कार्त्स्न्येन वर्त्तत इति। नाप्येकदेशेन, न ह्यस्य कारणव्यतिरेकेण अन्ये एकदेशाः सम्भवन्ति, सोऽयमेकदेशोपलभ्यावयव्युपलभ्यमानो न कृत्स्ने उपलभ्यते, सेयमेकदेशोपलब्धिरनिष्टैवेति। अथोपलभ्यमानोऽवयवी कथमुपलभ्येत? यदि गृह्यमाणेष्ववयवेषु ? कृत्स्नः परिसमाप्तः स्यात्। न चायं गृह्यमाणेषु परिसमाप्तः शेषावयववैयर्थ्यप्रसङ्गादित्युक्तम्। अशेषावयवोपलब्धिरपि नास्ति मध्यभागपरभागयोरर्वाग्भागेन व्यवधानात् तेनावयविनो न ग्रहणविकल्पः सम्भवति नापि वृत्तिविकल्पः।

एकस्मिन् कृत्स्नैकदेशशब्दासम्भवाद(२)प्रश्नः—किमवयव्येकदेशेन वर्त्तते अथ कृत्स्नेनैव वर्त्तत इति न युक्तः प्रश्नः—नावयवी कृत्स्नो नैकदेशः। कृत्स्नमिति खल्वनेकस्याशेषस्याभिधानम्। एकदेश इति चानेकत्वे सति कस्यचिदभिधानम्। ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्ननुपपन्नौ। कथं तर्ह्यवयवेष्ववयवी वर्त्तत इति?। आश्रयाश्रयिभावेन—आश्रितोऽवयवी आश्रया अवयवा इति। का पुनरियं वाचो युक्तिः नैकदेशेन वर्त्तते इति च न कृत्स्नो वर्त्तते अथ च वर्त्तत इति?। यद्यथाभूतं तत्तथा निर्दिश्यते इत्येषैव वाचो युक्तिः। कृत्स्नैकदेशशब्दौ नावयविनि स्तः तस्यैकत्वादित्युक्तम्(३)। तस्मादाश्रयाश्रितधर्मिनिर्देशमात्रमव-

---

(१) किं चास्याविनाशः—पा० १ पु०।
(२) विकल्पासम्भवात्—पा० ६ पु०।
(३) कृत्स्नस्यैकत्वादिति—पा० १ पु०।

यव्यवयवेषु वर्तेत इति । का पुनरियं वृत्तिः ? एकस्यानेकत्रा-
श्रयाश्रितभावलक्षणा प्राप्तिः ।

अपि चैकोऽनेकत्र वर्तेत इति प्रतिजानानो नानुयो-
क्तव्यः कस्मात् ? उभयेन व्याघातात्—एकमनेकत्र वर्तेत
इति ब्रुवाणः किमेकदेशेन वर्तते उत सर्वात्मना इति नानुयो-
क्तव्यः । कस्मात् ? उभयेन व्याघातात्, यदि एकमनेकत्र वर्त-
मानं प्रत्यवयवं सर्वात्मना वर्तते ? नैकमनेकत्र वर्तते, अनेकमनेकत्र
वर्तेत इत्यापन्नम् । एवं चानुयोगेऽधिकरणव्याघातः । अथैकमने-
कत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते ? तथापि नैकमनेकत्र वर्तेत
इति प्राप्तम्, अनेकमनेकत्र वर्तेत इत्यापन्नम् । ये च त(त्र) एकदेशाः
प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम् । एतस्मिन्(१) पक्षे
नैकमनेकत्र वर्तते । किं तर्हि ? अनेकमनेकत्रेति । अथ प्रत्येकं परिस-
माप्त्या वर्तेत इति असमर्थोऽनेकमनेकत्र वर्तेत इति ? तथाप्यनुयो-
गाधिकरणं निवर्तेत इति—य एव स्वल्पसमर्थोऽनेकमनेकत्र वर्तते स
एवार्थः प्रत्येकं परिसमाप्त्या वर्तेत इति सर्वथाऽनुयोगाधिकरणं नि-
वर्तेत इति । अनुयोगस्याधिकरणबाधकत्वात् । अयं खलु अनुयोगः
क्रियमाणोऽधिकरणं बाधते । अतो धर्मविकल्पभावेन न वर्तते ।
नायं विकल्पः कश्चिदाश्रयवान् इत्यतो नानुयोक्तव्य इति । एवं
सर्वेष्वनेकद्रव्यवृत्तिषु(२) संख्यापृथक्त्वसंयोगविभागसामान्या-
दिष्वनुयोगाधिकरणव्याघातदोषो वक्तव्यः । ग्रहणाग्रहणभे-
दाद्भेदोऽवयववदिति चेत् ?—यथा गृह्यमाणानामगृह्यमाणानां
चावयवानां भेदः तथाऽवयविनोऽपि गृह्यमाणागृह्यमाणावयवाश्रि-
तस्य भेदः प्राप्तः ततश्च नैकोऽवयवी ?, न भेद एकस्मिन्नपि द-

(१) एकस्मिन्—पा० १ पु० ।
(२) अनेकवृत्तिषु—पा० १ पु० ।

र्शनात्-एकस्मिन्नपि गृह्यमाणे ग्रहणमग्रहणं च दृष्टम् देवदत्ता-
दिवदिति । यथा देवदत्तादिः केनचित्सह गृह्यते केनचिच्च सह
न गृह्यते न तावता तस्य भेदः तथाऽवयविनोऽपीत्यदोषः । गृही-
तत्वाच्च-यदिदं भवताऽभिधीयते एकदेशग्रहणादेतस्य ग्रहणमेक-
देशाग्रहणाच्चाग्रहणमित्ययमनास्पदो विकल्पः अवयविनो गृ-
हीतत्वात् । एकदेशसहचारितोऽवयवी गृहीतः । किमस्यागृहीतं
येनास्य ग्रहणाग्रहणविकल्प आस्पदवान् भवेत् । मध्यभाग-
परभागौ न गृहीताविति चेत्? न, तयोरवयविनोऽन्यत्वात्-अ-
न्योऽवयवी अन्यौ मध्यभागपरभागाविति । अवयविनोऽन्य-
त्वादवयविनो मध्यभागपरभागौ न गृह्येते इति । किं का-
रणम्? ग्रहणहेत्वभावात् । यथार्वाग्भागेन सहावयविन इन्द्रि-
यसन्निकर्षो निमित्तमस्ति(१) नैवं मध्यभागपरभागाभ्यां सह ।
तस्मादर्वाग्भागेन सहोपलभ्यते न मध्यभागपरभागाभ्यामिति ।
अवयवसमूहपक्षे तु सर्वथा वृक्षबुद्धेरभावः(२) कथं? मूलस्क-
न्धशाखापलाशानां समूहो वा वृक्षः स्यात् सान्निध्यं समुदायि-
नाम्? उभयथा च वृक्षबुद्धेरभावः । अवयवैरवयवान्तरव्यवधा-
नादशेषग्रहणं नास्ति । सान्निध्यग्रहणं चायुक्तम् । सान्निध्यवता-
मग्रहणात् । न हि सान्निध्यवत्स्वगृह्यमाणेषु सान्निध्यग्रहणमस्ति भवति
हीदमनेन संयुक्तमिति । सर्वमेकदेशग्रहणसहचारिता वृक्षबुद्धिर्द्र-
व्यान्तरोत्पत्तिपक्षे कल्पते न समुदायपक्ष इति ॥

(इति प्रत्यक्षस्यानुमानत्वपरीक्षा ।)

साध्यत्वादवयविनि सन्देहः ॥ ३३ ॥

साध्यत्वादवयविनि सन्देहः । कारणेभ्यो द्रव्यान्तरमुत्पद्यत

---

(१) हेतुरस्ति—पा० ६ पु० ।
(२) सर्ववृक्षबुद्धेरभावः—पा० ६ पु० ।

इति साध्यमेतत् । किं पुनरत्र साध्यम् ? किमव्यतिरेकोऽथावयवीति । यद्यवयवी ? न लिङ्गमस्ति, धर्मिणि विप्रतिपत्तेः, नहि धर्मिणि विप्रतिपद्यमानः कुतश्चिदभ्यनुज्ञां लब्धुमर्हति । न च धर्मिणि विप्रतिपत्तेर्बीजमस्ति सादृश्याभावात् । नहि सादृश्यमन्तरेण विप्रतिपत्तेर्बीजमस्ति । किं कारणम् ? । विप्रतिपत्तिर्नाम विपरीता प्रतिपत्तिः । तस्याश्च कारणं समानधर्मोपलब्ध्यावनवगतविशेषस्य(१) तद्विपरीतधर्माध्यारोपो, न चानभ्युपगतावयविनोऽवयविनि सादृश्यं किञ्चिदस्ति । नापि तद्विपरीतधर्माध्यारोपः । तस्मान्न विप्रतिपत्तिः । अथाव्यतिरेकः साध्यः ? तत्राव्यतिरेकप्रतिपादकं प्रमाणं वक्तव्यम् ? । न ह्यप्रामाणिकी काचित् प्रतिपत्तिरस्ति ? । इदं प्रमाणमर्थान्तरानवयवत्वम् ?—अर्थान्तरमर्थान्तरस्यावयवो न भवति, यथा न गौरश्वस्यावयवः, अवयवाश्च तन्तवोऽवयवी च पटः, तस्मान्नासौ तेभ्योऽर्थान्तरमिति ? ।

इदं तावद्यथाश्रुति वाक्यं हेतुहीनम् । न ह्यत्र हेतुरस्तीति । ननु चोपनयेन व्यज्यमानो हेतुरवयवत्वमस्ति नार्थान्तरं पटात्तन्तवः तदवयवत्वादिति ?, न, व्याघातात् । अनर्थान्तरभावे नावयवत्वं(२) सिद्ध्यति तन्तूनामिति । किं कारणम् ? । अवयव्यपेक्षत्वात्—अवयव्यपेक्षोऽवयवः । न चावयविमन्तरेणावयवत्वे किञ्चिद्बीजमस्ति । अर्थान्तरे च दर्शनात् विरुद्धः (स्यात्) दृष्टोऽवयवोऽर्थान्तरभावे नानर्थान्तरभाव इति । यथा तन्तवो ऽवयवा पटादर्थान्तरमिति । षष्ठीविशेषणादप्रसङ्ग इति चेत् ?—पटस्यावयवा इत्युक्ते घटादिषु कः प्रसङ्गः ? । तत्त्वोक्तम् । किं ? व्याघातादिति । न ह्यनर्थान्तरभावे अवयवोऽस्ति,

(१) अनधिगतविशेषस्य—पा० ६ पु० ।
(२) अर्थान्तरभावेनावयवत्वं—पा० ६ पु० ।

न च षष्ठी । न च तन्तुस्तन्तोरवयवः । नापि षष्ठ्यर्थः । तन्तोस्त-न्तुरवयव इति उपेक्ष्यावयवत्वं तन्तूनां तस्य नान्वयो न व्यति-रेक इति असाधारणत्वादहेतुः । अनर्थान्तरं(१) पटात् तन्त-व इति च तन्तून् पक्षीकृत्य तदवयवत्वादिति ब्रुवाणस्तन्तूनां तन्त्ववयवत्वं ब्रवीति । एतच्च विरुद्धम् । न तन्तवस्तन्तूनामवयवा इति । अथ पटः पक्षीक्रियते? तथापि व्यधिकरणो हेतुः अवयव-त्वस्य तन्तुधर्मत्वात्—तन्तुधर्मोऽवयवत्वम, न पटधर्म इति । अव-यवशब्दस्य च कारणविशेषवाचकत्वात् असत्यवयविनि व्या-घातः । यद्यवयविनमर्थान्तरं न प्रतिपद्यसे कस्य तन्तवः कारणम ? नहि कारणमात्मानं निर्वर्त्तयतीति ।

नैव हि नः किञ्चिन्निर्वर्त्यमस्ति ? न एव तन्तवः संस्थानविशेषावस्थिताः पटाख्यां लभन्त इति अपटाख्यास्तन्तवः पटशब्देनाभिधीयन्त इत्युक्तं भवति ? । एतच्च विरुद्धं मुख्यास-म्भवात् । नहि तन्तूनामपटानां पटेन किञ्चित्सामान्यमस्ति । न चासति सामान्ये मिथ्याप्रत्ययस्य बीजमस्तीत्युक्तम । यच्चेदमुच्य-ते संस्थानविशेषावस्थानामिति ? किं तदर्थान्तरभूतमाहो नेति ? । यद्यर्थान्तरभूतं? किं तदिति वक्तव्यम ? अथ नोच्यते? शून्यं तर्हि इदं वाक्यम् ''संस्थानविशेषावस्थान''मिति । अस्माकं तु संस्थानविशेषः संयोगः स चार्थान्तरम ।

नानभ्युपगमात—न मयार्थान्तरं संयोगः प्रतिपाद्यते अ-न्यासंयोगादिति ?—अन्यदन्यस्य संयोगो न भवति यथा गो-रश्वस्य न संयोगः, अङ्गुल्योऽस्तु संयोगस्तस्मान्नार्थान्तरमिति ? । नोक्तोत्तरत्वात्—उक्तोत्तरमेतत । किमिति ? अर्थान्तरानर्थान्तरयो-र्व्यवृत्तेः संयोगोऽसाधारणः प्रतिज्ञैकदेशश्च नार्थान्तरं संयो-

(१) नार्थान्तरं—पा० ६ पु० ।

गः संयोगत्वादिति । विशेषणभावाच्चार्थान्तरं संयोगः—संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति ते इतरेभ्यो विशिष्य संयुक्ते आहरति । न विशेषणस्यान्यथासिद्धत्वात् ?—यदिदं भवताभिधीयते संयुक्ते द्रव्ये आहरेति विशेषणभावादर्थान्तरं संयोग इति, तदन्यथा सम्भवति ?। कथम् ? प्रत्यासत्तौ प्रतीघातावसानायां संयोगव्यवहारः—तावद्द्रव्याणि प्रत्यासीदन्ति यावत् प्रतिहतानि भवन्ति, तस्मिन् प्रतिघाते संयोगव्यवहारो नार्थान्तर इति ?। अनभ्युपगतार्थान्तरसंयोगेन प्रत्यासत्तिप्रतीघातौ वक्तव्यौ ? तत्र संयुक्तसंयोगाल्पीयस्त्वं प्रत्यासत्तिर्मूर्तिस्पर्शवद्द्रव्यसंयोगः प्रतीघातः । यः पुनः संयोगं न प्रतिपद्यते तेन प्रत्यासत्तेः प्रतिघातस्य चार्थो वक्तव्य इति ? यदि चार्थान्तरं संयोगो न स्यात् क्षेत्रोदकबीजाग्नीन्धनादीनि सर्वत्रावस्थितानि सर्वत्राङ्कुरपाकादिकार्यं कुर्युः तान्येव तानीति । तस्माद्यस्तैरपेक्ष्यते सोऽर्थोऽन्यस्तस्मिन् संयोग इति संज्ञेति । क्षेत्रोदकबीजाग्नीन्धनानि अङ्कुरपाकादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भाद्दण्डादिवत् यथा दण्डाद्यनेकं कारणं संयोगादिनिमित्तान्तरापेक्षं सर्वदा न घटपटादिकार्यं करोति तथा बीजाद्यपि, तस्मात् तदपि सापेक्षमिति ।

यत्त्वत्र परेणोच्यते—

"कार्योत्पत्तिर्विना तेन शब्दायस्कान्तकर्मव"दिति ।

अस्यार्थः—यथा किल शब्दः शब्दान्तरमारभमाणो विना संयोगमारभते, यथाऽयस्कान्तोऽयः समाकर्षति विना संयोगेन, यथा कर्म संयोगविभागौ करोति विना संयोगेन, तथान्यापि कार्योत्पत्तिर्विना संयोगेन भविष्यतीति ?।

न हेत्वर्थापरिज्ञानात्—न ब्रूमोऽस्ति संयोगः कार्योत्पत्तेः, अपि

तु क्षेत्रोदकबीजाग्नीन्धनानि सापेक्षाणीति । यदि च निरपेक्षं किञ्चित्कारणं सर्वदाऽऽरम्भकं स्यात् भवेदनैकान्तिको हेतुः(१), तत्तु न केनचिच्छक्यं प्रतिपादयितुम्, शब्दः शब्दान्तरमारभमाणः स्वकारणपरिच्छिन्नाकाशदेशप्रत्यासत्त्यपेक्ष आरभते शब्दस्याव्यापकत्वात्। अयस्कान्तोऽप्ययः प्रत्याकर्षति स्वाश्रयप्रत्यासत्त्यपेक्ष एव । यदि च निरपेक्ष आकर्षेत न क्वचिदयांस्यवतिष्ठेरन् तस्मान्न निरपेक्ष इति । कर्मापि स्वाश्रयप्रत्यासत्त्याभिमुख्यापेक्षं संयोगं करोति, न निरपेक्षं कर्म, न प्रतिलोममिति । यद्यनपेक्षं संयोगं कुर्यात् पाण्ड्यमथुरासम्बन्धिनि देवदत्ते उत्पन्नं कर्म तक्षशिलासम्बन्धिनि यज्ञदत्ते संयोगं कुर्यात् । न त्विदमस्ति । न चेदं प्रतिज्ञायते सर्वस्य कारणं संयोगः, अपि तु सापेक्षमारभत इति । सूत्रव्याघात इति चेत् ?– अथ मनुषे यदि सापेक्षं कर्म संयोगं करोति ननु पारमर्षं सूत्रं व्याहन्यते ?—

"एकद्रव्यमगुणं संयोगविभागयोरनपेक्षकारणं कर्मेति"(२)!

न व्याघातः, सूत्रार्थापरिज्ञानात् न भवता सूत्रार्थो व्यज्ञायि–नायं सूत्रार्थो निरपेक्षं कर्म संयोगविभागकारणमित्याश्रयाद्यपि नापेक्षत इति। अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इति सूत्रार्थः । यथा द्रव्यमुत्पन्नं चरमभाविनं संयोगमपेक्षमाणं पश्चादारभते, यथा वा संयोगो गुणकर्मस्वारब्धव्येषु पश्चाद्भाविसंस्कारप्रयत्नादृष्टाख्यं(३) निमित्तमपेक्षते। यथा वा कारणेषु वर्तमाना रूपादयः कार्यरूपादिष्वारब्धव्येषु द्रव्योत्पत्तिमपेक्षन्ते उत्पाद्यस्याधारभावात्–यदुत्पाद्यं द्रव्यं तत्तेषामाधार इति । न तु कर्म पश्चाद्भाविनिमित्तमपे-

(१) अनैकान्तिकत्वं हेतोः–पा० ६ पु०।

(२) काणादसूत्रमिदम् १ अ० १ आ० १७ सू०।

(३) पश्चाद्भाविसंस्कारं प्रयत्नमदृष्टं चेति व्याख्येयम्।

क्षत इति अनपेक्षत्वं कर्मण, शास्त्र उक्तम न पुनः कर्माश्रयाद्यपि नापेक्षत इति । संयोगे सापेक्षत्वमप्रसङ्ग इति चेत् ?—यदि पश्चाद्भा-विनिमित्तान्तरानपेक्षत्वं कर्मणो निरपेक्षत्वार्थः अपि तर्हि संयोगे कर्तव्ये कर्म सापेक्षं प्राप्नोति विभागापेक्षित्वात्—न हि विभाग-मन्तरेण कर्म संयोगं करोति । तस्माद्विभागापेक्षित्वं कर्मणः प्र-सक्तम, ततश्च तदवस्थः सूत्रव्याघातदोषः ? न सन्देहात्—किं विभागापेक्षेण कर्मणा संयोगो जन्यते ? उत प्रतिबन्धकं विभागेन निवर्त्यत ? इति सन्दिह्यते । वयं तु ब्रूमः विभाग उत्पन्नः पूर्वसं-योगनिवृत्तिं करोति, निवृत्ते संयोगे कर्म प्रतिबन्धकापगमात् संयोगं करोति । यथा गुरुत्वं निरपेक्षं कर्मकारणमित्युद्दिष्टं शास्त्रे । अथ च वृन्तफलविभागान्निवृत्ते वृन्तफलसंयोगे गुरुत्वं लब्धवृत्ति, (नच) पतनकर्म करोति, तथा कर्मापीत्यदोषः । यथा वा संयोगः साधारणकार्यद्रव्यसंयोगविनाशोत्तरकालं द्रव्या-न्तरारम्भे निरपेक्षः कारणमिति न विभागापेक्षो द्रव्यमारभते तथा कर्म संयोगमारभमाणं न विभागमपेक्षत इति, अतोऽपि न सूत्रव्याघातः ।

यदप्युक्तं कर्म विना संयोगेन संयोगं करोति ? तद-पि न, व्याघातात्—न संयोगोऽस्ति कर्म च संयोगं करो-तीति व्याहतम । न ब्रमति संयोगे वाक्यमेतदर्थवत्तायां व्य-वतिष्ठत इति । अथवा येन व्याघातो गतिविभागसंयोगाश्च प्रतिपद्यन्ते, अथ च कर्म संयोगं करोतीति व्याहतम । अथ मनुषे परमतव्यपेक्षयोक्तम, संयोगविभागकर्मणां प्रतिषेधो नास्माभिः संयोगविभागकर्माण्यभ्युपगम्यन्ते इति ? एवम-प्यनिवृत्तो व्याघातः—यानि तानि परमताभ्युपगतानि संयोग-विभागकर्माणि तानि भवता कथं प्रतिपद्यन्ते ? । यदि प्रमाणतः ?

कथं पराभ्युपगतानि । अथ प्रमाणमन्तरेण ? कथं प्रतिपद्यसे न हि प्रमाणमन्तरेण का चित् प्रतिपत्तिर्युक्तेति । अथ नैव प्रतिपद्यसे ? व्याहतं तर्ह्येतद्भवति परपक्षप्रसिद्धानि संयोगविभागकर्माणीति । अथ मनुषे ? यानि भवताऽभ्युपगम्यन्ते संयोगविभागकर्माणि तानि, न सन्ति, न पुनः संयोगविभागकर्मप्रतिषेधः । कथं ? देशान्तरे विरलद्रव्योत्पादे गतिव्यवहारः—यः सन्तानो विरलो देशान्तरेषूत्पद्यते तत्र गतिव्यवहारः निरन्तरोत्पादे संयोगव्यवहारः ये वस्तुनी निरन्तरमुत्पद्येते तयोर्यो निरन्तरोत्पादः स संयोगः संयोगविपर्ययाद्विभागः ! । अत्र तावदुक्तं क्षणस्थितिं भावयद्भिर्न प्रमाणाभावादिति । न हि क्षणिकत्वे प्रमाणमस्तीति ।

सान्तरनिरन्तरबुद्ध्योश्च निमित्तं वक्तव्यम ? । यदि संयोगं विभागं निमित्तान्तरं न प्रतिपद्यसे सान्तरमितिबुद्धेर्निरन्तरमिति च बुद्धेर्भेदहेतुर्वक्तव्यः । नहि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति—या चेयमचलति चलतीति बुद्धिर्या असंयुक्ते संयुक्तमिति अविभक्ते विभक्तमिति च, सा च(१) प्रधानमन्तरेण न भवति । सर्वा एता मिथ्याबुद्धयः प्रधानानुकारेण भवन्तीति प्रधानं वक्तव्यम ? नहि निष्प्रधानं भाक्तं दृष्टम—स्थाणुपुरुषवदिति—यथा स्थाणौ सति पुरुषे स्थाणुरिति बुद्धिः पुरुषे वाऽसति स्थाणौ पुरुषबुद्धिरिति । यदि चार्थान्तरं संयोगो न स्यात् कुण्डलीत्यस्या बुद्धेः किञ्चिन्निमित्तमवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमुपादेयम । न तावत् कुण्डलनिमित्ता नापि देवदत्तनिमित्ता । न च भवता निमित्तान्तरं प्रतिपाद्यते, निमित्तान्तरं चान्तरेण यथा क-

(१) सार्वप्रधानामिति १ पु० पा० ।

थश्चिन्नवस्थिताभ्यां देवदत्तकुण्डलाभ्यां कुण्डलीति बुद्ध्या भवितव्यम् । तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमभ्युपगन्तव्यम् । यदि प्रतिषिध्यमानं ? यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः । तस्मान्न कथञ्चन संयोगः प्रतिपद्धुं शक्यते । इहबुद्धिनिमित्तत्वाच्च—इयमिहबुद्धिः प्रवर्तमाना नर्ते सम्बन्धात् प्रवर्तते—यथेह कुण्डे बदराणीति— नेयं बदरमात्रनिमित्ता न कुण्डमात्रनिमित्तेति, यदस्या निमित्तं स संयोग इति । इहेति बुद्धिर्यदि संयोगादनियमो न प्राप्नोति ?—यदि संयोगादिहबुद्धिर्भवति असति संयोग इहबुद्धिर्न स्यात्—यथा सन्तीह वने तिलकाः सन्तीह वने किंशुका इति । दूराच्चान्तरमपश्यतां किंकृतेहबुद्धिः नहि तत्रास्ति संयोग इति ? न, इहबुद्धेरुभयनिमित्तत्वात्— उभयमिहबुद्धेर्निमित्तं संयोगो विभागादर्शनं च । तत्रैका मुख्या, एका भाक्ती । या संयोगात् सा तत्त्वबुद्धिरिति । या विभागादर्शनात् सा भाक्तीति । या चेयं भाक्ती सा प्रधानसामान्यदर्शनादुपजायते न प्रधानं प्रत्याचष्टे । नहि प्रधानप्रत्याख्यानेन भाक्ती बुद्धिर्भवितुमर्हतीति । भाक्त्य एव सर्वा भविष्यन्तीति न युक्तम् ? प्रधानापेक्षित्वादित्युक्तम् । यदपीदमुच्यते विना संयोगेनेहबुद्धिर्दृष्टा यथा सन्तीह वने तिलकाः सन्तीह वने किंशुका इति ?। तत्र सम्प्रधार्यं किं सम्बन्धो नास्ति ? उत संयोगो नास्ति ? । वयं तु ब्रूमः संयोगो नास्ति न तु सम्बन्धः । सम्बद्धं हि वनं तिलकादिभिरिति ।

किं पुनरिदं वनं नाम ? नेदं दुर्वचम् । उक्तमेतद्बहुत्वसंख्या सविशेषणेति । ऊर्ध्वावस्थिते च द्रव्ये संयुक्तबुद्धौ सत्यामिहबुद्धिः कस्मान्न भवति तयोरेव द्रव्ययोस्तस्मिन् संयोगे सति न भवतीति ? किम्भूतो नियमः ?

नापरिज्ञानात्—संयोगमन्तरेण निर्निमित्तेहबुद्धिर्न भवतीति ब्रूमः न पुनर्भवत्येवेहबुद्धिः सति संयोग इति। न चोत्तराधरानपेक्षेण संयोगेनेहबुद्धिः न क्रियत इति तत्पूर्विका न भवति। यत्पुनरेतदसति सम्बन्धे अस्य द्रव्यस्येह समवाय इतीहबुद्धिर्न प्राप्नोति। यथेह तन्तुषु पट इति बुद्धेः समवायो निमित्तम्, न पुनः समवायस्य समवायोऽस्ति इह समवाय इति न स्यात्?। अत्रोक्तम्। किमुक्तम्? मिथ्याप्रत्यय एवैष इति। किं पुनः समवायवद्भिर्द्रव्यैः(१) समवायस्य सामान्यं? यदपेक्षया(२) स मिथ्याप्रत्ययः भवतीति? भेदादर्शनम्,— यानि समवायवन्ति न तेषां भेदो दृश्यते समवाये चैतदस्तीति युक्तो मिथ्याप्रत्ययः। वाक्यधर्मभेदाच्चानियमः—न चैकस्मिन् वाक्ये यो धर्मः स वाक्यान्तरेऽपि भवतीति यथा राज्ञः पुरुषो गच्छतीति त्रीणि पदानि। त्रीण्यपि स्वेन स्वेनार्थेनार्थवन्ति भवन्तीति। उदकस्य भावो भवतीति नतद्वाक्यसामान्यादेकस्मिन्नपि वाक्ये त्रीण्यपि पदानि पृथगर्थवन्ति(३) भवितुमर्हन्ति। कः पुनरस्य वाक्यस्यार्थः उदकस्य भावो भवतीति? यावदुक्तम्भवति उदकं भवति तावदुक्तम्भवति उदकस्य भावो भवतीति। एवमन्यान्यपि वाक्यानि कुण्डे बदराणां वृत्तिरिति यथा वृत्तौ दर्शितायां(४) वृत्तिमन्तु बदरेषु सम्प्रत्ययः। एतदुक्तम्भवति कुण्डे बदराणि वर्त्तन्त इति तथेह(च) द्रव्ये द्रव्यस्य समवाय इति ब्रुवाणेनोक्तम्भवति अत्र द्रव्ये द्रव्यं वर्त्तत इति। तस्मादज्ञात्वा वाक्य(ार्थ) विभागमुच्यते अस्य द्रव्यस्येह

---

(१) समवायिभिर्द्रव्यैः—पा० ६ पु०।
(२) यदपेक्ष्य—पा० ६ पु०।
(३) पृथगर्थानि—पा० १ पु०।
(४) दर्शितायां-पा० ६ पु०।

समवायोऽसति निमित्त इति। तस्मादुपपन्नमर्थान्तरं संयोग इति। उपपत्तौ च न संस्थानविशेषेणावस्थितास्तन्तवः पटबुद्धेः कारणं भवन्तीति।

अपरे पुनरन्यथा अर्थान्तरानवयवत्वादित्येतद्वाक्यं वर्णयन्ति अवयवावयविभावादिति। एतत्तु तैः कुतो लभ्यते? न ह्ययमर्थोऽर्थान्तरानवयवत्वादित्येतस्मिन् वाक्ये श्रूयते। उपनयेन लभ्यत इत्याह—यस्मादयमुपनयोऽवयवास्तन्तवोऽवयवी पट इति उपनयेनावयवावयवित्वादिति हेतुर्लभ्यते?। सत्यं लभ्यते विरुद्धस्तु भवति, न हि तन्तवः स्वात्मनो(१)ऽवयवाश्चावयवी च, न पटः आत्मनो(२)ऽवयवोऽवयवी चेति। किं कारणम्? अवयवावयविशब्दयोः सम्बन्धिशब्दत्वात्—सम्बन्धिशब्दावेतौ अवयवोऽवयवी च। न चान्यतरमत्याख्यानेन सम्बन्धिशब्दप्रवृत्तिरस्ति। तस्मादयमपि न सूत्रार्थः।

दृष्टोऽनर्थान्तरेऽपि प्रदेशप्रदेशिव्यवहारो यथा आकाशस्य प्रदेश इति? नोक्तोत्तरत्वात्—उक्तोत्तरमेतत्—अन्योऽवयवार्थोऽन्यश्च प्रदेशार्थ इति। कोऽवयवार्थः? कारणविशेषाभिधानमवयव इति, आधाराभिधानं प्रदेशः प्रदिश्यते अस्मिन्निति। न चाकाशं क्वचित् प्रदिश्यते न चाकाशस्य किञ्चित्कारणमस्ति। तस्मान्न कारणार्थो नाधारार्थ इति। सोऽयमाकाश प्रदेशशब्दः प्रदेशवद्द्रव्यसामान्याद्द्रष्टव्यः। किं पुनः प्रदेशवता द्रव्येण सामान्यं? संयोगस्याऽव्याप्यवृत्तित्वम्। एत चार्थमुपरिष्टाद्वक्ष्याम इति। तत्प्रदेशात्मकत्वादिति चेत्? अथ मन्यसे(३) अयमन्यो हेतुरवयविनोऽनर्थान्तरत्वमा-

(१) आत्मनो—पा० ६ पु०। (२) स्वात्मनो—पा० ६ पु०।
(३) मनुषे—पा० ६ पु०।

धकः तत्प्रदेशात्मकत्वं, कोऽस्यार्थोऽनर्थान्तरं पटात्तन्तवः तत्प्रदेशव्यपदेशविषयत्वादिति—ये यस्य प्रदेशत्वेन व्यपदिश्यन्ते ते तस्यात्मानो भवन्ति, यथाकाशस्य प्रदेशाः, पटस्य च प्रदेशत्वेन व्यपदिश्यन्ते तन्तवस्तस्मात् पटात्मानस्तन्तव इति ?। इदं तावद्यथाश्रुति वाक्यं पूर्ववद्धेतुहीनं तत्प्रदेशात्मकत्वस्यार्थान्तरानर्थान्तरयोरदर्शनादसाधारणः प्रदेशशब्दस्य कारणपर्यायत्वाद्विरुद्धः तत्प्रदेशव्यपदेशविषयत्वस्य तन्तुभिरसम्बन्धादसिद्धः। योऽप्ययं दृष्टान्त आकाशस्य प्रदेश इति सोऽप्यसिद्धः। कथमिति ? आकाशस्य प्रदेश इति संयोगस्याव्याप्यवृत्तित्वमुच्यते। न च संयोगस्याव्याप्यवृत्तित्वमात्रमाकाशं, तस्मादसिद्धो दृष्टान्तः।

द्रव्यान्तरेभ्यो द्रव्यान्तरानिष्पत्तेर्नान्योऽवयव्यवयवेभ्यः। न किल द्रव्यान्तरेभ्यो द्रव्यान्तरमुत्पद्यमानं(१)दृष्टं, न च गोहस्त्यश्वेभ्यः पुरुष उत्पद्यते। तन्तुभ्यस्तूत्पद्यते पटस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति ? अस्यापि पूर्ववद्धेतुन्यूनता। उपनयेन व्यज्यमानस्तेभ्यनुत्पत्तेरिति हेतुः। अयमप्यर्थान्तरानर्थान्तरयोर्व्यावृत्तेरसाधारणः। अर्थान्तराच्च तुर्यादेरर्थान्तरस्य पटस्योत्पत्तिदर्शनाद्विरुद्धः। पटपक्षीकरणे असम्बद्धार्थो न पटः पटादुत्पद्यत इति। अथ तच्छब्देन तन्तवः सम्बध्यन्ते तन्तुभ्यः पट उत्पद्यत इति। तथापि विरुद्धो न तन्तुस्तन्तुभ्यो भवति पटस्तु भवति।

नान्योऽवयव्यवयवेभ्योऽवयव्यन्तरावयवानामवयव्यन्तरार्थान्तरभावात्—इह ये ऽवयविनोऽर्थान्तरं भवन्ति तेऽवयव्यन्तरावयवा भवन्ति यथा चक्रादयो रथावयवा इति तेऽर्थान्तरं पटात्। यदि च तन्तवोऽपि पटादर्थान्तरं स्युः ते-

(१) उत्पाद्यमानं–पा० ६ पु०।

ऽपि पटव्यतिरेकेणावयव्यन्तरावयवाः स्युः । न च ते तद्व्यतिरेकेणावयव्यन्तरावयवास्तस्मान्नार्थान्तरमिति । वाक्यमात्रे हेतुन्यूनता असाधारणता च दोषः । हेतुस्तद्व्यतिरेकेणान्यानवयवत्वात् न तन्तवस्तन्तूनामवयवा इति विरुद्धः । अर्थान्तरप्रत्याख्यानाच्चावयवोऽवयवीत्येतन्न स्यात् ।

यदपीदमुच्यते ये ऽवयवा अवयविनोऽर्थान्तरं भवन्ति ते तद्व्यतिरेकेणान्यावयवा भवन्ति यथा चक्रादय इति ? । न उभयेन व्याघातात्—चक्रादयोऽवयवा इति ब्रुवताऽभ्युपगतमर्थान्तरं भवति । अनभ्युपगमे वा कोऽस्य वाक्यस्यार्थः चक्रादयो रथावयवा इति । ये च चक्रादयो रथावयवत्वेनाभ्युपगम्यन्ते तेऽप्यर्थान्तरप्रतिषेधान्न रथस्य नाप्यन्यस्यावयवा इति उच्छिन्नो(१)ऽवयवावयविशब्दस्य विषयः, तस्मादहेतुरयम् ।

नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरोत्पत्तिदेशव्यवच्छेदात्—यदुभयसम्प्रतिपन्नमर्थान्तरत्वेन तत्र तस्माद्भिन्नदेशमुत्पद्यमानं (२) दृष्टम् यथा गोरश्वात्, न तु तन्तुभ्यो भिन्नदेशः पट उत्पद्यते(३) तस्मान्नासौ तेभ्योऽर्थान्तरमिति ? । अत्रापि हेतुन्यूनता चासाधारणता च पूर्ववदिति तद्देशोत्पत्तेरिति हेतुः । न तन्तुस्तन्तुदेश उत्पद्यत इति विरुद्धः । उत्पत्तिप्रत्याख्यानं वा पटप्रतिषेधात् । यदि तन्तुभ्यः पटो नोत्पद्यते क उत्पत्तिशब्दस्यार्थो न तन्तुरुत्पद्यते न पट इति उत्पत्तिदेशव्यवच्छेदादित्युत्पत्तिशब्दस्यार्थो वक्तव्य इति । स च निरूप्यमाणो व्यवस्था-

---

(१) उच्छन्नो—पा० १ पु० ।

(२) उपलभ्यमानं--पा० ६ पु० । (३) उपलभ्यते-पा० ६ पु० ।

दि (१) धर्मभेदेनापूर्वं जन्माहेति विरुद्धः ।

नान्योऽवयव्यवयवेभ्योऽवयवान्तरावयविनोऽवयवान्तरार्था-न्तरभावात् । इह योऽवयवान्तराणामवयवी भवति सो-ऽवयवान्तरेभ्यो ऽर्थान्तरं भवति यथा चक्रादिभ्यो घटः चक्रादिभ्योऽवयवेभ्योऽर्थान्तरं घट इति चक्राद्यवयवव्य-तिरेकेणावयवान्तराणामवयवी भवति, न तु पटस्तन्तुव्यतिरे-केणावयवान्तराणामवयवी भवति । तस्मान्नासौ तन्तुभ्यो-ऽर्थान्तरम् ? । अत्राप्यसाधारणता हेतुन्यूनता च पूर्ववत् । अवयवान्तराणामवयवीति ब्रुवता अवयव्यर्थान्तरभूतोऽभ्य-नुज्ञातो भवति । शून्यं वा वाक्यम् । अथ नाभ्यनुज्ञायते ? कोऽस्य वाक्यस्यार्थः अवयवान्तराणामवयवीति । न ह्यवयविप्रत्याख्या-नादेतद्वाक्यमर्थवत्तायां शक्यं व्यवस्थापयितुम् । तद्व्यतिरेकेणा-न्यानवयवित्वं हेतुरस्यापि प्रसङ्गः पूर्ववत् ।

नान्योऽवयव्यवयवेभ्यः सत्यन्यकर्तुरर्थान्तरभावात्—इह ये यस्मिन् सत्यन्यत् कुर्वन्ति ते तस्मादर्थान्तरं भवन्ति यथा कटात् तन्तवः, सति कटेऽर्थान्तरं पटं कुर्वन्तीति कटादर्थान्तरं भवन्ति, न पुनः सति पटे तन्तवो द्रव्यान्तरं कुर्वन्ति तस्मात् ते नार्थान्तरमिति ?। अस्यापि हेत्वर्थः सत्यन्याकरणात्(२) अस्याप्यसाधारणता च पूर्ववत् । सति कटे तन्तवः पटं कुर्वन्तीति ब्रुषे न चार्थान्त-रमिति व्याहतम् । नहि तन्तव आत्मानं(३) कुर्वन्ति । पटमप्य-र्थान्तराभावात् न कुर्वन्तीति चेत् ? क्रियाविषयोच्छेदो न त-न्तव आत्मानं कुर्वन्तीति नार्थान्तरं कुर्वन्तीति क्रियाविषय उ-

(१) व्यक्तादि-पा० ६ पु० ।
(२) सत्यन्याकारणत्वात्—पा० ६ पु० ।
(३) स्वात्मानं—पा० ६ पु० ।

च्छिन्नो(१)भवतीति ।

नान्योऽवयव्यवयवेभ्यः स्वात्मसंयोगव्यतिरेकभाव्यवय-व्य(२)न्यत्वात्—इह ये यस्मादर्थान्तरं भवन्ति ते आत्मसंयोगव्यतिरेकेण भवन्ति तद्यथा तन्तुसंयोगव्यतिरेकेण कटो भवति, न च तन्तुसंयोगव्यतिरेकेण पटो भवति तस्मान्नासौ तेभ्योऽर्थान्तरम् ? । अस्यापि हेत्वर्थस्तन्तुसंयोगेभ्यस्तदुत्पत्तिरित्यस्याप्यसाधारणता हेतुन्यूनता च पूर्ववदेव । तन्तुसंयोगेभ्यस्तदुत्पत्तिरिति ब्रुवता तन्तुव्यतिरिक्तः संयोगश्चावयवी चाभ्युपगतो भवति

नान्योऽवयव्यवयवेभ्यो द्रव्यान्तरगुणानां द्रव्यान्तरगुणाकारणत्वे (३) अगुणत्वप्रसङ्गात्—न किल द्रव्यान्तरगुणानां द्रव्यान्तरगुणेभ्यो दृष्ट उत्पादः । यथा न गोगुणेभ्योऽश्वगुणानाम् । तन्तुगुणेभ्यस्तु पटगुणानामुत्पत्तिस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति ? । सोऽयमपन्यायो वर्तते । कोऽत्रापन्यायः तन्तुगुणेभ्यः पटगुणानामुत्पत्तिं प्रतिपद्यसे न चार्थान्तरं पट इति । न च तन्तुगुणेभ्यस्तन्तुगुणानामुत्पत्तिरिति तन्तुगुणेभ्यस्तद्गुणोत्पत्तिरिति हेतुर्विरुद्धः ।

नान्योऽवयव्यवयवेभ्योऽप्रत्यक्षत्वप्रसङ्गात् प्रत्यक्षाप्रत्यक्षवृत्तिरवयव्यप्रत्यक्षः स्यात् यद्यवयव्यर्थान्तरं स्यात् यथा गर्भमातृसंयोगः प्रत्यक्षाप्रत्यक्षवृत्तिर्न प्रत्यक्षः, प्रत्यक्षस्त्ववयवी, तस्मान्नासौ तेभ्योऽर्थान्तरम् ? । प्रत्यक्षत्वादेव नार्थान्तरमिति विरुद्धो हेतुः । गर्भमातृसंयोगश्चाप्रत्यक्ष इति किमयं प्रत्यक्षाप्रत्यक्षाभ्यामारम्भादप्रत्यक्ष ? उत ऽप्रत्यक्षाप्रत्यक्षवृ-

(१) उच्छिन्नो—पा० १ पु० । एवमग्रेऽपि ।

(२) व्यतिरेकेण भाव्य—पा० ६ पु० ।

(३) सतीति पूरणीयम् ।

त्तित्वादप्रत्यक्ष ? इति । यद्याद्यः ? हिमवत्परमाणुकमप्रत्य-
क्षं प्राप्नोति तस्य ह्येक एव(१)प्रत्यक्ष एक एवाऽप्रत्यक्ष
इति । अथ द्वितीयः ? भावोऽप्रत्यक्षः प्राप्नोति स हि प्रत्यक्षाप्रत्य
क्षवृत्तिरिति । न चायं पक्षोऽस्ति अवयवानामप्रत्यक्षत्वे अ-
वयवी न प्रत्यक्ष इति ? । उक्तञ्चात्र । किमुक्तम्, ?
येषामिन्द्रियार्थसन्निकर्षोऽस्ति अवयवानां तैः सहावयवी गृह्यते,
येषां नास्ति तैः सह न गृह्यते । न चैतत्कृतोऽस्ति भेदः अ-
वयवानामप्रत्यक्षत्वादवयविनोऽप्रत्यक्षत्वं ब्रुवतः सर्वमतीन्द्रियं प्रा-
प्नोति । न हि कस्यचित् मध्यभागपरभागौ ज्ञायेते इति । सोऽयं
प्रत्यक्षविषय उच्छिन्नो भवति । प्रत्यक्षत्वादिति च ब्रुवाणेन अव-
यवातिरिक्तोऽवयव्यभ्युपगतो भवति परमाणूनामतीन्द्रियत्वात् ।
न हि परमाणवः कदाचिदुपलभ्यन्ते न परमाणवोऽतीन्द्रिया
रूपादिमतामतीन्द्रियत्वनिवृत्तेः । न हि रूपादिमत् किञ्चिदती-
न्द्रियमस्ति । दृष्टं च रूपादिमदैन्द्रियकं घटादि । ऐन्द्रिय-
काः परमाणव इति कोऽर्थः ? किन्तावदिन्द्रियकरणप्रत्यक्षा
उत इन्द्रियसम्बद्धा ? इति । किं चातः ? यदीन्द्रियकरणप्रत्यक्षा
ऐन्द्रियका इति ? तन्न युक्तम्, न हीन्द्रियमन्यस्यान्यथार्थं प्रका-
शयति अन्यथाऽन्यस्य, इन्द्रियवृत्तीनामविकल्पितत्वात्. भवन्ती
(२) चेत् परमाणव ऐन्द्रियका अस्मदादीनामप्यैन्द्रियकाः
स्युः । अथेन्द्रियसम्बद्धा ऐन्द्रियका ? इति तस्मिन्नविरोधः न हि
परमाणव इन्द्रियेण न सम्बध्यन्त इति । तस्मादिन्द्रियसन्निक-
र्षे सत्यपि महत्त्वाभावान्न परमाणव उपलभ्यन्त इति । कथं पु-
नरवगम्यते महत्त्वमप्युपलम्भे रूपवत्कारणमिति ? । भावाभावयो-

(१) एकोऽवयवः—पा० ६ पु० । (२) भवन्तीति—पा० १ पु० ।
(२) अवगम्यते—पा० ६ पु० ।

महत्त्वात्—यस्मात् सति महत्त्वे रूपे चोपलब्धिर्भवति असति च न भवति । तस्मादुभयं कारणमिति । यत्त्वत्रोक्तम् तेजः स्पर्शवदिति ? । सति तेजःस्पर्शे उपलब्धिर्भवति असति च न भवति । न च तेजःस्पर्शोऽपि रूपवद्द्रव्योपलब्धेः(१) कारणमिति ? । तन्न व्यभिचारात्—व्यभिचारात् स्पर्श उपलब्धेरकारणं, न पुनारूपमहत्त्वे क्वचिद्व्यभिचरतः । तस्माद्रूपमहत्त्वे एवोपलब्धेः कारणमिति अयञ्चार्थः सूत्रकारेण सूत्रद्वयेनोक्तः-"अद्रव्यद्रव्यत्वात् परमाणावनुपलब्धिः, रूपसंस्काराभावाद्वायोरनुपलब्धि"रिति(२) । रूपसंस्कारो रूपसमवाय इति सूत्रार्थः । अथ पुनः स्पर्शस्यापि रूपमहत्त्ववद्व्यभिचारः ? कस्मात् स्पर्शो न कारणमिति वक्तव्यम् ? । समवधार्य चैतद्भवताभिधीयते स्पर्शवदेतत् स्यादिति । येन प्रमाणेनावधृतमेतत् स्पर्शो न कारणमिति । प्रयापि तत एवाकारणत्वम् । अथाकारणत्वप्रतिपादकं न प्रमाणमस्ति ? को ह्यस्य वाक्यस्यार्थः ? स्पर्शवदेतत् स्यादिति । तद्भावभावित्वं च व्यभिचारयता कार्यकारणभाव उच्छिन्नो भवति । इदमस्य कारणमिदमस्य कार्यमिति परेण पर्यनुयुक्तस्तद्भावभावित्वव्यतिरेकेणान्येन तस्य प्रतिपादयतो विरोधादनुत्तरमेतत् ।

यत्पुनरेतदतीन्द्रियसंयोगातीन्द्रियत्वादिति ? । अतीन्द्रिययोः किलात्ममनसोः संयोगो ह्यतीन्द्रियो दृष्ट इति । यदि च परमाणवोऽतीन्द्रियाः स्युः तत्कार्यमप्यतीन्द्रियं स्यात् ऐन्द्रियकं च दृष्टम्, तस्मादैन्द्रियका इति ? । सोऽयं दृष्टान्तप्रयोगः

---

(१) रूपोपलब्धे-पा० ६ पु० ।

(२) वाय्वावनुपलब्धिः—पा० १ पु० । काणादसूत्रमिदं ४ अ. १ आ. ७ सू ।

अतीन्द्रियसंयोगातीन्द्रियत्वादिति दृष्टान्तप्रयोगमात्रे च हेतुन्यूनता। योऽप्यत्र कथञ्चिद्धेतुर्लभ्यते नानीन्द्रियकार्यं महाभूतादि व्यक्तम् ऐन्द्रियकत्वात् घटादिवदिति—यद्यदैन्द्रियकमैन्द्रियककार्यं दृष्टम् तथा च महाभूतादिव्यक्तमैन्द्रियकम् तस्मात्तदप्यैन्द्रियककार्यमिति ?। अयमपि प्रत्यक्षप्रमाणविरोधाद्विरुद्धः अनुष्णोऽग्निः कृतकत्वादिति यथा।

एके तु वातायनच्छिद्रदृश्यं त्रुटिं परमाणुं वर्णयन्ति। तन्न युक्तम्। तस्य भेद्यत्वात्। अभेद्यः परमाणुर्भिद्यते त्रुटिरिति। कथमवगम्यते भिद्यते त्रुटिरिति ?। द्रव्यत्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात् घटवदिति। कथं चान्यथा अभेद्यः परमाणुरित्युच्यते। अनित्यत्वाच्च न परमाणुः सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वाच्च। तस्मान्नैन्द्रियकाः परमाणव इति तेषामतीन्द्रियत्वात् यत्प्रत्यक्षं तदन्यदिति विरुद्धो हेतुः।

संहतानामुत्पत्तिनिरोधात् नासंहतः परमाणुरस्तीत्यपरे- अपरे तु संहतं परमाणुं वर्णयन्ति संहता एव ह्युत्पद्यन्ते निरुद्ध्यन्ते च असंहतास्तु परमाणवो न सन्त्येवेति। तदयुक्तम्। संहतार्थ(१)स्यानुक्तत्वात्—असंहताः परमाणवो न सन्तीति ब्रुवता संहतशब्दार्थो वक्तव्यः ? संघातो हि नाम बहूनामकार्यकारणभूतानां संयुक्तानामवस्थानम्। न चासंहतप्रतिषेधे संहतस्य निमित्तमस्ति संहन्यमानतन्त्वत्वात्—नित्यमयं संघाहतः संहन्यमानतन्त्रो(२)भवति। न चासंहतप्रतिषेधे संहन्यमानमस्ति। तस्मान्नासंहतोऽस्तीति विरोधान्न किञ्चिदेतत्।

(१) संघातार्थ—पा० ६ पु०।

(२) असंहतः संहन्यमानतन्त्रमिति केचित्।

एकप्रतिषेधादनेकाभ्युपगमवदिति । यथा नाम कश्चिन्मुग्ध(१) एकप्रतिषेधादनेकमभ्युपेयात् तस्य चैकप्रतिषेधादनेकं निवर्तेत एकसमुदायत्वादनेकस्य, तथाविधमिदं भवतीति ।

इतश्च नान्योऽवयव्यवयवेभ्यः संयोगाप्राप्त्यभावात्—यत् खलु यस्मादर्थान्तरं भवति तस्य तेन संयोगो भवत्यप्राप्तिर्वा यथा गवाऽश्वस्य, न पुनस्तन्तुभिः पटस्य संयोगो न चाप्राप्तिस्तस्मान्नासौ तेभ्योऽर्थान्तरमिति ? । अवयविनः पक्षीकरणे संयोगविभागाभावस्य संयोगविभागविषयत्वादसम्बद्धम् । अथासंयोगित्वाविभागित्वे हेतुभूते ? तथा ऽसिद्धः—संयुज्यते चायं विभज्यते चेति । अथ स्वावयवैरसंयोगित्वात् ? सोऽप्यनुपसंहार्यः नास्यान्वयो न व्यतिरेक इति । अथापि सर्पकुण्डलकाद्युदाहरणं स्यात्—सर्पकुण्डलकादि किल स्वकारणेनासंयोगि न चार्थान्तरमिति ? । तदसिद्धम् । यथा चार्थान्तरं सर्पकुण्डलकादि तथोक्तं पुरस्तात् । यदपि स्वकारणेनासंयोगीति ? तत्र चिन्त्यम्, किं गुणत्वात् स्वकारणेनासंयोग्यथानर्थान्तरभावादिति ? । वयन्तु ब्रूमो गुणत्वान्नानर्थान्तरभावाद् गुणश्च सर्पकुण्डलकः संयोगः स चार्थान्तरमिति प्रतिपादितमेतत् । अर्थान्तरभावे च(तु) दर्शनाद्विरुद्धः । सत्त्वरजस्तमांसि भवतां पक्षे मिथोऽर्थान्तरभूतानि, तेषां च न संयोगो नाप्राप्तिरिति—प्रधानपुरुषयोर्न संयोगो नाप्राप्तिरुभयोर्व्यापकत्वाद्विरुद्धः ।

नान्योऽवयव्यवयवेभ्यो गुरुत्वान्तरकार्याग्रहणात् ? । गुरुत्वान्तरकार्याग्रहणाविशेषत्वं कथञ्चिदपि पक्षेण सम्बद्ध्यते । क्व नान्योऽवयव्यवयवेभ्यः ? क्व च गुरुत्वान्तरकार्याग्रहणम् ? गुरुत्वान्तरकार्याग्रहणात् गुरुत्वान्तरकार्यं न स्यात् न गुरुत्वं

(१) मूर्ख—पा० ६ पु० ।

न गुरुत्वान्तरं नावयवी, नोदकप्रतिषेधात् कमण्डलोः कपालानां वा प्रतिषेधो युक्तः ।

एके तु गुरुत्वान्तरकार्याग्रहणादित्यनेन गुणान्तरारम्भं प्रतिषेधन्ति उदाहरणमात्रार्थत्वात् गुरुत्वान्तरारम्भप्रतिषेधस्य । कथमिति ? न कार्यं कारणरूपादिपूर्वकरूपादिमत् गुरुत्वान्तरवत्त्वप्रसङ्गात्— यदि कारणगता रूपादयः कार्ये रूपादीन्यारभेरन् ? अपि तर्हि कारणगतान्यपि गुरुत्वानि कार्ये गुरुत्वान्तरमारभेरन्, ततश्च गुरुत्वान्तरवत् कार्यमुपलभ्येत, न चोपलभ्यते, तस्मान्न कारणरूपादिमत्पूर्वकरूपादिमत्कार्यमिति ? । सत्यमुपपादितः पक्षधर्मः स तु प्रत्यक्षविरोधान्न किञ्चित् । कथमिति ? अभ्युपेत्य कार्यं रूपादयः कार्ये प्रतिषिध्यन्ते, कार्याभ्युपगमाच्च प्रतिषेद्धयमभ्यनुज्ञातं भवति, कारणरूपादयश्च कार्यरूपादीन् नारभन्ते इति ब्रुवतः(१) कार्यमगुणं स्यात् न त्विदमगुणं दृश्यते, ततश्च विरोधादयमहेतुः । अथ कार्यं नैवास्ति ? न कार्यं कारणरूपादिपूर्वकरूपादिमदित्यनर्थकम्, न हि कमण्डलोरभावे अनुदकः कमण्डलुरिति युक्तं वक्तुम् । एतेन कार्ये रूपादिप्रतिपत्तिः प्रत्युक्ता । यश्चायं हेतुः गुरुत्वान्तरवत्त्वप्रसङ्गादिति ? । अयमप्यभ्युपगमान्न किञ्चित्—नाभ्युपगम एव दोषत्वेन देश्यते । यदि तर्हि गुरुत्वान्तरवत् कार्यद्रव्यं रूपाद्यन्तरवच्च(२) ततो गुरुत्वान्तरकार्यमुपलभ्येत यथा रूपाद्यन्तरकार्यं, न तूपलभ्यते, न हि तुलायां विभक्तपिण्डद्वयोपन्यासवत् सम्बद्धयोरपि कार्यभेदं पश्यामः, तस्माद्विभक्तयोरिव संयुक्तयोरपि नास्ति द्रव्यान्तरारम्भ इति ।

---

(१) ब्रुवाणस्येति पा० २ पु० ।

(२) गुरुत्वादिमत्कार्यद्रव्यं रूपादिमच्चेति २ पु० पा० ।

केचित्तु न गुरुत्वान्तरवत्(१)कार्यद्रव्यवती तुलेति पक्ष-यित्वाऽवनमनविशेषाभावादिति हेतुं ब्रुवते । सोऽयं व्यधिकरणः अवनमनविशेषाभावस्यातुलाधर्मत्वात्— न ह्यव-नमनविशेषाभावस्तुलाधर्म इति । एवं तु युक्तमुत्पश्यामः । अवनमनविशेषानाधारत्वान्न गुरुत्वान्तरवत्कार्यद्रव्यवती तुले-ति । असिद्धस्तावदयं हेतुरवनमनविशेषानाधारत्वस्यातुलाहत्ति-त्वात् । न तद्वृत्त्यानुपलब्धेः—अयमप्यनैकान्तिकत्वादहेतुः गुरुत्वा-न्तरवद्द्रव्यसन्निपाते सत्यवनमनविशेषानाधारत्वस्य दृष्टत्वात् । यथा गुरुत्ववति द्रव्ये उन्मीयमाने त्रुटिभूते रजसि गुरुत्ववति स निपातित(२) इति महागुरुत्वे चोन्मीयमाने गुरुत्वमात्रोपहिता-नामवनमनविशेषं न करोति । समहीनाधिकप्रसङ्ग इति चेत् ? यदि तावत् कारणगुरुत्वैः समं कार्यगुरुत्वं पावाद्विपलाभ्यामस-म्बद्धेऽवनमनं द्विस्तावत्सम्बन्धे सति स्यात् ? । अथ कारणगुरु-त्वाधिकं कार्यगुरुत्वं ? तथाप्यधिकं प्रसज्येत । अथ कारणगुरुत्वा-द्धीनं कार्यगुरुत्वं ? तथापि विशेषो गृह्येत, न त्विदमस्ति, तस्मान्न कार्यगुरुत्वमस्ति ? न, कार्यकारणगुरुत्वेयत्तानवधारणात्—यद्येत-दवधारितं स्यात् एतावत् कारणगुरुत्वमेतावत् कार्यगुरुत्वमि-ति ? तदैतत् युज्यते वक्तुम् समाधिकहीनकार्यप्रसङ्ग इति, तत्त्व-नवधारितमियत्कारणे गुरुत्वमियत्कार्ये गुरुत्वमिति । यदि न का-र्यकारणगुरुत्वमवधारितं(३) योऽयं प्रत्ययस्तुलयोन्मीयमाने द्रव्ये द्विपलं पञ्चपलमिति न प्राप्नोति । न न प्राप्नोति द्रव्यसमा-हारगुरुत्वावधारणात् ?—यदिदं भवता मन्यते द्विपलं पञ्चपल-

(१) कार्यगुरुत्वान्तरवत्—पा० १ पु० ।
(२) सन्निपातित इति २ पु० पा० ।
(३) कार्यकारणगुरुत्वे नावधार्येते—पा० ६ पु० ।

मिति नात्र कार्यकारणगुरुत्वे अवधार्येते, किं त्वा चरमादा च परमाणोश्च द्रव्यसमाहार उन्मीयते। तत्र मनुष्यधर्मणो न युक्तं वक्तुमियत्कारणगुरुत्वमियत् कार्यगुरुत्वमिति। न च समाहारः कारणमपि त्वनारब्धकार्यं चरमद्रव्यं कारणमिति।

केचित्त्वारभ्यारभन्त इति प्रतिपद्यन्ते, तान् प्रतीदमुच्यते—न पूर्वोत्तरकार्यद्रव्ये समानकालदेशे मूर्तत्वात् घटादिवदिति। शेषस्त्वारभ्यारम्भकविचारो ऽप्रस्तुतत्वान्न क्रियते(१)। निरनुमानं तर्हि कार्यगुरुत्वं? यदि गुरुत्वान्तरवद्द्रव्योपचये सति कार्यभेदो न गृह्यते कथं प्रतिपद्येत इति?। क एवमाह कार्यगुरुत्वं(२) न गृह्यतइति। यदि गृह्यते? किं तत्? पतनम्, न हि कार्यगुरुत्वमन्तरेण कार्यपाते ऽन्यो हेतुरस्ति, तस्माद्गुरुत्वान्तरवत् कार्यमिति। एतेन तुलावनतिविशेषाग्रहान्न कार्यगौरवमिति प्रत्युक्तम्। अथ मन्यसे कारणगुरुत्वेनैव कार्यं पात्यते न कार्यगुरुत्वमस्त्यतः कार्यपातस्यान्यनिमित्तत्वान्न सिध्यति गुरुत्वान्तरवत् कार्यमिति?। न, कार्यकारणयोरसंयोगात्—यत्र गुरुत्वमाश्रयान्तरपाते हेतुर्भवति तत्र संयोग उपकरणम्, यथा तुलापटलकगुरुत्ववद्द्रव्यसंयोग इति। न तु कार्यकारणयोः संयोगोऽयुतसिद्धत्वात्—युतसिद्धिरसम्बद्धस्य विद्यमानता, न पुनः कार्यं कारणासम्बद्धं विद्यते जातः सम्बद्धश्चेत्येकः कालः, तस्मान्न कार्यकारणे संयुक्ते। समवायोपकरणं गुरुत्वं पातयिष्यतीति चेत्? नामकीर्तनात् विरोधाच्च। अथ मन्यसे सत्यं न कार्यकारणयोः संयोगोऽस्ति, अस्ति च समवायः, समवायो गुरुत्वापेक्षः कार्यं पातयिष्यतीति न सिद्ध्यति कार्यगुरुत्वम्? नामकीर्तनात्-

(१) अप्रस्तुतत्वान्न क्रियत इति—पा० १ पु०।
(२) कार्यगुरुत्वकार्यं—पा० १ पु०।

न समवायः क्रियाहेतुत्वेन क्वचिदपि सङ्कीर्तितः सूत्रकारेण, यथा संयोगो "नोदनाभिघातसंयुक्तसंयोगाच्च पृथिव्यां कर्मेति" * । न केवलमसङ्कीर्तनादेव विरोधाच्च । यदि समवायः क्रियाहेतुः स्यात् कारणरूपादयोऽपि कार्येणैकार्थसमवायात् पतेयुः । पतन्तु रूपादयोऽपि, किन्नो बाध्यत इति चेत्? न, गुरुत्वस्यापि पातप्रसङ्गात्—यथा रूपादयः कार्यद्रव्यमनुपतन्ति तथा गुरुत्वमप्यनुपतेत् । गुरुत्वं चानुपतत् कुतः पततीति वक्तव्यम्, न तु गुरुत्वस्य गुरुत्वान्तरं पातहेतुरस्ति । तस्मान्न गुरुत्वं पतति न रूपादयः पतन्तीति । यदि रूपादयो न पतन्ति द्रव्ये पतति तिष्ठेयुरित्यद्रव्या रूपादयः स्युः द्रव्यं च रूपादिहीनमुपलभ्येत । अथ द्रव्ये पतति पतन्ति ? क्रियावन्तो रूपादयः प्राप्नुवन्ति । अथ न तिष्ठन्ति ? न पतन्ति, सोऽयं युक्तिविरोधोऽवश्यं भवताभ्युपगन्तव्यः पतन्ति पतन्ति तिष्ठन्ति वेति । वेद पुनर्भवान् युक्तायुक्तयोर्नानाकारणं ? (१) वेद्मीति परः । युक्तं प्रमितमयुक्तमप्रमितम् । अयुक्तं तर्हीदं पतति पतन्ति तिष्ठति तिष्ठन्तीति वा तच्चोक्तम्—गुरुत्वस्य गुरुत्वान्तरप्रसङ्गात् रूपादिशून्यस्य द्रव्यस्यादर्शनात् अद्रव्याणां च रूपादीनामदर्शनादिति । यच्च पतति गच्छति वा तत्प्राप्तं जहाति अप्राप्तं चाप्नोति, न पुना रूपादयः प्राप्तं जहत्यप्राप्तं वा प्राप्नुवन्ति । रूपादयोऽप्राप्तं न प्राप्नुवन्तीति न युक्तम्—भवतिहीदं द्रव्ययोः प्राप्तयो रूपे अपि प्राप्ते इति ? न सन्देहात्—किमयं (प्राप्तिप्रत्ययः) प्राप्तिनिमित्त आहो अप्राप्तेरदर्शननिमित्त इति सन्दिह्यते । वयन्तु ब्रूमः अप्राप्तेरदर्शननिमित्त इति । नहि द्रव्ययोः प्राप्तयो रूपयोरप्राप्तिं पश्यति ।

---

* वैशेषिक सू० अ० ५ आ० २ सू० १ ।

(१) नानाकारं न—पा० १ पु० ।

द्रव्ययोरप्येवमेवेति चेत् ?—अथ मन्यसे यथा रूपयोः प्राप्तिम-त्योऽप्राप्तेरदर्शननिमित्तः एवं द्रव्ययोरप्राप्त्यदर्शननिमित्तो भ-वति न प्राप्तिनिमित्त इति ?। नैष दोषः प्रत्ययद्वैतस्यानेक-निमित्तत्वात्—न खलु प्रत्ययद्वैतमेकनिमित्तं दृष्टम्, तद्यथा चित्रगतासु प्रतिकृतिषु क्रोधभय(१)परिहारेऽपि क्रुद्धभीतप्रत्यया भवन्ति न (तथा) तावता पुरुषेष्वपि क्रोध(२)भयाभावे क्रुद्धभीत-प्रत्ययाः प्रादुर्भवितुमर्हन्तीति। एवमयं प्राप्तिप्रत्ययः क्वचित् सं-योगनिमित्तः क्वचिदप्राप्त्यदर्शननिमित्त इति। तस्मादत्रस्थितं न गुरुत्वं पतति न रूपादयः पतन्तीति।

अपरे तु कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं ब्रुवते। कार्य-गुरुत्वैः किल कारणगुरुत्वानि प्रतिबद्धानि, अतोऽवनतिविशेषो न भवति?। एतत्तु न युक्तमिति पश्यामः। कुतः?। कार्यकारणयोः पातदर्शनात्—यदि कार्ये पतति कारणमवतिष्ठेत प्रतिपद्येमहि(३) कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धमिति, न त्विदमस्ति, अतो-ऽयुक्तमेतत्। अनाधारत्वप्रसङ्गाच्च—यदि कार्यगुरुत्वेन कारणगुरुत्वं प्रतिबद्धं न कारणक्रियामारभेत। कार्ये पतति न कारणं पतेदिति कार्यमनाधारं स्यात्। एतेन कार्यगुरुत्वेन कारणगुरुत्वविना-शोऽपि व्याख्यातः। विभक्तानां च पातो न स्यादित्यधिकम्। यदि कार्यगुरुत्वेन कारणगुरुत्वं विनाश्येत कार्यद्रव्यविनाशात् कारणानां विभक्तानां पातो न स्यात् गुरुत्वमेव च न स्यात् यदि कार्यगुरुत्वेन कारणगुरुत्वं विनश्येत अपि तर्हि न क्व-चिद्गुरुत्वं स्यात्, नहि कस्यचित् परमाणोरतीतं कार्यं नास्ति,

(१) अक्रोधभय—पा० १ पु०।

(२) अक्रोध—इति शोधितम्।

(३) प्रतिपद्ये तर्हि—पा० ६ पु०।

अतोऽगुरवः परमाणवः स्युः । परमाणुषु च गुरुत्वाभावात् कार्यगुरुत्वं कुत उत्पद्येत ? । तस्मादप्रतिषेधोऽयम् कार्यगुरुत्वैः कारणगुरुत्वानां विनाशप्रतिबन्धाविति(१) । अतः पूर्व एव प्रतिषेधो नानैकान्तादिति । कार्यकारणगुरुत्वानवधारणाच्च । तदेवमवयविनोऽसत्त्वाव्यतिरेकप्रतिपादकं न प्रमाणमस्तीत्यतः साध्यत्वादवयविनि सन्देह इत्ययुक्तम् । (इत)अतश्च साध्यत्वादवयविनि सन्देह इति न युक्तम् असङ्कीर्तनात्—नहि साध्यत्वं संशयहेतुरिति कीर्तितं क्वचिदपि, अतो न भवति साध्यत्वात् संशयः । क एवमाह साध्यत्वात् संशयः ? अपि तु साध्यत्वाद्विप्रतिपत्तिः विप्रतिपत्तेः संशय इति । साध्यत्वकार्यायां(२) विप्रतिपत्तौ साध्यत्व(३)मध्यारोप्योक्तं साध्यत्वादवयविनि सन्देहः इति ॥

सर्वाग्रहणमवयव्यसिद्धेः ॥ ३४ ॥

सर्वाग्रहणमवयव्यसिद्धेः(४) । संशयापाकरणार्थं(५) सूत्रम् सर्वाग्रहणमवयव्यसिद्धेरिति । सर्वेषामर्थानामग्रहणं प्रसज्येत यद्यवयव्यर्थान्तरभूतोऽवयवेभ्यो नास्ति इति । कथमिति ? परमाणवस्तावत् दर्शनविषयभावं नापद्यन्ते अतीन्द्रियत्वादित्युक्तम् । अवयविद्रव्याणि च भवद्भिर्न प्रतिपद्यन्ते, तदनभ्युपगमे च योऽयं द्रव्यप्रत्ययः कुम्भ इति, गुणप्रत्ययश्च श्याम इति, क्रियाप्रत्ययश्चलतीति, सामान्यप्रत्ययोऽस्तीति, विशेषप्रत्ययः कलश इति, समवायप्रत्यय इह घटे रूपादय इति, तथा-

(१) प्रतिबन्धनाविति शोधितम् १ पु० ।
(२) साध्यकार्यायां—पा० १ पु० ।
(३) साध्य—पा० १ पु० । प्रामादिकः ।
(४) अवयव्यप्रसिद्धेः—पा० ६ पु० ।
(५) अपाकरणाय—पा० ६ पु० ।

न्येऽपि प्रत्यया एको महान् संयुक्तो विभक्तः पृथक् परोऽ
पर इति च न स्युः । अस्ति च सर्वस्य ग्रहणं द्रव्यगुण-
कर्मादिप्रपञ्चस्य, तेन सर्वस्य ग्रहणात् पश्यामोऽवयवाति-
रिक्तोऽस्त्यवयवीति । अथवा सर्वाग्रहणमिति सर्वैः प्रमाणैरग्र-
हणम् । कथम् ? प्रत्यक्षस्य वर्तमानमहद्विषयत्वात्—यद्वर्तमानं यत्
महच्च तद्बाह्यकरणप्रत्यक्षं, घटाद्यवयविप्रत्याख्याने च न बाह्य-
करणप्रत्यक्षविषयोऽस्ति, तस्याभावादनुमानादेरप्यभावः, सेयं
सर्वप्रमाणनिवृत्तिः । उपलभ्यन्ते चार्थाः प्रत्यक्षादिभिः प्रमाणैः,
तैः सर्वैर्ग्रहणात् पश्यामोऽस्त्यवयवीति । तदिदं सूत्रमवयव्यन-
भ्युपगमे विरोधप्रदर्शनपरं, सोऽयं सर्वाकारो(?) विरोधो लो-
कपरिदृष्टप्रत्ययोच्छेद इति ॥

धारणाकर्षणोपपत्तेश्च ॥ ३५ ॥

धारणाकर्षणोपपत्तेश्च । अवयव्यर्थान्तरभूत इति चार्थः ।
किमिदं धारणं नाम ? एकदेशग्रहणसाहचर्ये सत्यवयविनो
देशान्तरप्राप्तिप्रतिषेधो धारणम् । यदाऽयमवयविन एकदेशं
गृह्णाति तदेकदेशग्रहणेन महावयविनमपि गृह्णाति । तेन च
ग्रहणेन यदवयविनो देशान्तरप्राप्तिनिराकरणं तद्धारणम् ।
आकर्षणं नाम एकदेशग्रहणसाहचर्येण यदवयविनो देशान्त-
रप्रापणं पूर्ववत् । कुत एतत् ? लोकतः— लोकः खल्वु धारणाक-
र्षणे एवं प्रयुङ्क्ते इति । ते एते धारणाकर्षणेऽवयविनं सा-
धयतः । कथमिति ? निरवयवे चावयवे चादर्शनात्—नहि धा-
रणाकर्षणे निरवयवे अवयवे च दृष्टे, दृष्टे च धारणाकर्षणे,
तस्मादवयविधर्माविति ।

यत्त्वत्रोक्तं संग्रहकारिते धारणाकर्षणे नावयविकारिते पांसुरा-

(१) सर्वप्रकारो—पा० ६ पु० ।

शिप्रभृतिष्वभावात् तृणोपलकाष्ठादिषु जतुसंगृहीतेषु च दर्शना-
दिति। तन्नानवधारणात् । न ब्रूमः सर्वस्मिन्नवयविनि धारणाकर्षणे
भवतः, अपि त्वन्यत्र न भवतः। न च विरोधोऽवयविष्वेव दर्शना-
त्—यानि तृणोपलकाष्ठानि जतुसंगृहीतान्याकृष्यन्ते धार्यन्ते चेति
अवयविन एवैते । यदि च निरवयवे चावयवे च धारणाकर्षणे
स्याताम् स्याद्विरोधः । यदिदमुच्यते संग्रहकारिते ते इति ?
न, विशेषहेत्वभावात् संग्रहकारिते धारणाकर्षणे नावयविकारिते
इति। न च भवता विशेषहेतुरपदिश्यते इति। पांशुराशिप्र-
भृतिषु च कस्मात् संग्रहो नास्तीति वाच्यम् ?। य एवात्र
संग्रहाभावे भवतो हेतुः स एवावयविनो विद्यमानस्य धार-
णाकर्षणयोरभाव इति(१)। कः पुनरसौ ? उक्तोऽसावेकदेशगृही-
तस्य तत्सहचरितस्य सम्बन्धविशेष इति। स च पांशुराशि-
प्रभृतिषु नास्ति। तस्मान्न तत्र धारणाकर्षणे इति सोऽयं
व्यतिरेकी हेतुः।

अथेदानीमन्वयिनो हेतोः प्रयोगमुपन्यसिष्यन्निदमाह-
"अथावयविनं प्रत्याचक्षाणको माभूत् प्रत्यक्षलोप इति
अणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इति ।
एकबुद्धेर्विषयं(२) पर्यनुयोज्यः(भा.)" येयं बुद्धिरेकमिदं द्रव्य-
मिति किमियं नानाविषया उताभिन्नविषयेति ?। यदि नाना-
विषया बहुष्वदर्शनादयुक्ता। न च बहुष्वेकमिदमिति युक्तः
प्रत्ययः। अथाभिन्नार्थविषया ? योऽसावेकबुद्धेर्विषयः सोऽवयवी-
ति। एकानेकबुद्धी भिन्नविषये विशेषवत्त्वाद्रूपादिविषयबुद्धि-
वदिति। अथवा एकानेकबुद्धी भिन्नविषये समुच्चितासमुच्चित-
विषयत्वात् इदमिति यथा इदं चेदं चेति यथा ॥

---

(१) कर्षणाभावेऽपीति—पा० ६ पु०। (२) लक्षीकृत्येत्यनुयुज्यते।

सेनावनवद्ग्रहणमिति(१)चेन्नातीन्द्रियत्वादणूनाम्॥३६॥

सेनावनवद्ग्रहणमिति चेत् ?–अथ मन्यसे असत्यर्थान्तरभावेऽसति चैकानेकविभेदे च दृष्टो बुद्धिविशेषः–अन्या सेनाबुद्धिः अन्या गजादिबुद्धय इति,तथाऽन्याः खदिरादिबुद्धयः (२) अन्या च वनबुद्धिरिति । न च तावता सेना वनं चार्थान्तरम् । तस्मादनैकान्तिकत्वादहेतुः ।

इदं तावत् सूत्रं साधनपक्षे दृष्टान्तमात्रार्थत्वादसम्बद्धम्, अनैकान्तिकीकरणपक्षे तु न असिद्धत्वात्(३) केन सेनावनयोरनर्थान्तरभावोऽभ्युपगम्यते, यथा च सेनावनान्यर्थान्तरभूतानि तथोक्तम्, अभेदप्रत्ययस्य चानेकनिमित्तत्वान्न युक्तम्, अस्त्ययमभेदप्रत्ययोऽभिन्न एव, अस्ति च भिन्ने उपलभ्यमाने भेदस्यादर्शनात्, अभिन्ने तावेदकप्रत्ययः यदेकमुभयपक्षसम्प्रतिपत्त्या व्यवस्थितं, एकं नास्तीत्यनेकप्रत्ययो व्याहतः । एकमयुक्तयोश्च-नेकमिति । अनेकस्मिन्नुपलभ्यमानेऽपि भेदस्यादर्शनादभेदप्रत्ययः भेदस्यादर्शनमाराान्निमित्तात् यथा सेनावनादिषु, यानि तानि सेनावनाङ्गानि हस्त्यादीनि तान्येकश उपलभ्यमानपृथक्त्वानि आरान्निमित्ताद्भेदं नोपलम्भयन्ति, भेदानुपलब्धेर्भिन्ने वस्तुन्यभिन्नप्रत्ययः । न च (४) परमाणवः केन चिदुपलभ्यन्ते कस्मात् ? अतीन्द्रियत्वादणूनामिति ।

अतीन्द्रियाः परमाणव इति प्रतिपादितमेतत् । यश्चै-न्द्रियकः पदार्थः स उपलभ्यमानपृथक्त्व आरात् पृथक्त्व-

(१) सेनावनादिवदिति—पा० वृत्तिकारसम्मतः ।
(२) धवादिबुद्धयो—पा० ६ पु० ।
(३) न केन इति पु० पा० ।
(४) भेदानुपलम्भेभिन्ने वस्तुनि अभेदप्रत्ययः न तु–पा० ६ पु०

स्याग्रहणे अभेदप्रत्ययनिमित्तं भवति । यथोपलभ्यमानजा-
तीयानामाराम जातिग्रहणमुपलभ्यमानप्रस्पन्दानां च नाराद्
प्रस्पन्दग्रहणमिति । गृह्यमाणाग्रहणस्य चान्यनिमित्तत्वात्—य-
च्चेदं गृह्यमाणस्य पदार्थस्याऽग्रहणं तदन्यनिमित्तं दृष्टम्, यथा
तेषामेव सेनावनाङ्गानाम्, न तु परमाणवो गृह्यन्ते तेषाम-
तीन्द्रियत्वात् । तस्मान्न तेषामन्यनिमित्तमग्रहणमिति ।

अनुपजातविशेषाणां च बुद्धिभेदाहेतुत्वाद्विरोधः—यस्य पर-
माणवो घटादिबुद्धिहेतवो भवन्ति स चेदं प्रष्टव्यः किं परमाणव
उपजातविशेषा बुद्धिभेदं कुर्वन्ति उतानुपजातविशेषा इति ?। किं
चातः? यद्युपजातविशेषाः? योऽसौ विशेषः सोऽवयवीति प्राप्तम्,
अथानुपजातविशेषाः ? त एवातीन्द्रिया ऐन्द्रियकाश्चेति महान्
विरोधः । विशेषः संयोगः परमाणूनां ते परस्परप्रत्यासत्तौ सत्यां
संयोगोपकरणा उपलप्स्यन्त इति ? नातीन्द्रियत्वादणूनां—नाती-
न्द्रियाणां संयोगः प्रत्यक्षो भवितुमर्हति । भवति हीदमनेन संयु-
क्तमिति । तस्मान्न संयोगो विशेषः । यश्चायमनेकस्मिन्नेकप्रत्य-
यः स मिथ्याप्रत्ययो, मिथ्याप्रत्ययनिमित्तं च सामान्यद-
र्शनं विशेषानुपलब्धिः अविद्यमानविशेषदर्शनद्वारेणाध्यारो-
पिततद्विपरीतधर्मता(१) । न चातीन्द्रियत्वादणूनां सामा-
न्यदर्शनमस्ति, तदभावे कुतो विशेषादर्शनम्, सामान्यद-
र्शने विशेषादर्शने वाऽसति न तद्विपरीतधर्माध्यारोपः ।
न च निमित्तमन्तरेण नैमित्तिकस्य मिथ्याप्रत्ययस्य प्रा-
दुर्भावो युक्त इति ।

एतेन भाक्त औपमिकश्च प्रत्ययो व्याख्यातः । भ-
क्तिर्नामातथाभूतस्य तथाभाविभिः सामान्यम्, उभयेन भ-

(१) अयं पाठः पुस्तकान्तरे नास्ति ।

ज्यत इति भक्तिः यथा वाहीकस्य मन्दामन्तःसंज्ञामुपादाय वाहीको गौरिति, न तदतीन्द्रियत्वात् परमाणूनामस्ति । उपमानप्रत्ययोऽपि न युक्तः अतद्भाविनस्तद्भाविभिरसामान्यात्—यस्यातथाभूतस्य तथाभाविभिः सामान्यं तत्रोपमानप्रत्ययो युक्तः यथा सिंहो माणवक इति, सिंह इव सिंहः । किं पुनस्त्रोपमीयते ? शौर्यम्, न तु परमाणूनामतीन्द्रियत्वान्मिथ्याप्रत्ययानां निमित्तमस्तीति । मिथ्याप्रत्यया अप्येते न भवन्ति प्रधानाभावात् । इन्द्रियान्तरविषयेष्वभेदप्रत्ययः प्रधानमिति चेत् ?—अथ मन्यसे श्रोत्रादिविषयेष्वेकत्वादिप्रत्ययाः प्रधानं भवन्ति तदभावे तु मिथ्याप्रत्यया इति ? विशेषहेत्वभावाद्दृष्टान्ताव्यवस्था । एवं सति दृष्टान्तोपादानं न व्यवतिष्ठते तस्मिँस्तदितिप्रत्ययः अतस्मिँस्तदिति च प्रत्ययः । अस्ति चायं परमाणुषु सञ्चितेषु एतदितिप्रत्ययः स च किमतस्मिँस्तदिति आहोस्विन्नेति(१) सन्दिह्यते । शब्दादिष्वेकप्रत्ययः प्रधानम्, घटादिषु त्वेकप्रत्ययो मिथ्याप्रत्यय इति ब्रुवाणो घटादीनभ्युपैति, न ह्यनभ्युपगतेषु घटादिषु शब्दादिसामान्यमेकप्रत्ययबीजं घटस्यास्ति । अथ मन्यसे नास्माभिर्घटादयोऽप्यभ्युपगम्यन्ते, किन्तु परमाणूनां सञ्चितानां शब्देन सामान्यादेकप्रत्ययोत्पत्तिनिमित्तत्वमिति ? अत्रोक्तम् नातीन्द्रियत्वादणूनामिति । यांश्च शब्दादीन् प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते तेऽपि सञ्चिता एव, सञ्चितत्वात् तेष्वप्ययमेकप्रत्ययो न युक्तः, शब्दादिषु चैकप्रत्ययः समुच्चयनिवृत्तिनिमित्त एकत्ववद्द्रव्यसामान्याद्भाक्तः यान्येकत्ववन्ति द्रव्याणि तेषां समुच्चयनिवृत्तिर्धर्मः अस्ति च शब्दादिषु समुच्चयनिवृत्तिः तेनैकत्ववद्द्रव्यसामान्याच्छब्दा-

(१) आहो तस्मिन्नेति—पा० ।

द्रव्यैकप्रत्ययो भाक्तः । सर्वत्र समुच्चयनिवृत्तिनिमित्त एवेति चेत् ? न, द्वे इत्यत्रैकानेकगतौ सन्देहो न स्यात् । यदि सर्वत्रायं (१) समुच्चयनिवृत्तिनिमित्त एवैकप्रत्ययो भवति न द्वे इत्यत्र किमेकमनेकमिति द्विप्रतिषेधसामान्यात् सन्देहो न स्यात् सति च सन्देहे एकमिति नियमार्थम् । यतो नियमस्तदेकत्वम्, यतस्त्र्यादिप्रत्ययास्ते त्रित्वादय इति । एवं द्वित्वादिप्रत्यया अपि शब्दादिषु समुच्चयनिमित्ता द्रष्टव्याः । कस्मात् ? द्वित्वादिमद्द्रव्यसामान्याद्द्वित्वादिमता द्रव्येण शब्दादीनां समुच्चयः समानः । सर्वत्र समुच्चयादेवेति चेत् ? नैकमित्यत्र सामान्यगतौ न संशयः स्यात्—यदि समुच्चयनिमित्तत्वाद् द्व्यादिप्रत्यया भवन्ति नैकमिति प्रतिषेधे द्वे त्रीणीति सामान्यगतौ न संशयः स्यात् तस्माद्यतो व्यवस्था ते द्वित्वादय इति । यः पुनरेकत्वं द्वित्वादींश्च न प्रतिपद्यते तस्य न समुच्चयो न समुच्चयनिवृत्तिः अनभ्युपगतैकत्वस्य कस्य समुच्चयः अनभ्युपगतद्वित्वस्य च कस्य प्रतिषेधः । एकद्वित्वादींश्चार्थान्तरभूताननभ्युपगच्छत एकं शतं एकं द्वित्वमित्येकप्रत्ययो न स्यात् । भेदाग्रहाच्च शब्दादिष्वेकप्रत्ययः । यस्माच्छब्दादिषु भेदो न गृह्यते उपलभ्यमानेष्वतस्तेषु अभेदप्रत्ययः न पुनः परमाणुष्वभेदग्रहणस्य निमित्तमस्त्यतीन्द्रियत्वादणूनामित्युक्तम्, उदाहरणमात्रत्वाच्चैकप्रत्ययपर्यनुयोगस्यैकप्रत्ययवदनेकप्रत्ययमप्यनुयोक्तव्यः (२) योऽवयविनमर्थान्तरं न प्रतिपद्यते तस्य यथैकप्रत्ययोऽनुपपन्नस्तथानेकप्रत्यया अपि न प्राप्नुवन्ति । यथा चैकानेकप्रत्ययान्

---

(१) सर्वोऽपि—पा० ६ पु० ।

(२) प्रत्ययं लक्ष्यीकृत्येति बोध्यम् । एवमग्रेऽपि ।

एवं घटादिप्रत्ययान् पर्यनुयोज्य इति । एवं परिमाणसंयोगप्रस्प-न्दजातिविशेषप्रत्ययानपि पर्यनुयोज्यः तेषु चैवं प्रसङ्गः । यद्य-वयविनमर्थान्तरं न प्रतिपद्यसे महदिति संयुक्त इति वाऽश्वो गच्छतीति प्रत्यया न प्राप्नुवन्ति, न ह्यतीन्द्रियेषु परमाणुषु एते प्रत्यया युज्यन्त इति ।

किमेते एकादिप्रत्यया अणुसञ्चयमात्रे आहोस्विदर्था-न्तरभाव इति सन्दिह्यते, सन्देहे सति विशेषहेतुर्वक्तव्य इति ? अयं विशेषहेतुर्महत्प्रत्ययसामानाधिकरण्यादेकप्रत्ययो महति भ-वति, यः खलु यत्समानाधिकरणः प्रत्ययो दृष्टः स तद्धर्म-युक्तो भवति यथा नीलमुत्पलमिति उभयधर्मयोगिनि नीलोत्पल-प्रत्ययः प्रवर्त्तते, अस्ति च महत्प्रत्ययसामानाधिकरण्यमेकप्रत्ययस्य तस्मान्महत्येकप्रत्ययः । अणुसमूहेऽतिशयग्रहणादिति चेत् ?–अथ मन्यसे नास्माभिरर्थान्तरभूतोऽवयव्यभ्युपगम्यते, अपि त्वणुस-मूहमुपलभ्याणुसमूहान्तरेऽतिशयं गृह्णतो महत्प्रत्ययो भवति । सोऽयमतस्मिंस्तदिति प्रत्यय इति पूर्ववत्प्रसङ्ग इति । अमहत्स्व-णुष्वमहत्सु चाणुसमूहेषु योऽयं महत्प्रत्ययः सोऽतस्मिंस्तदिति मिथ्याप्रत्ययः मिथ्याप्रत्ययाश्च प्रधानमन्तरेण न भवन्तीति पूर्वव-देव प्रसङ्गः । अणुः शब्दो महानिति व्यवसायात् प्रधानसिद्धि-रिति चेत् ?–अथ मन्यसे महान् शब्दोऽणुः शब्द इति शब्दे दृष्टो महदणुप्रत्ययः प्रधानमन्यत्र महदणुप्रत्ययस्येति । न च मन्दती-व्रताग्रहणमियत्तानवधारणात्, न शब्दे महत्त्वं नाणुत्वं गुणत्वात् । अणुमहत्प्रत्ययस्तर्हि शब्दे न प्राप्नोति ? । न न प्राप्नोति । अन्यनि-मित्तत्वात् । किं निमित्तं? मन्दता तीव्रता च । कस्मादियत्तानव-धारणात्–न ह्ययं महान् शब्द इति व्यवस्यन्नियत्तामित्यवधारयति । यथा कुवलामलकबिल्वान्यवधारयन् कुवलादामलकं महत्

आमलकाच्च महद्बिल्वम्, तानि चेयत्तया परिच्छिनत्ति इयत्परिमाणमेतदिति, न पुनः शब्देषु एतदस्ति, शब्देष्वपि पूर्वावधृतं शब्दमुपलभ्य तस्माच्छब्दादयं महानणुर्वेति अवधार्यते नावधारणं प्रतिपित्स्यते ।

इदन्तु चिन्त्यते । योऽयं शब्दे ऽणुमहत्प्रत्ययः किमयं (१) परिमाणयोगादुतान्यस्मान्निमित्तादिति ? । अन्यस्मान्निमित्तादिति युक्तम्, गुणस्य गुणान्तरसम्बन्धानुपलब्धेः । न हि गुणस्य गुणान्तरसम्बन्धो दृष्टः यतः परिमाणसम्बन्धोऽपि गम्येत । महत्प्रत्ययादेव गुणवान् शब्दो द्रव्यवदिति चेत् ?—यथाऽयं महत्प्रत्ययो द्रव्येषु भवन्महत्परिमाणयोगाद्भवति, शब्देऽपि चायं महत्प्रत्ययो भवति । अतो महत्प्रत्ययविषयत्वान्महत्परिमाणयुक्तः शब्द इति ? । नानैकान्तात् । महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगो न दृष्टः । यथा महत्परिमाण इति । द्रव्ये तर्हि महत्प्रत्ययः कथम् ?—यदि तावन्महत्प्रत्ययविषयत्वे सत्यपि महत्परिमाणयोगं न प्रतिपद्यसे महत्परिमाणयुक्तं द्रव्यमित्येतत् कथम् ?, न महत्प्रत्ययविषयत्वात् महत्परिमाणयुक्तं द्रव्यम्, अपि तु महत्परिमाणयोगे सति महत्प्रत्ययो द्रव्य इति । महत्परिमाणयोगस्तु द्रव्यस्य विशेषप्रत्ययानामनाकस्मिकत्वेन । यदि विशेषप्रत्ययानामनाकस्मिकत्वेन महत्परिमाणयोगो द्रव्ये, शब्देऽप्येवम्, शब्दस्य महत्प्रत्ययोऽस्ति तेनापि नाकस्माद्भवितव्यम् ? । कश्चैवमाह शब्देऽप्ययमाकस्मिक इति । किन्निमित्तो ? मन्दतीव्रतानिमित्तः—मन्दता तीव्रता च शब्दधर्मः अतोऽणुमहत्प्रत्ययः शब्दे इति । का पुनरियं मन्दता तीव्रता च ? अणुद्रव्यसामान्यात्

(१) स कि—पा० ६ पु० ।

सामान्यप्रत्ययविषयत्वं(१) मन्दता, महद्द्रव्यसामान्याच्च सामान्यप्रत्ययविषयत्वं तीव्रता पाटवमिति ।

संयुक्ते इति द्वित्वसमानाश्रयं प्राप्तिग्रहणमवयविनः प्रतिपादकम् । कथमिति ? संयुक्तमहत्प्रत्ययावेकविषयौ प्रतिसन्धानान्नीलोत्पलादिप्रत्ययवत्—यथा च नीलमुत्पलं चेति प्रतिसन्धीयमानौ प्रत्ययावेकविषयौ भवतः तथा संयुक्ते महती इति च प्रतिसन्धानमस्ति । तस्मात् प्रतिसन्धानादेकविषयाविति । एतेनैकं महच्चलति खदिर इति प्रत्यया व्याख्याताः । समुदायद्रव्यापेक्ष इति चेत् ?—अथ मन्यसे द्वौ समुदायावाश्रित्य संयुक्तमहत्प्रत्ययौ भवतः, तथैकादिमहत्प्रत्यया अप्येकसमुदाया(२)पेक्षा इति चेन्न । विकल्पानुपपत्तेः समुदायापेक्षाः संयुक्तमहदादिप्रत्यया इति, कोयं समुदायः ? किमनेकः समुदाय्युतानेकस्य प्राप्तिरिति । अनेकस्य प्राप्तिः समुदाय इति चेत् ? प्राप्ती प्राप्ते इति प्रत्ययः स्यात् इति । किं कारणम्, ? समुदायस्य प्राप्तित्वेनाभ्युपगमात् । इमे वस्तुनी संयुक्ते इति च न स्यात् । प्राप्ती प्राप्ते इति च स्यात् । समुदायश्च समुदायान्तरप्राप्तावेकीभूत इति प्राप्तिप्रत्ययो न स्यात् समुदायस्यैकत्वात् । अथानेकः समुदायी समुदायो ? द्वित्वेन सामानाधिकरण्यं न स्यात् संयुक्ते इमे वस्तुनी इति द्वित्वसमानाधिकरणः प्रत्ययो न स्यात् । तस्मान्महती द्वित्वाश्रयभूते द्रव्ये संयोगसंस्थानमिति । न संयोगोऽस्तीति चेत् ? उक्तमत्र यथार्थान्तरं संयोग इति ।

इदं चावयवसमुदायवादी प्रष्टव्यः—योऽयं गौरश्वः पुरुष इति जातिनिमित्तः प्रत्ययः स क भवतीति ? । नैव

(१) सामान्यविशेषप्रत्ययविषयत्वं—पा० १ पु० ।

(२) एकादिसमुदाया—पा० ६ पु० ।

जातिरस्ति कुतो जातिनिमित्तः प्रत्ययो भविष्यतीति । जातिविशेषस्य प्रत्ययानुवृत्तिलिङ्गस्याप्रत्याख्यानं—न जातिविशेषमन्तरेण प्रत्ययानुवृत्तेर्निमित्तमस्ति, न च निर्निमित्तः प्रत्ययो नामा ऽऽस्थातुमर्हति, अस्ति चायमनुवृत्तः प्रत्ययः इमानि कुण्डलानीति (१) । अस्ति च व्यावृत्तः प्रत्ययो नेमानि कुण्डलानीति (२) तस्माज्जातिविशेषो न प्रत्याख्येयः । व्यधिकरणस्यानाभिव्यक्तेरधिकरणवचनम् (३) न चायं जातिविशेषो व्यधिकरणो व्यज्यत इत्यधिकरणमवश्यं वक्तव्यम् । अणुसमवस्थानमधिकरणमिति चेत् ?—अथ मन्यसे परमाणव एव केनचि(४)त्समवस्थानेनावतिष्ठमानास्तां जातिं व्यञ्जयन्त्यतो नावयवी सिध्यतीति ? तत्र तावदुक्तम्—समवस्थानं संयोगोऽर्थान्तरमिति । यच्च तत्समवस्थानं जातिविशेषं व्यनक्तीति मन्यसे ? किं तच्चक्षुषा प्राप्तं व्यनक्त्याहोस्विदप्राप्तमिति ? । प्राप्तं व्यनक्तीति चेत् ? मध्यभागपरभागयोरप्राप्तत्वादनभिव्यक्तिः(५) स यदि प्राप्ते समवस्थाने जातिविशेषो व्यज्यते मध्यभागपरभागयोरर्वाग्भागव्यवधानादप्राप्तावनभिव्यक्तिः । यावत्प्राप्तं तावति अभिव्यक्तिरिति चेत् ? न तावतोऽधिकरणत्वम् । अथ मन्यसे यावच्चक्षुषा समवस्थानं प्राप्तं तावति भवति जातिव्यक्तिः ? तावदेव तर्ह्यधिकरणं जातेः प्राप्तम्, एवं सति प्रतीयमानभेदः योऽयं वृक्ष इति समुदायः प्रतीयते त-

---

(१) कुण्डानीति—पा० ६ पु० । (२) कुण्डानीति—पा० ६ पु० ।

(३) अधिकरणमिति चेत्—पा० ६ पु० ।

(४) एकेन चित्—पा० ६ पु० ।

(५) अप्राप्तावनभिव्यक्तिः—पा० ६ पु० ।

स्य वृक्षस्य भेदः प्राप्नोति । किं कारणम् ? यावति यावति जातिर्व्यज्यते स स वृक्ष इति प्राप्नोति । ततश्चैको वृक्षो ऽनेक इति प्रतीयेत इत्येकप्रत्ययो न स्यात् । अर्वाग्भागस्य चावृक्षत्वात् न क्वचिद्वृक्षत्वमिति वृक्षबुद्धेर्विषयो वक्तव्यः । तस्मात्—समुदिताणुस्थानार्थान्तरस्य जातिविशेषाभिव्यक्तिहेतुत्वादवयव्यर्थान्तरभूत इति । समुदिता अणवः स्थानं यस्य सोऽयं समुदिताऽणुस्थानः समुदिताणुस्थानश्चासावर्थान्तरं च तस्य जातिविशेषव्यक्तिहेतुत्वं नाणूनामिति सिध्यत्यवयव्यर्थान्तरभूतः ।

अनभ्युपगतार्थान्तरावयविना परमाणुशब्दस्यार्थो वक्तव्यः ?। परमाणुशब्दस्य परमापकर्षवाचित्वात् । न ह्यमति महति न चामत्यणौ परमाणुरिति विशेषणं युक्तम् । परिमाणप्रकर्षयोगे सति परमाणुरिति विशेषणमर्थवत्, असत्यनर्थकमिति । स चायं परिमाणप्रकर्षयोगः सत्यवयविनि सिद्ध्यतीति । सत्त्वरजस्तमसां सर्वापकृष्टः संघातः परमाणुरिति कस्यचिद्दर्शनम् । तन्न युक्तमिति पश्यामो व्याघातात्—सर्वापकृष्टः संघातश्चेति व्याहतम्—न हि संहन्यमानमन्तरेण संघातः सम्भवति । अर्थान्तरं पटात्तन्तवः तद्धेतुत्वात् तुर्यादिवदिति । तुर्यादि पटकारणमर्थान्तरमिति दृष्टम् । तथा च तन्तवस्तस्मादर्थान्तरमिति । सामर्थ्यभेदाद्विषागदवत् । भिन्नप्रत्ययविषयत्वाद्रूपस्पर्शवत् । तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद्रूपस्पर्शवत् ।

एके तु भिन्नरूपत्वादित्येवं हेतुं कृत्वा परमाणुना प्रसत्वतिष्ठन्ते । एकस्मिन्नपि परमाणौ रूपभेदो दृष्टः रक्तः श्याम इति च । स त्वेवं प्रयुज्यमानो न, हेत्वर्थापरिज्ञानात् । न ब्रूमो भिन्नरूपत्वादन्योऽवयव्यवयवेभ्यः, अपि तु

तन्तुपटरूपे भिन्नकारणे इति पक्षयित्वा विशेषवत्त्वादिति हेतुं ब्रूमः । तथा चायमप्रतिषेधः । बहुग्रन्थविस्तारिणी त्वेषा कथेत्युपरम्यते ॥

(इत्यवयविपरीक्षा ।)

परम्परया परीक्षितं प्रत्यक्षम्, अथेदानीमवसरप्राप्तमनुमानं परीक्ष्यते । किमिदमनुमानम् ? । उक्तं तत्पूर्वकमनुमानमिति । अत्र च पूर्ववदादिरुदाहरणानि । नदीपूरः पिपीलिकाण्डसञ्चरणं मयूरवाशितमिति । एतदुदाहरणव्यभिचारद्वारकं सूत्रम्—

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ ३७ ॥

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणमिति । तत्र रोधो नाम अपां स्यन्दमानानां द्रवत्वप्रतिबन्धहेतुः, उपघातः पिपीलिकागृहोपद्रवः, सादृश्यं मयूरशब्दपुरुषशब्दयोः समानप्रत्ययकर्तृत्वमेभ्यो व्यभिचारादनुमानमप्रमाणमिति । शेषं भाष्ये ।

यत्तावदनुमानमप्रमाणमित्युक्तं तदयुक्तम् । प्रतिज्ञापदयोर्व्याघातात्—अनुमानमिति सम्बन्धस्यातीन्द्रियार्थसाधकस्यैतन्नाम। अप्रमाणमिति तस्य प्रतिषेधः । सोऽयं प्रतिज्ञापदयोर्व्याघातः । अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तिः, प्रतिज्ञाहेत्वोश्च विरोधः अनुमानमप्रमाणमिति प्रतिज्ञा रोधोपघातसादृश्येभ्यो व्यभिचारादिति हेतुः । यद्व्यभिचारि तदप्रमाणमिति । यथा गोसिद्धौ विषाणित्वं, सोऽयं हेतुः प्रतिज्ञां व्याहन्ति प्रतिज्ञा च हेतुमिति । यच्चेदमुच्यते अनुमानमप्रमाणमिति, तत्किमनुमानमात्रस्याप्रमाणत्वमुतानुमानविशेषस्येति ? । किं चातः ? यद्यनुमानमात्रमप्रमाणमिति पक्षः ? हेतोरेकदेशवृत्तित्वादव्यापकत्व-

म् । समस्तमनुमानं पक्षीकृतं न सर्वस्मिन्ननुमाने व्यभिचारोऽस्ति । न हि व्यभिचारस्याप्रमाणत्वसाधकस्य व्यभिचारः प्रतिपादयितुं शक्यः, न हि व्यभिचारस्य व्यभिचारे किञ्चित् प्रमाणमस्तीत्यव्यापकत्वादहेतुः । अथ यद्व्यभिचारि तदप्रमाणमिति ब्रूषे ? प्रतिज्ञाविशेषणत्वाद्धेतोर्हेत्वन्तरं वचनीयम् । सिद्धसाधनं चैतत् यद्व्यभिचारि तत्प्रमाणं न भवति ॥

यान्यप्येतान्युदाहरणानि भवता व्यभिचारीणीत्युच्यन्ते तेष्वपि व्यभिचारो नास्तीत्यसिद्धोद्भावनद्वारकं सूत्रम्—

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ३८ ॥

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् । यत्तावद्रोधादपि नदीपूरो भवतीति ? नात्र नदीपूरमात्रेणोपरि वृष्टिमद्देशसम्बन्धित्वं नद्याः साध्यते, अपि तु पूरविशेषेण, तस्य च व्यभिचारोऽसिद्धः । उपघातात् पिपीलिका(१)ण्डसञ्चारमात्रस्य च व्यभिचारो न सञ्चरणविशेषस्य । कः पुनरसौ विशेषः ? अविच्छिन्नानां* भूयसीनां भूयःसु स्थानेष्वपि पिपीलिकाण्डभूयस्त्वेनोर्ध्वसञ्चरणं यत्तदनागतवृष्ट्यविनाभावि । शब्दव्यभिचारोऽपि नास्ति—यस्मान्न शब्दमात्रमनुमानं मयूरास्तित्वे, न चात्र मयूरः साध्यते, अपि तु शब्दगतादृष्टविशेषात् षड्जादेः(२)शब्द एव मयूरगुणविशिष्टोऽनुमीयते, एवं हि व्यभिचारो नास्तीत्यसिद्धो हेतुः ॥

(इत्यनुमानपरीक्षा ।)

त्रिकालविषयमनुमानं त्रैकाल्यग्रहणादित्युक्तम् । तत्र तावत्काल

(१) पिपीडिका—पा० १ पु० । एवं सर्वत्र ।

* अविच्छिन्नानां इति २ पु० पा० ।

(२) पक्षाक्षादेः—पा० १ पु० ।

एव नास्तीति केचित् । तच्च न प्रमाणाभावात्—न हि कालासत्त्वे प्रमाणमस्तीति । ननु चानुपलब्धिः कालासत्त्वं प्रतिपादयति ? न प्रतिपादयति, व्यभिचारात्—त्रिकारणेयमनुपलब्धिः, तत्रानुपलब्ध्या कारणवैकल्यं गम्येत, उपलभ्यमेव नास्तीत्येतदेव कुतः ? । अथोपलभ्यमानस्याभावादनुपलब्धिरित्ययं प्रतिज्ञार्थः ? तथा च हेतुर्नास्ति प्रतिज्ञार्थेनाक्षिप्तत्वात्—आक्षिप्तो हेतुः प्रतिज्ञार्थेनेति । न चासति धर्मिणि धर्मः सम्भवति आश्रयाभावात् । अथ धर्मोऽपि नास्ति ? साधनार्थो हीयते, न ह्यसतः साधनार्थं पश्यामः । परापरादिप्रत्ययानां च सनिमित्तत्वात्कालप्रतिषेधो न युक्तः—यश्च कालं न प्रतिपद्यते तेन परापरादिप्रत्ययानां निमित्तं वक्तव्यम् ? । न ह्यसति निमित्ते नैमित्तिकान् विशेषवतः प्रत्ययान् पश्यामो रूपादिप्रत्ययवदिति । कालैकत्वात् प्रत्ययभेदानुपपत्तिरिति चेत् ?–अथ मन्यसे कालैकत्वे सति न युक्तः परापरादिप्रत्ययभेदो नाभिन्नं निमित्तं भिन्नं कार्यं करोतीति ? न सापेक्षत्वात्—पित्रादिप्रत्ययभेदवदिति—यथैकस्मिन् पुरुषे अनेकसम्बन्धभेदानुविधायिन्यभिन्ने पिता पुत्रो भ्रातेति प्रत्यया भवन्ति तद्वदेकः कालः कार्यकारणविशेषापेक्षः परापरादिप्रत्ययहेतुरिति ॥

(इति कालपरीक्षा ।)

एवमुपपादितः कालः । तस्योपपन्नस्य वर्तमानकालप्रतिषेधार्थं सूत्रम्—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ ३९ ॥

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः । वृन्तात्प-

च्युतस्य फलस्य भूमिं प्रत्यासीदतः यदूर्ध्वं फलमवधिं कृत्वा यावद्वृन्तमिति स पतितोऽध्वा । यदधस्तात् फलमवधिं कृत्वा यावद्भूमिरिति स पतितव्योऽध्वा । नेदानीं तृतीयोऽध्वा विद्यते यत्र पततीति स्यात् । न चाध्वानमन्तरेण कालव्यक्तिहेतुरस्ति । तस्माद्वर्तमानः कालो नास्तीति ? न, विरोधात्— वर्तमानः कालो नास्तीति ब्रुवन्नभ्युपगतौ कालौ बाधते ॥

एतदर्थज्ञापनार्थं सूत्रम्—

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ॥४०॥

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् । वर्तमानसापेक्षावितरौ कालौ । यस्य वर्तमानो नास्ति तस्य वर्तमानानभ्युपगमेऽभ्युपगतयोः कालयोरभाव इति । न चायं कालोऽध्वव्यङ्ग्यः । किं तर्हि ? क्रियाव्यङ्ग्यः पततीति यदा द्रव्यं क्रियासम्बद्धमुपलभ्यते सोऽयं सम्बन्धविशिष्टः कालो वर्तमान उच्यते । क्रियासम्बन्धातिक्रमादतीतः । यदा तु क्रियाकारणान्याभिमुख्येनावस्थितान्यप्रतिबद्धशक्तिकानि, तदा भविष्यति क्रियेत्यनागतः काल इति । यदि चायं वर्तमानां क्रियां न प्रतिपद्यते कस्मादतीतामनागतां च प्रतिपद्यते न कालोऽतीतः न फलमतीतम् । कालस्य सर्वदा वर्तमानत्वात् फलस्य चापतत् पतति पतिष्यतीति क्रियाविशेषणत्वेन प्रत्ययविशेषविषयत्वात् क्रियायां सम्भवो न फले इति । तस्मात् क्रियाकालाभिव्यक्तिनिमित्तं नाध्वा, गन्तव्यस्य तादवस्थ्यात्—योऽसौ गन्तव्यो देशः स यथाभूत एवानुत्पन्नक्रिये फले तथाभूत एवोत्पन्नक्रिय इत्यभेदान्नाध्वा कालव्यक्तिहेतुः ।

अथ मन्यसे वर्तमानकालानभ्युपगमेऽप्यतीतानागताावितरेतरापेक्षौ सेत्स्यते ? एतत्प्रतिषेधार्थं सूत्रम्—

नातीतानागतयोरितरेतरापेक्षा सिद्धिः ॥ ४१ ॥

नातीतानागतयोरितरेतरापेक्षा सिद्धिरिति । न ह्यतीतानागतावितरेतरापेक्षौ सिद्ध्यतः । कथमिति ? वर्तमानाभावे किमतीतं कथं चेति किमनागतं कथं चेति न शक्यते वक्तुमव्याकरणीयमेतद्वर्तमानलोप इति । विशेषप्रतिषेधाच्च वर्तमानाभ्युपगमः—यस्मादयं विशेषप्रतिषेधः पततः पतितपतितव्यकालोपपत्तिरिति । नच वर्तमानकालानभ्युपगमे पतत इति पदस्यार्थोऽस्ति । न चैतत्पदार्थानभ्युपगमे पतत इति युक्तं वक्तुम् । सोऽयं व्याघातो वर्तमानश्च नास्ति पतत इति च प्रयोगः । न चेतरेतरापेक्षया कस्य चित् सिद्धिरिति । यस्मादेकाभावेऽन्यतराभावाद् द्वयाभावः । यदीतरेतरापेक्षया सिद्धिः स्यात् यावदितरत् नास्ति तावदितरत् नास्तीत्युभयोरभावः अर्थसद्भावव्यङ्ग्यश्च वर्तमानकालो विद्यते द्रव्यं विद्यते गुणो विद्यते कर्मेति ॥

यस्य चायं नास्ति तस्य—

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ ४२ ॥

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः । सूत्रार्थोऽविरोधः । कथं पुनर्वर्तमानाभावे प्रत्यक्षानुपपत्तिः ? यस्मादिदं प्रत्यक्षं वर्तमानाधारं कार्यत्वात् क्षीरवदिति—यत्कार्यं तद्वर्तमानाधारं दृष्टं यथा क्षीरं, कार्यं च प्रत्यक्षम्, तस्माद्वर्तमानाधारमितिवर्तमानकालानभ्युपगमादनाधारं प्रत्यक्षं प्राप्नोति । अनाधारं च कार्यं नास्तीति प्रत्यक्षानुपपत्तिः । प्रत्यक्षानुपपत्तेश्च सर्वप्रमाणलोपः । सर्वप्रमाणलोपे च सर्वस्य ग्रहणं न स्यात् । अस्ति च सर्वस्य ग्रहणं, सर्वस्य ग्रहणात् पश्यामोऽस्ति वर्तमानः प्रत्यक्षनिमित्तं प्रत्यक्षविषयः प्रत्यक्षं चेति सोऽयं वर्तमानः काल इति । उपपन्नश्च सन् द्वेधा

विभिद्यते क्वचित् क्रियामात्रव्यङ्ग्यः क्वचित् क्रियासन्तानव्यङ्ग्यः। क्रियामात्रव्यङ्ग्यो विद्यते द्रव्यमिति। क्रियासन्तानव्यङ्ग्यः पचति छिनत्तीति। क्रियासन्तानोऽपि द्वेधा भवति एकाकारक्रियो नानाकारक्रियश्चेति। एकाकारक्रियश्छिनत्तीति। तत्र ह्युद्यम्योद्यम्य निपातनक्रिया एकाकारा। नानाकारक्रियश्च सन्तानः पचतीति। तत्र ह्यनेका क्रिया अनेकाकारा—तद्यथाधोपसर्पणमग्न्यभिज्वालनं स्थाल्यधिश्रयणमुदकासेचनं तण्डुलपचनं दर्वीघट्टनं मण्डस्रावणमवतारणमिति। स ह्येवम्भूतः क्रियासन्तानः पचतीत्यनेनैकशब्देनाभिधीयते क्रियासन्तानस्य ह्यविच्छेदो विवक्षितो नानारम्भो नोपरम इति। सन्ताना(ना)रम्भविवक्षायां पक्ष्यतीत्युपरमविवक्षायामपाक्षीदिति॥

यच्चेदं छिद्यमानं तत् क्रियमाणं, तस्मिन् क्रियमाणे—

कृतताकर्त्तव्यतोपपत्तेस्तूभयथा ग्रहणम्॥ ४३॥

कृतताकर्त्तव्यतोपपत्तेरुभयथाग्रहणम्। कस्य? वर्त्तमानस्य। कथ? मुभयथा। केवलस्य व्यपवृक्तस्यातीतानागताभ्यां, सम्पृक्तस्य च ताभ्यामिति। क्व पुनर्व्यपवृक्तस्य? विद्यते द्रव्यमित्यत्र हि केवलः शुद्धो वर्त्तमानोऽभिधीयते। पचति छिनत्तीत्यत्र सम्पृक्तः। कथं? काश्चिदत्र क्रिया व्यतीताः काश्चिदनागताः एका च वर्त्तमाना इति। अन्यश्च लोके प्रत्यासत्तिप्रभृतेरर्थस्य विवक्षायामनेकप्रकारो वर्त्तमानस्य प्रयोगः। कदाचिदयं वर्त्तमानमतीते प्रयुङ्क्ते आगतः सन् ब्रवीत्येष आगच्छामीति। कदाचिदनागते प्रयुङ्क्ते यथा स्थितः सन् ब्रवीत्येष आगच्छामीति। एवमन्येषु प्रयोगेषूत्प्रेक्षितव्यमिति॥

(इति वर्त्तमानपरीक्षा।)

अथेदानीमुपमानमवसरप्राप्तं परीक्ष्यते । किं पुनरुपमानं? प्रसिद्धसाधर्म्यात् साध्यसाधनमित्युक्तम्—तस्याक्षेपः—

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ॥ ४४ ॥

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ॥ ४५ ॥

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति । नात्यन्तसाधर्म्यादुपमानं भवति यथा गौरेवं गौरिति । भूयः साधर्म्यादपि नोपमानं सिद्ध्यति न हि भवति यथा गौरेवं महिष इति । एकदेशसाधर्म्यादपि न भवति यथा मेरुस्तथा सर्षप इति । न चान्या गतिरस्ति तस्मान्नोपमानं सिद्ध्यति ।

अत्यन्तादिसाधर्म्यादुपमानप्रतिषेधान्नोपमानप्रतिषेधः—यदत्यन्तप्रायैकदेशसाधर्म्यादुपमानं तत्प्रतिषिद्ध्यते तेन सूत्रेण न पुनरुपमानमात्रस्य प्रतिषेधः । एवं सत्यन्यथोपमानं तत्स्वरूपं वक्तव्यम् ? । अथ नैवान्यथोपमानस्य स्वरूपमस्तीति मन्यसे ? कथं तर्हीदं वाक्यं(१) अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिरिति, अनभ्युपगच्छता ह्युपमानमेवं वक्तव्यम्, उपमानं न प्रमाणमर्थाप्रतिपादकत्वादिति ?। प्रसिद्धसाधर्म्य(स्य) वैधर्म्यस्य चोपमानहेतुत्वादप्रतिषेधः—योऽयं भवता प्रतिषेधः क्रियते अत्यन्तादिसाधर्म्यादुपमानं न सिद्ध्यतीत्ययमनुपपन्नोऽनभ्युपगमात्—कः खल्वेवमाहात्यन्तादिसाधर्म्यादुपमानमिति, अपि तु प्रसिद्धसाधर्म्यादुपमानम्, साध्यसाधनभावमाश्रित्य । तथा चायमप्रतिषेधः सर्वथाभावाच्चात्यन्तसाधर्म्यादप्युपमानं सिद्ध्यति तत्क्रिययैव तत्क्रियोपमीयते ।

(१) वाच्यम्—पा० १ पु० ।

यथा "रामरावणयोर्युद्धं रामरावणयोरिवे"ति। भूयः साधर्म्येणापि भवति यदा गोर्बलप्रकर्षजिज्ञासा भवति तदा भूयःसाधर्म्येणोपमानम्—यथा महिषस्तथा गौरिति। एकदेशसाधर्म्यादपि (भवति) यदा तु सन्मात्रं जिज्ञासानिमित्तं भवति मेरोः सत्ता किं रूपेति यथा सर्षपस्य तथा मेरोः तस्मादप्रतिषेधोऽयमिति।

अस्तु तर्ह्युपमानमनुमानम् ?—

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥

प्रत्यक्षेणाप्रत्यक्षसिद्धेः। यथा प्रत्यक्षेण धूमधर्मेणोर्द्धगत्यादिनाऽप्रत्यक्षो धूमधर्मोऽग्निरनुमीयते तथा प्रत्यक्षेण गवाऽप्रत्यक्षस्य गवयस्य प्रतिपत्तिरित्यप्रत्यक्षार्थप्रतिपादकत्वादुपमानमनुमानमिति ?। नापरिज्ञानात्—न भवतोपमानलक्षणं व्यज्ञायि।

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति (१) ॥ ४७ ॥

न चाप्रत्यक्षे गवय उपमानार्थं पश्यामः। अथ प्रत्यक्षे गवये क उपमानार्थः ? योऽसौ सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतिपत्तिः स उपमानार्थः। एवं च नोपमानमागमो न प्रत्यक्षम्, न ह्यपमागमात् प्रत्यक्षाद्वायं गवय इति (सं)प्रतिपद्यते।

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ॥ ४८ ॥

परार्थत्वाच्च—परार्थं चोपमानं भवति—न हि यथा गौरेवं गवय इत्येतदागममन्तरेण सारूप्यमात्रपरिज्ञानमुपमानम्। न ह्यागममात्रं सारूप्यपरिज्ञानमन्तरेणोपमानं भवितुमर्हति। न चैवमनुमानम्। तस्माद्यथा लिङ्गलिङ्गिसम्बन्धस्मृत्यनुग्रहे सति लिङ्गपरामर्शोऽनुमानम्, तच्च प्रत्यक्षम्, तथाऽऽगमाहि-

---

(१) 'इति'शब्दो नास्ति वृत्तौ।

तत्संस्कारस्मृत्यपेक्षं साक्षात्प्रत्यक्षमुपमानमिति ॥

प्रतिपत्तिभेदाच्च—नानुमानमेवं भवति यथा धूमस्तथाग्निरिति । अस्त्युपमाने यथा गौरेवं गवय इति । यत्र प्रतिपत्तिभेदस्तत्प्रमाणान्तरम् । यथा प्रत्यक्षादनुमान,मपूर्वानधिगमादुपमानं न भवतीत्यनेन प्रत्युक्तम् ॥

(इत्युपमानपरीक्षा ।)

अथावसरप्राप्तः शब्दः परीक्ष्यते । कः पुनरयं शब्दः ?। आप्तोपदेशः शब्द इत्युक्तम् । तस्याक्षेपो—न शब्दः प्रमाणं सत्यप्यप्रसिद्धेः—यस्माद् विद्यमानोऽप्ययं शब्दोऽश्रूयमाणो न प्रतिपत्तिहेतुः प्रतिपत्तिहेतुश्च प्रमाणमिति । विषयाभावाच्च—न प्रत्यक्षानुमानव्यतिरेकी विषयः शब्दस्यास्ति । न चाविषयं प्रमाणमिति । अविज्ञानात्मकत्वाच्च न प्रमाणम्,—यद्यत्प्रमाणं तत् तद्विज्ञानात्मकं यथा प्रत्यक्षम्, अविज्ञानात्मकं च न प्रमाणं घटादिवदेव । बाह्यकरणप्रत्यक्षत्वाच्च घटादिवदेव न प्रमाणम् । आत्मन्यसमवायात् न घटादिवदेव प्रमाणम् । आकाशगुणत्वात् च संख्यादिवन्न प्रमाणम् ?

यत् तावत् सत्यप्यप्रमितेरिति ? तन्नासिद्धत्वात्—न हि कदाचिच्छब्द उपलभ्यमानो न प्रमाणं भवत्यनुपलभ्यमानो (न) भवतीति नासौ प्रमाणम् । प्रमाणं हि नाम येन प्रमीयते । कदा च तेन प्रमीयते ? यदोपलभ्यते । यत् पुनरेतद्विषयाभावादिति । क एवमाह प्रत्यक्षानुमानव्यतिरेकी विषयो नास्तीत्यसिद्धो हेतुः यथा प्रत्यक्षादिभ्यो भेदस्तथोक्तम् । यत्पुनरेतदविज्ञानात्मकत्वाद् बाह्यकरणप्रत्यक्षत्वात् आत्मन्यसमवायाच्चेति ? तन्नानैकान्तात् प्रदीपवत्, प्रदीप एतत् सर्वमस्ति प्रमाणं च प्रदीपः प्र-

क्षाङ्गत्वादित्युक्तम्(१)। तस्मादनैकान्तिकत्वादहेतव एवेति। यत्तु पुनरेतदाकाशगुणत्वादिति? अयमप्यनैकान्तिक एव—यथाकाशे यत्तु परिमाणं तन्महत्प्रत्ययकर्तृत्वात् प्रमाणं भवति तस्मादाकाशगुणत्वादित्ययमप्यहेतुः।

अनुमानं शब्दः स्मृत्यपेक्षत्वात्—यस्य स्मृत्यपेक्षित्वं तदनुमानं, स्मृत्यपेक्षश्च शब्दोऽर्थप्रत्यायने, तस्मादनुमानम्। त्रिकालविषयत्वाच्च—त्रिकालविषयमनुमानम्, तथा च शब्दस्तस्मादनुमानम्। अन्वयव्यतिरेकोपपत्तेश्च—यदन्वयव्यतिरेकि तदनुमानम्, यथा धूमविशेषदर्शनमग्निप्रतिपत्तौ, तथा च शब्दोन्वयव्यतिरेकाभ्यामेवार्थं प्रतिपादयति तस्मादनुमानम्—

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४९ ॥

इतश्चानुमानं शब्दोऽर्थस्यानुपलब्धेः। प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादिति सूत्रार्थः॥

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५० ॥

इतश्चानुमानमुपलब्धेरद्विप्रवृत्तित्वात्। प्रमाणान्तरभावे उपलब्धि(हेतौ) भेदो दृष्टः यथा प्रत्यक्षेऽनुमाने च। अन्यथा हि प्रत्यक्षे उपलब्धिरन्यथाऽनुमाने, न त्वेवं शब्दे इति। तस्मान्न प्रमाणान्तरम्॥

सम्बन्धाच्च ॥ ५१ ॥

सम्बन्धाच्च। सम्बद्धार्थप्रतिपादकत्वाच्चेति सूत्रार्थः सम्बद्धार्थप्रतिपादकमनुमानं तथा च शब्द इति॥

यत्तावत् स्मृत्यपेक्षत्वादनुमानं शब्द इति! तन्नानेकान्तात्। अनुमानेऽपि स्मृत्यपेक्षित्वमस्ति यथा संशये यथा तर्के यथोपमान इति। एतेन त्रिकालविषयत्वं प्रत्युक्तम्। यत् पुनरेतदन्वयव्यति-

(१) प्रत्युक्तम्—वा० १ पु०।

रेकोपपत्तेरिति ? । अन्वयव्यतिरेकोपपत्तिः प्रत्यक्षेऽपि—यथा यत्र घटस्तत्र घटज्ञानम् । यत्र नास्ति तत्र तदभाव इति । यत् पुनरेतदनुपलभ्यमानार्थविषयत्वादिति ? सत्यम् अनुपलभ्यमानार्थविषयमनुमानं, न पुनः स्वर्गापूर्वदेवताद्यर्थेषु लौकिकस्य प्रत्यक्षमनुमानं वा, अपि तु—

आप्तोपदेशसामर्थ्याच्छब्दादर्थे सम्प्रत्ययः ॥ ५२ ॥

आप्तोपदेशसामर्थ्याच्छब्दादर्थे संप्रत्ययः ॥

न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते । किं तु पुरुषविशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्य तथाभूताच्छब्दात् स्वर्गादीन् प्रतिपद्यते । न चैवमनुमाने, तस्मान्नानुमानं शब्द इति । एवं (शब्दे) चोल्लिखन्ती प्रतिपत्तिः शब्दान्नानुमानादिति । एतेनाद्विप्रवृत्तित्वं व्याख्यातम् । यत् पुनरेतत् सम्बन्धाच्चेति । अस्ति शब्दार्थयोः सम्बन्धोऽनुज्ञातोऽस्ति च प्रतिषिद्ध इति वाच्यवाचकभावलक्षणः सम्बन्धोऽनुज्ञातः—अस्य शब्दस्यायमर्थो वाच्य इति । यः पुनरयं स्वाभाविकः शब्दार्थयोः सम्बन्ध इति कैश्चिदभ्युपगम्यते स प्रतिषिद्ध इति । न स्वाभाविकः शब्दार्थयोः सम्बन्धोऽस्ति ।

कथम्—

प्रमाणतोऽनुपलब्धेः (१) ॥ ५३ ॥

प्रमाणतोऽनुपलब्धेः । तत्र प्रत्यक्षेण तावच्छब्दार्थस्यानुपलब्धिरतीन्द्रियविषयत्वात् । यस्माच्छब्दस्यातीन्द्रियोऽप्यर्थो विषयस्तस्मान्न प्रत्यक्षेणोपलब्धिरिति । अनुमानेनोपलप्स्यत इति चेत् नानुमानेन विकल्पानुपपत्तेः । शब्दो वार्थदेशमुपसम्पद्यतेऽर्थो वा शब्ददेशम् उभयं वा । न तावदर्थः शब्ददेशमु-

(१) न्यायसूचीनिबन्धे सूत्रमिदं न दृश्यते ।

पसम्पद्यते—

पूरणप्रदाहपाटनानुपलब्धेश्च(१) सम्बन्धाभावः ॥५४॥

पूरणप्रदाहपाटनानुपलब्धेः । आस्यैकदेशस्थानकरणोच्चारणीयः शब्द इति—अन्न्यग्न्यसिशब्दोच्चारणे पूरणप्रदाहपाटनानि गृह्येरन् । मूर्तिमान् महान् पदार्थो मोदकादिर्गवादिवदागच्छन्नुपलभ्येत । ततश्च लोकव्यवहार उच्छिद्येत । अथ शाब्दोऽर्थान्तिकमुपसम्पद्यते ? तस्याप्यनुपपत्तिर्व्याघातात् । नित्यः शब्दः सन्तानवृत्त्या चागच्छतीति व्याहतम् । अथ नागच्छत्यर्थदेश एव भवतीति ! नित्यश्च भवति चेत्यनिवृत्तो व्याघातः । स्थानकरणप्रयत्नासम्भवाच्चार्थदेशे न भवति । अथ न गच्छति न भवति तत्र व्यज्यते । एको विततत्वावस्थित इति चेत् न सर्वार्थोपलब्धिप्रसङ्गात् । यदि सर्वशब्दा एव विततत्वावस्थिताश्च स्थानकरणादि (निमित्त) सन्निधाने सति व्यज्यन्त इति मन्यसे ? सर्वार्थानामुपलब्धिः प्राप्ता यदेकस्य व्यञ्जकं तच्छब्दान्तराणामपीति । विततत्वावस्थितश्च शब्दो व्यक्त इति स्वविषयं(२) व्याप्यावस्थाने सति यत्र क्वचनावस्थितानां गोशब्दाभिव्यक्तौ ककुदादिमदर्थप्रत्यायनं स्यात् सामान्यवदेतत्स्यात्— यथा सामान्यं स्वविषयं व्याप्यावस्थितं न च सर्वत्रोपलभ्यते तथा शब्दोऽपि स्वविषयं व्याप्यावस्थित इति नियमो भविष्यति ? न युक्तमेवं भवितुम्, सामान्यस्याश्रयोपलब्धिर्व्यक्तिहेतुः न च पुनः शब्दस्याश्रयोपलब्धिरस्ति न च वाच्ये वृत्तिरस्मादसमो दृष्टान्तः । यदि च(३) वाच्यार्थवृत्तिः शब्दः स्यात् वा-

---

(१) पूरणदाहपाटनानुपपत्तेश्च—इति सूत्रं ।

(२) स्वविषयप्राप्त्यवस्थाने इति २ पु० पा० ।

(३) अपि च—पा० १ पु० ।

स्योपलब्ध्यावकृतसमयेनापि प्रतिपद्येत--यथा सामान्यप्रकृतस-मयोऽपि प्रतिपद्यते इति । तस्मान्नानुमानादपि प्रतिपद्यते । इतश्च स्वाश्रयादन्येनापि न सम्बन्धी शब्दः गुणत्वात् अन्येन गवादिना शब्दं प्रति समवायो(ऽपि)नास्ति शब्दस्याकाशवृत्ति-त्वात् । नापि शब्दार्थयोरेकार्थसमवायः ताभ्यामेकस्यानारम्भा-त् । उपमानात् प्रतिपत्स्यत इति चेत् ? न उपमानस्यापि नायं विषयः । आगमात् प्रतिपत्स्यत इति चेत् ! स एवात्र विचार्यते— किं शब्दार्थौ सम्बद्धावाहोस्विदसम्बद्धाविति । यदिदं भवताभि-धीयते स्मृत्याद्यपेक्षत्वादनुमानसाधर्म्यादनुमानं शब्द इति ? तस्मा-देव नानुमानं, न हि तेनैव तस्य साधर्म्यमिति । अथ स्मृत्या-दिसाधर्म्याच्छब्दानुमानयोरेकत्वमेव ? नन्वेकं प्रमाणं प्राप्नोति । अस्ति ह्यर्थपरिच्छेदकत्वं सर्वप्रमाणानां साधर्म्यमिति । भवत्वेकं प्रमाणं किन्नो बाध्यत इति ? । कथं न बाध्यत इति ? यदभीष्टं तन्निवर्तते । किमभीष्टं ? प्रत्यक्षानुमाने भिन्ने इति । अथ सामान्य-माश्रित्याभेदो दृश्यते तदपेक्षया वक्तव्यम्, सामान्यमाश्रित्या-भेदो विशेषमाश्रित्य भेद इति न किञ्चिद्बाधितम् । न चानुमानं शब्दः स्वपरात्मप्रत्ययायकत्वात् । यत् स्वपरात्म-प्रत्यायकं तदनुमानं न भवति यथा प्रदीपः--प्रदीपो येनापि क्रियते तस्याप्युपलब्धिसाधनं भवति अन्यस्यापि । शा-ब्दोऽप्येवं तस्मान्नानुमानमिति ॥

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ ५५ ॥

शब्दार्थव्यवस्था(नदर्श)नादप्रतिषेधः । यदि शब्दार्थावस-म्बद्धौ स्याताम्, शब्दार्थप्रत्ययव्यवस्था न स्यात् । शब्दः सम्बद्धोऽर्थं प्रतिपादयति प्रत्ययनियमहेतुत्वात् प्रदीपवत् ।

यः प्रत्ययनियमहेतुः स सम्बद्धोऽर्थप्रत्यायको दृष्टः यथा प्रदीपः । शब्दश्चैवंधर्मा, तस्माच्छब्दोऽपि सम्बद्धोऽर्थप्रत्यायक इति । यद्वा प्रत्ययः पक्षीकर्त्तव्यः सम्बद्धाभ्यां शब्दार्थाभ्यां वस्तुप्रत्ययो भवतीति नियमात् कुण्डलीति प्रत्ययवदिति ॥

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥ ५६ ॥

न सामयिकत्वाच्छब्दादर्थे सम्प्रत्ययस्य । न सम्बन्धकारितं शब्दार्थव्यवस्थानं, किं तर्हि ? समयकारितं. कः पुनरयं समयः ? । अभिधानाभिधेयनियमनियोगः समययुक्ते(१) शब्दार्थव्यवस्था भवतीति । कश्चित् च सम्बन्धोनुज्ञात इति यद्वोचाम समयं तद्वोचाम इति। सेयं शब्दार्थव्यवस्थाऽन्यथापि भवतीत्यहेतुः । अयं च वाच्यवाचकभावलक्षणः सम्बन्धः स्वाभाविकशब्दार्थसम्बन्धवादिनाप्यनुज्ञेयः। न हि स्वाभाविकसम्बन्धवादिनोऽनुपयुक्तशब्दार्थसम्बन्धस्य शब्दग्रहणाद्विशेषप्रत्ययो भवति। स पुनः समयः कुतः प्रत्येतव्यः? पदज्ञानाल्लौकिकश्चेति वादेदं समयज्ञानं शब्दस्याविलोपार्थं प्रणीतम् । लौकिकश्च समयो वोद्धव्यः मात्रादिभिस्तु तदर्थेषु तेभ्यः शब्दान् प्रयुञ्जानानुपलभ्य सोऽपि तथैव शिक्षितस्तैस्तेनैव शब्दैस्तेषु तदर्थेषु प्रयुङ्क्ते न पुनरन्तं लिपिमिव कश्चित् शिक्षयतीति ॥

जातिविशेषे चानियमात् ॥ ५७ ॥

जातिविशेषे चानियमात् । न स्वाभाविकः शब्दार्थयोः सम्बन्धः—यदि स्वाभाविकः शब्दार्थसम्बन्धोऽभविष्यत्त जातिविशेषे शब्दार्थव्यवस्थाऽभविष्यत । अस्ति तु यथाकामं प्रयोगो जातिविशेषे यथाकामं प्रयोगो दृष्टः न तु स्वाभाविकेन सम्बन्धेन

(१) तस्मिंस्तूपयुक्ते—पा० १ पु० ।

सम्बद्धानां जातिविशेषे व्यभिचारो दृष्टः न हि प्रदीपोऽस्माकमन्यथा प्रकाशयत्यन्यथा जातिविशेष इति। जातिविशेषशब्देन पुनर्देशोऽभिधीयत इति॥

(इति शब्दस्यानुमानाद्भेदः।)

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः॥ ५८॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य इति सूत्रम्। तदित्यधिकृतशब्दाभिधानाच्छब्दविशेषाधिकारः यस्मात् प्राप्तमपि प्रकरणेन शब्दं तच्छब्देन पुनरभिधत्ते, तत्र ज्ञापयति शब्दविशेषं प्रतीपं चिन्ता न तु शब्दमात्रम्। अन्यथैवं वक्तव्यम्--अप्रमाणं शब्दोऽनृतव्याघातपुनरुक्तदोषेभ्य इति। अप्रामाण्यमर्थस्याप्रत्यायकत्वम्, अनृतत्वमयथार्थाभिधानम्, व्याघातः पदयोर्वाक्ययोर्वा सहासम्भवः, पुनरुक्तं पूर्वाभिहितार्थाभिधानम्। उदाहरणानि भाष्ये। तत्रानृतत्वे हेतुः फलादर्शनम्। अग्निहोत्रं जुहुयादिति विधिवाक्यम्। अस्य व्याघातः कालासम्भवेन उदितानुदितसमयाध्युषितप्रतिषेधो, न चान्यः कालो विद्यते यत्राग्निहोत्रहवनं स्यात्। उदितानुदितसमयाध्युषितवाक्यानां वा परस्परविरोधः। प्रथमोत्तमयोस्त्रिरभिधाने पुनरुक्तम्। उदाहरणं भाष्ये। दृष्टान्ततेनैतानि वाक्यान्युपन्यस्य एककर्तृकत्वेन शेषवाक्यानामप्रमाणत्वमिति। अग्निहोत्रादिवाक्यानां वा प्रमाणत्वप्रतिषेधो वैदिकत्वेन तदन्यवाक्यवत्। पुनरुक्ततायां पूर्वमुत्तरं वा न वाक्यमेकेन प्रतीयमानत्वात्(१)॥

न कर्मकर्तृसाधनवैगुण्यात्॥ ५९॥

---

(१) प्रणीयमानत्वात्—पा० १ पु०।

न कर्मकर्तृसाधनवैगुण्यात् । यत्तावदनृतत्वादप्रमाणानि वेदवाक्यानि फलादर्शनादिति ? तदत्र सम्प्रधार्यम् । किं फलादर्शनं वेदवाक्यानामप्रमाणत्वादाहो कर्मकर्तृसाधनवैगुण्यादिति ? । वयं तु ब्रूमः (न) कर्मकर्तृसाधनवैगुण्यादिति, फलादर्शनात् तु कारणानामसामग्र्यं गम्यते, इष्टेः कारणसाधनत्वाच्चाऽविरोधः । न चेयमिष्टिर्मया साक्षात् पुत्रकारणत्वेनाभ्युपगम्यते, अपि तु पितराविष्ट्या संप्रयुज्यमानौ पुत्रं जनयत इति । तत्र न ज्ञायते किं पित्रोरसाद्गुण्यात् पुत्रजन्म न भवति ? आहोस्विदिष्टेरसाद्गुण्यादिति ? । मन्त्राश्चेष्टिसाधनत्वेन प्रयुज्यमाना इष्ट्यङ्गं भवन्ति(१) तत्रापि न ज्ञायते किमिष्टिर्मन्त्राणां वैगुण्यान्न सम्पन्ना ? आहो दर्भेन्धनादेः(२) कारणस्य वैगुण्यादिति ? यथैव मन्त्राणां न्यूनाधिकभावेन प्रयुज्यमानानामिष्टिर्न निर्वर्त्यते तथा दर्भेध्मादेरपि साधनस्य वैगुण्यादिति ? । न केवलं साधनवैगुण्याद्वेष्टेरनभिनिर्वृत्तिस्तथेष्टेः साधयितुः कर्मणश्चासाद्गुण्यादिति ? । उपन्येष्टिसम्पदं(३) न केवलेष्टिः कारणमित्युक्तम् । तत्र पुत्रजन्मादर्शनेन न युक्तं मनुष्यधर्मणो वक्तुम् मन्त्राणामसामर्थ्यात् पुत्रानुत्पत्तिरिति । उभयथा दृष्टत्वात् सन्देह इति चेत् ! नाभ्युपेतहानेः । अथ मन्यसे त्रिकारणं पुत्रजन्म, तत्रान्यतरकारणवैकल्यात् पुत्रो न भवतीति कारणवैकल्यं गम्यते—तत्र यथैव पित्रोर्वैगुण्यात्—पुत्रानुत्पत्तिस्तथा मन्त्राणामप्रमाणत्वादिति सन्दिह्यते ? । नाभ्युपेतहानेः—पूर्वं भवताऽभ्युपगतापि वेदोऽप्रमाणमिति, अधुना त्वभिधीयते सन्दिग्धं प्रमाणत्वमित्येवं ब्रुवता

---

(१) सम्भवन्ति-पा० १ पु० । (२) दर्भेध्मादे-पा० १ पु० ।
(३) उपक्षेष्टिसम्पदम्—पा० १ पु० ।

पूर्वो वादस्त्यक्तो भवति । समानमिति चेत् ?–अथ मन्यसे समानमेतद्भवतोऽपि–किं पित्रोर्वैगुण्यात् पुत्राजन्म ? वेदवाक्यानामप्रामाण्याद्वेति सन्दिह्यते ? । नासाधनात्–न मयैतत् साध्यते वेदवाक्यानि प्रमाणमप्रमाणं वेति, भवता तु साध्यते । तत्र मया भवतः साधनान्यनर्थैकल्यात्(१) पुत्राजन्म न भवतीति सन्दिग्धो हेतुरुपदिश्यते तत्सहकारित्वाच्चोपदेशो दारुमथनवदिति । नेयमिष्टिः साक्षात्कारणत्वेन पुत्रजन्मन उपादिश्यते, अपि तु 'पुत्रकाम इष्टिं कुर्वीत' इति । यथा'ऽग्निकामो दारुणी मथ्नीया'दिति उपदेशस्तत्र कर्तृकर्मणोर्वैगुण्यादग्निर्न भवतीति नोपदेशवैयर्थ्यं तथेहापीत्यदोषः । सामस्त्ये फलनियतिदर्शनाच्च—यत्र समस्तानि कारणानि तत्र फलाभिनिर्वृत्तिर्दृष्टेत्यदोषः । यच्चेदं वाक्यं "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्य" इति । तदपि वेदवाक्यस्य पक्षीकृतत्वादव्यापकम् । अथ यान्येवंधर्मकाणि वाक्यानि तानि पक्षीक्रियन्ते ? तत्त्वप्येषां धर्माणां विशेषणत्वेनोपयुक्तत्वादप्रामाण्यप्रतिपादको हेतुर्वक्तव्यः । अनृतत्वादप्रामाण्यमिति चेत् ? किमिदमनृतत्वं नाम ? यद्ययथार्थाभिधानं ? नन्वयमेव प्रतिज्ञार्थोऽप्रमाणमिति । अनृतत्वं वाऽसिद्धमित्युक्तमेतत् ॥

यत् पुनरेतद्व्याघातदोषादिति—

अभ्युपेत्य कालभेदे दोषवचनात् ॥ ६० ॥

अभ्युपेत्य कालभेदे दोषवचनान्न व्याघातः । अग्न्याधानकाल एवायं नियमपरिग्रहः–'उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्य'मिति । सोऽयमभ्युपेत्य कालं यदाऽतिक्रामति

(१) वैगुण्यात् इति २ पु० पा० ।

तदाऽभ्युपेतकालातिक्रमाभिन्ध्यते निन्दावचनेन। न च व्याघातः उभयप्रतिषेधानभिधानान्नेदमन्यथा, यदि पुनरेतदुभयप्रतिषेधाभिधानं स्यात् भवेदयं प्रसङ्गो व्याघात इति, न पुनरेतानि प्रतिषेधवाक्यानि उदिते होतव्यमित्येवमादीनि, तस्मादप्रसङ्गोऽयमिति। अथ पुनरेतानि वाक्यानि होमविधेः प्रतिषेधकानि स्युः? तदोदितादिग्रहणं व्यर्थमेवं हि वक्तव्यम्—अग्निहोत्रं जुहुयादिति यद्वाक्यं तन्न कर्तव्यमिति। एवं च सङ्गतार्थता—यथैतद्व्याख्यानमेवं पूर्वोत्तरे वाक्ये सङ्गते भवतः हवनमनूद्य कालविशेषविधानादिति। एवमेतन्न पुनर्यथाऽस्माभिर्व्याघातोऽभिधीयत इति नियमहेतुर्वक्तव्यः? इदमेवोदितादिवाक्यं नियमहेतुः। कथमिति?। इदं पुनर्वाक्यं(तावद्वक्तव्यं) कामतो वा कल्प्येत अभिहितं वाऽनूद्यत? इति। अभिहितानुवादो न्यायः। तत्र हि प्रमाणानामविसंवादादिति न व्याघात इति॥

यत्पुनरेतत् पुनरुक्तदोषात्? न पुनरुक्तदोषः—

अनुवादोपपत्तेश्च॥ ६१॥

अनुवादोपपत्तेः। पुनरुक्तं नाम तस्यैवार्थस्यानङ्गीकृतविशेषस्य सतः पुनर्वचनम्। अनुवादस्तु पुनःश्रुतिसामर्थ्यादङ्गीकृतविशेषस्यार्थस्य वादः। एवं सति यथोक्तो न दोषः। उदाहरणं भाष्ये। पुत्रकामेष्टिवाक्यानि प्रमा वेदैकदेशत्वात् "भूमिरावपनं मह"दिति वाक्यवत् इतश्च पदादिनियमात् "द्वादशमासाः संवत्सर" इति वाक्यवत्। इतश्च कर्तृविशेषाभिहितत्वात् "अग्निर्हिमस्य भेषज"मिति वाक्यवत्॥

वाक्यविभागस्य चार्थग्रहणात्॥ ६२॥

सप्रमाणानि वा वेदवाक्यानि पक्षीकृत्याभिधीयन्ते प्रमाणं

वेदवाक्यानि अर्थविभागवत्त्वात् मन्त्रादिवाक्यवत्—यथा म-न्त्रादिवाक्यान्यर्थविभागवन्ति, अर्थविभागवत्त्वे सति प्रामाण्यं, तथा च वेदवाक्यान्यर्थविभागवन्ति तस्मात् प्रमाणमिति ॥

विभागश्च त्रिविधो भवति—

विध्यर्थवादानुवादवचनविनियोगात् ॥ ६३ ॥

विध्यर्थवादानुवादवचनविनियोगात् । त्रिधा खलु ब्राह्म-णवाक्यानि भवन्ति विधिवचनानि, अनुवादवचनानि, अर्थवादव-चनानि च ॥

विधिर्विधायकः ॥ ६४ ॥

तत्र विधिर्विधायकः । यद्वाक्यं विधायकं–देशकं स विधिः । विधिस्तु नियोगोऽनुज्ञा वा–यद्वाक्यं विधत्ते इदं कुर्यादिति स नियोगः । अनुज्ञा तु–यत् कर्तारमनुजानाति(१) तदनुज्ञावाक्यम्, यथाऽग्निहोत्रवाक्यमेवंतत् साधनावाप्तिमग्न्यावाप्तिपूर्वकत्वमनुजानाति ॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः ॥६५॥

स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः । एषामुदाहर-णानि भाष्ये ॥

विधिविहितस्यानुवचनमनुवादः ॥ ६६ ॥

विधिविहितस्यानुवचनमनुवादः । विध्यनुवचनं चानुवा-दः । विधिविहितानुवचनं च । पूर्वः शब्दानुवादः परोऽर्थानुवादो, यथा पुनरुक्तं द्विविधं शब्दपुनरुक्तमर्थपुनरुक्तं च । शब्दपुनरुक्तम-नित्यो ऽनित्य इति । अर्थपुनरुक्तमनित्यो निरोधधर्मक इति ॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥६७॥

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः । कोऽस्य

(१) यत्कुर्वाणकमनुजानाति इति २ पु० पा० ।

सूत्रस्यार्थः ?। प्रतीतार्थशब्दाभ्यासोऽनुवादपुनरुक्तयोः साम्यम्, पुनरुक्तेऽपि प्रतीतार्थः शब्दोऽभ्यस्यते, अनुवादेऽप्येव, अतः प्रतीतार्थशब्दाभ्यासादुभयमप्रसाधितेति ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥ ६८ ॥

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेष इति । यथा शीघ्रं गम्यतां शीघ्रतरं गम्यतामिति तरपा क्रियातिशयो गम्यते तथाऽनुवादलक्षणेनाप्यभ्यासेन क्रियातिशयोऽभिधीयत इति । अस्य प्रयोगः । अर्थवाननुवादलक्षणोऽभ्यासः प्रत्ययविशेषहेतुत्वात् शीघ्रतरगमनोपदेशवदिति । यथा(१) शीघ्रशब्दाच्छीघ्रतरशब्दः प्रयुज्यमानः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं लभते(२) तथाऽनुवादलक्षणोऽप्यभ्यासः प्रत्ययविशेषहेतुत्वान्न पुनरुक्तदोषं लप्स्यत इति। कः पुनरसौ विशेषो भवतीति ? वक्तव्यस्तदुच्यते । आद्ये पचतुशब्दप्रयोगे पाको निर्वर्त्तनीय इति पक्तुः प्रत्ययो भवति, द्वितीयात् तु पचतुशब्दादवधारणप्रत्ययो भवति, मयैव पक्तव्यमिति, सातत्यप्रत्ययो वा भवति सततं मया पक्तव्यमिति, अत्यादरप्रत्ययो वा भवति मामेवायमधिकुरुत इति। आतुरप्रत्ययो वा भवति आशु मया पक्तव्यमिति, एवं श्रोतुः। यथा च श्रोतुस्तथा वक्तुरप्येते (एव) प्रत्यया भवन्तीति । पुनरुक्ते तु न कश्चिद्विशेषो गम्यत इति महान् विशेषः पुनरुक्तानुवादयोः । एवमन्योऽप्यनुवादस्य प्रयोगो वाक्ये बोद्धव्य इति ॥

किं पुनः प्रतिषेधहेतूद्धारादेव प्रमाणता वेदवाक्यानां सिद्धा ? न। न किं कारणम् ?। न साधनमन्तरेण सिद्धिरस्तीति।

(१) अथ इति २ पु० पा० ।
(२) न भवति इति २ पु० पा० ।

कुतस्तर्हि ? प्रमाणतः । किं तत् प्रमाणम् ? अर्थविभागवचनम्—

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ॥ ६९ ॥

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् । चशब्दः पूर्वहेत्वनुकर्षणार्थः । यथा मन्त्राऽऽयुर्वेदवाक्यानि पुरुषविशेषाभिहितत्वात् प्रमाणं, तथा वेदवाक्यानीति पुरुषविशेषाभिहितत्वं हेतुः । किमायुर्वेदस्य प्रामाण्यं ? यत् तदायुर्वेदेनोपदिश्यते—इदं कृत्वेष्टमधिगच्छति इदं कृत्वाऽनिष्टं जहाति, तस्यानुष्ठीयमानस्य तथाभावोऽविपर्ययः एतत् प्रामाण्यम् । किंकृतमेतत् ? आप्तप्रामाण्यकृतम् । किं पुनराप्तानां प्रमाणत्वम् ? साक्षात्कृतधर्मता—यं ते पदार्थमुपदिशन्ति स तैः साक्षात्कृतो भवतीति । भूतदया च यस्य चोपदिशन्ति तं प्रत्यनुकम्पा भवति । यथाभिज्ञातार्थचिख्यापयिषा चास्य भवति(१) । एतेन त्रिविधेन विशेषणेन विशिष्टो वक्ता आप्तः । तेन य उपदेशः क्रियते स प्रमाणमिति । दृष्टार्थवाक्याविसंवादेन वा शेषानुमानं यद्वाक्यं दृष्टार्थं यथा वा "ग्रामकामो यजेत" इत्येवमादि तेन शेषानुमानं प्रमाणमिति(२) । लौकिकमपि वाक्यमनेनैव त्रिप्रकारेण विशेषणेन(३) विशिष्टस्य वक्तुः प्रमाणं भवति । अस्य प्रयोगः । प्रमाणं वेदवाक्यानि वक्तृविशेषाभिहितत्वात् मन्त्रायुर्वेदवाक्यवदिति । एककर्तृकत्वेन वा मन्त्रायुर्वेदवाक्यानि पक्षीकृत्य लौकिकविषयप्रतिपादकत्वेन वैधर्म्यहेतुर्वक्तव्यः ।

पौरुषेयत्वमसिद्धं नित्यत्वादिति चेत् ?—अथ मन्यसे नित्यानि

(१) यदि भवति पा० १ पु० ।

(२) प्रमाणमस्य इति पा० २ पु० ।

(३) विशेषेण इति पा० २ पु० ।

वेदवाक्यानि नित्यत्वात्तेषां प्रामाण्यं तस्मात् पौरुषेयत्वमसिद्धम् ? । नासिद्धत्वात्—सिद्धे नित्यत्वे एतद्युक्तं, तत्तु न सिद्धमतो न युक्तमेतत् । यदि न नित्यानि कथं प्रमाणं ? प्रमेयप्रतिपादकत्वात् प्रमाणं न नित्यत्वात् ।

केचित्तु ब्रुवते न किञ्चिन्नित्यं प्रमाणमस्तीति प्रमाणत्वादेवानित्यानीति ? । तत्तु न सम्यगिति पश्यामः नित्यमपि प्रमाणं यथा मनः आत्मा च, प्रमाणशब्दस्य समुदायवाचित्वात्—अयं खलु प्रमाणशब्दः समुदाये वर्तते । तत्र नित्यमनित्यं चानेकं समुदायि प्रमाणस्याङ्गत्वात् प्रमाणमित्युच्यते यथा प्रदीपः एवं च नित्यमपि प्रमाणमस्तीति । यदा च परमाण्वादि नित्यमितरवस्तुसाधकत्वेनोपादीयते तदा परमाण्वादेर्नित्यस्य प्रमाणभावात् प्रमाणत्वादनित्य इत्ययं नैकान्तो भवतीत्यनुत्तरमेतत् ।

तस्माद्युक्तमर्थविभागवत्त्वादनित्यत्वं लौकिकवाक्यवदिति—यथार्थविभागवन्ति लौकिकवाक्यानि तथा च वेदवाक्यानि तस्मान्न नित्यानीति । लौकिकान्यपि नित्यानीति चेत्—अथ मन्यसे यान्यप्येतानि लौकिकवाक्यानि अर्थविभागवन्ति तान्यपि नित्यानीति ? अर्थविभागो न स्यात् योऽयमर्थविभागो लौकिकवाक्ये स न स्यात्, दृष्टस्तु । तान्यनित्यानीति चेत् ? विशेषहेतुर्वक्तव्यः तुल्ये चार्थविभागवत्त्वे तुल्ये चार्थप्रतिपादकत्वे लौकिकान्यनित्यानि वैदिकानि नित्यानीति विशेषहेतुर्वक्तव्यः ? । तुल्यं भवतोऽप्यनित्यत्वे विशेषहेतुर्वक्तव्य इति ? । उक्तोऽर्थविभागवत्त्वं हेतुः । इतश्च वर्णवत्त्वाद्वर्णवन्ति लौकिकवाक्यानि अनित्यानि तथा च वेदवाक्यानि, तस्मात् तान्यप्यनित्यानि । इतश्च सामान्यविशेषवत्त्वे सति श्रोत्रग्राह्यत्वात्

लौकिकवाक्यवत् । इतश्च पदत्वात् लौकिकवाक्यवत् । दर्शनस्य परार्थत्वादिति चेत् ?—अथ मन्यसे दर्शनं परार्थं दर्शनशब्द उच्चारणार्थः उच्चारणं परप्रतिपादनार्थम्, न हि कश्चिदात्मप्रतिपत्तये शब्दमुच्चारयति, यदि चायं नित्यो भवति शब्दादर्थप्रत्ययो युक्तः, अथानित्य उत्पन्नप्रध्वंसी ततोऽस्य श्रोतुः नित्यमपूर्वः श्रोत्रविषयमेति, न चापूर्वश्रवणात् प्रतिपत्तिर्युक्ता, न हि नारिकेलद्वीपवासिनोऽप्रसिद्धगोश्रवणात् ककुदादिमदर्थप्रतिपत्तिर्भवति, तथा चानित्यवादिनः सर्वे शब्दाः (तथा) तस्मादस्यापि शब्दात् प्रत्ययनियमो न प्राप्त इति ? । नानेकान्तात्—क्षणविध्वंसिषु प्रदीपादिषु अपूर्वस्य प्रत्यायनं दृष्टमिति ? । नोदाहरणवैधर्म्यात् प्रदीपोनाख्यातः प्रकाशनीयार्थसम्बन्धात् प्रकाशनीयार्थसम्प्रतिपत्तिं करोति न पुनरनाख्यातः शब्द इति । कः पुनरेवमाह अनाख्यातः शब्दः प्रतिपादयति इति ? । सम्बन्धस्यादर्शनादाख्यानमनुपपन्नम् । उक्तमत्रयथा न शब्दार्थयोः प्राप्तिलक्षणः सम्बन्धोऽस्तीति । वाच्यवाचकभावलक्षणस्तु पौरुषेयः सम्बन्धः स च कृतक इति । स च संसारानादित्वात् लोकतोऽवगम्यते । ये तु संसारस्यादिमत्त्वं वर्णयन्ति स एवमुपालभ्याः । अथ योऽयमभिलापो नित्या वर्णा(वेदा) इति, स कथंसम्प्रदायस्याविच्छेदात् नान्येन वेदवाक्यानि मन्वन्तरचतुर्युगान्तरेषु सम्प्रदायाभ्यासाविच्छेदेन प्रवर्तन्ते तदपेक्षया लौकिकाः शब्दान् प्रयुञ्जते नित्या वेदा इति । यथा नित्याः पर्वताः नित्याः सरित इति । तत्सत्त्वादिवाक्येषु समानम । कुत एवं सम्प्रदायाविच्छेदात् नित्यत्वं न पुनर्नित्यत्वादेव ? अनित्यत्वोक्तप्रमाणाविधानात् यानिप्रमाणानि नित्यत्वे प्रमाणान्युपन्यस्तानि तानि न विहन्यन्ते तेषामविघातादनित्यत्वे सति सम्प्रदायाविच्छेदात् नित्यत्वोपचार इति ॥

इति—श्रीदुर्योतकरे न्यायवार्तिके द्वितीयस्याध्यायस्याद्यमाह्निकम् ॥

अथ द्वितीयमाह्निकम् ।

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥१॥

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रम् । तस्याक्षेपः न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् । अस्यार्थः अयथार्थोऽयं प्रमाणोद्देश इति । न चत्वार्येव प्रमाणानि ऐतिह्यार्थापत्तिसम्भवाभावा अपि प्रमाणानीति । संशयव्युदासार्थं वा ऐतिह्यादय उपदिश्य प्रतिषिध्यन्ते । प्रत्यक्षादीनि च प्रमाणानि ऐतिह्यादीनि चेति केचित् मन्यन्ते तत्र श्रोतुः संशयः स्यात् किं विद्यमाना ऐतिह्यादयो नोक्ता अथाऽविद्यमाना इति ? । विधिन्यूनतापरिहारार्थं वा प्रकरणम् । विद्यमानान्यैतिह्यादीनि नोक्तानीति विधिवाक्यहीनं (शब्द) शास्त्रं स्यात् । दोषवतां दोषानभिधानात् दोषहीनं वा शास्त्रं स्यात् । इत्यत उद्दिश्य निवर्त्यन्ते—दोषवन्त ऐतिह्यादय इत्यतो नाभिधीयन्त इति । दोषस्तर्हि वक्तव्यः ? अथ दोषो नाभिधीयते दोषहीनं शास्त्रमिति तत्परिहारार्थं प्रकरणमुपक्षिप्यते । प्रत्यक्षादिष्वन्तर्भावप्रदर्शनार्थं वा ऐतिह्यादीनि प्रत्यक्षादिष्वन्तर्भावयितुं ये यत्रान्तर्भवन्ति तत्र तेषां प्रदर्शनार्थं प्रकरणमिति । सिद्धत्वादनारम्भः ?—नन्वयमर्थः चत्वार्येव प्रमाणानीत्यस्मिन्नेव विभागोद्देशसूत्रे सिद्ध इति सिद्धत्वात् पुनरनारम्भ इति ?। न । अवधारणप्रयोजनस्य इतः (श्व) सिद्धेः—येन न्यायेन चत्वार्येव प्रमाणानीत्येतदवधार्यते स न्याय इह प्रकरणे वर्ण्यत इति तस्मादारब्धव्यमेवेति ।

किमिदमैतिह्यं नाम ? अनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमिति होचुर्वृद्धाः कथयन्तीति। अर्थादापत्तिरर्थापत्तिः—आपत्तिः—प्राप्तिः प्रसङ्गः यस्मिन् वाक्ये निर्धार्यमाणादर्थादन्योऽर्थ आपद्यते साऽर्था-

पत्तिः—यथाऽसत्सु मेघेषु वृष्टिर्न भवतीति, किमत्रार्थादापद्यते सत्सु भवतीति। सम्भवो नामाविनाभाववर्त्तिनोऽर्थस्य ग्रहणादन्यस्य सत्ताविज्ञानम्—यथा द्रोणस्य ग्रहणादाढकस्य सत्तेति। अभावो नाम प्रत्यनीकस्य ग्रहणात् तद्विरोधिनो ग्रहणम्—यथा विधारके वाय्वभ्रसंयोगे सति गुरुत्वप्रतिबन्धादपां पातः प्रतिषिद्धः तदपामपातेन विरोधिनं वाय्वभ्रसंयोगं प्रतिपद्यते इति।

तान्येतान्यैतिह्यादीनि एवम्भूतानीति लक्षणाभेदादेतेष्वेवान्तर्भवन्ति इति न पृथगुच्यन्ते। विषयाभावाच्च—न प्रत्यक्षादिप्रमाणव्यतिरेकेण विषया ऐतिह्यादीनां सम्भवन्त्यतश्च न प्रमाणान्तराणि। अथ प्रयोजनभेदात् भिद्यन्त इति मन्यसे? एवं तर्ह्युक्तं निवर्तते—यदभ्युपगतं प्रमाणाष्टत्वं, तन्निवर्तते प्रयोजनभेदात् प्रमाणभेदमभ्युपगच्छत इति। एककरणश्च प्रयोजनभेदो दृष्ट इत्यनेकान्तः। यथैकं चक्षुरनेकनीलादिभिन्नरूपग्रहणप्रयोजनमिति। इन्द्रियानेकत्वं वा। अथ प्रयोजनभेदाद्भेदं मन्यसे? एकमिन्द्रियमनेकं प्राप्नोति। अथ विषयसामान्याव्यतिरेकादेकमिन्द्रियं? न युक्तस्तर्हि प्रतिषेधो न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यादिति॥

यद्येतानि प्रमाणानि न प्रमाणान्तराणि क तर्ह्यन्तर्भवन्तीति वक्तव्यम्? अन्तर्भावप्रदर्शनार्थं सूत्रम्—

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः॥ २॥

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्चाप्रतिषेधः। शब्द ऐतिह्यमन्तर्भवति समानलक्षणत्वाच्च शब्दलक्षणमैतिह्यान्निवर्तते सोऽयं भेदः सामान्येन संगृहीतः। अनुमानेऽर्थापत्तिसम्भवाभावानामन्तर्भावः समान-

नलक्षणत्वात् । कथमर्थापत्तिरनुमानेन संगृह्यते ? । द्वयोरेकतरप्र-
तिषेधस्य द्वितीयाभ्यनुज्ञाविषयत्वात् । यत्र यत्र द्वयोर्वस्तुनो-
रेकतरद्वस्तु प्रतिषिध्यते तत्र तत्र द्वितीयाभ्यनुज्ञा दृष्टा—यथा
दिवा न भुङ्क्ते इत्यभिधानाद्रात्रौ भुङ्क्ते इति गम्यते ।

एके तु ब्रुवते नेयमर्थापत्तिर्दिवा न भुङ्क्ते इति । अत्र किला-
ऽवधारणद्वयं दिवा न भुङ्क्ते एव, दिवैव न भुङ्क्ते इति चो,भयप्राप्तौ न
वक्तव्यं रात्रौ भुङ्क्ते इति ? । एतत्तु न सम्यगसम्भवात्—दिवा न
भुङ्क्त एव इत्ययमर्थोऽसम्भवेन निराकृतः न हि कश्चिद्दिवा न भुङ्क्त एव
भुञ्जानोऽपि तावन्न भुङ्क्त एव किं पुनरभुञ्जान इति । तस्मादसम्भवे-
नार्थस्य निराकृतत्वात् कालप्रतिषेधोऽनेन दिवा न भुङ्क्त इति । अन्य-
थाऽनर्थकं स्यात् क्रियान्तरप्रतिषेधनिवृत्तेरसम्भवेन निराकृतत्वात्
कालप्रतिषेधस्यानभ्युपगमात् अनर्थकं वाक्यम् । भवत्वनर्थकं किं
नो बाध्यते? यदभ्युपगतं तन्निवर्तते । किं चाभ्युपगतम् ? क्रियान्तरप्र-
तिषेधो (यत्र) तत्कालप्रतिषेध इति । न चेदनर्थकं तस्माद्द्वयोरेक-
तरप्रतिषेधे द्वितीयाभ्यनुज्ञानादनुमानमेवार्थापत्तिः । कतमदेवानु-
मानं ? सामान्यतोदृष्टम् । एतेन सम्भवाभावौ व्याख्यातौ ।
सम्भवोऽनुमानम्, अभावोऽप्यनुमानमेव । तच्च वर्णितम् । अ-
नयोरपि सामान्यतोदृष्ट एवान्तर्भाव इति । तदेवमन्तर्भावात् पृथ-
गनुपदेश इति । (मन्यसे)

सत्यमेतानि प्रमाणानि न तु प्रमाणान्तराणीत्युक्तम्, तत्रा-
र्थापत्तेः प्रमाणभावाभ्यनुज्ञा नोपपद्यते—

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥ ३ ॥

तथाहि इयमर्थापत्तिरप्रमाणमनैकान्तिकत्वात् । येयं भवता-
ऽर्थापत्तिः प्रमाणत्वेन प्रतिपाद्यते सा नप्रमाणं, अप्रमाणमिति
नार्थस्यैकदापि प्रतिपादिका । यथा मेघेष्वसत्सु वृष्टिर्न भवतीति

अर्थादापन्नं सत्सु भवतीति, सत्स्वप्येकदा न भवतीति अनैकान्तिकी?। अर्थापत्तिमात्रस्य पक्षीकरणे ऽनैकान्तिकत्वमव्यापकम्-यदि तावदर्थापत्तिमात्रं पक्षयसि ततोऽर्थापत्तेरनैकान्तिकत्वमशक्यम्। अथानैकान्तिकी या सा पक्षीक्रियते? तदाभ्युपगमो वयमपि ब्रूमोऽनैकान्तिक्यप्रमाणमिति(१) हेतुश्च नास्ति—हेतोः प्रतिज्ञाविशेषणत्वात्—यदनैकान्तिकं तदप्रमाणमिति प्रतिज्ञा तत्र हेतुर्नास्ति, न चायमर्थः साध्य इति हेत्वभावः व्याघातश्चाभ्युपगमात्। याऽनैकान्तिक्यर्थापत्तिः सा प्रमाणं न भवतीति ब्रुवता ऐकान्तिकी सा प्रमाणमित्यभ्युपगतं भवति। अनर्थकं चेदमभिधानम्—याऽनैकान्तिक्यर्थापत्तिः सा न प्रमाणमिति॥

यामपि भवानर्थापत्तिं मन्यते साऽपि नानैकान्तिकी—

अनर्थापत्तावर्थापत्त्यभिमानात् ॥ ४ ॥

अनर्थापत्तावर्थापत्त्यभिमानात्। नेयमर्थापत्तिरनैकान्तिकी। अर्थापत्तिश्च सत्सु मेघेषु वृष्टिर्भवतीति। नेयमनैकान्तिकी कथं न सत्सु भवत्येवेति अपि तु सत्सु भवतीति। यत्तु सत्सु मेघेषु वृष्टिर्न भवतीति? कारणप्रतिबन्धोऽसौ, न तदर्थापत्तेः प्रमेयम्, किं त्वस्याः प्रमेयं कारणे सति (कार्यं) भवतीति। नेयमनैकान्तिकी कथं स्यात्। यद्यसत्यपि कारणे कार्यमुत्पद्यते तत्तु न दृष्टमिति न कदाचिदनैकान्तिकत्वम्॥

प्रतिषेधाप्रामाण्यं (वा) चानैकान्तिकत्वात् ॥ ५ ॥

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात्। योऽयं भवता प्रतिषेधः क्रियते अर्थापत्तिर्न प्रमाणम् अनैकान्तिकत्वात्—अयमप्यनैकान्तिकः सत्ताऽप्रतिषेधात् नानेन प्रतिषेधेनार्थापत्तेः

(१) ऐकान्तिकी प्रमाणमिति—पा० १ पु०।

सत्ता प्रतिषिध्यते । कथं न सत्ताप्रतिषेधः ? यस्मादर्थापत्तेर्विशेषः प्रतिषिध्यते नार्थापत्तिमात्रं तेन सत्ताऽप्रतिषेधादनैकान्तिको भवति । अथ मन्यसे न प्रतिषेधस्य सत्त्वं विषयः किं तु प्रमाणत्वम्, सोऽयं प्रतिषेधः स्वविषये प्रवर्त्तमानो नानैकान्तिको भवितुमर्हतीति ? । अनैकान्तिको हि नाम स ज्ञेयो यः स्वविषयतज्जातीयान्यवृत्तिः, न चानैकान्तिकत्वं प्रामाण्यप्रतिषेधेऽस्ति, तस्मान्नानैकान्तिकः प्रतिषेध इति ॥

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ ६ ॥

तत्प्रमाण्ये वा नार्थापत्त्यप्रामाण्यम् । यदि स्वविषयतज्जातीयान्यवृत्तिरनैकान्तिक इति मन्यसे ? अर्थापत्तिरपि तर्ह्यनैकान्तिकी न भवति, न ह्यसति कारणे कार्यमुत्पद्यमानं दृष्टमिति । तदिदं सूत्रं व्याघातदेशनार्थम् । यदुक्तं भवता स्वविषयादन्यत्र वर्त्तमानमनैकान्तिकं भवति अर्थापत्तिश्चानैकान्तिकीति व्याहतम् । अज्ञानं वा । अथाबुद्ध्वैवानैकान्तिकव्यवहारमिदमुच्यते अर्थापत्तिरप्रमाणमनैकान्तिकत्वादिति ? । तत्रोपेक्षया वर्त्तितव्यम्—नोन्मत्तवाक्यानि प्रतिपत्त्येयानीति ।

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ ७ ॥

नाभावः प्रमाणं विषयाभावात्—यदविषयं तदप्रमाणम्, यथा गोशब्दोऽश्वप्रतिपादने, तथा चाभावस्तस्मादप्रमाणम् ।

कश्चित्प्राहाभावः प्रमाणम्, अपि त्वभावविषया प्रतिपत्तिः प्रमाणम्, तया प्रमीयत इति । कः पुनरस्या विषयोऽभाव इत्युक्तम् । तत्रानेकधाभिन्नस्याभावप्रपञ्चस्योदाहरणार्थं सूत्रम्—

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयासिद्धेः(१) ॥ ८ ॥

---

(१) सिद्धिरिति २ पु० पा० ।

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः। अलक्षितानि वासांस्यानयेति प्रयुक्तः उभयसन्निधौ येषु वासःसु लक्षणानि न पश्यति तानि लक्षणाभावेनैव प्रतिपद्यते, प्रेषणसम्प्रतिपत्त्योरेकविषयत्वात्, प्रतिपद्य चानयति प्रतिपत्तिहेतुश्च प्रमाणम्। तस्मात् सिध्यत्यभावस्य प्रमेयम्॥

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः ॥९॥

असत्यर्थे नाभाव इति चेत्?—अथ मन्यसे यत्र यद्भवति तत्र तस्याभावो, न चालक्षितेषु वासःसु लक्षणानि भवन्ति, तस्मात्तत्र न भवन्तीति? नापरिज्ञानात्—न भवताऽस्मदभिप्रायोऽवोधि—न ब्रूमो यत्र यद्भवति तत्र तन्न भवतीति, अपि तु लक्षितानि वासांस्युपलभमान इतराणि लक्षणाभावविशिष्टानि प्रतिपद्यत इति। अयथार्थोऽयमुपालम्भः प्रयुज्यत इत्यत उक्तार्थं सूत्रम् नान्यलक्षणोपपत्तेरिति॥

तत्सिद्धेरलक्षितेष्वहेतुः ॥ १० ॥

तत्सिद्धेरलक्षितेष्वहेतुः। यानि तानि लक्षितेषु वासःसु लक्षणानि तानि न कस्यचिन्न सन्तीति यानि च सन्ति तेषामभावो व्याहतः? अत्रोक्तम् नापरिज्ञानादिति। अस्य चार्थस्य ज्ञापनार्थं सूत्रम्॥

न लक्षणावस्थितापेक्षसिद्धेः ॥ ११ ॥

न लक्षणावस्थितापेक्षसिद्धेः। न ब्रूमो यानि भवन्ति तेषां तत्राभाव इति। अपि तु केषुचिल्लक्षणान्यवस्थितान्यपेक्ष्य येषु तानि न भवन्ति तानि लक्षणाभावेन प्रतिपद्यत इति॥

प्रागुत्पत्तेरभावोपपत्तेश्च ॥ १२ ॥

प्रागुत्पत्तेरभावोपपत्तेः। अभावद्वैतं खलु भवति प्रागु-

त्पत्तेरविद्यमानता ऊर्ध्वं च विनाशादविद्यमानतेति । तत्र योऽयं विनाशादभावो लक्षणानामलक्षितेषु वासःसु सोऽनुपपन्नो नेतर इति । अप्रसर्थे नाभावस्तत्सिद्धेरलक्षितेष्वहेतुरिति उभं अप्येते छलसूत्रे । छलस्योक्तमुत्तरं ज्ञात्वाऽज्ञात्वा वाऽसम्बन्धत्वमज्ञानं वेति तस्मादप्रयोज्यं छलमिति ।

(प्रमाणचतुष्टुपरीक्षा ।)

"आप्तोपदेशः शब्द" इति प्रमाणमात्रे विशेषणं ब्रुवता नानाप्रकारः शब्द इति ज्ञाप्यते । कथं ? नासति भेदे विशेषणमर्थवत् न चानर्थकं विशेषणं युक्तमिति—युक्तो नानाभूतः शब्दो विशेषणसामर्थ्यादिति । तस्मिन् सामान्येन विचारो नित्योऽनित्यो वा, विचारः—परीक्षा—

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः ॥१.३॥(१)

विमर्शहेत्वनुयोगे च विप्रतिपत्तेः संशयः । विप्रतिपत्तिशब्दस्योक्तोऽर्थः । तत्राकाशगुणः शब्दः महत्त्ववदभिव्यक्तिधर्मक—एके तावद्ब्रुवते नित्यः शब्द इति अविनश्यदाधारैकद्रव्याकाशगुणत्वात्—यदविनश्यदाधारैकद्रव्यमाकाशगुणश्च तन्नित्यं दृष्टम्, यथाऽऽकाशमहत्त्वम्, तथा शब्दस्तस्मान्नित्य इति । सोऽयं नित्यः सन्नभिव्यक्तिधर्मा तस्याभिव्यञ्जकाः संयोगविभागनादा इति । गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मेत्यपरे—अपरे पुनर्ब्रुवते गन्धादिभिः सह सन्निविष्टः शब्दो गन्धादिवदेवाभिव्यज्यते तस्याभिव्यञ्जका भूतविशेषाभिघाता इति । आकाशगुणः शब्दः उत्पत्तिनिरोधधर्मेति

---

(१) विश्वनाथपञ्चाननमते नेदं सूत्रं किन्तु भाष्यम् । न्यायसूचीग्रन्थे तु " त्रयोदशभिः सूत्रैः " प्रमाणचतुष्टुप्रकरणमित्युक्तं किन्त्वदं सूत्रं न दृश्यते तत्र १२ सूत्राणि वर्तन्ते ।

वान्ये—अन्ये पुनर्वर्णयन्ति अनित्यः शब्द आकाशगुण उत्पत्तिनिरोधधर्मक इति । महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिनिरोधधर्मेति चापरे । अतः संशयः किमत्र तत्त्वमिति ।

अनित्य इत्येतत् तत्त्वम् । किमिदमनित्यत्वं नाम ? यतोऽनित्य इति भवति । किं पुनः तत् ? प्राक्प्रध्वंसाभावाविति के—एके तावद्वर्णयन्ति यस्य प्राक्प्रध्वंसाभावौ स्तस्तदनित्यमिति । तासम्बन्धात्—न हि प्राक्प्रध्वंसाभावाभ्यां भावः सम्बध्यत इति । अनुत्पन्नविनष्टयोश्च प्रसङ्गात् । यदि च प्राक्प्रध्वंसाभावावनित्यतेति मन्यसे ? अनुत्पन्ने वस्तुनि प्रागभावोऽस्ति ऊर्ध्वं च वस्तुनः प्रध्वंसाभावोऽस्ति इत्यसति प्राक्प्रध्वंसाभावेऽनित्यत्वेऽनित्यप्रत्ययः स्यात् । अनित्यस्य भावोऽनित्यतेति प्राक्प्रध्वंसाभावयोरभावत्वाद्भावशब्देनानभिधानम् । अनित्यं नाम यस्य नास्त्यन्यत्वं भावः तस्यानित्यस्य यो भावः सोऽनित्यता, प्राक्प्रध्वंसाभावौ च भावनिषेधौ न चाभावो भावाभिधानेन (अभिधातुं) शक्तं युक्तः । तस्मान्न प्राक्प्रध्वंसाभावावनित्यतेति । षष्ठ्यर्थश्च नास्ति "तस्य भावस्तत्त्वम्" इति तस्येति धर्म्यपदिश्यते, भाव इति धर्मिणो धर्मः न चाभावो धर्मः न च धर्मकाले तत्कल्पान्यो धर्मी विद्यते । न चाविद्यमानस्य षष्ठ्या योग इति । अथ यत् कदाचित् तस्माद्भूतं भवति ऊर्ध्वं च न (प्र)भवतीति मन्यसे ? एवमपि न किञ्चित् प्रतिपन्नम्, तथापि ब्रूमः यत् प्राक् न भवति तदूर्ध्वं न भवतीति । षष्ठ्यर्थस्तु पूर्ववन्नास्ति । घटस्य प्रागभावो घटस्य प्रध्वंसाभाव इति एतत् कथम् ? नात्र षष्ठ्या सम्बन्धोऽभिधीयते अपि तु प्रागिदं वस्तु नासीत् (नास्ति) पश्चाज्जातमित्यर्थः । ऊर्ध्वं च विनाशादिदं वस्तु न भविष्यतीति अनित्यमित्युच्यते

तस्य च भावोऽनित्यतेति । वर्तमाने चाऽसम्भवात् । यदि च प्राक्-प्रध्वंसाभावावनित्यतेति मन्यसे वर्तमाने वस्तुनि न प्रागभावो न प्रध्वंसाभाव इति अनित्य इत्यभिलापो न स्यात् । पाठकादिशब्दवदिति चेत् ?—अथ मन्यसे यथाऽमी पाठकादिशब्दास्त्रिकालविषयास्तथाऽयमनित्यशब्दस्त्रिकालविषयो भविष्यतीति ? । न, ण्वुलस्त्रिकालविषयत्वात् ण्वुल्प्रत्ययः त्रिकालविषयो दृष्टः पाठको भवति पाठको भविष्यति पाठकोऽभूदिति । त्यपः त्रिकालविषयत्वमिति चेत् ?—अथ मन्यसे त्यपोऽपि त्रिकालविषयत्वमिति ? तन्न नादर्शनात् न ह्यत्यनित्ये अनित्य इति प्रयोगं पश्यामः । तस्मात् त्यपस्त्रिकालविषयत्वमयुक्तमिति । अतो न प्रागभावप्रध्वंसाभावावनित्यतेति ।

विनाशहेतुभाव इत्यन्ये—अन्ये पुनर्ब्रुवते विनाशहेतोरस्तित्वमनित्यतेति । एतत्तु न युक्तमसति भावात् प्राग्विनाशहेतुभावात् अनित्यप्रत्ययो दृष्टः अनुपजातकपालविभागेषु घटादिषु । यदि विनाशहेतुभावोऽनित्यता स्याद्वर्तमानेषु घटादिषु न स्यात् । न ह्यसति ज्वरे ज्वरितप्रत्ययो दृष्टः विनाशहेतुभावाच्च विनाशहेतुरस्तीति युक्तः प्रत्ययो नानित्य इति । न हि गोत्वादश्वप्रत्ययो भवतीति । अथ मन्यसे यस्य विनाशहेतुरस्ति तद्विनाशवत् यद्यद्विनाशवत् तदनित्यमिति ? एतदपि न बुद्ध्यामहे यस्य विनाशहेतुरस्ति तद्विनाशवदिति, किन्तु यस्य विनाशहेतुरस्ति तद्विनाशहेतुमदिति युक्तं वक्तुम् । न चान्येन योगादन्यनिमित्तः प्रत्ययो युक्तः न हि दण्डयोगात् कुण्डलीति भवति । विनाशवच्छरीरमिति प्रयोगदर्शनाद्युक्तमिति चेत् ?—अथ मन्यसे विनाशवच्छरीरमिति दृष्टः प्रयोगो न चासति सम्बन्धे प्रयोगो भवितुमर्हति ? । न, मतुपोऽसत्त्वदर्शनात् नायं मतुप् क्वचिदप्यसत्सु

दृष्टो न ह्यसता कुण्डलेन कुण्डलीति भवति । न चासता विनाशेन सम्बन्धोऽस्ति तद्विनाशवच्छरीरमित्ययुक्तः प्रयोगः । दृष्ट इति चेत् ?—अथ मन्यसे दृष्टोऽयं प्रयोगो विनाश्येतच्छरीरमेतेऽध्रुवा विषया इति ?, नोपचारात्—विनाशीत्युपचारेण प्रयोगः विनाशो यस्यावश्यन्तया भविष्यति इति । अध्रुवा विषया इत्यनित्यतैवोच्यते, तस्मान्न विनाशहेतुभावोऽनित्यता ।

उपलब्धिलक्षणप्राप्तस्य अत्यन्ततिरोभावोऽनित्यतेत्यन्ये—अन्ये पुनरनित्यताशब्दार्थमन्यथा वर्णयन्ति यदुपलब्धिलक्षणप्राप्तं वस्तु तेनैवात्मनाऽत्यन्तं नोपलभ्यते तिरोभूतं तदनित्यमित्युच्यते ?। एतत्तु शून्यमभिधानम्, उपलब्धिलक्षणप्राप्तमत्यन्ततिरोभूतं नोपलभ्यत इति ब्रुवाणः सिद्धान्तं बाधते । न हि किञ्चिद्वस्त्वत्यन्तं नोपलभ्यत इति सिद्धान्तः । अनुपजातविशेषस्य च वस्तुनस्तिरोभावो न युक्त इत्यनेकधा वर्णितम् । तस्मादियमनित्यता न युक्ता ।

ये पुनर्वर्णयन्ति—स एव भावोऽभूत्वा भवन् भूत्वा चाभवन्ननित्य इत्युच्यते सा चावस्था भावप्रत्ययेनानित्यतेत्यभिधीयते ? । एतत् तु न युक्तम्, स्वार्थे भावप्रत्ययस्यादर्शनात्—न हि कश्चित् स्वार्थे भावप्रत्ययो दृष्टः । विनयादिवदिति चेत् ? न, अनभ्युपगमात् । ननु च "विनयादिभ्यष्ठग"िति स्वार्थे प्रत्ययो दृष्टः विनय एव वैनयिकमिति ? नानभ्युपगमात् । नायं स्वार्थे प्रत्ययोऽपि तु विनयेन योगो वैनयिकमित्युच्यते एवं सर्वत्र द्रष्टव्यम् । अनुपलभ्यमानभेदानामप्यनुमानतो भेदोऽनुमेयः—यांश्चापि भवाननुपलभ्यमानभेदान् प्रत्ययान् स्वार्थे मन्यते तेष्वप्यनुमानतो भेदोऽनुमेयः । किमनुमानं ? षष्ठ्या भेदविषयत्वं—सर्वा षष्ठी भेदविषये दृष्टेति यथा चानर्थान्तरे षष्ठी

नास्ति तथोक्तं गुणगुणिभाववाद इति ।

तत्किमिदानीमनित्यत्वेऽयं शब्दोऽनभिधेय एव ? नानभिधेयः अवध्यपेक्षानपेक्षाभेदात् सत्त्वोभयथा—योभयान्तपरिच्छिन्नवस्तुसत्ता साऽनित्यतेति । या तूभयान्तानवच्छिन्नवस्तुसत्ता सा नित्यता । यथा समवाय एकः सन् कार्येण विशिष्यमाणः कारणत्वमभिधीयते कारणेन विशिष्यमाणः कार्यत्वमिति च । कथमिति ? कारणमित्ययं प्रत्ययो नानिमित्तकः कदाचिद्भावात् न च वस्तुनिमित्तोऽवस्तुप्रत्ययः व्यतिरेकित्वात् । न च सत्तातो वैलक्षण्यात् । सत्तातः सदिति स्यात् । अयं तु सत्ताप्रत्ययाद्विलक्षणस्तस्मान्न सत्तातः । इहविशेषणनिमित्तत्वाच्च सम्बन्धनिमित्त—इह तन्तुषु पट इत्याधारविशिष्टः प्रत्यय उपजायते । न चासति सम्बन्धे इहप्रत्ययेन शक्यं भवितुम् यतोऽयमिहप्रत्ययः स समवायः कार्यसमवाये सति कारणत्वमभिधीयते । यस्य गुणस्य योगात्तस्मिन्नर्थे शब्दनिवेशस्तदभिधाने त्वतन्त्रो । कार्यसमवायस्य भावादेतद्भवतीति कार्यसमवायः कारणता । एतेन कार्यत्वं व्याख्यातम् । कार्यात्मलाभहेतुः समवायः कारणविशिष्टः कार्यत्वं यथा समवाय एवं सत्तापेक्षा सती उभयान्तपरिच्छिन्नवस्तुसम्बन्धित्वेनानित्यतेत्युच्यते विपर्ययान्नित्यतेति । एतयाऽनित्यतया योगादनित्यः शब्द इति ॥

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुप-
चाराच्च(१) ॥ १४ ॥

आदिमत्त्वादादिः योनिः कारणमिति, कारणवत्त्वादनित्य इति सूत्रार्थः । किं पुनरिदं कारणवत्त्वं नाम ? निमित्तकारणभेदानुविधानमुत्पत्तिधर्मकत्वं तदभिव्यङ्ग्येषु नास्ति । न

(१) कृतकादुपचाराच्चेति विश्वनाथसम्मतः पाठः ।

हि किञ्चिदभिव्यज्यमानं निमित्तकारणभेदानुविधायि दृष्टमिति। संयोगविभागानन्तरमुपलब्धेः सन्देह इति चेत्?—अथ मन्यसे संयोगविभागानन्तरमुपलभ्यते शब्दः, सा च तदनन्तरोपलब्धिर्व्यज्यमानस्यापि युक्ता, अतः सन्देहः किमयं संयोगविभागाभ्यां व्यज्यते अथ क्रियत इति?। न व्यज्यते ऐन्द्रियकत्वात्।

किमिदमैन्द्रियकत्वम्? इन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकमिति। ततः किं? यदीन्द्रियप्रत्यासत्तिग्राह्यमैन्द्रियकं ततो न व्यज्यते। न हि व्यज्यमानस्येन्द्रियेण प्रत्यासत्तिर्युक्ता। कथमिति? न श्रोत्रं तावच्छब्ददेशमुपगच्छति अमूर्त्तत्वात्—यदमूर्त्तं तन्निष्क्रियं यथा रूपादि, अमूर्त्तं चाकाशं तस्मान्निष्क्रियमिति। क्रियाकारणगुणसमवायात् क्रियावत्त्वमिति चेत्?—अथ मन्यसे यत्र क्रियाकारणं गुणो वर्त्तते तत् क्रियावद्दृष्टं यथा लोष्टम्, तथा चाकाशं, तस्मादेतदपि क्रियावदिति?। नानैकान्तात्। क्रियाकारणं च गुणः आत्मनि, न क्रियावानात्मा इत्यनैकान्तः विद्यमानस्यापि न क्रियावत्त्वं(१) महत्परिमाणप्रतिबन्धात्—विद्यमानोऽप्याकाशेऽभिघातो न क्रियाहेतुः महत्परिमाणप्रतिबन्धात्। यदाकाशे वर्त्तते महत्त्वं तेनैकार्थसमवेतेन तद्वृत्तिरभिघातः प्रतिबध्यत इति। यथा लोष्टगुरुत्वं तदेकार्थवृत्तिना संयोगेनेति। संयोगप्रतिबन्धात् गुरुत्वस्य सापेक्षत्वप्रसङ्ग इति चेत्?—अथ मन्यसे यदि संयोगेन प्रतिबध्यमानं गुरुत्वं न क्रियामारभते तत्प्रतिबन्धापगमापेक्षमारभत इति? नन्वेवं गुरुत्वं सापेक्षं क्रियाकारणमिति प्राप्तम्, एवं च शास्त्रव्याघातः निरपेक्षं गुरुत्वं कर्मकारणमिति हि शास्त्रम्?। न, निरपेक्षस्यान्यथा व्याख्यानात्—नायं निरपेक्षस्यार्थो गुरुत्वं न

(१) क्रियाहेतुत्वम्—पा० १ पु०।

किञ्चिदपेक्षत इति, अपि तु चरमभाविनिमित्तान्तरं नापेक्षत इति, निरपेक्षं गुरुत्वं कर्मकारणमिति नास्ति व्याघातः। तथा च शास्त्रं "संयोगाभावे गुरुत्वात् पतन"मिति(१)। विषयाभावाच्च—न क्रियाकारणसमवायमात्रं क्रियावत्त्वे हेतुः, अपि तु क्रियाकारण(गुण)समवाये सति मूर्त्तिः। यदि क्रियाविषयो मूर्त्तिर्भवति क्रियाकारणं गुणोऽप्रतिबद्धो भवति तदा क्रियोत्पद्यत इति। तस्मादक्रियावत्त्वादाकाशं न गच्छति शब्दोऽपि न गच्छति निष्क्रियत्वादेव। न चाप्राप्तस्य ग्रहणमस्ति सर्वशब्दोपलब्धिप्रसङ्गात्। परिशेषात् तु सन्तानसिद्धिः तत्राद्यः शब्दः संयोगविभागहेतुकः तस्माच्छब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि, तेभ्यः प्रत्येकमेकैकः शब्दो मन्दतरतमादिन्यायेनाश्रया(२) प्रतिबन्धमनुविधीयमानः प्रादुरस्ति। ततोऽन्त्यस्यातिमान्द्याच्छब्दान्तरोत्पत्तिशक्तिविघातो येन केनचित् प्रतिबन्धात्कुर्वतीति। अतः शब्दसन्तानोच्छेदः तत्र यः कर्णशष्कुलीमन्तमाकाशदेशं प्राप्नोति स उपलभ्यते नेतर इति तस्मादेन्द्रियकत्वं, तच्चान्यथा न युक्तमित्यतोऽनित्य इति।

एक एवेति चेत्? न, सर्वोपलब्धिप्रसङ्गात्—अथ मन्यसे नैव शब्दान्तराणि यथाऽभ्युपगम्यन्ते, अपि त्वेक एवायं शब्दो विततस्याकाशमवतिष्ठते, स संयोगविभागाभ्यामभिव्यक्तः सन्नुपलभ्यते यथा घटाद्यपवरकाद्यवस्थितं प्रदीपसंयोगेनेति?। तच्च न, सर्वोपलब्धिप्रसङ्गात् यद्येकः शब्दो विततव्यावस्थितः संयोगेनाभिव्यक्तः श्रोत्रवतोऽर्थे प्रत्ययं करोतीति मन्यसे? तदा येन केनचित्प्र ऽकुत्रावास्थितेन शब्दो व्यक्त इति सर्वैः श्रोत्रवद्भिरुपल-

(१) वै० सू० ७ अ० ५ आ० १। (२) तमादिभावेनाश्रया—पा० ३ पु०।

भ्येत, न चोपलभ्यते तस्मात् कल्पनेयम्। एकदेशाभिव्यक्तिरिति चेत्? न किमः तादात्म्यातादात्म्यानुपपत्तेः। अथ मन्यसे सत्यं विततत्वादवस्थितः तस्य त्ववस्थितस्यैकदेशो निमित्तेनाभिव्यज्यत इति? । न किमस्तादात्म्यातादात्म्यानुपपत्तेः। यांस्तानेकदेशान् शब्दस्य मन्यसे ते किं शब्दात्मका आहो नेति! किञ्चातः? यदि शब्दात्मकास्ततोऽनेके शब्दा इति व्याघातः। अथाशब्दात्मकाः? न तदा शब्दादर्थप्रत्यय इति प्राप्नोति। तेषां स्वभावश्च वक्तव्यः(१)। शब्दस्याकाशवृत्तित्वादेकदेशार्थानभिधानाच्च। एकदेश इति समासपदमेतत् एकश्चासौ देशश्चेति। तत्र देशशब्द आधारार्थः कारणार्थो वा?। तत्राधारार्थस्तावन्न युक्तः शब्दस्याकाशवृत्तित्वात्—आकाशवृत्तिः शब्दस्तद्गुणत्वात् तस्मादाकाशव्यतिरिक्तो नाधार इति। कारणार्थोऽपि नास्ति अकृतकत्वाभ्युपगमात् अकृतकः शब्द इति स्वयं प्रतिपद्यमाना भवन्तो नार्हन्ति वक्तुं कारणमेकदेश इति। न चान्य एकदेशार्थः सम्भवतीति शून्यमभिधानमेकदेशः शब्दस्य व्यज्यते इति। एकदेशाभिव्यक्तौ चार्थप्रत्ययो न स्याद्वर्णवत्, वर्णाः सर्वे एव व्यापका भवन्तीति। एतस्मिन् पक्षे वर्णैकदेशव्यक्तिः, न च वर्णैकदेशः शक्यो निरूपयितुम्। न च निरूपितादपि तस्मादर्थप्रत्ययो भवति वर्णानामर्थप्रत्यायनानभ्युपगमात्। वर्णा अपि तावदेकैकशोऽर्थप्रत्यायका न भवन्ति कुतस्तदेकदेशा इति।

एतेन बहुत्वं प्रत्युक्तम्। यथैकस्य व्यक्तौ (२) दोष एवमनेकशब्दस्यापि व्यापित्वे दोषाः कोलाहलश्च स्यात्।

(१) विप्रोक्तव्यः—पा० ६ पु०। (२) व्याप्ताविति सम्भाव्यते।

यदि चानेकशब्दा आकाशे वर्तन्ते युगपदिति प्र-
तिपद्यसे ? एकशब्दाभिव्यञ्जकोपादाने समानदेशानां शब्दानां
(१) व्यक्तिरिति कोलाहलः स्यात् । यथा मल्लनटगणेषु
प्रयोग(झङ्कारा)कारणातिशया(२)वर्जितेषु नदत्सु भवति,
तस्मान्नानेको व्यापक इति । नियमश्च न स्यात्—यदि चाने-
के शब्दा युगपदाकाशे वर्तन्ते इति—एवं च यत्किञ्चिद्व्य-
ञ्जकमुपात्तं समानदेशान् सर्वानभिव्यनक्तीति यदा वी-
णा वाद्यते तदा शङ्खध्वनिरपि श्रूयेत । न हि समाने-
न्द्रियग्राह्याणां समानदेशानां व्यञ्जकेषु नियमो दृष्टः । य-
द्यस्य व्यञ्जकं तेन तस्य व्यक्तिरिति चेत् ? तस्यादृष्टत्वात् ।
अथ मन्यसेऽनेकशब्दसन्निपाते सति व्यञ्जकानि भिद्यन्ते व्य-
ञ्जकभेदानुविधायिन्यो व्यक्तयः प्रतिशब्दमुपजायन्त इति ?
तस्यादृष्टत्वात्—न हि समानदेशानामेकेन्द्रियग्राह्याणां व्यञ्ज-
केषु नियमो दृष्टः । न हि प्रदीप एकेन्द्रियग्राह्यमनेकमर्थं
युगपत् सन्निपतितं न प्रकाशयति । सामान्यवदेतत् स्या-
दिति चेत् ? नानभ्युपगमात् । अथ मन्यसेऽनेकार्थसन्निपाते
सति सर्वाभिर्व्यक्तिभिः सामान्यानि सम्बद्धान्यनेकार्थसम्बन्धे
सत्यपि सामान्यस्य केनचिदर्थेन किञ्चित्सामान्यं व्यज्यत
इति एवमनेकसन्निपाते सति किञ्चिद्व्यञ्जकं कञ्चि-
च्छब्दं व्यनक्तीति ? तस्यानभ्युपगमात् । सामान्यमनेकेन
भिन्नजातीयेनार्थेन सम्बध्यत इति नाभ्युपगम्यतेऽपि तु
स्वविषयसर्वगतं सामान्यं गोत्वं गोष्वेव नाश्वादिषु, अ-
श्वत्वमश्वेष्वेव न गवादिषु, तस्माद्विषमोऽयं दृष्टान्तः । व्य-
ञ्जकाभावे चोपलब्धेर्न व्यज्यते शब्दः । यदि च सं-

(१) पदानां—पा० २ पु० । (२) कारणातिशया—पा० ६ पु० ।

योगविभागाभ्यां व्यक्तः शब्द उपलभ्यत इति मन्यसे ? सो-
ऽपि संयोगाभावे नोपलभ्येत, उपलभ्यते च दारुव्र-
श्चने दारुपरशुसंयोगनिवृत्ताविति । अभिघाताद्वायुरिति चे-
त् ? अत्रोक्तम्, अथ मन्यसे दारुपरश्वोरभिघाताद्वायुर्जायते,
स वायुः सन्तानवृत्त्या वर्त्तते, सन्तानवृत्त्या वर्त्तमानः कर्ण-
शष्कुलीसन्तमाकाशं प्राप्नोति, तत्प्राप्तौ तत्रस्थः शब्दो
गृह्यत(१) इति ? अत्रोक्तम्—यथैकः शब्दः कर्णशष्कुलीसमा-
काशदेशे वर्त्तते तथा सर्व एव शब्दा वर्त्तन्त इति यत्-
किञ्चिद्व्यञ्जकमुपात्तं यस्य कस्य चिच्छब्दस्य व्यञ्जकं स्यादि-
ति सर्वशब्दोपलब्धिप्रसङ्गः । नियमश्च न स्यात् निमित्तस-
न्निधाने च सर्वत्रोपलब्धेः न व्यज्यते—यत् खलु व्यज्यते
तन्निमित्तसन्निधाने सति न सर्वत्र व्यज्यमानं दृष्टम् यथा
घटार्थिनो बिभ्राणाः प्रदीपं घटादिरहितानपवरकादीन् प्र-
विश्य न घटादीनुपलभन्त इत्यभिव्यक्तिं घटादीनां(२)प्रतिप-
द्यन्ते । न पुनस्ताल्वाद्यभिघातसन्निपाते सति क्वचिदपि
शब्दाश्च प्रतीताः तस्मान्न व्यज्यन्त इति । सर्वत्र सन्ती-
ति चेत् ? नोक्तोत्तरत्वात् । अथ मन्यसे सर्वैकदेशवृत्तयः
शब्दास्तं सत्त्व(३)मुपालम्भोऽस्माकं तु सर्व एव व्यापका
(४)स्तस्मान्नैष दोष इति ? नोक्तोत्तरत्वात् उक्तोत्तरमेतद्वाक्यं
न पुनः प्रतिसमाधानं प्रयोजयतीति तस्मान्न व्यज्यत इति ।
नादोपलब्धौ च विप्रकृष्टदेशावस्थितेन नादसमानदेशशब्दानु-
पलब्धेर्न व्यञ्जको नादः । एतेन वायवीयाः संयोगवि-
भागा व्यञ्जका इति प्रत्युक्तम् ।

(१) व्यज्यत—पा० २ पु० । (२) अभिव्यक्तिं घटादीनां—पा० ६ पु० ।
(३) प्रति अत्रामातिच्छेदः । (४) सर्वत्र व्यापकाः—पा० १ पु० ।

कृतकवदुपचाराच्च तीव्रं मन्दमिति कृतकमुपचर्यते तीव्रं सुखं मन्दं सुखमिति उपचर्यते च तीव्रः शब्दो मन्दः शब्द इति। अत्र च प्रयोगः। अनित्यः शब्दः तीव्रमन्दविषयत्वात् सुख-दुःखवदिति कृतकवदुपचारादित्यनेन सूत्रेण सर्वानित्यत्वसाधनधर्म-संग्रहः कृतकत्वग्रहणस्योदाहरणार्थत्वात् यथा सामान्यविशेषवतो-ऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् उपलभ्यस्यानुपलब्धिकारणाभावे सत्यनुपलब्धेः गुणस्य सतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वात् इ-त्येवमादि। तीव्रशब्दस्य तीव्रार्थविषयत्वं न शब्दादिवि-षयत्वमिति चेत्? अथ मन्यसे तीव्रशब्देन तीव्रार्थोऽभि-धीयते न शब्दः, न चान्यविषयः शब्दोऽन्यस्यार्थस्य प्रति-पादक इति? न, शब्दशब्देन समानाधिकरणस्य तीव्रशब्द-स्याभिधानात्। सत्यमयं तीव्रशब्दः केवल उच्चारि-तो द्रव्यगुणकर्मणां समानधर्मं प्रतिपादयति, शब्द-शब्दोऽप्युच्चरितोऽर्थप्रयोगिनं शब्दमभिधत्ते। यदा पुनरेतौ तीव्र-शब्दशब्दौ विशेषणविशेष्यभावापन्नावभिधीयेते तदा तीव्रशब्दे-न धर्मान्तराणि व्यवच्छिद्यन्ते शब्दशब्देन धर्म्यन्तराणीति उभयशब्दप्रयोगात् शब्दो गम्यते तस्मादुपपन्नं तीव्रशब्दविष-यत्वादनित्यः शब्द इति। व्यञ्जकस्य तथाभावात् ग्रहणस्य तीव्रमन्दता रूपवदिति चेत्? नाभिभवोपपत्तेः। उक्तं भाष्ये। ग्रहणं निमित्तभेदानुविधायीति चेत्? न ग्रहणभेदस्यैकत्राऽदृष्टत्वा-त्। अथ मन्यसे न शब्दो भिद्यते शब्दे त्वभिन्ने ग्रहणं निमि-त्तभेदानुविधायि भवति ग्रहणभेदाच्चाभिमान इति? न ग्रहण-भेदस्यैकत्राऽदृष्टत्वात्—यद्यभिन्नः शब्दो ग्रहणभेदो न प्राप्नोति न चाभिन्ने ग्रहणभेदं विषये पश्यामः। अथाभिन्नेऽपि विषये ग्रहणानि भिद्यन्त इति मन्यसे? नित्यं ग्रहणभेदः स्यात्, ततश्च

भिन्नोऽभिन्न इति भिन्नाभिन्नप्रत्ययौ न स्याताम् । अभिभवानुपपत्तिश्च ग्रहणयोर्युगपदसम्भवात् न हि ग्रहणे युगपद्भवतः । न चैकं ग्रहणमात्मन एवाभिभावकं न चायमभिभवो नास्ति तस्माद्भिद्यते शब्दः ।

अभिभवानुपपत्तिश्च व्यञ्जकसमानदेशस्याभिव्यक्तौ साम्याभावात्—व्यञ्जकेन समानदेशोऽभिव्यज्यत इति एतस्मिन् पक्षे नोपपद्यते ऽभिभवः, कस्माद्व्यञ्जकसमानदेशत्वात्—न हि व्यञ्जकसमानदेशेनाप्राप्तः शब्दोऽभिभवितुं शक्यः अप्राप्तस्यापि न प्राप्तमभिभावकं भवति (अस्ति) । अथाप्राप्तमप्यभिभावकं भवतीति मन्यसे ? वीणाशब्दानामश्रवणप्रसङ्गः । अप्राप्ताः शङ्खादिशब्दाः अभिभावका इति न कदाचिद्वीणादिशब्दाः श्रूयेरन् । सर्वत्र सन्तीति चेत् ? न पूर्वदोषानुवृत्तेः । अथ मन्यसे यो-ऽभिव्यञ्जकसमानदेशं शब्दमभ्युपैति तस्यैष दोषः अस्माकं तु सर्व एव शब्दाः समानदेशाः तस्माददोषोऽयमिति ? न पूर्वदोषानिवृत्तेः समानदेशत्वे शब्दानां व्यञ्जकेषु नियमो नास्तीति यत्किञ्चिद् व्यञ्जकमुपात्तं सर्वशब्द(व्य) व्यक्तिहेतुरिति पूर्वदोषानिवृत्तिरिति । समानदेशत्वे च वीणावेणुशब्दानां शङ्खशब्देन वीणावेणुशब्दयोरभिभव इति वीणादिशब्दाश्रवणप्रसङ्गः । तस्माच्छब्दा एव भिद्यन्त इति । तेषां च भिन्नानां समानदेशत्वे सति ये कर्णशष्कुलीप्रत्यासन्नदेशे युगपत् समवयन्ति तत्र यः पटुः शब्दः स इतरस्याभिभावक इति । अभिभवश्च नाम मन्दस्य पटीयसां ग्रहणादग्रहणमिति । यदि च सन्तानवृत्तिः शब्दः कर्णशष्कुलीपराकाशदेशं प्राप्तश्च गृह्यते ? दिग्देशप्रत्ययो न प्राप्नोति पूर्वेण शब्द उत्तरेण शब्द इति । न हि विषयेषु प्रत्यासीदत्सु दिग्देशप्रत्ययो दृष्टः गन्धादिवदिति ? । नोपादाननिमि-

सत्वाद्दिग्देशव्यपदेशस्य—योऽयं शब्देषु दिग्देशव्यपदेशो नायं शब्दनिमित्तः पूर्वापरादिभिन्नेभ्यो निमित्तेभ्य उपजायमानाना-मेकदेशग्रहणात् तुल्यो दिग्देशव्यपदेशः स्यात् । तस्मान्न शब्द-निमित्तः । कुतस्तर्ह्ययं भवतीति वाच्यम् ? निमित्तभेदात्—यानि निमित्तानि शब्दकारणस्य संयोगस्यानुग्रहकारीणि दिग्देशवन्ति तेषां निमित्तानां भेदाद्दिग्देशप्रत्यया इति । य उपलभ्यमाननि-मित्ताः शब्दास्तेषु तद्युक्तं येषां तु शब्दानां निमित्तानि नोपलभ्यन्ते तेषु दिग्देशप्रत्ययो न युक्तः ? न न युक्तः शब्दसन्तानस्य निमित्तभेदाभिमुख्येनादौ प्राप्तेः—यः शब्दसन्तानो यस्मान्नि-मित्तादुपजायते स समन्तात् शब्दान्तराणि सन्तनोति । तत्र यः शब्दविशेष आदौ कर्णशष्कुलीमत आकाशदेशस्य तदभिमुखेन भागेन सम्बद्ध्यते तन्निमित्तः पूर्वापरादि(शब्द)व्यपदेशः इति । यदा पुनराद्यशब्दपरिच्छेदो नास्ति तदा विपर्यय इति ।

एके तु ब्रुवते—नैव शब्देषु दिग्देशप्रत्ययाः सन्ति । कुतः ? चक्षुर्विषयसिद्धौ दिग्देशाध्यवसायात्(१)—तथाहि जात्यन्धानां पूर्वापरादिप्रत्ययाः शब्दे न सन्तीति । अपरे तु दिग्देशव्यपदेशेन चक्षुःश्रोत्रे अप्राप्यकारिणी इति ब्रुवते । तेषामुक्तमुत्तरं प्रत्यक्षसूत्रं वर्णयद्भिरिति ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्य-वदु(२)पचाराच्च ॥ १४ ॥

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च । सूत्रस्य पूर्वहेतुनामनैकान्तिकत्वज्ञापनमर्थः । शेषं भाष्ये ।

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः॥१५॥

(१) देशाध्यवसायात्—पा० १ पु० ।

(२) नित्येष्वनित्यवदिति क्वचित् ।

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः । नित्यत्वमित्यत्र किं तावत् तत्त्वम् ? । उभयान्तापरिच्छिन्नवस्तुसत्तासंस्पर्शः(१) इति । विपर्ययादनित्यत्वमेतच्चाभावे नास्ति । भाक्तं तु तद्भवति नित्य इव नित्यो घटाभाव इति । न पुनर्नित्य एव कालद्वयाननुभवात् । प्रध्वंसाभावो न प्रागस्ति न घटकाले ऽस्ति प्रागभावो न घटकाले न प्रध्वंसकाल इति। कथं तर्हि? नित्य इव नित्य इत्युच्यते भक्त्या । का पुनरियं भक्तिः ? प्रागभावस्य कारणाभावः प्रध्वंसाभावस्य विनाशाभावः उभयं चैतन्नित्यविषयं इत्येतत्सामान्यान्नित्य इव नित्यो न पुनर्नित्य एवेति इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियक इति ॥

सन्तानानुमानविशेषणात् ॥ १७ ॥

सन्तानानुमानविशेषणादव्यभिचारः । न वयमैन्द्रियकत्वादित्यनेनानित्यत्वं प्रतिपादयामोऽपि तु शब्दस्याभिव्यक्तिं प्रतिषेधामः । न हि व्यज्यमानस्यैन्द्रियकत्वं युक्तमिति पुरस्तादुक्तम् ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार (इति)(२) ॥ १८ ॥

कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वव्यभिचारः(३)। न हि नित्यानां द्रव्याणां प्रदेशशब्देन कारणमुच्यते । आकाशस्य प्रदेश आत्मनः प्रदेश इति नाकाशात्मनोः कारणद्रव्यमभिधीयते यथा कनकस्य । किमिति नाभिधीयते ? अविद्य-

(१) पाठोऽयं मुद्रितभाष्यपुस्तके स च प्रामादिकः वार्त्तिकन्यायसूचीनिबन्धविरोधात् ।

(२) व्यभिचारात्—पा० ६ पु० ।

(३) सम्बन्धः—पा० १ पु० ।

मानत्वात्—न हि विद्यमाना आकाशादेः प्रदेशा इति । कथं न विद्यन्ते ? प्रमाणतोऽनुपलब्धेः—यद्याकाशादेः प्रदेशाः स्युः प्रमाणत उपलभ्येरन्निति । कथं प्रमाणतोऽनुपलब्धिः? विकल्पानुपपत्तेः—प्रदेशशब्देन कारणं वाभिधीयते आधारो वा न कारणमकृतकत्वात् यस्मादकृतकमाकाशमतो न कारणार्थः प्रदेशशब्देनोच्यते । नाधारोऽनाश्रितत्वात् अनाश्रितमाकाशं तस्याधारार्थो न शक्यो वक्तुमिति । लोकविरोध इति चेत् ? नान्यथा तदुपपत्तेः—यद्याकाशं निष्प्रदेशं प्रतिपद्यसे ननु लोको विरुध्यते पूर्वभागेन व्याप्त आदित्य इति ? । नान्यथा तदुपपत्तेः संयोगस्याव्याप्यवृत्तित्वे प्रदेशशब्देनाभिधीयमाने न लोकविरोधो यस्माद्यत्संयोगस्याव्याप्यवृत्तित्वं तत्प्रदेशशब्देनाभिधीयते । एतच्च प्रदेशवता द्रव्येणाकाशस्य सामान्यम् । ये (खलु परिच्छिन्ने) अविभागिनश्च आमलकादिके प्रवृत्तस्तयोर्यः संयोगो वर्तते स ते न व्याप्नोति प्रदेशवती च ते । आकाशसंयोगोऽपि नाकाशं व्याप्नोतीति प्रदेशवद्द्रव्यसामान्यात् प्रदेशवदाकाशमिति भाक्तः प्रयोगः । का पुनरियं भक्तिः ? अतथाभूतस्य तथाभाविभिः सामान्यमुभयेन भज्यत इति भक्तिः । एतस्मात् सामान्यादध्यारोपितप्रदेशवृत्तिः प्रदेशशब्दः यस्मादाकाशस्य प्रदेशवद्भिर्द्रव्यैः सामान्यं संयोगस्याव्याप्यवृत्तित्वमस्यातः प्रदेशशब्दोऽप्याकाशे प्रयुज्यत इति । एवमेतत् न तत्त्वतः । कुत इति चेत् ? न प्रमाणतोऽनुपलब्धेः । अथ मन्यसे आकाशप्रदेशाः प्रदेशवद्द्रव्यसामान्यादाकाश उपचर्यन्ते न पुनस्तत्त्वतस्तदस्तीति(१) न प्रमाणमस्ति ? न प्रदेशस्य प्रमाणतोऽनुपलब्धेः । न ह्याकाशादेः प्रदेशमति-

(१) सन्तीति—पा० १ पु० ।

यादकं प्रत्यक्षादि प्रमाणं सम्भवतीति । स्वरूपेणानभिधा-
नाच्च । यद्याकाशस्य प्रदेशाः स्युः ते स्वरूपेण व्यपदि-
श्येरन् यथा पटस्य प्रदेशाः । के ? तन्तवः, न पुनराकाशस्य
प्रदेशाः के इत्युक्ते स्वरूपेण व्यपदेष्टुं शक्या इति ।
क्रियोऽनुपपत्तिश्च पूर्ववत् । याँश्चाकाशप्रदेशान् भवान् मन्यते ते
किमाकाशात्मका उत नेति ! किं चातः ? यद्याकाशात्मका
अनेकमाकाशमिति प्राप्तम् । अथ न ! तेषां स्वभावो वक्त-
व्यः ? कथं च ते तस्य प्रदेशा इति वक्तव्यम् ? । अनाका-
शात्मकाः सन्तः आकाशस्य प्रदेशा इति केनार्थेनाभिधीय-
न्ते ? तद्यथा तन्तवः पटस्य प्रदेशा इत्युक्ते कारणार्थ आधा-
रार्थश्च गम्यते न पुनराकाशस्य प्रदेशेष्वेतदस्ति । प्रदेशाभावाद्-
नाधारः संयोग इति चेन्नानाधारः आकाशवृत्तित्वात् । अथ
मनुषे यद्याकाशदेशा न सन्ति आकाशदेशाश्रयः संयोगो-
ऽनाधारः ? न अनाधारः आकाशवृत्तित्वात् । यस्मात् त्वयै-
वोच्यते आकाशाश्रय इति, तस्मान्नानाधार इति । समानदे-
शा इति चेत् ? नाभावनात् । अथ मन्यसे मूर्तिमद्द्रव्यसं-
योगा ये आकाशदेशे वर्तन्ते ते प्रदेशाभावात् सर्व एव
समानदेशाः प्राप्नुवन्ति इति । एवं च समानदेशत्वे सति न
किञ्चिद्व्याप्यत इति । तदेवं प्रदेशवद्द्रव्यसामान्यादाकाशप्रदेश
इति भाक्तः प्रत्यय (प्रयोग) इति । निष्प्रदेशत्वात् सर्वेण सर्वश-
ब्दोपलब्धिप्रसंग इति चेत् ? न उक्तोत्तरत्वात् । अथ मनुषे
यदि निष्प्रदेशमाकाशं तेन तर्हि सर्व एव शब्दाः समानदेशा
इति सर्वैः सर्वः शब्द उपलभ्येत, न तूपलभ्यते, तस्माद्-
न्यान्यवृत्तयः शब्दाः सर्वैरग्रहणादङ्गुलिरूपादिव(१)दिति ? ।

(१) संयोगात्—पा० ६ पु० ।

एतच्च न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत्—यथा संयोगस्याव्याप्यवृत्तित्वं तथा शब्दस्यापीति ।

गुणत्वादव्यापकमित्येके—एके गुणत्वाद्धेतोः शब्दसंयोगाद्यङ्गुलिरूपवदव्यापकं प्रतिपद्यन्ते । न एवं सत्यव्यापकत्वमिति कोऽर्थः? यद्याश्रयवृत्तित्वव्याप्तिः(२)न किञ्चिद्बाध्यते । अथान्यत्तन्नास्ति । वयं तु व्याप्तिमङ्गुलिरूपस्याश्रयोपलब्ध्योपलब्धिं ब्रूमः न पुनः शब्दादय आश्रयोपलब्धावुपलभ्यन्ते तस्मादङ्गुलिरूपवन्न व्यापका इति । समुदितस्थानानामेकसमुदायस्योपलब्धावुपलब्ध्यनुपलब्धी व्याप्त्यव्याप्ती एकाश्रयाणामाश्रयोपलब्धाविति । अथ य आकाशे मूर्तिमतां संयोगास्तेषां कांश्चित् केचित् कृतकान् प्रतिपद्यन्ते कांश्चिदकृतकानिति । तत्र कार्यद्रव्यसंयोगः कृतकः संयोगजत्वादुत्पद्यमानस्य कारणसम्बन्धिभिः कार्यस्य संयोगजः संयोग इति । क्रियाजं तु केचिन्नेच्छन्ति यावद्द्रव्यभावित्वात् संयोगस्य अविभक्तस्य संयोगो नास्तीति नास्त्याकाशे क्रियाजः संयोग इति । अण्वाकाशसंयोगमकृतकमिच्छन्ति । तत्रैवाकाशसंयोगस्य तावत् कृतकत्वेऽनुमानम् आकाशेन कृतकसम्बन्धेन सम्बन्धी परमाणुर्मूर्तिमत्त्वादिभ्यो घटादिवदिति । कार्याकाशसंयोगो विप्रतिपत्तिविषयो न यावद्द्रव्यभावी अविनश्यदाधारत्वे क्रियावद्द्रव्यवृत्तित्वे सत्यप्राप्तिपूर्वसम्बद्धत्वात्(१)मूर्तिमदितरसंयोगवत् । तस्मात् कार्यद्रव्येणाकाशस्य संयोगजः संयोगः क्रियाजश्च परमाणोस्तु क्रियाज इति । विप्रतिपत्तिविषया विभागिनः आकाशादयः क्रियावद्द्रव्यसंयोगित्वात्(२)

(१) प्रतिसम्बन्धित्वात्—पा० १ पु० ।

(२) क्रियावद्द्रव्यसंयोगित्वाद्विभागिनश्च संयोगवत्—पा० ६ पु० ।

परमाणुवत् । यथा परमाणोः क्रियावद्द्रव्यसंयोगा अयाव-द्द्रव्यभाविनः, संयोगत्व(१)च्छब्दबुद्ध्यादयश्चात्मन्यव्यापकाः संयोगस्य चाव्याप्यवृत्तित्वमात्मनः प्रदेशार्थ इति व्याख्या-तम् । एकस्य चानेकमूर्तिमत्प्रदेशवद्द्रव्यसम्बन्धित्वं प्रदेशार्थः । यद्वा यदाकाशस्यैकस्य सतः प्रदेशवताऽनेकेन सम्बन्धित्वं तत्प्रदेशवद्द्रव्यसामान्यं यथा घटादेः ।

कस्मात् पुनः सूत्रकारस्यास्मिन्नर्थे सूत्रं न श्रूयत इति ? । कतमस्मिन्नर्थे ? निष्प्रदेशमाकाशं निष्प्रदेश आत्मेति एतस्मिन्न-र्थे ? । अर्थतोऽधिगतेर्न सूत्रं—यस्मादयमर्थोऽर्थतोऽधिगम्यते ततो न सूत्रित इति । शब्दसन्तानप्रतिपादने वा न सूत्रमर्थतोऽधिगतेः ।

शास्त्रसिद्धान्ताद्वा तदधिगतिः—शास्त्रसिद्धान्तस्तु न्यायस-माख्यातं तदुपायमनुमानं तेनानुक्तमपि गम्यत इति न सूत्र्यते । अथापीदमस्ति इदं नास्तीति भाष्यम् । योऽयं पर्यनुयोगस्तस्य को विषय इति ? । अनुप-लभ्यमानास्तित्वम्—ये शब्दस्य नित्यत्वं कल्पयन्ति त इदं-पर्यनुयोज्याः इदमस्ति इदं नास्तीति कुतस्त्वतः (कथं) कुतः प्र-तिपद्यन्त इति ? । एवमनुयुक्ताः सन्तः प्रतिज्ञाते सत्यागम उ-पलब्धेरनुपलब्धेश्चेति ।

अविद्यमानस्तर्हि शब्दः ?—

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥ १९ ॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्चेति । यच्चेदम-पक्षसम्प्रतिपन्नं घटाद्यनित्यत्वेन, तेन चानुयोज्याः—यदिदम-नित्यं घटादि भवद्भिः प्रतिपद्यते तत्कथमनित्यमिति ? । ए-

(१) क्रियावद्द्रव्यसंयोगित्वाद्विभागित्वं संयोगवत्—पा० ६ पु०।

वमनुयुक्ता यदि घटाद्यनित्यत्वन्यायं प्रतिपद्यन्ते स शब्देऽपीति (प्रागिति) सूत्रम् । सतोऽनुपलब्धिकारणाभावे कदाचिदनुपलब्धेरनित्यः शब्द इति सूत्रार्थः । शेषं भाष्ये । व्यञ्जकाभावादग्रहणमिति चेत् ? नोक्तोत्तरत्वात्–अथ मन्यसे शब्दस्योच्चारणं व्यञ्जकं तस्याभावान्नोपलभ्यत इत्यसिद्धं विशेषणमनुपलब्धिकारणाभाव इति । किमिदमुच्चारणं नाम ? विवक्षाजनितेन प्रयत्नेन कौष्ठ्यस्य वायोः प्रेरितस्य कण्ठादिस्थानाभिघातः ? तन्नोक्तोत्तरत्वात्—वायुगतवेगापेक्षो वायुना(१) ताल्वादिसंयोगोऽभिघातः संयोगस्य व्यञ्जकत्वं प्राक् प्रतिषिद्धमिति । एवं च तत्त्वं(२) पांशुभिरवाकिरन्निदमाह । कोऽस्यार्थः ? । तत्त्व उक्ते जात्या प्रत्यवतिष्ठते ।

सा च जातिः—

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥ २० ॥

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः । कोऽस्य वाक्यस्यार्थः ? आवरणाद्यनुपलब्ध्याऽनेकान्त इत्यर्थः । यथाऽऽवरणाद्यनुपलब्धिरनुपलभ्यमानाऽप्यस्ति तथाऽऽवरणमित्यनेकान्तः । अथानुपलब्धिरनुपलभ्यमाना नास्ति ? तदभावादुपलब्धिरस्ति । न चाविद्यमानस्योपलब्धिरस्तीति सिद्धमावरणम् । कथं पुनर्भवान् जानीते नावरणानुपलब्धिरुपलभ्यत इति ? किमत्र ज्ञेयम् प्रत्यात्मवेदनीयत्वात् प्रत्यात्मवेदनीयामिवायमावरणानुपलब्धिमावरणोपलब्धिं च वेदयते । एवं च सत्यपह्नवविषयमुत्तरवाक्यमिति । अपह्नवविषयमिति नास्योत्थानमस्तीति ।

(१) वेगापेक्षेण वायुना—पा० ६ पु० ।

(२) च सति तत्त्वं—पा० ६ पु० ।

अभ्यनुज्ञावादेन तूच्यते—

अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात् ॥ २१ ॥

अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भादित्यस्य सूत्रस्यानुपलब्धेरनैकान्तिकत्वमर्थः ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ २२ ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः । अतथाजातीयेन प्रत्यवस्थानादनुत्तरमिति सूत्रार्थः । यथाजातीयकः शब्दोऽनित्यस्तथाजातीयकं किञ्चिन्नित्यं न दृष्टमिति । उक्तं चात्र । किमुक्तम् ? उभयान्तापरिच्छिन्नवस्तुसत्तासम्बन्धो नित्यतेति । तस्माद् यथार्थप्रत्यवस्थानात् यत्किञ्चिदेतत् ।

अनित्यः शब्दो गुणत्वे सत्यस्मदादीन्द्रियविषयत्वात् बुद्धिवत् । अव्यापकस्य व्यापकद्रव्यसमवायित्वे सति प्रत्यक्षत्वात् सुखवत् । आकाशनिष्प्रदेशत्वे हेतुः निष्प्रदेशमाकाशं व्यापकत्वात् आत्मवत्, द्रव्यस्य सतः सदाऽमूर्तत्वात् आत्मवदेव व्यापकत्वादेवाकृतकत्वम् । व्यापकत्वे च द्रव्यव्यापकस्य सतः सर्वदाऽमूर्तत्वात् । एतेन दिक्कालौ व्याख्यातौ । एतावत् स्वमात्रतस्थितया व्यवस्थितमनित्यः शब्द इति ॥

अथ शब्दस्य नित्यत्वं प्रतिजानान इति भाष्यम् । विप्रतिपत्तेः प्रमाणमूलत्वाद्धेतोः परिप्रश्नः । विप्रतिपत्तिर्नाम द्वयोरेकविषया विरुद्धधर्मप्रतिपत्तिः न च विप्रतिपत्तिः प्रमाणान्तरमन्तरेण युक्तेति नित्यत्वे प्रमाणं वक्तव्यमित्येतत् आह ।

अयं तर्हि हेतुः प्रत्यभिज्ञानात् ?—तदभावे प्रत्यभिज्ञानं न दृष्टं मण्यादिषु, अस्ति च प्रत्यभिज्ञानं शब्दे, तस्मात् प्रत्यभिज्ञानादवतिष्ठते शब्द इति ? । किमिदं प्रत्यभिज्ञानं ? तत्प्रत्ययविषयत्वम् ? तत्प्रत्ययविषयत्वमन्यत्वेऽपीत्यनेकान्तः । अथ प्रत्यभिज्ञानं तत्प्रत्ययविषयस्याव्यभिचारः न हि शब्दे कदाचित् तत्प्रत्ययविषयव्यभिचारोऽस्ति यः पुनः सदृशे तत्प्रत्ययविषयः स विशेषदर्शनान्निवर्त्तते, अतो योऽसौ तत्प्रत्ययस्य शब्देऽव्यावृत्तिः तत्प्रत्यभिज्ञानमिति ? न, तत्प्रत्ययस्याव्यावृत्तिरसिद्धा अयं तावत् तत्प्रत्ययः पुरुषान्तरे निवर्त्तमानो दृष्टः । यत् पुनरेतत् विशेषदर्शनात् सदृशे तद्भावप्रत्ययो निवर्त्तत इति मन्यसे एवमेतत्, शब्दे तु किं विशेषस्यादर्शनात् सदृशे तत्प्रत्यय उत तद्भावादेव तत्प्रत्यय इति सन्दिह्यते । अथ प्रत्यभिज्ञानं तद्भावाद्भवतीति पक्षस्तथाप्यन्यो हेतुर्वक्तव्यः । किं कारणम् ? प्रत्यभिज्ञानस्य पक्षविशेषणत्वेनोपयुक्तत्वात् । यत्पुनर्गोशब्दो गोशब्द इति प्रत्ययस्याव्यावृत्तिरस्तीति । न च गोशब्दस्य गोप्रत्ययकर्तृत्वव्यभिचार इति ? एतदपि सन्दिह्यते, कथम् ? किं कारणसामान्याद्गोशब्दे गोप्रत्ययस्यानिवृत्तिराहो तद्भावादिति । एतेन तत्प्रत्ययकर्तृत्वं व्याख्यातम् । युक्तं तु कारणसामान्याद्गोशब्दे गोशब्दप्रत्ययस्याव्यावृत्तिः । कथमिति ? गोबुद्धौ गोबुद्धिप्रत्ययो न व्यावर्तते, न चास्या गोशब्दबुद्धेस्तत्प्रत्ययकर्तृत्वं निवर्तते तस्मात् तत्प्रत्ययहेतुत्वे प्रत्यभिज्ञानमहेतुः । यश्चानुपलब्धविशेष एव निवर्तते तं प्रति तस्य वस्तुनः किं विशेषोऽस्ति नास्तीति भवन्त एव प्रष्टव्याः । यद्यस्ति विशेषः प्रत्ययाव्यावृत्तिरहेतुरनेकान्तात् । अथ नास्ति एकं वस्तु त्र्यात्मकमिति प्राप्तम् । विरोधादहेतुः प्रत्ययाव्यावृत्तिश्चाशेषपुरुषविषय-

तथाऽसिद्धा—पुरुषमात्रविषयतयानैकान्तिकीति ।

अयं तर्हि हेतुः—

विनाशकारणानुपलब्धेः ॥ ३४ ॥

विनाशकारणानुपलब्धेः । यदनित्यं तस्य विनाशकारणमुपलभ्यते यथा लोष्टस्य, कारणद्रव्यविभागः, न तु शब्दस्य तस्मान्नित्यः शब्द इति ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ ३५ ॥

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्ग इति । शेषं भाष्ये॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः ॥ ३६ ॥

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः । अनुमानेन शब्दस्य विनाशकारणमुपलभ्यते । यच्चानुमानेनोपलभ्यते न तन्नास्ति । किमनुमानम् ? सन्तानोपपत्तिरिति । तस्मादनपदेशोऽयं विनाशकारणानुपलब्धेरिति । यथा यस्माद्विषाणी तस्मादश्व इति । किं पुनरत्रासत् विषाणमाहोस्वित् विषाणसम्बन्ध इति ? । उभयमित्याह यदा विषाणितमर्थमश्वत्वेन साधयति तदा विषाणमश्वस्येव न विषाणं प्रतिपाद्यते । अतोविषाणसम्बन्धस्याभावादनुमानमसदिति युक्तमुक्तमसत्त्वादनपदेश इति ।

कर्मत्ववदिति चेत् ? नाश्रयानित्यत्वात् । अथ मनुषे-नित्यस्याप्युपलभ्यमानस्यान्यत्वमग्रहणं दृष्टम्—यथा कर्मत्वस्येति । तच्च न, आश्रयानित्यत्वात् आश्रयस्य नित्यत्वादश्रवण(कारणा)नुपपत्तिरिति ब्रूमः । कर्मत्वस्य पुनरग्रहणकारणमाश्रयानित्यत्वमस्ति तस्मादप्रसङ्ग इति ।

घण्टायामभिहन्यमानायां तारस्तारतरो मन्दो मन्दतर इति श्रुतिभेदान्नानाशब्दसन्तानां अविच्छेदेन श्रूयते तत्रेदं चिन्त्यते ।

शब्दस्य व्यज्यमानस्य यद्व्यक्तिकारणं तत् किं घण्टास्थमा-
होस्विदन्यवृत्तीति । यदि घण्टास्थं किमवस्थितमुत सन्तानवृत्ती-
ति । अन्यवृत्तित्वेऽपि किमवस्थितमुत सन्तानवृत्ति ।
यदि घण्टास्थमवस्थितं च तदा श्रुतिभेदो न प्राप्नोति । अ-
थ घण्टास्थं सन्तानवृत्ति च युगपदनेकशब्दोपलब्धिप्रसङ्गः ।
यदि घण्टास्थेनावस्थितेन सन्तानवृत्तिना वाऽभिव्यक्तस्तावानेव
शब्द एकस्मिन् काले उपलभ्येत । घण्टास्थं चाभिव्यक्तिकारणं
कथमन्यत्र वर्त्तमानं शब्दं व्यनक्तीति वाच्यम् । अथान्यगतमव-
स्थितं सन्तानवृत्ति वाभिव्यक्तिकारणं तनु तदेकस्यां घण्टाया-
मभिहतायां शब्दान् व्यनक्ति न तत्समानदेशवृत्तिषु घण्टान्तरेष्वि-
ति नियमहेतुर्वक्तव्यः । असति च शब्दभेदे श्रुतीनां भेद उपपाद-
यितव्यः । तारो मन्द इति नादोऽभिधीयत इति चेत् ? न, शब्दसा-
मानाधिकरण्यस्य ग्रहणात्—शब्दसमानाधिकरणोऽयं तारमन्दश-
ब्दः प्रवर्त्तते न नादसमानाधिकरणः तस्माच्छब्दोऽभिधीयत इति ।
न चासति शब्दविपर्यये शब्दसामानाधिकरण्यं युक्तम् नीलोत्प-
लादिवदिति । व्यामोहप्रत्ययः स इति चेत् ? न निमित्तानभिधाना-
त् । अथ मन्यसे तारो मन्द इति शब्दसमानाधिकरणो व्यामोह-
प्रत्ययो भवति—यथा दीर्घः शब्दो महान् शब्द इति ? । न, विशेष-
हेत्वभावात्—व्यामोहप्रत्यय इति न विशेषहेतुरस्ति । यदि चायं व्या-
मोहप्रत्ययो भवति व्यामोहप्रत्ययस्य निमित्तं वाच्यम् । यथा दीर्घः
शब्द इति अविरतशब्दसन्तानश्रुतौ शब्दे दीर्घप्रत्ययो भवति—यानि
खलु दीर्घाणि द्रव्याणि तेषामवयवोपचये सति ग्रहणमन्तरितप्र-
यत्नं तत्सामान्यात् शब्दे दीर्घप्रत्ययः । न तु नित्यशब्दवादिनो
व्यामोहप्रत्ययबीजमस्तीत्ययुक्तमेतत् । तुल्यमेतदिति चेत् ? न, त-
न्निमित्तस्य कदाचिद्भावात् । अथ मन्यसे यस्यानित्यः शब्द-

सन्तानस्तेनापि घण्टास्थमवस्थितं सन्तानवृत्ति वाऽन्यस्थमवस्थितं सन्तानवृत्ति वोत्पत्तिकारणं वाच्यम् घण्टास्थमुत्पत्तिकारणं कदाचिच्छब्दानुत्पादयति कदाचिन्नेति नियमवत् प्रसङ्गः ? । न प्रसङ्गः कदाचिद्भावात् शब्दानामुत्पत्तिकारणं घण्टावृत्ति(वत्)कदाचिद्भवति कदाचिद्भावेऽपि सति सन्तानवृत्ति । तस्मान्निमित्तभेदानुविधायिनः शब्दाः कदाचिद्भवन्ति सन्तानवृत्तित्वात् च मन्दतरमन्दतमादिभिन्नरूपानुविधायिनं शब्दमुत्पादयन्तीति । तच्च कारणं संस्कार इति । कुतस्तदुत्पत्तिः ? । पाणिसंश्लेषमपेक्षमाणात् कर्मणः पाणिघण्टासंश्लेषात् पाणिगतवेगापेक्षात् घण्टायां कर्म, तत्कर्म पाण्यभिघातमपेक्षमाणं विभागसमकालं संस्कारं करोति । सा चलन्त्याध्यात्मिकं वायुमुपगृह्णाति । सा च वायुनाभिहता पुनः कर्म करोति ततः कर्मणः संस्कारः संस्कारेण पुनः कर्म पुनर्वायूपग्रह इत्येवमादिन्यायेन संस्कार उत्पद्यत इति । तत्रान्त्यस्यातिमान्द्यात् घण्टायां महाभूतसंक्षोभणशक्तेरभावस्ततो वायूपग्रहोच्छेदः ततः संस्कारक्षय इति ॥

न संस्कारोऽप्यनुपलब्धेरिति चेत्—अथ मन्यसे नैव संस्कारोऽप्यनुपलब्धेः तन्नासत्—

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः ॥३७॥

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः । उक्तार्थं सूत्रम् । यदि संस्कारं शब्दोत्पत्तिनिमित्तं न प्रतिपद्यसे पाणिघण्टासंश्लेषाच्छब्दे सन्तानोच्छेदो न प्राप्नोति । अथ घण्टास्थः संस्कारः पाणिसंश्लेषान्निवर्तते तथापि कथं शब्दसन्तानोच्छेद इति ? । न ब्रूमो घण्टासंश्लेषः शब्दानुच्छिनत्तीति । अपि तु पाणिघण्टा-

संश्लेषात्तदुत्पत्तिसंस्कारः स्पर्शवद्द्रव्यसंयोगविरोधित्वान्निवर्तते । निवृत्ते च कारणाभावात् कार्याभाव इति सन्तानोच्छेदः ॥

विनाशकारणानुपलब्धेश्चावस्थाने
तन्नित्यत्वप्रसङ्गः ॥ १८ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः । यदिदमुच्यते विनाशकारणानुपलब्धेर्नित्यः शब्द इति । यदि यस्य विनाशकारणं नोपलभ्यते तन्नित्यं यानीमानि शब्दग्रहणानि तेषां न भवता विनाशकारणमुपपाद्यते अनुपपादनादवस्थानान्नित्यत्वमिति । अथानुपलभ्यविनाशकारणान्यपि शब्दग्रहणानि अनित्यानि शब्दोऽप्येवमित्यनेकान्तः । अथानुमानतः शब्दग्रहणविनाशकारणानि गम्यन्ते तत्समानं शब्द इति न किञ्चिद्बाधितं भवति ।

व्यधिकरणत्वादयुक्तमिति चेत् ?—अथ मन्यसे व्यधिकरणः शब्दः कथमन्यवृत्तिना संश्लेषेण निवर्त्यते । अथ व्यधिकरणोऽपि निवर्त्यते ? सर्वघण्टाशब्दोच्छेदप्रसङ्गः। तस्मात् पाणिघण्टासंश्लेषसमानाधिकरणः शब्दः—

अस्पर्शत्वादप्रतिषेधः ॥ ३० ॥

अस्पर्शत्वादप्रतिषेधः । अस्पर्शद्रव्याश्रयः शब्द इति सूत्रार्थः । कथमन्यत्र वर्तमानस्य पाणिघण्टासंश्लेषो निवर्तक इति ? । नोक्तोत्तरत्वात्—उक्तोत्तरमेतत् कारणाभावादन्यशब्दानुत्पादः । यस्तूत्पन्नः शब्दः स मन्दतरतमादिन्यायेनान्त्यस्यापि मान्द्यात् येन केनचिद्विरोधित्वात् क्षीयते । योऽयं संस्कारः शब्दकारणत्वेन समधिगतः स किमेकोऽनेको वेति सन्दिह्यते । अनेकः संस्कार इति तत्त्वम् । शब्दभेदात्—कारणभेदे सति कार्यभेदो दृष्टः

यस्यैकः संस्कारः तस्येषोः पातः प्राप्नोति अगत्वैव यावद्गन्तव्यमिति । अथाप्रतिबध्यमाने संस्कारे द्रव्यं गच्छति न कदाचित्पातः प्राप्नोति तस्मादनेकः संस्कारः ॥

विभक्त्यन्तरोपपत्तेश्च समासे ॥ ४० ॥

विभक्त्यन्तरोपपत्तेश्च समासे । नायं शब्दो गन्धादिभिः सह सन्निविष्टो व्यज्यते विभक्त्यन्तरोपपत्तेः विभागश्च विभागान्तरं चेति विभक्त्यन्तरम् । (प्रतिद्रव्य) विधर्माणश्च सरूपाश्च शब्दाः एकद्रव्याः श्रूयन्ते । समासः समुदायः एतच्च स्पर्शवद्द्रव्यवृत्तिषु शब्देषु न प्राप्नोति गन्धादिवत् यथा प्रतिद्रव्यमेको गन्ध एवं प्रतिद्रव्यमेकः शब्द इति । सन्तानोपपत्तेश्चेति चार्थः यद्ययं गन्धादिभिः सह सन्निविष्टः स्यात् नान्यत्र वर्त्तमानः श्रोत्र उपलभ्येत तस्मात् सन्तानवृत्तित्वादाकाशाश्रयः शब्द इति ॥

विकारादेशोपदेशात् संशयः ॥ ४१ ॥

विकारादेशोपदेशात् संशय इति । संशयकारणज्ञापनार्थं सूत्रम् ॥

प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ ४२ ॥

प्रकृतिविवृद्धौ विकारविवृद्धेरिति सूत्रम् । प्रकृत्यनुविधानादिति सूत्रार्थः । विकारे प्रकृत्यनुविधानं दृष्टमिति ॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुः ॥ ४३ ॥

न्यूनसमाधिकोपलब्धेर्विकाराणामहेतुरिति साधनपक्षे दृष्टान्ताभावादहेतुः ॥

नातुल्यप्रकृतीनां विकारविकल्पात् ॥ ४४ ॥

दूषणपक्षे नातुल्यप्रकृतीनां विकारविकल्पात् इत्यसम्बद्धम् । अतुल्यायाः प्रकृतेः विकल्प्यन्ते विकारा ह्रस्वदीर्घानुविधानं तु प्रकारे नास्तीति ॥

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ॥ ४५ ॥

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः । यथा द्रव्यभावेन तुल्यायाः प्रकृतेर्विकारो विकल्प्यते । एवं वर्णभावेन तुल्यायाः प्रकृतेर्विकारविकल्पः स्यादिति ॥

न विकारधर्मानुपपत्तेः ॥ ४६ ॥

विकारप्राप्तानामपुनरापत्तेः (१) ॥ ४७ ॥

विकारप्राप्तानामपुनरापत्तेरिति । यदि विक्रियन्ते वर्णाः पुनरापत्तिर्न प्राप्नोति ॥

सुवर्णादीनां पुनरापत्तेरहेतुः ॥ ४८ ॥

सुवर्णादीनां पुनरापत्ते (२) रहेतुः । विकारप्राप्तानां पुनरापत्तिदर्शनादनेकान्त इति सूत्रार्थः ॥

न तद्विकाराणां सुवर्णभावाव्यतिरेकात् ॥ ४९ ॥

न तद्विकाराणां सुवर्णभावाव्यतिरेकात् । सर्वावस्थं सुवर्णदर्शनं न पुनर्विकारप्रकारयोर्धर्मयोः कश्चिद्वर्णात्मा ऽवस्थितो भवति य इत्वं हित्वा यत्वमापद्यत इति ॥

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः (३) ॥ ५० ॥

वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः । वर्णविकारा अपि न वर्णत्वं व्यभिचरन्तीति । अस्ति वर्णत्वं सामान्यमिति ॥

सामान्यवतो धर्मयोगो न पुनः सामान्यस्य ॥ ५१ ॥

सामान्यवतो धर्मयोगो न पुनः सामान्यस्येति परिहारः । इतश्च वर्णविकारानुपपत्तिः—

(१) अपुनरावृत्तेरिति पाठो मुद्रितभाष्यपुस्तके ।

(२) पुनरावृत्तेः—पा० १ पु० ।

(३) न्यायसूचीनिबन्धे ५० । ५१ इति सूत्रद्वयं न दृश्यते ।

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात् ॥५२॥

नित्यत्वेऽविकारात् अनित्यत्वे चानवस्थानात् । नित्या व-र्णा इति न युक्तो विकारः व्याघातादनित्या वर्णा इति न युक्तो विकारोऽनवस्थितानां विकारादर्शनात् ॥

नित्यानामप्यतीन्द्रियत्वात् तद्धर्मविकल्पाच्च व-र्णविकाराणामप्रतिषेधः ॥ ५३ ॥

नित्यानामप्यतीन्द्रियत्वदर्शनात् तद्धर्मविकल्पाच्च वर्णविका-राणामप्रतिषेध इति विकल्पसमा जातिः ॥

अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोप-पत्तिः ॥ ५४ ॥

अनवस्थायित्वे च वर्णोपलब्धिवद्विकारोपपत्तिरिति साधर्म्य-समा जातिः ।

उभयोरप्युत्तरम्—

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ ५५ ॥

विकारधर्मित्वेन नित्यत्वाभावात् कालान्तरे विकारोपपत्ते-श्चाप्रतिषेधः । नित्या विक्रियन्त इति व्याघातो दोषः । उपल-भ्यमानस्य चकारस्य यत्वानुपपत्तेः वर्णोपलब्धिवदित्यसम्बद्धम् ।

इतश्च वर्णविकारानुपपत्तिः—

प्रकृत्यनियमाद्वर्णविकाराणाम् ॥ ५६ ॥

प्रकृत्यनियमात् । विकारे प्रकृतीनां नियमो दृष्ट इति । इकारयकारयोस्त्वनियमः तस्मादनियमान्न विक्रियन्त इति ॥

अनियमे नियमान्नानियमः ॥ ५७ ॥

अनियमे नियमान्नानियमः । सूत्रार्थोऽनियमो नास्तीति ॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ॥५८॥

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः । अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तेरिति विरोधः सूत्रार्थः । तस्मादनुपलभ्यमानपृथग्धर्मविशेषाणामादेश इति । यद्येते वर्णा विक्रियेरन् ततः पृथग्विकारलक्षणेभ्यो धर्म्युपलभ्येत, न तूपलभ्यते तस्मान्न विक्रियन्त इति । अथ विक्रियन्ते एवं विकारो भवति—

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकारः ॥ ५९ ॥

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेः सन्ति वर्णविकाराः । सूत्रार्थो गुणान्तरापत्त्यादिरादेश इति । अयं च विकारादेशोपदेशविचारो भाष्यकारेणैव सम्यक् निरूपित इति सूत्रार्थमात्रं निरूपितमिति ॥

(इति वर्णानित्यत्ववादः ।)

ते विभक्त्यन्ताः पदम् ॥ ६० ॥

ते विभक्त्यन्ताः पदम् । ते वर्णा यथादर्शनं विकृता विभक्त्यन्ताः पदसञ्ज्ञका भवन्ति । अर्थप्रत्ययस्तर्हि न प्राप्नोति ? । न न प्राप्नोति । अन्त्यवर्णप्रत्ययात् पूर्ववर्णप्रतिसन्धानप्रत्ययापेक्षादर्थप्रत्यय इति । विभक्तिर्द्वयी नामिकी चाख्यातिकी च । नामिकी स्वादयः आख्यातिकी तिबादयः । तया विशिष्यमाणं पदं द्वेधा भवति । नाम च आख्यातं च । अभिधेयस्य क्रियान्तरयोगात् विशिष्यमाणरूपः शब्दो नाम—यथा ब्राह्मण इति—क्रियाकारकसमुदायः कारकसंख्याविशिष्टः । क्रियाकालयोगाभिधायिक्रियाप्रधानमाख्यातम्—पचतीति यथा । यदि द्वयी

विभक्तिरुपसर्गनिपातास्तर्हि न पदसञ्ज्ञकाः ? (१)। न नाम्नोऽन्तर्भावात्—उपसर्गनिपाता ना(म्ना) संगृहीताः (२) । यस्मादाह अव्ययाल्लोप इति, ते सुबन्तत्वात्तेनैव संगृहीता इति ।

पदेन व्यवहार इति पदार्थश्चिन्त्यते । नामपदं चाधिकृत्य व्यवहार इति नामपदं चिन्त्यते । नाम्नश्चाधिकारो व्यापकत्वात्—यस्मान्नाम्ना सर्वं (एव) पदं व्याप्यते तस्माद्गौरित्येतस्य पदस्यार्थश्चिन्त्यते । न पदादर्थाधिगतिर्विशेषेऽनवस्थानात् । न हि पदे उच्चरिते कश्चिद्विशेषो गम्यते तस्मात्पदमवाचकम् ? । न पदस्य विशेषाविषयत्वात् । क एव माह पदेन विशेषो गम्यते, अपि तु सामान्यवर्त्ति पदं विशेषवर्त्ति वाक्यम् । न च सामान्याभिधानादनर्थकं भवितुमर्हतीति ? । न सामान्यस्य व्यवहाराविशेषाविषयत्वात् । सर्वं उपदेष्टा विशेषप्रतिपत्त्यर्थं पदमुच्चारयति । न च सामान्ये प्रैषो न सम्प्रतिपत्तिः तस्मात्पदमवाचकमेवेति । ? न सामान्यविषयकत्वे सति विशेषश्रुतेर्नियामकत्वात्—यदि पदमवाचकं स्यात् न च पदश्रवणात् सामान्यं गम्येत । पदवाचकं न ततः सामान्यं विशेषो वा गम्यते यथार्थाद्, गम्यते च पदात् तत् सामान्यं सामान्यश्रुतेर्विशेषश्रुतिर्नियामिका भवति । यथा गौरिति सामान्याधिगतौ तिष्ठति गच्छतीति विशेषश्रुत्या विशेषो गम्यत इति । कथं पुनरियं विशेषश्रुतिस्तिष्ठति गच्छतीति ? । नैवेयं केवला विशेषश्रुतिः किं तु पूर्वपदापेक्षया विशेषप्रत्ययहेतुत्वाद्विशेषश्रुतिरित्युच्यते । भवतु वा पदादेवोभयम् । एतस्मादेव (वा) गोशब्दादुभयं गम्यते क्रिया च तत्साधनं च, प्रधानोपसर्जनभावस्यानियमेन, यदायं गोशब्दो गोत्वनिमित्तो गोत्व-

(१) पदसञ्ज्ञाः—पा० १ पु० । (२) नामसंगृहीताः—पा० १ पु० ।

योगाद्गौरिति तदा गोशब्दात् प्रधानं साधनं गौर्गम्यते। क्रिया त्वङ्गभूता विशेषकत्वात् । यदा पुनः क्रियाप्रधानं पदं तदा गोर्भावो गोत्वमिति। तदा गौरङ्गभूता विशेषकत्वादूगम्यते प्रधानं गोत्वमिति । तदेवं प्रधानोपसर्जनभावस्यानियमेन गोत्वमिति च पदे गौरिति चोभयं गम्यत इति ॥

तत्र प्रधानोपसर्जनभावमाश्रित्य तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः (१)। यस्मादयं गोशब्दो व्यक्त्याकृतिजातिष्वविनाभावेन वर्त्तमानासु प्रयुज्यते (२)। अविनाभाववृत्तिश्च सन्निधिः। अतो न ज्ञायते किं व्यक्तिः पदार्थ उताकृतिरुत जातिरिति—

याशब्दसमूहत्यागपरिग्रहसङ्ख्यावृद्ध्युपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥ ६१ ॥

शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगसन्दर्शनार्थं याशब्दादिसूत्रम् । नामी याशब्दादयः (इति) जातौ प्रयुज्यन्ते, कस्मादभेदात् एका जातिस्तस्या विशेषणमनर्थकम्। या गौस्तिष्ठतीति या गौर्निषण्णेति । एवं शेषेषु । आकृतेरप्यभिधायकमेतन्न भवति । निष्क्रियत्वादाकृतेः न हि निष्क्रिया गच्छति तिष्ठति भवति चेति । एवं सर्वत्र । यस्य चानेन विशेषणेन (३) तिष्ठत्यादिना योगस्तं गोशब्दोऽभिधातुमर्हतीति। कुतः विशेषणविशेष्यभावस्यैकविषयत्वात् । यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति ततो गो-

(१) अस्य वाक्यस्य सूत्रत्वं क्वचिद्दृश्यते।
(२) प्रवर्त्तमानासु प्रयुज्यते—पा० १ पु०।
(३) विशेषण—पा० १ पु०।

शब्देन धर्मान्तराणि निराक्रियन्ते तिष्ठतिशब्देन च क्रियान्तराणीति विशेषणविशेष्यभावापन्नयोस्तिष्ठतिगोशब्दयोः सामानाधिकरण्यं युज्यते अन्यथा नेति ।

द्रव्यं व्यक्तिरिति हि नार्थान्तरं तिष्ठतिशब्दसान्निहितेन(१) गोशब्देन व्यक्तिरभिधीयत इति तत्प्रतिषेधार्थम्—

न तदनवस्थानात् ॥ ६२ ॥

न तदनवस्थानादिति सूत्रम् । नानेन गोशब्देन व्यक्तिमात्रं शुद्धमुच्यते । यद्ययं व्यक्तिमात्राभिधायकोऽभविष्यत् तेन यस्यां कस्यां चिद्व्यक्तौ प्रत्ययोऽभविष्यदिति सूत्रार्थः । यदि व्यक्तिर्न पदार्थः कथं या गौस्तिष्ठतीत्यादिप्रयोगः ? । निमित्तादतद्भावे ऽपि तदुपचारः ।

क पुनर्निमित्तादतद्भावे ऽपि तदुपचारो दृष्ट इति तस्योपपादनार्थं सहचरणादिसूत्रम्—

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥ ६३ ॥

अतद्भावे ऽपि तदुपचार इति । अतच्छब्दस्य तच्छब्देनाभिधानमुपचारो यथा यष्टिकाशब्देन द्रव्यविशेषोऽभिधीयत इति यष्टिकाशब्दात्तु पुनः साहचर्याद्ब्राह्मणविशेषो (२) ऽभिधीयते । यथा यष्टिकाः प्रवेशयेति । एवं सर्वत्र । किं पुनरत्रोपचारबीजं यष्टिका ब्राह्मण इति । न ह्युपचारबीजमन्तरेणोपचारो लभ्यते । ननूक्तं साहचर्यमिति ? साहचर्यं नाम यष्टिकया नित्यसम्बन्धः । यष्टिकासम्बन्धाच्च यष्टिका-

(१) तिष्ठति सहितेन-पा० १ पु० ।

(२) ब्राह्मणो-पा० ६ पु० ।

वानिति स्यात्र यष्टिकेति । यष्टिकावानिति चायं शब्दो मुख्य एवेति । तस्मादुपचारबीजमन्यदुक्तव्यमिति । यष्टिकायां तावदयं यष्टिकाशब्दो जातिनिमित्तः यष्टिकात्वं जातिः सा यष्टिकायां वर्त्तते तया यष्टिकात्वयुक्तया यष्टिकया ब्राह्मणस्य योगः साहचर्यात् संयुक्तसमवेतां जातिं ब्राह्मणे ऽध्यारोप्य ब्राह्मणं यष्टिकेत्याह । एवं शेषाण्युपचारबीजानि स्वयमुत्प्रेक्षणीयानीति ॥

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ॥६४॥

यदि तर्हि गौरिति पदस्य न व्यक्तिरर्थः अस्तु तर्ह्याकृतिः (१) तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः । आकृतिः पदार्थः कस्मात् ? तदपेक्षत्वात् सत्त्वव्यवस्थानस्य गौरश्वः पुरुष इत्येवमादि (२) सत्त्वव्यवस्थानमाकृत्यपेक्षं सिध्यति यदपेक्षा च सत्त्वव्यवस्थानसिद्धिः स गोशब्दस्य विषय इति । अत्रापि तदेवोपस्थितं न तदनवस्थानादिति । यस्य च जात्या योगः स गोशब्दस्य विषयो नाकृतिर्जातियोगात् । कस्य पुनर्जात्या योगः ? नियतावयवव्यूहस्यावयविनः -नियतोऽवयवव्यूहो यस्य भवति स नियतावयवव्यूहः- अन्यपदार्थेन बहुव्रीहिणाऽवयव्यभिधीयत इति ॥

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ॥ ६५ ॥

अस्तु तर्हि जातिः पदार्थः व्यक्त्याकृतियुक्तेऽप्रसङ्गात् (३) प्रोक्षणादीनां मृद्गवके जातिः । यस्मात् मृद्गवके व्यक्त्या-

(१) कस्मात्-इत्यधिकम् ६ पु० ।
(२) इत्यादि-पा० १ पु० ।
(३) व्यक्त्याकृत्योरप्यप्रसङ्गात्-पा० १ पु० ।

कृती स्तः न च तत्र प्रोक्षणादीनि प्रयुज्यन्ते। न हि गामानय गां देहीति मृद्गवके प्रैषसम्प्रतिपत्ती भवतः। यदभावात्तत्रासम्प्रत्ययः स गोशब्दस्यार्थः। कस्याभावात्तत्रासम्प्रत्ययो? जातेः।

अथ मृद्गवके कस्माद्गोत्वं न जातिः? यस्मान्मृद्गवको गौर्न भवति, यश्च गौर्न, न तत्र गोत्वं, वर्त्तते यथाऽश्व इति। अथ मृद्गवकः कस्माद्गौर्न भवतीति अत एव गौर्न भवति यस्मान्मृद्गवक इति। न चायं युक्तः प्रश्नो मृद्गवकः कस्माद्गौर्न भवतीति। किं कारणम्? प्रतिपत्तिबाधितत्वात्—भवानप्येनमर्थं प्रतिपद्यते नायं गौरिति। प्रतिपत्त्या च प्रश्नो बाध्यत इति। अथ मृद्गवके गोशब्दः कुतः? आकृतिसामान्यात् चित्रादिवदिति। सर्वगतेति चेत्?—अथ मन्यसे सर्वगता जातिः सोत्पद्यमानेन यथा गवा सम्बध्यते तथा मृद्गवकेनापीति अस्ति मृद्गवके गोत्वं—?। नानभ्युपगमात् केन सर्वगतत्वं जातेरभ्युपगम्यते, अपि तु स्वविषये सर्वत्र वर्त्तत इति सर्वगतेत्युच्यते। कः पुनर्गोत्वस्य स्वोविषयः?। यत्र गोत्वं वर्त्तते। क्व पुनर्गोत्वं वर्त्तते? यत्र गोत्वनिमित्तोऽनुवृत्तप्रत्ययो भवति। क्व पुनरनुवृत्तप्रत्ययं गोत्वं करोति? यत्तस्य साधनं, कः पुनर्नित्ये गोत्वे गोः साधनार्थः? यत्तेन व्यज्यते। न हि ककुदादिमदर्थव्यतिरेकेण गोत्वस्य अभिव्यक्तिरस्ति(१)।

न हि पिण्डेभ्योऽर्थान्तरं गोत्वं पिण्डान्तरालेऽदर्शनादिति केचित्। न विकल्पानुपपत्तेः पिण्डान्तरालेऽदर्शनादिति(२)ब्रुवाणः पिण्डान्तरालं पर्यनुयोज्यः। किमिदं पिण्डान्तरालं किमाकाशम् आहो अभाव उत द्रव्यान्त-

(१) व्यक्तिरिति—पा० १ पु०। (२) अग्रहणादिति—पा० १ पु०।

रम् ? । यथाकाशम् न तत्र गोत्वं न ह्याकाशं गौरिति । एतेना-
भावो द्रव्यान्तरं च व्याख्यातम् । विशेषप्रत्ययानामनाकारात्मक-
त्वात् च । अयं च पिण्डप्रत्ययव्यतिरेकभाक् प्रत्यय उपजायमानो
निमित्तान्तराद्भवति दृष्टा खलु पिण्डप्रत्ययव्यतिरेकभाजां प्रत्य-
यानां निमित्तान्तरादुत्पत्तिः । यथा वस्त्रचर्मकम्बलेषु नीलप्रत्यय
इति । आकृतिसामान्यादिति चेत् ?–अथ मन्यसे सत्यमयमस्तु
पिण्डव्यतिरेकनिमित्तादनुवृत्तिप्रत्ययो भवति, न पुनरस्य जाति-
निमित्तं अपि तु यच्छिरःपाणिपादाकृतिसामान्यं तस्मादनुवृ-
त्तिप्रत्यय इति ? । न पिण्डवदसाधारणत्वादाकृतेः–यथैव पिण्डाः
पिण्डान्तरवृत्तयो न भवन्ति तथाकृतिरपि एकपिण्डवर्त्तित्वात्
पिण्डान्तरवर्तिनी न भवति । आकृतेः पिण्डान्तरवर्त्तित्वमभ्यु-
पगम्यते नास्ति विवादो नार्थ इति । अथ पिण्डव्यतिरिक्तं सामान्यं
नाभ्युपगम्यते तथाप्येकसामान्यनिराकरणात् समानप्रत्ययबी-
जमन्य(?)द्वक्तव्यं स्यात् । न ह्यसति सामान्ये समानप्रत्ययं
पश्याम इति। अन्यत्रापि सामान्ये दृष्टः सामान्यप्रत्यय इति चेत्?–
अथ मन्यसे यथा सामान्येष्वसति सामान्यान्तरे ऽनुवृत्तप्र-
त्ययो दृष्टो गोत्वादिषु इदं सामान्यमिदं सामान्यमिति—तस्मा-
दनैकान्तिकत्वादनुवृत्तिप्रत्ययोऽसाधनमर्थान्तर(२)(निमित्त)प्रति-
पादन इति ? । नानभ्युपगमात्—न मया गोत्वघटत्वाश्वत्वेषु
निर्निमित्तः सामान्य(३)प्रत्ययोऽभ्युपगम्यते तस्मादनुत्तरमेतत् ।
सूत्रव्याघात इति चेत् ?—यदि मन्यसे सामान्येष्वपि सामान्य-
प्रतीति ननु सूत्रव्याघातः "सामान्यविशेषेषु सामान्यविशेषा-
भावात् तत एव ज्ञान"मिति ?* । न सूत्रार्थापरिज्ञानात्—अयं

(१) सामान्यमन्य-पा० १ पु० ।

(२) असाधारणमर्थान्तर-पा० १ पु० । (३) समान-पा० १ पु० ।

सूत्रार्थो यथा द्रव्यमिति प्रत्ययो द्रव्यत्वविशेषणो द्रव्ये भवति न पुनः सामान्यविशेषेष्वेवमिति । न पुनरयं सूत्रार्थो निर्निमित्तोऽनुवृत्तिप्रत्यय इति । किन्निमित्तमिति चेत् ?—अथ मन्यसे गोत्वादिष्वनुवृत्तिप्रत्ययस्य किं निमित्तं यतः सामान्यमिति भवति ? कुतः सामान्यमिति भवति ? अनेकार्थसमवायात्—यथा गोत्वमनेकार्थसमवायि तथाऽश्वत्वादीन्यनेकार्थैस्तत्समवायस्य समानत्वात् गोत्वादिष्वनुवृत्तिप्रत्यय इति । पाचकादिशब्दवादिति चेत् ?—अथ मन्यसे यथा पाचकादिशब्दा अनुवृत्तप्रत्ययाश्च भवन्ति न च पाचकत्वं नाम सामान्यविशेषोऽस्ति तथा गवादिष्वनुवृत्तप्रत्यया इति ? न हेत्वर्थापरिज्ञानात्—विशेषप्रत्ययानामनाकस्मिकत्वादित्यस्य हेतोः पिण्डप्रत्ययव्यतिरिक्तस्य प्रत्ययस्य निमित्तान्तरादुत्पाद इत्ययमर्थः न पुनः सर्वोऽनुवृत्तिप्रत्ययः सामान्यादेव भवतीति । एवं सति पचनक्रियायां यत् प्रधानं साधनं तत्पाचकशब्देनोच्यते । तच्च प्राधान्यं पाचकान्तरेऽप्यस्तीति न दोषः ।

यद्यनेकानुवृत्ति गोत्वं तत् किं प्रतिपिण्डं परिसमाप्त्या वर्तते अथैकदेशेनेति ? । किं चातः ?—यदि प्रतिपिण्डं परिसमाप्त्या वर्तते पिण्डवदसाधारणत्वान्न सामान्यं भवितुमर्हति ? अथैकदेशेन वर्तते ? तथापि नैकमनेकत्र वर्तते किन्त्वनेकमनेकत्रेति तस्मात्(१) प्रदेशाः सामान्यस्य वर्तन्त इति । ये ते(२)एकदेशाः सामान्यस्य पिण्डेषु प्रत्येकं वर्तन्ते ते किं सामान्यात्मका उत नेति । यदि सामान्यात्मका एकमेकत्र वर्तत इति प्राप्तम्, न चैकमनेकत्र वर्तमानं सामान्यमिति युक्तं वक्तुम(३) अथासामान्यात्मकाः ?

* वै. सू. १ अ. ८ आ. १ सू. । (१) यस्मात्—पा० १ पु० ।
(२) येनैते—पा० १ पु० । (३) युक्तमुक्तम्—पा० १ पु० ।

शून्यमभिधानम्—सामान्यस्यैकदेशाः प्रत्येकं वर्त्तन्ते इति तैरपि देशैः सामान्यं पूर्ववद्वर्त्तेत इति पूर्ववत्प्रसङ्गः । न चान्या गतिरस्ति तस्मान्नानेकवृत्ति सामान्यमिति ? न विकल्पानभ्युपगमात्—नायं विकल्पोऽस्ति गोत्वं प्रत्येकं पिण्डेषु परिसमाप्य(वर्त्त)ते अथ प्रदेशेन वर्त्तत इति, तस्माद्विकल्पानभ्युपगमादप्रश्नोऽयम् । कस्माद्गोत्वस्यावयविसमुदायत्वानभ्युपगमात् । न गोत्वमवयवि न समुदायः, समुदायस्य भाग एकदेशशब्दः अवयविनश्चावयवे यदा न किञ्चित्परिहायाशेषमभिधीयते तदावयविनोऽवयवानपेक्ष्य कृत्स्नशब्दः समुदाये च समुदायिनोऽपेक्ष्य । न च गोत्वमवयवी न समुदायः तस्मान्न कृत्स्नैकदेशशब्दौ स्तः । न चेत्तत्रैतौ शब्दौ स्तः तस्माद्गोत्वं किं कार्त्स्न्येन वर्त्तते उतैकदेशेनेति न युक्तः प्रश्नः । उक्तं चात्र एकमनेकत्र वर्त्तत इति प्रतिजानानो नानुयोक्तव्यः । कस्मादुभयेन व्याघातादिति । कथं तर्हि गोत्वं गोषु वर्त्तते ? आश्रयाश्रयिभावेन । कः पुनराश्रयाश्रयिभावः ? समवायः तत्र वृत्तिमद्गोत्वम् । वृत्तिः समवाय इतीहप्रत्ययहेतुत्वादित्युक्तम् (न गोत्वं) गव्यगवि वृत्त्यभावादिति चेत् ?—अथ मन्यसे यदिदं गोत्वं गोष्वनुवृत्तिप्रत्ययकारणं तत् किं गवि वर्त्तते आहोस्विदगवि, यदि तावद्गवि प्राक् गोत्वयोगाद्गोरेवासाविति व्यर्थं गोत्वम् । अथागवि (न) अश्वादावपि गोत्वयोगाद्गौः प्राप्नोति । न चान्या गतिरस्ति तस्मान्न गोत्वादनुवृत्तिप्रत्यय इति ? न विकल्पानभ्युपगमात्—न गवि गोत्वं नागवि प्राक् गोत्वाभ्यासौ गौर्नाप्यगौरिति । किं कारणम् ? उभावेतौ विशिष्टप्रत्ययौ न विशेषणसम्बन्धमन्तरेण भवतः न च प्राक् गोत्वयोगाद्वस्तु विद्यते न चाविद्यमानं गौरित्यगौरिति वा शक्यं व्यपदेष्टुम् यदैव वस्तु तदैव गोत्वेनाभिसम्बध्यत

इवनास्पदो विकल्पः । एतेन सत्तासम्बन्धस्य सदसद्विकल्पो व्याख्यातः । न सतः सत्तासम्बन्धः नासतः । यदैव तद्वस्तु तदैव सत्तया सम्बद्धमिति सदसदाश्रयो दोषोऽनुपपन्न इति तस्मादुपपन्ना जातिः । न चासौ मूढत्वक इति । यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥ ६६ ॥

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः । जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षेत व्यक्त्याकृती इति प्राप्ते प्राधान्यादाकृतेः पूर्वनिपातः । किं पुनः प्राधान्यम् ?आकृतिविशेषणत्वं व्यक्तेः यस्माद्व्यक्त्या विशेष्यमाणा आकृतिर्जातेर्लिङ्गं भवति तस्मात् प्रधानमाकृतिः न चागृह्यमाणायामाकृतौ व्यक्तौ च जातिमात्रं शुद्धं शब्दाद्गम्यते तस्मान्न जातिरेव पदार्थः । न च वै पदार्थेन न शक्यं भवितुम् ।

कस्तर्हि पदार्थो ? व्यक्त्याकृतिजातयस्तु पदार्थः ॥

व्यक्त्याकृतिजातयस्तु पदार्थः ॥ ६७ ॥

तुशब्दो विशेषणार्थः । किं विशिष्यते प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वम्—यदा भेदविवक्षा विशेषगतिश्च गौस्तिष्ठति गौर्निषण्णेति तदा व्यक्तिः पदार्थः अङ्गं जात्याकृती, जात्याकृतौ च स्थानगमनादीनामभावाद्यत्र सम्भवः स पदार्थ इति । यदा पुनर्भेदो न विवक्षितः सामान्यावगतिश्च तदा जातिः पदार्थः यथा गौर्न पदा स्प्रष्टव्येति आकृतेश्च प्रधानभाव उत्प्रेक्षितव्य इति स्वयमुत्प्रेक्ष्य इत्य(यम)र्थः । क्व पुनराकृतेः प्राधान्यं दृष्टं ? यथा पिष्टकमय्यो गावः क्रि-

यन्नामिति । तदेतद्बहुलं प्रयोगेषु प्रधानोपसर्जनभावः स्वयमुत्प्रेक्ष्य(त) इति ।

न व्यक्त्याकृतिजातयः पदार्थ इति केचित् कुतः विकल्पानुपपत्तेः सदित्येतदेव व्यापकत्वादुपादाय चिन्त्यते सदित्यनेन पदेन पुनर्जातिरभिधीयते पिण्डो वा सम्बन्धो वा जातिमान् वा पदार्थः । तत्र न तावज्जातिरभिधीयते भेदार्थैरभिन्नविभक्तिकत्वात् यद्ययं जातिवाचकः सच्छब्दो भवति सद्द्रव्यमिति भेदवाचिना द्रव्यशब्देन सहसामानाधिकरण्यं न प्राप्नोति न हि भिन्नार्थवाचकानां सामानाधिकरण्यं पश्यामः न हि गवाश्वमिति सामानाधिकरण्यं दृष्टम् । अथ द्रव्यादिवृत्तित्वात्सत्ताया एव द्रव्यादिशब्दैः सह सामानाधिकरण्यम् तथापि पारतन्त्र्यात्सत्ताया गुणत्वं गुणगुण्यभिधायिनोश्च शब्दयोः सामानाधिकरण्यं न दृष्टमिति यथा शङ्खस्य शौक्ल्यमिति । एतेन सम्बन्धो व्याख्यातः । सच्छब्दः पिण्डानां वाचको भविष्यतीति न युक्तं पिण्डानामानन्त्यात् न ह्येकस्य शब्दस्यानेकद्रव्यगुणप्रपञ्चेन सम्बन्ध आख्यातुं शक्यः न चानाख्याते शब्दार्थसम्बन्धे शब्दादर्थप्रतिपत्तिर्युक्ता स्वरूपमात्रप्रतीतेः व्यभिचाराच्च । सच्छब्दश्रवणाच्च द्रव्यगुणकर्म्माणीति परिप्लवमाना बुद्धिरर्थान्तरे । न च यस्मादभिधानात् परिप्लवते बुद्धिस्तदभिधानमिति युक्तं वक्तुम् तस्मात् सच्छब्दो भेदानां न वाचक इति । जातिमन्मात्राभिधायकोऽपि सच्छब्दो न भवति कस्मादस्वतन्त्रत्वात् न हि सच्छब्दाच्छब्दा घटादयो गम्यन्त इति तद्द्वयघटादिभेदानाश्रयात् सामानाधिकरण्याभावः । अथवा अस्वतन्त्रत्वा-

दिति सच्छब्दः प्राधान्येन सत्तायां वर्त्तते। तत्र वर्त्तमान-स्तद्व(दि)त्युपचर्य्यते यच्च यत्र वर्त्तमानमन्यत्रोपचर्य्यते न तत्त-स्याभिधायकं मञ्चशब्दवदिति। उक्तं चात्र। किमुक्तम्? तद्व-तामानन्त्यात् न सच्छब्देनाभिधानं युक्तमिति। तद्वति च न गुणसारूप्यात् प्रत्ययसङ्क्रान्तिः—यथा स्वामिशब्दस्य भृत्ये, न गुणोपरागात्—यथा नीलः स्फटिक इति, क्रमवृत्त्यभावात् युगपदसम्भवाच्च। अयथार्थज्ञानोत्पत्तिप्रसङ्गाच्च। तस्मान्न जा-तिसन्मात्राभिधायकोऽपि। असाधारणविशेषणविशेष्याभिधायको भविष्यतीति न युक्तम्। अन्यत्र प्रत्ययाभावप्रसङ्गात्। न चा-न्या गतिरस्ति तस्मादन्यार्थापोहकृच्छ्रुतिरिति। अन्यपदार्था-न्तरा(१)पोहं हित्वा स्वार्थं कुर्वती श्रुतिरभिधत्त इत्युच्यत इति।

अत्रास्माभिर्व्यक्त्याकृतिजातयः पदार्थ इति प्रधानो-पसर्जनभावस्यानियमेन व्यवस्थापितपक्षान्तवादिनश्चैते दोषा इति। न चैते दोषाः। कथमिति? यत्तावत्सत्ताशब्दः सत्ताया न वाचक इति? तन्न व्याघातात्—सत्ताश-ब्दो न सत्तावाचक इति व्याहतमुच्यते। कथं वा तद्-वाचकत्वे सति सत्ताशब्द इत्यभिधीयते। भवदभिप्रायेणा-भिधीयत इति चेत्?—अथ मन्यसे नैव नः सिद्धान्ते सत्ता-दिशब्दाः सन्ति, किं तु भवद्भिः सत्ताशब्दो द्रव्यगुणकर्म-शब्दा इति च परिकल्प्य व्यवहारः क्रियते। ततोऽस्माभि-रपि युष्मदभिप्रायानुविधानेन सत्ताशब्दा इति वाच उच्चा-र्यन्त इति?। न व्याघातानिवृत्तेः। सदिसेत्यादीनि पदा-नि लोकप्रसिद्धानि केष्वर्थेषु वर्त्तन्त इत्युभयोर्विचारः। वयं तु ब्रूमः सत्ताशब्दः सत्तायां वर्त्तते त्वं पुनर्ब्रवीषि स-

(१) अन्यशब्दार्थान्तरा—पा० १ पु०।

त्ताशब्दो न सत्तायामिति । एवं ब्रुवाणो मया विरोधेन प्रत्यवस्थीयसे विरोधोद्धारं चाकृत्वा त्वन्यो मयाभिधीयत इति ब्रुवाणो न व्याघातमतिवर्त्तसे ।

यच्चेदमुच्यते त्वया त्वया परिकल्पिताः सत्तादिशब्दा इति ? तदपि न, परिकल्प्यविषयानभिधानात्—परिकल्प्यस्य च विषयोऽतथाभूतस्य तथाभावविभिः सामान्ये समध्यारोपितनद्धर्मणः प्रधानार्थप्रतिपत्तिः यथा स्थाणौ पुरुष इति । यदि चामी शब्दाः परिकल्पिता भवन्ति प्रधानमेषां वाच्यम् । न हि निष्प्रधानं परिकल्प्यम् । यत्पुनरेतद्भेदाऽर्थैकभिन्नविभक्तिकत्वादिति । तन्न, समानार्थापरिज्ञानात् (१) न ब्रूमः सत्ताशब्देन द्रव्यशब्दस्य सामानाधिकरण्यम्, अपि तु सत्तायाः प्रधानसाधनवाचिना सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते (इत्यत्र) गुणकर्मशब्दैरपीतरेतरविशेषणविशेष्यभावापन्नैरन्यैव । एवं च सति युक्तं सामानाधिकरण्यमुभयोः सद्द्रव्यशब्दयो(२)रेकविषयत्वात् यदा पुनरयं सत्ताशब्दः सत्ताप्रधान एवाङ्गभूतं साधनमभिधत्ते न तदा सामानाधिकरण्यम् द्रव्यस्य सत्तेति भवति । तस्मात् सामानाधिकरण्यानुपपत्तिर्दोषः विभक्तिभेदनियमाद्गुणगुण्यभिधायिनोः सामानाधिकरण्यासिद्धिः सद्द्रव्यशब्दयोरिति एतदनेन प्रत्युक्तम् ।

एतेन सम्बन्धो व्याख्यातः । कथमिति न ? सच्छब्देन सम्बन्धोऽभिधीयते अपि तु सम्बन्धिशब्देनैव, सम्बन्धश्च गुणः न सच्छब्दो गुणशब्दः, न च गुण-

---

(१) सामानाधिकरण्यार्थापरिज्ञानात्–पा० १ पु० ।

(२) सच्छब्दद्रव्यशब्दयोः–पा० १ पु० ।

शब्देनैव द्रव्यवाचिनः शब्दस्य सामानाधिकरण्यमस्तीति । यत्पुनरेतदानन्त्या(१)न्न जातिशब्दो भेदानां वाचक इति ? । कश्चैवमाह जातिशब्दो भेदानां वाचक इति, क्लृप्तां स्वयम्य(युक्तां) वाचोयुक्तिं भवान् प्रतिषेधति । यदि तर्हि भेदानां न वाचकः कथं सच्छब्देन द्रव्यगुणकर्माण्यभिधीयन्ते(२) ? । न चायं भोः सच्छब्दो जातिशब्दः अपि तु भेदशब्द एवायम् । भेदशब्देन च भेद एवाभिधीयते इति न किञ्चिद्बाध्यते । कथं न बाध्यते ? यदा सच्छब्द एको भेदानामानन्त्यं तदवस्थमेव । न चैकस्यानेकेन सम्बन्धः शक्य आख्यातुम् । न चानाख्याते सम्बन्धे शब्दार्थप्रतिपत्तिर्युक्तेति ? न केवलानामनभिधानात्—यो हि सच्छब्देनाविशेषणानि द्रव्यगुणकर्माण्यभिधीयन्त इत्यभिधत्ते तं प्रत्येष दोषः । अस्माकं तु द्रव्यगुणकर्माणि सत्ताविशेषणान्यभिधीयन्ते।यत्र यत्र सत्तां पश्यति तत्र तत्र सच्छब्दं प्रयुङ्क्ते एका च सत्ता तत्प्रत्ययस्यानुवृत्तेः तस्माद्भेदानामानन्त्यं न दोषः । कश्चायमेवम्भूतः साध्यसाधनभावः शब्दं पक्षयसि आनन्त्यादिति वस्तुधर्मं हेतुत्वेनाभिधत्स इति । अथ भेदा एव जातिशब्दावाच्यत्वेन पक्षीक्रियन्ते ? तथापि नान्वयी न व्यतिरेकी च दृष्टान्तोऽस्तीत्यहेतुरानन्त्यादिति । अथाप्येकदेशान् पक्षीकृत्यानन्त्यादिति हेतुः एकदेशो दृष्टान्त इति ? अयमपि न, विरोधात् । एवं च सति न कश्चित्पदार्थो वाच्यः न कश्चिच्छब्दो वाचक इति वाच्यवाचकभावनिवृत्तौ विशेषणमनर्थकम् एते न वाच्या एते न वाचका इति ।

(१) पुनरेतदस्त्यानन्त्या—पा० १ पु० ।
(२) उच्यन्ते—पा० १ पु० ।

यत्पुनरेतद्व्यभिचारादिति ? न, व्यभिचारविषयापरिज्ञानात्—व्यभिचारी हि नाम स ज्ञेयः यः स्वविषयतज्जातीयवृत्तित्वे सत्यन्यत्र वर्त्तते, न पुनरयं सच्छब्दः स्वविषयव्यतिरेकेणान्यत्र वर्त्तते । तस्मादस्थाने व्यभिचारदेशनेति । हेतुभावानभ्युपगमाच्च । केन चात्र हेतुरभिधीयते द्रव्यं गुणः कर्म सत्त्वादिति । तस्मादयुक्तमेतदपि । भेदवाचकत्वप्रतिषेधाद् द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति न वक्तव्यम्, व्याघातात् । न च कश्चिच्छब्दो द्रव्यवाचकः द्रव्यसच्छब्दयोश्च सामानाधिकरण्यमिति व्याहतम् ।

यत्पुनरेतत् तद्गतो नास्त्यन्यत्वादिति ? न किल(१)सच्छब्देन तद्भेदा घटादयो गम्यन्ते तद्द्रव्यघटादिभेदानाक्षेपात् सामानाधिकरण्याभाव इति ? । तच्च उक्तोत्तरत्वात्—उक्तोत्तरमेतत् सद्द्रव्यशब्दयोरेकविषयत्वात् सामानाधिकरण्यमिति । तद्द्रघटादिभेदानाक्षेप इति चायुक्तम् सच्छब्देन सत्तासाधनानां द्रव्यगुणकर्मणामाक्षेपात् । सत्ताशब्देन द्रव्यगुणकर्माणि नाक्षिप्यन्ते न पुनः शब्देन शक्यते वक्तुं(२) सत्ताशब्देनापि गुणभूतानि गम्यन्त इति । सदिति चायं अभिधानशब्दः कस्तस्याभिधेयो योऽस्मात् प्रतीयते स तस्यार्थ इति । कोऽस्यार्थः ? विभज्यते सत्ता तद्योगोऽर्थान्तरमिति त्रयोऽर्थाः । तत्र प्रधानोपसर्जनभावविवक्षायां प्रधानं साधनं गम्यते । अङ्गं सत्ता च तद्योगश्च । किंकृतः प्रधानाङ्गभावः ? अर्थकृतः—यदा सत्ता किञ्चित्कुरुते तदा सत्ता विशेषणं पदार्थमुपादाय किञ्चित् करोति तत्प्रधानम् । अङ्गं सत्ता प्रधानप्रत्ययहेतुत्वा-

(१) न खलु—पा० १ पु० ।

(२) सत्त्वमुक्तम्—पा० १ पु० ।

त् । यस्मात् सत्तया पदार्थो विशेष्यते अङ्गहीने प्रत्ययनिवृत्तेः यत्र तदङ्गं सत्तादिकं नास्ति न तत्र सदिति प्रत्ययः । तदेवं तद्द्रव्यघटादिभेदानाक्षेपादित्ययुक्तम् ।

यत्पुनरेतत्सच्छब्दः सत्तायां प्राधान्येन वर्त्तते इति तत्र वर्त्तमानस्तद्वत्युपचर्यत इति ? तन्न सच्छब्दाविषयापरिज्ञानात्—न भवता सच्छब्दस्य विषयो व्यज्ञायि, क एवमाह सच्छब्दः सत्तायां प्राधान्येन वर्त्तत इति, यथा च सच्छब्दस्य द्रव्यगुणकर्माणि सत्तासाधनभावाद्विषय इति तथा चोक्तम् । एतेन भेदानामानन्त्यं प्रत्युक्तम् । सच्छब्दस्य विषयः सत्तासाधनं विषयश्च सत्तासाधनभूत एक एवेति ।

यत्पुनरेतत्तद्वति च न गुणसारूप्यात् प्रत्ययसङ्क्रान्तिर्यथा स्वामिशब्दस्य भृत्य इति । अस्यार्थः स्वाम्यनुकारित्वाद्भृत्ये स्वामिशब्द इति ?। एतत्तु न बुद्ध्यामहे प्रत्ययानां सङ्क्रान्तिरिति । यदि स्वामिप्रत्ययविषयत्वं तन्न प्रत्ययसङ्क्रान्तिः न हि स्वामिप्रत्ययो भृत्ये भवति, केवलं गुरूनां पितॄनां वा सम्पश्यन् स्वामिशब्दं गुणभूतं तत्र प्रयुङ्क्ते । तथा च भृत्यः स्वाम्यर्थकारित्वात्(१) भृत्यः स्वामीत्युपचर्यते(२) न पुनरेवं सत्ताशब्दः कदाचिदपि द्रव्यादिषु वर्त्तत इति । यदा तु सतां भावः सत्तेति तदा सतां विशेषकत्वाद्गुणभूतानां सत्ताशब्देनाभिधानं विशेषकत्वमुपचारः । एतेनैव गुणोपरागाद्यथा नीलः स्फटिक इति प्रत्युक्तम्(३)।

यत्पुनरेतत् क्रमवृत्त्यभावाद्युगपदसम्भवाच्चेति । अस्यार्थः । सत्ताशब्दः सत्तायां किल वर्त्तित्वात् तद्वति वर्त्तत इति । न चैवं

(१) करणात्—पा० ६ पु०। (२) उच्यते—पा० ६ पु०।
(३) एतत् प्रत्युक्तम्–पा० ६ पु०।

पश्यामः युगपदपि न सम्भवति सत्ताप्रत्ययश्च द्रव्यप्रत्ययश्च न युगपद्भवतः ? । एतदपि न, उक्तोत्तरत्वात्—उक्तोत्तरमेतत् नात्र क्रमो न युगपत्प्रत्ययः सत्प्रत्ययस्य साधनविषयत्वात् । एतेनायथार्थज्ञानोत्पत्तिप्रसङ्गादिति प्रत्युक्तम् । एवं हि कुहेतु-मतानिरासादुव्यवस्थितं व्यक्त्याकृतिजातयः पदार्थ इति ।

नजातिशब्दो भेदानां वाचक इति च विशेषणानर्थक्यम् न हि कश्चिच्छब्दो भवता भेदानां वाचकत्वेनाभ्युपगम्यते विशेषणं नाम विशेष्ये (च) सति सामान्यप्रतिपत्तौ (च) भवति नास्य कि-ञ्चिद्विशेष्यमस्ति । न च जातिशब्दस्य कश्चित्पदार्थो वाच्योऽभ्यु-पगम्यते तस्माद्विशेषणानर्थक्यम् । विरोधश्च यदि चायं जाति-शब्दो भेदानां वाचकोऽभविष्यदपि तर्हि जातिशब्द एव नाभवि-ष्यत् न ह्यन्य(पदार्थ)वाचकानां तच्छब्दत्वं सम्भवति । कथं वा भेदवाचकत्वे सति जातिशब्द इत्युच्यते । यच्चोच्यते न जातिशब्दो भेदानां वाचक इति तथा तत् । को हि स्वस्थात्मा(१) जातिश-ब्दवाच्यान् भेदानभ्युपैति । यदि च जातिशब्दवाच्या भेदा न भवन्ति अन्यशब्दवाच्यास्तर्हि प्राप्नुवन्ति । अथान्यशब्द-वाच्या अपि न भवन्ति ते न जातिशब्दवाच्या नान्यशब्दवाच्या इत्युभयावाच्यत्वे किमस्य विशेषणस्य सामर्थ्यं न जातिशब्दो भेदानां वाचक इति । अत एवं वक्तव्यं(२) न वाच्या भेदा अवाचकाः शब्दा इति । अथ मन्यसे परमतव्यपेक्षयैतदुच्यते न जातिशब्दो भेदानां वाचक इति । नानभ्युपगमात् न हि कश्चि-त्तान्त्रिकोऽस्ति यो जातिशब्दवाच्यान् भेदान् प्रतिपद्यते जाते-रप्यवाचकत्वे व्याघातो जातिशब्द इति । न हि यो यस्यावा-चकः स तच्छब्द इति शक्यं वक्तुम् न जातिशब्दो भेदानां

(१) सुस्थात्मा–पा० १ पु० । (२) वाच्यम्–पा० १ पु० ।

वाचक इति । कस्य तर्हि वाचकः भेदवाचकत्वप्रतिषेधादन्यवाचकत्वमायातम् । अथान्यवाचकत्वमपि नेष्यते ऽर्थं विशेषणं जातिशब्दो भेदानां न वाचक इति । सर्व एव शब्दा अर्थानां न वाचका इति युक्तं वक्तुम्(१) अथावाचकाः शब्दा अवाच्या अर्था इत्ययुक्तं चैतत् व्याघातात्—अवाचकाश्च शब्दा भवन्ति अवाचकत्वं च शब्दानां शब्देनैव प्रतिपाद्यत इत्यवाचकत्वे शब्दानां प्रतिज्ञाहेत्वोर्व्याघातः न हि जातिशब्दो भेदानां वाचक इति प्रतिज्ञाहेतुरानन्त्यादिति । उभयं च वचनात्मकमित्युभयस्यावचनात्मकत्वाद्व्याघातः(२) । शब्दांश्चावाचकान् प्रतिपद्यमानेन लोकप्रतिपादनोपायोऽन्यो वक्तव्यः । अन्यथाभ्युपगत(३) इति चेत् ?—अथ मन्यसे न मया शब्दा अवाचका अभ्युपगम्यन्ते नाप्यर्था अवाच्याः अपि तु यो भवद्भिर्वाच्यवाचकन्यायोऽभ्युपगम्यते सोऽस्माभिर्निराक्रियते । अस्माकं तु शब्देनान्यापोहलक्षणा जातिरभिधीयत इति ? विशिष्य वक्तव्यम् यद्यन्यथा शब्दा अर्थानामभिधायका (भवन्ति) इति ? विशिष्य वक्तव्यम्—अस्मत्प्रक्लृप्तजात्यादिव्यतिरेकेण जात्यादिशब्दा न जात्यादीनां वाचका इति । स्वरूपानभिधानाच्च । न च समानप्रत्ययकारणता(४)व्यतिरेकेण जातेः स्वरूपं निर्देष्टुं शक्यम् न चानुवृत्तिप्रत्ययः प्रत्याख्यातुं शक्यः । न च विशेषप्रत्ययेनाकस्माच्छक्यं भवितुं यतोऽयं प्रत्ययः सा जातिरिति नास्ति विवादः । एष तावद्यथाश्रुतिवाक्ये दोषः । अथ जातिशब्दावाच्यत्वेन

---

(१) युक्तमुक्तम्-पा० १ पु० ।

(२) अवाचकत्वाद्व्याघातः-पा० ६ पु० ।

(३) अभ्युपगम—पा० ६ पु० ।

(४) कारणत्व—पा० १ पु० ।

भेदा अपि(१) पक्षीक्रियन्ते । एतस्मिन्नपि प्रतिज्ञार्थे यावन्त एते वाक्यदोषास्ते सर्वे प्रसज्यन्ते एवमेकदेशपक्षीकरणेऽपि विशेषणविशेष्यभावानुपपत्तेः पूर्वदोषानुवृत्तिः ।

यदपीदमुच्यते द्रव्यसच्छब्दयोः सामानाधिकरण्यमिति ? तदपि न, व्याघातात् । द्रव्यसच्छब्दयोश्च सामानाधिकरण्यं न च भेदवाचकाः शब्दा इति व्याहतम् । उपचारतो न व्याघात इति चेत् ?— अथ मन्यसे सद्द्रव्यशब्दावेतौ उपचारतोऽभिधीयेते। कथमिति ? द्रव्यशब्देनाद्रव्यव्युदासः सच्छब्देनासद्व्युदासः तावेतावसदद्रव्यव्युदासरूपेण प्रवर्त्तमानौ एकमर्थं ब्रुवात इति समानाधिकरणावित्युच्यते मुख्यतस्तु न कश्चिद्विधानतः शब्दो वाचक इति ? न मुख्यासम्भवात् मुख्यतः सद्द्रव्यशब्दप्रयोगे सति तेन सामान्यादतथाभूत उपचार इति युक्तम्, न त्वेवं वादिनां प्रधानमस्ति । न च प्रधानमन्तरेणोपचारः सम्भवति । न चान्यापोहवादे उपचारो युक्तः उभयोः प्रधानशब्दत्वात् । यथा सिंहशब्दः सिंहे वर्त्तते ऽसिंहरूपव्युदासेन तथा माणवकेऽपीति तुल्यवृत्तित्वात् कस्मादुपचार इति ।

यत्पुनरेतदन्यशब्दार्थापोहः(२) शब्दार्थ इति ? तदप्ययुक्तम् विधानशब्दार्थासम्भवे सत्यास्या प्रतिपत्तिः(३) यदि विधानशब्दार्थो भवति ततो विधीयमानशब्दार्थप्रतिपत्तौ सत्यां तस्यान्यत्र(४) प्रतिषेधः इत्युपपन्नः प्रतिषेधः यस्य पुनर्विधीयमानः पदार्थो नास्ति तस्यास्यां प्रतिपत्तिमन्तरेण कथं प्रतिषेधः(५) यावच्चेतरं न प्रतिपद्यते तावदितरं न प्रतिषेधतीति ।

---

(१) भेदा एव—पा० १ पु० । (२) अन्यार्थापोहः—पा० १ पु० ।
(३) प्रवृत्तिः—पा० १ पु० । (४) तस्माद्यत्र—पा० ६ पु० ।
(५) मन्तरेण कस्य प्रतिपत्तिमन्तरेण कस्य प्रतिषेधः—पा० ६ पु० ।

यथा गौरिति पदस्यार्थोऽगौर्न भवतीति यावच्च गां न प्रतिपद्यते तावद् गवि प्रतिपत्तिर्न युक्ता यावच्च गां न प्रतिपद्यते तावदगवीत्युभयप्रतिपत्त्यभावः ।

यश्चायमन्यापोहः अगौर्न भवतीति गोशब्दस्यार्थः स किं भावोऽथाभाव इति ? यदि भावः किं गौरगौरिति ? यदि गौर्नास्ति विवादः, अथागौर्गोशब्दस्यार्थः ? अहो शब्दार्थकौशलम् । अभावस्तु न युक्तः प्रैषसम्प्रतिपत्त्योराविषयत्वात्, न हि गोशब्दश्रवणादभावे प्रैषो न वा सम्प्रतिपत्तिः, शब्दार्थश्च प्रतिपत्त्या प्रतीयते । न च गोशब्दादभावं कश्चित्प्रतिपद्यत इति ।

अन्यापोहश्च शब्दार्थ इत्ययुक्तम् अव्यापकत्वात्—यत्र द्वैराश्यं भवति तत्रेतरप्रतिषेधात्तदितरः प्रतीयते यथा गौरिति पदे गौः प्रतीयमानः अगौः प्रतिषिध्यमानः, न पुनः सर्वपद एतदस्ति, न ह्यसर्वं नाम किञ्चिदस्ति यत्सर्वपदेन निवर्त्येत । एकाद्यव्युदासाद् व्यापकमिति चेत् ?—अथ मन्यसे एकाद्यसर्वं तत् सर्वशब्देन निवर्त्यते ? । नन्, स्वार्थापवाददोषप्रसङ्गात् । एवं सत्येकाद्यव्युदासेन प्रवर्त्तमानः सर्वशब्दः अङ्गस्य प्रतिषेधादङ्गव्यतिरिक्तस्य चाङ्गिनो ऽनभ्युपगमात् अनर्थकः स्यात् । एवं सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमानाः समुदायिव्यतिरिक्तसमुदायानभ्युपगमादनर्थकाः प्राप्नुवन्तीति । द्व्यादिशब्दानां च समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानानामसमुच्चयात् द्व्यादिशब्दानामनर्थकत्वम् ।

क्रियारूपत्वाच्चापोहस्य स्वविषयो वक्तव्यः—अगौर्न भवतीति अयमपोहः किं गोविषयो वाऽगोविषय इति । यदि गोविषयः ? कथं गोर्गव्येवाभावः । अथागोविषय इति मन्यसे ? कथमन्यविषयादपो-

हादन्यत्र प्रतिपत्तिः न हि खदिरे छिद्यमाने पलाशो छिन्नो भवति । अथागोर्गवि प्रतिषेधः अगौर्गौर्न भवतीति ? । केन गोरगोत्वं प्रसक्तं यत्प्रतिषिध्यत इति । कथं वा गवि गोप्रतिपत्तिमन्तरेण प्रतिषेधः, न ह्युत्तरपदार्थप्रतिपत्तिमन्तरेण प्रतिषेधं पश्यामः । उक्तं चात्र आद्या प्रतिपत्तिर्न प्राप्नोतीति । आद्यप्रतिपत्तिं चान्तरेण न प्रतिषेध इति ।

इतश्च न युक्तोऽपोहः विकल्पानुपपत्तेः—योऽयमगोरपोहो गवि, स किं व्यतिरिक्त आहोस्विदव्यतिरिक्त इति ? । यदि व्यतिरिक्तः ? किमाश्रितोऽनाश्रितो वेति । यद्याश्रितः आश्रितत्वाद्गुण इति गोशब्देन गुणोऽभिधीयते, न गौरिति, गौस्तिष्ठतीति सामानाधिकरण्यं न प्राप्तम् । अथानाश्रितः ? केनार्थेन षष्ठी गोरपोह इति । अथाव्यतिरिक्तः ? गौरेवासाविति न किञ्चित्कृतं भवतीति ।

अयं चापोहः प्रतिवस्त्वेकोऽनेक इति वा वक्तव्यः । यद्येकोऽनेकगोसम्बन्धी तदा गोत्वं तादृशि । अथानेकस्ततः पिण्डवदानन्त्यादाख्यानानुपपत्तेरर्थप्रत्ययो न युक्तः ।

इदं च तावत्प्रष्टव्यो जायते भवान् किमयमपोहो वाच्योऽथावाच्य इति ? । यदि वाच्योऽनैकान्तिकः शब्दार्थः अन्यापोहः शब्दार्थ इति । अनवस्था वा—अथानपोहव्युदासरूपेणाभिधीयते अपोहस्तस्याप्यन्य इत्यनवस्था । अथावाच्योऽन्यशब्दार्थापोहं(१) करोतीति व्याहतम् । यदि च शब्दस्यापोहो नाभिधेयार्थः ? अभिधेयार्थव्यतिरेकेण स्वार्थो(२) वक्तव्यः । अथ स एवास्य स्वार्थः ? तथापि व्याहतम्—अन्यशब्दार्थापोहं स्वार्थे कुर्वती श्रु-

(१) शब्दार्थान्तरापोहं—पा० ६ पु० ।
(२) स्वार्थोऽभिधेयो वक्तव्यः—पा० १ पु० ।

निरभिधत्त इत्युच्यते इति तस्य वाक्यस्यायमर्थः तदानीं भव-
त्यन्यदनभिदधानोऽभिधत्त इति । अनेकमिति चास्य पदस्य
घ्राादिविषयत्वात् सामान्याधिगतौ विशेष आश्रयितव्यः न
ह्ममाति विशेपाश्रयणे सामान्यशब्दाद्विशेषमतिपत्तिर्युक्तेति। नीलो-
त्पलशब्दयोश्च प्रधानत्वाद्विशेषणविशेष्यभावानुपपत्तौ विशेष-
णस्य पूर्वनिपात इत्युभयोः प्रधानत्वान्न प्राप्तिः । एतेन राज-
पुरुषशब्दौ व्याख्यातौ । समानाधिकरणार्थश्चान्यापोहवादि-
ना वाच्यः । यस्य चान्यापोहः शब्दार्थस्तेनानीलानुत्पलव्युदा-
दासौ कथं समानाधिकरणाविति वक्तव्यम् । यस्य पु-
नर्विधीयमानः शब्दार्थस्तस्य जातिगुणविशिष्टं नीलोत्पल-
शब्दाभ्यां द्रव्यमभिधीयते जातिगुणौ च द्रव्ये वर्त्तेते न
पुनरनीलानुत्पलव्युदासौ, तस्मात् समानाधिकरणार्थोनास्ती-
ति । तदेवमन्यापोहो यथा यथा विकल्प्यते तथा तथा
प्रमाणवृत्तं(१) बाधत इति ॥

कथं पुनर्ज्ञायते नाना व्यक्त्याकृतिजातय इति ? ।
अधिगतत्वात् प्रश्नानुपपत्तिरिति चेत् ?—अधिगता व्यक्त्या-
कृतिजातयो याशब्दादिसूत्रैरधिगतत्वात् प्रश्नोऽनुपपन्नः ? ।
न, निमित्तत्रैविध्ये सति तद्विशेषविषयज्ञापनार्थत्वात् प्रश्नस्य,
गोशब्द उच्चरन् प्रधानोपसर्जनभावेन निमित्तत्रयं प्रति-
पादयतीति याशब्दादिसूत्राणामर्थः, एवं च सति तद्विशेषविषय-
ज्ञापनार्थो युक्तः प्रश्नः—कतमा तत्र व्यक्तिः ? कतमा आकृतिः ?
कतमा जातिरिति ? व्यक्त्याकृतिजातीनां भेदो लक्षणभे-
दात् । किं पुनर्व्यक्तेर्लक्षणमस्ति ? व्यक्तिलक्षणप्रतिपादनार्थं
व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति सूत्रम् ॥

---

(१) वृत्तत्वं—पा० १ पु० ।

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः ॥ ६८ ॥

तत्र व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति—यद्द्रव्यमुपलब्धिलक्षणप्राप्तानां स्पर्शान्तानां गुणानामाश्रयः तन्मूर्च्छितावयवत्वात् मूर्त्तिरिति चोच्यते व्यक्तिरिति च । एतत्तु न बुद्ध्यामहे किमिदमवयविद्रव्यस्य लक्षणम् ? आहो पदार्थत्वेन त्रयाणां प्रसक्तानां जात्याकृतिव्यवच्छेदकं व्यक्तिलक्षणमिति ? । वयं तु ब्रूमो नात्रावयवी व्यवच्छेद्योऽपि तु जात्याकृतिपदव्यतिरिक्तस्य व्यक्त्यादस्यार्थो वक्तव्य इति । सा च व्यक्तिर्या न जातिर्नाकृतिस्तस्या अनेन सूत्रेण सङ्ग्रहः व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति । गुणाश्च विशेषाश्च तदाश्रयश्चात्र तच्छब्दलोपाद्गुणविशेषा, आश्रयशब्देन द्रव्यमुच्यते कर्मापि गुणविशेषशब्दाल्लभ्यते गुणेभ्यो विशेषाः गुणविशेषा इति । गुणविशेषग्रहणं किमर्थं ? गुणपदार्थेन सङ्गृहीताया आकृतेर्निराकरणार्थम्—आकृतिः संयोगविशेषः सा च गुणग्रहणेन सङ्गृहीतेति तन्निराकरणार्थं गुणविशेषग्रहणम् । गुणविशेषा इत्यत्र द्विधा विग्रहः गुणाश्च ते विशेषा इति च गुणेभ्यो विशेषा इति च । आश्रयशब्दसमानाधिकरणो मूर्त्तिशब्दो द्रव्ये वर्तते मूर्च्छते इति मूर्त्तिशब्देन द्रव्यमुच्यते । एवं च प्रतिपदं लक्षणं सिध्यति । एवं च रूपाकाशाद्यवरोधः—यदि प्रतिपदमेतद्व्यक्तिलक्षणं भवति ततो रूपादयश्चाकाशादयश्च व्याप्यन्ते अन्यथा तु (न) लक्षणमव्यापकं स्यादिति(१) । अथवा गुणविशेषाणामाश्रय इति गुणाश्च विशेषाश्च गुणविशेषाः तेषामाश्रयो द्रव्यं तत्र मूर्च्छन इति मूर्त्तिः ॥

---

(१) अव्यापकं भवति—पा० १ पु० ।

आकृतिर्जातिलिङ्गाख्या ॥ ६९ ॥

आकृतिर्जातिलिङ्गाख्या । जातिर्जातिलिङ्गानि च प्रख्यायन्ते यया तामाकृतिं विद्यात् । सा च नान्या सत्त्वावयवानां नियताद्व्यूहात्—नियतव्यूहाः खल्ववयवा जातिमनुमापयन्ति । शिरःपाण्यादिमदाकारसामान्येन गोत्वं व्यज्यते इति । शिरःपाण्यादीनां चा वावयविशेषदर्शनेन । कदाचित्पुनरियमाकृतिः पदार्थत्वं जहाति । क्व पुनर्जहाति ? यत्राकृतिव्यङ्ग्या जातिर्न भवति यथा मृत्सुवर्णरजतमिति(१) आकृतौ नियमो न जातौ सर्वाकृतिर्जातिलिङ्गमिति न पुनः सर्वा जातिराकृत्या लिङ्ग्यते ॥

समानप्रसवात्मिका जातिः ॥ ७० ॥

समानप्रसवात्मिका जातिः । यया भिन्नान्यनेकानि वस्तूनि इतरेतरतोनुवृत्तिप्रत्ययहेतुत्वेन व्यवतिष्ठन्ते सा जातिः । यथेमानि कुण्डानीत्यनुवर्त्तन्ते नेमानि कुण्डानीति व्यावर्त्तन्ते तदेकं सन्निमित्तमनुवृत्तिकारणं यत्सामान्यविशेषो जातिरिति । तत् समानप्रसवोत्पत्तिकारणं जातिरिति जातौ नियमो न समानप्रसवोत्पत्तौ, जातिमन्तरेणापि दृष्टत्वात्(२)- जातिमन्तरेणापि समानप्रसवो दृष्टः यथा पाचकादिषु, तस्माद्व्यवस्थितं व्यक्त्याकृतिजातयः(३) पदार्थ इति । गवादिष्वनुवृत्तिप्रत्ययो दृष्टः पिण्डव्यतिरिक्तालिङ्गाद्भवतीति(४) विशेषवत्त्वान्नीलादिप्रत्ययवदिति । गोतोऽर्थान्तरं गोत्वं भिन्नप्रत्ययविषयत्वात् रूपस्पर्शव-

---

(१) मृत्सुवर्णरजतादि—पा० १ पु० ।

(२) अन्यथापि दृष्टत्वात्—पा० १ पु० ।

(३) जात्याकृतिव्यक्तयः—पा० ६ पु० ।

(४) निमित्ताद्भवतीति—पा० १ पु० ।

त्ययवदिति। गोतोऽर्थान्तरं गोत्वं व्यपदेशशब्दाविषयत्वात् चैत्राश्ववत्, गोर्गोत्वानुवृत्तिप्रत्यया भिन्ननिमित्ता विशेषवत्(१) रूपादिप्रत्ययवदिति ॥

संशयस्य प्रमाणानां विचारस्तद्व्यवस्थितिः।
शब्दस्य तत्त्वं प्रामाण्यं पदार्थाश्चेह कीर्त्तिताः ॥

इति—औद्द्योतकरे न्यायवार्त्तिके द्वितीयाध्यायस्य द्वितीयमाह्निकम्(२) ॥

समाप्तश्चात्र द्वितीयोऽध्यायः ॥

---

(१) विशेषवत्त्वात्—पा० १ पु०।

(२) उद्द्योतकरकृतं न्यायसूत्रद्वितीयाध्यायवार्त्तिकमिति क्वचित्। अत्र प्रथमादर्शपुस्तके लिपिकालो लेखकेन एवंरूपेण लिखितः। "इत्याचार्यश्रीउद्द्योतकरकृतौ द्वितीयोऽध्यायः समाप्तः ॥ शुभमस्तु ॥ संवत् १६०० शाके १४६५ विरोधकृतनामसंवत्सरे पुस्तक लिषितं वाराणसिमध्ये लिषायितं ब्राह्मण लिखितं धर्म्मदास कायस्थ ॥ मास माघवदी एकादशी ॥ श्रीविश्वेश्वरस्थानात् ॥ श्रि-(श्री) साहि आलमराज्ये ॥ प्रवर्त्तमाने ॥"

न्यायवार्त्तिके

तृतीयोऽध्यायः ।

आनन्तर्यात् प्रमेयपरीक्षा(१)। यद्विषयोऽहङ्कारः संसारं प्रतनोति यद्विषयं च तत्त्वज्ञानं संसारनिवृत्तिहेतुर्भवति तदानन्तर्यात् परीक्ष्यते । तच्चात्मादीत्यात्मा विचार्यते । किं पुनरस्य विचार्यम् ? किं शरीरेन्द्रियमनोबुद्धिव्यतिरिक्त आहो नेति ? न, धर्म्यप्रसिद्धेः—व्यतिरेकाव्यतिरेकावात्मधर्मौ, सति धर्मिणि धर्मो भवतीति धर्मी चात्राप्रसिद्धः, न चाप्रसिद्धे धर्मिणि धर्मयोर्विचारो युक्तः, तस्माद्धर्म्येव तावत्प्रतिपाद्यतामिति ? । न, इच्छादिसूत्र आत्मसद्भावः प्रतिपादितः प्रतिपादितत्वादनन्तरो विचारो

---

(१) अत्र भाष्ये परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यते इति वृत्तानुकीर्तनं प्रमेयपरीक्षां वर्त्तिष्यमाणां प्रति वृत्तायाः प्रमाणपरीक्षायाः हेतुभावं दर्शयितुम् । प्रमाणेन हि प्रमेयं परीक्ष्यते नान्येन । न च तदपरीक्षितं प्रमाणं प्रमेयपरीक्षायै प्रभवति । तस्मात् प्रमाणपरीक्षा हेतुः हेतुमती च प्रमेयपरीक्षेति । द्वादशविधं च प्रमेयमिति कस्मात् प्रथमत आत्मैव परीक्ष्यते न च प्रमेयान्तरमित्यत आह । तच्चात्मादीत्यत्रात्मा विचार्यते इति । आत्मैव हि प्रमेये प्रथममुद्दिष्टः लक्षितश्चेति तदनुरोधादात्मैव प्रथमं परीक्ष्यते न प्रमेयान्तरमिति । अत्र यद्यपि स्वरूपेणात्मन्येव परीक्षां प्रतिजानीते तथापि लक्षणपरीक्षाद्वारेण लक्ष्यपरीक्षणात् लक्षणपरीक्षैव द्रष्टव्या । यथा चेयमात्मलक्षणपरीक्षा तथोपरिष्टाद्दर्शयिष्यते । तदेतद्वार्त्तिककारो व्याचष्टे । आनन्तर्यादिति । किं पुनः प्रयोजनं प्रमेयपरीक्षायाः न हि निष्प्रयोजनं परीक्षन्ते प्रेक्षावन्त इत्यत आह । यद्विषयोऽहङ्कार इतीति तात्पर्यटीकायां श्रीवाचस्पतिमिश्राः ।

युक्त इति। अविप्रतिपत्तेः—न कश्चिद्वाद्यात्मसद्भावे विप्रतिपद्यते, किन्तु विशेषे विप्रतिपद्यते शरीरमात्रमात्मा बुद्ध्यादय आत्मा सङ्घात आत्मा व्यतिरिक्त आत्मेति। इयं च धर्मविशेषविप्रतिपत्तिरप्रतिपन्नात्मसत्त्वानां न युक्तेति युक्तो धर्मविचारः। असत्त्वप्रतिपादकप्रमाणासम्भवाच्च। न चात्मासत्त्वप्रतिपादकं प्रतिपादकं प्रमाणमस्तीत्यतश्च सद्भावे न विप्रतिपद्यत इति।

न नास्त्यजातत्वादित्येके—नास्त्यात्मा अजातत्वात् शशविषाणवदिति! तत्र नास्त्यात्मेतिपदं तावद्व्याहन्यते नास्तिशब्दसमानाधिकरणोऽयमात्मशब्दो नात्मनोऽसत्त्वं प्रतिपादयति। किं कारणम्? आत्मेति सत्त्वमभिधीयते, नास्तीति तस्य प्रतिषेधः, यच्च यत्र प्रतिषिध्यते तत्तस्मादन्यत्रास्ति, यथा नास्तिना समानाधिकरणो घटशब्दो न घटाभावं प्रतिपादयितुं शक्नोति, अपि तु देशकालविशेषे प्रतिषेधति नास्ति घट इति। देशविशेषे वा प्रतिषेधो गेहे नास्तीति, कालविशेषे वा प्रतिषेध इदानीं नास्तीति प्राङ्नास्ति ऊर्ध्वं नास्तीति, सर्वश्चायं प्रतिषेधो नानभ्युपगतघटसत्त्वस्य(१) युक्तः। तथा नास्त्यात्मेति किमयं देशविशेषे प्रतिषिध्यते अथ कालविशेष इति?। यदि तावद्देशविशेषे प्रतिषिद्धः(२) स आत्मनि न युक्तः अदेशत्वादात्मनः। न च देशविशेषप्रतिषेधा(३)दात्मा प्रतिषिद्धो भवति। अथायं भवतामभिप्रायः शरीरमात्मा न भवतीति? कस्य वा शरीरमात्मा यं प्रति प्रतिषेधः। शरीरे नास्त्यात्मेत्येवं(४)

(१) नालक्ष्यगतघटसत्त्वस्य—पा० ३ पु०।
(२) देशविशेषे प्रतिषेधः—पा० ४ पु०।
(३) देशविशेषे प्रतिषेधा—पा० १ पु०।
(४) आत्मेत्ययं—पा० ४ पु०।

प्रतिषेध इति चेत् ? कस्य वा शरीरे आत्मा यं प्रति प्रतिषेधः । क तर्ह्ययमात्मा ? न कचिदात्मा । किमयं नास्त्येव ? न नास्ति, विशेषप्रतिषेधात् । केयं वाचोयुक्तिः न च शरीरे, न चान्यत्र, न च नास्ति ? एषैषा वाचोयुक्तिः यद्यथाभूतं तत्तथा निर्दिश्यते न चायमात्मा कचिदपीति तस्मात्तथैव निर्देशः । न च कालविशेषप्रतिषेधोऽपि युक्तः आत्मनि त्रैकाल्यस्यानभिव्यक्तेः(१)-न ह्यात्मनि त्रैकाल्यमभिव्यते नित्यत्वात् नित्य आत्मेत्येतदुपरिष्टात् पूर्वाभ्यस्तसूत्रे प्रतिपादयिष्यामः । तस्मान्न कालविशेषप्रतिषेधोऽपि । आत्मप्रतिक्षेपं च(२) कुर्वाणेनात्मशब्दस्य विषयो वक्तव्यः । न ह्येकं पदं निरर्थकं पश्यामः । अथापि शरीरादिविषयमात्मशब्दं प्रतिपद्येथाः एवमप्यनिवृत्तो व्याघातः । कथमिति ? नास्त्यात्मेति वाक्यस्य तदानीमयमर्थो भवति शरीरादयो न सन्तीति । अथ यं भवन्त आत्मानं कल्पयन्ति स नास्तीति ? न वयमात्मानं कल्पयामः-कल्पना हि नामातथाभूतस्य तथाभाविभिः सामान्यात् तद्धर्मारोपेण तत्प्रत्ययविषयत्वम् । न चात्मानमेवम्भूतं प्रतिपद्यामहे ।

यं भवन्त आत्मानं कल्पयन्तीति च ब्रुवाणो भवान् प्रष्टव्यो जायते कथं वयमात्मानं कल्पयाम इति । किं सत्त्वेनाथासत्त्वेन वा । यदि सत्त्वेन ? किमसतः सता साधर्म्यं येन कल्पनाविषय आत्मा, आत्मसामान्यं चानात्मनो ब्रुवता आत्माभ्युपगतो भवतीति, न ह्यसतः सता सामान्यमस्तीति(३) । अथ शरीरादिविषयमहङ्कारमात्मनि कल्पयित्वा विप-

(१) त्रैकाल्यात् तस्यानभिव्यक्तेः—पा० १ पु० ।

(२) प्रतिषेधं च--पा० ४ पु० ।

(३) सता साधर्म्यमस्तीति--पा० ४ पु० ।

र्थस्यति(१) एवं शरीरादिव्यतिरिक्ताऽहङ्कारविषयसत्त्वाभ्युपगमादनिवृत्तो व्याघातः । अथ मन्यसे—एकपदस्य नावश्यमर्थेन भवितव्यमिति यथा शून्यं तम इति ? तन्न, व्याघातानिवृत्तेः शून्यशब्दस्य तावदयमर्थः यस्य रक्षिता द्रव्यस्य न विद्यते तद्द्रव्यं श्वभ्योहितत्वाच्छून्यमित्युच्यते, तमःशब्दस्याप्यनुपलब्धिलक्षणप्राप्तानि द्रव्यगुणकर्माणि विषयः यत्र यत्रासन्निधिस्तेजसस्तत्र तत्र द्रव्यादि तमःशब्देनोच्यते । तमःशब्दश्चानर्थक इति ब्रुवाणः स्वसिद्धान्तं बाधते चतुर्णामुपादेयरूपत्वात्तमस इति, तस्मान्नानर्थकं पदमिति ।

नास्त्यात्मेति चैवंब्रुवाणः सिद्धान्तं बाधते । कथमिति ? रूपं भदन्त नाहं वेदना संस्कारो(२) विज्ञानं भदन्त नाहमिति एवमेताद्भिक्षो रूपं न त्वं वेदना संस्कारो विज्ञानं वा न त्वमिति । त एते स्कन्धा रूपादयोऽहंविषयत्वेन(३) प्रतिषिद्धाः(४) विशेषप्रतिषेधश्चायं न सामान्यप्रतिषेधः, आत्मानं चानभ्युपगच्छता सामान्यमेव प्रतिषेद्धव्यम् नाहं नैव त्वमसीति । अथैकशः प्रतिषेधेन(५) समुदायविषयोऽहङ्कार इति ? तथापि रूपादिस्कन्धपञ्चकव्यतिरेकेण समुदायो वक्तव्योऽहङ्कारविषयः तद्व्यतिरिक्तं च समुदायमहङ्कारविषयमभ्युपगच्छता(६) सञ्ज्ञा भिद्यते आत्मा समुदाय इति । अथाव्यतिरिक्तमेकप्रत्ययो न प्राप्नोत्यहमिति । न हि बहुष्वेकशब्दं(७) पश्यामः । न च रू-

(१) विपर्ययिष्यति—पा० १ पु० ।
(२) वेदना संज्ञा संस्कारो—पा० ४ पु० ।
(३) अहङ्कारविषयत्वेन—पा० १ पु० ।
(४) प्रसिद्धाः—पा० ४ पु० ।
(५) प्रतिषेधे—पा० १ पु० ।
(६) गच्छतः—पा० ४ पु० ।
(७) एकप्रत्ययं—पा० ४ पु० ।

पादिस्कन्धा एकशः समुदिता वा आत्मा इत्यहङ्कारप्रत्ययो-ऽतस्मिंस्तादिति प्राप्तः । भवतु मिथ्याप्रत्ययः किन्नो बाध्यत इति? कथं न बाध्यते यदा सम्यक्प्रत्ययानुकारिणोमिथ्याप्रत्यया भवन्ति । न चात्मानमनभ्युपगच्छता तथागतदर्शनमर्थवत्तायां व्यवस्थापयितुं शक्यम् । न चेदं वचनं नास्ति सर्वाभिसमयसूत्रे ऽभिधानात् । तस्मान्नास्त्यात्मेति ब्रुवाणः(१) सिद्धान्तं बाधत इति । तथा "भारं वो भिक्षवो देशयिष्यामि भारहारं च, भारः पञ्चस्कन्धा भारहारश्च पुद्गल इति । यश्चात्मा नास्तीति स मिथ्यादृष्टिको भवतीति" सूत्रम् ।

योऽप्ययं हेतुरजातत्वादिति अयमपि राश्यन्तरव्यवच्छेद-हेतुत्वाद्विरुद्धः जातमजातमिति च वस्तुधर्मावेतौ । किं पुनर्जातं किं चाजातमिति ? । यस्य कारणवतः सत्ता तज्जातम् । यस्या-कारणवतः सत्ता तदजातम् । किं कारणम् ? नञो जन्मप्रतिषेध-विषयत्वात्—अयं खलु नञ् प्रवर्त्तमानो जन्मनः प्रतिषेधं करोति नास्य जन्म विद्यत(२) इति । तदिदमजातमित्यात्मनः प्रति-षेधो न भवति यथानुदकः कमण्डलुरिति । अथायं भाव-प्रतिषेध एवाजातमिति ? तथापि प्रतिज्ञाहेत्वोरेकत्वम् । अजातमिति चायं धर्मः, न च धर्मः स्वतन्त्रो युक्तोऽन्यत्र समवायात्, य-त्तन्त्रोयं धर्मः स आत्मेति विरुद्धः । अथ धर्मोऽस्ति न धर्मीति ? तथाप्यनिवृत्तो व्याघातः स्वतन्त्रस्य धर्मस्यादर्शनात् । कश्चायमर्थोऽजातत्वादिति ? यदि चायमर्थो नास्य जन्मेति ततो-ऽसिद्धं(३) जन्मवानात्मा । किं पुनरात्मनो जन्म? निकायविशे-

(१) नात्मेति ब्रुवाणः—पा० ४ पु० ।
(२) जन्म प्रतिषेध इति—पा० १ पु० ।
(३) तदाऽसिद्धं—पा० ४ पु० ।

ष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिरपूर्वाभिराभिसम्बन्धः । अथा-जातत्वमकारणकत्वं ? तथा न कश्चि(१)दूबाध्यते विरुद्धश्च हेतु-रकारणकस्य नित्यत्वादसत्त्वं साधयतो नित्यतामापादयत इति विरुद्धो हेतुः । प्रतिज्ञाहेत्वोश्च विरोधः–प्रतिज्ञाया विषयो ना-स्त्यात्मेति, हेतोर्विषय आत्यन्तिकः सत्ताऽसम्बन्धः, तावेतौ प्रति-ज्ञाहेतू असत्सद्विषयत्वाद्विरुद्धौ । एतेन निर्हेतुकत्वाज्जन्महे-त्वनुपादानादकार्यत्वादकारणत्वादित्येवमादयस्तुल्यदोषा इति प्रत्युक्ताः ॥

यदपीदमुच्यते शशविषाणवदिति ? अयमप्यसिद्धो दृष्टान्तः । कथमिति? शशविषाणशब्दस्य सम्बन्धविषयत्वात् सम्बन्धप्रतिषे-धो न विषाणप्रतिषेधः । शशविषाणसम्बन्ध उदाहरणं भवि-ष्यतीति ? सोऽपि न युक्तः कदाचिद्विषाणेन शशस्य सम्बन्धो-पपत्तेः । लोकविरोध इति चेत्—अथ मन्यसे यदि शशे वि-षाणमस्ति ननु लोको विरुध्यत इति ? न विरुध्यते, कार्यकार-णभावप्रतिषेधद्वारेण लौकिकप्रवृत्तेः–लोकस्तावत् कार्यं का-रणं वा शशस्य विषाणं नास्तीत्येवं प्रतिषेधति यथा गोर्विषा-णस्य च कार्यकारणभावो न चैवं शशस्य विषाणस्य च कार्य-कारणभावः । न च कार्यकारणभावप्रतिषेधादसत्त्वम् । न हि यद्यस्य न कार्यं न कारणं(२) तन्नास्ति । यथा देवदत्तस्य घट इति । इदं च शशविषाणं नास्तीति ब्रुवाणः प्रष्टव्यः किमयं सा-मान्यप्रतिषेधोऽथ विशेषप्रतिषेध इति । यदि सामान्यप्रतिषेधः तन्न युक्तमशक्यत्वात् शशस्य विषाणं नास्ति इति गवादिविषा-णान्यपि शशस्य न सन्तीति प्राप्तम् । एतच्चाशक्यम् । न हि तानि

(१) किञ्चित्–पा० ४ पु० ।

(२) न हि यस्य यन्न कार्यं न कारणं—पा० ४ पु० ।

न सन्ति । अथ विशेषप्रतिषेधः किञ्चिद्विषाणं शशस्य प्रतिषिध्यते यस्य शशो न कार्यम् तच्च(१) शशस्य न कारणमिति ? सोऽयं कार्यकारणसम्बन्ध एव प्रतिषिध्यते । कार्यकारणसम्बन्धश्चान्यत्र दृष्ट इह प्रतिषिध्यते इति नात्यन्तासत्त्वप्रतिपादने दृष्टान्तो भवति । एतेन खपुष्पाद्यसत्त्वं व्याख्यातं वेदितव्यम् ।

नास्त्यात्मानुपलब्धेरिति चेत् ? अत्रापि प्रतिज्ञादिदोषो दृष्टान्तदोषश्च पूर्ववत् । यदनुपलब्धेरिति तदप्ययुक्तम् । अनुपलब्धिरसिद्धा प्रत्यक्षादिप्रमाणविषयत्वा(२)दात्मनः—प्रत्यक्षेण तावदात्मा उपलभ्यते । कथं ? लिङ्गलिङ्गिसम्बन्धस्मृत्यनपेक्षं विषयस्वभावभेदानुविधाय्यहमिति विज्ञानं(३) रूपादिज्ञानवत् प्रत्यक्षम् । यच्चापि भवान् मुक्तसंशयं प्रत्यक्षं प्रतिपद्यते तस्य कुतः प्रत्यक्षत्वमित्यत्रऽयं भवता विज्ञानमेव लिङ्गादिसम्बन्धनिरपेक्षं स्वात्मसंवेद्यं प्रतिपत्तव्यम् । अथ मन्यसे अस्त्ययमहंप्रत्ययो न पुनरस्यात्मा विषयः ? हन्त तर्हि निर्दिश्यतां विषयः । रूपादि विषय इति चेत् ?—अथ मन्यसे रूपादय एवाहङ्कारस्य विषयः तथाचोक्तमहङ्कारालम्बनोत्पत्तिनिमित्तत्वादात्मेत्युच्यते इति ? तन्न, असत्त्वात् प्रतिषेधाच्च—प्रतिषिद्धोऽहङ्कारो रूपादिषु रूपं नाहमेवमेतद्भिक्षो रूपं न त्वमिति । तस्माद्रूपादयः तावदहङ्कारस्य विषया न भवन्ति । न चायमहङ्कारो रूपादिषु कदाचिदपि दृष्टः । न हि भवति कदाचिदहं रूपमहं वेदनादय इति । ननु भवत्यहं गौरोऽहं कृष्ण इति ? न भवतीति ब्रूमः, कथं ? न ह्येतस्य द्रष्टुर्यदेतन्मम रूपं गौरमेतदहमिति प्रत्ययो भवति केवलं मतुप्लोपं कृत्वाऽहं गौर इति षष्ठ्यर्थे निर्दिशति । एवमेतन्न त-

(१) यच्च- पा० १ पु० ।   (२) गोचरत्वा-पा० ४ पु० ।
(३) ज्ञानं-पा० ४ पु० ।

त्त्वत इति कुत इति चेत् ?—अथ मन्यसे मतुप्लोपादयं षष्ठ्यर्थव्यपदेशो न तत्त्वत इति(१) को हेतुरिति ? ममप्रत्ययसमानाधिकरणस्य निर्देशात्–यस्मिन्नर्थे ममप्रत्ययोऽस्य भवति तत्रैवायमहङ्कारोऽपीति ममप्रत्ययसामानाधिकरण्याद्गम्यते मतुप्लोप इति । ममप्रत्ययसमानाधिकरणश्चायमहंप्रत्ययोऽन्यत्वे दृष्टः उपकारकत्वात्–उपकारके वस्तुनि ममप्रत्ययसमानाधिकरणोऽहंप्रत्ययो दृष्टः योऽयं सोऽहमिति । उक्तं चात्र रूपादिस्कन्धेष्वहंप्रत्ययोऽतस्मिंस्तदितिप्रत्यय इति । तदेवमहंप्रत्ययविषयत्वादात्मा तावत्प्रत्यक्षः अनुमानेनापि यथात्मोपलभ्यते तथोक्तमिच्छादिसूत्रे इति । आगमोऽप्यस्त्येव । तान्येतानि प्रमाणानि त्रीण्येकविषयतया प्रतिसन्धीयमानान्यात्मानं प्रतिपादयन्ति । न च प्रमाणान्तरं विप्रतिपत्तिहेतुरस्ति तस्मादनुपलब्धेरित्यसिद्धो हेतुः ।

सन्दिग्धश्चानुपलब्धेस्त्रिकारणत्वात्—अनुपलब्धिकारणानि त्रीणि उपलब्धोपलम्भनमुपलभ्यमिति । तत्रेयमनुपलब्धिर्भवन्ती कस्याभावादिति(२) सन्दिह्यते । यदि ब्रूषे उपलभ्यस्याभावादिति ? नन्वयं प्रतिज्ञार्थ एव । न च प्रतिज्ञा प्रतिज्ञां साधयतीत्यनुपलब्धिरहेतुः । या चेयमनुपलब्धिरात्मासत्त्वप्रतिपादिनायोपादीयते तस्याः क आश्रयः ? । यद्यात्मानं प्रतिपद्यसे ? व्याहतं भवति आश्रयश्च नास्ति चेति । अथानाश्रयः ? कः साधनार्थः न ह्यनाश्रयो धर्मः साध्यं साधयितुं शक्नोति । अथानुपलब्धिरपि नास्ति ? कः साधनार्थोऽनुपलब्धेरिति न ह्यसाधनं भवितुमर्हतीति ।

---

(१) इति इह–पा० १ पु० ।
(२) भावाद्भवतीति—पा० ४ पु० ।

अथ कल्पितस्यानुपलब्धिर्धर्म इति ? कथं कल्पितस्येति वाच्यम्—किं सत्त्वेनाथासत्त्वेन ? यदि सत्त्वेन ? नानुपलब्धिस्तस्य धर्मः, न हि स्थाणोः पुरुषत्वेन कल्पितस्य स्थाणुधर्माः प्रत्यवभासन्ते । अथासत्त्वेन कल्पितस्यानुपलब्धिर्धर्मः ? सिध्यत्वनुपलब्धिर्द्धर्मो वृथा तु कल्पना । किं कारणम् ? कल्पनाया अतथाभावात् । कल्पना हि नामातथाभावः असत्त्वेन चात्मा कल्पित इत्यसत्त्वेन नास्ति, असत्त्वेन चेन्नास्ति वृथा कल्पना । किमर्थं चायमात्मा असत्त्वेन कल्प्यते ? यदि हेत्वर्थमुपपन्नो हेतुर्यदर्थमुपात्तः स पुनरर्थो न सिध्यति, न हि यः पुरुषे स्थाणुधर्मानध्यारोप्य हेतुत्वेनापदिशेत(१) तस्यासौ स्थाणुः स्यादिति । तदेवमप्यनुपलब्धिरप्यहेतुः ।

रूपादिस्कन्धवाचकशब्दविषयव्यतिरिक्तविषय आत्मशब्दः रूपादिशब्देभ्योऽन्यत्वे सत्येकशब्दत्वात् घटशब्दवदिति(२) । एतेनाहंप्रत्ययो व्याख्यातः । असिद्धो दृष्टान्त इति चेन्न ? अत्रोक्तम्—यथा गुणव्यतिरिक्तो गुणीति । तमःशब्दादिभिरनैकान्तिक इति चेत् ?— अथ मन्यसे यथा रूपादिशब्देभ्योऽन्यत्वे सत्येकपदत्वे च तमःशब्दस्यार्थान्तराविषयत्वमेवमात्मशब्दस्यापीति ? तन्न, विरोधात्—तमःशब्दो निर्विषय इति ब्रुवाणः सिद्धान्तं बाधते । उपादायरूपत्वात्तमस इति । न चैतदस्माभिरभ्युपगम्यते तमःशब्दो निर्विषय इति । तमःशब्दस्य सविषयत्वे सूत्रव्याघातो द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भाभावस्तम इति ? । न सूत्रार्थापरिज्ञानात् निराकृततेजःसम्बन्धीनि द्रव्यगुणकर्माणि तमःशब्देनाभिधीयन्ते तस्मान्न सूत्रव्याघातः ।

(१) व्यपदिशेत्—पा० ४ पु० ।
(२) घटादिवदिति—पा० ४ पु० ।

अपरे तु जीवच्छरीरं निरात्मकत्वेन पक्षयित्वा सत्त्वादिसेवमादिकं हेतुं ब्रुवते। तन्न विकल्पानुपपत्तेः। निरात्मकमिति(१) कोऽर्थः। यदि तावदात्मनोनुपकारकमिति? न दृष्टान्तोऽस्ति। न हि किञ्चिदात्मनोऽनुपकारकमस्ति। अथात्मप्रतिषेधः आत्मा शरीरं न भवति? कस्यात्मा शरीरम् उत्तरपदविषयत्वाच्च निसः किं सात्मकमिति वाच्यम्—न ह्यसत्युत्तरपदे निसः प्रयोगं पश्यामः यथा निर्मशकमिति। अथ शरीरे आत्मा प्रतिषिध्यते? सिद्धं साधयति कस्य वा शरीरे आत्मा विद्यते। अथ शरीरमात्मसम्बन्धि न भवतीति पुनर्दृष्टान्तो नास्तीति, सर्वे चैते विशेषप्रतिषेधाः, विशेषप्रतिषेधाच्च सामान्यमभ्युपगम्यते(२) एवं च सति यत् प्रतिषेद्धव्यं तदनुज्ञातं भवति। अथात्मशब्दोऽनित्यविषयो वर्णात्मकत्वात् तथापि नित्यशब्देनानैकान्तिकं शरीरादीनामात्मशब्दत्वात् सिद्धसाधनम्। अथ शरीरादिव्यतिरिक्तविषय आत्मशब्दोऽनित्यविषयः तथापि शरीरादिव्यतिरिक्तविषयाभ्युपगमे विरोधः। तदेवं यथायथा आत्मासत्त्वं विचार्यते(३) तथातथा न्यायं न सहत इति॥

परार्थाश्चक्षुरादयः सङ्घातत्वात् शयनासनादिवदिति। सङ्घातान्तरार्था इति चेत्?—अथ मन्यसे सत्यं सङ्घाताः परार्था भवन्ति ते तु सङ्घातान्तरार्थाः यथा शयनादय इति? न, सङ्घातस्याभ्युपगमे विरोधात् न हि रूपादिस्कन्धव्यतिरिक्तं सङ्घातं भवन्तः प्रतिपद्यन्ते न चासति सङ्घातान्तरे स-

---

(१) निरात्मकत्वमिति—पा० १ पु०।
(२) सामान्यमधिगम्यते—पा० ४ पु०।
(३) प्रतिज्ञायते—पा० ४ पु०।

ङ्घातानां सङ्घातान्तरार्थता भवति । अथ प्रतिपद्यते ? व्याहतं भव-
ति । अनिष्टप्रसङ्ग इति चेत् ?—अथ मन्यसे न मया सङ्घातान्त-
रं प्रतिपद्यते अपि त्वस्मिन् हेतौ सतीदमनिष्टं भवति परार्थ-
स्य सङ्घातान्तराविनाभावित्वात् यावत्परार्थं भवति तत्सर्वं स-
ङ्घातान्तरार्थं दृष्टमिति ? । न विरोधात् अनभ्युपगमाच्च—न
हि कश्चिद्व्यतिरिक्तात्मवादिनः सङ्घातः सङ्घातस्य परार्थं(१)
करोति तदुभयपक्षे संप्रतिपन्ने नानिष्टापादनं दृष्टमिति । विरोधा
च्च । यदि विवक्षितार्थव्यतिरेकेणानुमानस्याविवक्षितमपि विषयः
नन्वेतस्यां कल्पनायां सर्वमनुमानं व्याहन्येत । कथमिति ? यदि-
ष्टमनुमानत्वेन तदपि नानुमानं प्राप्नोति । यथा शब्दानित्यत्वे
कृतकत्वम् । किं कारणम् ? यथेदं कृतकत्वमनित्यत्वेनाविनाभूत(२)-
मनित्यत्वं साधयति । एवं दुःखशून्यानात्मकत्वमपि(३) सा-
धयति दुःखशून्यानात्मकत्व(४) वत्श्रोत्रग्राह्यत्वमपि साधयिष्यति
ततश्च न श्रोत्रग्राह्यः शब्दः कृतकत्वात् घटवदिति । अथानुमानेन
बाध्यते अयं प्रतिज्ञार्थ इत्यतोन हेतुः ? नन्वयमपि सङ्घातान्तरा-
र्थाश्चक्षुरादय इत्यागमेनानुमानेन च बाध्यते । यच्चापि भवान्
सङ्घातान्तरं प्रतिपद्यते तत्राप्यनिवृत्तं सङ्घातत्वमिति तेनापि स-
ङ्घातान्तरार्थं भवितव्यमिति एवं चानवस्था । न चैनां शक्तः क-
श्चित् प्रतिपादयितुमिति । यत एषा निवर्त्तते तदसंहतम् । अथासंह-
तं नैवास्ति ? असंहता(५) नभ्युपगमे सङ्घातानुपपत्तेर्व्याघातः

(१) परस्यार्थं करोति—इति शोधितम् ४ पु० ।
(२) अनित्येनाविनाभूत—पा० ४ पु० ।
(३) शून्यात्मकत्व—पा० ४ पु० ।
(४) दुःखशून्यात्मकत्व—पा० ४ पु० ।
(५) असङ्घाता—पा० ४ पु० ।

न हि कदाचिदसंहतप्रतिषेधे (१) सङ्घातः सिध्यति । अथानुमानं नैवास्तीति परः प्रतिपद्यते ? स कथं न प्रतिपद्यत इति प्रष्टव्यः यद्यनुमानबाधितत्वादनुमानं नास्ति ? अतिन्यायोऽनुमानेन च बाध्यते अनुमानं च नास्तीति । अतीन्द्रियार्थाधिगतिश्च कथम् (२) यद्यनुमानं नास्ति कथमतीन्द्रियार्थो गम्यते । आगमादतीन्द्रियार्थाधिगतिर्भविष्यतीति न युक्तम् आगमव्यतिरिक्तविषयत्वात् । कस्मादनुमानस्यागमव्यतिरिक्तो विषयः ? यथा स्तनयित्नुशब्दस्य हेतौ, न हि तत्र प्रत्यक्षं नागम इति ।

तदेवमात्मास्तीति समधिगतम् । तस्मिन् व्यपदेशस्योभयथा सिद्धेः संशयः । कः पुनरयं व्यपदेशः ? क्रियाकरणयोः कर्त्रा सम्बन्धाभिधानं व्यपदेशः—दर्शनं क्रिया करणं चक्षुः, करणस्य क्रियायाः कर्त्रा सम्बन्धः चक्षुषा पश्यतीति । स चायं व्यपदेशो द्वेधा भवति अवयवेन समुदायस्य, यथा मूलैर्वृक्षस्तिष्ठतीत्यत्र समुदायशब्देनावयवी वृक्षोऽभिधीयते इति । एकदेशेन चैकदेशान्तराणां यद्भिन्नजातीयैरारभ्यते तत्र ह्येकदेशदर्शनादेकदेशान्तराणि प्रतिपद्यन्ते तत्रापि(३) च व्यपदेशः स्तम्भैः प्रासादो ध्रियत इति । अन्येन चान्यस्य व्यपदेशः परशुना वृश्चतीति, परशुः करणं वृश्चतिः क्रिया ताभ्यां कर्त्तुरभिसम्बन्धः परशुना वृश्चतीति । अस्ति चायमिहापि व्यपदेशः चक्षुषा पश्यतीति । किमन्येनान्यस्य व्यपदेशः ? अथवा अवयवेनाप्यवयविनः ? अथैकदेशेनैकदेशान्तराणामिति ? क्रियाकरणकर्म्मणां वा कर्त्रा सम्बन्धो व्यपदेशः चक्षुषा वृक्षं पश्यतीति

(१) सङ्घातप्रतिषेधे—पा० ४ पु० ।

(२) इन्द्रियार्थावगतिः कथम्—पा० ४ पु० ।

(३) तदापि—पा० ४ पु० ।

क्रियाकरणकर्म्मणां कर्त्रा सम्बन्धः अस्ति चायमिहापि व्यपदेशः शरीरेण सुखदुःखमनुभवति । तत्र न ज्ञायते किं तत्त्वमिति ? अन्येनायमन्यस्य व्यपदेश इति तत्त्वम् ॥

कथम् ?—

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ १ ॥

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् । दृश्यतेऽनेनेति दर्शनं चक्षुः, स्पृशत्यनेनात्मा स्प्रष्टव्यमर्थमिति(१) स्पर्शनं त्वगिन्द्रियमुच्यते । दर्शनेन दृष्टमर्थं स्पर्शनेन प्रत्यभिजानाति यमद्राक्षं तं स्पृशामि यमस्प्राक्षं तं पश्यामीति एकविषयावेतौ प्रत्ययौ प्रतिसन्धीयेते प्रतिसन्धानं च नाम स्मृत्या सहैकविषयत्वम् । दर्शनस्पर्शनप्रत्यययोर्घटादिविषयत्वादसम्बन्ध इति चेत् ?—अथ मन्यसे यावेतौ दर्शनस्पर्शनप्रत्ययौ तौ घटादिविषयौ न व्यतिरेकमात्मनो व्यधिकरणत्वाद्गमयत इति ? । न सूत्रार्थापरिज्ञानात्—दर्शनस्पर्शनप्रत्ययावेककर्तृकाविति सूत्रार्थः । यदि चानुषक्तं गुणव्यतिरेकमप्येकविषयत्वेन साधयति न कश्चिद्दोषः । गुणव्यतिरेकोऽसिद्ध इति चेत् ? उक्तमेतद्यथा गुणव्यतिरिक्तो गुणीति । कार्यकारणभावात् प्रतिसन्धानमिति चेत् ? उक्तोत्तरमेतदिच्छादिसूत्र इति । अकार्यकारणभूतानां च प्रतिसन्धानेऽनेकान्तः(२) ॥

भावस्य भवित्रपेक्षत्वाद्वेति सूत्रार्थः—दृष्टिर्दर्शनम् स्पृष्टिः स्पर्शनमिति भावरूपावेतौ प्रत्ययौ भवितारं प्रतिपादयतः । न हि भावमनाधारं पश्यामः । उत्पत्तिवत् कर्माधा-

---

(१) स्प्रष्टव्यमिति—पा० १ पु० ।

(२) सन्धानेनानेकान्तः—पा० ४ पु० ।

रो भविष्यतीति न युक्तम् ? कर्मण्यसति दर्शनात् असत्यपि कर्मणि स्मृतेर्भावो भवतीति । न च विनष्टं कर्म भावस्या-धारो युक्तः ततो यदाधारो भावः स आत्मा । दर्शनस्प-र्शनग्रहणयो रूपादिविषयत्वा(१)न्न घटादिविषयत्वं ? न, रूप-र्शानुपलब्धौ तद्विशिष्टप्रत्ययदर्शनात्—यदाऽयमनुपलभ्यमानरू-पादिकं वस्तूपलभते तदाऽस्य तद्विशिष्टः प्रत्यय उपजायते य-था(२) नीलाद्युपरिस्थितस्फटिके प्रत्ययो रूपाद्यनुपलब्धौ भवति रात्रौ च(३) बलाकायां शुक्लादिरूपाग्रहणात् पक्षिप्रत्ययः । तस्माद्रूपस्पर्शव्यतिरिक्ते घटप्रत्ययः प्रतिसन्धानाच्च व्यति-रिक्तनिमित्तत्वम् । न हि नानाविषयौ प्रत्ययौ प्रतिसन्धीयेते । अस्ति च प्रतिसन्धानं यमद्राक्षं तं स्पृशामीति यमस्प्राक्षं तं पश्यामीति, तस्मादेकविषयत्वम् । सङ्घातकर्तृकौ दर्शनस्प-र्शनविषयौ प्रत्ययौ भविष्यत इति न युक्तम् सङ्घातस्य ना-नात्वाबाधनात् । सङ्घातः संहन्यमानतन्त्रो भवतीति संह-न्यमानं चानेकम् । अनेकं च प्रतिसन्धानप्रत्ययकारणं(४) न युक्तम्, नानाकर्तृकाणां नानाविषयाणां च प्रत्ययानामप्र-तिसन्धानात् । एकेन्द्रियप्रत्ययाविति चेत् ?-अथ मन्यसे यदेवेन्द्रियं दर्शनप्रत्ययस्य कारणं तदेव स्पर्शनप्रत्ययस्यापी-ति ?। तन्नाविषयत्वात्—चक्षुः खलु स्वविषयं प्रतिसन्धातु-मर्हतीति यमद्राक्षं स एवायमर्थ इति, न पुनः स्पर्शमिन्द्रि-यान्तरविषयत्वादिति । इन्द्रियान्तरवैयर्थ्यं वा एकैकमेवेन्द्रियम-

(१) रूपस्पर्शविषयत्वात्—पा० ४ पु० ।
(२) तदा—पा० ४ पु० ।
(३) रात्रौ तु—पा० ४ पु० ।
(४) अनेकप्रतिसन्धानकारणं—पा० ४ पु० ।

नेकविषयग्रहणं प्रतिसन्धत्ते इन्द्रियान्तरोत्पादो व्यर्थः(१) ॥

न विषयव्यवस्थानात् ॥ २ ॥

न विषयव्यवस्थानात् । चेतनानीन्द्रियाणि विषयव्यवस्थानात्—विषयव्यवस्थानादित्यस्यायमर्थः करणविषयनियमादिति—सति चक्षुषि रूपग्रहणं भवत्यसति न भवति । यच्च यस्मिन् सति भवति असति न भवति तस्य तत् । सति च चक्षुषि रूपग्रहणं भवति तस्माद्रूपग्रहणं चक्षुषः । एवं शेषेष्वपि । एवं सति किमन्येन चेतनेनेति चेत् ? न, सन्दिग्धत्वादहेतुः—किमयमिन्द्रियाणां विषयनियमः चेतनत्वात् आहो चेतनोपकरणत्वादिति सन्दिह्यते ? । चेतनोपकरणत्वेऽपि सतीन्द्रियाणामेतद्भवितुमर्हति यथा प्रदीपस्य सद्भावे रूपग्रहणं भवत्यसति न भवति, न च रूपग्रहणं प्रदीपस्य । विपर्ययप्रसाधकश्चायं हेतुर्विषयव्यवस्थानादिति ।

विपर्यय(२) साधकत्वज्ञापनार्थं च तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेध इति सूत्रम्—

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥ ३ ॥

यस्मादेवैतानीन्द्रियाणि व्यवस्थितविषयाण्यत एवाव्यवस्थितविषयेणान्येन भवितव्यम् । यदि हि किञ्चिदिन्द्रियमनेकार्थग्राह्यव्यवस्थितविषयं स्यादिति कस्ततोऽन्यं चेतनमनुमातुं शक्नुयात् चैतन्यं तु आत्मनः स्वातन्त्र्ये सत्यव्यवस्थानाच्चक्षुरादिवदिति नाचेतन आत्मा अस्वातन्त्र्यप्रसङ्गाच्चक्षुरादिवदिति । अन्वयाभावादयुक्तमिति चेत् ?—अथ मन्यसे आत्मनश्चैतन्यसाधनस्याव्यवस्थानस्य नान्वयोऽस्ति, न

(१) इन्द्रियान्तरोत्पादवैयर्थ्यम्—पा० १ पु० ।

(२) विपर्यास—पा० ४ पु० ।

चान्वयमन्तरेण हेतुः सिद्ध्यतीति ? न, विपर्यय(१)सम्बन्धस्याव्यभिचारात् नायमन्वयी हेतु(२)रपि तु: व्यतिरेकी हेतुः(३) तत्र च व्यतिरेकसम्बन्धा(४)व्यभिचारः सामर्थ्यम् । यच्चाचेतनं तत्सर्वं व्यवस्थितविषयं दृष्टमिति । पृथिव्यादिनित्यत्वसाधने गन्धवत्त्वादिप्रसङ्ग इति चेत् ?—अथमन्यसे यदि व्यतिरेकी हेतुर्भवत्यन्वयमन्तरेण अथ पृथिव्यादिनित्यत्वे साध्ये गन्धवत्त्वं कस्मान्न हेतुः ? । न हेतुरुभयव्यावृत्तेः—यस्माद्गन्धवत्त्वं नित्याच्चानित्याच्च व्यावर्त्तते, न पुनरव्यवस्थानमेवं, तस्मादव्यवस्थानं हेतुर्न गन्धवत्त्वमिति ॥

इतश्च शरीरादिव्यतिरिक्त आत्मा न शरीरादिसङ्घातमात्रम्—

शरीरदाहे पातकाभावात् ॥ ४ ॥

शरीरदाहे पातकाभावात् । शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासङ्घातः प्राणिभूतो गृह्यते । शरीरं प्राणिभूतं दहतः प्राणिहिंसाकृतं पापं पातकमित्युच्यते तस्याभावोऽकर्त्तुः फलेन सम्बन्धः कर्त्तुश्चानभिसम्बन्ध इति । कस्मात् ! अनभ्युपगतार्थान्तरात्मनोऽन्यः शरीरेन्द्रियबुद्धिवेदनासङ्घातः कर्त्ता अन्यश्च तत्फलसम्भोक्तेति । तदेवमकृतकृताभ्यागमविनाशदोषप्रसङ्गः अनिष्टश्च तस्मात् कर्त्ता भोक्ता च यः स आत्मेति ।

तदिदं सूत्रं यस्यात्मा नास्ति तस्यायं दोष इति दोषप्रतिपादनार्थं न साधनार्थमिति हेतुफलभावात् स्मृतिवत्कर्तृभोक्तृव्यवहारः यथा हेतुफलभावेन व्यवस्थितायां स-

(१) विपर्यास—पा० ४ पु० ।

(२) अन्वयहेतुः—पा० ४ पु० ।

(३) व्यतिरेकहेतुः—पा० ४ पु० ।

(४) विपर्ययसम्बन्धा—पा० ४ पु० ।

न्ततौ यस्यामेव भावनोपजायते तस्यामेव सन्ततौ स्मृतिर्भवतीति । एवं यत्कायचित्तसन्तानप्रभवं कर्म्म तत्कायचित्तसन्तानप्रभवं फलमिति नास्त्यकृताभ्यागमकृतनाशप्रसङ्गः । स कथं स्यादिति यद्यन्यस्यां सन्ततौ कृतं कर्म अन्यस्यां सन्ततौ फलं दद्यात् । यदि च भवानेवमर्थं(१) प्रतिपादयितुं शक्नोति य एव करोति स एव भुङ्क्ते इति उभयञ्च नास्ति तस्मादकृताभ्यागमादिरदोषः ? नोक्तोत्तरत्वात्—न सन्तानो नानात्वं बाधते इत्युक्तोत्तरमेतत् । यत् पुनरेतदेकस्मिन्नदर्शनादिति ? अत्राप्युक्तमेकनिमित्तानां प्रत्ययानां प्रतिसन्धानादिति । शाल्यादि(२)बीजवदिति चेत् ?–अथ मन्यसे यथा शालिबीजादङ्कुर उपजायते शालिबीजात्मर्दोत्तरकालं नालकाण्डादिभावेन भूतानुग्रहवशाच्छालिबीजं प्रादुर्भवति न च तत्रैकं निमित्तं किञ्चिदनुबद्धमस्ति अथ च नियमः शालिबीजपूर्वादङ्कुराच्छालिबीजम् एवं हेतुफलभावेन व्यवस्थितायां सन्ततावान्तरे चेतसि परिणामविशेषप्राप्तात् कर्म्मणः फलमिति ? । तन्न बीजावयवानुवृत्तेः—शालिबीजवदित्यसिद्धो दृष्टान्तः तत्रापि ये बीजावयवास्ते पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते व्यूहान्तरापत्तौ च पृथिवीधातुरब्धातुना सङ्गृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्त्तयति, स रसः पूर्वावयवसहितोऽङ्कुरादिभावमापद्यते तस्माद्बीजावयवानुवृत्तेरसिद्धमिदमुच्यते यथा शालिबीजाद्विनष्टादङ्कुर उत्पद्यते अथ च प्रतिसन्धानमिति । परमावस्थत्वाद्बीजावयवानां यथोक्तदोषापत्तिरिति चेत् ?–अथ मन्यसे अथापि(३)

(१) एतदर्थं—पा० ४ पु० ।   (२) धान्यादि—पा० ४ पु० ।
(३) यस्यापि—पा० ४ पु० ।

बीजावयवाः पूर्वव्यूहं परित्यजन्ति व्यूहान्तरं चापद्यन्ते तस्यापि परमाण्ववस्थत्वाद्बीजस्य परमाणुमात्रं शिष्यत इति । न च यवबीजशालिबीजपरमाणूनां कश्चिद्विशेषः यथानुपजातविशेषाः परमाणवः कार्यकारणभावनियमात् तत्पूर्वकतया शाल्यङ्कुरमभिनिर्वर्त्तयन्ति तथा ममापि कार्यकारणभावान्नियम(१) इति ? । नानभ्युपगमात्—परमाण्ववस्थानि बीजानि भवन्तीत्येतन्न प्रतिपद्यामहे सर्वावस्थोपलब्धेः यस्माच्छाल्यादिबीजमुच्छूनावस्थामादिं कृत्वा यावदुपान्त्यं शालिबीजकार्यं तावन्न कदाचित् परमाण्ववस्थं भवति । यदि तु स्यात् कदाचिन्नोपलभ्येत । यदि तर्ह्यापरमाणोर्विभागो नास्ति कल्पादावुत्पत्तिर्न स्यात् परमाण्ववस्थत्वाज्जगतः परमाण्ववस्थे च जगति न शाल्यादिजातिव्यक्तिरस्तीति पुनरुत्पादे जातिव्यक्तिहेतवः परमाणव एवेत्यभ्युपगन्तव्यम् यथा च कल्पादावेवं परमाण्ववस्थे बीजेऽपीति ? । नानेनैवोक्तोत्तरत्वात्—अनेनैव सर्वावस्थोपलब्धेरित्युक्तोत्तरमेतत् । सर्गादौ शालिजातिव्यक्तिहेतुरदृष्टविशेषो येनादृष्टेन प्राणिनामुपभोगाय शाल्यादयो निर्वर्त्यन्ते तमदृष्टविशेषमपेक्षमाण ईश्वरस्तांस्तान् परमाणून् तथा तथा सङ्घातयति यथा यथा शाल्यादिजातिव्यक्तिरिति । एतेन घटादिपाको व्याख्यातः । नापरमाण्वन्तो विनाशः(२) सर्वावस्थोपलब्धेरिति । आमध्यात् पाकानुपपत्तिरिति चेत् ? अथ मन्यसे यदि कार्यकारणद्रव्ये पच्येते आमध्यात् पाको न प्राप्नोति पाचकेन तेजसा अप्राप्तत्वात् ? नाप्रतिबन्धात्—भवेदप्येष

---

(१) भावनियम—पा० १ पु० ।

(२) विभागः—पा० ४ पु० ।

दोषो यदि तेजोऽनुप्रवेशमवयवी प्रतिबध्नाति(१) स तु न प्रतिबध्नाति अप्रतिबद्धं तेजोऽनुप्रविशति इति । न प्रतिबध्नातीति न हेतुरस्तीति, ? न नास्ति परिस्रवादिमतो घटस्योपलब्धेः—यस्मात् परिस्रवादिमतो घटस्य द्रवत्वप्रतिबन्धो न दृष्टः अप्रतिबन्धेन द्रवत्वं परिस्रुतिं करोति तच्च प्रत्यक्षत उपलभ्यते । यदि चायमवयवानुप्रवेशो द्रव्यस्य विनाशकः स्यात् न परिस्रवादिमान् घट उपलभ्येत परिस्रवमाणत्वाद्भाजनगतानामपामवस्थानं न स्यात्(२) विनाशे च कार्यद्रव्याणां व्यवहिताव्यवहितयोस्तुल्यकालोपलब्धि(३)प्रसङ्गः- यदि चानुप्रविश्य द्रव्यं द्रव्यान्तरं व्यतिभिनत्ति तेन चाक्षुषस्य रश्मेरनुप्रवेशात् स्फटिकादि विनष्टमिति व्यवहिते चाव्यवहिते च तुल्योपलब्धिः प्राप्नोति । तस्माच्छालिबीजप्रदृष्टान्तः ।

यस्य च पूर्वस्कन्धनिरोधसमकालानि स्कन्धान्तराणि प्रादुर्भवन्ति तस्य तेषां स्कन्धान्तराणां न कर्मनिमित्तः सर्गः प्राप्नोति । अकर्मनिमित्तेन सत्त्वसर्गेण शुभाशुभप्राप्त्यर्था क्रिया न प्राप्नोति । सुखी स्यामिति तत्क्रियेति चेत् ?— अथ मन्यसे स्वयं कर्माणि करोति कथमहं सुखी स्यां दुःखी न स्यामिति ? । तन्नाननुभूतत्वात्—येन सुखमनुभूतं सुखसाधनसम्बन्धानुस्मृतिश्च यस्य स तत्साधनमुपादत्ते यस्य पुनः प्रतिक्षणं प्रध्वंसिनः संस्कारास्तस्य सुखसाधनसम्बन्धानुस्मृतेरभावात् सुखी स्यामिति क्रियानुपप-

(१) प्रतिबध्नीयात्—पा० ४ पु० ।
(२) अवस्थानमेव न स्यात्—पा० ४ पु० ।
(३) तुल्योपलब्धि—पा० ४ पु० ।

त्तिः मोक्षार्थश्च प्रयासो नोपपद्यते(१) अयत्नसिद्धत्वात् जा-तमात्र एवायं मुच्यत इति मुक्त्यर्थं ब्रह्मचर्यवासो व्यर्थः परिपृच्छा च न प्राप्नोति । तथागतेन भिक्षवः परिपृच्छय-न्ते कच्चिद्यूयं मया विनीता इति ? ते चाहुर्विनीताः स्म इति । अतीतानागतवर्त्तमानानां चानुपकार्यत्वात्—ये तावदना-गताः संस्कार्यास्ते तावदसत्त्वान्नोपक्रियन्ते ये ऽप्यतीता(२)-स्तेऽप्येवं, ये तु वर्त्तमानास्तेषु संस्काराधानमशक्यं वर्त्तमान-लक्षणस्यानुपकार्यत्वात् न हि तस्यावस्थानकालोऽस्ति य-स्मिन्नुपक्रिया स्यात् । संस्कार्यसंस्कारकयोः सहोत्पादाद्यु-क्तमिदमिति चेत् ? न संस्कार्यसंस्कारकयोः सहोत्पादे(३) नि-यमानुपपत्तिरिति । इदं संस्कारकमिदं संस्कार्यमिति निय-मो नोपपद्यते । अथ संस्कारकमपेक्षमाणं संस्कार्यं विलक्षण-कार्यं करोति विलक्षणकार्योत्पादश्च संस्कार इत्युच्यते ? । न संस्कार्यानभिधानात् इदं संस्कारकमिदं संस्कार्यमित्येतत् क-थम् ? न हि यो यस्य विशेषं नाधत्ते स तत्संस्कारकः तत्संस्कार्यमिति च शक्यं व्यपदेष्टुम् । अथाप्युपदेशेन संस्का-राणामनागतानामनुत्पत्तिः क्रियते ? । न, अनागतानामनुत्पत्तेः सत्त्वात् । यासावनागतानामनुत्पत्तिः संस्काराणां नासौ कदाचिन्नास्तीति किं तस्याः क्रियते । तस्मान्मुक्त्यर्थो ब्रह्मच-र्यवास इत्यनुपपन्नम् । तदेवमनभ्युपगतार्थान्तरात्मनो दोष इति ॥

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥ ५ ॥

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् । यस्यात्मा

---

(१) मुक्त्यर्थश्च प्रयासो नोपयुज्यते—पा० ४ पु० ।

(२) ये व्यतीताः—पा० १ पु० । (३) सहोत्पादात्—पा० ४ पु० ।

नित्यः तस्यापि हिंसाफलं न प्राप्नुतः हिंसा तावत्र प्राप्नोति नित्यत्वात्, फलमपि नात्मनो युक्तम् अनुपकार्यत्वात् । अस्य चार्थस्य ज्ञापिकां कारिकामुदाहरन्ति ॥

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोर्भयम् ।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥

तदेवमेकस्मिन् मते हिंसा विफला अपरस्मिंस्तु पक्षेऽनुपपन्ना निष्फला चेति । इयं च हिंसा सांख्यपक्षे सम्भवति बुद्धेः परिणामित्वात् कार्यकारणभावः(१) परिणामित्वादुच्छिद्यते स एव च तत्फलानि भुङ्क्ते तत्फलस्य तत्र व्यक्तेः ? । न, पूर्वावस्थाऽपरित्यागात्—यथैवात्मा पूर्वावस्थां न जहातीति तत्र फलं नेष्यते तथा बुद्धिरपि पूर्वावस्थां न जहाति नित्यत्वादिति । अथ मन्यसे पूर्वावस्थां जहातीति ? नित्यत्वं विरुध्यते पूर्वावस्थापरित्यागेन बुद्धिनित्यत्वं विरुध्यते । अथाप्यवस्था भिद्यत इति मन्यसे ? तथाप्यनिवृत्तो व्याघातः अवस्थाभ्योऽवस्थावतोऽनन्यत्वात्(२) न ह्यवस्थाभ्योऽवस्थावानन्य इति अवस्थाभेदे ऽवस्थावान् भिद्यत इति । य एव बौद्धस्य प्रतिक्षणं ध्वंसिषु संस्कारेषु दोषः स एव प्रतिक्षणपरिणामिष्वपीति । ऋजुवक्रतावदिति चेत् ?—अथ मन्यसे ऋजुवक्रतादिभेदे यथाङ्गुलिद्रव्यं न भिद्यते न चाङ्गुलीतोऽन्ये ते तथावस्थाभेदे बुद्धेरभेद इति ? नान्यत्वात्—अन्ये ऋजुवक्रे । युक्तं च यदन्यभेदे अन्याभेद(३) इति, न पुनरवस्थाभ्योऽनाव-

(१) कार्यकारणसङ्घातः—पा० १ पु० ।
(२) अभेदात्—पा० ४ पु० ।
(३) भेदेनान्याभेद—पा० ४ पु० ।

स्थावतोऽन्यत्वम्, तस्मादसमो दृष्टान्तः। किं पुनर्वक्रत्वं ऋजुत्वं वा? गुणः–आकुञ्चनजं वक्रत्वं प्रसारणजं ऋजुत्वं गुणाश्च गुणिनोऽर्थान्तरमिति प्रतिपादितमेतत्।

बुद्धेरप्येवमिति चेत्? अथ मन्यसे बुद्धेरपि ये ते अवस्थे भिन्नेते तयोर्भेदे बुद्धिर्न भिद्यत इति? (अन्यावस्थातो बुद्धिः?)(१) तन्न सिद्धान्तविरोधात्–न भवतां पक्षे धर्मधर्मिणोर्भेद इति भेदं चाभ्युपगच्छता सिद्धान्तस्त्यक्तो भवति। तस्माद्यथा आत्मनित्यत्वे सुखदुःखानुपभोगो दोष इति न तत्र सुखदुःखे कल्प्येते इति तथा बुद्धिनित्यत्वात् बुद्धावपि न कल्पनीये(२) समानं नित्यत्वमिति। अथात्मनो नित्यस्य पुण्यपापाभ्यां किं क्रियते? सुखदुःखे, ताभ्यां किं क्रियते? प्रत्ययः(३) ये सुखदुःखे आत्मनि तद्विषयः(४) प्रत्यय आत्मनि भवतीत्येतावत् क्रियते स च प्रत्ययो भोगः। यत् पुनरेतद्वर्षातपाभ्यां किं व्योम्न इति? यदेव चर्मणो वर्षातपाभ्यां क्रियते तद्व्योम्नः। अथ चर्मणः किं? सम्बन्धः यथा चर्म वर्षातपाभ्यां सम्बद्ध्यते तथा व्योमापि। वर्षातपसम्बन्धाच्चर्मवदनित्यं व्योमेति चेत्?– अथ मन्यसे यथा चर्म वर्षातपाभ्यां सम्बन्धाद्विक्रियते तथा व्योम वर्षातपसम्बन्धाद्विकरिष्यत(५) इति चेत्? नानेकान्तात् वर्षातपसम्बन्धी परमाणुरथ च नित्य इत्यनेकान्त इति। चर्मणश्चानित्यत्वं किं वर्षातपसम्बन्धादथ कारणविभागादथा-

(१) एतन्मध्यस्थः पाठो नास्ति ४ पु०।

(२) कल्प्येते—पा० ४ पु०।

(३) सुखदुःखे पुण्यपापाभ्यामात्मनो नित्यस्य क्रियते अथाभ्यां सुखदुःखाभ्यां नित्यस्यात्मनः किं क्रियते प्रत्ययः—पा० ४ पु०।

(४) आत्मनस्तद्विषयः—पा० १ पु०।

(५) वर्षातपाभ्यां विकरिष्यते—पा० ४ पु०।

अथविनाशादिति ? । वयं तु ब्रूमः कारणवतः तद्विभागाद्युक्तो विनाशः(१) न पुनराकाशस्य कारणमस्तीत्युभयाभाव इति तद्गतां चावस्थानान्न सम्बन्धो नाशहेतुः । यदि चायं सम्बन्धो नाशहेतुरभविष्यन्न तद्गतामवस्थानमभविष्यत् अवतिष्ठन्ते तु भावाः यावन्न विनाशकारणसन्निपात इति ।

अथ मन्यसे वर्षातपाभ्यां चर्मणः सङ्कोचविकाशौ भवतो न त्वाकाशस्येति ? तन्न विकल्पानुपपत्तेः । सङ्कोचविकाशौ चर्मण इति कोऽर्थः ? किं तावदल्पत्वमहत्त्वे ? उत संयोगविभागाविति ? तन्न तावत् सङ्कोचविकाशावल्पत्वमहत्त्वे यावद्द्रव्यभावित्वात् परिमाणस्य, यावद्द्रव्यं हि परिमाणं तद्द्रव्ये सति न निवर्त्तते इति । अथ चर्मणः सङ्कोचविकाशौ संयोगविभागाविति ? तदपि न युक्तमेकत्वात्—न ह्येकस्य संयोगविभागौ सम्भवत इति । कथं तर्हि इदमुच्यते चर्मणः सङ्कोचश्चर्मणो विकाश इति ? चर्मकारणानामविनश्यत्कार्याणामवयवानामातपसम्बन्धात्परस्परेण याः प्राप्तयः आरब्धकार्याणां द्रव्यान्तरानारम्भिकास्ता इतरेतरोपश्लेषेणावयवेषु वर्त्तमानास्तदेकार्थसमवायिनि चर्मण्युपचर्यन्ते तदपेक्षं चेदमुच्यते चर्मणः सङ्कोचो न पुनश्चर्म सङ्कुचतीति । एतेन तदवयवानामेवोदकसम्बन्धापेक्षाणामविनश्यत्कार्याणां परस्परतो विभागो विकाश इति । विक्रियायां च दृष्टान्ताभावात् तदेव वस्त्वविनश्यद्विक्रियामापद्यत इति न दृष्टान्तोऽस्ति । विक्रिया तु पदार्थान्तरोत्पादः यथा पूर्वरूपादिनिवृत्तौ रूपान्तरोत्पादे विकृतो घट इति । यद्येवम्भूतो विकार आत्मन्यपि चकास्ति तत्रापि सुखनिवृत्तौ दुःखप्रादुर्भाव इति सुखप्रत्ययनिवृत्तौ दुःखप्रत्यय इति, तस्मान्नित्य-

(१) तद्विभागात् तद्विनाशाद्युक्तो विनाशः—पा० ४ पु० ।

स्यात्मनः सुखदुःखोपभोग इति सिद्धम् । नित्यत्वादात्मनो हिंसादोषोऽपरिहार्यः ? न अन्यथा तदुपपत्तेः—आत्मनित्यत्वेऽप्यन्यथा हिंसा भवति ।

अस्यार्थस्य ज्ञापनाय न कार्याश्रयकर्तृवधादिति सूत्रम्—

न कार्याश्रयकर्तृवधात् ॥ ६ ॥

न ब्रूमो नित्यस्य सत्त्वस्य वधो हिंसेति, अपि तु अनुच्छित्तिधर्मकस्य सत्त्वस्य यच्छरीरं यानि च सुखसंवित्तिसाधनानि(१) इन्द्रियाण्यसाधारणानि तेषां पीडा वैकल्यं वा प्रमापणं वा हिंसेति । कुत एतत् प्रतिपत्तव्यम् ? हिंसायाः फलोपभोगस्य च उभयपक्षसम्प्रतिपन्नत्वात् हिंसाफलोपभोगश्चोभयपक्षसम्प्रतिपन्नः सेयं हिंसा एकस्मिन् पक्षे सम्भवति । यस्य तावत् प्रतिक्षणध्वंसिनः संस्कारास्तस्य किं हिंस्यते निर्हेतुकत्वाद्विनाशस्य कस्य व्यापारोऽस्ति । अथ विलक्षणोत्पत्तिनिमित्तत्वेन व्यवतिष्ठमानः परो हिनस्तीत्युच्यते ? ननूपचारो भवति, न भवतः प्रधानमस्ति येन शरीरोत्पादक उपचर्यते । न समानत्वात्—भवतामपि पक्षे न प्रधानं हिंस्यत इति ? सत्यम् ममापि कार्याश्रयकर्तृवधो हिंसेति तुल्यम् । अयं तु विशेषो यत एकस्मिन् पक्षे य एवायमात्मा शरीरादिसाधनः कर्म करोति स एव तत्फलमुपभुङ्क्ते इति अकृताभ्यागमदोषो नास्ति । भवतामकृताभ्यागमः कृतप्रणाशश्चेति(२) परिशेषादात्मनित्यत्वे हिंसेति व्यवस्थितम् । तत्र कार्याश्रयशब्देन शरीरमुच्यते तन्निमित्तत्वादुपभोगस्येति कर्तृणीन्द्रियाणि तत्साधनत्वात् । अथवा समानाधिकरणसमासाच्छ-

(१) सुखदुःखसाधनानि—पा० ४ पु० ।

(२) कृतहानं चेति—पा० ४ पु० ।

रीरमेव कार्याश्रयकर्तृशब्दाभ्यामुच्यत इति कर्त्ता भोक्ता चात्मा । किं पुनरिदं कर्तृत्वं भोक्तृत्वं वा किमिति ? ज्ञान(१)-चिकीर्षाप्रयत्नानां समवायः कर्तृत्वम्, सुखदुःखसंवित्समवायो भोक्तृत्वम्, एतत्तु न शरीरे, निमित्तत्वात् कर्तृ शरीरमुच्यते ।

इतश्च देहादिव्यतिरिक्त आत्मा—

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ॥ ७ ॥

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् । सव्येन चक्षुषा दृष्टमितरेण प्रत्यभिजानातीति सूत्रम् । तच्च प्रतिसन्धानं प्रत्यभिज्ञानं, स्मृतिपूर्वकत्वात् प्रत्यभिज्ञानस्य, प्रतिसन्धानाच्चैककर्तृत्वं प्रत्ययानां सिध्यतीति ।

सिद्धत्वादनारम्भ इति ?—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येतस्मिन् प्रकरणे सिद्ध आत्मव्यतिरेकः सिद्धत्वादनारभ्यं प्रकरणमिति ? । इन्द्रियव्यतिरेकज्ञापनार्थमित्येके—एके इदं प्रकरणमिन्द्रियव्यतिरेकज्ञापनार्थं वर्णयन्ति । तन्न, तत एव सिद्धेः—पूर्वप्रकरणेनैव इन्द्रियशरीरव्यतिरेकः सिद्ध इति । समुच्चयार्थमित्यपरे—अपरे तु समुच्चयार्थं सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति हेतुं ब्रुवते । युक्तोऽन्यः समुच्चयः, अयं तु न युक्तो विरोधात् सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादिति ब्रुवाणो युक्तिं बाधते । का पुनरियं युक्तिबाधा ? अनेकत्वादिन्द्रियस्य युगपदधिष्ठानासम्भवः अणु मनोऽनेकं चक्षुः, न चाणोर्मनसो युगपदनेकेन चक्षुषा सम्बन्धः सम्भवति । अथासम्बद्धमपि द्वितीयं चक्षुरर्थानालोचयति ? एवं च सति द्वितीयचक्षुर्वदितरचक्षुरपि मनसाऽनधिष्ठितमेव प्रव-

---

(१) ज्ञानविज्ञान—पा० १ पु० ।

र्त्तिष्यत इति(१) व्यर्थं मनः प्राप्तम्, अनधिष्ठितं च प्रवर्त्तमानमिन्द्रियं करणत्वं बाधते। न च करणमनधिष्ठितं प्रवर्त्तमानं दृष्टमिति समग्रासमग्रयोश्च तुल्योपलब्धिप्रसङ्गः न ह्यनधिष्ठितमिन्द्रियं प्रवर्त्तत इत्यणुत्वान्मनसा नित्यमेकमेव सम्बद्ध्यत इति विकलाविकलयोस्तुल्योपलब्धिः प्राप्नोति। प्रकरणविरोधश्च इन्द्रियपञ्चकत्वादितीन्द्रियपञ्चत्वप्रतिपादकं प्रकरणं विरुध्यते इति।

यदि तर्ह्येकमिन्द्रियं द्वित्वोपलब्धिः कथं? द्वित्वोपलब्धिप्रतिपादनार्थं नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानादिति सूत्रम्—

नैकस्मिन् नासास्थिव्यवहिते द्वित्वाभिमानात् ॥ ८ ॥

एकमिन्द्रियं द्रव्यं ह्यधिष्ठानमभिन्नम्। कोऽधिष्ठानार्थः? तैजसस्य चक्षुषः पार्थिवेन कृष्णसारेण उपकारविकारभेदानुविधानम्—यस्मात् कृष्णसार उपक्रियमाण उपक्रियते विक्रियमाणे विक्रियते तिष्ठति पश्यतीति, तस्मादस्य कृष्णसारमधिष्ठानमुच्यते। एतच्च व्याख्यातं शरीरसूत्रे। तस्यान्तौ गृह्यमाणौ द्वित्वाभिमानं प्रयोजयतः यथा दीर्घस्य द्रव्यस्य मध्ये व्यवहितस्यान्तावुपलभ्यमानौ द्वित्वाभिमानं प्रयोजयत इति॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ॥ ९ ॥

एकविनाशे द्वितीयाविनाशान्नैकत्वम्। एकस्मिन् विनष्टे उद्धृत्ते वा द्वितीयमवतिष्ठते विषयग्रहणे लिङ्गम्। नान्यथा तदुपपत्तेः—द्वितीयमवतिष्ठते इति नैतत् कस्यचित् प्रत्यक्षम् प्रत्ययमात्रं तु विनष्टेऽप्येकस्मिन्नधिष्ठाने यदवतिष्ठते तेन भवति। न चाधिष्ठानमिन्द्रियम्, अपि तु यत्तदनुवि-

(१) प्रवर्तयिष्यतीति—पा० ४ पु०।

धापि तदनुविधत्त इति(१) यथा बहुवातायनस्य वेश्मन एकापिधानादितरेण ग्रहण(२)मिति ॥

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥१०॥

अपरे त्ववयवनाशेऽप्यवयव्युपलब्धेरहेतुरिति परिहार(३) वर्णयन्ति ।

तस्योत्तरम्—

दृष्टान्तविरोधादप्रतिषेधः ॥ ११ ॥

दृष्टान्तविरोधादप्रतिषेध इति सूत्रम् । अस्यार्थः—न कारणद्रव्यविनाशे कार्यद्रव्यमवतिष्ठते । यदि नावतिष्ठते कथं कारणद्रव्यविनाशे कार्यमुपलभ्यत इति ? । क एवमाह उपलभ्यत इति, अपि तु बहुष्ववयविषु यस्य कारणानि विभक्तानि तद्विनष्टम् । यस्य न विभक्तानि(४) तदुपलभ्यत इति । शेषं भाष्ये ॥

इन्द्रियान्तरविकारात् ॥ १२ ॥

अनुमीयते चायं देहादिव्यतिरिक्तश्चेतन आत्मा इन्द्रियान्तरविकारात् । कस्यचिदम्लस्य फलस्य दृष्टसाहचर्ये(५) रूपे गन्धे वा केनचिदिन्द्रियेण गृह्यमाणे रसनेन्द्रियविकारः । कः पुनर्विकारः ? रसानुस्मृतौ रसगर्द्धिप्रवर्त्तितः गर्द्धिः तृष्णा रसतृष्णाप्रवर्त्तितो दन्तान्तरपरिस्रुताभिरद्भीरसनेन्द्रियस्य संप्लु-

(१) तदेकमनुविधत्त इति–पा० ४ पु० ।
(२) पिधानमपरेण ग्रहण–पा० ४ पु० ।
(३) परिहारान्तरं–पा० ४ पु० ।
(४) न विनष्टानि–पा० ४ पु० ।
(५) गृहीतसाहचर्ये–पा० ४ पु० ।

वः सम्बन्धो विकार इत्युच्यते। सा चेयं स्मृतिरिन्द्रियचैतन्ये न प्राप्नोति। न च प्रतिक्षणध्वंसिषु(१) संस्कारेष्वन्यानुभूतस्यान्येनास्मरणादिति। इन्द्रियान्तरविकार इन्द्रियान्तरधर्मः स कथं व्यधिकरणत्वादात्मव्यतिरेकं प्रतिपादयति? नेन्द्रियान्तरविकार आत्मव्यतिरेकप्रतिपत्तिकारण,मपि तु स्मृतिः न ह्येकमनुभवितारमन्तरेण स्मृतिः प्राप्नोति, स्मृतिश्च भावत्वाद्भवित्रपेक्षा उत्पत्तिवदिति न्यायः। न च स्मृतिमन्तरेणेन्द्रियविकारः सम्भवतीति प्रत्यक्ष इन्द्रियान्तरविकार उपादीयते अननुभूतरसस्येन्द्रियविकाराभावादिति व्यतिरेकहेतुः।

न स्मृतेः स्मर्तव्यविषयत्वात् ॥ १३ ॥

न स्मृतेः स्मर्तव्यविषयत्वात्। स्मृतिर्नाम धर्मस्तस्याः स्मर्तव्योऽर्थो विषयः सेयं स्मर्तव्यार्थसन्निधानादुपजायमानाऽपरिदृष्टसामर्थ्यं न स्मर्तारं प्रतिपादयिष्यति। न हि स्वकारणसन्निधानादुत्पन्नो(२)ऽङ्कुरोऽपरिदृष्टसामर्थ्यं कुम्भादिकमर्थं प्रतिपादयति।

तदात्मगुणसद्भावादप्रतिषेधः ॥ १४ ॥

तदात्मगुणसद्भावादप्रतिषेधः। न स्मर्तव्यमात्रात् स्मृतिरुत्पद्यते—यदायमतीतमर्थं स्मरति तदा स्मृतिरनाधारा प्राप्नोति, न चेयमनाधारा युक्ता गुणत्वात्, न हि कश्चिद्गुणोऽनाधारो दृष्ट इति(३) न चेयमिन्द्रिये सम्भवत्यननुभूतत्वात्। न विषये तस्यासत्त्वात्। न शरीरे शरीरगु-

(१) प्रतिक्षणविनाशिषु—पा० ४ पु०।
(२) उपजायमानो—पा० ४ पु०।
(३) युक्त इति—पा० ४ पु०।

णानां प्रत्यक्षाणां स्वात्मपरात्मप्रत्यक्षत्वात् । न चेयमनाधारा गुणत्वादित्युक्तम् । न चेयं नास्ति । न चात्मन्यसत्यस्याः सद्भावो युक्त इति । तेभ्योऽन्यस्य तदुत्पत्तौ(१) सामर्थ्यमवगम्यते कथमित्यनेनैव प्रत्युक्तम् । अस्यात्मनः सामर्थ्यं स्मृतेराधारभावः । न चेयमनाधारा कार्यत्वात् सर्वं कार्यमाधारवत् क्षीरादि दृष्टमिति । एतेन—

"न तच्चक्षुषि नो रूपे नान्तराले तयोः स्थितम् ।
न तदस्ति न तन्नास्ति यत्र तन्निष्ठितं भवेत् ॥"

इति प्रत्युक्तम् । न तदस्ति न तन्नास्तीति व्याहतम् । न चानया कारिकया विज्ञानस्याश्रयिभावः प्रतिषेद्धुं शक्यते । किं कारणम् ? विशेषप्रतिषेधात्—न तच्चक्षुषि नो रूप इत्यादिविशेषप्रतिषेधः । अथानाश्रितमेव विज्ञानम् ? व्यर्थं वाक्यं न तच्चक्षुषि नो रूप इति–कस्य वा चक्षुषि रूपे वा विज्ञानं वर्तते यं प्रति प्रतिषेधः, अयं च विज्ञानस्याश्रयप्रतिषेधो(२) विचार्यमाण आत्मसत्त्वं प्रतिपादयति । न हि विज्ञानस्यात्मसत्त्वमन्तरेण वाक्यमेतदर्थवत्तायां व्यवतिष्ठते । अथवा एकस्यानेकविषयोपलब्धिप्रतिसन्धानमनेन सूत्रेणोपदर्श्यत इत्युक्तन्यायम् । शेषं भाष्य इति ।

अपरिसंख्यानाच्च स्मृतिविषयस्य ॥ १५ ॥

(इत्यष्टभिः सूत्रैः प्रासङ्गिकं चक्षुरद्वैतप्रकरणम् ॥)

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ॥ १६ ॥

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् । य एते भवता

---

(१) तदुपलब्धि—पा० ४ पु० । तदुपपत्तौ–इति च क्वचित् ।
(२) अत्रायं निषेधो—पा० पु० ।

आत्मप्रतिपादका हेतव उपदिष्टाः सर्वे एते मनसि सम्भवन्ति । एवं च न मनोऽव्यतिरिक्त आत्मा सिद्ध्यति ।

ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रम् ॥ १७ ॥

ज्ञातुर्ज्ञानसाधनोपपत्तेः सञ्ज्ञाभेदमात्रम् । यथा ज्ञातारमभ्युपगच्छता ज्ञानसाधनानि चक्षुरादीनि प्रतिपद्यन्ते तथा मन्तारं प्रतिपद्यमानेन मतिसाधनमभ्युपेयम् । यच्च तन्मतिसाधनं तन्मन इति सञ्ज्ञाभेदमात्रम् । अथ मन्ता निःसाधनो मतिं करोति ? एवमयं ज्ञाता निःसाधनो ज्ञानं करिष्यतीति सर्वेन्द्रियविलोपप्रसङ्गः ।

नियमश्च निरनुमानः ॥ १८ ॥

नियमश्च निरनुमानः । योऽयं नियम आश्रीयते मतिरसाधना न पुनर्ज्ञप्तिरिति नियमो निरनुमानः ज्ञप्तिवत्तु(१) मतेः ससाधनत्वेऽनुमानमस्ति सुखादयश्च रूपादिभ्यो विषयान्तरमिति तद्विषयत्वादुपलब्धेः साधनेन भवितव्यम् न हि किञ्चित् सविषयं ज्ञानमसाधनं दृष्टं रूपादिज्ञानवदिति नियमश्च निरनुमानः सुखादिविज्ञानानि निःसाधनानि भवन्तु माभूवन्(२) रूपादिविषयाणीति । यदि सर्वं विज्ञानं ससाधनमुच्यते(३) मनस्यपि करणान्तरं प्राप्नोति विषयत्वात् ? ओमित्युच्यते अस्ति मनसि करणं, किं पुनस्तत् ? येन मनोऽधिगम्यते । केन च मनोऽधिगम्यते ? अयुगपज्ज्ञानोत्पत्त्या । यस्य तु मनः प्रत्यक्षं भवति तस्य योगजधर्मानुगृहीत आत्ममनःसंयोगः करणं योगि-

(१) ज्ञप्तिवच्च—पा० ४ पु० ।
(२) मा भवन्तु—पा० ४ पु० ।
(३) ससाधनं मन्यते—पा० ४ पु० ।

धर्माणां चाचिन्त्यविषयत्वात् कथं ते मनो गृह्णन्तीत्यविचार-णीयमेतत् । एतेनात्मज्ञानं(१) प्रत्युक्तम् । आत्ममनःसंयोगस्य कारणभावादिति । एवं तावदात्मनोऽस्तित्वव्यतिरेकौ सिद्धौ, बहुत्वं चात एव, दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् नान्यदृष्टमन्यः स्मरतीति शरीरदाहे पातकाभावादिति । सेयं सर्वा व्यवस्था शरीरिभेदे सति सम्भवतीति ॥

(इति त्रिभिः सूत्रैर्मनोव्यतिरेकाप्रकरणम् ।)

किं पुनरयं देहादसङ्घातादन्यो नित्योऽथानित्य इति ? एत-स्मिन्नर्थे उभयथा दृष्टत्वादिति संशयमुपपादयति । अनुपपन्न-रूपश्चायं(२) संशयः—आत्मास्तित्वव्यतिरेकहेतुभिः शरीरभेदे-ऽप्यभेद आत्मनि सिद्धः सिद्धत्वात् प्रकरणमनारभ्यमिति ? । नानारभ्यं कथं ? जन्मप्रभृति यावत् प्रायणमेतस्मादेकः सिध्यति न पुनर्देहविनाशादूर्ध्वं भवतीत्येतत् सिद्ध्यत्येतस्यार्थस्य ज्ञापनार्थं पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेरिति-सूत्रम्—

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्र-तिपत्तेः ॥ १९ ॥

अस्यार्थः । जातः खल्वयं कुमारको विषयाधिगमासम-र्थेषु इन्द्रियेषु हर्षभयशोकान् प्रतिपद्यमानो दृष्टः स्मितकम्परु-दितानुमेयान्, ते च(३) स्मृत्यनुबन्धादुत्पद्यन्ते । स्मृत्यनुबन्धश्च नान्तरेण पूर्वशरीरमिति । तत्र जन्म निकायविशिष्टाभिः शरीरे-न्द्रियबुद्धिवेदनाभिः सम्बन्धः । अभिप्रेतविषयप्रार्थनाप्राप्तौ सुखा-

(१) विज्ञानं—पा० ४ पु० ।
(२) अनुपपन्नोऽयं—पा० ४ पु० ।
(३) अनुमेयानि तानि च—इति क्वचित् ।

नुभवो हर्षः । अनिष्टविषयसाधनोपनिपाते तज्जिहासोर्हानाश-क्यता भयम् । इष्टविषयवियोगे सति तत्माप्त्यशक्यप्रार्थना शोकः । तदनुभवः सम्प्रतिपत्तिः । एकविषयानेकविज्ञानो-त्पादोऽभ्यासः एकाकारविषयो वा । यथा शाल्योऽनेना-भ्यस्ता इति । प्रत्यक्षबुद्धिनिरोधे (१) तदनुसन्धानविषयः प्रत्ययः स्मृतिः ? तदनुगृहीतस्तदनुसन्धानविषयः प्रत्ययस्त-द्भावविषयः प्रत्यभिज्ञानम् । अनुबन्धो—भावनाख्यः स्मृतिहेतुः संस्कारः । इष्टविषयानुस्मरणान्नयनादिप्रसादः स्मितम् । अनि-ष्टविषयानुस्मरणात् तत्साधनजिहासानुष्ठानलक्षणो हस्तादि-विक्षेपवतोऽश्रुविमोचनसहितः शब्दविशेषो रुदितम् ।

स्मितरुदिते व्यधिकरणत्वादसाधनम् !—अथ मन्यसे स्मितरु-दिते बाल्यावस्थायां भवतो न च बाल्यावस्था आत्मनः तस्मा-द्व्यधिकरणत्वादसाधनमिति ? । न, शोकादिमदात्मवतीति बा-ल्यावस्थायाः साध्यत्वात्—शोकादिमदात्मवती बाल्याव-स्थेति साध्यं स्मितरुदितादिमत्त्वादिति । बाल्यावस्था वयो-धर्मो यौवनावस्थावत् । एतेन स्मृतिसंस्कारानुभवपूर्वशरी-रसम्बन्धवदात्मवत्त्वं व्याख्यातम् । कथमिति ? यथा स्मित-रुदितवत्त्वेन शोकादिमदात्मवती बाल्यावस्था साध्यते एवं शोकादिमदात्मवत्त्वेन स्मृतिमदात्मवती बाल्यावस्था साध्या, तथा स्मृतिमदात्मवत्त्वेन संस्कारवदात्मवती बाल्यावस्था साध्या, संस्कारवदात्मवत्त्वेन पूर्वानुभववदात्मवती, पूर्वानुभ-ववदात्मवत्त्वेन पूर्वशरीरसम्बन्धवदात्मवती साध्या सर्वत्र पूर्वानुभववदात्मवत्त्वेन पूर्वशरीरसम्बन्धवदात्मवती साध्या सर्वत्र यौवनावस्था दृष्टान्तः(२) सा हि स्मितरुदितवती भवतीति

(१)प्रत्यक्षाविरोधे—पा०४ पु० । (२)यौवनादिर्दृष्टान्तः—पा०४ पु० ।

शोकादिमदात्मवती चेति सर्वत्र वक्तव्यम् ॥

पद्माादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः ॥२०॥

पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः । अनित्येऽपि विकारदर्शनादनेकान्त इति सूत्रार्थः ।

कः पुनरयं प्रबोधः किं च सम्मीलनमिति?। पद्मपत्त्रावयवानां विभागो ऽविनश्यत्कार्यः प्रबोधः। पद्मपत्त्रावयवानामारब्धकार्याणां याः पुनः(१) परस्परेण प्राप्तयः तत्सम्मीलनमिति । न विकल्पानुपपत्तेः—पद्मादिषु प्रबोधसम्मीलनविकारादिवत्तद्विकार इति किमयं दृष्टान्तः साधनपक्ष ? उतानैकान्तिकपक्ष(२) इति ?। यदि साधनपक्षे ? हेतुमन्तरेण दृष्टान्तमात्रं न साधनमित्यसाधनं दृष्टान्तः । अथ दूषणं ? तत्किं दृष्टकारणप्रत्याख्यानम् ? उत कारणान्तरोपपादनम् ? अथात्मन उत्पत्ति(३)निरोधकारणानुमानम् ? अथाकस्मिकत्त्वमिति ?। तद्यदि तावद्दृष्टकारणप्रत्याख्यानम् ? तदयुक्तम् दृष्टेन विशेषितत्वात्—यौवनाद्यवस्थासु स्मितरुदितवत्त्वं शोकादिमदात्मवत्त्वं च दृष्टमिति—दृष्टेन स्मितरुदितवत्त्वेन शोकादिमदात्मवत्त्वं बाल्यावस्थायां गम्यत इति न दोषः । अथ कारणान्तरोपपादनम् ? तदपि न युक्तम्—अत एव दृष्टेन विशेषितत्वादिति । अथात्मन उत्पत्तिनिरोधकारणानुमानम् ? तन्न युक्तं—द्रव्यस्य सतः सर्वदा अमूर्तत्वादकारण आत्मा आकाशादिवदिति । आत्मानं च कृतकं प्रतिपद्यमानेन कारणमस्य वाच्यम् ? कुतः ?

(१) यत् पुनः—पा० ४ पु० ।
(२) उतानेकान्तपक्ष—पा० ४ पु० ।
(३) अथात्मन उपपत्ति—पा० ४ पु० ।

कार्यस्य कारणवत्त्वात्(१) सर्वं कार्यं कारणवद्दृष्टमिति ।

अथ पद्मादिप्रबोधसम्मीलनविकारोऽकस्माद्भवतीति ? तन्नो-ष्णशीतवर्षकाल(२) निमित्तत्वात् पञ्चात्मकविकाराणाम् ॥

नोष्णशीतवर्षकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ॥ २१ ॥

नायमाकस्मिकः पद्मादिप्रबोधसम्मीलनविकार इति सूत्रार्थः । एवं च सति दृष्टान्तेन न किञ्चित् प्रतिषिद्ध्यते पञ्चात्मकविकाराणामिति । न पञ्चात्मककारणानि(३) पद्मानीति, अपि तु पञ्चानां भूतानामनुग्रहे सति भवन्तीति पञ्चात्मकानीत्युच्यन्ते । वस्तुतस्तु न पञ्चात्मकं किञ्चिदस्तीत्युपरिष्टाद्वक्ष्यामः॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ॥ २२ ॥

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् । जातमात्रस्य वत्सस्य प्रवृत्त्या स्तन्याभिलाषो गम्यते तत्र प्रवृत्त्युन्मेयः(४) स्तन्याभिलाषस्तेनं स्मृतिस्तया संस्कारस्तेनानुभवस्तेन पूर्वशरीरमिति पूर्ववत् प्रयोगः । किमर्थं पुनरिदं सूत्रमारभ्यते यदाऽयमर्थः पूर्वाभ्यस्तसूत्रे ऽवगतः ? सामान्यतोऽधिगतस्य(५) विशेषज्ञापनार्थं सूत्रमित्यदोषः ॥

प्रवृत्तिमात्रस्यानैकान्तिकत्वज्ञापनार्थम्—अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणमिति सूत्रम्—

---

(१) कारणवत्त्वनियमात्—पा० ४ पु० ।

(२) वर्षाकाल—पा० १ पु० ।

(३) कारणानि—इति नास्ति ४ पु० ।

(४) प्रवृत्त्यनुमेयः—पा० ४ पु० ।

(५) सामान्यतो ज्ञातस्य—पा० ४ पु० ।

अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम् ॥ २३ ॥

न विकल्पानुपपत्तेः—किमिदमयसोऽयस्कान्ताभिगमनं(१) सनिमित्तमाहो निर्निमित्तमिति ? । यदि सनिमित्तं ? तत्केन गम्यते ? नियमेन अयांस्ययस्कान्तमेवोपसर्पन्ति न तु लोष्टादीन्, न च लोष्टादय उपसर्पन्ति, सोऽयं कार्यनियमात् कारणनियमो गम्यते । एतेनाकस्मिकत्वं प्रतिषिद्धम् । तदिदमयसामुपसर्पणं किं दृष्टकारणप्रत्याख्यानार्थमुपन्यस्तमथवा कारणान्तरोपदर्शनार्थम् ? अथात्मन्युत्पत्तिनिरोधानुमानमिति(२) पूर्ववत्प्रसङ्गः ॥

नान्यत्र प्रवृत्त्यभावात् ॥ २४ ॥

आकस्मिकत्वप्रतिषेधार्थं च नान्यत्र प्रवृत्त्यभावादिति सूत्रम् ॥

वीतरागजन्मादर्शनात् ॥ २५ ॥

नित्य आत्मा वीतरागजन्मादर्शनात् । न हि कश्चिज्जातमात्रो वीतरागो जायते वीतरागाणां जन्मादर्शनात् सरागो जायते इति गम्यते । जन्म व्याख्यातम् । ततः किं ? रागस्य पूर्वानुभूतविषया(३)नुचिन्तनं योनिः, न च विषयात्रगमासमर्थेषु इन्द्रियेषु रागः सम्भवति, न च स्मृतिमन्तरेण विषयानुचिन्तनम्(४) युक्तम्, पूर्वानुभूतविषयप्रार्थना सङ्कल्पः । अदृष्टादिति चेत् ?—अथ मन्यसे न पूर्वशरीरयोगो रागाद्गम्यते अपि त्वदृष्टाद्राग इति ? । नाभिप्रायापरिज्ञानात्(५)—नै-

(१) अयस्कान्तस्याभिगमनं—पा० ४ पु० ।
(२) निरोधार्थमिति—पा० ४ पु० ।
(३) पूर्वानुभवविषया—पा० ४ पु० ।
(४) रागचिन्तनं—पा० ४ पु० ।
(५) नाभिप्रायाविज्ञानात्—पा० ४ पु० ।

वमभिप्रायः कारणनियमेन रागोऽपि तु पूर्वशरीरसम्बन्धप्रतिपादनं सूत्रार्थः । न चादृष्टाद्राग इति ब्रुवता तत्प्रतिषिध्यत इति किञ्चिदुक्तम् । तन्मयत्वाद्राग इति, विषयाभ्यासः खल्वयं भावनाहेतुस्तन्मयत्वमुच्यते जातिविशेषाच्च रागविशेष इति । कर्म खल्विदं जातिविशेषस्य निर्वर्तकं तादर्थ्यात्ताच्छब्द्यं लभ्यते वीरणादिवत् ॥

सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः ॥ २६ ॥

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिरित्यनैकान्तिकपक्षे सूत्रम् । नोक्तोत्तरत्वात्—उक्तोत्तरमेतत् ॥

न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ॥ २७ ॥

न सङ्कल्पनिमित्तत्वाद्रागादीनामिति । अत्रापि पूर्ववत् सङ्कल्पस्मृतिसंस्कारपूर्वानुभवपूर्वशरीरवदात्मवत्त्वानि योज्यानीति । एवं चानादिः संसारोऽपवर्गान्तः सिध्यतीति व्यवस्थितमेतदस्त्यात्मा व्यतिरिक्तो नित्यश्चेति ॥

(इति नवभिः सूत्रैर्नित्यत्वप्रकरणम् ।)

आत्मानन्तरं शरीरमवसरप्राप्तं परीक्ष्यते । अथवा अनादिश्चेतनस्य शरीरयोग इति शरीरं परीक्ष्यते । तस्मिन् परीक्ष्यमाणे आत्माधिकारश्च परि(१)समाप्तो भवति । किं पुनरस्य परीक्ष्यं ? किं घ्राणादिवदेकप्रकृति ? अथ नानाप्रकृतीति ? विप्रतिपत्तेः संशयः । श्रूयते खल्वत्र विप्रतिपत्तिस्तत्रेदं तत्त्वम् ॥

पार्थिवं गुणान्तरोपलब्धेः ॥ २८ ॥

मानुषं शरीरं पार्थिवमिति । मानुषमिति किमर्थं(२)

(१) आत्माधिकारः एव—पा० ४ पु० ।

(२) किमिति—पा० ४ पु० ।

विशिष्यते ? लोकान्तरशरीराणि न पार्थिवानीति युक्तं वि-शेषणं, गन्धवत्त्वात् परमाणुवत्—गन्धवान् परमाणुरेकात्मको दृष्टः गन्धवच्च शरीरं तस्मादेकात्मकमेकस्वभावमिति । न त्विदमबादिभिरसंपृक्तया पृथिव्याऽऽरब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्प्यत इति भूतसंसर्गोऽविप्रतिषिद्धः ।

एवं तर्हि पार्थिवाप्यतैजसं तद्गुणोपलब्धेः, निःश्वासो-च्छ्वासोपलब्धेश्चातुर्भौतिकम्, गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकमिति (१) प्रत्युक्तम्(२) ॥

तत्र सन्निहितानां तद्गुणोपलब्धेरिति तदिदमनेकभूतप्र-कृति शरीरमरसमगन्धमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यादिति भाष्यम् । तस्य व्याख्यानं पृथिव्युदकाभ्यामार-भ्यमाणमगन्धं कारणगन्धस्यैकस्यानारम्भकत्वात् । पृथिव्य-नलाभ्यामारभ्यमाणमगन्धमरसं च कारणगन्धरसयोः केवल-योरनारम्भकत्वात् । पृथिव्यनिलाभ्यामगन्धमरसञ्चारूपं च वायोरगन्धरसरूपत्वात् । पृथिव्याकाशाभ्यामगन्धमरसमरूपम-स्पर्शं च आकाशे गन्धाद्यभावात् सर्वत्र समानो न्यायः कारणगुणस्य केवलस्यानारम्भकत्वात् । जलानलाभ्यामगन्ध-श्चारसं च, जलवायुभ्यामगन्धं चारसञ्चारूपं च, जलाका-शाभ्यामगन्धमरसमरूपमस्पर्शं च, तेजोनिलाभ्यामगन्धं चारसं चारूपश्च, अनलाकाशाभ्यामगन्धमरसमरूपमस्पर्शं च, अनिला-

(१)पार्थिवाप्यतैजसमिति-निःश्वासोच्छ्वासोपलब्धेरिति-गन्धक्लेदपाकेति च वाक्यत्रयं सूत्रत्वेन निर्णीतं वाचस्पतिमिश्रैर्न्यायसूचीनिबन्धे विश्वनाथपञ्चाननेन गोतमसूत्रवृत्तौ च । युक्तं चैतत् अनुपदमेव " इति भाष्य"मिति दर्शनात् ॥

(२) प्रतिषिद्धम्—पा० ४ पु० ।

काशाभ्यामेवमेव भूजलानलैरगन्धमेव भूजलानिलैरेवमेव भूजलाकाशैरेवमेव पृथिव्यनिलानलैरगन्धमरसं च, पृथिव्यनलाकाशैरेवमेव, पृथिव्यनिलाकाशैरगन्धमरसमरूपं च, जलानिलानलैरगन्धमरसं च जलानलाकाशैरेवमेव जलानिलाकाशैरगन्धं चारसं चारूपं च अनलानिलाकाशैरेवमेव पृथिव्युदकतेजोवायुभिरगन्धं पृथिव्युदकज्वलनाकाशैरेवमेव अवनिजलाकाशैरेवमेव पृथिव्यनिलज्वलनाकाशैरगन्धमरूपं च(१) जलानिलानलाकाशैरेवमेव पृथिव्युदकतेजोवाय्वाकाशैरगन्धं कारणगुणस्यैकस्यानारम्भकत्वादिति वाच्यम(२) एककारणकत्वे(३) तु सततोत्पत्त्यनुत्पत्ती नियतत्वप्रसङ्गश्चेत्युक्तम् ॥

श्रुतिप्रामाण्याच्च ॥ २९ ॥

श्रुतिप्रामाण्याच्च । सूर्यं ते चक्षुः स्पृणोमीत्यस्य मन्त्रस्यान्ते पृथिव्यां ते शरीरमिति—सेयं स्मृतिः कारणाद् कार्योत्पत्तिः । यदुक्तं भवति सूर्यश्चक्षुःकारणं, पृथिवी शरीरस्येति अन्त्येष्टिकाले मन्त्रः सूर्यं ते चक्षुर्गच्छतु पृथिवीं शरीरमिति । अस्यापि मन्त्रस्यार्थो यद्यस्मादायातं तत्तस्मिन्नेव प्रलयं गच्छति प्रकृतौ विकारस्य प्रलयाभिधानम् । प्रलयशब्देन च कार्यशून्यं कारणमुच्यते न पुनः कार्यस्य कारणे लयः प्रलयः एवं चासदुत्पद्यते सन्निरुध्यते इत्ययमर्थ उक्तो भवति ॥

(इति शरीरपरीक्षाप्रकरणम् ।)

---

(१) रगन्धमरसञ्च—पा० ४ पु० ।
(२) दिति समानम्—पा० ४ पु० ।
(३) एककारणगुणत्वे-पा० ४ पु० ।

अथेदानीमिन्द्रियाणि प्रमेयक्रमेण विचार्यन्ते । किमाव्यक्तिकान्याहंकारिकाणि आहो भौतिकानीति संशयकारणप्रतिपादनार्थं सूत्रम्—

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्य चोपलम्भान् संशयः ॥ ३० ॥

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः । कृष्णसारं भौतिकं तस्मिन्ननुपहते विषयोपलब्धिः, कृष्णसारव्यतिरेकेण विप्रकृष्टदेशावस्थितस्य विषयस्योपलब्धिः, सेयं व्यतिरेकोपलब्धिरभौतिकधर्मः, तदेवमुभयधर्मोपलब्धेः संशय इति । कृष्णसारमेव चक्षुः तस्मिन् सति भावाद्रूपग्रहणस्य—यस्मादिदं रूपग्रहणं सति कृष्णसारे भवति असति न भवति । यच्च यस्मिन् सति भवत्यसति न भवति तस्य तदिति । यथा कार्यद्रव्यस्य रूपादय इति । न प्रदीपादिभिरनेकान्तात्—प्रदीपे सति रूपोपलब्धिर्भवति न च प्रदीपस्य रूपोपलब्धिरित्यनेकान्तः । यस्य कृष्णसारं चक्षुः तस्य सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिप्रसङ्गः । कृष्णसारं न विषयं प्राप्नोति अप्राप्त्यविशेषात् सन्निकृष्टविप्रकृष्टयोस्तुल्योपलब्धिः प्राप्नोति । विषयीभावादिति चेत् ?—अथ मन्यसे सन्निकृष्टोऽस्य विषयो भवति विप्रकृष्टो न विषयः एवं च न तुल्योपलब्धिरिति ? नोक्तोत्तरत्वात् प्रत्यक्षसूत्र इति ।

अभौतिकानीत्यपरे—

महदणुग्रहणात् ॥ ३१ ॥

महदणुग्रहणात् । महदिति महत्तरं महत्तममुच्यते अण्विति अणुतरमणुतममिति(१) तदिदमुभयं चक्षुष्युपलभ्यमानं

---

(१) महदिति महत्तरमुच्यते अण्विति अणुतरमिति—पा० ४ पु०।

भौतिकत्वं चक्षुषो बाधते भौतिकं हि यावद्भवति तावदेव व्याप्नोति अभौतिकं तु व्यापकत्वात् सर्वसम्बद्धम् ।

न भौतिकेषु प्रदीपादिषु दृष्टत्वात्–भौतिकाः प्रदीपादयो महदण्वोः प्रकाशका भवन्तीत्यनेकान्तः प्रदीपाद्यनभ्युपगमे वा महदणुप्रकाशकत्वं चक्षुष एवेत्यसाधारणत्वादहेतुः भौतिकाभौतिकयोर्निवृत्तेः । ननु चाभौतिके ज्ञाने महदणुप्रकाशकत्वं दृष्टं ? न दृष्टं–न हि बुद्ध्या महदणुनी प्रकाश्येते, अपि तु प्रकाशो बुद्धिर्न प्रकाशनमिति, अवधारितस्यार्थस्य हानोपादानोपेक्षाबुद्धीनां साधनं बुद्धिरिति नाभौतिकं महदणुप्रकाशकमस्ति। ननु मनो विद्यते ? सत्यं न पुनस्तद्भौतिकं नाप्यभौतिकमिति । एतेनात्मा व्याख्यातः–न भौतिको नाभौतिक इति। यदि मनो नाभौतिकं यदुक्तं भौतिकानीन्द्रियाणि अभौतिकं मन इति तद्व्याहतं ? नाभौतिकार्थस्याभूतात्मकपर्यायत्वात् अभौतिकं मन इति अभूतात्मकं मन इति यावदुक्तं भवति । मुख्यतस्तु मनो न भौतिकं नाभौतिकमिति । नेन्द्रियेऽपि समानत्वात्–इन्द्रियमभौतिकमिति यावदुक्तं भवति अभूतात्मकमिति ? । अभूतात्मकं व्यापकं चेन्द्रियं प्रतिपद्यमान इदं पर्यनुयोज्यः व्यवहितार्थग्रहणं कस्मान्न भवति? किं कारणम्–व्यापकत्वादिन्द्रियस्य न कुड्यादेरावरणसामर्थ्यमस्तीति ? वृत्तिः प्रतिषिध्यत इति चेत् ?–अथ मन्यसे सत्यं व्यापकमिन्द्रियं तस्य तु पुरुषार्थहेतुना क्षोभ्यमाणस्य महाह्रदाद्बुद्बुदा इव निःसरन्त्यस्ताः कुड्यादिभिः प्रतिषिध्यन्त(१) इति ? न वृत्तिव्यतिरेकेणेन्द्रियसत्त्वे(२) प्रमाणाभावात्–येयं विषयग्रहणात्मिका वृत्तिः तां त्यक्त्वा तद्व्य-

(१) प्रतिबध्यन्त—पा० ४ पु० ।

(२) व्यतिरिक्तेनेन्द्रियसत्त्वे—पा० ४ पु० ।

तिरिक्तमिन्द्रियमिति किं प्रमाणम् ? न चाप्रामाणिकोऽर्थः शक्यः प्रतिपत्तुम्, न च प्रतिषिध्यमानाप्रतिषिध्यमानयो(१)रेकत्वम्, एकत्वे वाऽऽनर्थक्यं वृत्तिः प्रतिषिध्यते निश्चरतीति च । अव्यतिरेकाच्च तदुत्पत्तिविनाशधर्मकम्—यदि वृत्त्यव्यतिरेकीन्द्रियं यथा वृत्तेरुत्पादविनाशावेवमिन्द्रियस्यापि प्राप्नुतः । वृत्तेर्व्यक्तिर्नोत्पत्तिरिति चेत् ?—अथ मन्यसे न मया वृत्तेरुत्पत्तिरभ्युपगम्यतेऽपि तु व्यक्तिः न निरोधो विनाशोऽपि तु तिरोभाव इति ? नोत्पत्तिविशेषत्वात्—व्यक्तिरुत्पत्तेर्विशेषः । कथमिति ? नानुपजातविशेषस्य व्यक्तिरिति । अथानुपजातविशेषं व्यज्यत इति मन्यसे ? नित्यं व्यक्तिः स्यात् । एतेन विनाशो व्याख्यातः । तिरोभाव इति विद्यमानं न किञ्चिन्निरुद्धं न ह्यनिवृत्तविशेषस्याग्रहणं भवति । न च सर्वानित्यवादिना ग्रहणाग्रहणे युक्ते—विशेषस्यानुपजननाच्च ग्रहणं विशेषस्यानुपचयाच्चाग्रहणमिति । नित्यं व्यापकञ्चेन्द्रियमभ्युपगच्छतः कारणार्थो हीयते—कारणं नाम यस्यानन्तरं यद्भवति कारणञ्च नित्यं कार्यञ्च नित्यमिति किं कस्यानन्तरं कार्यकारणभावश्च कथं तयोर्नित्यत्वात् । कारकशब्दार्थश्च वाच्यः(२) । ननु करोतीति कारकम् ? सत्यं करोतीति कारकम्(३) न पुनर्नित्यवादिनः किञ्चित्कर्तव्यमस्ति न चासति कर्तव्ये कारकार्थं पश्यामः । व्यक्तौ कारकार्थ इति चेत् ? व्यक्तौ च तुल्यं व्यक्तिरपि व्यङ्ग्यवन्नित्येति व्यक्तावपि न कारकार्थोऽस्ति(४) युगपदनेकविज्ञानप्रसङ्गाच्च—यदि च वृत्तिर्वृत्तिमतो नान्या भवति वृत्तिमतोऽवस्थानाद्वृत्तीनामवस्थानमिति यु-

(१) प्रतिवध्यमानाप्रतिवध्यमानयोः—पा० १ पु० ।
(२) वक्तव्यः—पा० ४ पु० । (३) बाधकम्—पा० ५ पु० ।
(४) कारकोऽस्ति—पा० १ पु० ।

मपद्नेकविज्ञानप्रसङ्गः वृत्त्यनेकत्वे चैकमिन्द्रियमनेकं प्राप्नोति वृत्तिभ्योऽनन्यत्वात् । अथ माभूदिन्द्रियभेद इति ? वृत्तीनां तदेकत्वं प्राप्नोति वृत्तिवृत्तिमतोरनन्यत्वात् । अथ माभूदयं दोष इत्युभयं नेष्यते ? भेदस्तर्हि वृत्तिवृत्तिमतोरिति न चान्या गतिरस्ति तस्मादयुक्तम् व्यापकमिन्द्रियं नित्यं चेति ॥

महदणुग्रहणस्य चान्यथासिद्धेरहेतुः—योऽयं हेतुर्महदणुग्रहणा(१)दभौतिकानीन्द्रियाणीत्ययमन्यथासिद्धः न महदणुग्रहणमात्रादभौतिकत्वं व्यापकत्वमिन्द्रियाणां शक्यं प्रतिपत्तुं, कस्मात् इदं ? यस्माद्रश्म्यर्थसन्निकर्षविशेषान्महदण्वोर्ग्रहणम् ॥

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम् ॥ ३२ ॥

चक्षूरश्मेरर्थस्य च सन्निकर्षविशेषान्महदण्वोर्ग्रहणं भवति । तत्र सन्निकर्षमात्रात् सामान्यग्रहणं सन्निकर्षविशेषाद्विशेषग्रहणम् । कः पुनः सन्निकर्षस्य विशेषः ? भूयोऽवयवसन्निकर्षानुग्रहः यस्मादयं सन्निकर्षो विशेषप्रतिपत्तिहेतुर्भूयोऽवयवसंयोगैरनुगृह्यते सोऽयमवयवान्तरसंयोगापेक्षोऽवयवीन्द्रियसन्निकर्षः सन्निकर्षविशेष इत्युच्यते स च रश्म्यर्थसन्निकर्षविशेषोऽणुमहतोस्तुल्यो भवतीत्यन्यथा महदण्वोर्ग्रहणं सिद्ध्यति । रश्म्यर्थसन्निकर्षश्चावरणलिङ्गः कुड्यादिव्यवहितानामप्रकाशरूपत्वात् अप्राप्यकारित्वे तु न कुड्यादेरावरणसामर्थ्यमस्तीत्यस्ति चाक्षुषो रश्मिः यथा प्रदीपरश्मिरिति ॥

आवरणानुमेयत्वे सतीदमाह—

तदनुपलब्धेरहेतुः ॥ ३३ ॥

तदनुपलब्धेरहेतुः । न चाक्षुषो रश्मिर्विद्यत इति सूत्रार्थः ।

(१) महदण्वोर्ग्रहणा--पा० ४ पु० ।

कथमिति ? । उपलब्धिलक्षणप्राप्तत्वादनुमानानुपपत्तिः यत् खलूपलब्धिलक्षणप्राप्तं नोपलभ्यते तन्नास्ति यथा घटादि घटादेर्महदनेकद्रव्यवत्त्वरूपवत्त्वानि सन्तीत्युपलभ्यन्ते घटादयः तथा महदनेकद्रव्यवत्त्वरूपवत्त्वांश्चाक्षुषो रश्मिः कस्मात् प्रत्यक्षतो(१) नोपलभ्यत इति—महत्त्वं तावत् कारणमहत्त्वबहुत्वप्रचयेभ्यः अनेकद्रव्यवत्त्वमपि कारणबहुत्वादेव रूपस्पर्शवद्धि तेज इति नारूपं तत्—एवमशेषोपलब्धिकारणसन्निधाने सति यन्नोपलभ्यते(२) तेन गम्यते नास्तीति ॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥३४॥

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः । यत् प्रत्यक्षतो नोपलभ्यते तदनुमानेनोपलभ्यमानं नास्तीत्ययुक्तम्(३) यथा चन्द्रमसः परभागः पृथिव्याश्चाधोभागः प्रत्यक्षलक्षणप्राप्तावपि न प्रत्यक्षत उपलभ्यते अनुमानेन चोपलब्धेर्नतौ न स्तः । किं पुनरनुमानम् ? अर्वाग्भागवदुभयप्रतिपत्तिः तथा चाक्षुषस्य रश्मेः कुड्याद्यावरणमनुमानं सम्भवतीति ।

अपरे तु महदनेकद्रव्यवत्त्वाद्रूपवत्त्वाच्चोपलब्धिरित्युपलब्धौ नियमं वर्णयन्ति । नोपलभ्यमान इति किमुक्तं भवति न युक्तो(४) यत्र यत्र महदनेकद्रव्यवत्त्वरूपाणि सन्ति तत्तदुपलभ्यत इति, अपि तु यद्यदुपलभ्यते तत्र तत्र महदनेकद्रव्यवत्त्वरूपाणि सन्तीति ? । एवं तर्हि इदं सूत्रं नोपलब्धेः कारणप्रतिपादकम् सत्स्वभावादिति—सत्सु महदनेकद्रव्यरूपेषु उपलब्धिर्न भवतीति नैतान्युपलब्धिकारणानीति ॥

---

(१) प्रत्यक्षतया—पा० ४ पु० ।

(२) येन नोपलभ्यते—पा० ४ पु० ।

(३) न नास्तीत्यत उक्तम्—पा०४ पु० । (४) न ब्रूमो—पा०पु० ।

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥ ३५ ॥

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियम इति । शेषं भाष्ये । कस्मात् तर्हि चाक्षुषो रश्मिर्नोपलभ्यत इति ? उपलब्धिकारणाभावादिति । नैतावदेवो(१)पलब्धिकारणं यन्महदनेकद्रव्यरूपाणि, अपि तु रूपग्रहणाद्रूपविशेषोऽभिधीयते न रूपमात्रम् ।

एवं च सूत्रम् ॥

अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिः ॥ ३६ ॥

अनेकद्रव्येण समवायाद्रूपविशेषाच्च रूपोपलब्धिरिति । अत्र रूपविशेषग्रहणेन रूपधर्म उद्भवसमाख्योऽभिधीयते न रूपत्वं रूपान्तराद्रूपं विशिनष्टि अपि तूद्भवो विशेषकत्वाद्विशेष इत्युच्यते यथा ब्राह्मणविशेष इति न ब्राह्मणत्वं ब्राह्मणविशेषः एवं समानजातीयविशेषकत्वं यत् तद्विशेष इत्युच्यते उद्भवश्च कार्यगम्यः यस्याभावाद्विषक्तावयवमाप्यं द्रव्यं हेमन्ते न गृह्यते तैजसश्च ग्रीष्मे(२) यस्य भावात् प्रदीपरश्मिरुपलभ्यते आदित्यरश्मिश्च, स उद्भवो नाम विशेषः स तस्मिन्नायने रश्मौ रूपविशेषो नास्तीत्यतश्चाक्षुषो रश्मिर्नोपलभ्यत दृष्टश्च तेजसो धर्मभेदः । चतुर्विधश्च तेजो भवति उद्भूतरूपस्पर्शं यथाऽऽदित्यरश्मिः । उद्भूतरूपमनुद्भूतस्पर्शं यथा प्रदीपरश्मिः । उभयं च प्रत्यक्षम् रूपस्योद्भूतत्वात् । उद्भूतस्पर्शमनुद्भूतरूपं यथा वारिस्थितं तेजः । अनुद्भूतरूपस्पर्शं यथा नायनं तेजः(३) । उभयं चाप्रत्यक्षम् रूपस्यानुद्भूतेः ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ ३७ ॥

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः । शेषं भा-

---

(१) नैतदेवो—पा० ४ पु० । (२) उष्मा इत्यधिकं ४ पु० ।
(३) रूपस्पर्शो यथा नायनो रश्मि—पा ४ पु० ।

ऽये । रूपस्पर्शानभिव्यक्तिश्च व्यवहारप्रक्लृप्त्यर्था—यदि नायनो रश्मिरुद्भूतस्पर्शो भवेत् तेन दृश्यविशेषे ऽनेकरश्मिसन्निधाने सति द्रव्यं दह्येत अनेकरश्मिसन्निपाते च सति(१) व्यवहितत्वाद्द्रव्यस्यानुपलब्ध्या भवितव्यम् । अथ मन्यसे यथादित्यरश्मिसम्बद्धेऽर्थे नायनो रश्मिर्न व्यवधीयते एवं रश्म्यन्तरसन्निपाते ऽपीति ? । तन्न व्यतिभिन्नार्थग्राहकत्वात्(२) व्यतिभिन्नादित्यरश्मिं ततसम्बद्धेन द्रव्येण सम्बद्ध्यते उद्भूतरूपस्पर्शवत्त्वे च चक्षुषो यस्य पूर्वं सन्निपतितं चक्षुस्तदितरेण व्यवहितमपि(३) नार्थं गृह्णीयात् । अथानेकरश्मिसन्निपाते सति समानजातीयद्रव्येभ्यो द्रव्यान्तरं रश्मिरुत्पद्यत इति । एवं सति समग्रासमग्रचक्षुषोस्तुल्योपलम्भः प्राप्नोति । न चैतदिष्टमनुपलब्धेरिति व्यवहारक्लृप्त्यर्थं च नायनस्य रश्मेरनुद्भूतरूपस्पर्शवत्त्वमिति । सर्वद्रव्याणां विश्वरूपो व्यूहः पुरुषार्थकारित इति । कर्म च धर्माधर्मरूपं चेतनस्योपभोगार्थमिति ॥

अव्यभिचाराच्च प्रतीघातो भौतिकधर्मः ॥३८॥ (४)

अव्यभिचारी तु प्रतीघातो भौतिकधर्मः । भौतिकं चक्षुः कुड्यादिभिः प्रतीघातदर्शनात् घटादिवदिति । अप्रतीघातादभौतिकमिति चेत् ?—अथ मन्यसे यदि प्रतीघाताद्भौतिकमप्रतीघातादभौतिकम् दृष्टश्चाप्रतीघातः काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ? नानेकान्तात्—प्रदीपरश्मिवत् भौतिकस्याप्रतीघातः यथा

---

(१) सन्निधाने सति—पा० ४ पु० ।

(२) ग्राह्यत्वात्—पा० १ पु० ।

(३) व्यवहितामिति—पा० ४ पु० ।

(४) इदं सूत्रं न विश्वनाथपञ्चाननसम्मतम् नापि न्यायसूचीनिबन्धे दृश्यते ।

प्रदीपरश्मेरिति । स्थाल्यादिषु च पाचकस्य तेजसोऽप्रतीघातादिति ।

उपपद्यते चानुपलब्धिः कारणभेदात्—

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३९॥

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः । यथोपलब्धिलक्षणप्राप्तस्य मध्यन्दिनोल्काप्रकाशस्य निमित्तादग्रहणमभिभवात् तथोपलब्धिलक्षणप्राप्तस्य चाक्षुषस्य रश्मेरग्रहणं निमित्ताद्रूपस्यानुद्भूतेरिति । मध्यन्दिनोल्काप्रकाशो नोपलभ्यते इति आदित्यप्रकाशात्—आदित्यप्रकाशाभिभवादित्ययुक्तम् सर्वरश्मिवत्त्वप्रसङ्गात् ?—एवं सति सर्वं लोष्टादि रश्मिमत् प्राप्नोति ? । अथ लोष्टादिरश्मयः कस्मान्नोपलभ्यन्ते इत्यनुक्तो ब्रूयादादित्यरश्म्यभिभवादित्ययुक्तं तदेतदुत्तरद्वारकं सूत्रम्—

न रात्रावप्यनुपलब्धेः ॥ ४० ॥

न रात्रावप्यनुपलब्धेः । यदि लोष्टादिरश्मयः स्युर्दिवादित्यप्रकाशाभिभवाच्च नोपलभ्यन्ते इति रात्रौ तर्ह्युपलभ्येरन् रात्रावपि नोपलभ्यन्ते । व्यञ्जकाभावादिति चेत् ? न हि यद्यस्याभिभावकं तत् तस्याभिव्यञ्जकमिति । कथं न प्राप्नोति लोष्टादिरश्मीनामुपलम्भः अनुमानतश्च नोपलभ्यते लोष्टरश्मिरित्यपिशब्दात् गम्यते । तदेवं सर्वप्रमाणनिवृत्तेर्न विद्यते लोष्टरश्मिः न पुनरेवं चाक्षुषो रश्मिर्निरनुमानः कुड्यादेरावरणस्य सामर्थ्यादिति तस्य विद्यमानस्य बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ॥ ४१ ॥

दृष्टान्तस्थान एवैतत् सूत्रम् । किमुक्तं भवति ? यत् खलु

बाह्यप्रकाशमपेक्षते(१) तस्यानुपलब्धीरूपानभिव्यक्तित इत्यनुद्भूतेर्यथा विषक्तावयवस्याऽऽप्यद्रव्यस्य रूपानुद्भूतेरग्रहणम् तथा चाक्षुषो रश्मिर्बाह्यप्रकाशानुग्रहमपेक्षते तस्मादस्यापि रूपस्यानुद्भूतेरग्रहणमिति । कस्मात् पुनर्नायनस्य रश्मेरनुपलब्धेरभिभवो न कारणमुच्यते इति ? नोच्यते—

अभिव्यक्तौ चाभिभवात् ॥ ४२ ॥

अभिव्यक्तौ चाभिभवात्—यदुद्भूतरूपं बाह्यप्रकाशानुग्रहणं च नापेक्षते तदभिभूयते यथा मध्यन्दिनोल्काप्रकाशः, अनुद्भूतरूपश्च नायनो रश्मिर्बाह्यप्रकाशानुग्रहणं चापेक्षते यदनुद्भूतरूपं तन्नाभिभूयते यथा तदेव विषक्तावयवमाप्यं द्रव्यम् । यच्च बाह्यप्रकाशानुग्रहापेक्षं उद्भूतरूपमपि तन्नाभिभूयते यथा घटादिद्रव्यमिति, सोऽयमुभयविषयोऽभिभवो नायनरश्मावनुपपन्न इति विप्रतिपत्तिविषयः । कृष्णसारं रश्मिमत् द्रव्यत्वे सति रूपोपलब्धौ नियतस्य साधनाङ्गस्य निमित्तत्वात् प्रदीपवदिति । अथवा रश्मिमच्चक्षुः द्रव्यत्वे सति नियतत्वे च सति स्फटिकादिव्यवहितार्थप्रकाशकत्वात् प्रदीपवत् ॥

नक्तञ्चरनयनरश्मिदर्शनाच्च ॥ ४३ ॥

नक्तञ्चरनयनरश्मिदर्शनाच्चेति दृष्टान्तसूत्रम् । मानुषं चक्षू रश्मिमत् अप्राप्तिस्वभावत्वे सति रूपाद्युपलब्धिनिमित्तत्वात् नक्तञ्चरचक्षुर्वदिति । जातिभेदादिन्द्रियप्रभेद इति चेत् ?—अथ मन्यसे यथा विडालत्वं जातिर्वृषदंशे वर्त्तते न मनुष्ये एवं रश्मिमद्विडालस्यैव चक्षुर्भविष्यति

(१) प्रकाशानुग्रहमपेक्षते—पा० ४ पु० ।

न मानुषस्येति ? नावरणसामर्थ्यात्—सत्येतस्मिन् जातिभेदे यथा-वृषदंशप्रभृतीनां कुड्यादिभीरश्मय आव्रियन्ते तथा मनुष्याणामपीति समानमेवेति । इतश्च(१) भौतिकानीन्द्रियाणि प्रतिघातित्वात् घटवदितिवत(२) भूतं श्रोत्रं द्रव्यत्वे सति बाह्यप्राप्तार्थप्रकाशकत्वात् घ्राणादिवदिति ॥

रश्म्यर्थसन्निकर्षग्रहणात्तद्ग्रहणमयुक्तमन्यथापि ग्रहणात्—

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः॥४४॥

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः । तृणादिसर्पद्द्रव्यं काचेऽभ्रपटले वा प्रतिहन्यते । यदि चाक्षुषो रश्मिः प्राप्तार्थप्रकाशकः स्यात् काचाभ्रपटलैकान्तरिते प्रकाशको न स्यात् । अस्ति तु । तस्मान्न प्राप्यकारि चक्षुरिति । अत एवाभौतिकं प्राप्यकारित्वं भौतिकधर्म इति ।

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ॥ ४५ ॥

न कुड्यान्तरितानुपलब्धेरप्रतिषेध इति ।

अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणसामर्थ्यमस्तीत्युक्तम् । शेषं भाष्ये ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः ॥ ४६ ॥

अप्रतिघातात् सन्निकर्षोपपत्तिः(३) । न काचोऽभ्रपटलं वा रश्मिं प्रतिबध्नाति सोऽप्रतिहन्यमानो व्यतिभिद्यार्थेन सम्बध्यते ।

---

(१) अतश्च—पा० ४ पु० ।

(२) घटादिवदिति—पा० ४ पु० ।

(३) सन्निकर्षोपलब्धिः—पा० ४ पु० ।

यश्च मन्येत न भौतिकस्यास्त्यप्रतीघात इति सर्वं हि भौतिकं प्रतीघातधर्मकमिति ? तन्न—

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ॥ ४७ ॥

आदित्यरश्मेः स्फटिकान्तरितेऽपि(१) दाह्येऽविघातात् । न आदित्यरश्मेरविघातात् स्फटिकान्तरितेऽप्यविघाताद्दाह्येऽप्यविघातात् । अविघातादिति(२) पदाभिसम्बन्धाद्वाक्यभेदः । नैकं वाक्यमनेकार्थं प्रतिवाक्यं चार्थभेद इति । शेषं भाष्ये ॥

कोऽयमविघातः ? अव्यूह्यमानावयवद्रव्यानुप्रवेशः—यस्य द्रव्यस्यावयवा न व्यूह्यन्ते तस्यान्तरावयवैरव्यूह्यमानस्य योऽभिसम्बन्धः सोऽविघात इति । अन्तर्व्यवस्थितस्य वा द्रव्यस्य वाऽव्यूह्यमानावयवद्रव्यस्य बहिरवस्थितद्रव्यप्राप्तिः । दृष्टं कलशे निषक्तानामपां बहिःशीतस्पर्शग्रहणम् न हि गुणस्यास्वतन्त्रस्य(३) गुणिनमन्तरेण बहिर्निर्गमनं(४) युक्तमिति । तत्र परिस्पन्दः तिर्यग्गमनं परिस्रवः पात इति ॥

नेतरेतरधर्मप्रसङ्गात् ॥ ४८ ॥

नेतरेतरधर्मप्रसङ्गात् । इतरधर्म इतरत्र प्रसज्यते(५) इतरधर्मश्चेतरत्र यद्यविघातः चक्षूरश्मेः स्फटिकादिभिः कुड्यादिभिरपि

(१) स्फटिकान्तरेऽपि—पा० ४ पु० ।
(२) अप्रतिघातादिति—पा० ४ पु० ।
(३) गुणस्य द्रव्यतन्त्रस्य—पा० ४ पु० ।
(४) बहिर्गमनं—पा० ४ पु० ।
(५) प्रयुज्यते—पा० ४ पु० ।

प्राप्नोति कुड्यादिभिर्वा प्रतीघातः स्फटिकादिभिरपि प्राप्नोति ?

नैष दोषः—

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः ॥ ४९ ॥

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः । आदर्शोदकयोः प्रसादो रूपविशेषः स च स्वो भवति नियमात् । कः पुनरयं रूपविशेषः द्रव्यान्तरासंयुक्तद्रव्यसमवायः तस्य वा रूपोपलम्भनसामर्थ्यं स्वो धर्मः स च स्वभावतः तस्य या विद्यमानता उदकादिषु तत्स्वाभाव्यं प्रसादस्वभावत्वाद् आदर्शोदकादिषु नयनरश्मिः प्रतिहन्यते स च प्रतिहतः प्रतिनिवृत्तौ स्वमुखादिना सम्बध्यते तस्य चाग्रसम्बन्धाद्यदभिमुखमग्रं तदभिमुखं मुखादि पश्यतीति यथाग्रतोऽवस्थितस्य पुरुषस्येति आदर्शमुखग्रहणमनुक्रमेण तदप्याशुभावान्न विभाव्यते आदर्शरूपानुग्रहणात् तदनुरञ्जितः प्रत्ययः । शेषं भाष्ये ॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ ५० ॥

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः । प्रमाणस्य तत्त्वविषयत्वाद्—दृष्टानुमिताः खल्विमे द्रव्यधर्मा यथाभूता भवन्ति तथाभूता एव प्रमाणेन प्रतिपाद्यन्ते इमौ च भवता नियोगप्रतिषेधौ देशितौ क विषये स्याताम्, न चैतद्युक्तम् न हि यथा धूमेनाग्निप्रतिपत्तिस्तथोदकप्रतिपत्तिरपि भवत्विति । न चोदकप्रतिपत्तिर्धूमेन भवतीत्यग्निप्रतिपत्तिरपि न युक्ता, अर्थान्नियुञ्जानो भवानुपेक्षणीयः प्रतिघाताप्रतिघातयोः खल्पूलब्ध्यनुपलब्धी व्यवस्थापिके व्यवहितोपलब्ध्यानुमीयते स्फटिकादिभिरप्रतीघातः व्यवहिता-

नुपलब्ध्या च कुड्यादिभिः प्रतीघात इति । यदि प्राप्यकारि चक्षुर्भवति अथ कस्मादञ्जनशलाकादि नोपलभ्यते ? नेन्द्रियेणासम्बन्धात्(१) इन्द्रियेण सम्बद्धा अर्था उपलभ्यन्ते न चाञ्जनशलाकादीन्द्रियेण सम्बद्धम् अधिष्ठानस्यानिन्द्रियत्वात् रश्मिरिन्द्रियं नाधिष्ठानं न रश्मिनाऽञ्जनशलाका सम्बद्धेति ॥

(इति इन्द्रियभौतिकत्वपरीक्षाप्रकरणम् ।)

एवं तावद् भौतिकानीन्द्रियाणीति समर्थितम् । किं पुनरेकमिन्द्रियमाहोऽनेकमिति ? । एके तु—

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ ५१ ॥

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः । एके तु स्थानान्यत्वे नानात्वं दृष्टं यथा बहूनां घटानामिति । एकस्य च नानास्थानत्वं यथाऽवयविन इति । अनुपपन्नरूपश्चायं संशयः । कथमिति ? यदि तावदेवं क्रियते स्थानान्यत्वे नानात्वैकत्वदर्शनादिति ? तदैकत्वे स्थानान्यत्वस्या(२)दर्शनान्न समानधर्मः । अथ नानास्थानत्वे सत्येकानेकत्वदर्शनात् संशय इति ? तदा द्रव्यं नानास्थानमनेकं न किञ्चिद्दृष्टमिति न समानधर्मत्वम् यद् घटाद्यनेकं तन्न नानास्थानम् अपि तु स्थानान्यत्वं(३) तस्य, सोऽयं संशय उभयथानुपपन्न इन्द्रियेषु । स्थानेषु तु युक्तः किं नानास्थानानि

(१) नेन्द्रियाणामसम्बन्धात्—पा० ४ पु० ।

(२) स्थाननानात्वस्या—पा० ४ पु० ।

(३) स्थाननानात्वं—पा० ४ पु० ।

उत नानास्थानम् ? इन्द्रियेषु तु न स्थाननानात्वात् सम्भवति न च नानास्थानत्वादिति । शरीरव्यतिरेकित्वात् सत्वाच्च संशयः—शरीरव्यतिरिक्तमुभयथा दृष्टमेकमनेकं च यथाकाशं घटादि च । सच्चोभयथा दृष्टमेकमनेकं च । तदेवमुभयथेन्द्रियेषु(१) शरीरव्यतिरेकः सत्त्वं च, तेन सन्दिह्यते ।

एकमिन्द्रियं, किं पुनस्तत्—

त्वगव्यतिरेकात् ॥ ५२ ॥

त्वगव्यतिरेकात् । कः पुनरयमव्यतिरेकः ? सर्वाधिष्ठानसम्बन्धः—नहि न किञ्चिदिन्द्रियं न त्वचा प्राप्तम् । सति भावो वा—न ह्यसत्यां त्वचि किञ्चिदर्थग्रहणं भवति(२) तस्मात् त्वगेकमिन्द्रियम् ।

नेन्द्रियान्तरार्थानुपलब्धेरिति लोकविरोधः—एकमिन्द्रियमिति ब्रुवाणो लोकं विरुणद्धि विद्यमाने त्वगिन्द्रिये स्पर्शोपलब्धिप्रसङ्गः इन्द्रियान्तरार्था रूपादयोऽन्धादिभिरुपलभ्येरन् न तूपलभ्यन्ते तस्मान्नैकमिन्द्रियमिति । यदप्यव्यतिरेकादिति ? तदपि नानेकान्तात् अनेकेन चानिन्द्रियेण सर्वाणीन्द्रियाधिष्ठानानि पृथिव्यादिना प्राप्तानीत्यनेकान्तः । अवयवोपघातादिति चेत् ?—अथ मन्येतत् त्वगवयवः कश्चिदुपहतो भवति तदुपघातादन्धादिभिर्नोपलभ्यन्ते(३) रूपादय इति—यथा त्वगवयवविशेषेणैव धूमोपलब्धिः यश्चक्षुषि त्वगवयवविशेषस्तदुपघाताद्धूमस्पर्शानुपलब्धिरिति(४) ? । न व्याघातात्—त्वगवयवविशेषेण धूमो-

(१) उभयमिन्द्रियेषु—पा० ४ पु० ।
(२) किञ्चिद्विषयग्रहणं सम्भवतीति—पा० ४ पु० ।
(३) नोपपद्यन्ते—पा० ४ पु० ।
(४) धूमस्यानुपलब्धिरिति—पा० ४ पु० ।

पलब्धिवद्रूपाद्युपलब्धिरिति ब्रुवता यदुक्तमेकमिन्द्रियमिति तद्व्याहतं भवति प्रागेकमिन्द्रियं त्वगित्युपगम्येदानीं त्वगवयवविशेषा रूपादिग्राहका इति ब्रुवाणः प्रतिषेध्यमभ्यनुजानाति न ह्यवयव्यनतिरिक्ता अवयवा इति । यांश्चावयवान् रूपादिग्राहकान् त्वचो मन्यन्ते ते किमिन्द्रियात्मका उत नेति? किं चातः? यदीन्द्रियात्मका नैकमिन्द्रियम्, अथेन्द्रियात्मका न भवन्ति न तर्हीन्द्रियग्राह्या रूपादय इति ।

सूत्रेण चाभिसम्बन्धः-

न युगपदर्थानुपलब्धेः ॥ ५३ ॥

न युगपदर्थानुपलब्धेः । यस्यैकमिन्द्रियं तस्य युगपदर्थानामुपलब्धिः प्रसज्यते । कथमिति ? आत्मा मनसा सम्बध्यते मन इन्द्रियेण, इन्द्रियं सर्वार्थैः सन्निहितैरिति, आत्मेन्द्रियमनोऽर्थसन्निकर्षेभ्यो युगपदुपलब्धयः प्रादुः स्युरिति ।

नैकेन्द्रियग्राह्याणां युगपदुपलब्धिप्रसङ्गात्-यथैकेन्द्रियवादिनो युगपदनेकार्थसन्निधाने(१) सति युगपदुपलब्धिदोषो भवति तथानेकेन्द्रियवादिनोऽपि एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गः । य एवात्र परिहारः स एव ममापि भविष्यतीति । अथायमदुष्टः पक्षः ? अदेश्यं तर्ह्येतत् युगपदुपलब्धिप्रसङ्ग इति । अत्र केचित् परिहारं वर्णयन्ति बुभुत्साभेदान्न युगपदुपलब्धिरिति । ममाप्येवम्-यदि बुभुत्साभेदान्न युगपदुपलब्धिर्लभ्यते ममापि न बुभुत्साभेदो दण्डवारित इति । सत्यां च बुभुत्सायामयुगपदुपलब्धौ न्यायोऽन्यो ऽवधारणीय इति । करणत्वा-

(१) सम्बन्धे सति—पा० ४ पु० ।

द्विग्रन्थे—अन्ये तु ब्रुवते परिहारं करणत्वादिति—करण-स्य किलायं धर्मः अधिष्ठितमप्यनेकां युगपत्क्रियां न श-क्नोति कर्तुम् अनधिष्ठितं च न प्रवर्तत इति तुल्यम् । यस्याप्येकमिन्द्रियं तस्यापि करणत्वं न निवार्यत(१) इति तस्माद्युगपदर्थानुपलब्धिरित्यदोषोऽयमिति । एवं ब्रुवाण ए-केन्द्रियवादी विकल्प्य पर्यनुयोज्यः—यत्तदेकमिन्द्रियं स-र्वार्थमिति मन्यसे तत् किं प्राप्यकार्याहो नेति, किं चातः ? यदि प्राप्यकारि ? किं तदिति वक्तव्यम् ? यदि त्वक् त्व-चा प्राप्तानां रूपाणामग्रहणप्रसङ्गः । अथाप्राप्तं रूपं गृह्णाति ? स्पर्शादिष्वप्येवं प्रसङ्गः । अथ सामिकारीन्द्रियं किञ्चित् प्राप्तं गृह्णाति किञ्चिचाप्राप्तम् ? एवं सति करणधर्मातिक्रमः । भवतु करणधर्मातिक्रमः किन्नो बाध्यत इति ? एतस्मिन् पक्षे न युगपदुपलब्धिप्रसङ्गादिति सूत्रम् । यथानेकेन्द्रिय-वादिन(२) एकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्गे करणत्वादिति परिहारः सोऽस्य(३) न भवति करणधर्मातिक्रमात् । व्याहतं चैतत् करणं प्राप्यकार्यप्राप्यकारि चेति । असाहचर्याच्च न त्वक्—साहचर्यं नाम यस्यैकं विषयग्रहणं तस्य द्वितीय-मपीत्यन्धबधिराद्यभावप्रसङ्गः ॥

विप्रतिषेधाच्च न त्वगेका ॥ ५४ ॥

विप्रतिषेधाच्च न त्वगेका । शेषं भाष्ये । एकोपघा-ते तद्विनाशे वा सर्वानुपलब्धिप्रसङ्गः—अथैकमिन्द्रियं भ-वति तद्विघाते विनाशे वा सर्वानुपलब्धिप्रसङ्गः । आवरणा-

(१) निवर्तत—पा० ४ पु० ।
(२) यथा नानेन्द्रियवादिन—पा० ४ पु० ।
(३) सोऽत्र—पा० ४ पु० ।

नुपपत्तेः—यदि त्वगेकमिन्द्रियं भवति नावरणस्य सामर्थ्यमस्तीति विप्रकृष्टावस्थितोपलब्धिप्रसङ्गः । दूरान्तिकार्थानुविधानं चोपलब्ध्यनुपलब्ध्योर्न स्यात्—अप्राप्यकारित्वे सतीन्द्रियस्यान्तिके ग्रहणं दूरे चाग्रहणमित्येतन्न स्यात् । प्रतिषेधाच्च नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते प्रतिषेधान्नानात्वं सिध्यतीति । तन्न बुध्यामहे प्रतिषेधादेकत्वसाधनं न स्यात् नानात्वं कथं सिध्यतीतिनासाधना क्रियेति एकत्वं च प्रतिषेद्धुं कथं शक्यते प्रतिषेधात् एकत्वसाधनमनुमानं निवर्तते न पुनरेकत्वमनेकत्वं वा निवर्तत इति । कथं तर्हि अयं ग्रन्थो ग्राह्यः ? प्रतिषेधाच्चनन्तरं नानात्वसिद्धौ स्थापनाहेतुरप्युपादीयते इन्द्रियार्थपञ्चत्वात् । अथवा प्रतिषेधाच्च नानात्वसिद्धाविति प्रतिषेधहेतुना एकत्वप्रतिषेधे कृतेऽर्थान्नानात्वं सिध्यतीत्ययमर्थः । कतमः पुनरसौ प्रतिषेधहेतुः ? युगपदर्थोपलब्धिप्रसङ्गादित्ययम् । अनेनैकत्वं प्रतिषिद्धम् ।

तदेवमवीतसिद्धौ वीतदर्शनार्थमिदमुच्यते—

इन्द्रियार्थपञ्चत्वात् ॥ ५५ ॥

इन्द्रियार्थपञ्चत्वादिति सूत्रम् । अर्थः प्रयोजनमित्येवमादि भाष्ये । इदं च सूत्रं न कथञ्चन न्यायेन सम्बध्यते । कथमिति ? विधीयमानोऽर्थः साध्यः पञ्चेन्द्रियाणीति इन्द्रियार्थपञ्चत्वादित्यसम्बद्धम्(१) अथ प्रयोजनपञ्चत्वं(२) ? तदप्येवमेव । अथ ग्रहणानि पक्षीक्रियन्ते ? तत्राप्यैकान्तिको हेतुर्नास्तीति । एतेन विषया व्याख्याताः । इदं तु सूत्रमेवं स्यात् रूपरसगन्धस्पर्शशब्देषु नानासाधनाक्रियः

(१) इत्यासिद्धम्—पा० ४ पु० ।
(२) परत्वम्—पा० ४ पु० ।

कर्ता एकविषयावसितौ विषयान्तरसिद्धौ करणान्तरापेक्षित्वात् यस्य कर्तुरनेको विषयः तस्यान्यतमविषयावसाये विषयान्तर-सिद्धौ करणान्तरापेक्षित्वं(१) दृष्टम् यथाऽनेकशिल्पपर्यवदातस्य पुरुषस्य क्रियावसायात् क्रियायां करणान्तरापेक्षित्वम्। तथा च रूपाद्यन्यतमविषयावसाये विषयान्तरसिद्धौ(२) साधनान्तरापेक्षित्वमस्ति तस्माद्रूपरसगन्धस्पर्शशब्देषु नानासाधन-क्रियः कर्ता ॥

न तदर्थबहुत्वात् ॥ ५६ ॥

न तदर्थबहुत्वात्। अस्य यथाश्रुत्युत्थानस्य चार्थ इन्द्रिय-पञ्चत्वविरोधः।

न विरोधात् अर्थबहुत्वादिन्द्रियबहुत्वमिति ब्रुवाणो यद-भ्युपगतमेकमिन्द्रियमिति तद्बाधते। नासाधनात्—न मयार्थ-बहुत्वादिन्द्रियबहुत्वं साध्यते यतो मे विरोधः स्याद्, अपि तु भवतेन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणीति यत्साधनमुक्तं तस्य मया विरोधो देश्यते यदीन्द्रियार्थपञ्चत्वात् पञ्चेन्द्रियाणि भवन्ती-न्द्रियार्थबहुत्वाद् बहूनीन्द्रियाणि प्रसज्यन्ते इति।

अस्योद्धारकं सूत्रम्(३) –

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः॥५७॥

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः। गन्धत्वादिभिः सामान्यैः कृतव्यवस्था(४) गन्धादयः न स्वकरणव्यति-रकेण करणान्तराणि प्रयोजयन्ति यावत्तु गन्धत्वं वर्तते ता-वतामेकसाधनसाध्यत्वात् यः पुनरपरो जातिभेद इष्टानिष्टोपेक्षणी-

(१) साधनान्तरापेक्षित्वम्–पा० ४ पु० (२) सिद्धौ–पा० ४ पु०।

(३) अस्योत्तरद्वारकं सूत्रम्—पा० ४ पु०।

(४) कृतकत्वव्यवस्था—पा० ४ पु०।

यत्वादिर्नासौ करणान्तरं प्रयोजयति एवं सर्वत्र । शेषं भाष्ये ।

यदि सामान्यं संग्राहकं प्राप्तमिन्द्रियाणां विषयत्वाव्यतिरेकादेकत्वम्(१)—

विषयत्वाव्यतिरेकादेकत्वम् ॥ ५८ ॥

अस्यार्थोऽविरोध एव नोक्तोत्तरत्वात् इन्द्रियार्थपञ्चत्वादित्यस्यार्थेनोक्तोत्तरमेतत् । अस्य चार्थस्य ज्ञापनार्थं न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्य इति सूत्रम्—

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः॥५९॥

तत्र बुद्धय एव लक्षणानीत्यस्यार्थो वर्णित इन्द्रियार्थपञ्चत्वादिति । नानेन्द्रियं भिन्नाधिष्ठानत्वात्(२) यस्याधिष्ठानं भिन्नं तदनेकं दृष्टम् यथा घटादिष्वधिष्ठानभेदस्तथेन्द्रियाणामस्ति(३) तस्मान्नानेति । अधिष्ठानभेदोऽसिद्ध इति चेत् ? न अन्धबधिराद्यभावप्रसङ्गात् । यस्य पुनरधिष्ठानभेदस्तस्य भेदे एकाधिष्ठानविनाशे ऽधिष्ठानान्तराश्रयस्यावस्थानमिति(४) न दोषः । गतिभेदादिरस्य भिन्नगतित्वादिति प्रयोगः प्रसङ्गः पूर्ववत् । आकृतिः परिमाणमियत्ता । स्वस्थानपरिमाणानि घ्राणरसनस्पर्शनानि । चक्षुर्बहिर्निःसृतं विषयव्यापि तन्महत् । श्रोत्रं त्वाकाशं तदधिष्ठाननियमेन प्रवर्तते धर्माधर्मसंहितया इष्टानिष्टोपेक्षणीयशब्दसाधनभूतया कर्णशष्कुल्याय आकाशस्य सम्बन्धस्तत्सम्बन्धानुविधाय्याकाशं न विव-

(१) विषयव्यतिरेकित्वादेकत्वं—पा० ४ पु० ।

(२) भिन्नाधिष्ठितत्वात्—पा० ४ पु० ।

(३) यथा घटादि, अधिष्ठानभेदश्चेन्द्रियाणामस्ति—पा० ४ पु० ।

(४) भेदे एकाधिष्ठानविनाशेऽधिष्ठानान्तराश्रयस्येन्द्रियस्यावस्थानमिति—पा० ४ पु० ।

रान्तरेणास्यादिना शब्दमुपलक्षयति(१) नान्यत्रेति तदुपकारप्रतीकारभेदाद्धोपक्रियते प्रतिक्रियते चेति, न च पुनराकाशं नित्यत्वादुपक्रियते न(२) प्रतिक्रियत इति । प्रकृष्टाप्रकृष्टश्रोत्रभेदोऽप्यत एव । जातिरिति योनिं प्रचक्षते । पञ्च खल्विमा इन्द्रिययोनयः पृथिव्यादीनि भूतानीन्द्रियाणां योनय इति योनिस्तादात्म्यं न पुनस्तत्र कार्यत्वमाकाशे सम्भवति नित्यत्वात् । कथं पुनर्ज्ञायते भूतप्रकृतीनीन्द्रियाणि नाव्यक्तप्रकृतीनीति ? नोक्तोत्तरत्वात् नाव्यक्तप्रकृतीनीन्द्रियाणीत्युक्तोत्तरमेतत् ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥ ६० ॥

भूतगुणविशेषोपलब्धेस्तादात्म्यम् । भूतगुणविशेषो गन्धरसरूपस्पर्शशब्दा विशेषकत्वाद्विशेषा इत्युच्यन्ते । यथा गन्धवत्त्वादिना(३) पृथिव्यबादिभ्यो भिद्यते रसादिभिरबादय इति । दृष्टो हि बाह्यानामुभयपक्षसम्प्रतिपन्नानां पृथिव्यादिभूतानां स्वगुणाभिव्यक्तिनियमः अस्ति च घ्राणादिभिरपि गन्धाद्यभिव्यक्तिनियमः तेन भूतगुणविशेषोपलब्धेर्भूतप्रकृतीनीन्द्रियाणीति । किं किमात्मकमिति ? येन यद्गुणाभिव्यक्तिः । तत्र पार्थिवं घ्राणं गन्धाभिव्यक्तिहेतुत्वात् बाह्यपार्थिवद्रव्यवदिति । एवं शेषेष्वपि ॥

(इतीन्द्रियनानात्वप्रकरणम् ।)

गन्धादयः पृथिव्यादिगुणा इत्युद्दिष्टम् उद्देशश्च नियोगविकल्पसमुच्चयैः समानः तत्र नियोग एकैकगुणत्वं, विक-

(१) शब्दमुपलम्भयति—पा० ४ पु० ।

(२) न—नास्ति ४ पु० ।

(३) गन्धवत्त्वेन—पा० ४ पु० ।

रूपः कस्यचिदेकः कस्यचिद्द्वावित्येवमादिः, समुच्चयः सर्वः(१) सर्वत्र, अतो विशेषणार्थम्—

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥६१॥
अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥६२॥

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः, अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः, नियमार्थे सूत्रे (२) ॥

चत्वारः पृथिव्यामेकैकशोऽपकर्ष उत्तरेषु स्पर्शपर्यन्तानामिति विभक्तिविपरिणामः । तेन किं कृतं भवति ? स्पर्शपर्यन्तानां विनियुक्तानां य उत्तरः स आकाशस्येति आकाशस्योत्तरः शब्दः । उत्तर इत्ययं तरब्निर्देशो न युक्तः द्वयोर्दृष्टत्वात् इह पुनः प्रकृष्टत्वाचित्वे सत्युत्तम इति स्यात् ? । नायं (नो)तरब्निर्देशः, अपि तु पराभिधानमेतत् यदुक्तं भवति पर इति तदुक्तं भवत्युत्तर इति । तन्त्रं वा स्पर्शस्य विवक्षितत्वात्—भवतु वा तरब्निर्देशः । ननूक्तमुत्तम इति प्राप्नोति ? न स्पर्शस्य विवक्षितत्वात् गन्धादिभ्यः परः स्पर्शः स्पर्शादयं पर इति यावदुक्तं भवति तावदुक्तं भवत्युत्तर इति ।

न सर्वगुणानुपलब्धेः—

न सर्वगुणानुपलब्धेः ॥ ६३ ॥

नायं गुणेषु विनियोगः साधुः, कस्मात् ? पार्थिवेन घ्राणेन पार्थिवानां गन्धादीनामुपलम्भप्रसङ्गात्, एवमाप्येन रसनेन त्रयाणां, तैजसेन चक्षुषा द्वयोरिति ।

कथं तर्हीमे गुणा विनियोक्तव्याः ?—

---

(१) सर्वे—पा० ४ पु० । (२) नियमार्थं सूत्रद्वयम् ।

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ॥ ६४ ॥

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः यस्मादेकैकगुणानि भूतानि तस्मादेकगुणग्रहणमिति(१) एकैकश्येनेति सौत्रो निर्देशः(२)

कथं तर्ह्यनेकगुणानि भूतानि गृह्यन्त इति ?–

संसर्गात्त्वनेकगुणग्रहणमिति । संसृष्टाऽबादिभिः पृथिवी तस्मादनेकगुणा(३) गृह्यत इति । एवं शेषेषु । संसर्ग(४)स्त्वप्रतिषिद्धो मिथः पञ्चानां चेति । नियमस्तर्हि न प्राप्नोति पृथिव्यां चत्वारो नेतरेषु संसर्गस्यानियमादिति ? न न प्राप्नोति, कस्मात(५) ?–

विष्टं ह्यपरं परेण ॥ ६५ ॥

विष्टं ह्यपरं परेण—

विष्टमबादिना परेणापरं, नापरेण पृथिव्यादिना परमबादि । विष्टत्वं–संयोगविशेषः ।

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥ ६६ ॥

न पार्थिवाप्ययोः प्रत्यक्षत्वादिति(६) ।

नेति त्रिसूत्रीमनन्तरोक्तामनेन प्रत्याचष्टे । यस्यैकैकगुणानि भूतानि तस्य तैजसमेव द्रव्यं रूपवत्त्वात् प्रत्यक्षं प्राप्नोति

---

(१) तस्मादेकैकगुणग्रहणमिति–पा० ४ पु० ।
(२) सूत्रे निर्देशः—पा० ४ पु० ।
(३) अनेकगुणानि गृह्यन्ते–पा० १ पु० ।
(४) संयोगः–पा० ४ पु० ।
(५) कथं यस्मात्–पा० ४ पु० ।
(६) प्रत्यक्षसिद्धत्वात्—पा० ४ पु० ।

न पार्थिवमाप्यं वा अरूपत्वात् । अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थः कल्प्यत इति भाष्ये वर्णितम् ।

तदेवं न्यायविरुद्धं प्रवादं प्रतिषिध्य न सर्वगुणानुपलब्धेरिति यत् देशितं तत्समाधीयते ॥

पूर्वपूर्वगुणोत्कर्षात्(१) तत्तत् प्रधानम् ॥ ६७ ॥

पूर्वपूर्वगुणोत्कर्षात् तत् तत्प्रधानम् तस्मान्न सर्वगुणोपलब्धिः—घ्राणादीनामिन्द्रियाणां पूर्वं पूर्वमिन्द्रियं परस्मात् प्रधानम् । का प्रधानता ? चतुर्गुणत्वादिः । को गुणोत्कर्षः ? स्वगुणाभिव्यक्तिसामर्थ्यम्—येन गुणेन यद्द्रव्यमुत्कृष्यते स तज्जातीयाभिव्यञ्जकत्वादुत्कृष्टो भवति यथा बाह्यानां द्रव्याणामिति । अस्ति चेन्द्रियाणामपि स्वगुणाभिव्यक्तिनियमः तस्मान्न सर्वगुणोपलब्धिः(२) । यः पुनर्गन्धगुणत्वाद् घ्राणं गन्धग्राहकमिति प्रतिजानीते तस्य सर्वगुणोपलब्धिप्रसङ्गः ।

कस्मात् पुनर्न सर्वं पार्थिवं घ्राणमिति ?

तद्व्यवस्थानं तु(३) भूयस्त्वात् ॥ ६८ ॥

व्यवस्थानियमज्ञापनार्थम् तद्व्यवस्थानं तु भूयस्त्वादिति सूत्रम् किं पुनरिदं भूयस्त्वम् ? अर्थनिर्वृत्तिसमर्थस्य प्रविभक्तस्य द्रव्यस्य संसर्गः पुरुषसंस्कारकारितो भूयस्त्वम्, दृष्टो हि प्रकर्षे भूयस्त्वशब्दः(४) यथा लोके प्रकृष्टो विषयो भूयानित्युच्यते । यथा च पृथगर्थक्रियासमर्थानि पुरुषसंस्कारोपग्रहात् विषौषधिमणिप्रभृतीनि द्रव्याणि निर्वर्त्यन्त इति ।

---

(१) पूर्वपूर्वं गुणोत्कर्षात्—पा० ४ पु० ।
(२) सर्वगुणोपलब्धिप्रसङ्गः—पा० ४ पु० ।
(३) तद्व्यवस्थापनं तु—पा० ४ पु० ।
(४) भूयस्त्वे प्रकर्षशब्दः—पा० ४ पु० ।

स्वगुणान्नोपलभन्त इन्द्रियाणि । कस्मादिति चेत् ?—केन कारणेन स्वानि गन्धादीनि इन्द्रियाणि नोपलभन्त इति ?—

सगुणानामिन्द्रियभावात्॥ ६९ ॥

सगुणानामिन्द्रियभावात्—सह गुणेनेन्द्रियं भवति, निर्गुणं तु नेन्द्रियमतो न गृह्णाति ।

यदि पुनरिन्द्रियस्य, सहकारी च गन्धः स्याद् ग्राह्यश्चेति ?—

तेनैव तस्याग्रहणाच्च ॥ ७० ॥

तेनैव तस्याग्रहणाच्च—यदीन्द्रियं स्वगन्धं गृह्णीयात् ते, नासाविन्द्रियगन्धः । अथेन्द्रियगन्धः ? नेन्द्रियग्राह्यः स्यात् गन्धश्च गृह्णदिन्द्रियमात्मानं गृह्णीयात् आत्मा ह्यस्य गन्ध इति । न चात्मसाधनं करणमस्तीति दृष्टान्तविरोधः । न चैतत् प्रत्यक्षं यद् घ्राणगन्धो घ्राणग्राह्य इति । कस्मात् पुनरिदं न दृश्यते घ्राणेन घ्राणं कस्मान्न गृह्यत इति ? । न दृश्यते ऽदृष्टत्वात्—न दृष्टं घ्राणेन घ्राणस्य ग्रहणमित्यतो न दृश्यत इति ? तुल्यं—घ्राणेन स्वस्य गन्धस्याग्रहणमित्येतदपि अदेशनीयम्—स्वगुणान्नोपलभन्त(१) इन्द्रियाणि, कस्मादिति ? तुल्यो ह्युभयत्र हेत्वभावः ॥

न शब्दगुणोपलब्धेः ॥ ७१ ॥

न शब्दगुणोपलब्धेः—स्वगुणान्नोपलभन्त इन्द्रियाणीत्येतदयुक्तम् । स्वगुण उपलभ्यते आकाशेन शब्द इति ।

न पुनः श्रोत्रं सशब्दमिन्द्रियमिति—यथेतराणि सगुणानीन्द्रियाणि नैवमाकाशमिति । कस्मात् ? शब्दस्येतरगुणैवधर्म्यात्—आकाशस्येतरद्रव्यवैधर्म्यात् अस्यार्थस्य ज्ञापनार्थं तदुपलब्धिरितरेतरधर्मवैधर्म्यादिति सूत्रम्—

(१) नोपलभ्यन्त—पा० ४ पु० । एवमग्रेऽपि ।

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥ ७२ ॥

न शब्दः शब्दस्य व्यञ्जको नाकाशं सगुणमिन्द्रियमिति । किं पुनरिदं श्रोत्रम् ? आकाशं परिशेषात् । तत्रात्मा तावन्न श्रोत्रं, कर्तृत्वात्—श्रोता आत्मा न श्रोत्रम् । मनः श्रोत्रं(१) भविष्यतीत्यपि न, मनसः श्रोत्रत्वे बधिराद्यभावः सर्वविषयत्वाच्च मनसः—सर्वविषयं च श्रोत्रं प्राप्नोति । पृथिव्याद्यपि न श्रोत्रं, घ्राणादिभावेन विनियोगात्-घ्राणादिविनियुक्ताः पृथिव्यादयः श्रोत्रभावे च घ्राणादीनां तद्वैकल्ये शब्दानुपलब्धिप्रसङ्गः । त्वचः श्रोत्रभावे(२) बधिराद्यभावः सर्वोपघाते च मरणम् । दिक्कालयोः श्रोत्रभावे च शब्दस्यान्यगुणत्वादग्रहणप्रसङ्गः । तद्गुणत्वमेवेति चेत् ? नास्मि विवादः—यस्य शब्दो गुणस्तदाकाशं, भवता सञ्ज्ञामात्रं भिद्यते तौ दिक्कालाविति । आकाशप्रत्याख्यानं वाऽन्यगुणत्वाच्छब्दस्य—यदि शब्दो दिक्कालगुणो भवति आकाशं तर्हि प्रत्याख्यातम् । न हि शब्दमन्तरेणाकाशास्तित्वे लिङ्गमिति(३) यथा दिक्कालयोः परापरादि(४) लिङ्गमिति । न च द्रव्यान्तरं शिष्यते । न च गुणानां श्रोत्रभावो युक्तः, न च कर्मणाम्, न च सामान्यविशेषसमवायानां सामर्थ्यानुपलब्धेः । न चेदं श्रोत्रं नास्ति शब्दोपलब्धिलिङ्गं, शिष्यते चाकाशं, तस्मादाकाशं श्रोत्रमिति ॥

(इति अर्थपरीक्षाप्रकरणम् ।)

इति—औद्द्योतकरे न्यायवार्त्तिके तृतीयस्याध्यायस्याद्यमाह्निकम् ॥

---

(१) श्रवणं--पा० ४ पु० । (२) श्रोत्रत्वे--पा० ४ पु० ।
(३) लिङ्गमस्ति --पा० ४ पु० । (४) परत्वापरत्वे-पा० ४ पु० ।

तृतीये ऽध्याये

द्वितीयमाह्निकम् ।

ॐ नमः परमात्मने ।

परीक्षितानीन्द्रियाण्यर्थाश्च, बुद्धेरिदानीं परीक्षाक्रमः । सा किमनित्या नित्या वेति धर्मविचारः सत्त्वस्याधिगतत्वात्, तस्यां च संशयमुपपादयति(१) ॥

कर्माकाशसाधर्म्यात् संशयः ॥ १ ॥

कर्माकाशसाधर्म्यात् संशयः । उभाभ्यां साधर्म्यमस्पर्श-वत्त्वम्, विशेष उपजननापायधर्मकत्वं(२) विपर्ययश्च बुद्धौ नो-पलभ्यते ततः संशयः ।

अनुपपन्नरूपः खल्वयं संशयः सर्वशरीरिणां प्रत्या-त्मवेदनीयत्वात्—सर्वशरीरिणां प्रत्यात्मवेदनीयमेतत् यदुता(३)-नित्या बुद्धिरिति, त्रैकाल्यव्यक्तेश्च—बुद्धौ त्रैकाल्य व्यज्यमानं दृष्टम्—जानामि ज्ञास्याम्यज्ञासिषमिति । न चोपजननापायावन्तरेण त्रैकाल्यव्यक्तिः—न ह्यनुपजनना-पायधर्मेषु आकाशादिषु त्रैकाल्यं व्यज्यते । न च विशेषदर्शने सति युक्तः संशयः तस्मात् संशयप्रक्रियानुपपत्तिरिति ? । शेषं भाष्ये । दृष्टिप्रवादोपालम्भार्थं प्रकरणम्—न च बुद्धेरनित्यत्वं

(१) उत्पादयति—पा० ४ पु० ।
(२) उपजनापायधर्मकत्वं—पा० ४ पु० । एवमग्रेऽपि ।
(३) यद्रुता—पा० ४ पु० ।

प्रतिपाद्यमपि तु परस्य दर्शनं निवर्तनीयमिति । एवं हि पश्यन्तः प्रवदन्ति साङ्ख्या नित्या बुद्धिरिति ।

साधनं च प्रचक्षते विषयप्रत्यभिज्ञानादिति—

विषयप्रत्यभिज्ञानात् ॥ २ ॥

यं पूर्वमज्ञासिषं तमिमं जानामीति ज्ञानयोः समानेऽर्थे प्रतिसन्धानमवस्थिताया बुद्धेरुपपन्नम्—बुद्धिनानात्वे प्रत्यभिज्ञानानुपपत्तिः यथा पुरुषान्तरबुद्धिषु ॥

साध्यसमत्वादहेतुः ॥ ३ ॥

साध्यसमत्वादहेतुः । यथैव बुद्धेर्नित्यत्वं साध्यं तथैव बुद्धौ प्रत्यभिज्ञानमपि साध्यम्, कस्मात् ? चेतनधर्मस्य करणेऽनुपपत्तेः—पुरुषधर्मः खल्वयं ज्ञानं दर्शनमुपलब्धिर्बोध इति । चेतनो हि पूर्वज्ञातमर्थं प्रत्यभिजानातीति तस्यैव तस्माद्धेतोर्नित्यत्वं युक्तम् ।

क्रियानाधारत्वाच्च करणस्य । न हि करणं क्रियाया आधारो भवति, उपलब्धिश्च क्रिया सा च न करणे वर्तितुमर्हतीति । स्वक्रियाधारत्वादयुक्तमिति चेत् ?—अथ मन्यसे सर्वं कारकं स्वक्रियाया आधारो भवतीत्यतोऽयुक्तं क्रियानाधार इति ?, सत्यम् भवति स्वक्रियाधारो, न पुनः स्वक्रियातः करणव्यपदेशः । स्वक्रियायां सर्वं कारकं कर्तृ भवति, करणभावं चाश्रित्य बुद्धौ विचारः, तस्मादयुक्तमेतत् । सर्वकर्तृत्वप्रसङ्ग इति चेत् ?—यदि पुनः स्वक्रियानिमित्तकः कर्तृव्यपदेशः सर्वं कारकं कर्तृ प्राप्तं ?, सत्यमेतत् नाभ्युपगमा एव दोषत्वेन देश्यन्त इति । कर्तृकरणादिव्यपदेशश्च कथं ? प्रधानक्रियापेक्षः कर्तृकरणादिव्यपदेशः

यदर्थं करण(१)मुपादीयते सा प्रधानक्रिया, तस्यां च साधनभावे विवक्षिते भेदे वा ऽविवक्षिते कारकमित्यनेन शब्देनाभिलप्यन्ते कर्त्रादयः, यदा तु भेदो विवक्षितस्तदा कर्तृकरणकर्मशब्दवाच्यानीति । कारकशब्देनापि सामान्येनाभिधीयमानेषु कारकेषु यः स्वगतो विशेषः इतरेतरव्यावृत्तः सोऽभिधीयते अन्यस्याभावात्, प्रधानक्रियापेक्षं तु कारकाणां कर्त्राद्यभिधानमिति(२) । तत्र यदितराप्रयोज्यमितरकारकप्रयोक्तृ च तत् कर्तृ, एवं शेषेषु कारकशब्दाः पूर्ववद्वक्तव्याः(३) । यद्यन्यकारकाप्रयोज्यत्वं कर्तृत्वं नन्वयमपि कारकोपादानेन प्रयुज्यते ? न प्रयुज्यते फलस्य प्रयोजकत्वात्—फलं कर्तारं प्रयोजयति, न कारकं करणादि, न च फलं कारकमिति तेषां तन्नान्तरीयकमुपादानम् । न हि करणादिकारकोपादानमन्तरेण क्रिया सम्भवतीति तन्नान्तरीयकत्वात् कारकाण्युपादीयन्त इति । तस्माच्चेतनधर्मः करणे न सम्भवतीति ।

उपेत्य प्रत्यभिज्ञानमन्तःकरणे तस्यैकानेकव्यावृत्तेरसाधारणता । न हि प्रत्यभिज्ञानमेकत्वे दृष्टं न नानात्व इति प्रत्यभिज्ञानेन स्वरूपावधारणे च सति विरुद्धः । यदा चेदं प्रत्यभिज्ञानं निरूप्यते तदा बुद्धिभेदं प्रतिपादयति प्रत्यभिज्ञानं हि नामाद्यप्रत्यक्षानिरोधे द्वितीयदर्शने प्रागाहितसंस्काराभिव्यक्तौ स्मृतिपूर्वं तृतीयं दर्शनम् । न च बुद्ध्यभेदवादिनो द्वितीयमपि तावद्दर्शनमस्ति कुतस्तृतीय-

(१) कारक—पा० १ पु० ।
(२) अभिधानादिति—पा० ४ पु० ।
(३) पूर्ववत् प्रयोक्तव्याः—पा० ४ पु० ।

मिति । प्रत्ययभेद इति चेत् ?–अथ मन्यसे अवस्थिताया बुद्धेः प्रत्ययास्तिरोभवन्ति व्यज्यन्ते च, तत्राऽऽद्यदर्शनतिरोभावे प्रत्ययान्तराविर्भावे च प्रत्यभिज्ञानमिति ? तन्न युक्तम् तद्व्यतिरेकेण बुद्धिस्वभावानवधारणात्–यां तां प्रत्ययव्यतिरिक्तां बुद्धिं भवन्तः कल्पयन्ति तस्याः कः स्वभाव इति वक्तव्यम् ? । अस्माकं तु प्रत्ययमात्रं बुद्धिः–अर्थग्रहणं हि बुद्धिरिति । दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानाज्ञानात्वे प्रत्यभिज्ञानमिति विरुद्धः प्रदीपान्तरदृष्टस्य प्रदीपान्तरेणेति ।

यदि बुद्धिरध्यवस्यति ? अथ बुद्धौ वर्तमानेन ज्ञानेन चेतनः किं करोति, चेतयत इति ? कश्चेतयते ? यदि यस्याध्यवसायः स चेतयते विरुद्धमेतत् । अथात्मा चेतयते ? कथं बुद्धौ वर्तमानेन प्रत्ययेनात्मा चेतयते—न ह्यन्यत्र वर्तमानया क्रियया अन्यस्य तद्वत्ता भवति । अथ पुरुषश्चेतयते बुद्धिर्जानीत इति ? नेदं ज्ञानादर्थान्तरमुच्यते यावदुक्तं भवति चेतयते तावदुक्तं भवति जानीत(१) इति । बुद्धिर्ज्ञापयतीति चेत् ?—अथ मन्यसे बुद्धिर्ज्ञापयत्यात्मा जानीते इति ? अद्धा जानीते च पुरुषो बुद्धिर्ज्ञापयतीति अध्यवसायचेतनयोश्च स्वभावभेदो वक्तव्यः । भवताप्येकत्वं वक्तव्यम् ? (२) देशकालस्वभावाभेदात् यस्मादविदेशमविकालं च बुद्ध्याध्यवासितमात्माप्यवध्यवस्यति ! स्वभावाभेदोऽसिद्ध इति चेत् ?–अथ मन्यसे सत्यमभिन्नकालमभिन्नदेशं च बुद्ध्याऽध्यवसितमात्माप्यध्यवस्यति न पुन(र्यै)-

(१) जानातीति—पा० ४ पु० ।

(२) वाच्यम्—पा० ४ पु० ।

रचेतनात्मैवाध्यवसाय इति ? । न प्रतिशरीरमनेकपुरुषप्रसङ्गात् यद्यन्यश्चेतयिता अन्यश्चाध्यवसाता भवति, अन्यः प्रतिजानीते अन्यः पश्यत्यन्यः शृणोति मन्तेत्येवमादिषु, पुरुषान्तराणि खल्विमानि द्रष्टा श्रोता मन्तेति, नैकस्यैते धर्मा इति । अत्र भवता किं वक्तव्यम् ? अभिन्नार्था एते शब्दा इत्येतद्वक्तव्यम् अभिन्नार्थास्तदेते शब्दा भवन्ति, नन्वत्राप्यर्थो न भिद्यते चेतनोऽध्यवसाता मन्ता बोद्धेति(१) तस्मादयुक्तमेतद् बुद्धिरध्यवस्यत्यात्मा चेतयत इति । यदि पुनरिदं प्रत्यभिज्ञानं मनसो नित्यत्वसाधकं(२) स्यात् न युक्तमेवं भवितुम् मनसोनित्यत्वाभ्युपगमात्(३) अभ्युपगम्यते मनसो नित्यत्वमिति तत्र साधनमनर्थकम् । अनेकान्ताच्च न प्रत्यभिज्ञानात् करणैकत्वं सिध्यति दृष्टं करणभेदे ऽपि प्रत्यभिज्ञानं ज्ञातुरेकत्वात् दर्शनदृष्टस्य स्पर्शनेन प्रत्यभिज्ञानात् प्रदीपदृष्टस्य प्रदीपान्तरेणेति ॥

यत्त्विदं मन्यते बुद्धेरवस्थितायां यथाविषयं वृत्तयः प्रादुर्भवन्ति वृत्तिश्च वृत्तिमतो नान्येति(४) तच्च न युगपदग्रहणात्,

न युगपदग्रहणात् ॥ ४ ॥

वृत्तिमतोऽवस्थानाद् वृत्त्यनवस्थानमिति सूत्रार्थः ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ ५ ॥

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूत्रार्थः ।

---

(१) मन्ता वेति—पा० ४ पु० ।

(२) साधनं—पा० १ पु० ।

(३) नित्यस्याभ्युपगमात्—पा० ४ पु० ।

(४) ऽनन्येति—पा० ४ पु० ।

अविभु चैकं मनः पर्यायेणेन्द्रियैः सम्बद्ध्यत इति—

क्रमवृत्तित्वादयुगपद्ग्रहणम् ॥ ६ ॥

क्रमवृत्तित्वादयुगपद्ग्रहणम् । वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थः । वृत्तिवृत्तिमतोरेकत्वे प्रादुर्भावतिरोभावयोरभाव इति ॥

अप्रत्याभिज्ञानं च विषयान्तरव्यासङ्गात् ॥७॥

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गादिति वृत्तिवृत्तिमतोर्भेदे सत्युपपद्यत इति । एकत्वे त्वनर्थको व्यासङ्ग इति । विभुत्वे चान्तः-करणस्य पर्यायेणेन्द्रियैः संयोगः

न, गत्यभावात् ॥ ८ ॥

न गत्यभावात् । प्राप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थः । व्यापित्वे च युगपदनेकेन्द्रियसम्बन्धाद्युगपद्ग्रहणप्रसङ्गश्च दोषः ।

अणावपि मनस्येकेन्द्रियग्राह्येषु युगपदुपलब्धिप्रसङ्ग इति चेत् ? करणत्वान्न युगपद्ग्रहणम् । ममाप्येवं कस्मान्न परिहारः ? न कारणभेदे दृष्टत्वात्—यानि खलु(त्व)-भिन्नानि कारणानि तान्येकेनैवाधिष्ठायकेनाधिष्ठितानि युगपत्प्रवर्तमानानि दृष्टानि । यथोभयहस्ताधिष्ठिते वास्यौ प्रवर्तेते तथेन्द्रियाणि व्यापकेनान्तःकरणेनाधिष्ठीयन्त इति युगपत्प्रवृत्तिः प्रसक्ता, तत्प्रसक्तौ च युगपद्ग्रहणप्रसङ्ग इति । गत्यभावाच्च विभुनोऽन्तःकरणस्य प्राप्त्यर्थस्य गमनस्याभावात् । न चायुगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति येन प्रमाणेन प्रतिषिद्धमपि प्रत्ययायौगपद्यं प्रतिपद्येत यथा क्रिञ्चि(१)त्प-

(१) कथञ्चित्-पा० ४ पु० ।

तिषिद्धमपि प्रतिपद्यते यथा(१) चक्षुषो गतिः प्रतिषिद्धा केनचित् सन्निकर्षविप्रकर्षयोस्तुल्यकालग्रहणात्—यस्मात् सन्निकृष्टं पाणिं विप्रकृष्टं चन्द्रमसमेकस्मिन् काले चक्षुषा प्रतिपद्यते तस्मान्न गतिमच्चक्षुरिति विप्रतिषिद्धापि सती गतिर्व्यवधानप्रतिघातेनानुमीयत इति । न चाऽयुगपत्प्रत्ययोत्पत्तौ प्रमाणमस्ति ।

सोऽयं नान्तः करणे विवादो न तस्य नित्यत्वे । कुतस्तर्हि विवादः ? तस्य विभुत्वे । तच्च प्रमाणतोऽनुपलब्धेर्नास्ति । न ह्यन्तःकरणस्य विभुत्वप्रतिपादकं प्रमाणमस्ति एकमन्तःकरणं नाना चेमाश्चक्षुर्विज्ञानाद्यात्मिका वृत्तय इति—एतच्च वृत्तिवृत्तिमतोरेकत्वे ऽनुपपन्नम् । यस्य पुनर्वृत्तिवृत्तिमतोर्नानात्वं तस्यान्तःकरणसाधनश्चक्षुरादिसाधनश्चात्मा अर्थानुपलभत इति युक्तम् । एतेन विषयान्तरव्यासङ्गः प्रत्युक्तः पुरुषो जानीते नान्तःकरणमिति । कः पुनरयं व्यासङ्गः ? अभीष्टविषयोऽनेकविज्ञानोत्पादः स च पुरुषस्य नान्तःकरणस्य, यः पुनरयं सन्निधानासन्निधानलक्षणोऽन्तःकरणस्य व्यासङ्गः सोऽनुज्ञात इति ।

एकमन्तःकरणं नाना वृत्तय इति नैतन्न्यायवित्प्रज्ञाणकः प्रतिपत्तुमर्हति यथैवान्तःकरणमेकं तथा वृत्तिरिति । दृष्टविरोध इति चेत् ?—अथ मन्यसे यदि चान्तःकरणान्न वृत्तिर्भिद्यते ननु दृष्टं विरुध्यते रूपं रसो गन्धः स्पर्श इति दृष्टः प्रत्ययभेदो न स्यात् ?, न न स्यात् विषयभेदानुविधानात् वृत्तिरभिन्नापि विषयभेदमनुविधीयमाना भिन्नेव ख्याति यथोपधानभेदमनुविधीयमानं स्फटिकादिद्रव्यं

(१) तथा-पा० ४ पु० ।

भिन्नमिव प्रकाशते । अस्य चार्थस्य ज्ञापनार्थं स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इति सूत्रम्—

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः ॥ ९ ॥

नानेकान्तात्—उभयथा खल्वयं नानात्वाभिमानो दृष्टः नानाभूतेषु, गन्धादिषु, अभिन्ने च स्फटिक इति ।

यथा श्रुति सूत्रे हेत्वभावो दृष्टान्तमात्रत्वात्—दृष्टान्तमात्रमेतन्नात्र हेतुरस्तीति । विकल्पानुपपत्तेश्च—योऽयं दृष्टान्तः स्फटिकवदिति विकल्पोऽत्र किमयं स्फटिक उपधानभेदेन भिद्यते उत न, किं चातः ? यदि भिद्यते ? न दृष्टान्तः । अथ न भिद्यते ? नानात्वाभिमानः कथम् ? यद्युपधानभेदाद् ? भिन्नमुपधानमिति कथं प्रतिपद्यसे ? यदि प्रत्ययभेदाद्व्याघातः—अभिन्ना वृत्तिः प्रत्ययश्च भिन्न इति व्याघातः प्रत्ययपर्यायत्वाद् वृत्तेः । अथ भवतां वृत्तीनां भेदे किं प्रमाणम् ? ज्ञानानां क्रमेणोपजनापायदर्शनं—क्रमेण ज्ञानान्युपजायन्ते अपयन्ति चेति दृश्यते, एकानेकविषयत्वाच्च प्रत्ययनानात्वाभिमानस्य । एकानेकविषयाधिगतिः कथम् ? एकस्मिंश्च विषये नानात्वाभिमानः स्फटिके दृष्टः(१) नानाभूतेषु च गन्धादिषु नानात्वाभिमानो दृष्टः तेन नानात्वाभिमानस्योभयथा दृष्टत्वादिदमेकमिदमनेकमिति न युक्तः प्रत्यय इति । यश्चायमभिन्ने स्फटिके भेदप्रत्ययः सोऽपि प्रत्ययभेदमन्तरेण न युक्तः । न हि प्रत्ययाभेदवादिनः स्फटिके नीलादिप्रत्ययभेदो युक्त इति । स्फटिके नीलादिप्रत्ययोऽसम्बन्धान्न युक्तः न हि नीलं द्रव्यं चक्षुःसन्निकृष्टमिति ? । अथ सन्निकृष्टं तदेव नीलं न स्फटिक इति

(१) दृष्टान्तः—पा० ४ पु० ।

स्फटिकसमानाधिकरणः स्फटिके नीलप्रत्ययो न युक्तः ?। न नैरन्तर्यदर्शनात्—नैरन्तर्येणावस्थिते स्फटिकनीलद्रव्ये चक्षुषा सन्निकृष्येते तत्सन्निकर्षान्नीलगुणाध्यारोपेण स्फटिके मिथ्याप्रत्ययो नील इति यथा सान्तरेष्वन्तरालादर्शनात् संयुक्तप्रत्यय इति । यस्य च प्रत्ययो न भिद्यते तस्य त्रीणि प्रमाणानीति शास्त्रं व्याहन्यते(१) न हि प्रत्ययाभेदे प्रमाणभेदः सम्भवति । विषयभेदात् त्रित्वमिति चेत् ?—अथ मन्यसे विषयस्त्रेधा भिन्नस्तेनानुरञ्जितः प्रत्ययस्त्रेधैव भवति ?, तन्न युक्तम् प्रमाणाभेदे विषयभेदानधिगतेः । न हि प्रमाणभेदमन्तरेण विषयभेदोऽधिगन्तुं शक्यते इति । विषयतादात्म्यादिति चेत् ?—अथ मन्यसे विषय एवासौ तथा व्यवस्थितस्तादात्म्यात् तथा ख्यातीति ? तन्न, प्रमाणवैयर्थ्यात्(२)—एवं सति व्यर्थं प्रमाणं, न विषयभेदं प्रमाणभेदोऽवगमयति विषयस्तु तादात्म्यात् तथा व्यवतिष्ठते इति । यथाऽध्यवस्यति तथा चेतयत इति च व्याघातः—अप्रकारवत्त्वात्—प्रकारवत्येतद्युक्तम्, अप्रकारे न युक्तम् । बुद्धिस्थं प्रत्ययमुपलभत इति च विरोधोऽधिकरणाधेययोरभेदात्—यः प्रत्ययः स बुद्धिर्बुद्धिरित्यधिकरणाधेययोरभेदः । एवं च सति बुद्धिस्थं प्रत्ययमुपलभत इति व्याहतम् ॥

(इति बुद्ध्यनित्यताप्रकरणम् ।)

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इत्येतदमृष्यमाणः क्षणिकवाद्याह—

(१) भिद्यते—पा० ४ पु० ।

(२) वैयर्थ्यप्रसङ्गात्—पा० ४ पु० ।

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥ १० ॥

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः।

स्फटिकस्याभेदेनावस्थितस्यान्यत्वाभिमान इत्ययुक्तम् क्षणिकत्वाद्व्यक्तीनाम् क्षणिकत्वमुपचयापचयप्रबन्धदर्शनात्—यस्माच्छरीरादिषु पक्तिनिर्वृत्तं रसद्रव्यं(१) प्रतिक्षणमुपचीयते चापचीयते च, उपचयाद्व्यक्तीनामुत्पादः अपचयाद्व्यक्तिनिरोधः, तौ चोत्पादनिरोधौ तस्य कालान्तरेण दृष्टौ अतोऽवगम्यते प्रतिक्षणमुपचीयते चापचीयते च शरीरमिति। यस्य खलु प्रतिक्षणमुपचयापचयौ न दृष्टौ तस्य कालान्तरेणापि न भवतो(२) यथा भूमेरपच्यमानायाः पाकजानामिति। पच्यमानभूमिपाकजवच्च प्रतिक्षणं विशेष इति। अस्य प्रयोगः प्रतिक्षणं शरीरमन्यच्चान्यच्च भवति बाह्यप्रत्ययाभेदे सत्यन्ते विशेषदर्शनात् पच्यमानभूमिपाकजवत् अपच्यमानभूमिपाकजवच्चेति।

नियमहेत्वभावाद् यथादर्शनमभ्यनुज्ञा ॥ ११ ॥

तदिदमुपचयापचयप्रबन्धदर्शनं शरीरे दृष्टत्वाच्छरीरस्यान्यत्वं साधयतु, न पुनरनुपलभ्यमानोपचयापचयविशेषाणां स्फटिकादीनामेतस्मादन्यत्वं सिध्यतीत्यहेतुः। यत्रोपलब्धिस्तस्यान्यत्वमिति चेत् ?—अथ मन्यसे नैवास्माभिरुपचयापचयप्रबन्धदर्शनेन सर्वभावानां क्षणिकत्वं साध्यते अपि तु यत्र तदस्ति तस्मिन्(३) क्षणिकत्वमिति ?। सत्यम् यस्य

(१) रसवद्द्रव्यं—पा० १ पु०।
(२) न भवति—पा० ४ पु०।
(३) तत्र—पा० ४ पु०।

यस्योपचयापचयप्रबन्ध उपलभ्यते तस्य तस्यान्यत्वमिति, न तु क्षणिकत्वम्, उपचयापचयप्रबन्धदर्शनं चान्यथाभवदहेतुः क्षणिकत्वे । कथमन्यथा पूर्वावयवा(१) आहारावयवसहिताः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यमानाः शरीरान्तरमुत्पादयन्तीति युक्तो भेद इत्यहेतुरेषः । तुल्यं पक्षप्रतिज्ञानमिति चेत् ?—अथ मन्यसे पूर्वाहारावयवोपचययोगे(२) सति शरीरावयवाः शरीरान्तरमारभन्ते पूर्वव्यूहपरित्यागेन, न पुनः क्षणिकत्वादन्यज्जातमित्यत्र को हेतुरिति ? । नासाधनात्—न मयाऽऽहारोपचयापचययोगाच्छरीरस्यान्यता साध्यते, अपि तु भवता विशेषदर्शनाच्छरीरस्यान्यत्वमभ्यधायि ततश्च क्षणिकत्वमिति विशेषदर्शनं क्षणिकत्वसाधनम् । तदस्माभिर्विशेषदर्शनमन्यथाभवत् क्षणिकत्वे न साधनमित्येतावन्मात्रमुच्यते न साधनमभिधीयत इति ।

नोत्पत्तिविनाशकारणोपलब्धेः ॥ १२ ॥

अथावश्यं साधनं वक्तव्यम् इदं ब्रूमः—नोत्पत्तिविनाशकारणोपलब्धेः ॥

उत्पत्तिकारणं विनाशकारणं चोपचयापचयौ वल्मीकघटादीनां दृष्टाविति तदुभयं क्षणिकत्वे न स्यात् । उपचय इति च वृद्धिः उपचितो गौरिति, अपचय इति ह्रासः अपचितो गौरिति, उभयं चैतदवस्थितवस्तुविषयम्, न ह्यपूर्वं जायमानं वर्द्धत इत्युच्यते नापि विनश्यदपचितमित्युच्यते उपचयापचयोत्पत्तिविनाशकारणोपलब्धेरिति सूत्रार्थः ।

---

(१) पूर्वशरीरावयवाः—पा० ४ पु० ।
(२) पूर्वापरावयवोपचययोगे—पा० ४ पु० ।

अथवा कारणमित्याधारोऽभिधीयते कार्यमित्याधेयम् । न च क्षणिकत्वे आधाराधेयभावः सम्भवति न चाधाराधेयभावमन्तरेण कार्यकारणभावः तस्मात् कार्यकारणभावोपलब्धेरक्षणिकत्वमिति । अस्य प्रयोगः कार्यकारणे एककालानुभाविनी आधाराधेयभावात् क्षीरकुण्डवदिति । क्षीरं कुण्डे वर्तते तच्च कुण्डकालमनुभवति तथा च कार्यं कारणे वर्तते तस्मात् तदपि कारणकालमनुभवति । नाधाराधेयभावस्यासिद्धत्वादिति चेत् ?—अथ मन्यसे ऽसिद्धः कार्यकारणयोराधाराधेयभावः कार्यस्यानाधारत्वात्—नैव हि नः किञ्चित् कार्यमाधारवद्दृष्टमिति ? । नानैकान्तात्—नायमेकान्तः सर्वं कार्यमनाधारमिति । यथोभयपक्षसम्प्रतिपत्त्या रूपं कार्यं चाधारवच्च स्पर्शस्तदाश्रय इति च व्याघातः—यदि च रूपमनाश्रितं भवति स्पर्शस्तदाश्रय इति व्याहतम् । अनेन च रूपदृष्टान्तेन यावद्यावत् समानकालतया साध्यते सर्वं तदेककालानुभावि भवतीति । सिद्धः कार्यकारणभावः क्षणिकेष्वपि, नाशोत्पादयोरेककालत्वात् तुलान्तयोरुन्नमनावनमनवदिति चेत् ?—अथ मन्यसे कार्यकारणभावः क्षणिकेष्वपि सम्भवतीति कारणविनाशसमकालं कार्यभावात्—यदा कारणं विनश्यति तदा कार्यमुत्पद्यते विनश्यच्च कारणमस्ति कारणविनाशेनाभिन्नकालः कार्योत्पादः यथा तुलान्तयोर्नामोन्नामाविति ? । न हेत्वर्थापरिज्ञानात्—न ब्रूमः क्षणिकत्वे(१) कार्यकारणभावो नास्ति, अपि त्वाधाराधेयभावो भिन्नकालत्वात् कार्यकारणयोर्न युक्त इति । कार्यं चानाधारमिति न दृष्टान्तोऽस्ति, अस्मत्पक्षे तु कार्यमाधारवदित्यस्ति दृष्टान्तो रूपादि-

(१) क्षणिके--पा० ४ पु० ।

रिति । तुलाधारस्य च व्यापारे(१) नामोन्नामभावानभ्युपगमाद्(२) युगपद्भावानुपपत्ति(३)रेकत्वात् । यदि तुलामधिकृत्य ब्रवीषि? तदैकं कर्म भ्रमणाख्यमेकत्वाद् युगपद्भावो न युक्तः न ह्येकं युगपद्भवतीति । अथावयवकर्मणी? तयोरपि कार्यकारणभावेनानभ्युपगमात् किं केन सम्बध्यते । अथ युगपद्भावमात्रं विवक्षितमिति? युगपद्भावः कारणयौगपद्यात्—यावतामर्थानां कारणानि युगपद्भवन्ति तावतामेकस्मिन् काले भाव इति नामोन्नामावसम्बद्धौ कारणयौगपद्यं तु—गुरुत्वप्रयत्नसंयोगा उन्नतेः, अवनतेरपि गुरुत्ववद्द्रव्यसंयोगानुगृहीतो रज्जुतुलासंयोगः । अथापि न कर्मार्थान्तरं संयोगं वा परः प्रतिपद्यते? तस्याप्युक्तमुत्तरं संयोगोऽप्यर्थान्तरमिति संयोगकारणत्वेन च कर्माप्यर्थान्तरमिति । यथा च भावानामुत्पत्तिविनाशकारणमुपलभ्यते नैवं स्फटिकस्य, न चानुपलभ्यमानं शक्यमभ्यनुज्ञातुमिति ।

क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिः ॥ १३ ॥

क्षीरविनाशे कारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुपपत्तिः(४) यथा क्षीरस्य विनाशकारणमनुपलभ्यमानमभ्यनुज्ञायते दध्नश्चोत्पत्तिकारणमेवं स्फटिकादिव्यक्तीना(५)मनुपलभ्यमानम् उत्पत्तिविनाशकारणे अभ्यनुज्ञेये इति ॥

---

(१) कर्मणः—पा० ४ पु० ।

(२) भावेनानभ्युपगमात्—पा० ४ पु० ।

(३) भावानुत्पत्ति—पा० ४ पु० ।

(४) क्षीरविनाशकारणानुपलब्धिवद्दध्युत्पत्तिवच्च तदुत्पत्तिः—पा० ४ पु० । (५) स्फटिकादीनां—पा० ४ पु० ।

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ १४ ॥

लिङ्गतो ग्रहणान्नानुपलब्धिः । यल्लिङ्गत उपलभ्यते न तन्नास्तीति । विपर्ययश्च स्फटिकादौ, न हि स्फटिकादिव्यक्तीनामपरापरोत्पत्तौ लिङ्गमस्तीति ।

न नास्ति शीतोष्णस्पर्शभेदस्य नानात्वे साधनत्वात् (१)—शीतोष्णस्पर्शभेदो नानात्वे दृष्टो यथाग्नौ उदके च, अस्त्ययं शीतोष्णस्पर्शभेदः स्फटिके ? सत्यमस्ति स तु निमित्तान्तराद्भवति । किं पुनर्निमित्तम् ? अप्तेजोऽवयवानुप्रवेशाच्छीतः तेजोऽवयवानुप्रवेशाच्चोष्ण इति । अप्तेजोऽवयवानुप्रवेशो न युक्तः अल्पतरबहुतरानुप्रवेशे हेत्वभावात्—हेमन्ते ह्याकाशे पर्युषितानां काष्ठभूम्यश्मलोहानां शैत्यस्योत्तरोत्तरो विशेषो दृष्टः तथा पुनर्ग्रीष्मातपसन्तापितानां तेषामेवौष्ण्यस्य, न हि तेष्वल्पतरबहुतरप्रवेशे कारणं पश्यामः तस्मात् स्वगतमहाभूतविशेषापेक्षाण्यासादितबाह्यनिमित्तानि भूतान्येव तथा तथोत्पद्यन्त इति युक्तम् ? । न युक्तम्—न ह्यप्तेजोऽवयवानुप्रवेशेन भूतस्वभावो निवार्यत इति भूतस्वभावस्योभयपक्षसाम्यादसाधनं भूतस्वभाव इति । विरुद्धश्चायं हेतुः(२) यद्यवयवानुप्रवेशं न प्रतिपद्यसे खरस्नेहोष्णेरणात्मकानि भूतानीति व्याहन्यते । कथमिति ? यत् कठिनं तदेकस्मिन् काले उष्णमपि भवतीति, यच्चोष्णं तत् कठिनं गच्छतीति, तदेकस्वभावकं वस्तु द्विस्वभाकं त्रिस्वभावकं च प्राप्नोति । यस्य पुनरवयवानुप्रवेशस्तस्यैष दोषो नास्ति अन्यत्रावस्थितस्य संयुक्तसमवेतस्य औष्ण्यस्य ग्रहणादिति ।

(१) साधनात्—पा० ४ पु० ।

(२) स्वभावहेतुः—पा० ४ पु० ।

विरुद्धश्चायं हेतुः । कथम् ? एकस्य विशेष(स्य)ाभ्युपगमात्—एकं वस्त्वेकस्मिन् काले कठिनमुष्णं गच्छति चेति त्रिस्वभावकं, ततश्च विशेषदर्शनादित्ययं हेतुः सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध इति विरुद्धो भवति । अथ मन्यसे न विशेषमात्रं नानात्वं प्रतिपादयत्यपि तु विरोधी विशेषो नानात्वे साधनमिति ?। नाभिप्रायापरिज्ञानात्—वयमपि न ब्रूमो विशेषमात्रं नानात्वसाधन,मपि तु विरोधी विशेष इतरेतरव्यावृत्तो लक्षणत्वेनोपपन्नः स विरुद्धः, यद्यविरुद्धः स्यान्न लक्षणं स्यात् एकवृत्तित्वे वा लक्षणत्रयस्य तत्तद्वस्तु किमभिधीयते । यदि तावत् पृथिवी ? तन्न युक्तमौष्ण्यस्य दर्शनात् । अथ तेजः ? तदपि न युक्तं काठिन्यदर्शनात् । एतेन वायुर्व्याख्यातः । सोऽयं हेतुर्भूतलक्षणं बाधते नानात्वसाधनं वा न भवति । एतेन जले तापग्रहणं प्रत्युक्तम् । तत्राप्यौष्ण्यस्निग्धप्रेरणता च युगपद्भवतीति । जलेऽग्निरूपग्रहणप्रसङ्गस्तु न युक्तोऽभिभवात् । तन्न, सिद्धान्तापरिज्ञानात्—नायं सिद्धान्तो जलरूपेणाग्निरूपमभिभूयत इति, अपि तु तेजसश्चातुर्विध्यात् तत्र न रूपग्रहणम्—चतुर्विधं तेज इत्येतत् प्रसाधित(१)मिन्द्रियप्रकरण इति ।

या चेयं प्रतिज्ञा अन्यश्चान्यश्च स्फटिक इति, अस्याश्च कोऽर्थः ? यदि तावदन्यत्वमात्रं तदा सिद्धसाधनं भवति कुम्भादिभ्योऽन्यः(२) स्फटिक इति । अथ स्फटिकान्तरादन्य इति ? तदपि तादृगेव । अथ पूर्वस्फटिकादन्य इति ?, कतमोऽसौ पूर्वस्फटिको यतोऽयमन्य इति । व्यवच्छेदस्याशक्यत्वादनभिधानम्—यथोभयपक्षसम्प्रतिपन्ना रूपादयः

(१) प्रतिपादितम्—पा० ४ पु० ।
(२) स्तम्भादिभ्योऽन्यः—पा० ४ पु० ।

तेभ्योऽन्यानन्यविचारो घटादेर्युक्तः न पुनरिह पूर्वस्फाटिकान्तरमुभयपक्षसम्प्रतिपन्नं यतो वर्तमानमन्यत्वेन साध्यते । अथोभयपक्षसम्प्रतिपन्नं पूर्वस्फटिकान्तरं ? व्यर्थं साधनम् । अथ वर्तमानं स्फटिकमभ्युपगम्य यदतीतं स्फटिकान्तरं तदन्यदिति साध्यते ? एवं सति शीतोष्णस्पर्शभेदो न तद्धर्मः वर्तमानस्फटिकधर्मत्वात् । वर्तमानाच्च स्फटिकादन्यदतीतमिति केनैतन्न प्रतिपन्नम् । अथ तदेवान्यदिति ? व्याघातः तदेवान्यच्चेति । एवं यथायथाऽन्यत्वं विचार्यते तथा तथा सिद्धसाधनं भवति सिद्धान्तं च बाधते ।

अथायुगपत्कालप्रत्ययानामालम्बनं स्फटिको न भवतीति प्रतिज्ञार्थः ? एतस्मिन्नपि प्रतिज्ञार्थे न दृष्टान्तोऽस्ति । प्रदीपो दृष्टान्तः प्रदीपोऽयुगपत्कालप्रत्ययानामनालम्बनं सदादिधर्मा चेति विद्यते दृष्टान्तः ?, नासिद्धत्वात्—असिद्धमेतत् अयुगपत्कालप्रत्ययानालम्बनाः प्रदीपादयः तेषामनेकक्षणावस्थानात्—प्रदीपस्य तावत् स्वकारणसत्तासम्बन्धकालः सामान्याभिव्यक्तिकालः अवयवकर्मकालः तदनन्तरं विभागकालः तदनन्तरं तत्संयोगविनाशकालः ततो द्रव्यनाश इति । यथा प्रदीप एवं सर्वे भावाः स्वकारणसत्तासम्बन्धा(१)भिव्यक्तितद्विरोध्याश्रयविनाशानुविधानेन विनश्यन्ति, अकारणस्य विनाशानभ्युपगमात् । न हि नः किञ्चिन्निष्कारणं विनश्यति । विनश्यदवस्थद्रव्यकर्मवदेतत् स्यात् ? न कर्मणोऽभ्युपगमे विरोधात् अनभ्युपगमाच्च । विनाशहेत्वभावादिति चेत् ?—अथ मन्यसे न विनाशकारणमस्ति तस्मादुत्पन्नमात्र एवायं भावो विनश्यतीति ?—न विकल्पानुपपत्तेः—विनाशहेतुर्नास्तीति ब्रु-

(१) सम्बन्धेति नास्ति ४ पु० ।

वाणः पर्यनुयोक्तव्यः(१) किमकारणत्वाद्विनाशो नास्ति उ-
ताकारणत्वान्नित्य इति । भवतां पक्षे ऽकारणं द्वेधा नि-
त्यमसच्च(२) अस्माकं तु नित्यमेव । यद्यकारणत्वान्नित्यो
विनाशः कार्यस्योत्पादो न प्राप्नोति उत्पन्नस्य च भावस्य
विनाशेन सहावस्थानमिति च दोषः । ततश्च भावानाम-
भावाविरोधादत्यन्तमवस्थानमिति । अथासन्विनाश ? एवमपि
सर्वनित्यत्वं विनाशाभावात् । यदि चासन्विनाशो विनश्य-
तीत्यपि विनाशे प्रत्ययो न प्राप्नोति नामत्वं गतौ ग-
च्छतीति भवति । अथाविनाशित्वादकारणो विनाश इति
मन्यसे ? विनाशो न विनश्यतीति कुत एतत् । विनष्टानां
पुनरनुत्पत्तेरिति चेत् ?-अथ मन्यसे यदि विनाशो विनश्येत
विनष्टः पुनरुत्पद्येत ? । न युक्तमेतत्-न हि विनाशा(भावा)-
भावो यतोऽस्य विनाशाद्भवेत्(३) अपि तु कारणवान्
भावस्तस्य यदा कारणं भवति तदोत्पाद इति । अपि च
विनाशः कारणवाँश्च न विनश्यत्यभावत्वात्, भावधर्म एषः
(४) यत् कारणवत् तद्विनश्यतीति अभावस्त्वकारणोऽपि
विनश्यतीति यथा प्रागभावः, कारणवानपि न विनश्यति
यथा प्रध्वंसाभावः । यदि कारणवान् विनाशो ननु ज-
नकं विनाशकं प्राप्नोति-य एवाग्निसंयोगः पाकजानामुत्पा-
दयिता(५) स एव पाकजान्तरोत्पादे पूर्वपाकजानुच्छिनत्ती-

---

(१) पर्यनुयोज्यः-पा० ४ पु० ।
(२) अकारणं द्विधा भवति नित्यमसञ्च-पा० ४ पु० ।
(३) यतो विनाशविनाशाद्भवेत्—पा० ४ पु० ।
(४) एव—पा० ४ पु० ।
(५) उत्पादकः—पा० ४ पु० ।

ति जनकं विनाशकं प्राप्तम्(१)? नानवरोधात्(२)—नेदं भवता काश्यपीयं दर्शनं व्यज्ञायि, न हि नो य एवाग्निसंयोगः पाकजानुत्पादयति स एवोच्छिनत्ति, अपि त्वग्निसंयोगान्तरं पूर्वरूपाद्युच्छिनत्ति समनन्तरकालाद्रूपादीनारभते(३) ततस्तान्यप्यन्यस्तान्यप्यन्य इत्येवं जनकस्य विनाशकत्वप्रसङ्गो नास्ति । अथ मन्यसे जनकमरूपमपि विनाशकं न भवति? न न भवति—दृष्टो यवादिसंयोगादङ्कुरस्योत्पादः स एवावादिसंयोगस्तद्विनाशक इति । न हि दृष्टेऽनुपपन्नं नाम । यश्चाकारणविनाशे दोषः सोऽपरिहार्य इत्यत एवमुच्यते जनकसरूपं विनाशकमिति ।

एवं तावदन्यत्वे साध्ये दोष उक्तः । ये तु क्षणिकत्वं साधयन्ति विशेषदर्शनाद्विनाशहेत्वभावाच्च, तान् प्रतीदमुच्यते क्षणिकाः संस्कारा इति ब्रुवाणः क्षणिकशब्दार्थं प्रष्टव्यः किमुक्तं भवति क्षणिका इति । यदि विनाशिन इति? सिद्धसाधनम् । अथाशुविनाशिन इति? तदा विशेषणं सिद्धान्तविरोधि । अथोत्पन्नप्रध्वंसिन इति? एतदपि तादृगेव । उत्पन्नाः प्रध्वंसिन इति? सिद्धसाधनम् । अथोत्पन्नो विनष्ट इत्येकः कालः उत्पत्तिविनाशावेककालाविति? । तेन यथाऽनुत्पन्नस्योत्पत्तिरेवमनुत्पन्नस्य विनाश इति प्राप्तम् । अथोत्पन्नं विनश्यतीति? एतस्मिन्नपि पक्षे उत्पत्तिवद्विनाशः कारणवान् यथोत्पत्तिः क्रियात्वात् कादाचित्कत्वात् सकारणा तथा

---

(१) प्राप्नोति—पा० ४ पु० ।

(२) नानवबोधात्—पा० ४ पु० ।

(३) समनन्तरकालान् रूपादीनारभते—पा० ४ पु० ।

विनाशकारणमनुभवति(१) ततो विनश्यतीति अकारणे च विनाशे दोष उक्तः। यश्चायं मत्वर्थीयः क्षणिका इति स कथं? यदि निरुक्तन्यायेन क्षयः क्षण इति क्षणोऽस्यास्तीति क्षणिक इति? तन्न युक्तं कालभेदात्—यदा क्षयो न तदा क्षयीति भिन्नकालयोर्न मत्वर्थीयो दृष्टः। अथ पुनर्भाव एवानन्तरेण विनाशेन विशिष्यमाणः क्षणिक(२) इत्युच्यते? तथापि तेनैव तदेव तद्वन्न भवतीति न युक्तो मत्वर्थीयः। अथ क्षणावस्थितिकालाः क्षणिका इति? सर्वान्त्यं कालं क्षणत्वेन प्रतिपद्य तत्र ये ऽवतिष्ठन्ते ते क्षणिका इति?। एतदपि न युक्तम्—सञ्ज्ञामात्रत्वेन कालस्याभ्युपगमात्। पञ्चभिक्षवः सञ्ज्ञाभेदमात्रमिति शास्त्रम्। न हि सञ्ज्ञामात्रं वस्तुविशेषणत्वेन युक्तम्। क्षणिका इति च प्रतिज्ञां कृत्वा न दृष्टान्तोऽस्तीत्युक्तम् प्रदीपादेरसिद्धत्वात्।

ये ऽपि हेतवोऽन्ते विशेषदर्शनादित्येवमादयस्तेऽप्यसिद्धाः अन्यथासिद्धा विरुद्धा वा भवन्तीत्यहेतवः। उपेत्य वा विशेषवत्त्वं वर्तमानैकक्षणविशेषवत्त्वेनानैकान्तिकम् उभयपक्षसम्प्रतिपत्त्या य एव क्षणो वर्तमानः स विशेषवान् भवत्यक्षश्चेत्यनेकान्तः। अन्ते विशेषदर्शनादिति च विशेषणानर्थक्यम् अन्यार्थानभिधानात् कतमस्मिन्नन्ते विशेषदर्शनादिति च वक्तव्यम्। अथान्तो विनाशः? नैतस्मिन् विशेषदर्शनमस्ति? अथान्तिमं वस्त्वेवान्तशब्दवाच्यम्? एवं प्रत्येकस्मिन् विशेषदर्शनमिति विरुद्धो हेतुः।

योऽप्ययं हेतुर्दर्शनादर्शनादिति-अस्यार्थः-नीयमानस्य किल प्र

---

(१) तथा विनाशिन इत्युत्पद्य विनाशकारणमनुभवति–पा० ४ पु०। 'तथा विनाश इत्युपेत्य विनाशकारणं' इति क्वचित् पा०।
(२) क्षण इत्युच्यते —पा० ४ पु०।

दीपादेर्द्रव्यस्य देशान्तरे उत्पादो देशान्तरे निरोधः तत्कृते दर्शनादर्शने स्तः अतश्च देवदत्तादेर्गच्छतो दर्शनादर्शनादतस्तस्यापि प्रतिक्षणमुत्पादविनाशाविति ? । नैतन्न्याय्यम्—देवदत्तादेर्दर्शनादर्शनयोरन्यनिमित्तत्वात् संयोगविभागकृते(१) दर्शनादर्शने नोत्पादविनाशकृते, यस्मिन् देशे संयोगो विनष्टः तस्मिन् संयोगी न गृह्यते यस्मिन्नुत्पन्नस्तस्मिन् गृह्यत इति यत्संयोगाद्धि द्रव्ये इहबुद्धिर्भवति तद्भावाभावयोस्तद्धत्त्वादिति । अथ संयोगविभागौ न विद्येते ? तस्यापि संयोगोऽर्थान्तरं भवतीति प्रतिपादितम् । एतेन विभागो व्याख्यातः । तदेवं संयोगविभागोत्पत्तेर्द्रव्यस्य दर्शनादर्शने भवतो नान्यथेति ।

यत्पुनरेतत् प्रदीपस्य देशान्तर उत्पाद इत्येतदपि न बुद्ध्यामहे । कथमिति ? यत्तावद्भवतां पक्षे वस्तूत्पन्नं(२) यत्र तत्रैव तद् ध्वंसते यदुत्पित्सु तदनाहितसंस्कारमसत्त्वाद्देशान्तरे नोत्पत्तुमर्हतीति । अथानाहितसंस्कारस्यापि देशान्तरे उत्पादो ? न किञ्चिद्वस्तु स्वभिन्नदेशमुत्पद्यते । अथ कारणं संस्कृतमिति ? तदाधेयवशात् कार्यमपि तथाभूतमेवोत्पद्यत इति तुल्यम् कार्येण, यथैव कार्ये संस्कार आधातुमशक्यः तथा कारणेऽपीति तुल्यम् । नियतं भवतां पक्षे भिन्नदेशेन कार्येणोत्पत्तव्यमभिन्नदेशेन वा । एतेनैवातुल्यपातो व्याख्यातः । अतुल्यपातात् क्षणिकत्वमिति न किलाकाशे पततो लोष्टादेः प्रतिबन्धकं किञ्चिदस्ति यदनुविधानेन लोष्टादिकं किञ्चिच्चिरेण पतति किञ्चिदाशिवति, तस्मात् क्षणिकत्वात् काश्चिदवस्थास्तादृश्य उत्पद्यन्ते यासां न भवत्यधः सन्तानोत्पत्तौ सामर्थ्यं पुनश्च तादृश्य उत्पद्यन्ते यासां भवतीति ? एतदप्यन्यथासिद्धमेव

(१) संयोगविनाशकृते—पा० ४ पु० । (२) वस्तूत्पन्नं—पा० १ पु० ।

तुल्यानां गुरुत्ववतां द्रव्याणामेकस्य गुरुत्वप्रयत्नक्षेपाः कारणम् एकस्य गुरुत्वमात्रमेकस्य गुरुत्वप्रयत्नाविति । तदेवं कारणभेदानुविधायीनि गुरुत्ववन्ति द्रव्याणि चिराशुपातानुविधानभाञ्जि भवन्तीत्यहेतु(१)रतुल्यपातः । यदपीदमिषोश्चापतनं भवेदिति ?। संस्कारैकत्ववादिनो दोषः अयमपि संस्कारैकत्वानभ्युगमेन प्रत्युक्तः । यथा चानेकः संस्कार इति तथोक्तं पाणिनिपमित्तप्रश्लेषसूत्र इति । एकश्च संस्कारः यदा कदाचिन्निमित्तभेदात् पटूनि कर्माणि करोति कदाचिन्मन्दानीति गुरुत्ववद्द्रष्टव्यम्—यथैकं गुरुत्वं सहकारिसंयोगात् मन्दं पातं करोति तदेव प्रतिबन्धापगमे पटुं करोति । दृष्टो हि ग्राव्ण आकाशे मुक्तस्य पटुः पातो मन्दोऽपामिति तदेवमतुल्यपातोऽप्यहेतुः ।

अथाक्षणिकत्वे किं प्रमाणम् ? उक्तमाधाराधेयभावादेककालानुभावीनि कार्यकारणे कुण्डे बदरवदिति अतश्च विप्रतिपन्ना अयुगपत्कालाः प्रत्यया एकविषयाः अव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यत्वात् वर्तमानैकक्षणानेकपुरुषप्रत्ययवत् यथा वर्तमानक्षणविषयाणामनेकपुरुषप्रत्ययानामव्युत्थायितत्प्रत्ययसामानाधिकरण्ये सति समानशब्दवाच्यानामेकविषयत्वम् तथा चाव्युत्थायितत्प्रत्ययसमानाधिकरणाः समानशब्दवाच्याश्च विप्रतिपन्ना अयुगपत्कालाः प्रत्ययास्तेऽप्येकविषया इति प्रत्यात्मं नानेककर्तृकाः प्रत्यया अप्रतिसन्धानप्रसङ्गादेवदत्तादिप्रत्ययवदिति । रूपरसगन्धस्पर्शप्रत्यया एकानेकनिमित्ताः मयेतिप्रतिसन्धानात् कृतसमयानां बहूनां वर्तमानैकक्षणानेकविज्ञानवदिति। श्वस्तनाद्यतनविज्ञानान्येकसन्ततौ एकानेकनिमित्तानि

(१) चिराशुपाताद्वाशुतरपातानुविधानभाञ्जि भवन्तीति न हेतुः—पा० ४ पु० ।

प्रत्ययेतिप्रतिसन्धानात् पूर्ववत् । शास्त्रार्थप्रत्यया एकानेकनिमित्ताः प्रतिसन्धानात् पूर्ववत् । नानाविषयाणां च नानाकर्तृकाणां च प्रत्ययानामप्रतिसन्धानादिति पूर्ववदेव न्याय इति ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् ॥ १५ ॥

न पयसः परिणामगुणान्तरप्रादुर्भावात् । नैवं क्षीरं विनश्यति नापि दध्युत्पद्यते, अपि त्ववस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरमुत्पद्यत इत्येके वर्णयन्ति । अपरे त्ववस्थितस्य द्रव्यस्य गुणनिवृत्तौ गुणान्तरमुत्पद्यत इति । स खल्वयमेकपक्षीभाव इव (१)क उपमानार्थः उभयत्र द्रव्यमवतिष्ठते एकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावावित्युपमानार्थः । उभयत्रोत्तरम्—

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् ॥ १६ ॥

व्यूहान्तराद्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् । शेषं भाष्ये । यत्पुनरेतदेकस्य तिरोभावाभिव्यक्ती एकस्य विनाशप्रादुर्भावाविति ? तन्न, पूर्वावस्थापरित्यागात् । यदि विनाशोत्पादौ निवृत्तिप्रादुर्भावावथाप्यभिव्यक्त्यनभिव्यक्ती सर्वथा पूर्वावस्थां जहाति द्रव्यमिति न ह्यनपवृक्तस्य पूर्वावस्थातोऽभिव्यक्त्यनभिव्यक्ती भवतो विनाशप्रादुर्भावौ वेति । तस्मादयुक्तमवस्थितस्य परिणाम इति ।

अभ्यनुज्ञाय च निष्कारणं क्षीरविनाशं निष्कारणं च दध्युत्पादम्—

---

(१) भाव इति-पा० १ पु० ।

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ॥ १७ ॥

क्वचिद्विनाशकारणानुपलब्धेः(१) क्वचिच्चापलब्धेरनेकान्तः। क्षीरदधिवन्निष्कारणौ विनाशोत्पादौ स्फटिकव्यक्तीनां, न पुनः कुम्भादिवत् सकारणाविति नात्र हेतुरस्तीति। निरधिष्ठानं च दृष्टान्तवचनम्। कोऽधिष्ठानार्थः? आश्रयार्थः। किमुक्तम्भवति निरधिष्ठानमिति?। धर्मी नास्तीति यावदुक्तं भवति, न हि स्फटिकस्योत्पादविनाशौ प्रतिक्षणमुपलभ्येते यत इयं चिन्ता भवेत् किमेतौ सकारणावाहोस्विदकारणाविति, यथाऽनभ्युपगतशब्दतत्त्वं प्रति कश्चिद्ब्रूयात् कृतकत्वादनित्यः शब्दस्ताद्दृगेतादिति धर्म्यसिद्धेश्च दृष्टान्ताभाव इति च समानम्। अभ्यनुज्ञाय च स्फटिकस्योत्पाद(२)विनाशौ योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः उभावेतौ दृष्टान्तौ क्षीरदधिवत् कुम्भादिवच्च तत्र किं कुम्भादिदृष्टान्तो भवत्वथ क्षीरदधिनी इति। तत्र कुम्भादिवदिति युक्तम् कुम्भाद्युत्पत्तिविनाशकारणस्य दृष्टत्वात्। क्षीरदधिवत्तु न युक्तम् अनुमानतो ग्रहणादिति सिद्धमनित्या बुद्धिरिति। इतश्चानित्या बुद्धिः गुणत्वे सति प्रत्यक्षाया व्यापकद्रव्यसमवायात् शब्दवत् जातिमत्त्वे सति अस्मदादिप्रत्यक्षत्वादाश्रितत्वात् शब्दवत् करणभावे सत्ययोगिप्रत्यक्षत्वात् शब्दवदेव॥

(इति क्षणभङ्गप्रकरणम्।)

सा त्वियं बुद्धिः कस्य गुण इत्येतच्चिन्त्यते। न गुणभावासिद्धेः? अनित्यत्वे सत्यचाक्षुषप्रत्यक्षत्वाद्गुणभावः। सन्निकर्षोत्पत्तेः संशय इति। तत्रायं विशेषः—

---

(१) नुपपत्तेः- पा० १ पु०। (२) तस्योत्पाद-पा० ४ पु०।

नेन्द्रियार्थयोस्तद्विनाशे ऽपि ज्ञानावस्थानात् ॥ १८ ॥

नेन्द्रियार्थयोस्तद्विनाशे ऽपि ज्ञानावस्थानात् । भवति खल्विन्द्रिये ऽर्थे च विनष्टे ज्ञानमद्राक्षमिति । अद्राक्षमित्येतन्नेन्द्रियार्थसन्निकर्षात् स्मृतित्वात् स्मृतिरेषा नेन्द्रियार्थसन्निकर्षाद्भवितुमर्हति ? स्मृतावपि तुल्यं यथैव ज्ञातारमन्तरेण ज्ञानं न भवत्येवमनुभवितरि नष्टे अनुभवितारमन्तरेण स्मृतिरयुक्तेति ।

अस्तु तर्हि मनो गुणः ज्ञानं—

युगपज्ज्ञेयानुपलब्धेर्न मनसः ॥ १९ ॥

युगपज्ज्ञेयानुपलब्धेर्न मनसः । तत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो नातस्तस्य गुणो ज्ञानम् । विशेषणोपादानादन्तःकरणबहुत्वप्रसङ्ग इति चेत् ?—अथ मन्यसे यत् खलु युगपज्ज्ञेयानुपलब्ध्या समधिगतं मनो न तस्य गुणो ज्ञानमित्येवं ब्रुवाणेन बहून्यन्तःकरणानि प्रतिपन्नानि भवन्ति न ह्यसत्यन्तःकरणबहुत्वे विशेषणमर्थवदिति ? । न, सर्वस्येन्द्रियस्य मनननिमित्तत्वात्—सर्वमिन्द्रियं मनननिमित्तत्वान्मन इत्युच्यते । एवं च सति विशेषणं युक्तम् युगपज्ज्ञेयानुपलब्ध्या यत् समधिगतं मनो न तस्य गुणो ज्ञानमिति । एवमपि विशेषणं व्यर्थम्—अन्यस्यानभ्युपगमात्—यदि तस्यान्तःकरणस्य न भवत्यन्यस्य तर्हि साधनस्य ज्ञानं गुण इति प्राप्तम् ? अन्यस्यानभ्युपगमात् ? । अन्यस्योपपत्तेरप्रतिषेधः—अनवस्थितत्वात् प्रमाणप्रमेयभावस्य, यदायं योगी पुरुषान्तरेण पुरुषान्तरं परिच्छिनत्ति तदा पुरुषान्तरपरिच्छेदे पुरुषान्तरं साधनमिति तत्त्वज्ञानगुणं भवतीति युक्तं विशेषणमिति । तस्मान्न तस्य गुणो ज्ञानमिति । कस्य तर्हि ? ज्ञस्य, वशित्वात्—वशी ज्ञाता, वश्यं करणमिति । न चायं ज्ञातरि नि-

स्यमो ज्ञाता चश्यैव वश्योऽपि भवतीति। अचेतने तु नियमः—अचेतने तु सर्वं वश्यमिति। वश्यं मनोऽचेतनत्वात् घ्राणादिवदिति। ज्ञानगुणत्वे वा सञ्ज्ञाभेदमात्रम् चित्तं चान्तःकरणं ज्ञानगुणं चेति सञ्ज्ञामात्रं भिद्यते। यथा च ज्ञातुर्ज्ञानसाधनमिन्द्रियमेवं मन्तुर्मतिसाधनेनावश्यं भवितव्यमिति। उभयोश्चेतनत्वे प्रत्ययव्यवस्थानुमानं न स्यात् विभु चान्तःकरणं ज्ञानगुणमिति सर्वेन्द्रियैर्युगपदुपलब्धिप्रसङ्गः॥

तदात्मगुणत्वेऽपि तुल्यम्॥ २०॥

तदात्मगुणत्वेऽपि तुल्यम्। यस्यात्मा विभुश्च ज्ञानगुणश्च तस्यापि सर्वेन्द्रियैः सम्बन्धस्याप्रतिषेधाद् युगपदुपलब्धिप्रसङ्गः।

इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिः॥२१॥

न प्रसङ्गः कारणान्तरभावात्—इन्द्रियार्थसन्निकर्षवदिन्द्रियमनःसन्निकर्षोऽपि कारणमिति। तस्यायौगपद्यमणुत्वान्मनस इति। यदि पुनरात्मेन्द्रियार्थसन्निकर्षादेव ज्ञानमुत्पद्येत किं स्यात्—

नोत्पत्तिकारणानपदेशात्॥ २२॥

नोत्पत्तिकारणानपदेशात्। अस्मादेवोत्पद्यतामिति न कारणमपदिश्यत इति सूत्रार्थः। आत्मेन्द्रियार्थसन्निकर्षात् ज्ञानमुत्पद्यत इति। अयुगपदुत्पत्तौ वा न कारणान्तरमपदिश्यत इति। विदेहप्रसयानुत्पत्तौ वा। यदेन्द्रियमर्थेन वहिरवस्थितेन सम्बद्ध्यते आत्मसम्बन्धोऽपि तत्रास्तीति(१) कस्माद्विदेहप्रसयो न भवतीति वक्तव्यम्। अन्तःकरणप्रत्याख्याने च केवलमात्मा स्मृत्यादिकारणमिति कस्मान्न युगपदुत्पत्तिः स्मृतीनां, यदा चेन्द्रियमात्मा चार्थेन युगपत्सम्बद्धौ तदा किमिन्द्रियार्थ-

(१) तस्यास्तीति—पा० ४ पु०।

सन्निकर्षः कारणम् उत आत्मार्थ(१)सन्निकर्षः उतात्मेन्द्रियार्थ-सन्निकर्ष इति कारणानपदेशः ।

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ २३ ॥

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः । तदात्मगुणत्वे ऽपि तुल्यम् इत्येतदनेन समुच्चीयते यद्यात्मगुणो बुद्धिर्भवति विनाशकारणाभावान्नित्यत्वमस्याः प्रसज्येत । कथमिति ? गुणानां द्वौ विनाशहेतू आश्रयाभावो विरोधिगुणप्रादुर्भावश्च तत्र नित्यत्वादात्मनोऽनुपपन्नः पूर्वः विरोधी च गुणो नास्तीति नित्यत्वप्रसङ्गः ॥

अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् ॥२४॥

अनित्यत्वग्रहणाद्बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत् । अनित्या बुद्धिरित्येतत् प्रतिपादितम् । तत्रास्या बुद्ध्यन्तराद्वा संस्काराद्वा विनाश इति प्रतिपत्तव्यम् । न द्वे सहेति चेत् ?— अथ मन्यसे न द्वे बुद्धी सह भवतो यतः परया पूर्वा निवर्त्यते ? तच्च न युगपदुत्पत्तिनिषेधात्—युगदुत्पत्तिः प्रतिषिध्यते न सहभावः न हि बुद्ध्योर्युगपद्भावे किञ्चिद्विरुध्यत इति । लब्धात्मकेन च कार्येण कारणविनाशाभ्युपगमात्—यदा च कार्यं लब्धात्मकं भवति तदा कारणं विनाशयति शब्दवत् । यथा लब्धात्मकः(२) कार्यः शब्दः कारणं शब्दं निमार्ष्टि तथा बुद्धिरपीति । अन्त्ययोर्न स्यादिति चेत् ? अथ मन्यसे यदि पूर्वौ बुद्धिशब्दौ पराभ्यां विनाश्येते अन्त्य-

(१) उतात्मार्थयोः—पा० ४ पु० ।

(२) लब्धात्मा—पा० ४ पु० ।

योर्बुद्धिशब्दयोः कथं(१) विनाशकारणमिति—यथा चान्त्यौ बुद्धिशब्दौ विना निमित्ताद्विनश्यतः एवमन्यदपि कार्यमिति ? । न स्पर्शवद्द्रव्यसंयोगान्न तदुत्पत्तिः(२) स्पर्शवद्द्रव्यसंयोगेनान्त्यशब्दो विरुध्यते । ये कुड्यादिभिः कारणस्य संयोगास्त एकार्थसमवायिनं शब्दं प्रतिबध्नन्ति अतोऽत्यन्तमश्रुतिः शब्दस्येति । अन्त्या बुद्धिः स्थितिहेत्वभावाद्विनश्यतीति कालाद्वा संस्काराद्वा । कथं कालात् ? यावस्य जन्मनः स्थितिहेतू धर्माधर्मौ तयोरभावादन्त्या बुद्धिर्विनश्यतीति । कस्मात् पुनरेवमुच्यते ? न पुनरहेतुको विनाशोऽभ्युपगम्यत इति ? नाभ्युपगम्यते उक्तदोषात् । निर्हेतुके विनाशे उक्तो दोषः(३) क्षणभङ्गं निराकुर्वद्भिरिति । यदि कारणस्यायौगपद्याद्बुद्धीनामयुगपदुत्पत्तिः यत्र कारणस्य यौगपद्यमस्ति तत्र युगपदुत्पत्तिप्रसङ्गो यथा स्मृतिषु । अत्र तावदेकः परिहारः करणस्यैकक्रियानिर्वृत्तौ सामर्थ्यात्—न हि करणमेकस्मिन् काले ऽनेकां क्रियां निर्वर्तयितुं शक्तमिति परिच्छेदत्वाच्च स्मृतीनां ज्ञानवद्युगपदुत्पत्तिरिति । अपरे तु कारणस्यायौगपद्यमुपपादयिष्यन्तः ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिरित्याहुः—

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः ॥ २५ ॥

नान्तःशरीरवृत्तित्वान्मनसः ॥ २६ ॥

एतत्तु न सम्यगिति प्रतिपादयितुमाह नान्तःशरीरवृत्तित्वान्मनसः ॥

(१) किं—पा० ४ पु० । (२) तदनुपपत्तेः—पा० ४ पु० ।
(३) उक्ते हेतुः—पा० ४ पु० ।

अन्तःशरीरे मनो वर्तते इति को वृत्त्यर्थः ? । न तावदाश्रयाश्रितभावः—न हि मनः क्वचिदाश्रितम् । नापि वृत्तिः स्वकार्यसामर्थ्यम् बहिःकार्यदर्शनान्मनसाधिष्ठितं चक्षुर्निःसृत्य रूपादि ग्राहयाति(१) चक्षुषोर्विसरार्वो(?)र्मनसः कार्यं तद्भावभावित्वात् न चान्या वृत्तिः सम्भवति तस्मान्नान्तःशरीरवृत्ति मन इति ? । अत्र ब्रूमः नाश्रयाश्रितभावो(२) मनसो वृत्तिर्नापि कार्यप्रतिलम्भोऽपि तु नाशरीरस्य मनसः कार्यमिति मनसो वृत्त्यर्थः—न ह्यशरीरं मनः पुरुषस्यार्थं करोतीति ।

साध्यत्वादहेतुः ॥ २७ ॥

साध्यत्वादहेतुः। अशरीरं मनः पुरुषार्थासमर्थमिति साध्यमेतत् ।

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥ २८ ॥

स्मरतः शरीरधारणोपपत्तेर्न प्रतिषेधः(३) स्मरणशरीरधारणे युगपद्भवत इति दृष्टम् । दृष्टं च सर्वेण प्रतिपत्तव्यम् । चिरनिश्चरिते च मनसि स्मरतः शरीरधारणं न स्यात् ।

न तदाशुगतित्वान्मनसः ॥ २९ ॥

न तदाशुगतित्वान्मनसः—उभयं सिध्यति स्मरणं धारणं च ।

न स्मरणकालानियमात् ॥ ३० ॥

न स्मरणकालानियमात् । अनियतःस्मृतिकालोऽतोऽयुक्तमेतत् । शरीरसंयोगानपेक्षं चात्मनः संयोगं स्मृतिकारणं ब्रुवतः शरीरस्योपभोगायतनत्वं निवर्तते । ततस्तन्निवृत्तौ शरीरोत्पत्तिनैयर्थ्यमिति ॥

---

(१) रूपादिमदर्थं ग्राहयति—पा० ४ पु० ।

(२) नाश्रयाश्रयिभावो—पा० ४ पु० ।

(३) रप्रतिषेधः—पा० ४ पु० ।

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः॥३१॥

अपरे तु आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेष इति परिहारं ब्रुवते ॥

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ ३२ ॥

एतच्च व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानं भवतीत्यपरिहारः । कर्मादृष्टमुपभोगार्थं नियामकं भवतीति न युक्तं समानत्वात् । तस्मात् पूर्व एव परिहारो नान्तःशरीरवृत्तित्वान्मनस इति ।

यदि तर्हि ज्ञानसमवेतात्मसन्निकर्षायौगपद्यादिति परिहारो नेष्यते प्राप्तः स्मृतीनां युगपदुत्पादः कारणस्य यौगपद्यादिति ?। नापेक्षाकारणस्यायुगपद्भावात् ।

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद्युगपदस्मरणम् ॥ ३३ ॥

प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्गः ॥ ३४ ॥(१)

यतः प्रणिधानाद्यात्ममनःसंयोगस्य सहकारि कारणं तन्न युगपद्भवतीत्ययुगपदुत्पत्तिः स्मृतीनाम् । यदि प्रणिधानाद्यपेक्षात्ममनःसंयोगो न युगपत् स्मृतिकारणं याः स्मृतयः प्रणिधानादिसन्निधानमन्तरेण(२) भवन्ति तासां यौगपद्यं स्यात् ? नानभ्युपगमात्—न हि प्रणिधानाद्यनपेक्षं स्मार्तमस्ति ?, सतः स्मृतिहेतोरसंवेदनात् प्रातिभेन समानाभिमानोऽयमिति । प्रातिभं तर्हि

---

(१) न्यायसूचीनिबन्धे सूत्रमिदं नास्ति ।

(२) सन्निधानाद्यन्तरेण—पा० ४ पु० ।

युगपद्भवितुमर्हति-न हि तस्यासन्निहितं कारणमिति ? नोक्तोत्तरत्वात्-उक्तोत्तरमेतत्-न हि करणस्यानेकक्रियानिर्वृत्ति(१)सामर्थ्यमस्ति, प्रातिभं चानेकं ज्ञानं भवदेकस्मिन्नर्थे भवेद्थानेकस्मिन्?। न तावदेकस्मिन् वैयर्थ्यात्। नानेकस्मिन्, सामर्थ्याभावात्। न चायं नियमः प्रत्ययानां यौगपद्यं न भवतीति, ज्ञातुर्विकरणधर्मणो देहनानात्वे प्रत्ययानां यौगपद्यादिति । यदि च ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्न स्मृतीनां युगपदुत्पत्तिः ये संस्कारा एकदेशास्तेष्ववस्थितशरीरस्यानेकज्ञानसमवायादेकदेशे युगपदनेकार्थस्मरणं स्यात्, न चैतदस्तीति अतश्चापरीहार इति। अवस्थितशरीरस्य संस्काराः समानदेशा इत्ययुक्तम्—आत्मप्रदेशानामद्रव्यान्तरत्वात्, एवं सति सर्वसंस्काराणां समानदेशत्वे प्रत्ययगौगपद्यप्रसङ्गोऽपरिहार्यः । संस्कारप्रत्यासत्त्या स्मृतियौगपद्यं न भवतीति। का प्रत्यासत्तिः?—न हि संस्काराणां सन्निकृष्टविप्रकृष्टभावोऽस्ति समानदेशत्वात् ? । न ब्रूमः—सन्निकृष्टता प्रत्यासत्तिरपि तु संस्कारस्य सहकारिकारणसमवधानं प्रत्यासत्तिः शब्दवत्—यथा शब्दाः सन्तानवर्तिनः सर्व एवाकाशे(२) समवयन्ति समानदेशत्वे ऽपि यस्योपलब्धेः कारणानि सन्ति स उपलभ्यते नेतरे, तथा संस्कारेष्वपीति ॥

पुरुषस्य ज्ञानमिच्छादयोऽन्तःकरणस्येति कस्यचिद्दर्शनं तत्प्रतिषिध्यते—

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ॥ ३५ ॥

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः । ज्ञातुरेवेच्छादय इति सूत्रार्थः । यद्यन्तःकरणस्येच्छादयः स्युर्न प्रत्यक्षाः स्युः—न

---

(१) निमित्त-पा० १ पु० । (२) सर्वत्रैवाकाशे-पा० १ पु० ।

हीच्छादयोऽन्यत्र वर्तमाना अन्यस्य प्रत्यक्षा भवितुमर्हन्तीति ।
नित्यं चेच्छादयोऽप्रत्यक्षाः स्युः मनोगुणानामतीन्द्रियत्वात् ।
आरम्भनिवृत्त्योश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानम् ॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ॥३६॥

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः । प्रवृत्ति-निवृत्तिभ्यां सामानाधिकरण्यात् शरीरादिषु (ष्व)प्रसङ्ग इति सूत्रार्थः ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥ ३७ ॥

परश्वादिष्वारम्भनिवृत्तिदर्शनादनेकान्तो वाक्यार्थः ॥

नियमानियमौ तु तद्विशेषकौ ॥ ३८ ॥

नियमानियमौ तु तद्विशेषकौ । प्रयुज्यमानभूतविषयत्वं प्रवृत्तिनिवृत्त्योर्नियमः—यानि भूतानि प्रयुज्यन्ते तेषु प्रवृत्ति-निवृत्ती भवतो न सर्वेष्विति । यदि पुनर्ज्ञत्वाद्भूतानां प्रवृत्तिनि-वृत्ती स्यातां भूतमात्रे स्याताम्—यथा गुरुत्वादिभ्यो, यानि गुरु-त्वादिमन्ति भूतानि तानि स्वगुणात् पतन्तीति, नियमश्च दृष्टः तस्मान्न भूतानि चेतनानीति । एकशरीरे च ज्ञातृबहुत्वं निरनु-मानमिति—यस्य भूतानि चेतनानि तस्यैकशरीरे बहूनि भू-तानीति बहवश्चेतनाः स्युः । भवन्तु बहवश्चेतनाः किन्नो बाध्यत इति चेत् ? न, बहुत्वे प्रत्ययव्यवस्थानानुपातं(१) भवेत्, अव्य-वस्थानं तु पश्यामः प्रत्ययानां प्रतिसन्धानात्—सर्वः प्रत्ययः प्रतिसन्धीयमान एकस्मिन् कार्यकारणसङ्घाते दृष्ट इति । अन्य-थाभिधानाच्च—हिताहितप्राप्तिपरीहारार्थः परिस्पन्दः प्रवृत्तिनि-वृत्ती, भवता तु क्रियामात्रं क्रियोपरमं चाश्रित्य तल्लिङ्गत्वा-

(१) न भवेत् इति तात्पर्यटीकासम्मतः पाठः ।

दिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेध इत्युक्तम् यथाविधे च प्रवृत्तिनिवृत्ती प्रयुज्यमानभूताधारस्तेन तथाभूते(१) भूतमात्रे भवत इति भूतेन्द्रियमनसां समानः प्रतिषेधः ।

मनस्तूदाहरणमात्रम्—

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ ३९ ॥

यथोक्तहेतुत्वात् पारतन्त्र्यादकृताभ्यागमाच्च न मनसः । यथोक्तहेतुत्वादिति—दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनां हेतूनामप्रतिषेधात् । पारतन्त्र्यादिति—परतन्त्राणि शरीरेन्द्रियमनांसि धारणप्रेरणव्यूहनक्रियासु प्रयत्नवशात् प्रवर्तन्ते चैतन्ये पुनः स्वतन्त्राणि स्युः । अकृताभ्यागमाच्च—चेतनत्वाच्छरीरादीनां तैः कृतं कर्म पुरुषेण भुज्यत इति अकृतकृतागमनाशदोषप्रसङ्गः अचेतनत्वे तु तत्साधनस्य स्वकृतकर्मफलोपभोग इति ॥

अथायं सिद्धोपसङ्ग्रहः—

परिशेषाद्यथोक्तहेतूपपत्तेश्च ॥ ४० ॥

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ॥ ४१ ॥

परिशेषाद्यथोक्तहेतूपपत्तेश्च आत्मनो गुणो ज्ञानमिति प्रकृतम् । यथोक्तहेतूपपत्तेरिति आत्मप्रतिपादकानां हेतूनामप्रतिषेधात् । परिशेषादिति शरीरेन्द्रियमनसां प्रतिषेधादन्यस्य च शिष्यमाणस्यासम्भवात् आत्मनश्च शिष्यमाणत्वात् तस्य गुणो ज्ञानमिति । उपपत्तेरिति वा स्वतन्त्रो हेतुः आत्मनित्यत्व इति । कस्योपपत्तेः ? संसारापवर्गयोरुपपत्तेरित्येवमादि भाष्ये ॥

स्मृतिहेतूनामयौगपद्यादयुगपत् स्मरणमित्युक्तम् । अथ

---

(१) तथाविधे-पा० ४ पु० ।

केभ्यः स्मृतिरुत्पद्यत इति? स्मृतिकारणानामयौगपद्यप्रतिपादनार्थं प्रणिधानादि सूत्रम्—

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ ४२ ॥

एवमुपपन्नमनित्या बुद्धिरिति ॥

इति बुद्धेरात्मगुणत्वप्रकरणम् ।

अनित्यायां च बुद्धावुत्पन्नापवर्गित्वात् कालान्तरावस्थितत्वाच्च(१) संशयः उत्पन्नापवर्गिणी बुद्धिः शब्दवत् आहो कालान्तरस्थायिनी(२) कुम्भवदिति । उत्पन्नापवर्गिणीति युक्तम् । कः पुनरयमर्थः उत्पन्नापवर्गिणीति ? अन्येभ्योऽपि विनाशिभ्य आशुतरं विनश्यतीति, न त्वयमर्थ उत्पत्त्यनन्तरं ध्वंसत(३) इति । कः पुनरत्र न्यायः? आशुतरविनाशिनी बुद्धिः जातिमत्त्वे सत्यस्मदादिप्रत्यक्षतायां व्यापकद्रव्यसमवायात् शब्दवत् प्रतिक्षणमपूर्वोत्पत्तौ(४) करणत्वे सति प्रत्यर्थप्रकाशकत्वात् यस्य प्रतिक्षणमपूर्वोत्पन्नपदार्थप्रकाशकत्वं करणत्वे सति तस्याशुतरविनाशित्वं दृष्टं यथा प्रदीपस्य, प्रतिक्षणमपूर्वोत्पन्नान्(५) प्रध्वंसिनः पदार्थान् बुद्धिः प्रत्यर्थनियमेन प्रकाशयति तस्मादियमप्याशुतरविनाशिनीति । अथवा आशुतरविनाशिनी बुद्धिः

(१) वस्थायित्वाच्च—पा० ४ पु० ।

(२) कालान्तरावस्थायिनी—पा० ४ पु० ।

(३) ध्वंस इति—पा० १ पु० ।

(४) अयुगपदुत्पत्तौ—इत्यधिकं १ पु० ।

(५) प्रतिक्षणमुत्पन्नान्—पा० ४ पु० ।

गुणत्वे सत्यबाह्यकरणप्रत्यक्षत्वात् सुखवदिति ॥

अस्यार्थस्य ज्ञापनार्थं कर्मानवस्थायिग्रहणादिति सूत्रम्—

कर्मानवस्थायिग्रहणात् ॥ ४३ ॥

यदि तर्ह्यनवस्थायिपदार्थेषु अनवस्थिता बुद्धिः अथ यदा बुद्धिस्थितं(१) कुम्भादिकमुपलभ्यते तदा किं कुम्भवत् कालान्तरावस्थायिनी उताशुविध्वंसिनीति ? । अवस्थितग्रहणे ऽपि प्रत्यक्षनिवृत्तेः प्रध्वंसिनी—यदाप्यवस्थितं कुम्भादिकमुपलभते तदापि सन्तानेनैव बुद्धयो निवर्तन्ते । कस्मात् व्यवहिते ? प्रत्यक्षनिवृत्तेः—यदि कुम्भवत् कालान्तरावस्थायिनी बुद्धिरभविष्यत् व्यवहिते ऽपि प्रत्यक्षमवास्थास्यत् न त्ववतिष्ठते तस्मान्न कालान्तरावस्थायिनीति । स्मृतेरवतिष्ठत इति चेत् ?—यदि बुद्धिर्ध्वंसिनी स्यात् स्मृतिर्न स्यात् न हि बुद्धिभेदे स्मृतिं पश्याम इति यथा पुरुषान्तरबुद्धिषु, अस्ति च स्मृतिः तस्मादवतिष्ठते बुद्धिरिति ? नात एवानवस्थानात्—न हि बुद्धाववस्थितायां स्मृतिः सम्भवति—स्मृतिर्नाम प्रत्यक्षबुद्धिनिरोधे तत्पूर्वको विषयप्रतिसन्धिः यथेदमद्राक्षमिति, एतच्च न प्रत्यक्षबुद्धाववस्थितायां युक्तमिति । अन्यतश्च तद्भावात् स्मृतिरलिङ्गमिति—येयं स्मृतिर्बुद्धाववस्थानलिङ्गत्वेनाभ्युपगम्यते नेयं लिङ्गमन्यतस्तद्भावात् अवतिष्ठते हि बुद्धिजः संस्कार इति ततः प्रणिधानादिनिमित्तापेक्षात् स्मृतिरिति ॥

हेत्वभाव इति चेत् अथ मन्यसे संस्कारात् स्मृतिर्न बुद्ध्यवस्थानादित्यत्र को हेतुः ? स्मृतिरेव—यद्यवतिष्ठते बुद्धिः स्मृतिर्न स्यादिति—

(१) यदावस्थितं—पा० ४ पु० ।

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् ॥ ४४ ॥

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा ॥ ४५ ॥

अव्यक्तग्रहणमनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत् । यद्यनवस्थायिनी बुद्धिरव्यक्तं व्यक्तस्य ग्रहणं प्राप्नोति यथा विद्युत्प्रकाशितानामव्यक्तग्रहणमिति ? न विरोधात् अव्यक्तग्रहणादवस्थायिनी बुद्धिरिति ब्रुवाणोऽनवस्थायिनी बुद्धिरिति यत्प्रतिषेध्यं(१) तदभ्यनुजानासि तस्य चाभ्यनुज्ञानाद्यदुक्तं कालान्तरावस्थायिनी बुद्धिरिति तद्बाधितं भवति । अव्यक्तग्रहणस्य चान्यनिमित्तत्वात् नाव्यक्तग्रहणाद् बुद्ध्यनवस्थानं सिद्ध्यति । यत्तद्व्यक्तमव्यक्तं च ग्रहणं न बुद्धेरवस्थानानवस्थानाभ्यामपि तु ग्रहणहेतोर्भेदादिति । तदसम्भवाच्च नाव्यक्तं नाम ग्रहणमस्ति । कस्मात् ? अर्थग्रहणमात्रत्वाद् बुद्धेः—अर्थग्रहणमात्रं बुद्धिः—तच्चार्थग्रहणं सामान्यतो विशेषतश्च यच्च सामान्यविषयं तत्सामान्यं प्रति व्यक्तम् । एवं विशेषविषयम् एवं तद्बुद्धिषयमिति । तदिदमव्यक्तग्रहणं देशितम् कथमेकस्मिन्(२) विषये बुद्ध्यनवस्थानकारितं स्यात् । लोकविरोध इति चेत् ?—यदि तर्हि व्यक्ताव्यक्तग्रहणे न स्यातां योऽयं व्यवहारो लोकेषु व्यक्तं(३) पश्यामीति स कथम् ? नान्यथा तदुपपत्तेः—नायं सामान्यविशेषवद्वस्तु व्यक्ताव्यक्तग्रहणभेदोऽपि तु धर्मिणः सामान्यतोऽधिगतस्य विशेषत उपलिप्सादृारकमव्यक्तग्रहणमिति । अनेकान्ताच्च(४)—नायमेकान्तो-

---

(१) प्रतिषेधव्यम्—पा० ४ पु० । (२) कतमस्मिन्—पा० ४ पु० ।
(३) लोकेन व्यक्तं—पा० ४ पु० ।
(४) अनैकान्तिकत्वाच्चेति तात्पर्यटीकासम्मतः पाठः ।

ऽस्ति यद्विषयग्रहणहेतोर्ग्राह्यस्य चानवस्थानं तत्राऽव्यक्तग्रहणम्॥

न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् ॥ ४६ ॥

न प्रदीपार्चिषः सन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम् । अनवस्थायित्वे ऽपि यथा प्रदीपार्चिषां सन्तत्या वर्तमानानां ग्राह्यानवस्थानं ग्रहणानवस्थानं च भवति, भवति च व्यक्तं ग्रहणमर्चीषीति यथार्चिःषु, तथान्यत्रापीति, व्यवस्थितं क्षणिका बुद्धिरिति।

(इति बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ।)

शरीरगुणश्चेतना सति शरीरे भावादसति चाभावादिति–यत्र यस्मिन् सति भवति असति च न भवति तस्य तदिति विज्ञायते यथा रूपादय इति । ? न सति भावात् शरीरगुणत्वं चेतनायाः सिद्ध्यति सति भावस्यान्यगुणत्वे ऽपि दर्शनात्, न तावत् संयोगविभागसंस्काराः कर्मगुणाः अथ च सति कर्मणि भावोऽसति चाभाव इति । संयोगविभागशब्देषु च सत्सु शब्दो भवत्यथ च न तद्गुण इति । तद्गुणत्वं च तत्रोपलब्ध्या सिद्ध्यति यद्यत्र वर्तमानमुपलभ्यते रूपादिकं तत्तस्य गुण इति । अथ सति भावादित्यनेन शरीरे चेतनोपलब्धिं ब्रूयात् ? तस्याप्यसिद्धता दोषः–न हि शरीरे चेतनोपलभ्यते, चेतनामात्रं तूपलभ्यते, तच्च सन्दिग्धं किं शरीरे उतान्यस्मिन् इति । उपेत्य शरीरे चेतनोपलब्धिं किं शरीरगुणश्चेतना उत द्रव्यान्तरगुण इति—द्रव्ये स्वगुणपरगुणोपलब्धेः संशय इत्युक्तार्थं सूत्रम्—

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ ४७ ॥

न शरीरगुणश्चेतना यावद्द्रव्यभावित्वा(१)द्रूपादीनाम् ॥

दृष्टान्तसूत्रम्—

यावद्द्रव्यभावित्वाद्रूपादीनाम् ॥ ४८ ॥

वैधर्म्येण ये शरीरगुणा भवन्ति ते यावच्छरीरं वर्तन्ते यथा रूपादयः न तु यावच्छरीरं चेतना वर्तते तस्मान्न तद्गुण इति । साधर्म्येण वा न तद्गुण इति यथाप्सूष्णतेति(२) । संस्कारवदिति चेत् ?—अथ मन्यसे यथा संस्कारः शरीरगुणो न च यावच्छरीरं वर्तते तथा चेतनापीति ? न कारणानुच्छेदात्—संस्कारस्य न शरीरमात्रं कारणं तस्य नोदनादिकारणसन्निधाने तद्भावे भावाभावौ युक्तौ कारणसन्निधानवतोऽयुक्तमेतदिति । चेतनानिमित्तस्याप्यसन्निधानमिति चेत् ?—अथ मन्यसे यथैव संस्कारस्य कारणमसन्निहितमेवं चेतनाकारणमपीति ? तदयुक्तम् विकल्पानुपपत्तेः—यच्छरीरे चेतनोत्पत्तिकारणं तत्किं शरीरस्थमुत द्रव्यान्तरस्थम् ? शरीरस्थमपि किं यावच्छरीरभावि उत नैमित्तिकमिति ? । यदि यावच्छरीरभावि ? न कदाचिच्चेतनाहीनं शरीरमुपलभ्येत निमित्तस्य सन्निहितत्वात् । अथ नैमित्तिकं ? यच्छरीरे चेतनोत्पत्तेर्निमित्तस्य कारणं तत्रापि(३) चेतनावत्प्रसङ्गः । अथ द्रव्यान्तरस्थं द्रव्यान्तरवृत्तिनिमित्तं शरीरे चेतनां करोति न द्रव्यान्तरेष्वित्यत्रापि नियमहेतुर्वक्तव्यः । द्रव्यान्तरस्थं च नित्यमनित्यं वा, अनित्यमपि कालान्तराव-

(१) यावच्छरीरभावित्वा—पा० ४ पु० ।

(२) यथाप्स्वग्न्युष्णतेति—पा० ४ पु० ।

(३) तदापि—पा० १ पु० ।

स्थायि क्षणप्रध्वंसि वेति(१) चेतनावत् प्रसङ्गः ॥

यच्च मन्यते श्यामादिगुणं च द्रव्यं भवति न च यावद्द्रव्यभाविनी श्यामतेति ? तच्च न,

न पाकजगुणान्तरोत्पत्तेः ॥ ४९ ॥

पाकजगुणान्तरोत्पत्तेः । नात्यन्तं श्यामतोपरमे(२) रूपान्तरोत्पत्तिः चेतनोपरमस्त्वत्यन्तं इति ॥

इतश्च—

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ ५० ॥

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः । यावत्सु द्रव्येषु पूर्वगुणप्रतिषेधस्तावत्सु प्रतिद्वन्द्विनो गुणान्तरस्य दर्शनम्—यथा श्यामनिवृत्तौ रक्तादीनामिति । न पुनः शरीरे चेतनाविपरीतं गुणान्तरमुपलभ्यते चेतनाभावोपरमस्त्वत्यन्तं इति । अथ मन्यसे शरीरेऽप्यचेतनत्वं नाम(३) गुणान्तरमिति ? तन्न, स्वरूपतोऽनिर्देशात्—यत्तदचेतनत्वं नाम, किं तत् चेतनाविपरीतं धर्मभूतं वस्तु उत चेतनाविप्रतिषेधमात्रमिति ? यदि विपरीतं चेतनावत् संवेद्यं स्यात् । अथ चेतनाविप्रतिषेधमात्रं ? तन्न गुण इति ॥

इतश्च न शरीरगुणश्चेतना—

शरीरव्यापित्वात् ॥ ५१ ॥

शरीरव्यापित्वात्—शरीरवत् शरीरावयवाश्चेतनोत्पत्त्या व्याप्यन्ते । को व्याप्त्यर्थः ? न कश्चित् शरीरावयवश्चे-

(१) प्रतिक्षणं ध्वंसि वेति—पा० ४ पु० ।

(२) श्यामरूपोपरमे—पा० ४ पु० ।

(३) अचेतना नाम—पा० ३ पु० ।

तनाहीनो भवतीति सर्वस्य चेतनानिमित्तत्वात् शरीरवच्छरीरावयवाश्चेतनाः प्राप्नुवन्ति । भवन्तु शरीरावयवाश्चेतनाः ? न प्रत्ययव्यवस्थाप्रसङ्गात्—शरीरवच्छरीरावयवाश्चेतना इति प्रत्ययव्यवस्थानं स्यात् ।

न शरीरावयवाश्चेतनाः—

न(१) केशनखादिष्वनुपलब्धेः ॥ ५२ ॥

केशनखादिष्वनुपलब्धेः इति दृष्टान्तसूत्रम् ॥

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ॥५३॥

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः । संयोगिद्रव्यं केशनखादयो न तु शरीरावयवा इति, तस्मान्नायं प्रसङ्ग इति ।

इतश्च न शरीरगुणश्चेतना—

शरीरगुणवैधर्म्यात् ॥ ५४ ॥

शरीरगुणवैधर्म्यात् ॥ द्वये शरीरगुणा भवन्ति बाह्यकरणप्रत्यक्षा रूपादयोऽतीन्द्रियं च गुरुत्वं, विधान्तरं तु चेतना न बाह्यकरणप्रत्यक्षा सुसंवेद्यत्वात्, नातीन्द्रिया मनोविषयत्वात्, तस्मान्न शरीरगुण इति ।

न रूपादीनामितरेतरवैधर्म्यात् ॥ ५५ ॥

न रूपादीनामितरेतरवैधर्म्यात् ॥ यथेतरेतरविधर्माणो रूपादयो न शरीरगुणत्वमतिवर्तन्ते तथा रूपादिवैधर्म्ये सति चेतना शरीरगुणत्वं न हास्यति ।।

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥ ५६ ॥

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः । द्वये शरीरगुणा भवन्तीत्युक्तः सूत्रार्थः । रूपादीनामितरेतरवैधर्म्यमननुसंहितं चा-

---

(१) न—इति नास्ति ४ पु० ।

व्यावृत्तं चेति वैधर्म्यमात्रमन्वयव्यतिरेकि तु चेतनायाः शरीरगुणत्वसाधनं न भवतीति, तस्मादसममेतत् । ये हेतवोऽनेन प्रकरणेन(१) लभ्यन्ते तेषां प्रयोगः–न शरीरगुणश्चेतना निमित्तान्तराभावे विरोधिगुणादर्शने च सत्ययावद्द्रव्यभावित्वात् अप्सु औष्ण्यवदिति । शरीरव्यापित्वादिति तु न साधनं, किन्तु शरीरे चेतनां ब्रुवतो दोषोऽनेकचेतनत्वप्रसङ्गः । न शरीरगुणश्चेतना बाह्यकरणाप्रत्यक्षत्वात् सुखादिवदिति । अथेदं प्रकरणं निर्णीतार्थं कस्मात्पुनरारभ्यमिति ? बहुधा परीक्ष्यमाणं तत्त्वं(२) निश्चिततरं भवतीत्यत आरभ्यत इति । परीक्षिता बुद्धिरिति ॥

(इति बुद्धेः शरीरगुणव्यतिरेकप्रकरणम् ।)

मनोऽवसरप्राप्तं परीक्ष्यते तत् प्रतिशरीरमेकमनेकमिति वा विचारे—

ज्ञानायौगपद्यादेकं मनः ॥ ५७ ॥

ज्ञानायौगपद्यादेकं मनः ॥ अयुगपज्ज्ञानानि भवन्तीति प्रत्यक्षम् एतच्च मनस एकत्वं साधयति । कथमिति ? यदि बहूनि मनांसि स्युः प्रतीन्द्रियं मनसः सम्बन्ध इति युगपदनेकार्थसन्निधाने युगपदनेकज्ञानानि भवेयुः यत्त्वेकेन्द्रियग्राह्येष्वर्थेषु विज्ञानानामयुगपद्भावः तन्न मनस एकत्वे लिङ्गं अन्यतस्तद्भावात् अन्यथा हि करणत्वात्तद्भवतीत्युक्तम् ॥

न युगपदनेकक्रियोपलब्धेः ॥ ५८ ॥

न युगपदनेकक्रियोपलब्धेरिति । शेषं भाष्ये ।

अस्योत्तरद्वारकं सूत्रम्–

---

(१) प्रकरणे–पा० १ पु० । (२) परीक्षितं तु–पा० ४ पु० ।

अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात् ॥५९॥

अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात् । यथाऽलातस्य भ्रमतो विद्यमानः क्रमो नोपलभ्यते तथा बुद्धीनामाशुभावाद्विद्यमानः क्रमो नोपलभ्यते न चास्त्युभयपक्षसम्प्रतिपन्ना(१) युगपदुत्पत्तिर्यया बहुत्वं मनसः प्रतिपद्येमहीति ॥

यथोक्तहेतुत्वाच्चाणु(२) ॥ ६० ॥

यथोक्तहेतुत्वाच्चाणु(३) य एवैकत्वे हेतुर्मनस उक्तोऽनेनैवाणु मनोऽवसातव्यमिति ॥

(इति मनःपरीक्षाप्रकरणम् ।)

मनसः खलु भोः सेन्द्रियशरीरे वृत्तिः । शरीरे विचार्यमाणे(४) मन एव विचारितं भवत्यतः शरीरं पुनर्विचार्यते—किमयं शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यते आहोस्वित् सापेक्षैरिति ? विप्रतिपत्तेः संशयः—श्रूयते खल्वत्र विप्रतिपत्तिः ।

तत्रेदं तत्त्वं—

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ६१ ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा तत्पूर्वकृतं, तस्य फलं—तज्जनितौ धर्माधर्मौ, तयोरनुबन्ध—आत्मसमवेतयोरवस्थानं, विपाककालस्यानियमात्—अनियतो विपाककाल इहामुत्र जात्यन्तरे चेति । तेनावस्थितेन प्रयुक्तेभ्यो भूतेभ्यः तस्य शरीरस्योत्पत्तिर्न स्वतन्त्रेभ्यः । कस्मात् पुनः कर्म धर्माधर्मसञ्ज्ञ-

---

(१) न चास्योभयपक्षसम्प्रतिपन्ना—पा० ४ पु० ।

(२) यथोक्तनिमित्तत्वाच्चाणु—पा० ४ पु० ।

(३) यथोक्तनिमित्तत्वाच्चाणु—पा० ४ पु० ।

(४) विचारिते—पा० ४ पु० ।

कमुत्पत्तिसमकालं फलं न ददाति ?। क एवमाह न ददातीति विपाककालस्यानियमात्-यदा ऽशेषकारणसन्निधानं भवति, सन्निधाने ऽपि यदा कारणान्यप्रतिबद्धानि भवन्ति तदा ददात्येव(१) यदा पुनर्न ददाति तदा विपच्यमानकर्मातिशयप्रतिबन्धात्-यो विपच्यमानः कर्मातिशयो भवति यस्य धर्माधर्मसमाख्यासो(तो)ऽनुपभुक्तफलः तेन प्रतिबन्धात् विद्यमानमपि कर्म फलं न ददाति। यानि वा प्राण्यन्तराणि तस्य कर्मणः समानोपभोगानि तेषां विपच्यमानैः कर्माशयैः प्रतिबन्धात् न सर्वदा फलम्। यानि वा प्राण्यन्तराणि कर्मभागीनि तस्य कर्मणस्तत्कर्मभिः प्रतिबन्धात् तस्य वा कर्मणः सहकारिधर्माधर्मलक्षणं निमित्तं नास्तीत्यतः फलस्यानारम्भः, तस्य वा सहकारिणः प्रतिबन्धात्, सत्त्वान्तरकर्मणां वा सहकारिणां प्रतिबन्धात् न सर्वदा फलं धर्माधर्मौ प्रयच्छत इति। दुर्विज्ञेया च कर्मगतिः सा न शक्या मनुष्यधर्मणाऽवधारयितुम्। आकृतिमात्रं तूक्तम्।

कः पुनरत्र न्यायः कर्मतन्त्राणि भूतानि शरीरमारभन्ते न निरपेक्षाणीति ? अयं न्यायोऽभिधीयते-पुरुषविशेषगुणप्रेरितभूतपूर्वकं शरीरं कार्यत्वे सति पुरुषार्थक्रियासामर्थ्यात् यत् पुरुषार्थसमर्थं तत् पुरुषविशेषगुणप्रेरितभूतपूर्वकं दृष्टं यथा रथादि, पुरुषविशेषगुणेन प्रयत्नेन प्रेरितैर्भूतैरारभ्यमाणं पुरुषार्थक्रियासमर्थं दृष्टं तथा च शरीरम् तस्मादिदमपि सापेक्षैर्भूतैरारभ्यते सुखदुःखनिमित्तत्वात् घटादिवदिति। इतश्च कार्यत्वात् रथादिवत् बाह्यकरणग्राह्यत्वे सति(२) रूपादिमत्त्वात् घटादिवदेव॥ अत्र नास्तिक एवमाह—

(१) ददात्यपि—पा० ४ पु०।
(२) बाह्यकरणप्रत्यक्षत्वे सति—पा० ४ पु०।

भूतेभ्योमूर्त्युपादानवत् तदुपादानम् ॥ ६२ ॥

भूतेभ्योमूर्त्युपादानवत् तदुपादानम् ॥ यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्तयः सिकताशर्करागैरिकाञ्जनप्रभृतयः पुरुषार्थक्रियाकारित्वादुपादीयन्ते तथा शरीरसर्गोपीति पुरुषार्थक्रियासामर्थ्यादित्येतस्य हेतोरनैकान्तिकद्वारकं सूत्रम् । साधनपक्षे दृष्टान्तमात्रत्वादसिद्धम् ।

अथ पक्षः कर्मनिरपेक्षाणि भूतानि शरीरमारभन्ते पुरुषार्थक्रियासामर्थ्यात् सिकतादिवदिति ? एतच्च न—

न साध्यसमत्वात् ॥ ६३ ॥

साध्यसमत्वात् । यथैव शरीरसर्गः कर्मनिरपेक्षैर्भूतैरारभ्यत इति साध्यं तथा सिकतादीनामकर्मनिमित्तः सर्गः साध्यत इति । सिकतादीनामपि कर्मनिमित्तः सर्ग इत्येतस्मादेव हेतोः सिध्यतीति । यथा चोभयपक्षसम्प्रतिपन्नो रथादिर्दृष्टान्तः पुरुषविशेषगुणप्रेरितभूतपूर्वकोऽस्ति न तथा अकर्मनिमित्तसर्गपक्षे दृष्टान्तोऽस्तीति ।

विषमश्चायमुपन्यासः भूतेभ्योमूर्त्युपादानवदिति ?—

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ ६४ ॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥ मातापितृशब्देन लोहितरेतसी बीजभूते गृह्येते—तत्र पित्रोः पुत्रफलानुभवनीये कर्मणी सत्त्वस्य गर्भवासानुभवनीयं कर्म सह मातृगर्भाशये शरीरोत्पत्तिं प्रयोजयति । तत्र चोपपन्नं बीजानुविधानं, बीजानुविधानाच्च यज्जातीयौ तस्य पितरौ तज्जातीयः सम्भवतीति ॥

तथाहारस्य ॥ ६५ ॥

तथाहारस्य—उत्पत्तिनिमित्तत्वादिति प्रकृतम् । एतदपि सिकतादिभिर्वैधर्म्यमेवोच्यते—अशितपीतमाहारः तस्य पाका-

द्रसद्रव्यं निर्वर्त्यते तन्मातृशरीरे(१) उपचीयते, गर्भशरीरे चोपचितं(२) कललादिभावेनोपचीयमानं कर्मसापेक्षभूतैः पाण्यादिभावमापद्यते । यदि पुनः कर्मनिरपेक्षाणि भूतानि स्युः स्थाल्यादिगतमिवान्नं पच्येत, न त्विदमस्ति तस्मात् सापेक्षाणीति ॥

प्राप्तौ चानियमात् ॥ ६६ ॥

प्राप्तौ चानियमात् ॥ कर्मनिरपेक्षाणि भूतानि शरीरमारभन्त इति सर्वो दम्पत्योः संयोगः पुत्रादिफलकः स्यात् । कर्मसापेक्षेषु भूतेषूपपन्नो नियमाभाव इति ।

सर्वात्मभिः सम्बन्धात् साधारणविग्रहत्वप्रसङ्गः नियमहेत्वभावादिति चेत् ?—अथ मन्यसे शरीरं सर्वात्मभिः सम्बध्यते संयोगजेन च संयोगेन क्रियाजेन वा तत्र शरीरादिगतो न कश्चिन्नियमहेतुरिति येन शरीरमेव तस्यात्मनो व्यवतिष्ठेत, न च पुरुषगतो विशेषः कश्चिद्विद्यते येन शरीरमेकस्य पुरुषस्य उपभोगसाधनं भवेत् अस्ति च नियमः तस्माद्वक्तव्यो नियमहेतुरिति ? ।

अस्योत्तरद्वारकं सूत्रम्—

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥६७॥

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म ॥ येनैव कर्मणा शरीरमुत्पाद्यते तदेव संयोगं नियमयति अकर्मनिमित्ते तु शरीरसर्गे यथोक्तदोष इति ।

तत्रस्थता कुत इति चेत् ?—अथ मन्यसे यदि कर्म नियामकं शरीरसर्गस्याथ कर्मणि कुतो नियम इति ? न, स्वसंयोगोत्पत्तिनियमात्—यो यस्यात्मनः संयोगः तस्माद्यत् कर्मोपजायते

(१) तस्माच्च शरीरे च—पा० १ पु० । (२) उपहितं—पा० ४ पु० ।

तत्तस्य भवतीति । संयोगे कुतो नियम इति ? यथैव कर्मणि प-र्यनुयोगो न व्यावर्तते तथा संयोगेऽपीति ! न, मनोनियमहेतुत्वा-त्–यस्यात्मनो यन्मनस्तेन यः संयोगो जन्यते स तस्य भव-तीति । मनस्यपि तुल्यम् ?–मनसस्तर्हि सर्वात्मभिः सम्बन्धात् किं नियामकमिति ? कर्मैव–यन्मनो यदीयेन कर्मणा उपनिबद्धं तदीयं तद्भवतीति । सर्गादौ कथमिति चेत् ? सर्गादेरनभ्युपग-माददेश्यम्–अनादिः संसारः पूर्वाभ्यस्तसूत्रे प्रतिपादितमेतत् आदिमति संसार एष देश्यो नानादाविति ॥

एतेनानियमः प्रत्युक्तः ॥ ६८ ॥

एतेनानियमः प्रत्युक्तः । कः पुनरयं नियमः ? यथैक-स्यात्मनः शरीरं तथा सर्वात्मनामिति नियमः अन्यस्यान्यथा-ऽन्यस्यान्यथेत्यनियमो भेदो व्यावृत्तिर्दृष्टः शरीरभेदः प्राणि-नामनेकरूपः स च कर्मनिरपेक्षैर्भूतैः शरीरारम्भे न युक्तः, क-र्मणां भेदाच्छरीराणि भिद्यन्त इति युक्तम् । उपपन्नश्च तद्वि-योगः कर्मक्षयोपपत्तेः । द्वे शरीरस्य प्रकृती व्यक्ता चाव्य-क्ता च । तत्राव्यक्तायाः कर्मसमाख्यातायाः प्रकृतेरुपभोगात् प्रक्षयः प्रक्षीणे च(१) कर्मणि विद्यमानानि भूतानि न शरी-रमुत्पादयन्तीति उपपन्नोऽपवर्गः, कर्मनिरपेक्षेषु कस्य प्रक्षया-न्मोक्षमाणा अपवृज्येरन् भूतलक्षणायाः प्रकृतेरनुच्छेदात् ॥

तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गे ॥६९॥

अदृष्टकारितमिति चेत् ?–अथ मन्यसे अदृष्टकारिता शरी-रोत्पत्तिः–अदृष्टशब्देनादर्शनमुच्यते अदर्शनमदृष्टमिति, सर्गादौ प्रधानं पुरुषार्थेन हेतुना प्रवर्तते, तत्तु प्रवर्तमानं महदादिभा-

(१) प्रक्षीयमाणे च—पा० ४ पु० ।

वेन शरीरमुत्पादयति उत्पन्ने शरीरे द्रष्टा दृश्यं पश्यतीति । दृश्यं च द्वेधा विषयो नानात्वं (१) च प्रकृतिपुरुषयोः, दृष्टेन प्रधानं चरितार्थत्वान्न प्रवर्तत इति तदेवमदर्शनं शरीरसर्गहेतुस्तद्भावभावित्वादिति(२) ? एतस्मिन् खल्वदर्शने पुनस्तत्प्रसङ्गोऽपवर्गे—या च प्राक् प्रवृत्तेर्दर्शननिवृत्तिरदर्शनाभिमता या चोत्तरकालं निवृत्ते सर्गे नैतयोरदर्शनयोः कश्चिद्विशेषः । अदर्शननिमित्ता चेत् शरीरोत्पत्तिर्भवति तेन यथा प्राक् नानात्वदर्शनात् प्रधानं पुरुषार्थं प्रवर्तते तथाऽपवृक्तेऽपि प्रवर्तेत, न चैवमभ्युपगम्यते, तस्मान्नादर्शनं शरीरसर्गे कारणमिति । चरितार्थता विशेषो(३) भविष्यतीति न युक्तं (न) चरितार्थानामचरितार्थानां च भूतानां पुनरारम्भदर्शनात् आद्येन शरीरेण रूपाद्युपलब्धेः कृतत्वात् द्वितीयादिशरीरं शब्दाद्युपलब्धिसाधनं न स्यात्, भवति च शब्दाद्युपलब्धिसाधनं द्वितीयादिशरीरं, तेन गम्यते चरितार्थान्यपि भूतानि पुनः शरीरमारभन्त इति । पुरुषार्थेन च हेतुना पुनः शरीराण्यारभन्त इति—पुरुषार्थश्च पुरुषप्रधाननानात्वदर्शनं ?, तस्य चाकरणादनर्थकः शरीरारम्भो भवेदिति । दिदृक्षाविशेषोऽदर्शनमिति चेत् ?—अथ मन्यसे नादर्शनं दर्शनाभावः किन्तु दिदृक्षा दर्शनमित्युच्यते सा चापवृक्ते प्रधाने दिदृक्षा न भवतीति ?, न प्राक्प्रवृत्तेस्तदभावात्—यावत्प्रधानं महदादिभावेन न परिणमते तावद्दिदृक्षा नास्ति कथं कारणं भविष्यति प्रवृत्तेरिति । सर्वशक्तिमत्त्वात् तदाप्यस्तीति चेत् ?—अथ मन्यसे सर्वाः कारण-

(१) भेद इत्यर्थः ।   (२) स्तद्भावभावादिति—पा० १ पु० ।
(३) चरितार्थताविशेषो—पा० ४ पु० ।

शक्तयः प्रधाने विद्यन्ते तदिदमात्मभूताभिः कारणशक्तिभिः सर्वशक्तिमत्प्रधानं, सर्वशक्तिमत्त्वाच्च प्रागपि प्रवृत्तेः प्रधाने दिदृक्षाऽस्तीति ? न अपवर्गाभावप्रसङ्गात्—दिदृक्षावन्नानात्वदर्शनमप्यस्तीत्यपवर्गाभावः विद्यमाने च नानात्वदर्शने प्रधानस्य प्रवृत्तिरयुक्ता—यदा च नानात्वदर्शनं तदापि दिदृक्षा न व्यावर्तते न हि सदात्मानं जहातीति वः पक्षः । दिदृक्षायां च सत्यां कुतोऽपवर्गः ? दिदृक्षानानात्वदर्शने च विरुद्धे कथमेकस्मिन् काले भवतः । अज्ञानमदर्शनमिति च ब्रुवाणो विकल्पतः पर्यनुयोज्यः किं ज्ञानाभावोऽज्ञानमुत मिथ्याज्ञानमिति ? किं चातः ? यद्यभावोऽपवर्गो न प्राप्नोति प्राक् प्रवृत्तेरप्रवृत्ते च प्रधाने ज्ञानाभावस्य तुल्यत्वात् । अथ मिथ्याज्ञानं ? तन्न युक्तं, प्राक् प्रवृत्तेस्तदभावात् । कथमभावो ? बुद्धिधर्मकत्वात् अप्रवृत्ते च प्रधाने न बुद्धिरिति(१) कथं तद्धर्मोऽज्ञानं भविष्यतीति । सत्कार्यवादाभ्युपगमात् सर्वदास्तीति ब्रुवाणो मोक्षं बाधते । कथं ? तत्त्वज्ञानस्य सर्वदाभावात् तत्त्वज्ञानमिथ्याज्ञानयोश्च सहानवस्थानात् प्रवृत्तेस्तादार्थ्य(२)मयुक्तम् । न हि भवतां पक्षे किञ्चिदभ्द्भवति सच्चात्मानं जहातीति सर्वार्थानां सम्भवात् प्रधानं किमर्थं प्रवर्तेत इति वक्तव्यम् । अथाभिव्यक्तिनिमित्तां प्रवृत्तिं प्रतिपद्येथाः ? साप्यभिव्यक्तिः प्राक् प्रवृत्तेः सती आहोऽसतीति पूर्ववत्प्रसङ्गः । अथ प्रागनुपलब्धं पश्चादुपलभ्यते ? किमुपजातविशेषमुतानुपजातविशेषमिति । यदि विशेषोपजननात् पश्चादुपलभ्यते व्याहतं भवति । अनुपजातविशेषः कस्मात् प्राङ्नोपलभ्यत इति वक्तव्यम् ? सत्का-

(१) बुद्धिरस्ति—पा० पु० । (२) तादात्म्य—पा० ४ पु० ।

यत्वादाभ्युपगमे च स्फूर्ज्जतापि न विशेषोपजनः शक्यः प्रतिपादयितुम् । न च विशेषोपजनप्रत्याख्याने वस्तुन उपलब्ध्यनुपलब्धिविषयत्वं शक्यमवगमयितुम् । कर्मनिमित्ते तु सर्गे दर्शनार्थं भूतानि शरीरं पुरुषगुणप्रेरितान्यारभन्त इति युक्तम् । न ह्यनुत्पन्ने शरीरे द्रष्टा निरायतनो दृश्यं पश्यतीति ॥

अपरे त्वदृष्टं परमाणुगुणं वर्णयन्ति तेषामपि पुनस्तत्प्रसङ्गोऽपवर्ग इति परमाणुगुणस्य शरीरोत्पत्तिनिमित्तत्वात् पुनस्तत्प्रसङ्गोऽपवर्ग इति ॥

मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः(१) ॥७० ॥

मनःकर्मनिमित्तत्वाच्च संयोगाद्यनुच्छेदः । परमाणवः स्वगुणाददृष्टात् संहन्यन्ते संहताश्च द्व्यणुकादिप्रक्रमेण शरीरमुत्पादयन्ति तन्मनः स्वगुणाददृष्टादुपसर्पतीति । उपसर्पणहेतोरदृष्टस्य नित्यत्वात् किंकृतमपसर्पणमिति ?। कर्माशयक्षये कर्माशयादपसर्पणमिति युक्तं प्रायणम् । उभयहेतुर्मनोवृत्तिरदृष्टो भविष्यतीति न युक्तम् एकस्य जीवनप्रायणहेतुत्वानुपपत्तेः ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ ७१ ॥

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ नित्यत्वप्रसङ्ग इति प्रायणानुपपत्तिं ब्रूमः तदिदमुक्तमुपसर्पणहेतोरदृष्टस्यानित्यत्वादपसर्पणहेतोश्चादृष्टस्याभावात् यादृच्छिके तु प्रायणे प्रायणभेदो न स्यात् ॥

अणुश्यामतानित्यत्ववदेतत् स्यात् ॥ ७२ ॥

अणुश्यामतानित्यत्ववदेतत् स्यादिति परिहारं वर्णयन्ति । यथा किलाणोः श्यामता नित्याऽथापि संयोगेन प्रतिषिध्यते

(१) संयोगाद्युच्छेदः—पा० पु० ।

एवमणुमनसोरदृष्टः सम्यग्ज्ञानेन प्रतिषिध्यते इति ॥

एतच्च न—

नाकृताभ्यागमप्रसङ्गात् ॥ ७३ ॥

अकृताभ्यागमप्रसङ्गादिति ॥ अनुपपन्नप्रमाणस्याभ्युपगमोऽकृताभ्यागम इति सूत्रार्थः। यथाश्रुति वा सूत्रार्थः अकृतस्य कर्मण उपभोगप्रसङ्गादिति। एतत्सविस्तरोक्तं भाष्य इति ॥

आत्मा शरीरं करणमर्थो बुद्धिर्मनस्तथा।
यद्यथा वस्तु तत्त्वेन तत् तथेहोपपादितम् ॥

(इति प्रासङ्गिकमदृष्टनिष्पाद्यत्वप्रकरणम्।)

इति-औद्योतकरे न्यायसूत्रवार्त्तिके तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

तृतीयोऽध्यायः समाप्तः ॥

चतुर्थोऽध्यायः

मनसोऽनन्तरं(१) प्रवृत्तिरवसरप्राप्ता परीक्षितव्येत्यत आह—

प्रवृत्तिर्यथोक्ता ॥ १ ॥

प्रवृत्तिर्यथोक्ता—तथा परीक्षितेत्यर्थः सूत्रस्य । किं पुनः प्रवृत्तेः परीक्षितमिति ? यावद्धर्माधर्माश्रयं परीक्षितं सर्वा प्रवृत्तेः परीक्षा । तत्र प्रवृत्तिर्द्वेधा भवति—कारणरूपा कार्यरूपा च । कारणरूपा—प्रवृत्तिर्वाग्बुद्धिशरीरारम्भ इति । कार्यरूपा—धर्माधर्मसमाख्या(२) दुःखादिसूत्रे वर्णिता । तत्र कारणरूपायाः प्रवृत्तेर्विंशतिधा भेदः । कार्यरूपा तु प्रवृत्तिरेकद्रव्याऽभ्युदयस्य प्रतिनियमात् अवस्थिता विपाककालस्य नियमात्, आत्मसमवायात् गुणभूता, अनित्या प्रायणादिदर्शनात् । तदुक्तं विपच्यमानकर्माशयप्रक्षये प्रायणमिति । जन्मनः कारणम् पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति संसारापवर्गहेतुभूता तद्भावे संसारः तदभावे ऽपवर्ग इत्येवमाद्युक्तम् ॥

प्रवृत्तेरनन्तरास्तर्हि दोषा इत्यभिधीयन्तामित्यत आह—

तथा दोषाः ॥ २ ॥

तथा दोषाः ॥ उक्ता इति । बुद्धिसमानाश्रयत्वादात्मगुणाः संसारस्यानादित्वात् अनादिना प्रबन्धेन प्रवर्तन्ते सम्यग्ज्ञानाच्च

---

(१) अनन्तरा—इति क्वचित् । (२) समाख्याता—इति क्वचित् ।

मिथ्याज्ञाननिवृत्तौ निवर्तन्त इत्युत्पादनिरोधधर्मकाः। कार्यत्वे सतीन्द्रियान्तरप्रत्यक्षत्वात् अचाक्षुषप्रत्यक्षत्वाच्च गुणाः।

(इति प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्।)

प्रवर्तनालक्षणादोषा इत्युक्तं, तथा च मानादयः प्रवर्तयन्तीति लक्षणसाम्यात् तेऽप्युपसंख्येया इति ? नोपसंख्यायन्ते संगृहीतत्वात्। केन संग्रहः ? प्रवर्तनालक्षणा दोषा इत्यनेनैव। तेषां तु संगृहीतानां—

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ ३ ॥

तत् त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥ तेषां दोषाणां त्रयो राशयः—त्रयः पक्षाः सम्भवन्ति, रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः—क्रोधः ईर्ष्याऽसूया द्रोहोऽमर्ष इति। मोहपक्षः—मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति।

कामो मत्सर इत्यादि(१) किं पर्यायवचनम् आहोऽर्थान्तरभाव इति ? । किं चातः ? यदि पर्यायवचनं त्रयो राशय इत्ययुक्तम्—न हि पर्यायशब्देषु राशित्वं सम्भवति, न हीन्द्रशक्रपुरन्दरशब्दानां राश्यर्थः कश्चित् सम्भवति, अर्थान्तरभावे विशेषो वाच्य(२) इति ? । अर्थान्तरभाव इति ब्रूमः—तत्र कामः स्त्रीगताऽभिलाषः—या स्त्रीगता प्रार्थना सा काम इति। एवं चाहुः नाकामयमानो मण्डयत इति। अक्षीयमाणवस्तुपरित्यागेच्छा मत्सरः— यथा राजकीयोदपानान्मोदकं पा इति। अस्ववस्त्वादानेच्छा स्पृहा—यद्वस्तु स्वं न भवति तस्य या आदानेच्छा सा स्पृहा। पुनर्भवप्रतिसन्धानहे-

(१) इत्येवमादिकं–पा० ४ पु०। (२) वक्तव्य– पा० ४ पु०।

तुभूता तृष्णा—या पुनर्भवप्रार्थना सा तृष्णा(१) । प्रमाणविरुद्धपरद्रव्यापहारेच्छा लोभः—प्रमाणविरुद्धं परद्रव्यादानं कुर्वाणो लुब्ध इत्युच्यते । एषां च सामान्यं रागः सामान्येन विशेषः सङ्गृहीत इति । शरीरेन्द्रियाधिष्ठानवैकृत्यहेतुः क्रोधः—सञ्जाते यस्मिन् शरीरेन्द्रियाधिष्ठानानि विकृतानि भवन्ति स क्रोध इति । साधारणे वस्तुनि पराभिनिवेशप्रतिषेधेच्छा ईर्ष्या—यदपरिगृहीतं साधारणं वस्तु तस्मिन् यः पराभिनिवेशप्रतिषेधाभिप्रायः सेर्ष्या । परगुणाक्षमता असूया—या परगुणान् श्रुत्वा अक्षमतोपजायते सा असूया । परापकारेच्छा द्रोहः—अशक्तस्य या परम्प्रत्यपाचिकीर्षा(२) सा द्रोहः । कृतापकारासहिष्णुता अमर्षः—या कृतापकारस्याऽसहिष्णुता सोमर्षः । अस्य च द्वेषः सामान्यं तेन सङ्ग्रहः । विपर्ययज्ञानं मिथ्याज्ञानम् अतस्मिंस्तदिति प्रत्यय इति । संशयो विचिकित्सा किंस्विदिति । तथा(३) विद्यमानाविद्यमानगुणाध्यारोपेणात्मोत्कर्षप्रत्ययो मानः अहोऽहमस्मि(४) इति । शक्तस्य कर्तव्याकरणं प्रमादः—यतः शक्तः स्वकर्तव्यं न करोति स प्रमाद इति । अस्य च सामान्यं मोहः तेन संग्रह इति । अतस्त्रिराश्यान्नोपसंख्यायन्त इति ।

कुत एतत्? लोकतस्तदवगतेः(५)—लोकत(६) एते कामादयः एवम्भूतेष्वभिप्रायेषु प्रयुज्यन्ते नाभिप्रायमात्रे, न हि भिक्षां प्रार्थयमानः कामयत इत्येवं भवतीति । लक्षणस्य तर्हि अभेदात् त्रित्वमनुपपन्नमिति ?—एकं रागद्वेषमोहाः लक्षणाभेदात् रागभेदवदिदिति ? । नानुपपन्नं रागद्वेषमोहार्थान्तरभावात्—सत्यपि लक्षण-

(१) सा तृष्णेति—पा० ४ पु० । (२) चिकित्सा-पा० १ पु० ।
(३) यथा—पा० ४ पु० । (४) अहोऽहमस्मि-पा० १ पु० ।
(५) तदाधिगतेः—पा० ४ पु० । (६) लोके—पा० ४ पु० ।

स्याभेदे आन्तर्गणिकं भेदकं लक्षणमस्ति तदुपपत्तोस्त्रित्वम् । यथा रागलक्षणेन सङ्गृहीतानां कामादीनामिति । न च सामान्यमेकत्वे कारणं (तथा च) सामान्यस्यैवाभावः स्यात् यदि रागद्वेषमोहानामेकत्वं स्यात् समानमेतल्लक्षणमित्येतदेव न स्यादिति न ह्येकस्य समानं भवतीति । किं पुनरान्तर्गणिकं लक्षणमिति ? सक्तिलक्षणो रागः—यो विषयेष्वभिषङ्गः स रागः । अमर्षलक्षणो द्वेषः—असहिष्णुता दुःखस्य दुःखसाधनानां चेति द्वेषः । मिथ्याप्रतिपत्तिलक्षणो मोहः—यथाऽवस्थितविषये ऽयथाभावप्रतिपत्तिर्या एतच्च रागद्वेषमोहानां व्यवच्छेदकं लक्षणमात्मप्रत्यक्षमिति(१) ॥

नैकप्रत्यनीकत्वात्(२) ॥ ४ ॥

एकं रागद्वेषमोहा एकप्रत्यनीकत्वात् विभागवदिति—यथा विभाग एकेनैव संयोगेन विरुद्ध्यमान एको भवति तथा तत्त्वज्ञानेनैकेन विरुध्यन्ते रागादयस्तस्मादेकं रागादय इति ॥

व्यभिचारादहेतुः ॥ ५ ॥

व्यभिचारादहेतुः ॥ एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधिनः न चैषामेकत्वमिति अनैकान्तिकम् । एकयोनित्वादेकं रागादयः शब्दवदित्यप्यनेनैव प्रत्युक्तम् । एकयोनयो रूपादयो न चैषामेकत्वमिति ।

सति चार्थान्तरभावे—

तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः ॥ ६ ॥

तेषां मोहः पापीयान्—पापतमः—पापिष्ठ इति वा प्राप्ते द्वौ

(१) एकप्रत्यनीकभावात्—अधिकं ४ पु० ।
(२) प्रत्यनीकभावात्—पा० ४ पु० ।

द्वावभिप्रेत्य पापीयानित्युच्यते रागमोहयोर्मोहः पापीयान् द्वेष-मोहयोर्मोहः पापीयानिति । कस्मात् ? नामूढस्येतरौ भवतः मूढः कुप्यति मूढो रज्यते मूढो मुह्यतीति । तत्त्वज्ञानाच्च मोहनिवृत्तौ रागादिनिवृत्तिरित्येकप्रत्यनीकता—यस्मात् तत्त्वज्ञानान्निवृत्ते मोहे न रागद्वेषौ भवतः अत एकप्रत्यनीकता न पुनरनेकत्वादिति । एवं च कृत्वा दुःखादीनामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति सिध्यति ॥

प्राप्तस्तर्हि—

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ ७ ॥

निमित्तनैमित्तिकभावा(१)दर्थान्तरभावो(२) दोषेभ्यः । अदोषो मोहः दोषनिमित्तत्वाद्रूपादिवदिति ॥

न दोषलक्षणावरोधान्मोहस्य ॥ ८ ॥

न दोषलक्षणावरोधात(३) न कार्यकारणभावेन पदार्थानां तथाभावोऽतथाभावो वा सिध्यति, किन्तु लक्षणस्याभेदादिति दोषलक्षणं च मोहे ऽस्तीति दोषो मोहः ॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ ९ ॥

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः(४)तुल्यजातीयानामनेकविधविकल्पो निमित्त(५)नैमित्तिकभावो दृष्ट इति । यथा बुद्धिर्बुद्ध्यन्तरनिमित्तं बुद्धिजातीया चेति । तुल्या-

---

(१) निर्देशात्—पा० ४ पु० । (२) मोहान्तरभावो—पा० ४ पु० ।
(३) लक्षणावबोधात्—पा० ४ पु० ।
(४) मनेकप्रतिषेधः—पा० ४ पु० । (५) नित्य—पा० ४ पु० ।

दयो द्रव्यस्य निमित्तं द्रव्यजातीयाः । नोदनाभिघातसंयुक्तसंयोगाः संस्कारस्य गुणा इति ।

(इति दोषत्रैराश्यप्रकरणम् ।)

परीक्षिता दोषा इति दोषानन्तरं प्रेत्यभावस्तस्याऽसिद्धिरात्मनो नित्यत्वात्–नित्यआत्मा न जायते न म्रियते उभयं च प्रेत्यभावः मृत्वा पुनर्जन्म ।

तत्रायं सिद्धार्थानुवादः—

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ १० ॥

आत्मनित्यत्वे प्रेत्यभावसिद्धिः । नित्यः सन् आत्मा प्रैति जायते चेति । किमुक्तं भवति म्रियत इति ? पूर्वोत्पन्नाभिः शरीरेन्द्रियबुद्धिवेदनाभिर्वियुज्यत इति । किं चोक्तं जायत इति ? अपूर्वोत्पन्नाभिर्निकायविशिष्टाभिः शरीरेन्द्रियबुद्धिवेदनाभिः सम्बद्ध्यत इति । न पुनः(१)जन्ममरणे आत्मन्युत्पादनिरोधौ(२) नित्यत्वात्–नित्य आत्मेति(३) पूर्वाभ्यस्तमूत्रे प्रतिपादितम् । यस्य पुनरात्मन उत्पादनिरोधौ जन्ममरणे तस्याकृताभ्यागमकृतनाशदोषप्रसङ्ग(४) इत्युक्तम् शरीरदाहे पातकाभावादिति सूत्रं वर्णयद्भिः ॥

कथमुत्पत्तिरिति चेत ?–किंधर्मकात कारणात(५) शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यत इति ?–

व्यक्तात् व्यक्तानां प्रत्यक्षप्रामाण्यात् ॥ ११ ॥

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात । किं पुनर्व्यक्तमुपल-

(१) न—पा० ४ पु० । (२) आत्मन उत्पादनिरोधौ–पा० ४ पु० ।
(३) नित्य आत्मेत्येतत्—पा० ४ पु० । (४) दोषः–पा० ४ पु० ।
(५)किन्धर्मकारणात्–पा० ४ पु० ।

ञ्चिलक्षणप्राप्तं रूपादियुक्तं द्रव्यं तत्सामान्यात् परमाणुलक्षणमपि पृथिव्यादिकारणं व्यक्तमित्युच्यते। किं सामान्यं? रूपादि-योगः—रूपादिसामान्यात्(१) परमाणवो व्यक्ता इत्युच्यन्त इति रूपादियुक्तेभ्यः परमाणुभ्यो घटादि गवादि व्यक्तमुत्पद्यत इति। कः पुनरत्र न्यायः? प्रत्यक्षप्रामाण्यात्(२)—दृष्टा रूपादिमद्भ्यो रूपादिमतामुत्पत्तिरिति। नानेकान्तात्?—नायमेकान्तो रूपादिमद्भ्यो रूपादिमदुत्पत्तिरिति अरूपादपि संयोगाद्रूपादिमदुत्पद्यमानं घटादि गवादि दृष्टमिति?। न सूत्रार्थापरिज्ञानात्—नायं सूत्रार्थो रूपादिमत एव रूपादिमदुत्पद्यत इति, अपि तु रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थः। एवं च(३) नानेकान्तोऽस्ति न ह्यरूपायाः सामग्र्या रूपादिमत्कार्यमिति॥

न घटाद्घटानिष्पत्तेः॥ १२॥

न घटाद्घटानिष्पत्तेः। सजातीयात् सजातीयमुत्पद्यत इति मत्वा प्रतिषेधः। न सूत्रार्थापरिज्ञानादिति—न ब्रूमः सर्वं सर्वस्य कारणमिति, यश्च सर्वं सर्वस्य कारणत्वेनाभ्युपेयात् स एवं-प्रसवस्थेयो न घटाद्घट उत्पद्यमानो दृष्ट इति॥

अपि तु—

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः॥ १३॥

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः। यदपि तद्घटादि व्यक्तमुत्पद्यते तदपि व्यक्तादेव कपालादेः, व्यक्ताच्चोत्पद्यमानं घटादि न किञ्चिद्बाधत इति। रूपादिमत्सामग्रीपूर्वकं शरीरादि व्यक्तं(४) दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्घटवदिति। श-

(१) रूपादिसामान्ययोगात्—पा० ४ पु०।

(२) रूपादिमद्भ्यो—इत्यधिकम् ४ पु।

(३) सति—इत्यधिकम् ४ पु०।   (४) गवादि—पा० ४ पु०।

ब्दवद्वा वैधर्म्येण तदेतत्तत्त्वम् ॥

(इति प्रेत्यभावपरीक्षाप्रकरणम् ।)

अतः परं प्रावादुकानां दर्शनान्युपन्यस्य कानिचित् प्रतिषिध्यन्ते कानि चिदुपगम्यन्त इति ।

तत्र तावत्—

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् ॥१४॥

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात् । अभावाद्भावो जायत इति कस्यचिद्दर्शनं—तत्र न्यायं ब्रुवते—नानुपमृद्य प्रादुर्भावादिति, न किलाविनष्टे कारणे कार्यमुत्पद्यत इति । यथा बीजविनाशोत्तरकालमङ्कुरः प्रादुर्भवति । यदि बीजविनाशोऽङ्कुरकारणं नाभविष्यदविनष्टेऽपि बीजे ऽङ्कुरोऽभविष्यत् न चैवमस्ति(१) तस्माद्बीजविनाशोऽङ्कुर कारणमिति ॥

व्याघातादप्रयोगः ॥ १५ ॥

उपमृद्य प्रादुर्भवतीति व्याघातः—यदुपमृद्नाति तदस्ति—न ह्यसदुपमर्दकारणमिति । यच्च प्रादुर्भवति तन्नास्ति—न हि सदुत्पद्यत इति तदिदमुपमृद्नाति प्रादुर्भवति चेति व्याहतमुच्यते । को व्याघातः? सहासम्भवः। यद्युपमृद्नाति ? न जायते, अथ जायते? नोपमृद्नाति ॥

नातीतानागतयोः कारकशब्दप्रयोगात् ॥ १६ ॥

नातीतानागतयोः कारकशब्दप्रयोगात् । अतीते ऽनागते च कारकशब्दः प्रवर्तमानो दृष्टः—अतीते तावत् भिन्नं कुम्भमनुशोचति भिन्नस्य कुम्भस्य कपालानि, अभूत् कुम्भ इति । अनागतेऽपि—पुत्रो जनिष्यते जनिष्यमाणं पुत्रमभिनन्दति जनिष्यमाणस्य पुत्रस्य नाम करोति अजाताः पुत्राः स्थविरं

---

(१) न चैवमस्तीति नास्ति ४ पु० ।

तापयन्तीति बहुलं प्रयोगा भाक्ता इति । एवमयं प्रादुर्भविष्य-न्नङ्कुर उपमृद्नातीत्युच्यते । कः पुनरुपमर्दार्थः ? आनन्तर्यसाम-र्थ्यात् अनन्तरोत्पत्त्यर्थः यस्माद्बीजोपमर्दादनन्तरमयं प्रादुर्भव-तीति । अत्रोक्तं व्याघातादिति—नाजातेनोपमर्दो नोपमर्दा-समर्थो जायत इति । यदपीदमुच्यते अतीते ऽनागते च कारकशब्दाः प्रयुज्यन्त इति ? न प्रयोगो वार्यते, अपि त्वसतः कारणादुत्पत्तिर्न युक्तेति । कारकशब्दानां च त्रैका-लिकः प्रयोगः तदुक्तं प्रामाण्यसामान्यचिन्तायां वृक्षस्तिष्ठती-ति यथा । यत्पुनरेतत् आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भवती-त्युच्यत इति न बीजनाशोऽङ्कुरकारणमपि तु व्याकृत(१) व्यू-हानां बीजावयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तरमुत्पद्यत इति व्यूहान्तरादङ्कुर आविर्भवतीति । न चाविनष्टे पूर्वव्यू-हे व्यूहान्तरेण शक्यते भवितुमित्यानन्तर्यप्रादुर्भावार्थः । एवं च बीजोपादानं युक्तमिति ।

अस्य चार्थस्य ज्ञापनार्थं सूत्रम्—

न विनष्टेभ्योऽनिष्पत्तेः ॥ १७ ॥

न विनष्टेभ्योऽनिष्पत्तेः इति । न हि बीजविनाशोऽङ्कुरस्य कारणमपि तु बीजावयवाः पूर्वव्यूहपरित्यागेनेत्यर्थः सूत्रस्य(२)॥

क्रमनिर्देशादप्रतिषेधः ॥ १८ ॥

क्रमनिर्देशादप्रतिषेधः । पूर्वं बीजविनाशः पश्चादङ्कुरोत्प-त्तिरिति सूत्रार्थः । अभावश्चेदङ्कुरोत्पत्तिकारणं स्यात् सर्वं सर्व-स्मादुत्पद्येत अभावस्य निर्विशेषत्वात् । न हि शालिबीजे विनष्टे काचिदन्वयशक्तिरस्ति, अनन्वितं च कार्यं सर्वाभिः शक्ति-

(१) व्याकृत—व्याहृत—पा० ४ पु० । (२) नेति सूत्रार्थः—पा० ४ पु० ।

भिरुत्पद्येत, अन्वितं तु दृष्टं तस्मान्नाभावः कारणमिति सूत्रार्थः ।

(इति शून्यतोपादानप्रकरणम् ।)

अपर इदानीमाह—

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ॥ १९ ॥

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् । पुरुषोऽयं समीहमानो नावश्यं समीहाफलमाप्नोति तेनावगम्यते पराधीनं पुरुषस्य कर्मफलाराधनमिति(१)—निरपेक्षश्चेत् पुरुषः कर्मफलभोगे समर्थः स्यात् न कस्यचिदफला क्रिया भवेत् । न कश्चिद्दुःखं कुर्यादिति । उभयं च दृष्टं तस्मादीश्वरः कारणमिति ॥

न पुरुषकर्माभावे फलानिष्पत्तेः ॥ २० ॥

न पुरुषकर्माभावे फलानिष्पत्तेरिति । ईश्वरश्चेत् कारणं स्यात् पुरुषकर्मान्तरेणापि सुखदुःखोपभोगौ स्याताम्(२) ततश्च कर्मलोपोऽनिर्मोक्षश्च । ईश्वरस्यैकरूपत्वादेकरूपा क्रियेति । अथेश्वरः कारणभेदानुविधानेन कार्यं निर्वर्तयति यदपेक्षते तन्न करोतीति प्राप्तम् न हि कुलालो दण्डादि करोति एवं कर्मसापेक्षश्चेदीश्वरो जगदुत्पत्तिकारणं स्यात् कर्मणीश्वरो नीश्वरः स्यात् ॥

तत्कारितत्वादहेतुः ॥ २१ ॥

तत्कारितत्वादहेतुः । न ब्रूमः कर्माद्यनपेक्ष ईश्वरः कारणमिति । अपि तु पुरुषकर्म ईश्वरोऽनुगृह्णाति । कोऽनुग्रहार्थः ? । यद्यथाभूतं यस्य च यदा विपाककालः(३) तत्तथा तदा विनियुङ्क्त इति । यः पुनरीश्वरं कर्मानपेक्षं कारणत्वेन प्रतिपद्यते

(१) फलाबाधनमिति—पा० ४ पु० ।

(२) सुखदुःखोपभोगो भवेत्—पा० ४ पु० ।

(३) परिपाककालः—पा० ४ पु० ।

तस्यानिर्मोक्षत्वादिदोषः। सापेक्षे त्वीश्वरे यथोक्तो न दोषः। शेषं भाष्ये।

तत्कारितत्वादित्येवं ब्रुवता निमित्तकारणमीश्वर इत्युपगतं भवति। यच्च निमित्तं तदितरयोः समवायिकारणासमवायिकारणयोरनुग्राहकम्, यथा तुर्यादि तन्तूनां तत्संयोगानां चेति। ईश्वरश्चेज्जगतो निमित्तं जगतः साक्षादुपादानकारणं किम्? उक्तं पृथिव्यादि परमसूक्ष्मं परमाणुसंज्ञितं द्रव्य(व्यक्त)मिति। व्यक्तकारणाभ्युपगमे तु सति निमित्तविशेषविप्रतिपत्तौ ईश्वरप्रक्रिया– यस्मान्निमित्तकारणे विप्रतिपद्यन्ते केचित् कालं केचिदीश्वरं केचित् प्रकृतिमिति तदेवं निमित्तविशेषविप्रतिपत्तौ किं न्याय्यमिति?।

ईश्वर इति न्याय्यं तत्र हि प्रमाणानि अविघातेन प्रवर्त्तन्त इति। अस्तित्वासिद्धिरिति चेत्?—अथ मन्यसे सिद्ध ईश्वरस्यास्तित्वे कारणान्तरनिराकरणं निमित्तकारणाभावश्च साध्येत, तच्चासिद्धं तस्मादयुक्तमिति? न, अत एव तदुत्पत्तेः इति–येनैव न्यायेन ईश्वरस्य कारणत्वं सिध्यति तेनैवास्तित्वमिति, न ह्यविद्यमानं कारणमिति। कः पुनरीश्वरस्य कारणत्वे न्यायः? अयं न्यायोऽभिधीयते प्रधानपरमाणुकर्माणि प्राक्प्रवृत्तेर्बुद्धिमत्कारणाधिष्ठितानि प्रवर्त्तन्ते अचेतनत्वात् वास्यादिवदिति–यथा वास्यादि बुद्धिमता तक्ष्णा अधिष्ठितमचेतनत्वात् प्रवर्त्तते तथा प्रधानपरमाणुकर्माणि अचेतनानि प्रवर्तन्ते तस्मात् तान्यपि बुद्धिमत्कारणाधिष्ठितानीति(१)।

तत्र प्रधानकारणिकास्तावत् पुरुषार्थमधिष्ठायकं प्रधानस्य वर्णयन्ति–पुरुषार्थेन प्रयुक्तं प्रधानं प्रवर्त्तते, पुरुषार्थश्च द्वेधा भवति

(१) बुद्धिमता तक्ष्णाधिष्ठितानि–पा० ४ पु०।

शब्दाद्युपलब्धिर्गुणपुरुषान्तरदर्शनं चेति, तदुभयं प्रधानप्रवृत्तेर्विना न भवतीति? न, प्राक् प्रवृत्तेस्तदभावात्—यावत् प्रधानं महदादिभावेन न परिणमते तावन्न शब्दाद्युपलब्धिरस्ति न गुणपुरुषान्तरोपलब्धिरिति हेत्वभावात् प्रधानप्रवृत्तिरयुक्ता। अथाऽस्ति, नाऽसदात्मानं लभते न सन्निरुध्यत इति? एवं च सति विद्यमानः पुरुषार्थः प्रधानं प्रवर्तयतीति न पुरुषार्था(र्थ) प्रधानस्य प्रवृत्तिः—न हि लोके यद्यस्य भवति स तदर्थं पुनर्यतत इति। सततं च प्रवृत्तिः प्राप्नोति कारणस्य सन्निहितत्वादिति—पुरुषार्थः प्रवृत्तेः कारणमिति पुरुषार्थस्य नित्यत्वात् सततं प्रवृत्त्या भवितव्यमिति। अथ विद्यमानोऽपि न प्रवर्तयति? न तर्हि पुरुषार्थः कारणमिति यस्याभावात् प्रधानं न प्रवर्तते यस्य च भावात् प्रवर्तते तत्कारणमिति। अथ विद्यमानः प्रतिबन्धान्न प्रवर्तयति? प्रतिबन्धापगमस्याशक्यत्वात् सततमप्रवृत्तिः—यत्तत्र प्रतिबन्धकारणं पुरुषार्थस्य तस्यापगमः कर्तुमशक्यः न सदात्मानं जहातीति प्रतिबन्धकस्य नित्यत्वान्नित्यमप्रवृत्त्या भवितव्यम्। यदा भवन्तः सत्त्वरजस्तमसां साम्यावस्थां प्रकृतिं वर्णयन्ति सा कुतो निवर्तत इति वक्तव्यम्?—न चानिवृत्तायां साम्यावस्थायां वैषम्येण शक्यं भवितुम्। अथाङ्गाङ्गिभावस्यानियमाद्वैषम्यं भवति इति? अत्रापि भवन्तं पर्यनुयुञ्ज्महे—कथं साम्येनावस्थितमधिकं हीनं च भवति? नापूर्वोपचयो विद्यते न पूर्वहानमस्तीति। यांश्च शब्दादीन् प्रागनुपलब्धस्वरूपान् पुरुष उपलभते बुद्धिरुपलम्भयति ते किमुपजातविशेषा उतानुपजातविशेषा इति?। यद्युपजातविशेषा उपलभ्यन्त इति? व्याहतं भवति नासदात्मानं लभत इति। अथानुपजातविशेषा एवोपलभ्यन्ते? तथाप्यनिवृत्तो व्याघातः प्रधानं पुरुषार्थः प्रवर्तयतीति। सो-

ऽयं प्रधानवादो यावद्यावद्विचार्यते तावत्तावत् प्रमाणवृत्तं बाधत इति ।

ये परमाणून् पुरुषकर्माधिष्ठितान् जगतः कारणत्वेन वर्णयन्ति तान् प्रतीदमुच्यते परमाणवः प्रवर्तन्त इति सततं प्रवृत्त्या भवितव्यम् । अथ कालविशेषापेक्षाः प्रवर्तन्ते ? परमाणुभिः कालो व्याख्यातः—यथा परमाणवो बुद्धिमन्तमधिष्ठातारमपेक्षन्ते तथा कालोऽपीति, न हि तत्राचेतनत्वं निवर्तत इति । क्षीरादिवदचेतनस्यापि प्रवृत्तिरिति चेत् ?—यथा अपत्यभरणार्थं क्षीरादेरचेतनस्यापि प्रवृत्तिरेवं परमाणवोऽप्यचेतनाः पुरुषार्थं प्रवर्तिष्यन्त इति ? । तन्न युक्तम्, साध्यसमत्वात्—यथैव परमाणवः स्वतन्त्राः प्रवर्तन्त इति साध्यं तथा क्षीराद्यचेतनं स्वतन्त्रं प्रवर्तत इति । यदि क्षीरादि स्वतन्त्रं प्रवर्तेत मृतेष्वपि प्रवर्तेत, न तु प्रवर्तते, अतोऽवगम्यते बुद्धिमत्कारणाधिष्ठितं तदपि । न चायं हेतुः तस्मान्निवर्तते(१) एवं यावद्यावदचेतनं प्रवर्तते (तत्) सर्वं तत् चेतनाधिष्ठितमिति(२) ।

अयमपरो हेतुः बुद्धिमत्कारणाधिष्ठितं महाभूतादि(३) व्यक्तं (मिति)सुखदुःखादिनिमित्तं भवति रूपादिमत्त्वात् तुर्यादिवदिति । धर्माधर्मौ बुद्धिमत्कारणाधिष्ठितौ पुरुषस्योपभोगं कुरुतः करणत्वाद् वास्यादिवदिति । आत्मैवाधिष्ठाता धर्माधर्मयोर्भविष्यतीति चेत् ?—यस्य तौ धर्माधर्मौ स एवाधिष्ठाता भविष्यतीति न युक्तम् ? प्राक् कार्यकरणोत्पत्तेः तदसम्भवात्—यावत् कार्यकरणसङ्घातो नोपजायते पुरुषस्य तावदयमज्ञः

(१) न प्रवर्तते—पा० ४ पु० ।
(२) बुद्धिमत्कारणाधिष्ठितमिति—पा० ४ पु० ।
(३) महाभूतानि—पा० ४ पु० ।

उपसन्धातापि उपलभ्यानपि तावद्रूपादी(१)न्नोपलभते कुतोऽनुपलभ्यौ धर्माधर्मावुपलप्स्यत इति। यदि पुरुषः स्वतन्त्रः प्रवर्तते न दुःखं कुर्यात् न हि कश्चिदात्मनो दुःखमिच्छतीति। यश्चात्मनो(ऽङ्गो)पघातं शिरश्छेदादि वा करोति(२) तद्वैकल्ये प्रायणे(३) वा हितबुद्धिः प्रवर्तते इति। यदि पुनर्धर्माधर्माभ्यामेवाधिष्ठिताः परमाणवः प्रवर्तेरन्? न युक्तमेतदचेतनत्वात्—न हि किञ्चिदचेतनं स्वतन्त्रमधिष्ठायकं दृष्टमिति। अभ्युपगम्यापि च धर्माधर्मयोः परमाणुप्रवृत्तिसामर्थ्यं? न करणस्य केवलस्य क्रियानिर्वृत्तावसामर्थ्यात्—न हि करणं केवलं क्रियां निर्वर्तयदुपलभ्यते। अथ परमाण्वपेक्षाभ्यां(४) धर्माधर्माभ्यां क्रियते? तदपि न युक्तमदृष्टत्वात्—न हि कर्मकरणाभ्यां क्रियां जन्यमानां क्वचिदपि पश्याम इति। आत्मा कर्ता भविष्यतीति? उक्तमेतदज्ञत्वादिति। अकारणोत्पत्तिर्भविष्यतीति? न युक्तमदृष्टत्वादिति। न चान्या गतिरस्ति, तस्माद्बुद्धिमत्कारणाधिष्ठिताः परमाणवः कर्माणि च प्रवर्तन्त इति।

क्रियानावेशादकारणमिति चेत्? अथ मन्यसे ये खलु कर्तारो भवन्ति ते क्रियाविष्टाः कुलालादय इति, क्रियारहितश्चेश्वरस्तस्मादकारणमिति?, न विकल्पानुपपत्तेः—ईश्वरो निष्क्रिय इति कां क्रियामधिकृत्योच्यते?। द्वयी हि नः क्रिया उत्क्षेपणादिका चाख्यातशब्दवाच्या च। यद्याख्यातशब्दवाच्यामधिकृत्योच्यते? तदाऽसिद्धो हेतुः स्वातन्त्र्याभ्युपगमात्—स्वातन्त्र्यं हि भ-

---

(१) विषयान्—इति अधिकम् ४ पु०।

(२) सोऽपि—अधिकम् ४ पु०।

(३) प्रधाने—पा० ४ पु०।

(४) परमात्मापेक्षाभ्यां—पा० ४ पु०।

गत्वाति नित्यमस्ति । किं पुनः स्वातन्त्र्यम् ? अन्यकारकाप्रयोज्यत्वमितरकारकप्रयोक्तृत्वं च, तदुक्तं कारकानि वर्णयद्भिरिति । अथोत्क्षेपणादिकामधिकृत्योच्यते निष्क्रिय इति ? तदानेकान्तः—क्रियावच्च कारणं दृष्टं निष्क्रियं चेति—कदाचिद्‍द्रव्याणि उपरतक्रियाणि द्रव्यमारभन्ते संयोगात् निवृत्ते कर्मणि संयोगोपकरणानि द्रव्याणि द्रव्यमारभन्त इति निष्क्रियाणामारम्भः । यदा च युगपद्बहूनि द्रव्याणि संहन्यन्ते तदाऽसाधारणकार्यव्यावृत्तेभ्यः संयोगेभ्यः एकमेव द्रव्यमुत्पद्यते । एकावयवविभागे तु द्रव्यनिवृत्तौ शेषाणि द्रव्यान्तराणि द्रव्यमारभन्त(१) इति निष्क्रियाणामारम्भः । कानिचित् पुनः क्रियावन्त्यारभन्ते यदान्यतरकर्मजात् संयोगान्निवृत्ते कर्मणि इतरस्मिन् द्रव्ये कर्मनिवृत्तिसमकालमेव द्रव्यमुत्पद्यते तदा क्रियावता द्रव्येणारम्भात् क्रियावतामारम्भः विरोधश्चोत्क्षेपणादिकायाः क्रियायाः अनभ्युपगमादिति ।

न कारणमीश्वरः विकल्पानुपपत्तेः—कर्ता चेदीश्वरः किं सापेक्षः करोति उत निरपेक्ष इति ? किं चातः ? यदि सापेक्षः ? येन करोति तस्याकर्ता, एवमन्यत्रापि प्रसङ्गः तदपि साधनं येन करोति तस्याकर्तेति ? । अथायं किञ्चिदनपेक्ष्य करोति ? तद्वदन्यत्रापि प्रसङ्गः—अथायं सर्वमनपेक्ष्य करोति(२) एवमपि पुरुषकर्माफलं भवेत् अनिर्मोक्षश्च प्रसज्येत यश्चाकर्मनिमित्ते(३) सर्गे दोषः(४) स इहापि प्रसज्यत इति ? निरपेक्षकर्तृत्वस्यानभ्युपगमात् धर्माधर्मविफलत्वादिदोषो नास्ति न चाकर्मनिमित्ते सर्गे दोष इति । येन करोति तस्या-

(१) मुत्पादयन्त इति—पा० ४ पु० । (२) तस्याकर्तेति—पा० ४ पु० ।
(३) यस्याकर्मनिमित्ते—पा० ४ पु० । (४) उक्त—इत्यधिकम् ४ पु० ।

करोति चेत् ? नानेकान्तात्–नायमेकान्तोऽस्ति यो येन करोति स तन्न करोतीति यथाऽनेकशिल्पपर्यवदातः पुरुषः करणान्तरोपादानो वास्यादि करोति, वास्याद्युपादानो दण्डादि(१) करोति, तदुपादानो घटादि, न च पर्यायकर्तृत्वे सति अकर्तृत्वं, तथेश्वरोऽपि धर्माधर्मोपादानः शरीरसुखदुःखादि, आत्ममनःसंयोगशुद्धाशुद्धाभिसन्धिसाधनश्च धर्माधर्मौ, सुखदुःखस्मृत्यपेक्षः तत्साधनाद्यपेक्षश्च शुद्धमशुद्धं चाभिसन्धिमिति । यदा करोति तदा साधनस्याकर्तेति चेत् ?–अथ मन्यसे यदाऽयं साध्यं (यत्) किञ्चिद्दृष्टं निर्वर्तयति तदा येन साधयति तस्याकर्ता प्रसज्यत इति ? । नैतदेवं, न ब्रूमः सर्वानर्थानयमेकस्मिन् काले करोतीति, अपि तु पर्यायेण, पर्यायकर्तृत्वे चायमदोषः । यदादौ करोति तस्यासाधनोत्पत्तिरिति चेत् ?–अथ मन्यसे यदि शरीरादिकर्तृत्वं धर्माधर्माद्यपेक्षस्य, अथ यदादौ करोति(२) कथं तत् ?, आदेरनभ्युपगमाददेश्यमेतत्–अनादिः संसार इति प्रतिपादितमेतत्, धर्माधर्मसाफल्यं चैवम्–यदि चानादिः संसारः सापेक्षश्च कर्ता, एवं प्राण्यन्तरसमवायिनां धर्माधर्माणां साफल्यम् ।

अथायमीश्वरः कुर्वाणः किमर्थं करोति ?—लोके हि ये कर्तारो भवन्ति ते किञ्चिदुद्दिश्य प्रवर्तन्ते इदमाप्स्यामि इदं हास्यामि चेति, न पुनरीश्वरस्य हेयमस्ति दुःखाभावात् नोपादेयं वशित्वात् ? । क्रीडार्थमित्येके—एके तावद् ब्रुवते क्रीडार्थमीश्वरः सृजतीति ? नन्वेतदयुक्तम् क्रीडा हि नाम रत्यर्थं भवति विना क्रीडया रतिमविन्दताम्, न च रत्यर्थी भगवान् दुःखाभावादिति । दुःखिनश्च सुखोपगमार्थं क्री-

(१) घटादि—पा० ४ पु० ।
(२) तस्यासाधनात्—इत्यधिकम् ४ पु० ।

डन्ति । विभूतिख्यापनार्थमित्यपरे—जगतो वैश्वरूप्यं ख्यापनीय-मित्यपरे मन्यन्ते । एतदपि तादृगेव—न हि विभूतिख्यापनेन कश्चिदतिशयो लभ्यते न चास्याख्यापनेन किञ्चिद्धीयत इति । किमर्थं तर्हि करोति? तत्स्वाभाव्यात् प्रवर्तत इत्यदुष्टम्—यथा भूम्यादीनि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तत इति प्रवृत्तिस्वभावकं तत्त्वमिति ।

तत्स्वाभाव्यात् सतत प्रवृत्तिः(१) इति चेत् ?—अथ मन्यसे यदि प्रवृत्तिस्वभावकं तत्त्वं प्रवृत्तिनिवृत्ती न प्राप्नुतः न हि प्रवृत्तिस्वभावके तत्त्वे निवृत्तिर्युज्यत इति, क्रमेणोत्पत्ति(२)र्न प्राप्नोति तत्त्वस्यैकरूपत्वात् इदमिदानीं भवतिदमिदानीं न भवतीति(३) न युक्तम्—न ह्येकरूपात् कारणात् कार्यभेदं पश्याम इति ? । नैष दोषः बुद्धिमत्त्वेन विशेषणात् बुद्धिमत्तत्त्वमिति प्रतिपादितम्—बुद्धिमत्तया च विशिष्यमाणं सापेक्षं च न सर्वदा प्रवर्तते—न सर्वमेकस्मिन् काले उत्पादयति यस्य कारणसान्निध्यं तद्भवति यदसान्निहितकारणं तन्न भवति, न च सर्वस्य युगपत्कारणसान्निध्यमस्ति, अतः सर्वस्य युगपदुत्पादो न प्रसक्तः, स खलु प्रवर्तमानो धर्माधर्मयोः परिपाककालमपेक्षते कारणान्तरोत्पादं तद्भागिनां च सत्त्वानां तत्र(४) सन्निधानं तद्भागिसत्त्वधर्माधर्मपरिपाकं च तदप्रतिबन्धं चेति ।

यत् तदीश्वरस्यैश्वर्यं किं तन्नित्यमनित्यमिति ? । यद्यनित्यं तस्य कारणं वाच्यं(५) यस्य चानित्यमैश्वर्यं तस्य कारणभेदो भवति अणिमादेः एवमन्येषामपीत्यनेक ईश्वरः प्रसज्यत इति ? ।

---

(१) प्रवर्ततइति—पा० ४ पु० । (२) क्रमेण चोत्पत्ति—पा० ४ पु० ।
(३) माभूदिति—पा० ४ पु० । (४) तत्र तत्र—पा० ४ पु० ।
(५) वक्तव्यम्—पा० ४ पु० ।

अथानेकत्वे किं बाध्यत इति ? एकस्मिन् वस्तुनि व्याहतकामयोरीश्वरयोः प्रवृत्तिर्न प्राप्नोति अथैकमितर अतिशेते ? योऽतिशेते स ईश्वरः नेतरः(१) इति। अथ नित्यमैश्वर्यं ? धर्मवैयर्थ्यं न तद्धर्माद्भवतीति ?। नित्यमिति ब्रूमः। न च धर्मवैयर्थ्यं दोषः तस्य, यो धर्म ईश्वरे नासौ तत्रैश्वर्यं करोति, किन्तु प्रत्यात्मवृत्तीन् धर्माधर्मसञ्चिचयाननुगृह्णाति, न चेश्वरे धर्मोस्तीत्यचोद्यमेतत्।

तत्स्वभावानवधारणात् सन्देहः ईश्वरः किं द्रव्यमाहो गुणादीनामन्यतम इति ?। द्रव्यं बुद्धिगुणत्वाद्द्रव्यान्तरवद्। बुद्धिमत्त्वात् तर्हि आत्मान्तरमिति ? नात्मान्तरं गुणभेदात्—तद्यथा गुणभेदे सति पृथिव्यादयो नात्मानः तथा गुणभिन्न ईश्वरस्तस्माद्सावपि नात्मान्तरमिति। कः पुनरेतस्य भेदः ?। एके तावद् ब्रुवते धर्मज्ञानवैराग्यैश्वर्याण्यतिशयवन्ति तस्मिन्निति नित्यत्वमतिशयः। एतत्तु न बुद्ध्यामहे यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसद्भावो न चैवं धर्मादिनित्यत्वे प्रमाणमस्ति, न चाप्रामाणिकं प्रतिपत्तुं शक्यम, अतिशयस्तु बुद्धिनित्यत्वं गुणभेदः तत्र हि नित्या बुद्धिः सङ्ख्यादयश्च सामान्यगुणाः षड्गुण(२) आकाशवदीश्वर इति। अथास्य बुद्धिनित्यत्वे किं प्रमाणमिति ?। नन्विदमेव—बुद्धिमत्कारणाधिष्ठिताः परमाणवः प्रवर्तन्त इति ? बुद्धिमत्तायामेतत् साधनं सा पुनर्नित्येति कुतः ? प्रत्यर्थानियमासम्भवात्—ये खलु प्रत्यर्थनियता बुद्धिभेदास्ते शरीरादिकारणसन्निधाने सति भवन्ति, न त्वियं(३) प्रत्यर्थनियता युगपदनेककार्योत्पत्तिदर्शनात् यथा स्थावर-

(१) इतरो नेश्वर इति—पा० ४ पु०।

(२) न चाप्रामाणिकं शक्यम—इत्यधिकम् ४ पु०।

(३) न चेयं—पा० ४ पु०।

भेदस्यानेकस्य युगपदुत्पाद इति । स च प्रत्यर्थनियतबुद्धिभेदेऽपीश्वरस्य न युक्तः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एव तस्य गुणाः ।

अथ बुद्धिमत्तयेश्वरस्य(१) शरीरयोगमपि प्रतिपद्यते ? तेनापि प्रतिपद्यमानेन शरीरादयो नित्या अनित्या वा अवश्यमेषितव्याः । यद्यनित्या ? धर्माधर्मसद्भावोऽभ्युपेयः तदभ्युपगमे च तत्तन्त्रत्वादीश्वरो नेश्वरः स्यात् । अथ नित्यान् शरीरादीन् कल्पयामि ? एवमपि दृष्टविपरीतं कल्पितं भवति दृष्टविपर्ययं प्रतिपद्यमानेन बुद्धेर्नित्यत्वं(२) प्रतिपत्तव्यम् । अथ सन्तानवर्तिनीमनेकां बुद्धिमीश्वरे प्रतिपद्यसे ? एवमपि न युगपदुत्पादः स्थावरादीनां(३) प्राप्नोति । अथ (ताः) सन्तानवर्तिन्यः सर्वार्थाः(४) बुद्धयो भवन्ति ? एवमपि दृष्टविपरीतं कल्पितं भवति । एवं च कल्पयता बुद्धिनित्यत्वमेव प्रतिपत्तव्यम् । एता वच्चैतत् स्यात् नित्या वा सन्तानवर्तिनी (वा सन्तानवर्तिनी) न युक्ता । यदि गुणभेदाद्भेदः यदभिन्नगुणं तदेकं प्राप्नोति यथा दिक्कालाविति ? नानेकान्तात्—गुणभेदान्नानात्वं ब्रूमः न पुनर्गुणाभेदादेकत्वमिति—तथाहि अभिन्नगुणानां घटादीनां नानात्वमिति, दिक्कालयोर्गुणाभेदेऽपि कार्यभेदान्नानात्वमिति । न च बुद्धिमत्तया विनेश्वरस्य जगदुत्पादो घटत इति । सा च बुद्धिः सर्वार्थाऽतीतानागतवर्तमानविषया प्रत्यक्षा नानुमानिकी—न तत्रानुमानं नागम इति, ज्ञाननित्यत्वाच्च न संस्कारः—नित्यं विज्ञानमीश्वरस्येति न तत्र संस्कारो विद्यत इति संस्का-

(१) बुद्धिमन्तमीश्वरस्य—पा० ४ पु० ।
(२) बुद्धेरेव—पा० ४ पु० । (३) व्यवस्थादीनां—पा० ४ पु० ।
(४) सन्तानवर्त्तिन्योऽर्थाः—पा० ४ पु० ।

राभावादबुद्धिनित्यत्वाच्च न स्मृतिः, स्मृत्यभावाच्च नानुमानं, न दुःखमधर्मस्याभावात, अत एव न वैराग्यमिति दुःखाभावान्न विरज्यत इति, अत एव न द्वेषो दुःखाभावादिति। इच्छा तु विद्यते ऽक्लिष्टाऽव्याहता सर्वार्थेषु यथा बुद्धिरिति।

अथ किमयं बद्धो मुक्त इति ?। न बद्धो दुःखाभावादेव, अबद्धत्वान्न मुक्त इति–बन्धनान् मुच्यत इति, न च भगवति बन्धनमस्तीति अतो न मुक्त इति। आत्मान्तराणामसम्बन्धाद्-धिष्ठातृत्वमनुपपन्नमिति चेत् ?–अथ मन्यसे ऽर्थान्तरसमवायिनो ये धर्माधर्मास्ते न साक्षादीश्वरेण सम्बद्ध्यन्ते न पारम्पर्येण नचाऽसम्बद्धमधिष्ठातुं शक्यते न चानधिष्ठितयोर्धर्माधर्मयोः प्रवृत्तिर्युक्तेति ?। तच्च न, अजसम्बन्धोपपत्तेः—अजः सम्बन्ध आत्मान्तराणामित्येक इच्छन्ति न चैतदिह प्रतिषिध्यत इति अप्रतिषेधादुपात्तः स इति। ते त्वजं सम्बन्धं प्रमाणतः प्रतिपादयन्ति व्यापकैराकाशादिभिः सम्बद्ध ईश्वरः मूर्तिद्द्रव्यसम्बन्धित्वात् घटवदिति–यथा घटादि मूर्तिमता घटादिना सम्बन्धित्वेन व्यापकैराकाशादिभिः सम्बद्ध्यते तथेश्वरोऽपि मूर्तिमत्सम्बन्धीति तस्मादयमपि व्यापकैराकाशादिभिः सम्बद्ध्यत इति।

स पुनरात्मेश्वरसम्बन्धः किं व्यापकोऽव्यापकोवा इति ? अर्थाभावादव्याकरणीयः प्रश्नः। आत्मेश्वरसम्बन्धोऽस्तीत्येतदेव(१) शक्यते वक्तुम्। स पुनरीश्वरात्मानौ व्याप्नोति न व्याप्नोतीति न व्याक्रियते। ये ऽप्यजं संयोगं नेच्छन्ति तेषामप्यणुमनःसंयोगोपपत्तेरस्ति सम्बन्धः यानि प्रत्यात्ममनांसि तानि सर्वाणीश्वरसम्बद्धानीत्यतः सम्ब-

(१) इत्येव च—पा० ४ पु०।

द्धसम्बन्धोपपत्तेरात्मान्तराण्यधितिष्ठति यथाऽऽत्महस्तसंयोगप्रय-त्नाभ्यां हस्ते कर्म भवति उत्पन्नकर्मको हस्तः सन्दंशादिना सम्बद्ध्यते तत्सम्बन्धादयःपिण्डाद्यधितिष्ठति । यदि तर्हि स-र्गादावीश्वरस्य कारणत्वे ऽयं न्यायोऽभिहितः इदानीमीश्वरो न कारणमिति प्राप्तम् ? इदानीमपि स एव न्यायः—मृतशरीरिणां यौ धर्माधर्मौ तौ बुद्धिमत्कारणाधिष्ठिताविति समानो न्यायः। बुद्धिमत्कारणाधिष्ठितानि स्वासु स्वासु धारणादिक्रियासु म-हाभूतानि वाय्वन्तानि प्रवर्तन्ते अचेतनत्वाद्वास्यादिवत् । एवं कार्यत्वात् तृणादीनि पक्षीकृत्य दर्शनस्पर्शनविषयत्वादिति व-क्तव्यम् । एवं यत्र यत्र विप्रतिपत्तिः कार्यत्वं च तत्तदनेनै-व न्यायेनानेन दृष्टान्तेन वास्यादिना पक्षयित्वा साधयित-व्यम् । आगमाच्च—आगमादपि श्रूयते ईश्वरः कारणम्—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥
यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥

इति ईश्वरोपादानताप्रकरणम् ।

अपर इदानीमाह—

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्श-नात् ॥ २२ ॥

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् । यथा कण्टकतैक्ष्ण्यादि निर्निमित्तं च उपादानवच्च तथा शरीरादिसर्गोऽपि । तदिदं दृष्टान्तसूत्रम् । कः पुनरत्र न्यायः ? अनिमित्ता रचनाविशेषाः शरीरादयः संस्थानवत्त्वात्

कण्टकादिवदिति । न, अनुपलभ्यनिमित्तानामनुमानतो निमित्तोपलब्धेः ?—यस्य निमित्तं प्रत्यक्षतो नोपलभ्यते तस्यानुमानतः प्रत्येतव्यम्, कुतः ? निमित्तवद्‌द्रव्यसामान्यात्—यानि खलु निमित्तवन्ति द्रव्याणि संस्थानविशेषवन्ति तानि घटादीनि, संस्थानविशेषवच्चशरीरं कण्टकादयश्च, तस्मात् निमित्तवन्त इति ? । उक्तं चात्र । किमुक्तम् ?पूर्वकृतफलानुबन्धात् तदुत्पत्तिरिति । न चोभयपक्षसम्प्रतिपन्नं संस्थानविशेषवदनिमित्तं दृष्टमिति ।

अपरे तु—

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ २३ ॥

अनिमित्तनिमित्तत्वान्ना ऽनिमित्तत इति परिहारं वर्णयन्ति ॥ अनिमित्तमेव निमित्तं यतश्चोत्पत्तिस्तन्निमित्तमिति । अनिमित्तनिमित्तत्वात् नानिमित्तत उत्पत्तिरिति ।

एतच्च न—

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ २४ ॥

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥ अन्यद्धि निमित्तमन्यच्च निमित्तप्रत्याख्यानमिति । न च प्रत्याख्यानमेव प्रत्याख्येयं भवति निमित्तमित्यर्थाभ्यनुज्ञा अनिमित्तमिति तस्य प्रतिषेधः अभ्यनुज्ञाप्रतिषेधयोश्चैकत्वमयुक्तमिति । स खल्वयं वादोऽकर्मनिमित्तः सत्त्वसर्ग इति एतस्मान्न भिद्यत इति । अनेन तु तत्प्रतिषेधेनैव प्रतिषिद्धो बोद्धव्यः ।

कण्टकादीनां चानिमित्तं जन्मेति ब्रुवाणः प्रष्टव्यः—किं कण्टकमात्रस्यानिमित्तं जन्म उत सर्वस्येति ? । यदि कण्टकमात्रस्यानिमित्तं जन्म ? तच्छेषेण(१) दृष्टान्तेन शक्यं प्रतिपादयितुं निमि-

---

(१) निमित्तं जन्म तच्छास्त्रेण—पा० ४ पु० ।

त्त्वादिति । अथ सर्वमनिमित्तमित्ययं पक्षस्तथापि व्याघातः प्रतिपाद्यप्रतिपादकन्यायस्याभ्युपगमात्—सर्वं चानिमित्तं प्रतिपादयसि चेति व्याघातः । वाक्योपादानाच्च व्याघातः—अनिमित्तो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिवदितिवाक्यं प्रतिपादकमुपादीयते न च निमित्तमस्तीति व्याघातः । अनिमित्ततो भावोत्पत्तिरिति सनिमित्ता भावोत्पत्तिरिति च वाक्ये यद्यनयोरर्थभेदं प्रतिपद्यसे ? वाक्यभेदादर्थभेदप्रतिपत्तिरिति व्याहतं भवति अनिमित्ता भावोत्पत्तिरिति । अथ न(१) वाक्यभेदेनार्थभेदं प्रतिपद्यसे ? वाक्यविशेषोपादानं व्याहतम् यत्किञ्चिद्वाक्यमुपादेयमिति । अनिमित्तां भावोत्पत्तिं प्रतिपद्यमानेन सर्वलोकव्यवहार उच्छिन्नो भवति । अनिमित्ता भावोत्पत्तिरिति च भावमात्रपक्षीकरणे न दृष्टान्तो भवति । अथ शरीराद्येकदेशं पक्षयसि ? तथाप्यन्यतरधर्मासिद्धो दृष्टान्तः संस्थान(२) विशेषवत्त्वस्य विद्यमानत्वात् अनिमित्तत्वस्य चाभावादिति ॥

(इति आकस्मिकत्वप्रकरणम् ।)

अन्ये तु मन्यन्ते—

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ २५ ॥

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥ किमनित्यं नाम ? यस्य कदाचिद्भावस्तदनित्यम्---उत्पत्तिधर्मकमनुत्पन्नं नास्ति विनाशधर्मकं चाऽविनष्टं नास्ति । किं पुनः सर्वं ? भौतिकं शरीरादिकमभौतिकं च बुद्ध्यादि तदुभयमुत्पत्तिविनाशधर्मकमिति विज्ञायत इति । तस्मात् सर्वमनित्यमिति । सू-

(१) न—इति नास्ति ४ पु० ।
(२) सन्तान—पा० ४ पु० ।

त्रस्य दृष्टान्तार्थत्वात् तस्य सर्वान्तर्भावादुदाहरणाभावः—सर्व-मनित्यमिति ब्रूषे ? (१)दृष्टान्ताभावः सर्वस्य पक्षीकृतत्वात् न साध्यमुदाहरणं युक्तम् । उत्पत्तिविनाशधर्मकत्वादिति चायं हेतुरव्यापकः—यदि सर्वं पक्षयित्वा उत्पत्तिविनाशधर्मकत्वमुपादत्से परमाण्वाकाशादिषु तद्‌गुणेषु च केषुचित् सामान्यादिषु नोत्पत्तिविनाशधर्मकत्वमस्तीति हेतुरव्यापकः ॥

नानित्यता नित्यत्वात् ॥ २६ ॥

नानित्यता नित्यत्वात् ॥ सर्वमनित्यमेवेति ब्रुवाणः प्रष्टव्यः किं सर्वस्यानित्यता नित्या आहोस्विदनित्येति । यद्यनित्यता नित्या ? न तर्हि सर्वमनित्यम् । अथानित्या ? अनित्यताया अभावात् (२)सर्वमनित्यमिति व्याहतो हेतुः ॥

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥ २७ ॥

तदनित्यत्वमग्नेर्दाह्यं(३) विनाश्यानुविनाशवत् । यथाऽग्निर्दाह्यं विनाश्यानुविनश्यति एवमनित्यतापि सर्वं विनाश्यानुविनश्यति ।

अयं च खलु वादः सर्वमनित्यमिति, नित्यं व्याचष्टे—

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥२८॥

नित्यस्य प्रत्याख्यानं न युक्तं यथोपलब्धि व्यवस्थानात् । यत्र यत्राऽयं हेतुरुपलभ्यते तत्र तत्र हेतुसामर्थ्यादनित्यत्वं प्रतिपद्यामहे यत्र पुनरयं हेतुर्नास्ति तेषामनित्यत्वं कथं प्रतिपत्तव्यम् । अथाकारणकमनित्यं प्रतिपद्यसे ? व्याहतस्तर्हि हेतुः उत्पत्तिविनाशधर्मकत्वादिति—अनित्यमिति ब्रुवाणेनावश्यं नित्यमभ्युपेयं नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वात्—अयं खलु नञ्

---

(१) मुत्पत्तिविनाशधर्मकत्वादिति ब्रूषे—पा० ४ पु० ।

(२) स्वभावात्—पा० ४ । (३) दाह्यत्वमिति क्वचित् ।

प्रवर्तमानः प्रसज्यप्रतिषेधे वर्तते पर्युदासे वा तथा चोत्तरपदसिद्धिः यदि नित्यं न भवतीत्यनित्यं तर्हि यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति सिद्धमुत्तरपदम् । अथ नित्यान्यदनित्यमिति तथाप्युत्तरपदेन भवितव्यम् नासत्युत्तरपदार्थे तस्मादन्यत्वं सिद्ध्यतीति । अनित्यताभावाच्च सर्वमनित्यमिति न दोषः अनित्यताया धर्मत्वेनाभ्युपगमात्—अनित्यत्वं नाम धर्मः सोऽसति धर्मिणि न भवतीति एवं च सति सर्वस्यानित्यत्वं न दोष इति । अथ पुनरुत्पत्तिविनाशधर्मकेणानित्येन सिद्धेन शेषं सन्दिह्यमानानित्यत्वं विपरीतनित्यत्वं च सत्त्वादनित्यमिति साधयेत् तस्याप्युत्तरपदसिद्ध्या नित्यत्वसिद्धिरिति प्रतिज्ञादोषाद्वाक्यं निवर्तत इति ॥

(इति सर्वानित्यतानिराकरणप्रकरणम् ।)

अयमपर एकान्तः—

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥ २९ ॥

सर्वं नित्यं पञ्चभूतनित्यत्वात् । भूतमात्रमिदं सर्वं तानि च नित्यानि भूतोच्छेदानुपपत्तेः सर्वं नित्यमिति ॥

नोत्पत्तिविनाशकारणोपलब्धेः ॥ ३० ॥

नोत्पत्तिविनाशकारणोपलब्धेः । उत्पत्तिकारणं भावानामुपलभ्यते विनाशकारणं च तदुभयं नित्यत्वे न स्यात् न हि नित्यं नाम जायते विनश्यति वा ॥

तल्लक्षणावरोधादप्रतिषेधः ॥ ३१ ॥

तल्लक्षणावरोधा(१)दप्रतिषेधः । यदिदमुत्पद्यते विनश्यतीति च मन्यसे न तद्भूतलक्षणहीनं गृह्यते भूतलक्षणावरोधात्(२) सर्वं

(१) बोधा–पा० ४ पु० ।   (२) बोधात्–पा० ४ पु० ।

नित्यमिति। सर्वं नित्यमिति च (१)ब्रुवाणो न किञ्चिज्जायते न विनश्यतीति प्रतिपद्येत, तत्प्रतिपत्तौ च हिताहितप्राप्तिपरिहारार्थोऽस्य परिस्पन्दो व्यर्थ आपद्येत, सर्वस्य च पक्षीकरणाद्दृष्टान्ताभावः वाक्योपादानं च व्याहतम्। यदिदं वाक्यं(२) परप्रतिपादनायोपादीयते सर्वं नित्यं पञ्चभूतनित्यत्वादिति, अनेन वाक्येनायं किङ्करोति-किमसिद्धं साधयति उत सिद्धं निवर्तयति?। यदि तावदसिद्धं साधयति? केयं सिद्धिर्वाक्येन(३) प्रतिपाद्यते। यदि विज्ञानं? व्याहतं भवति सर्वं नित्यं विज्ञानं च जायत इति। अथ प्रतिपत्तिर्न क्रियते का तर्हि सिद्धिः? या प्रवर्तमानं साधनं करोति अवश्यं कारकेणापूर्वं किञ्चिन्निष्पाद्यं तन्निष्पत्तेर्व्याघातः कारकत्वं वा निवर्तते न हि नित्यस्य किञ्चित् कर्तव्यमस्ति। अथ सिद्धं निवर्तयतीति पक्ष आश्रीयते? एतस्मिन्नपि पक्षे नित्यं निवर्तत चेति व्याघातः। अथ तिरोभवतीति? तिरोभावे ऽप्यवश्यमपूर्वोत्पत्तिः पूर्ववस्तुविनाशो वाभ्युपेय इति सर्वथा न व्याघातान्मुच्यसे—यत्प्रागनुपलब्धरूपं पश्चादुपलभ्यते तस्यावश्यमपूर्वोत्पत्तिर्वा पूर्ववस्तुविनाशो वाभ्युपेय इति(४) तदभ्युपगमे चव्याघातः।

यत्पुनरेतदुभूतलक्षणाविरोधात् सर्वं नित्यमिति, नान्यथा तदुपपत्तेः-भूतलक्षणयोगोऽन्यथा सम्भवतीति—

नोत्पत्तितत्कारणोपलब्धेः॥ ३२॥

उत्पत्तिकारणोपलब्धेः॥ कारणसमानगुणोत्पत्तिश्च दृश्यते कारणं च दृश्यते न चैतदुभयं नित्यविषयम्, न हि नित्यस्योत्पत्तिर्नापि नित्यस्य कारणमस्ति, अस्ति चैतदुभयं, तस्मात्

(१) सर्वं नित्यं-पा० ४ पु०। (२) वाच्यं-पा० ४ पु०।
(३) वाच्येन—पा० ४ पु०।
(४) सर्वथा न व्याघातान्मुच्यसे इति—अधिकम् ४ पु०।

कारणसमानगुणं कार्यमुत्पद्यते(१) इति कारणसमानगुणोत्पादे च कार्यभूतलक्षणावरोधः सिध्यतीति । विभक्तन्यायं चैतत् व्यक्ताद्व्यक्तानां(२) प्रत्यक्षप्रामाण्यादित्येतस्मिन् सूत्रे । अव्यापकश्चायं हेतुः पञ्चभूतनित्यत्वादिति, । कथं? कर्मादीनामव्याप्तेः—कर्मबुद्धिशब्दादयः पञ्चभूतनित्यत्वादित्यनेन न व्याप्ता इति । ज्ञातुः प्रयत्नदर्शनाच्च व्याघातः—उत्पत्तिविनाशप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्टः सर्वनित्यत्वे च न युक्तः प्रसिद्धश्चावयवी तद्धर्मा—उत्पत्तिविनाशधर्मा चावयवी प्रतिपादितोऽतोऽयुक्तमेतत् । कथमव्यापकोऽनेकान्तः—पक्षस्यान्तद्र्ये ऽवस्थानात् पक्षो हि सर्वं (हि)नित्यमिति, तच्च सर्वं भूतलक्षणयुक्तम(३)अन्यथा च तत्पक्षान्तद्र्ये ऽवस्थानात् न सर्वं भूतलक्षणयुक्तमित्यनेकान्तः ।

स्वप्नविषयाभिमानवन्मिथ्योपलब्धिरिति चेत् ?—अथ मनुषे यदिदमुत्पद्यते विनश्यति चेति तन्न तत्त्वतोऽस्ति असत्येतस्मिन्नभिमानो भवति उत्पन्नं विनष्टमिति, यथा न स्वप्ने विषयाः सन्ति अथ च विषयाभिमानो भवतीति ? न प्रमाणाभावात्—यदिदं गवादि घटाद्युत्पत्तिविनाशयुक्तमुपलभ्यते(४) एतन्नास्तीति नासत्त्वप्रतिपादकं प्रमाणमभिधीयते न चाप्रामाणिकं शक्यं प्रतिपत्तुम् । यथा च चित्तव्यतिरेकिणो विषयास्तथोपरिष्टाद्वक्ष्यामः । यदि स्वप्नविषयाभिमानवदुत्पत्तिविनाशाभिमानः ? अथ भूतोपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते । पृथिव्याद्यभावे सर्वव्यवहारविलोप इति चेत् ?—अथ

(१) कार्यमुत्पादयति इत्यधिकं क्वचित् ।

(२) व्यक्ताव्यक्तानां चाविवक्षा इति—पा० २ पु० ।

(३) उक्तम—इत्यधिकम् ।

(४) घटादिव्यक्तमुपलभ्यते इति पा० २ पु० ।

मन्यसे यदि पृथिव्यादीनि भूतानि न सन्ति ननु पृथिव्याद्याश्रयो व्यवहार उच्छिद्यत इति ? तदितरत्र समानम्—यदि व्यवहारोच्छेदभयाद्भूतानि प्रतिपद्यन्ते तत एवोत्पत्तिविनाशावपि प्रतिपद्यस्व न ह्युत्पत्तिविनाशावन्तरेण कश्चनव्यवहारः सिद्ध्यतीति नित्यानां द्रव्याणामतीन्द्रियत्वात् अविषयत्वाच्चोत्पत्तिविनाशयोः यन्नित्यं तदतीन्द्रियम् अविषयश्चोत्पत्तिविनाशयोः तेन स्वप्नविषयाभिमानवत्तदाभिमान इत्ययुक्तम् । उत्पत्तिविनाशाभिमान इति च ब्रुवतोत्पत्तिविनाशयोर्विषयो वक्तव्यः । न च सर्वनित्यत्वादिनामुत्पत्तिविनाशयोर्विषयोऽस्ति । विषयं च प्रत्याचक्षणेन तदनुकारी विपर्ययप्रत्ययो हेय इति ।

अपरे तु सर्वं नित्यमित्येतदन्यथा वर्णयन्ति—व्यवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमाविर्भवति यच्च निवर्तते तन्निवृत्तमप्यस्तीति यच्चाभिर्भवति तत्प्रागप्याविर्भावादस्ति—

न व्यवस्थानुपपत्तेः ॥ ३३ ॥

न व्यवस्थानुपपत्तेरिति । शेषं भाष्ये । यच्च निवर्तते तन्निवृत्तमप्यस्तीति ब्रुवाणो भवान्प्रष्टव्यो भवति(१) किमुक्तं भवति निवृत्तमिति ? यदि ब्रूषे पूर्वमुपलब्धं पश्चान्नोपलभ्यत इति । अथ मतोऽनुपलब्धिः किङ्कृता ? यद्यावरणादिकृता ? तदावरणाद्युपलभ्येत । उक्तं चात्र यत्पूर्वमनुपलब्धं पश्चादुपलभ्यते तस्यापूर्वविशेषोत्पादः पूर्वविशेषप्रच्यवोऽभ्युपेय इति, तदभ्युपगमे च व्याघातः । यच्चोक्तं यच्चाविर्भवति तत् प्रागप्याविर्भावादस्ति ? तन्न व्याघातात्—आविर्भवति

---

(१) जायते—पा० ४ पु० ।

विद्यते चेति व्याहतम् । अथाविर्भावोऽभिव्यक्तिः तथापि पूर्वदोषानिवृत्तिरभिव्यक्तिरसतीति ॥

(इति सर्वनित्यत्वनिराकरणम् ।)

अयमपर एकान्तः—

सर्वं पृथग्भावलक्षणपृथक्त्वात् ॥ ३४ ॥

सर्वं पृथग्भावलक्षणपृथक्त्वात् । भावस्य लक्षणं शब्दः लक्ष्यते ऽनेन भावः इति । सर्वो भावसमाख्याशब्दोऽनेकविषयो यथा कुम्भ इति भावसमाख्याशब्दोऽनेकस्मिन्नवयवसमूहे वर्तत इति । यथा कुम्भशब्दः एवमन्ये ऽपि शब्दा इति । अस्य प्रयोगः कुम्भशब्दोऽनेकविषयः एकपदत्वात् सेनाशब्दवदिति । पदश्रवणादनेकार्थावगतेः—यस्मात् पदश्रुतेरनेकोऽर्थोऽवगम्यते यथा सेनेति ॥

नानेकलक्षणैरेकभावनिष्पत्तेः ॥ ३५ ॥

नानेकलक्षणैरेकभावनिष्पत्तेः । अनेकलक्षणैरिति मध्यमपदलोपी समासोऽनेकविधलक्षणैरिति । गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः सम्बद्ध एको भाव उत्पद्यते अतः शब्दादेकावगतां(१) शेषो ऽनुक्तोऽप्यवगम्यत इति गुणव्यतिरिक्तो गुणीति अवयवव्यतिरिक्त(२) श्चावयवीति विभक्तन्यायमेतत्। यत् पुनरेकपदत्वादनेकविषयः कुम्भादिशब्द इति ? तन्न, दृष्टान्ताभावात्—न हि कश्चिच्छब्दोऽनेकविषयोऽस्ति, सेनादिशब्दानामनेकविषयत्वेनासिद्धेः । यथा चैकविषयः सेनादिशब्दस्तथोक्तमिति । सर्वस्य पक्षीकरणाद्दृष्टान्ताभावः आधाराधेयभावेनानुषक्तानां

(१) एकाधिगतां—पा० ४ पु० ।
(२) अवयवव्यतिरिक्त—पा० ४ पु० ।

रूपादीनामवयविनश्च ग्रहणादन्यथासिद्धः नञः प्रसज्यप्रतिषेधपर्युदासविषयत्वेनावस्थानाच्च विरुद्धः(१) अनेकमित्ययं नञः प्रयोगः स चायं प्रसज्यप्रतिषेधपर्युदासविषयत्वेन प्रतिषेधात् प्रकल्प्यते। यदि तावत् प्रसज्यप्रतिषेध एको न भवतीति यदेकत्र प्रतिषिध्यते तदन्यत्र भवति एवं च व्याघातः। अथ पर्युदासपक्षः ? एकस्मादन्यदनेकमिति एवमप्येकमभ्युपगतं भवति न ह्यसत्येकस्मिन् तस्मादन्यदनेकं सिध्यतीति।

इतश्च—

लक्षण(२)व्यवस्थानादेवाप्रतिषेधः॥ ३६॥

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः। न हि कश्चिदेको भाव इत्ययुक्तः पक्षः(३) कस्मात ? लक्षणव्यवस्थापनात(४) न हि कुम्भ इत्युक्ते ऽनेकोऽर्थोऽवगम्यते। कथं नामगम्यते ? एकवचनान्तत्वात्—एकवचनान्त एष शब्दः कुम्भ इति। न च बहुष्वेकवचनं युक्तम् सैष(५)सम्प्रतिपत्त्योरेकविषयत्वात् कुम्भमानयेति सैष एकविषयो भवति। इतरोपि कुम्भशब्दात् प्रतिपद्यैकं कुम्भमानयति ते एते सैषसम्प्रतिपत्ती एकविषये ज्ञापयतः कुम्भशब्देनैकोऽर्थोऽभिधीयत इति। यांस्तु रूपादीनवयवान् प्रतिपद्यते स न शब्दार्थः किन्त्वनुषङ्गः तन्नान्तरीयकत्वादिति। समूहभेदस्य चानवस्थानात्—यत्रावस्थानं तदेकं गवादिघटादिद्रव्याणि समुदितानि प्रतिपद्यमानेन समूहोऽभ्युपेयते स चा-

(१) विरूप इति—पा० ४ पु०।

(२) तल्लक्षण—पा० ४ पु०।

(३) इत्ययमयुक्तः प्रतिपक्षः—पा० ४ पु०।

(४) व्यवस्थानात्—पा० ४ पु०।

(५) वैध—चैष—पा० क्वचित्।

यं समूह इयन्ति द्रव्याणि एतानि घटादि(१)भावेनावस्थितानीति न व्यवतिष्ठन्ते ऽस्य भेदोऽल्पतर(२)तमत्वेन यत्तत् परमल्पं(३) तदभेद्यं ततो निवर्तत इति । यतश्चायं भेदो निवर्तते तदेकम् । एकं च प्रत्याचक्षाणेनानेकमपि प्रत्याख्येयम् एकसमुच्चयत्वा(४)दनेकस्य । अथ मन्यसे यन्तमभेद्यं परमाणुं प्रतिपद्यसे स रूपादीनां समुदाय इति चत्वारि वा द्रव्याणि पृथिव्यादीनि समुदितानि परमाणुरिति ? । एतस्मिन् वै दर्शने ये रूपादयः समुदितास्ते परमाणुरिति यत्परमाणौ रूपं स कस्य समुदाय इति वक्तव्यम् । एवं शेषेषु गुणेषु चत्वारि द्रव्याणि समुदितानि परमाणुरिति ब्रुवाणेन चतुष्टुस्य एकसमुच्चयनिमित्तत्वात् यदेकं पृथिव्यादि स कस्य समुदाय इति वक्तव्यम् । अथानन्तं समुदायं प्रतिपद्यसे अष्टौ द्रव्याणि समुदितानि परमाणुरिति ? शास्त्रं व्याहतं भवति—कामेऽष्टद्रव्यकोणुरशब्द(५) इति एकानुपपत्तौ नानेकोपपत्तिरित्येतद्धेयम् । यश्चायं हेतुः समूहे भावशब्दप्रयोगादिति उभयतो व्याघातान्न किञ्चिदेतत् । कथमुभयतो न कश्चिदेको भावः समूहे भावशब्दप्रयोगादिति प्रतिज्ञाहेत्वोर्व्याघातः । यस्मादेकार्थानुपपत्तौ(६) न समूह उपपद्यत इति समूहं चाश्रित्यैकं प्रत्याचक्षाणेन समूह एव प्रत्याख्यातो भवतीति सोऽयमुभयतो व्याघातात् यत्किञ्चनवाद इति । शेषं भाष्ये ॥

(इति सर्वपृथक्त्वनिराकरणप्रकरणम् ।)

---

(१) गवादि—पा० ४ पु० । (२) अन्यतर—पा० ४ पु० ।
(३) मन्यं—पा० ४ पु० । (४) समुदाया—पा० ४ पु० ।
(५) णुशब्द—पा० ४ पु० । (६) नानेकाश्च न इत्यधिकं क्वचित् ।

अथायमपर एकान्तः—

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ ३७ ॥

सर्वमभावो भावेष्वितरेतराभावसिद्धेः(१) । यावद्भावजातं तत्सर्वमभावः । कस्मात् ? भावेष्वितरेतराभावसिद्धेः । असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दसामानाधिकरण्यात् सर्वमभावः अनुत्पन्नप्रध्वस्तपटवत्—सर्वो भावशब्दोऽसत्समानाधिकरणः प्रतिषेधसमानाधिकरणश्च प्रध्वस्तपटवत् यथा नास्ति पट इति । कथं नास्ति कदा च नास्तीति ? स्थाल्याद्यात्मना ऽनुत्पद्यमानो ध्वस्तश्चेति । सोऽयं घट(२)शब्दोऽसत्प्रत्ययसमानाधिकरणो घटस्यासत्तामत्त्वं प्रतिपादयति । तथा च सर्वे भावा असत्प्रत्ययसमानाधिकरणास्तस्मात् सर्वमभाव इति ।

प्रतिज्ञापदयोः प्रतिज्ञाहेत्वोश्च व्याघातः सामानाधिकरण्यमभिन्नविभक्तिमत्त्वमेकविभक्त्युच्चारणमिति भावाभ्युपगमात् तच्छब्दाभ्युपगमाच्च विरुद्धः । यत्सर्वमिति मन्यसे तदभाव इति नामाति तत्प्रत्ययेन भवितुं शक्यम् । न च भावप्रत्ययेनाभाव इति च भावः प्रतिषिध्यते नामत्युत्तरपदार्थे नञः प्रयोग इति प्रसज्यप्रतिषेधपर्युदासाभ्यां पूर्ववत् प्रसङ्गः यथाऽनेकपदे ऽनित्यपदे चैवं सर्वपदे ऽभावपदे च व्याघात ऊह्यः । शेषं भाष्ये । सर्वासत्त्वे विभक्तिस्वभावावधारणं वक्तव्यम् । यदि च सर्वमभावो विभक्तिः किंस्वभाविकेति वक्तव्यमेतत् । असत्यां च विभक्तावभिन्नविभक्तिकत्वं सामानाधिकरण्यमिति व्याहतम् । असत्प्रत्ययप्रतिषेधसामानाधिकरण्यमिति ब्रूषे(३) सर्वमभाव इति

(१) इतरेतरसिद्धेः—पा० ४ पु० । (२) स घट—पा० ४ पु० ।
(३) ब्रुवाण एव—पा० ४ पु० ।

च व्यावर्तयसि न ह्यसदधिकरणं भवति। अधिकरणं हि नाम यद्यत्र वर्तते, तच्चाभावे नास्तीति। सूत्रेण चाभिसम्बन्धः—

न स्वभावसिद्धेर्भावानाम् ॥ ३८ ॥

न स्वभावसिद्धेर्भावानामिति। स्वेन भावेन भावा भवन्तीति सूत्रार्थः। किं पुनरनेन सूत्रेण क्रियते? पूर्वसूत्रविरोधश्चोद्यते। कथमिति? भावेष्वितरेतराभावसिद्धेरित्यभावोऽभवनाऽभिधीयते तथा चाभिदधानः(१) स्वभावानभावानभ्युपैति, विशेषणवैयर्थ्यं च भावेष्वितरेतराभावसिद्धेरिति(२) सर्वमित्येवमेव वक्तव्यम् न सन्ति भावा, न पुनरेवं वक्तुं युक्तम् इतरदितरत्र(३) भवतीति। इतरदिति(४) चायं विधानशब्दः न च सर्वस्याभावे विधीयमानं वस्तु सम्भवति यदितरशब्दवाच्यं स्यादिति। इतरवाच्यतां चाभ्युपगम्येतरदितरत्र प्रतिषिध्यत इति स्वभावसिद्धिरभ्युपगता भवति। कश्च स्वो भावो भावानां द्रव्यादीनां? सदादि सामान्यं क्रियावदादिर्विशेषः स्पर्शपर्यन्ताः पृथिव्याः प्रत्येकमनन्तो भेदः—सामान्यविशेषसमवायादीनां च सामान्यो वैशेषिकश्चान्तर्गणिकोऽनन्तो भेद इति। सोऽयमभावस्य निरुपाख्यत्वात् सम्प्रत्यायकः स्वभावभेदो न स्यात् अस्ति त्वसौ(५) तस्मान्न सर्वमभाव इति। अथवा स्वभावसिद्धेरिति गौरिति प्रयुज्यमाने नाभावः प्रतीयते किन्तु जातिविशिष्टं द्रव्यं, यदि च सर्वमभावः स्यात् गौरिति प्रयुक्तेऽभावो गम्येत, नत्वभावोगम्यते, तस्मान्न सर्वमभाव इति। अथवा स्वभावसिद्धेरिति असन् अश्वो-गवात्मना अनश्वो गौरगौर्गौरिति कस्मान्नोच्यते इति अवचनाद्

(१) चातिदधानः—पा० ४ पु०। (२) इतरेतरासिद्धेः—पा० ४ पु०।
(३) इतरदितरवच्च—पा० १ पु०। (४) इतरवदिति—पा० १ पु०।
(५) अस्ति त्वयं—पा० ४ पु०।

गौरिति(१) अगौर्गौरित्युक्ते व्याहतं भवति। यदि व्याघातभयादगौर्गौरिति नोच्यते ? हन्त तर्हि सिद्धोभावः। कथं तर्हि अयं प्रतिषेधोऽगौरश्व इति ? । व्यतिरेकप्रतिषेधे भावेनासत्प्रत्ययस्य सामानाधिकरण्यमिति—यथा न सन्ति कुण्डे बदराणीति कुण्डबदरयोः सम्बन्धः प्रतिषिध्यते न कुण्डे बदरसद्भावः॥

न स्वभावसिद्धिरापेक्षिकत्वात्॥ ३९॥

न स्वभावसिद्धिरापेक्षिकत्वात् । न स्वभावसिद्धिरापेक्षिकी यतः न स्वेनात्मना किञ्चित् सिद्धमिति। यथा दीर्घत्वह्रस्वत्वे परापरे चेति।

व्याहतत्वादयुक्तम्॥ ४०॥

व्याहतत्वादयुक्तम। यदि ह्रस्वापेक्षाकृतं दीर्घं ? ह्रस्वमनापेक्षिकम। अथ दीर्घापेक्षाकृतं ह्रस्वं ? दीर्घमनापेक्षिकं, परस्परापेक्षयोश्च यदपेक्षयेतरज्जायते तदनापेक्षिकमिति उभयोरभावः एकस्याभावादिति। अपेक्षायामनपेक्षायां च द्रव्ययोर्न भेदः—यावती एव द्रव्ये ऽपेक्षमाणे तावती एव(२) अनपेक्षमाणे अपि न ह्यन्यतरत्र भेदः। अतिशयग्रहणं कथं यदि द्रव्ययोर्द्वयोरभेदः अपेक्षमाणयोरनपेक्षमाणयोर्दीर्घह्रस्वप्रत्ययः तर्हि न प्राप्नोति ? न न प्राप्नोति द्वयोर्ग्रहणेऽतिशयस्य ग्रहणात्—द्वयोस्तावद् द्रव्ययोः प्रत्यर्थनियते द्वे ह्येव बुद्धी भवतः अत एकस्मिन् विद्यमानमतिशयं गृह्णाति एकस्मिन् विद्यमानं च ह्रस्वत्वम सोऽयमुभयदर्शने प्रतिसन्धत्ते प्रतिसन्धानप्रत्ययजा त्वस्य बुद्धिरुत्पद्यते अस्माद्दीर्घमदोऽस्माददो ह्रस्वमिति, न पुनर्वस्तुन

---

(१) गौरस्तीति—पा० ४ पु०। (२) द्रव्ये—इत्यधिम् ४ पु०।

उत्पादानुत्पादाविति । स्वभावसिद्धौ चासत्या(१)मपेक्षा न प्राप्नोति—यदि स्वभावसिद्धिमन्तरेणापेक्षाभेदाद्दीर्घादिभेदा भवन्ति सर्वमपेक्ष्य सर्वस्य सर्वत्र तथाभूतः प्रत्ययः स्यात् न च रूपरसगन्धस्पर्शप्रत्ययेष्वपेक्षासामर्थ्यमस्ति । न च परिमण्डलौ परमाणू उपलभमान ईश्वरः परमाणुमपेक्ष्य परमाण्वन्तरे दीर्घह्रस्वादिप्रत्ययान् करोति अतो नापेक्षाकृताः प्रत्यया इति ।

सर्वमभाव इति सर्वथा चायं वादो व्याहतः। कुतो(क)व्याघातः ? आदौ तावत् प्रमाणोपपत्त्यनुपपत्ती(२)सर्वमभाव इति ब्रुवाणः प्रमाणं पर्यनुयोज्यः। यदि ब्रूते ? व्याहतं भवति। अथ नाभिधत्ते? अर्थोऽस्य न सिध्यति प्रमाणाभावात् । सर्वमभाव इति वाक्यं तस्य यद्यभिधेयमर्थं प्रतिपद्यते पूर्ववद्व्याघातः । अथ न प्रतिपद्यते ? वर्णोच्चारण(३)मात्रमनर्थकमिति । सर्वमभाव इति च वाक्यस्य(४) प्रतिपादयितारं प्रतिपत्तारं च यदि प्रतिपद्यते(५) पूर्ववद्व्याघातः। सर्वमभाव इति सर्वं भाव इति च वाक्ये, यद्यनयोरर्थभेदं प्रतिपद्यते ? व्याहतं भवति ।अथ न प्रतिपद्यते ? विशेषोपादानं व्यर्थम् । सोऽयं सर्वाभाववादो यावद्यावद्विचार्यते तावत्तावदुपपत्तिं न सहत इति ॥

(सर्वशून्यतानिराकरणम् ।)

---

(१) स्वभावसिद्धावसत्यां—पा० ४ पु० ।

(२) प्रमाणोपपत्त्यनुपपत्ती—पा० ४ पु० ।

(३) सर्वोच्चारण—पा० ४ पु० ।

(४) वाक्यार्थ—पा० ४ पु० ।

(५) पाद्यते—पा० ४ पु० ।

अथेमे संख्यैकान्तवादाः । सर्वमेकं सदविशेषादित्येवमादि भाष्ये । तेषां प्रतिषेधद्वारकं सूत्रम् ॥

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥४१॥

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् । संख्यैकान्तानामसिद्धिः कारणस्य प्रतिज्ञातार्थव्यतिरेकात्—सर्वमेकमिति प्रतिज्ञां कृत्वा यदि प्रतिज्ञेयव्यतिरिक्तं साधनं ब्रवीति एकान्तो न सिद्ध्यति तच्च साधनं प्रतिज्ञायाश्चार्थ—इति द्वैतम् । एवं द्वैतादिष्वपीति । अथ प्रतिज्ञेयव्यतिरिक्तं साधनं नास्ति ? एवमप्येकान्तो(ऽस्य वा) न सिद्ध्यति साधनाभावात् न साध्यं साधनमिति ॥

न कारणावयवभावात् ॥ ४२ ॥

न कारणावयवभावात् । कारणस्य साध्यावयवत्वादित्ययं(१) सूत्रार्थः । साध्यावयव एव साधनम्, एवं च सति साध्यव्यतिरिक्तं साधनं नोक्तं भवति न चासाधना सिद्धिरिति ॥

निरवयवत्वादहेतुः ॥ ४३ ॥

निरवयवत्वादहेतुः । साध्यावयव एव कारणमित्ययमहेतुः निरवयवत्वात् प्रतिज्ञार्थस्य सर्वमेकमित्येतस्मिन् प्रतिज्ञार्थे न किञ्चिदपवृज्यते अनपवर्गेण सर्वं पक्षीकृतमिति सर्वस्य निरवयवस्य पक्षीकरणान्न हेतुरस्ति, न च साध्यं हेतुर्भवितुमर्हतीति । आत्मनि च क्रिया विरुद्ध्यते यत्तत्प्रतिपाद्यं तदेव प्रतिपादकमिति न युक्तं न कर्म करणं भवितुमर्हतीति । ते खल्विमे संख्यैकान्ता यदि विशेषकारितस्यार्थभेदस्य प्रत्याख्या-

---

(१) साध्यावयवत्वादि साधनं नास्ति एवं सत्येकान्तो ह्ययं—पा० ४ पु० ।

नेन वर्तन्ते मिथ्यावादा भवन्ति प्रत्यक्षानुमानागमविरोधित्वात्—प्रत्यक्षोऽयं गवादिघटादिभेदः अनुमानतोऽपि गम्यते अन्यदन्येनानुमीयते, आगमतोऽपि गम्यते प्रतिपन्नः प्रतिपादयिता अप्रतिपन्नः प्रतिपाद्य(१) इति । अथाभ्यनुज्ञानेन वर्तन्ते ? तथाप्येकान्तत्वं जहति । अथ सामान्यकारितोऽभेदः विशेषकारितश्च भेद इति प्रतिपद्यते ? तथापि न किञ्चिद्बाध्यते । न च भेदमन्तरेण सामान्यं लब्धावकाशमिति । सामान्यं प्रतिपद्यमानेन(२) भेदोऽभ्युपगन्तव्यः भेदं च(३) प्रत्याचक्षाणेन सामान्यमपि प्रत्याख्येयम् । विशेषानाधारस्य सामान्यस्याविषयत्वात् । ते खल्विमे संख्यैकान्तास्तत्त्वज्ञानप्रविवेकाय परीक्षिता इति ॥

(इति सङ्ख्यैकान्तवादप्रकरणम् ।)

प्रेत्यभावानन्तरं फलमुद्दिष्टं, तस्मिन्—

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ ४४ ॥

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः । काचित् क्रिया सद्यःफला यथा पचति दोग्धीति तस्याः सद्यः फलमोदनपयसी क्रियानन्तरं भवत इति(४) । काचित् कालान्तरफला यथा कृष्यनिवपतीति तस्याः कालान्तरे फलं न क्रियानन्तरं सस्याधिगम इति । अस्ति चेयं क्रिया अग्निहोत्रं जुहुयादिति ।

(१) प्रतिपद्यते पु० २ पा० ।

(२) सामान्यं च प्रतिपद्यमानेन—पा० ४ पु० ।

(३) भेदं वा—पा० ४ पु० ।

(४) भवति इति—पा० ४ पु० ।

तस्याः फले सन्देहः किमियं सद्यस्तापादिफला उत कालान्तरफला ॥

न सद्यः कालान्तरोपभोग्यत्वात् (१) ॥ ४५ ॥

न सद्यः(२) कालान्तरोपभोग्यत्वात् । स्वर्गः फलं श्रूयते चोदितया(३) च क्रियया नानर्थिकया शक्यं भवितुम् । न चायं तापादिकामोऽग्निहोत्रं जुहोति तेनावगम्यते तां हवनादिक्रियामपेक्षमाणादात्ममनःसम्बन्धात् विशुद्धेनाभिसन्धिना अनुगृहीतादात्मनि धर्म उत्पद्यत इति । स च कालान्तरेऽप्रतिबद्ध्यमानशक्तिः देशाद्यनुगृहीतः फलं ददाति । तच्च पतिते तस्मिन् देहे भवति देहान्तरापन्नस्यातो न सद्य इति ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात्(४) ॥ ४६ ॥

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् । व्यावृत्ते हवने व्यावृत्ते च पूर्वशरीरे देहान्तरे फलं श्रूयते तन्न विनष्टात् कारणादयुक्तमिति ॥

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् (५) ॥ ४७ ॥

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् । न ब्रूमो विनष्टात् कारणात् कार्यमुत्पद्यते, अपि तु अग्निहोत्रहवनादिलक्षणया क्रियया यथोक्तेन विधिना धर्मो जन्यत इत्युक्तम् । तस्मात् फलमिति यथा फलार्थिना वृक्षस्य मूलसेकादिकर्म क्रियते । न च

(१) सूत्रमिदं न्यायसूचीनिबन्धे नास्ति ।
(२) न सद्यः फलम्—पा० ४ पु० ।
(३) चोदितरया—पा० ४ पु० ।
(४) निष्पत्तेर्हेतुविनाशात्—पा० ।
(५) वृक्षफलवच्च स्यात्—पा० ४ पु० ।

मूलसेकात् विनष्टात् फलेन युक्तं भवितुम्, अपि तु मूलसे-
कादिकर्म कृतं भोक्तुः कर्मापेक्षं पृथिव्यादिधातुमनुगृह्णाति स
उपगृहीत आन्तरेण तेजसा पच्यमानो रसद्रव्यमभिनिर्वर्तयति
तद्रसद्रव्यं वृक्षमाफलात् सद्य उपसर्पति तस्मात् पर्णादिफलं
निर्वर्तते । एवं च सति विनष्टात् मूलसेकात् फलनिर्वृत्तिः न
च मूलसेकादिवैयर्थ्यमिति ॥

तदिदं प्रागुत्पत्तेः—

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ॥ ४८ ॥

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् । प्रागुत्पत्तेरुत्पत्ति-
धर्मकं नासत् उपादाननियमात् असत्त्वे समाने(१) उपादान-
नियमो न प्राप्नोति । सदपि न भवति विद्यमानस्योत्पत्तिव्याहि-
तोन(२) अस्ति चोत्पद्यते चेति व्याहतम् । न सदसत्, सदस-
तोर्वैधर्म्यात् सदित्यर्थाभ्यनुज्ञा असदिति तस्य प्रतिषेधः अ-
भ्यनुज्ञाप्रतिषेधयोः सामानाधिकरण्यमनुपपन्नम् । तस्मान्न स-
दसदपि । नाप्युभयविपरीतं कार्यं युज्यते तस्य स्वरूपानिर्देशा-
दिति । न हि तस्य स्वरूपं शक्यं निर्देष्टुमिति ।

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा– सत्यमिति । कस्मात् ?–

उत्पादव्ययदर्शनात् ॥ ४९ ॥ (३)

उत्पादव्ययदर्शनात् । वस्तुनः प्रागनुपलब्धिरूपस्य पश्चा-
दुपलब्धिर्या साऽसदुत्पादे सति युज्यते विनाशश्चोपलब्धरूपस्य
पुनरनुपलब्धिरिति । न चैतत् सर्वनित्यवादिनः सम्भवति न

(१) असत्त्वेन समानेन–पा० ४ पु० ।

(२) विद्यमानस्योत्पादो व्याहन्यते—पा० ४ पु० ।

(३) प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनादि-
त्येकमेव सूत्रमिति केचित् ।

हि सत्पक्ष उत्पादो न च विनाश इति। उत्पादविनाशौ च प्रत्याचक्षाणेन लोको हेयः। अथ लोकोऽयं प्रवर्तमानः किमर्थं प्रवर्तते ? ननु चायं प्रवर्तते इदमाप्स्यामि इदं हास्यामीति ? सत्यमेवं प्रवर्तते न पुनः सत्कार्यवादिनः किञ्चिद्धेयमुपादेयं वा विद्यते। प्रतिज्ञादीनां चावयवानामुपादानं व्यर्थम्—उत्पादव्ययप्रत्याख्यानात्—न किञ्चित् जायते न किञ्चित् विनश्यतीति अवयवानामुपादानं व्यर्थं(१) यदि सत्कार्यप्रतिपत्त्यर्थं प्रतिपत्तेर्विद्यमानत्वाद् व्यर्थमुपादानम् न हि यद्यस्य लोके भवति स तदुपादानमुपादत्ते इति। अथाज्ञाननिरोभावमात्रार्थमुपादानमिति ? एतदपि तादृगेव। न हि अनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्तेति। अथाभिव्यक्त्यर्थमुपादानमिति ? केयमभिव्यक्तिर्नाम ? या उपादानेन क्रियते ? यदि कार्यं ? व्याहतम्। अथ कार्यधर्मः ? तथाप्यनिवृत्तो व्याघातः। अथोपलब्धिः कार्यविषयाभिव्यक्तिः सा क्रियत इति.? न मुच्यसे व्याघातात्(२)। अथ कारणात्मनावस्थितस्य कार्यात्मनाऽवस्थानमभिव्यक्तिः ? एवमप्यनिवृत्तो व्याघातः कार्यात्मनावस्थानमसद्भवतीति। अथ कारणस्य संस्थानविशेषोऽभिव्यक्तिः ? संस्थानविशेषोऽभूत्वा भवतीति व्याघातः। अथास्ति ? व्यर्थमुपादानम्। अथ कारणस्य स्वलक्षणपुष्टिरभिव्यक्तिः ? न अपूर्वाभ्यागमाभावे स्वलक्षणपुष्टिशब्दार्थं पश्याम इति व्यर्थमुपादानम्। स्वलक्षणपुष्टिश्च पूर्वमभूत्वा पश्चाद् भवतीति व्याघातान्न मुच्यसे(३) एवं येन येन कल्पेनाभिव्यक्तिरभिधीयते

(१) उत्पादव्ययवादिनः–पा० ४ पु०।

(२) न मुच्यसे उपघातात्–पा० ४ पु०।

(३) व्याघातः—पा० ४ पु०।

तेन तेन सत्कार्यं बाधत इति । यत्पुनरेतत् नासदुपादाननियमादिति—?

बुद्धिसिद्धं तु तदसत् ॥ ५० ॥

बुद्धिसिद्धं तु तदसत् । नायं सत्त्वादुपादाननियमोऽपि तु सामर्थ्यात्—इदमनेन शक्यं निर्वर्तयितुं(१) नेदमनेनेत्येवं बुद्धिसिद्धं कार्यं कृत्वा यद् यस्योत्पत्तये समर्थं तत् तस्योपादीयते न सर्वं सर्वस्य न सर्वस्मात् सर्वमुत्पद्यमानं दृष्टमिति । अथोत्पत्तिनियमेन कार्यनियमेन कार्यकारणनियमं प्रतिपद्यते तेनापि कार्यकारणशब्दयोरर्थो वाच्यः(२) किमुक्तं भवति कारणमिति किमुक्तं च भवति कार्यमिति ? ननु करोतीति कारणं क्रियत इति कार्यम् । यद्यभिव्यक्तिः ? पूर्ववत् प्रसङ्गः । अथ विद्यमानेऽपि करोत्यर्थो दृष्ट इति मन्यसे ? यथा केशान् कुरु पृष्ठं कुर्विति न तद्विद्यमानानां हि रचनाविशेषः केशानामविद्यमानः क्रियते पश्चात् पृष्ठस्यापि मलापगमोऽविद्यमान इति न विद्यमाने कारणार्थं जानीमः पश्याम इति तस्मादसदेतत् ।

यदि ह्यसत् क्रियत इति खरस्य विषाणं किं न क्रियत इति ?। क एवमाह न क्रियत इति, यत्र (तत्) खरस्य विषाणं तत् क्रियत इति । अथ कस्मात् खरः विषाणस्य कारणं न भवतीति एतत् न जानीमः कस्मात् न भवतीति न पुनः खरेण विषाणं क्रियमाणं दृष्टमित्यतोऽवसीयते । एतेन शशविषाणं व्याख्यातम् । न तदसत्त्वात् न क्रियते किं तु कारणाभावादिति । न चाऽसत्त्वमुत्पत्तौ हेतुः अपि तु सतोऽनुत्पत्तेरसदुत्पद्यत इति । असत्त्वात् खरविषाणं नोत्पद्यत इति ब्रुवाणः स्वसिद्धान्तं बाधते

(१) निर्णयितुं शक्यं—पा० ४ पु० ।
(२) वक्तव्यः-पा० ४ पु० ।

न हि भवत्पक्षे खरविषाणं नास्ति सत्त्वे चासत्त्वे च समाने यस्य कारणमस्ति तदुत्पद्यत इति । सत्कार्यवादिनश्चैवं सर्वलोकव्यवहार उच्छिद्यत इत्युक्तम् नापूर्वं जायते न पूर्वं विनश्यतीति । अथासत्कार्ये(१) किं प्रमाणम् ? न सत्त्वे न चासत्त्वेऽनुमानमस्ति धर्मिण्यविप्रतिपत्तेः ? क्व तर्हि विवादः ? यदुभयपक्षसम्प्रतिपन्नं तस्य धर्मेषु तदुभयपक्षसम्प्रतिपन्नाः तन्तवस्तान् प्रति पक्षा विभज्यन्ते । एके तावद् ब्रुवते तन्तुमात्रं पट इति । अपरे तु तन्तवः संस्थानविशेषेणावस्थिता इति । अपरे तु तन्तव एव कार्यात्मनाऽवतिष्ठन्ते इति । अपरेषां धर्मान्तराविर्भाव(२)तिरोभावाविति । अपरे तु शक्तिविशिष्टास्तन्तवः पट(३) इत्याहुः । तदेवं विभक्तेषु पक्षेषु तन्तुमात्रेषु तावद्व्यतिरेकः साधयितव्यः स चोपपादित(४) इति । येऽपिसंस्थानविशेषेणावस्थितान् तन्तून् पट इति वर्णयन्ति तान् प्रति साधनं—प्रागुपलब्धिकालात् संस्थानविशेषशून्याः तन्तवः तत्कारणत्वात् तुर्यादिवदिति । एतेन कार्यात्मनाऽवतिष्ठन्त इति व्याख्यातम् तथा धर्मान्तराविर्भावतिरोभावाविति । अत एव शक्तिविशेषावस्थितास्तन्तव इति ब्रुवाणः किञ्चिदपि न बाधत इति तान् प्रति न साधनमुच्यत इति । य एवार्थो बुद्धिसिद्धं तदसदिति स एवार्थः शक्तिविशेषावस्थितास्तन्तव इति सर्वेषु चैव पक्षेषु नापूर्वोत्पा-

---

(१) असत्कार्यवादे—पा० ४ पु० ।

(२) धर्माधर्माविर्भाव-पा० ४ पु० ।

(३) शक्तिविशिष्टान् तन्तून् पट—पा० ४ पु० ।

(४) उपपादित इति द्वितीयाध्याये । प्रागुपलब्धिकालादिति कारणव्यापारात् प्रागित्यर्थ इति तात्पर्यटीकायां वाचस्पतिमिश्राः ।

द्मन्तरेण पटबुद्धिः सम्भवतीति व्याघातोऽनिवार्यः । विद्य-
मानाभिव्यक्त्यर्थास्तन्तवः तदर्थिना नियमेनोपादानात् खनि-
त्रादिवत् ? । विद्यमानस्याभिव्यक्तिरस्तीति अभिव्यक्तिवत्
कार्येऽपि प्रसङ्गः एवं चोक्तोत्तरमेतत् । यत् पुनरेतदुपादान-
नियमादिति ? उपादानं च कारणम्, न च सति कारणार्थे पश्या
म इति पूर्ववत् प्रसङ्गः । यदपि खनित्रादिवदिति ? न च खनि-
त्राद्युदकार्थमुपादीयते, अपि तु आवरणविगमार्थम् । आवर-
णविगमश्च विभागः । स चाभूत्वा भवतीति असिद्धो दृष्टान्तः ।
अथ विभागं न प्रतिपद्येत ? सोऽप्यप्रतिपन्नविभागो विभागप्र-
त्ययोत्पत्तिकारणं पर्यनुयोज्यः । अथाप्राप्तिमात्रात् विभागप्रत्ययं
प्रतिपद्यते ? साप्यप्राप्तिः किं प्राप्तेरभाव उताप्राप्तेरन्येति ? किञ्चा-
तः? यदि प्राप्तेरभावोऽप्राप्तिः सा ऽप्राप्तिः कुतो भवतीति वक्तव्य-
म्?। यद्धि प्राप्तिविरोधिनिमित्तं तद्विभाग इति नाभावो विभागस्य ।
यद्यत्र प्रतिषिध्यते तदन्यत्र भवतीत्युक्तम् । अप्राप्तिश्च द्वयी अ-
संश्लेषः संश्लिष्टानां विगमश्च । तत्र यः संश्लिष्टानां विग-
मः स विभाग इति । तं च खनित्रादीनि कुर्वन्ति । अथ
प्राप्तेरन्याऽप्राप्तिः ? सापि द्वयी तत्रापि पूर्ववत् प्रसङ्गः । अ-
थ भिन्नदेशोत्पत्तिं विभागं प्रतिपद्येत ? भिन्नदेशे इमे उ-
त्पन्ने इति विशेषणोपादानान्न भिन्नदेशोत्पत्तिर्विभाग इति
उत्पन्ने उत्पन्नमिति भिन्नदेशतया भिन्नमिति विभागात् ।
विभक्तमिति तान्येतानि भिन्नप्रत्ययनिमित्तानि(१) प्र-
त्ययभेदानुमेयानि । न हीमे पर्यायशब्दा भिन्नमुत्पन्नं वि-
भक्तं चेति । भिन्नदेशोत्पत्तेश्च प्रतिषिद्धत्वान्न भिन्नदेशोत्प-
त्तिर्विभाग इति । क्षणिकत्वाद् विभागस्य विभागप्रत्ययो-

(१) प्रत्ययभेदनिमित्तानि—पा० ४ पु० ।

त्पत्तिर्न(१) युक्तेति चेत् ? न, सामान्याभिव्यक्तिसंयोगविनाशाभ्यामेव प्रत्ययोत्पत्तिकालानुभवात्—पूर्वं तावत् स्वकारणादुत्पन्नो विभागः सामान्यं व्यनक्ति सामान्याभिव्यक्त्युत्तरकालं संयोगाल्लब्धात्मकात्(२) विनश्यतीति । तदेवमनेकक्षणानुभवादुत्पन्नमात्रो विभागो ध्वंसत इत्यसिद्धम् । तदेवं व्यवस्थितमेतदसदुत्पद्यत इति ॥

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः॥५१ ॥

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः । यच्च मूलसेकादि कर्म यच्च पर्णादिफलं तदुभयं वृक्षाश्रयम् । कर्म त्विह कर्मफलं चान्यत्रेति आश्रयव्यतिरेकात् वृक्षफलोत्पत्तिवदित्यसिद्धो दृष्टान्तः ॥

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५२ ॥

प्रीतेरात्माश्रयत्वादप्रतिषेध इति । आश्रयव्यतिरेकोऽसिद्ध इति सूत्रार्थः । यत्रैव कर्म तत्रैव कर्मफलमिति ॥

न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादिफलनिर्देशात् ॥ ५३ ॥

न पुत्रस्त्रीपशुपरिच्छदहिरण्यान्नादि(३) फलनिर्देशात् । पुत्रादि फलत्वेन निर्दिश्यते न पुत्राद्यात्मनि वर्तत इति ॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः॥५४॥

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः। पुत्रादिसम्बन्धात् फलं प्रीतिर्भवति तत्कारणत्वात् पुत्रादि फलशब्दे-

---

(१) विभागप्रत्ययस्योत्पत्तिर्न—पा० ४ पु० ।

(२) संयोगाद्यात्मकात्—पा० ४ पु० ।

(३) अन्नादिषु—पा० ४ पु० ।

नाभिधीयते यथान्नसाधनाः प्राणाः अन्नं वै प्राणा(१) इति । उपचारश्च प्राणाभावात् लोकप्रयुक्तवाक्यानुविधानेन क्रियत इति ।

(इति फलपरीक्षाप्रकरणम्)

फलानन्तरं दुःखमुद्दिष्टं लक्षितं च(२) बाधनालक्षणं(३) दुःखमिति । तत् किमिदं सर्वलोकसाक्षिकस्य सुखस्य(४) प्रत्याख्यानम् आहोस्विदन्यः कल्प इति । अन्य इत्याह । कथं ? न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम् । अयन्तु जन्ममरणप्रबन्धानुभवनिमित्तात् दुःखात् निर्विण्णस्य दुःखभावनोपदेशः—कथं नामायं सर्वं दुःखमिति भावयेत् भावयंश्च विरज्येत विरक्तो मुच्यते इति । कथं पुनरयं सर्वं दुःखमिति भावयति ? सर्वे सत्त्वनिकायाः सर्वः पुनर्भवः सर्वमुत्पत्तिस्थानं दुःखसाहचर्यात् दुःखमित्युक्तमृषिभिः ।

दुःखभावनमुपदिश्यते तत्र च हेतुरुपादीयते—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ ५८ ॥

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिरिति । तत्र जायत इति जन्म शरीरेन्द्रियबुद्धयो व्यपदिश्यन्ते शरीरादीनां प्रादुर्भाव उत्पत्तिः जन्मन उत्पत्तिः जन्मोत्पत्तिः । विविधा च बाधना हीना मध्यमोत्कृष्टा चेति । शेषं भाष्ये । अनेनाभिप्रायेण दुःखो(द्दे)शो न सुखं प्रत्याख्यातुम् ॥

---

(१) प्राणिनः प्राणा—पा० ४ पु० । (२) उक्तं च—पा० ४ पु० (३) लक्षितं—पा० ४ पु० । (४)सर्वलोककस्य—पा० ४ पु० ।

न सुखस्याप्यन्तरालनिष्पत्तेः(१) ॥ ५६ ॥

न सुखस्याप्यन्तरालनिष्पत्तेः । यस्माद्बाधनान्तराले सुखमुत्पद्यमानं प्रत्यक्षदृष्टमिति ।

इतश्च—

बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः॥५७॥

बाधनानिर्वृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः—सुखस्य दुःखोद्देशेनेति, प्रकरणात्—यस्मादयं वेदयन् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति सुखसाधनमाप्तुं दुःखसाधनं हातुं प्रयतते सुखसाधनानां प्राप्तये चास्य यतमानस्यानेकविधस्तापोऽनुपद्यते । ततस्तापानुषङ्गात् सर्वं दुःखमित्युच्यते न सुखस्याभावादिति(२) । अयमेव चार्थो मुनिना श्लोकेन वर्णितः—

कामं कामयमानस्य यदा कामः समृध्यति ।
अथैनमपरः कामः क्षिप्रमेव प्रबाधते(३) इत्येवमादि ।

दुःखविकल्पे सुखाभिमानाच्च ॥ ५८ ॥

दुःखविकल्पे सुखाभिमानाच्च । यश्च सुखार्थं यतमानस्य दुःखविकल्पो भवति तं सुखाङ्गभावात् सुखमित्यभिमन्यमानः पुनस्तदुपादत्ते पुनः पुनर्जायत इति न

(१) निर्वृत्तेः—पा० ४ पु० ।

(२) सुखस्याविर्भावादिति—पा० ४ पु० ।

(३) कामं काम्यं कामयमानस्य यदा कामः समृध्यति सम्पन्नो भवति अथानन्तरमेनं पुरुषमपरः कामः इच्छा क्षिप्रं बाधते । स्वर्गादिप्राप्तावपि स्वाराज्यादि कामयते । एवं तत्प्राप्तौ प्राजापत्यादीत्यस्य इच्छा तदुपायप्रार्थनादिना दुःखेन बाधते इत्यर्थः । इति तात्पर्यटीकायां वाचस्पतिमिश्राः ॥

संसारमतिवर्तते(१) तस्याः सुखसञ्ज्ञायाः प्रतिपक्ष उपदेशोऽयं क्रियते (इति) सर्वं दुःखमिति । यद्येवं कस्माद् दुःखं जन्मेति नोच्यते ? सोऽयमेवं वक्तव्ये यदाह दुःखमेवेति तेन सुखाभावं ज्ञापयति । यदपि तदन्तराले सुखमुपजायते तदपि दुःखमेव दुःखानुषङ्गात् नाभावादिति । जन्मविनिग्रहार्थीयो वै खल्वयमेव शब्दः—जन्मनोऽनेन विनिग्रहं शास्ति सर्वं दुःखमिति भावयन् दुःखसाधनानि नोपादत्ते अनुपाददानो विमुच्यते इति ।

(इतिदुःखपरीक्षाप्रकरणम्)

दुःखोद्देशानन्तरमपवर्गः स प्रत्याख्यायते—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ॥ ५९ ॥

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभाव इत्यनेन सूत्रेण । ऋणानुबन्धान्नास्त्यपवर्गः । शेषं भाष्ये । अनुबन्धः सदा(२) करणीयता—नायमृणानुबन्धात् कदाचित् मुच्यते जन्मप्रभृति यावत् प्रायणामिति । क्लेशानुबन्धादपवर्गो नास्ति— क्लेशानुबद्ध एवायं जायते क्लेशानुबद्ध एवायं म्रियते इति । प्रवृत्त्यनुपबन्धादपवर्गो नास्ति न कदाचिदयं न कर्म करोति ॥

यत्तावदृणानुबन्धादिति—

प्रधानशब्देनानुपपत्तेर्गुणशब्देनानुवादो(३) निन्दाप्रशंसोपपत्तेः ॥ ६० ॥

प्रधानशब्देनानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्ते-

(१) पुनः पुनर्जायते न संसारमभिवर्तते-पा० ४ पु० ।
(२) सर्वदा—पा० ४ पु० । (३) नायमर्थवादो—पा० ४ पु० ।

रिति(१)। नायं प्रधानशब्दः प्रत्यादेयदानप्रतिदेयग्रहणासम्भवात्। यत्र खलु एकः प्रत्यादेयं(२) ददाति इतरः प्रतिदेयं गृह्णाति तत्रायमृणशब्दः प्रधानं भवति अन्यत्र भाक्त इति तस्माद् गुणशब्देनायमनुवाद इति। यथाग्निर्माणवक इति। तत्राग्निशब्दो दहनादिममर्थे तेजोविशेषे वर्तते स तत्र वर्तमानः तत्सामान्यादतथाभूते माणवके प्रयुज्यते अग्निर्माणवक इति। न पुनरग्निशब्दो माणवकसमानाधिकरणो दहनादिममर्थं माणवकं प्रतिपादयति अपि तु येऽग्नेः पिङ्गलपाटलत्वादयो धर्माः तत्सम्बन्धिनं माणवकं प्रतिपादयति तद्द्वारकश्च प्रयुज्यमानोऽयं शब्दो गुणोपकरणत्वात्(३) गौणो भवति। तथा च ऋणशब्दः(४) अप्रयुक्तोपमश्चेदं वाक्यम् ऋणवान् जायते इति। उपमाऽत्र लुप्ता द्रष्टव्या ऋणवानिव जायत इति क उपमानार्थः? अस्वातन्त्र्यं—ऋणवान् यथा अस्वतन्त्रः एवमयं जायमानः कर्मसु अस्वतन्त्रो वर्तत इति। जायमान इति चायं गुणशब्द एव न मुख्यः सम्भवति न हि मातुः कुमारे जायमाने लोहितपाणिपादास्येऽध्ययनादिकर्मोपपत्तिरिति अतो गृहस्थे जायमाने इति। किं पुनर्गृहस्थस्य जायमानेन कुमारेण सामान्यं? क्रियासम्बन्धः अग्निहोत्रादिहवनक्रियासम्बन्धसामान्यात् गृहस्थो जायत इति। यथा मातुः कुमारको जायमानः शरीरादिभिः सम्बद्ध्यते एवमग्निहोत्रहवनादिक्रियासम्बन्धसामान्येन जा-

---

(१) ऋणेति—इत्यधिकम्।

(२) खल्वेभ्यः प्रत्यादेयं—पा० ४ पु०।

(३) गुणोपकरणात्—पा० ६ पु०।

(४) स शब्दः—पा० ६ पु०।

यत इति । कस्मात् ? शक्तस्यार्थिनश्च कर्मभिरधिकारात् शक्तश्चार्थी च कर्मभिरधिक्रियते मातुः कुमारके जायमाने न शक्तिः न चार्थितेति, उभयं तु गृहस्थे जायमाने, तस्मात् गृहस्थो जायमानोऽभिधीयत इति ।

अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः-यच्चेदं ब्राह्मणमाजरसं कर्मभिः सम्बन्धं शास्ति तदन्यथा सम्भवतीति अर्थित्वस्याविपरिणामे जरामर्यवादोपपत्तिः-यदार्थित्वाविपरिणामः यदार्थित्वं विपरिणतं भवति(१) तदानेन अग्निहोत्रं सन्न्यसनीयम् । आयुषस्तुरीयभागं प्रव्रज्यायुक्तमाह जरेति । यावज्जीववसंयोगे हि जरया हवा इत्यनर्थकं यस्मात् स्वयमशक्तस्य बाह्याशक्तिर्विहिता सत्यर्थित्वे अन्येन हवनं शास्ति । यदा पुनरर्थित्वं विपरिणतं तदा सन्यासो विधीयत इति । कस्मात् पुनरेतदेवमुच्यते सत्यर्थित्वे अग्निहोत्रहवनमिति ? कर्मविधौ कामसंयोगश्रुतेः—यस्मात् सर्वस्मिन् कर्मणि कामविधिः श्रूयते स्वर्गकाम इति यथोपदिष्टार्थः विद्वांश्चोपदेशविषयः यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न गायनो बधिरेषु प्रवर्तते न नर्त्तकोऽन्धेषु, न चोपदेशविज्ञानं बालकेष्वस्ति(२) तस्मान्न तं प्रत्युपदिश्यत इति न भिद्यते च लौकिकात् लौकिकोऽपि तावदपरीक्षको न जातमात्रं कुमारकमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्यं चरेति(३) । कुत एवमृषिरुपपन्नानवद्यवादी

---

(१) यदार्थित्वविपरिणामः यदा ह्यर्थित्वं विपरिणतं भवति-पा० ४ पु० ।

(२) बालकेऽस्ति--पा० ४ पु० ।

(३) अधीष्व ब्रह्मचर्यं चरेति-पा० ४ पु० ।

ब्रूयादिति । अथापि विहितं वा अनूद्येत कामाद्वार्थः(१) कल्प्येतेति । विहितानुवचनं न्याय्यम् तत्रानुपपन्नप्रमाणकस्यार्थस्याभिधानं कामतः प्रकल्प्येत यो ह्यर्थः प्रमाणतो न सम्भवति तस्य यदभिधानं तत्र कामतः प्रकल्पनं सम्भवति यथा जायमानः कुमारकः ऋणवान् भवतीति । उपपन्नप्रमाणकस्याभिधानमनुवचनम् यथा जायमानशब्दो गृहस्थवचन इति । कथमवगम्यते गृहस्थ इति ? यज्ञसाधनत्वात् यस्मात् यजमानो यज्ञाङ्गं भवति साधने तु प्रयत्नव्यापारो दृष्टः न फले यथा पाकसाधनेषु काष्ठादिषु न पाके न लोष्ठादिषु असाधनेषु । शेषं भाष्ये ।

कथं पुनरिदं गम्यते फलार्थिन एतद्ब्राह्मणं भवतीति ?—

अधिकाराच्च विधानं विद्यान्तरवत् ॥ ६१ ॥ (२)

समारोपणादात्मन्यप्रतिषेधः ॥ ६२ ॥

समारोपणादात्मन्यप्रतिषेधः । यस्मान्निवृत्ते फलार्थित्वे समारोपणं विधीयते ।

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ ६३ ॥

पात्रचयान्तानुपपत्तेश्च फलाभावः । यस्मान्निवृत्ते ऽर्थित्वे प्रव्रजितानां पात्रचयान्तानि कर्माणि न क्रियन्ते यदि चेदं ब्राह्मणमविशेषेण प्रवर्त्तते तेन सर्वत्र पात्रचयान्तानि कर्माणि प्रसज्यन्त इति । शेषं भाष्ये ।

यत्पुनरेतत् क्लेशसन्ततेरविच्छेदादिति ?

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः ॥ ६४ ॥

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः । यथा सुषुप्तस्य

(१) कामार्थत्वादर्थः—पा० ४ पु० ।

(२) इदं सूत्रं न्यायसूचीनिबन्धे न दृश्यते ॥

स्वप्नादर्शने क्लेशानुबन्धो विच्छिद्यते सुखदुःखसाधनानुबन्धश्च तथा मुक्तस्यापीति तच्च योगिनो मुक्तस्य रूपमुदाहरन्तीति ।

यदपि प्रवृत्त्यनुबन्धादिति ?—

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ ६५ ॥

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य । विद्यमाना प्रवृत्तिः क्लेशमन्तरेण प्रतिसन्धानाय न भवतीति धर्माधर्मकारणं न भवतीति यावदुक्तं स्यात् । प्रतिसन्धिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म, तच्च तृष्णाकारितम् । एतच्चोक्तं वीतरागजन्मादर्शनादिति सूत्रे । कर्मवैफल्यप्रसङ्ग इति चेत् ? न, कर्मविपाकप्रतिसंवेदनस्याप्रत्याख्यानात् न—ब्रूमो विद्यमाने कर्माणि मुच्यत इति, अपि तु कर्माणि अन्ये जन्मनि विपच्यन्ते ॥

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६६ ॥

न क्लेशसन्ततेः स्वाभाविकत्वात् । नोपपद्यते क्लेशसन्ततेर्विच्छेदः । कुतः ? क्लेशसन्ततेः स्वाभाविकत्वात् । अनादिरियं क्लेशसन्ततिः स्वभावतः प्रवृत्ता न चासावुच्छेत्तुं शक्यते ।

तत्रैके परिहारं वर्णयन्ति—

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् ॥ ६७ ॥ (१)

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् । यथा प्रागुत्पत्तेरभावोऽनादिरथ च भावेन निवर्त्यते(२) एवमनादिः क्लेशसन्ततिरतत्त्वज्ञस्य तत्त्वज्ञानेन निरोत्स्यत इति ।

---

(१) विश्वनाथपञ्चाननास्तु प्रागुत्पत्तेः इत्यारभ्य अणुश्यामतानित्यत्ववद्वेत्यन्तमेकमेव सूत्रं पठन्ति ॥

(२) विरुध्यते—पा० ४ पु० ।

अणुश्यामतानित्यत्ववद्वा ॥ ६८ ॥

अणुश्यामतानित्यत्ववद्वा—यथाणोः श्यामता अनादिश्च अनित्या च एवं क्लेशसन्ततिरपीति । सतः खलु धर्मो नित्यत्वमनित्यत्वं चेति नित्यानित्यत्वे अवधारयद्भि(१)रुक्तं तत्त्वभावे भाक्तमिति । का पुनरिह भक्तिः ? नित्यमकारणम् अकारणश्च प्रागभावः अनित्यं भूत्वा न भवति । न च प्रागभावोभावे सति(२) भवत्येतत् सामान्यम् । यत्पुनरेतदनादिरणुश्यामतेति ? हेत्वभावादयुक्तम् । अनुत्पत्तिधर्मकमनित्यं नात्र हेतुरस्ति इति ।

अयं तु समाधिः—

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ ६९ ॥

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् । कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्चेति चार्थः । अनुभूतविषयप्रार्थना सङ्कल्प इत्युक्तम् । मिथ्यासङ्कल्पेभ्यो रञ्जनीय(३) कोपनीयमोहनीयेभ्यो रागादयः प्रादुर्भवन्ति । । कर्म च निकायनिर्वर्तकं सङ्कल्पापेक्षं रागादीन् जनयति । दृष्टो हि कश्चित् सत्त्वनिकायो रागबहुलो यथा पारावतादिः । कश्चित् क्रोधबहुलो यथा सर्पादिः । कश्चित् मोहबहुलो यथाजगरादिः । यदि कर्म रागादीन् निर्वर्तयेत् सर्वदा रागादिर्भवेदित्यनिर्मोक्षप्रसङ्गः ? न, कारणवैकल्यात्(४) सङ्कल्पाद्यपेक्षं कर्म रागादिकारणम् न निरपेक्षमिति । सुखादीनामपि तर्हि कर्मकारणं(कत्वं) न प्राप्तम् ! न निरपेक्षत्वात् कर्म सुखादिषु कर्तव्ये-

(१) नित्यानित्यत्वावधारयद्भिः—पा० ४ पु० ।
(२) प्रागभावे सति—पा० ४ पु० । (३) व्यञ्जनीय—पा० ४ पु० ।
(४) वैफल्यात्—पा० ४ पु० ।

पु मङ्कलं नापेक्षते ऽपि तु स्वकारणसन्निधानापेक्षं सुखादि करोति । यथोत्क्षेपणादिकर्म नोदनाद्यपेक्षं संस्कारं करोति अनपेक्षं तु संयोगविभागाविति । परस्परनिमित्तत्वं च रागादीनां दृष्टम्—रक्तो मुह्यति रक्तः कुप्यति कुपितो मुह्यति कुप्यति रज्यते चेति । यदपीदमुच्यते अनादिः क्लेशसन्ततिरिति ? तन्न, अविशेषात्—यथानादिः क्लेशसन्ततिरेवमाध्यात्मिका भावाः सर्वेऽनादिना प्रबन्धेन प्रवर्त्तन्ते न जातु अनुत्पन्नपूर्वं किञ्चिदुत्पद्यते । न चैवं किञ्चिदनुत्पत्तिधर्मकं व्ययधर्मकं(२) प्रतिज्ञायते अनुत्पन्नपूर्वं तु तत्त्वज्ञानं केवलमुत्पद्यते नान्यः कश्चिदाध्यात्मिको भाव इति ॥

(इत्यपवर्गपरीक्षाप्रकरणम् ।)

इति-औद्योतकरे न्यायवार्त्तिके चतुर्थस्याध्यायस्याद्यमाह्निकम् ॥

---

(२) व्यक्तधर्मकं—पा० ४ पु० ।

चतुर्थेऽध्यायः

द्वितीयमाह्निकम् ।

ॐ नमः परमात्मने ।

तदिदं तत्त्वज्ञानमुत्पद्यमानं किं विषयमात्रे भवति आहोस्विद्विषयविशेष इति । विषयमात्रे तावदशक्यं तत्त्वज्ञानेन भवितुम् । कुतः ? विषयाणामानन्त्यात् । विषयविशेषे ऽपि तत्त्वज्ञानविषयत्वेन योऽवतिष्ठते स विभज्य वचनीयः । तत्र विषयान्तराणामात्मादिप्रमेयव्यतिरेकिणां निराकरणं प्रमेयविशेषविषयत्वात् सूत्रस्य—यत्तदात्मादिसूत्रं न तेन प्रमेयमात्रमभिधीयते । प्रमेयमात्राभिधाने हि आत्मादिग्रहणं व्यर्थम्, अपि तु प्रमेयविशेषः यस्तत्त्वज्ञानविषयत्वेन व्यवतिष्ठमानः संसारव्यवच्छेदहेतुर्भवति यश्च मोहविषयत्वात् संसारं प्रतनोति स तत्त्वतो ज्ञेय इति । तस्मिन् अयं प्रश्नः किं नु खलु भो यावन्तो विषयाः तावत्सु तत्त्वज्ञानं प्रत्येकमुत्पद्यते अथ क्वचिदुत्पद्यते इति ? । न तावत् प्रत्येकम्—आत्मादेरानन्त्यात् । किमिदमानन्त्यम् ? इयत्तामत्ययाविषयत्वम् । अथ क्वचिदुत्पद्यते ? यत्र नोत्पद्यते(१) तत्त्वज्ञानं तत्राऽनिवृत्तो मोहः यत्र मोहस्तत्र रागद्वेषाविति रागद्वेषमोहाश्च बन्धनमित्यनिर्मोक्षप्रसङ्गः । अथ मन्यसे ऽन्यविषयं तत्त्वज्ञानमन्यविषयं मोहं निवर्तयति ? एवं च सत्यपवर्गः प्राणिमात्रे प्राप्नोति(२) न हि कश्चित् प्राणी

(१) नोत्पन्नं—पा० ४ पु० (२) भवति—पा० ४ पु० ।

कस्य चिदर्थस्य तत्त्वं न वेत्ति ? न, मोहार्थापरिज्ञानात्—न तत्त्वज्ञानस्यानुत्पत्तिमात्रं मोहोऽपि तु मिथ्याज्ञानं मोहः, तच्च मिथ्याज्ञानं यस्मिन् विषये प्रवर्तमानं संसारबीजं भवति स विषयस्तत्त्वतो ज्ञेय इति । किं पुनस्तन्मिथ्याज्ञानम् ? अनात्मन्यात्मप्रत्यय(१) इति । शेषं भाष्ये ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ १ ॥

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः । शरीरादिदुःखान्तं प्रमेयं दोषनिमित्तम्, तद्विषयत्वान्मिथ्याज्ञानस्य, तद्विषये तत्त्वज्ञानमुत्पन्नं तद्विषयमहङ्कारं निवर्तयति समाने विषये तयोर्विरोधात् । सर्वं चैतदुक्तं द्वितीयसूत्रे इति ।

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः॥२॥

दोषनिमित्तं रूपादयो विषयाः संकल्पकृताः । कामा विषया इन्द्रियार्था रूपादय उच्यन्ते । तत्र ते विषया मिथ्यासङ्कल्प्यमाना रागादीन् जनयन्ति । कः पुनरेषां मिथ्यासङ्कल्पः ? असाधारणप्रत्ययोत्पत्तिनिमित्तत्वेन व्यवसायो संभवत इति । तान् साधारणतया प्रतिसञ्चक्षीत(२) नैते मम देवचौराग्निदायादसाधारणा इति । एवमेतस्य प्रतिसञ्चक्षाणस्य(३) यो व्यवसायस्तद्विषयो मोहः स निवर्तत इति । तन्निवृत्तावध्यात्मं शरीरादीन् प्रतिसञ्चक्षीत । किं पुनः प्रसंख्यानं ? शरीरादिषु नैते आत्मान इति व्यतिरेकदर्शनं प्रसंख्यानम् । सोऽयमध्यात्मं बहिश्च विविक्तचित्तो विहरन् मुक्त इत्युच्यते । एतच्च त आहुः—

---

(१) आत्मग्रह-पा० ४ पु० । (२) प्रसञ्चक्षाति-पा० ४ पु० ।
(३) प्रसञ्चक्षाणस्य-पा० ४ पु० ।

"जीवन्नेव विद्वान् संहर्षायासाभ्यां मुच्यते" इति ।

अतः परं का चित्सञ्ज्ञा भावयितव्या का चिद्धेया इत्युपदिश्यते । नार्थनिराकरणं नार्थोपादानं,किं तु यथाऽव्यवस्थित(१) एव विषये किञ्चिद्भावनीयं किञ्चित् निराकरणीयमिति ।

तन्निमित्तं त्ववयव्यभिमानः ॥ ३ ॥

तन्निमित्तं तु अवयव्यभिमानः । तेषां दोषाणां निमित्तमवयव्यभिमानः । तत्रावयवीति सञ्ज्ञा भावनीया स्त्रीसञ्ज्ञा हेया सपरिष्कारा(२) पुरुषस्य, परिष्कारो बन्धनं स्त्रियाः पुरुषसञ्ज्ञा सपरिष्कारेति । तत्रापि च द्वे सञ्ज्ञे निमित्तसञ्ज्ञा अनु (अर्थ)व्यञ्जनसञ्ज्ञा च । निमित्तसञ्ज्ञा दन्तौष्ठमिति । दन्तादिषु दन्तत्वादिनिबन्धना सञ्ज्ञा (अर्थ)-व्यञ्जनसञ्ज्ञा (च) इत्थं दन्ता इत्थमोष्ठाविति इत्थमित्यध्यारोपेण निमित्तस्य सेयमध्यारोपेण भाव्यमाना(३) सञ्ज्ञा मोहः । स च रागादिकारणमिति हेयः । न पुनरवयवी निराकार्यः(४) प्रमाणतस्तथाभावादिति ॥

अथेदानीमर्थं निराकरिष्यता अवयविन्युपपाद्यते ।

विद्याविद्याद्वैविध्यात् संशयः ॥ ४ ॥

विद्याविद्याद्वैविध्यात् संशयः । सदसतोरुपलम्भात् द्विविधा विद्या । सदसतोरनुपलम्भात् अविद्याऽपि द्विविधैव । एवं चावयवी यद्युपलभ्यते अथ नोपलभ्यते न कथञ्चन संशयात् मुच्यते इति । तत्र तावदुक्तं न विद्याविद्याद्वैविध्यं संशयस्य कारणम् उपलब्ध्यनुपलब्ध्योः पूर्वपदविशेषणत्वात् ।

---

(१) व्यवहित–पा० ४ पु० । (२) अनुपरिष्कारा–पा० ४ पु० ।
(३) उच्यमाना–पा० ४ पु० । (४) निराकर्तव्यः–पा० ४ पु० ।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ॥ ५ ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् । तस्मिन्नवयविनि संशयो न युक्तः पूर्वोक्तानां हेतूनामप्रतिषेधात् तत्र ये ऽवयविनोऽर्थान्तरभावे हेतव उद्दिष्टास्ते न शक्या प्रतिषेद्धुमिति ।

वृत्त्यनुपपत्तेरपि तर्हि न संशयः(१) ॥ ६ ॥

वृत्त्यनुपपत्तेरपि तर्हि संशयानुपपत्तिः । नास्त्येव ह्यवयवीति । तद्विभजते—

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः(२) ॥७॥

कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः । अवयवा अवयविनि वर्तेरन् अवयवी वा अवयवेषु । अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते एकदेशेन वा । तत्र तावदवयवा अवयविनि कृत्स्नेन वर्तन्ते अवयवावयविनोः परिमाणभेदात् । अल्प(३)परिमाणोऽवयवो महापरिमाणश्चावयवीति अल्प(४)परिमाणेन महापरिमाणस्याव्याप्तिः । एकद्रव्यश्चावयवः प्राप्नोति । एकावयविवृत्तित्वात् । न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति नाप्यवयव्येकदेशेन वर्तते । न ह्यस्यान्ये ऽवयवा एकदेशभूताः सन्ति । तस्मिन्नपि चैकदेशेन वर्तमानोऽवयवः किमेकदेशेन वर्तते कृत्स्नेन वेति पूर्ववत् प्रसङ्गः ।

अथावयवेषु अवयवी वर्तते ?–

---

(१) संशयानुपपत्तिरिति–पा० ४ पु० । विश्वनाथसम्मतोऽपि ।
(२) न्यायसूचीनिबन्धे ऽपि सूत्रमिदं दृश्यते । किं तु विश्वनाथेनानवधृतम् ।
(३) अणु–पा० ४ पु० । (४) अणु–पा० ४ पु० ।

तेषु चावृत्तेरवयव्यभावः(१) ॥ ८ ॥

तेषु चावृत्तेरवयव्यभावः । न तावत् प्रत्यवयवं कृत्स्नो वर्तते तयोः परिमाणभेदात् अवयविनश्च एकद्रव्यताप्रसङ्गात् । एकावयववृत्तित्वादेकद्रव्योऽवयवी प्राप्नोति एकद्रव्यश्चावयवी एकेन द्रव्येणारभ्यत इति सततोत्पत्तिप्रसङ्गः । किञ्च एकद्रव्यत्वात्(२) द्व्यणुक(३)मेकस्मिन् परमाणौ वर्तत इति कारणविभागविनाशाभावात् नित्यं प्राप्नोति उत्पत्तिमच्च नित्यं चेति न दृष्टान्तोऽस्ति । अथाप्यवयवी एकदेशेन वर्तते ? तथापि अवयविन आरम्भकावयव्यतिरिक्तावयवाः प्राप्नुवन्ति ये ऽवयवेषु वर्तन्त इति ।

पृथक् चावयवेभ्योऽवयव्यवृत्तेः ॥ ९ ॥

पृथक् चावयवेभ्योऽवयव्यवृत्तेः । नाप्यवयवव्यतिरेकेणान्यत्र वर्तते अग्रहणान्नित्यत्वप्रसङ्गात् च । अवयवव्यतिरेकेणान्यत्र वर्तमान उपलभ्येत नित्यश्च स्यादनाधारं द्रव्यं नित्यमिति ।

न चावयव्यवयवाः ॥ १० ॥

न चावयव्यवयवाः । न चावयवानां धर्ममात्रमवयवी । कस्मात् ? धर्मस्यावयविनो धर्मिभिरवयवैः पूर्ववत् सम्बन्धोऽनुपपन्नः । न चात्र धर्मिभ्योऽवयवेभ्योऽवयवी धर्मः पृथगुपलभ्यते नित्यत्वप्रसङ्गादिति च समानम् । अवयवी चैकदेशेन अवयवे वर्तत इति अवयवसमूहमात्रमवयवी प्राप्नोति । एकस्मिंश्चावयवे एकदेशेन वर्तमानोऽवयवी एकावयवोपलम्भात् एकदेशोपलब्धौ तत्स्थानोऽवयवी गृह्येत न त्वेकतन्तुदर्शने

(१) विश्वनाथेनावधृतम् ।

(२) एकद्रव्यवृत्तित्वात्-पा० ४ पु० ।

(३) एकद्रव्यं यद्द्व्यणुकं-पा० ४ पु० ।

पटोपलब्धिर्भवति। तदेवं मुक्तसंशयोऽभिधीयते नास्त्यवयवीति।

यत्तावदवयवा आवयविनि वर्तन्त इति? तन्न, अनभ्युपगमात्—न कारणं कार्ये वर्तते ऽपि तु कारणे कार्यमिति(१)। यत् पुनरेतदवयव्यवयवेषु वर्तमान एकदेशेन वर्तते कृत्स्नो वा वर्तत इति? तन्न—

एकस्मिन् भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः। कृत्स्नमिति च एकदेश इति च भेदविषयावेतौ शब्दौ, न चैतावेकस्मिन्नुपपन्नौ—अनेकस्याशेषता कृत्स्नशब्दस्यार्थः अशेषस्य कस्य चिदभिधानमेकदेशशब्दस्य। न चैतदिहोपपद्यते इति। तस्मान्नावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति।

अवयवान्तराभावे(२) ऽप्यवृत्तेरहेतुः ॥ १२ ॥

अवयवान्तराभावे ऽप्यवृत्तेरहेतुः। अवयवान्तराभावादिति। यद्यवयवव्यतिरिक्तमवयवान्तरं प्रतिपद्येथाः? तथाप्यवयवोऽवयवे वर्तते नावयवीत्यहेतुः अवयवान्तराभावात् नैकदेशेन वर्तते इति। एकं(३) चानेकत्र वर्तते इति प्रतिजानानो नानुयोक्तव्यः उभयेन व्याघातादित्युक्तम्। यद्यवयवी नैकदेशेन वर्तते न कृत्स्नो वर्तते अथ कथं वर्तत इति? वृत्तिरवयवेषु आश्रयाश्रयिभावः(४) समवायाख्यः सम्बन्धः। स कथं भवतीति? यस्य यतोऽन्यत्रात्मलाभानुपपत्तिः स (तत्र)

(१) किं तु कार्यं कारण इति—पा० ४ पु०।
(२) अवयवान्तरभावेऽपि इति—पा० २ प०।
(३) कथं—पा० ४ पु०।
(४) आश्रयाश्रितभावः—पा० ४ पु०।

तत्रैव वर्तत इति—न खलु कारणद्रव्येभ्योऽन्यत्र कार्यद्रव्यमात्मानं लभत इति । विपर्ययस्तु कारणद्रव्येषु—न कारणानि कार्यद्रव्येषु आत्मानं लभन्त इति । कथं नित्येषु आश्रयाश्रयिभावः(१) अनित्येषु दर्शनात् सिद्धं नित्येषु—यथाऽनित्यानि यत्रोपलभ्यन्ते तत्र वर्तन्ते तथा नित्यान्यपि यत्रोपलभ्यन्ते तत्र वर्तन्त इति एतत् समानमनित्यानां नित्यैः ।

रूपान्तरानिर्देशादिति चेत्?— अथ मन्यसे यदि व्यतिरिक्तोऽवयवी भवति तस्यावयव(रूपादि) व्यतिरेकेणावयविनो रूपान्तरं निर्देष्टव्यम् यथाऽचित्रास्तन्तवः पटं चित्र(२)मारभन्त इति ? न, उपलभ्यमान(३) रूपाद्याधारत्वात् —यदवयविनो रूपमुपलभ्यते तदस्य रूपं यथाऽवयवस्य,कार्यकारणभावाभ्युपगमाच्चाऽ(४)विरुद्धः—अवयविनो रूपं निर्दिश्यतामिति ब्रुवाणेन अवयवावयविनौ तावदभ्युपगतौ तदभ्युपगमाच्च विरुद्धः एतावानेवायं विवाद इत्यभ्युपेतहानिः । उपेत्य चित्र (त्रि)वादं ब्रूमः पटस्य चित्रं रूपमिति ।

अनेकत्वप्रसङ्ग इति चेत् ?—अथ मन्यसे चित्रं रूपमवयविनोऽभ्युपगच्छता ऽनेकरूपोऽवयव्यभ्युपगतो भवति न चैकं द्रव्यमनेकरूपम्, नाप्यनेकस्मिन् एकमिति(५) ? न, चित्रशब्दस्यैकानेकविषयत्वात(६)—चित्रशब्देनैकं चाभिधीयते अनेकं च, चित्रं रूपं, चित्राणि रूपाणीति । न, एकस्मिन्न-

(१) नित्येषु कथमाश्रयाश्रितभावः-पा० ४ पु० ।
(२) पटमात्र—पा० ४ पु० ।
(३) नोपपद्यमान-पा० ४ पु० ।
(४) कार्यकारणभावानभ्युपगमाच्च-पा० ४ पु० ।
(५) नाप्येकस्मिन्ननेकम्-पा० ४ पु० ।
(६) शब्दस्य नैकैकविषय-पा० ४ पु० ।

दृष्टत्वात्—न हि एकस्मिन् चित्रं दृष्टमिति ? नाभ्युपेतहानेःएकं चित्रमित्यनभ्युपगच्छताऽनेकं चित्रमिति हेयम्—एकचित्रसमुच्चयो ह्यनेकं चित्रमिति । अथानेकमचित्रं चित्रमित्युच्यते ? एवमप्यनिवृत्तो व्याघातः अचित्रं चित्रमिति यथाऽशुक्लं शुक्लमिति । अथाचित्राणि तन्तुरूपाणि संहत्य पटे चित्रं रूपमुत्पादयन्तीति(१) पक्ष आश्रीयते ? एवं चैतस्मिन्न किञ्चिद् बाध्यते । पुटान्तरे प्रसङ्गश्चित्रप्रत्ययस्य—यस्य पटस्य एकं चित्रं पार्श्वं द्वितीयमविचित्रं तेन यथैकस्मिन् पार्श्वे तं पटं पश्यतश्चित्रमिति बुद्धिर्भवति(२) एवं पुटान्तरेऽपि चित्रपटबुद्ध्या भवितव्यम् ? भवतैवेदमुक्तम्—यस्य पटस्यैकं पार्श्वं चित्रं स तु पटो न चित्रः पार्श्वस्यापटत्वात् । चित्रप्रत्ययस्तत्र कस्मान्नेति चेत् ? चित्राचित्राभ्यां पार्श्वाभ्यां पट आरभ्यमाणश्चित्रः पट इति यथा पुटान्तरे(३) चित्रप्रत्यय एवं चित्रप्रत्ययः पुटान्तरेऽपि(४) प्रसक्तः(५) ? न प्रसक्तः—एकस्य चित्ररूपस्यानारम्भकत्वात्—एकस्मिन् पार्श्वे चित्रं रूपं तत्कथमवयविनि रूपान्तरमारप्स्यत इति । एतावच्च शक्यं वक्तुम्—अवयवरूपाभ्यामवयविनि रूपान्तरमारभ्यत इति तथोपलब्धेः । यद्ययमरूपोऽवयवी स्यात् नोपलभ्येत । न तावदवयवरूपादवयविनो ग्रहणं युक्तम्(६) वायोरप्युपलब्धिप्रसङ्गात्—यद्यन्यरूपादन्यस्योपलब्धिर्भवति वायोरप्युपलब्धिः प्राप्नोति, न चैतदस्ति । तस्मात् स्वरूपादवयव्युपलभ्यते । उभयावय-

(१) चित्ररूपमारभन्ते-पा० ४ पु० ।

(२) चित्रपटबुद्धिर्भवति-पा० ४ पु० ।

(३) घटान्तरे—पा० ६ पु० ।

(४) पटान्तरे-प० ४ पु० । (५) प्रसङ्गः-पा० ४ पु० ।

(६) न चावयवरूपाभ्यामन्यदवयविनो ग्रहणं युक्तम्-पा० ४ पु०।

वदर्शनप्रतिसन्धानाच्चावयविनि रूपोपलब्धिर्भवति । न चैवं सत्यरूपोऽवयवीति—तस्मादवयव्यभिमानः प्रतिषिध्यते सपरिष्काररूपो नावयवीति, यथा रूपादिषु मिथ्यासंकल्पो न रूरूपादय इति । अयं चार्थो मुनिना श्लोकेन दर्शितः—

"इन्द्रियार्था ह्यनर्थाय यदि स्युरविकल्पिताः ।
सर्वोऽनर्थेन युज्येत चरन्निन्द्रियगोचरः" इति ।

सर्वाग्रहणमवयव्यसिद्धेः इति प्रत्यवास्थितोऽथेदमाह—

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥१३॥

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः । यथा एकैकः तैमिरिकेण नोपलभ्यते केशसमूहस्तूपलभ्यते तथा एकैकशोऽणुर्नोपलभ्यते अणुसमूहस्तूपलभ्यत इति, तदिदमणुसमूहविषयं ग्रहणमिति ।

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ १४ ॥

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः । न हीन्द्रियं प्रकृष्यमाणं स्वविषयमतिक्रामति । न हि चक्षुः प्रकृष्यमाणं रसं गृह्णाति नाप्यपकृष्यमाणं स्वविषयात् प्रच्यवते, अपि तु स्वविषय एवेन्द्रियस्य प्रकर्षापकर्षापेक्षाणि पटुमन्दभावेन ग्रहणानि भवन्तीति । तत्र पटुग्रहणं—सामान्यविशेषवद्वस्तु ग्रहणमिति । मन्दं तु ग्रहणं(१) सामान्यमात्रालोचनमिति । सोऽयं तैमिरिकः कश्चित् चक्षुर्विषयं केशं न गृह्णाति केशसमूहं च गृह्णाति उभयं हि अतैमिरिकस्य चक्षुषो विषय इति । परमाणवस्त्व-

(१) मन्दग्रहणं तु—पा० ४ पु० ।

तीन्द्रिया दर्शनविषयत्वं न प्रतिपद्यन्ते । संहता ऐन्द्रियका असंहता अतीन्द्रिया इति महान् व्याघातः अनुपजातविशेषाणां दर्शनविषयत्वानुपपत्तेः । तस्मादुत्पद्यते ऽवयवी यो दर्शनस्य विषय इति । समुच्चयमात्रं(१) दर्शनस्य विषय इति चेत् ? अथ मन्यसे दर्शनस्य परमाणुसमुच्चयमात्रं विषयः समुच्चिताः परमाणवो दर्शनस्य विषयतामुपयान्तीति ? न, समुच्चयस्य संयोगभावात्—समुच्चयोऽपि निरूप्यमाणः परमाणुसंयोगः, संयोगश्चोपलभ्यमानाश्रय उपलभ्यते । भवति हीदमनेन संयुक्तमिति, यश्च विषय उपलभ्यते तस्यानुपलब्धौ चावरणं कारणमुपलभ्यते, न तु परमाणव उपलब्धिलक्षणप्राप्ताः । तस्मान्न तेषामावरणादेरग्रहणकारणा(२)दग्रहणमिति ॥

अवयवावयविप्रसङ्गश्चैवमा प्रलयात्(३) ॥ १५ ॥

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् । यश्चावयविनोऽवयवे वृत्तिविकल्पादभाव उक्तः सोऽवयवस्यावयवेषु प्रसज्यमानः प्रलयाद्वा निवर्तेत निरवयवाद् वा परमाणुतो निवर्तेत । कथमिति ? यथाऽवयव्यवयवेषु वर्तमानः प्रत्येकं सर्वात्मना वा एकदेशेन वा वर्तेतेत्युक्तम्, तथावयवोऽवयवेषु वर्तमानस्तदवयवोऽप्यवयवेषु इत्येवं यावत् परमाणुरिति यावद्वा प्रलयोऽनिवृत्तिर्वेति सर्वथोपलब्धि(४)विषयो नास्ति, उपलब्धिविषयं चाश्रित्यायं वादः किमवयव्येकदेशेन वर्तते उत सर्वात्मना वर्तत इति । सोऽयमाश्रयं व्याघ्नन्नात्म(व्या)घाताय कल्पत इति ।

---

(१) सर्वत्र समुच्चयशब्दस्थाने सञ्चय इत्येव पाठः २ पु० ।

(२) तेषामनावरणादेरग्रहणकारणा-पा० ४ पु० ।

(३) प्रसङ्गश्चाप्रलयात्—पा० ४ पु० ।

(४) सर्वोपलब्धि—पा० ४ पु० ।

न प्रलयोऽणुसद्भावात् ॥ १६ ॥

न प्रलयोऽणुसद्भावात् । न चास्ति प्रलयोऽणुसद्भावात् । अयं च खलु विभज्यमानभेदस्तावद् वर्तते यावत् परमाणुरिति । परमाणुर्नाम विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात्—लोष्टस्य विभज्यमानावयवस्याल्पतरमल्पतममुत्तरमुत्तरं भवति, स चायमल्पतरप्रसङ्गो यतो निवर्तते यतो नाल्पीयोऽस्ति तं परमाणुं प्रचक्ष्महे(१) इति ।

अथ न परमाण्वन्तो विभागः? तेन—

परं वा त्रुटेः ॥ १७ ॥

परं वा त्रुटेः । अवयवविभागस्याऽनन्त्यात् त्रुटिरमेयः प्राप्नोति संख्यापरिमाणगुरुत्वैस्तावत्परिमाणस्त्रुटिः इयदत्र गुरुत्वं वर्तते (इति) इयन्तश्च परमाणवः संहतास्त्रुटिभावमापद्यन्त इति नावधारणं युक्तम् । किं कारणम्? यथैवानेकपरमाणुसंघातो हिमवान् संख्यापरिमाणगुरुत्वैरमेयः तथा त्रुटिरपि भेदस्यानन्त्यात् प्रसज्यते । अथ प्रलयान्तो विभागः? सोऽपि न युज्यते विभागस्य विभज्यमानहानानुपपत्तेः न प्रलयान्तो विभागः स चायं विभागो विभज्यमानाधारो विभज्यमानश्च(२) नास्ति विभागोऽस्तीति व्याघातः । विभज्यमानावयवं परमाणुं प्रतिपद्यमानेन सावयवः परमाणुः प्रतिपत्तव्यः । सावयवत्वे च परमाणुशब्दस्यार्थो वाच्यः किमुक्तं भवति परमाणुरिति ? । ये च परमाणोरवयवास्ते किं समानपरिमाणा उत भिन्नपरिमाणा इति ? । यदि समानपरिमाणा ? अवयवावयविभावो दुरुपपादः

---

(१) आचक्ष्महे–पा० ४ पु० ।

(२) विभज्यमानाधारश्च–पा० ४ पु० ।

न हि वयं समानपरिमाणानां क्वचिदवयवावयविभावं पश्यामः । अथ भिन्नपरिमाणाः ? न परमाणुः प्रतिषिध्यते कार्यमिदं परमाणुरिति कृत्वा प्रतिषिध्यते ।

(इति अवयवावयविप्रकरणम् ।)

अथेदानीमानुपलम्भिकः सर्वं नास्तीति मन्यमान आह—

आकाशव्यतिभेदात्तदनुपपत्तिः ॥ १८ ॥

आकाशव्यतिभेदात्तदनुपपत्तिः । आकाशेन परमाणुर्व्यतिभिन्नः व्यतिभेदादनित्यो घटवदिति ।

आकाशासर्वगतत्वं वा ॥ १९ ॥

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः ॥ २० ॥

आकाशासर्वगतत्वं वा । अथ परमाणोरन्तराकाशं नास्ति असर्वगतं तर्ह्याकाशं प्रसज्यते ऽन्तःपरमाणूनामसम्बन्धात् ।

आकाशव्यतिभेदादनित्यः परमाणुरित्यभिदधानो व्यतिभेदार्थं प्रष्टव्यः किमुक्तं भवति आकाशव्यतिभेदादिति ? । यदि परमाण्वाकाशसम्बन्धो व्यतिभेदः ? तदाऽत्र न किञ्चिद् बाध्यते न हि आकाशसम्बन्धात् परमाणोर्नित्यत्वमनित्यत्वं वा प्रसज्यत इति । अथ सम्बन्धमात्रमेवानित्यताकारणं ब्रूयात् ? तथाप्याकाशग्रहणं व्यर्थम्—सम्बन्धमात्रस्यानित्यतासाधकत्वात्—न हि कृतकत्वस्य साधनभावे देवदत्तकृतकत्वादिति युक्तं वक्तुम् । संयोगमात्रं चोत्तरसूत्रेणानूद्यते चरितार्थं संयोगोपपत्तेरिति तदेतदेव पुनरुच्यते इति । तस्मान्नायं (१)व्यतिभेदार्थः ।

---

(१) पर-इत्यधिकं ४ पु० ।

अथ परमाण्वन्तःसम्बन्धो व्यतिभेदः? सोऽपि न युक्तः अकार्यत्वात् परमाणोः।

अन्तर्बहिरिति कार्यस्य कारणान्तरवचनम्, अकार्यश्च परमाणुस्तस्मान्नान्तर्बहिरिति। अथ परमाण्ववयवसम्बन्ध आकाशेन व्यतिभेदः? एतदपि तादृगेव, परमाणोरकार्यत्वान्न तस्यावयवा इति। अथ परमाण्ववयवानां विभागो व्यतिभेदः? सोऽप्यकार्यत्वेनैव प्रत्युक्तः। कार्यस्यावयवा विभज्यन्ते अकार्यश्च परमाणुरिति। तस्मान्नावयवविभागः। उपेत्य परमाणोरवयवान् न तद्विभागस्याकाशं कारणं, कर्मजो हि विभागः तस्याकाशमपि कारणमिति न न्यायोऽस्ति। आकाशं च विभागहेतुत्वेन प्रतिपद्यमानः सर्वभावानामनवस्थानं प्रतिपद्येत। न हि सन्निहिते विभागहेतावाकाशे भावानामवस्थानं युक्तम्। अथ सदप्याकाशं निमित्तान्तरमपेक्षते? तद्व्यतिरेकेणाकाशस्यापि तदुत्पत्तावस्ति सामर्थ्यमिति प्रमाणाभावः। अथान्तः सुषिरं व्यतिभेदः? एतदपि नास्ति—सर्वतो ऽव्यवहितस्य यस्य मध्ये ऽवयवा न सन्ति तत्सुषिरं, न च परमाणोरवयवाः सन्ति, कुतः सुषिरं व्यतिभेदः। न चान्या गतिरस्ति। तस्मादाकाशव्यतिभेदादिति शून्यमभिधानम्। यत् पुनरेतदाकाशमसर्वगतं प्रसज्यते अन्तःपरमाणुनाऽसम्बन्धादिति? न, सर्वगतार्थापरिज्ञानात्—नायं सर्वगतार्थो यन्नास्ति तेन सम्बन्ध इति, अपि तु यन्मूर्तिमत् तेन सर्वेण सम्बन्ध इति(१) सर्वगतत्वार्थः। न च परमाणोर्मध्यमस्ति तस्मान्न तेनासम्बन्धादाकाशमसर्वगतं प्रसज्यत इति।

(१) तेन सर्वेण सम्बद्ध्यत–पा० २ पु०।

सर्वसंयोगशब्दविभवाच्च सर्वगतम्(१) ॥ २१ ॥

सर्वसंयोगशब्दविभवाच्च सर्वगतम् । यस्मात् सर्वमूर्तिमद्भिः संयोगाः विभवन्ति आकाशे तदाश्रया भवन्ति, शब्दाश्च स्वकारणसन्निधानादुपजायमाना सर्व एवाकाशमाश्रयन्त इति सर्वगतमाकाशम् ।

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ २२ ॥

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः । सर्पता क्रियावता द्रव्येणाकाशं न व्यूह्यते— सर्पतश्च क्रियावतो द्रव्यस्य क्रियाहेतुं गुणं न प्रतिबध्नाति । कस्मात् ? अस्पर्शत्वात् यत् स्पर्शवत् भवति तद्व्यूह्यते प्रतिबध्नाति च, न त्वेवंधर्मकमाकाशं तस्मादप्रतिघातीति । स भवान् सावयवे स्पर्शवति द्रव्ये दृष्टं धर्मं विपरीते नाशङ्कितुमर्हतीति । उक्तं चात्र—यदि परमाणुर्विभज्यते परमाणुर्न स्यात् । किं कारणम् ? विभागे ऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानमिति । विनाशश्च परमाणोर्भवन् कारणविनाशाद्वा कल्प्येत कारणविभागाद्वा । उभयं च नास्ति परमाणोरकार्यत्वादित्युक्तम् । तस्मान्नाकाशव्यतिभेदादनित्यत्वमिति ।

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ २३ ॥

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः । सावयवाः परमाणवो मूर्तिमत्त्वादिति संस्थानवत्त्वाच्च सावयवा इति । संस्थानवत् सावयवं दृष्टं घटादि, संस्थानवन्तश्च परमाणवः तस्मात् सावयवा इति ।

---

(१) शब्दसंयोगविभवाच्च सर्वगतमिति न्यायसूचीनिबन्धे । विश्वनाथसम्मतोऽपि ।

संयोगोपपत्तेश्च ॥ २४ ॥

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ २५ ॥

संयोगोपपत्तेश्च । सावयवत्वं संयोगित्वादिति सूत्रार्थः ।

नन्विदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थं संयोगविशेषस्य संस्थानशब्देनाभिधानात् ?, न (च) चरितार्थं, अवयवसंयोगविशेषस्य संस्थान(व)त्वेनाभिधानात् संयोगमात्रं च संयोगशब्देनाभिधीयत इति न दोषः । तत्र मूर्तिर्नामाऽव्यापिद्रव्यस्य षड्विधं(१) परिमाणम्—अणु महद्दीर्घं ह्रस्वं परमह्रस्वं परमाण्विति । संस्थानं नाम प्रचयाख्यः संयोगः । संयोगोऽप्राप्तिपूर्विका प्राप्तिरिति । यत् तावत् मूर्तिमत्त्वात् सावयवा इति ? तन्न, अनेकान्तात्—यः परमाणोरवयवः स मूर्तिमांश्च निरवयवश्चेत्यनेकान्तः । अथ मूर्तिमत्त्वात् तस्याप्यवयवाः सन्ति ? एवं सति त्रुटिरमेयः प्राप्नोति गुरुत्वसंख्यापरिमाणैरित्युक्तम् । अथ तावन्मूर्तिमद्विभज्यते यावदन्त इति ? अन्तो निरवयव इति वाच्यम्(२) । अथान्तो विभागः ? स न युक्तः विभागस्य विभज्यमानैर्विनाऽनुपपत्तेरिति । एतावच्चैतत् स्यात् परमाण्वन्तो विभागः प्रलयान्तो वा अनन्तो वा, यदि परमाण्वन्तोऽनेकान्तः व्याहतं भवति परमाणुर्मूर्तिमाँश्च न च सावयव इति । कः पुनरत्र व्याघातः ? निरवयवं मूर्तिमन्तं च परमाणुं प्रतिपद्यसे सावयव इति च ब्रवीषि । प्रतिपत्त्या व्याहन्यते । अनन्ते प्रलयान्ते च व्याघातः । त्रुटेरमेयत्वप्रसङ्गः विभागस्य चानाधारत्वप्रसङ्गः । सावयवः परमाणुरिति च प्रतिज्ञापदे व्याहते । कथमिति ? सावयवशब्दस्यार्थः

(१) अव्यापिनो द्रव्यस्य षड्विधं—पा० ४ पु० ।

(२) इत्युक्तम्—पा० ४ पु० ।

समानजातीयारब्धं समानजातीयाश्रितम् अवयवः तदाधार इति । सावयवः परमाणुरिति ब्रुवता कार्यविशेषः परमाणुरित्युक्तं भवति। कार्यविशेषः परमाणुश्चेति व्याहतम् । अथैकपरमाणुपूर्वकत्वं परमाणोः प्रतिपद्यसे तथा च न परमाणुः सावयव इति नास्यावयवाः सन्ति किं तु कृतकः परमाणुपूर्वकत्वात् । एतच्च न दृष्टान्ताभावात्-एकं कारणमिति न दृष्टान्तोऽस्ति एकेन चारभ्यमाणस्य परमाणोर्न कारणसामग्र्यपेक्षणमस्तीति न प्रागभावो युक्तः यस्य प्रागभावो नास्ति तस्य चोत्पादोऽपि न युक्तः । अथैकशब्दपूर्वकत्वे सति शब्दादीनां प्रागभावादि प्रतिपद्यते ? तदप्यसिद्धम्-नैकं कारणमस्ति आश्रयाद्यपेक्षः शब्दः शब्दान्तरं करोतीति ।

प्रतिपद्यापि चैकपरमाणुपूर्वकत्वं परमाणोः कः सावयवार्थः कतमस्तत्रावयवः कतमस्तत्रावयवीति ? । अथ कारणमेवावयव इति ? न कार्यपरमाणुकाले कारणपरमाणुरस्तीति सावयवार्थो वक्तव्यः । मूर्तिमत्त्वात् सावयवः परमाणुरिति ब्रुवाणो विकल्पतः पुनः पर्यनुयोज्यः केयं मूर्तिः ? यया मूर्त्या मूर्तिमान् परमाणुरिति, सत्यां च मूर्तौ किमर्थान्तरमनर्थान्तरं वा परमाणोर्मूर्तिरिति ? यदि रूपादिविशेषो मूर्तिर्न भवत्पक्षे तया मूर्त्या मूर्तिमान् कश्चन । न च रूपादिव्यतिरिक्तं प्रमाणेन परमाणुं प्रतिपद्यते सर्वापकर्षप्राप्ता रूपादय एव परमाणुः न च रूपादिभीरूपादयो रूपादिमन्तः न चानर्थान्तरभावे मतुब्व्युत्पादनं पश्यामः । ननु दृष्टोऽनर्थान्तरभावेऽपि मतुप्प्रत्ययो यथा हस्तिमती सेनेति ? न दृष्ट इति ब्रूमः । यथा च सेना(न)र्थान्तरं तथोक्तमिति । असति चार्थान्तरभूते परमाणावसत्यां च मूर्तौ सावयवाः परमाणवो मूर्तिमत्त्वादिति वाक्यस्यार्थो रूपादयो रूपादिमन्तो रूपादिमत्त्वा-

दिति। एतेन पटो मूर्त्तिमत्त्वात् सावयव इति प्रत्युक्तम्। न च रूपादिव्यतिरिक्तं पटं प्रतिपद्यसे न मूर्त्तिमत्त्वम् अथ च मूर्त्तिमत्त्वात् सावयवः पट इति च ब्रवीषि। व्यतिरेकाभ्युपगमे व्याघातः अनभ्युपगमे नार्थः सिद्ध्यतीति ? दृष्टान्तस्योभयधर्मसिद्धत्वात् न पटे सावयवत्वं मूर्त्तिमत्त्वार्थ इति। एतेन सावयवाः परमाणवः संयोगोपपत्तेरिति व्याख्यातम्। संयोगस्याभ्युपगमे व्याघातः अनभ्युपगमे परमाणुत्वादिति हेत्वर्थः। संस्थानविशेषवत्त्वं तु असिद्धम्—य एवार्थः सावयवत्वादिति स एवार्थः संस्थानविशेषवत्त्वादिति। अथ संस्थानमसर्वगतद्रव्यपरिमाणं प्रतिपद्येथाः(१) एवं सति मूर्त्तिमत्त्वेन संस्थानवत्त्वं चरितार्थमिति पृथग् न वक्तव्यम् मूर्त्तिमत्त्वात् संस्थानविशेषवत्त्वाच्चेति। उक्तं चात्र विभागेऽल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् अण्ववयवस्य चाणुतरत्वप्रसङ्गादणुकार्यप्रतिषेध इति। यत् पुनरेतत् संयोगोपपत्तेर्मध्ये सन्नणुः पूर्वापराभ्यां सम्बध्यमानः(२) सावयवः।

अयमेव चार्थः कारिकया गीयते(३)—

"षट्केन युगपद्योगात् परमाणोः षडंशता(४)।

षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः॥" इति।

परमाणुर्युगपत् षड्भिः सम्बद्ध्यमानः षडंशः प्राप्नोति भिन्नदेशत्वात् सम्बन्धानाम्। अथ समानदेशाः सर्वे संयोगाः षण्णां परमाणूनां ? पिण्डः परमाणुमात्रकः प्राप्नोति। यदि द्वे द्वे द्रव्ये अधिकृत्याभिधीयते ततोऽभिन्नदेशाः। अथ प-

---

(१) मन्येथाः-पा० ४ पु०। (२) संरुध्यमानः-पा० ४ पु०।

(३) अभिधीयते-पा० ४ पु०।

(४) योगात् परमाणोः षडङ्गता—पा० ४ पु०।

रमाणूनां(१) सम्बन्धिनं परमाणुमधिकृत्याभिधीयते ? ततोनेकैः संयोगः समानदेश इति न किञ्चित् बाध्यते ।

यत् पुनरेतत् समानदेशाः परमाणव इति ? तन्नानभ्युपगमात्—देशा एव तावत् परमाणौ न सन्तीति कुतः समानदेशा भविष्यन्ति । न च किञ्चिद् द्रव्यं समानदेशमस्तीत्यसिद्धो दृष्टान्तः । ननु च कार्यकारणे(२) संयोगिसमानदेशे यथा घटः पटेन सम्बद्ध्यते तन्तुना तदंशुना च तन्त्वाश्रयेणेत्यादि ? । एतदनभ्युपगमेन प्रत्युक्तम् । समानदेशास्तत्र संयोगा इति न कार्यकारणे न च संयोगा अपि द्वे द्वे अधिकृत्येति । षण्णां समानदेशत्वादिति वाक्यं न द्रव्यसमानदेशतायां व्यवतिष्ठते न संयोगसमानदेशतायामिति ।

यत् पुनरेतद्दिग्देशभेदो यस्यास्ति तस्यैकत्वं न युज्यते ? क एवमाह दिग्देशभेदोऽस्तीति, दिग्देशभेदाश्च दिशः संयोगाः । परिकल्पितांश्च दिग्देशभेदान् कल्पयित्वा परमाणोर्दिग्देशभेदोऽभ्युपगम्यते, मुख्यतस्तु न दिग्देशभेदो नापि परमाणोर्भेदः परमाणुर्दिशा सम्बद्ध्यत इति—एतावन्मात्रं विद्यते एतच्च न किञ्चित् बाधते । छायावृती तर्हि न प्राप्नुतः परमाणोरदेशत्वादिति ? न देशवत्त्वाच्छायावृती, किं तर्हि ? मूर्तिमत्स्पर्शवत्त्वात् मूर्तिमत् स्पर्शविशिष्टं द्रव्यं द्रव्यान्तरमावृणोति । किमिदमावृणोति ? स्वसम्बन्धित्वेनेतरस्य सम्बन्धं(३) प्रतिषेधतीति । छाया तु तेजःपरमाणोरावरणात् मूर्तिमता परमाणुना तेजःपरमाणुराव्रियते यत्र(४) चास्यावरणं तत्र छायेति विरलतेजःसम्ब-

---

(१) ततो भिन्नदेशा अथ परमाणूनां–पा० ४ पु० ।

(२) कार्यकारणे–पा० ४ पु० ।

(३) सम्बन्धित्वं–पा० ४ पु० । (४) यस्य—पा० पु० ।

न्धीनि द्रव्यगुणकर्माणि छायेत्यभिधीयते सर्वतो व्या-
वृत्ततेजःसम्बन्धीनि तु तानि तमःसञ्ज्ञकानीति। तदेवं छाया-
वृत्त्यो(१)रन्यथासिद्धत्वादहेतुः । एतेन क्रियावत्त्वात् स्पर्श-
वत्त्वाद् द्रव्यान्तरारम्भकत्वात् क्रियाकारणसंस्काराश्रयत्वा-
त(२) परत्वापरत्ववत्त्वादित्येवमादि प्रत्युक्तम्। कथमिति ? यथा
मूर्तिमत्त्वात् सावयवा इत्येतस्मिन् वाक्ये प्रतिज्ञादोषा हेतु-
दोषाः तथा सर्वेष्वेतेषु पक्षेषु परपक्षाभ्युपगतेषु हेतुषु यथासम्भवं
विरुद्धासिद्धानैकान्तिकादिदोषभेदा वक्तव्या इति। शेषं भाष्ये।

ये तु क्रियावत्त्वादिभिः परमाणूनामनित्यत्वं साधय-
न्ति तैः क्रियावत्त्वं व्यञ्जकं वा कारकं वाऽवश्यमभ्युपगन्त-
व्यम्। यदि क्रियावत्त्वमनित्यत्वस्य कारकं ? यदाक्रियं तन्नित्यं
प्राप्नोति। अथ जन्म क्रियेत्यभिधीयते ? तदाऽनित्याः परमाणवो
जन्मवत्त्वादिति हेत्वर्थः जन्मवत्त्वमसिद्धं परमाणूनामिति। अथ
क्रियावत्त्वं व्यञ्जकमुच्यते ? व्यञ्जकत्वे ऽप्यन्यतोऽनित्यत्वं पर-
माणूनां वक्तव्यम्। न ह्ययं व्यञ्जकस्य धर्मो यद्व्यङ्ग्यं वस्तु
कुर्यात् अपि तु अन्यतो भूतं हेतुर्व्यनक्ति। न हि प्रदीपोऽस-
न्तमर्थं (जनयित्वा) प्रकाशयति । परासिद्धोत्क्षेपणादिक्रियाभ्यु-
पगमे विरुद्धः। एतेन घटादिदृष्टान्तो व्याख्यातः। क्रियावत्त्वं
च क्रियासमवायः तदभ्युपगमे विरुद्धः अनभ्युपगमे ऽनि-
त्यः परमाणुः परमाणुत्वादिति हेत्वर्थः । प्रतुपश्चार्थान्तरे दृष्ट-
त्वाद् विरुद्धः अनर्थान्तरे दृष्टान्ताभावः। एवं शेषाणि वाक्या-
नि विकल्प्य यथासम्भवं दोषा वक्तव्या इति। अथ परपक्षसिद्धा-

---

(१) छायावरणयोः—पा० ४ पु०।

(२) संस्कारप्रत्ययत्वात्—पा० ४ पु०।

नैतानभ्युपैति(१) यदि प्रमाणतोऽभ्युपैति ? कथं परपक्षसिद्धाः । अथ न प्रमाणतः ? कथं स्वयमनुपलब्धो धर्मः परप्रतिपादनायोपादीयत इति ॥

(इति निरवयवप्रकरणम् ।)

यदिदं भवान् बुद्धीराश्रित्य विषयाः सन्तीति मन्यते मिथ्याबुद्धय एताः—यदि हि तत्त्वबुद्धयः स्युः बुद्ध्या विवेचने क्रियमाणे बुद्धिविषयाणां याथात्म्य(२)मुपलभ्येत—

बुद्ध्या विवेचनात् तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे(३) पटसद्भावानुपलब्धिवत् तदनुपलब्धिः ॥ २६ ॥

बुद्ध्या विवेचनात् तु भावानां याथात्म्यानुपलब्धिः तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः । य एते बुद्धिविषया गवादयोघटादयश्च नैते तत्त्वतः सन्ति ? कस्मात् ? बुद्ध्या विविच्यमानानां भेदशोऽग्रहणात् । यथाऽयं तन्तुरयं तन्तुरयं तन्तुरिति बुद्ध्या तन्तुषु विविच्यमानेषु न पटः कश्चिदस्ति यः पटबुद्धेः विषयः स्यादेव(४)मंशुषु बुद्ध्या विविच्यमानेषु, एवं तदवयवेषु तावद् यावत् परमाणुः, परमाणवोऽपि भागशो विविच्यमाना(५)स्तावत् यावत् प्रलय इति । तदेवं सर्वस्यासत्त्वे गवादिबुद्धयो घटादिबुद्धयश्च मिथ्याबुद्धय इति ॥

---

(१) एतान् धर्मानभ्युपैति—पा० ४ पु० ।
(२) यथार्थता—पा० ४ पु० ।
(३) न याथात्म्योपलब्धिस्तन्त्वपकर्षे—इति क्वचित् । न याथार्थ्यस्योपलब्धिस्तन्त्वपकर्षे—पा० ४ पु० ।
(४) भवेदेव—पा० ४ पु० । (५) विभज्यमाना इति २ पु०पा० ।

व्याहतत्वादहेतुः ॥ २७ ॥

व्याहतत्वादहेतुः । बुद्ध्या विवेचनात् तु भावानां सर्वभावानुपपत्तिरित्ययुक्तम् । कस्मात्? व्याघातात् । को व्याघातः?सहासम्भवः यदि बुद्ध्या विवेचनं भावानां न सर्वभावानुपपत्तिः । अथ सर्वभावानुपपत्तिर्न बुद्ध्या विवेचनं सर्वभावानामिति । सर्वभावानुपपत्तिरिति ब्रुवाणः प्रमाणं पर्यनुयोज्यः यदि प्रमाणं ब्रवीति व्याहतं भवति । अथ न ब्रवीति अर्थोऽस्य न सिद्ध्यति प्रमाणाभावात् । अथाप्रामाणिकी सिद्धिः ? सर्वभावोपपत्तिः कस्मान्न सिद्ध्यति । यश्च सर्वभावानामभावो भावेष्वितरेतरापेक्षसिद्धेरित्येतस्मिन् वादे दोष उक्तः स इहापि द्रष्टव्य इति ।

यत् पुनरेतत् यदि तन्तुव्यतिरिक्तं पटादिद्रव्यं स्यात् तन्तुषु बुद्ध्या विविच्यमानेषु पृथगुपलभ्येतेति ?

तदाश्रयत्वादपृथग्ग्रहणम् ॥ २८ ॥

तदाश्रयत्वादपृथग्ग्रहणम् । कारणद्रव्याश्रितं कार्यं तस्मात् न पृथगुपलभ्यत इति । विपर्यये हि पृथग्ग्रहणात् । यत्र कार्यकारणभाव आश्रयाश्रितभावश्च नास्ति तत्र पृथग्ग्रहणमिति ॥

प्रमाणतश्चार्थप्रतिपत्तेः ॥ २९ ॥

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ ३० ॥

प्रमाणतश्चार्थप्रतिपत्तेः । यदस्ति यथा च यन्नास्ति यथा च तत्सर्वं प्रमाणत उपलब्ध्या सिद्ध्यतीति । शेषं भाष्ये ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ ३१ ॥

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ ३२ ॥

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः । यथा

स्वप्ने विषया न सन्ति अथ च विषयाभिमानः एवं न प्रमाणानि न प्रमेयाणि सन्ति अथ च प्रमाणप्रमेयाभिमानः ।

हेत्वभावादसिद्धिः ॥ ३३ ॥

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः ॥३४॥

मायागन्धर्वनगरमृगतृष्णिकावद्वेति न, प्रमाणाभावात् स्वप्नान्तवदविद्यमानेषु विषयेषु अभिमान इत्यत्र न हेतुरुच्यते इति स्वप्नान्ते चासन्तो विषया इति को हेतुरिति । ख्यातिरिति चेत् ? अयं जाग्रदवस्थोपलब्धानां विषयाणां चित्तव्यतिरेकिणामसत्त्वे हेतुः ख्यातिः स्वप्नवदिति !, न दृष्टान्तस्य साध्यसमत्वात्—य एते स्वप्नावस्थायां विषयाः ख्यान्ति न ते चित्तव्यतिरिक्ता इति अत्र को हेतुः प्रतिबुद्धेनानुपलम्भान्न सन्तीति । अथ मन्यसे यस्मात् प्रतिबुद्धेन नोपलभ्यन्ते तस्मान्न सन्तीति ?, न, विशेषणोपादानात्–ये प्रतिबुद्धेनोपलभ्यन्ते सन्तीति प्राप्तं व्यर्थं वा विशेषणं प्रतिबुद्धेनानुपलम्भादिति । यदि चोपलभ्यमानं जाग्रदवस्थायां स्वप्नावस्थायां विषयमसन्तं मन्यसे (१) अथ चित्तमस्तीत्यत्र को हेतुरिति । विपर्यये च सामर्थ्याभावादहेतुः जाग्रतोऽनुपलब्धेरिति । यद्युपलब्धिः सत्त्वसाधनं ततोऽनुपलब्धिरसत्त्वं साधयति विपर्यये हि हेतोः सामर्थ्यं दृष्टमिति । न चित्तव्यतिरेकिणो विषया ग्राह्यत्वात् वेदनादिवदिति—यथा वेदनादिग्राह्यं न चित्तव्यतिरिक्तं तथा विषया अपि वेदना–सुखदुःखे, चित्तं ज्ञानमिति, सुखदुःखाभ्यां चान्यं ज्ञानमित्यसिद्धो(२) दृष्टान्तः सुखदुःखे ग्राह्ये ग्रहणं ज्ञा-

(१) प्रतिपद्यसे—पा० ४ पु० ।

(२) सुखदुःखाभ्यां चान्यं वेदनादिग्राह्यं न चित्तव्यतिरिक्तज्ञानमित्यसिद्धो—पा० ४ पु० ।

नमिति(१) ग्राह्यग्रहणभावादन्यत्वम् । अथाभिन्नं विज्ञानं वेदनायास्तथापि ग्राह्यं च गृहीतिश्च एकमिति न दृष्टान्तोऽस्ति । न हि कर्म च क्रिया च एकं भवतीति । अथैकत्वं प्रमाणवृत्तमनपेक्ष्य प्रतिपद्येथाः ? तथापि चत्वारः स्कन्धा इति शास्त्रव्याघातः । अथ चतुष्ट्वं न प्रतिपद्यते दृष्टं विज्ञानमात्रमेवाभ्युपगम्यते ? सोऽपि दृष्टं विज्ञानभेदमनुयोक्तव्यः बाह्यस्याऽऽध्यात्मिकस्य च विज्ञानभेदहेतोरभावात(२) कथं विज्ञानभेद इति । स्वप्नवद्विज्ञानभेदं यदि प्रतिपद्यते ? सोऽपि दृष्टानुभूतानां भावानां भावनावशेन विज्ञानभेदं प्रतिपादयितव्यः । अथ स्वप्नपक्षे ऽपि भावनाभेदाद् विज्ञानभेदं प्रतिपद्येत सोऽपि भाव्यभावकयोर्भेदेन(३) प्रत्यवस्थेयः नाभिन्नं भाव्यं भावकं चेति । ये चैते स्वप्नादिप्रत्ययाः सुरविमानोद्यानपानभेदानुविधायिनः ते मिथ्याप्रत्यया इति, मिथ्याप्रत्ययानां च जाग्रदवस्थाप्रत्ययसामान्याद्भ्रान्तः । ममापि सर्व एव मिथ्याप्रत्यया भविष्यन्तीति ब्रुवाणः प्रधानमनुयोक्तव्यः न च निःप्रधानं विपर्ययप्रत्ययं पश्याम इति । चित्तव्यतिरेकिणं च विषयमप्रतिपद्यमानः साधनदूषणस्वभावं पर्यनुयोक्तव्यः । यदि बाह्यस्वभावकं ? व्याघातः । अथ चित्तस्वभावकं ? न चित्तेन परः प्रतिपाद्यते इत्यर्थोऽस्य न(४) सिद्ध्यति । न हीतरस्वप्नमनाख्यातमितरो विजानातीति । अथ शब्दाकारं चित्तं प्रतिपद्यते ? तेनापि शब्दाकारं चित्तमित्याकारार्थो वक्तव्यः । आ-

(१) विज्ञानमिति—पा० ४ पु० ।
(२) सोऽपि दृष्टविज्ञानहेतोरभावात—पा० ४ पु० ।
(३) भाव्यभावकवर्गयोर्भेदेन–पा० ४ पु० ।
(४) इत्यर्थो न–पा० ४ पु० ।

कारो हि नाम प्रधानवस्तुसामान्यादतस्मिंस्तदिति प्रत्ययः । न च भवत्पक्षे शब्दो विद्यत इति शब्दाकारं चित्तमिति निरभिधेयं वाक्यम् । चित्तव्यतिरिक्तं विषयमप्रतिपद्यमानो जाग्रत्स्वप्नावस्थयोर्भेदं पर्यनुयोज्यः जाग्रदवस्थायां विषया न सन्ति स्वप्नावस्थायामपीति इयं स्वप्नावस्था इयं जाग्रदवस्थेति कुत एतत् । धर्माधर्मव्यवस्था च न प्राप्नोति(१) यथा स्वप्नावस्थायामगम्यागमनादधर्मोत्पत्तिर्न भवत्येवं जाग्रदवस्थायामपि न स्यात् । अथ निद्रोपघातानुपघातौ भेदं जनयत इति प्रतिपद्येत ? तदपि तादृगेव निद्रोपघातश्चेतसो वैकृत्यहेतुरिति कथमवगम्यते । अथ विज्ञानस्य स्पष्टतामस्पष्टतां च भेदं प्रतिपद्येत ? विषयमन्तरेण ज्ञानस्य स्पष्टताऽस्पष्टताच वक्तव्या । असत्यर्थे विज्ञानभेदो दृष्ट इति चेत् ?— अथ मन्यसे यथा तुल्यकर्मविपाकोत्पन्नाः प्रेताः पूयपूर्णां नदीं पश्यन्ति, न तत्र नद्यस्ति, न पूयं, न ह्येकं वस्त्वनेकाकारं भवितुमर्हति, दृष्टश्च विज्ञानभेदः केचित् तामेव जलपूर्णां पश्यन्ति केचित् रुधिरपूर्णामित्यतोऽवसीयते (यथा)ऽध्यात्मनिमित्तापेक्षमसति बाह्ये निमित्ते विज्ञानमेव तथोत्पद्यते इति ? न व्याघातात्—असति बाह्ये विज्ञानमेव तथेति ब्रुवाणः प्रष्टव्यो जायते कथं तथेति । यदि रुधिराकारं विज्ञानं ? रुधिरं तर्हि वक्तव्यं किं रुधिरमिति, एवं जलाकारं नद्याकारं च वक्तव्यं, पूयपूर्णां पश्यन्तीति च वाक्यस्य पदानि प्रत्येकं विचार्यमाणानि रूपादिस्कन्धाभावे निर्विषयाणि भवन्ति, देशादिनियमश्च न प्राप्नोति, एकस्मिन् देशे नदीं पूयपूर्णां पश्य-

(१) व्यवस्थानं न प्राप्नोति—पा० ४ पु० ।

न्ति न देशान्तरेषु, असत्यर्थे नियमहेतुर्वक्तव्यः। यस्य पुनर्विद्यमानं केनचिदाकारेण व्यवस्थितं तस्य शेषो मिथ्याप्रत्यय इति युक्तम्। मिथ्याप्रत्ययाश्च भवन्तो न प्रधानं बाधन्त(१) इति पूयादिप्रत्ययानां प्रधानं वक्तव्यमिति—यथा पूयादिप्रत्ययानामेवं मायागन्धर्वनगरमृगतृष्णासलिलानामिति। कर्मणो वासनान्यत्र फलमन्यत्र कल्प्यत इति। अस्यार्थोऽयत्रैव किल कर्म तत्रैव किल फलेन भवितव्यम् यस्य तु चित्तव्यतिरेकिणो विषयास्तस्यान्यत्र कर्मान्यत्र फलमिति व्यधिकरणे कर्मफले भवत इति?। तन्नानभ्युपगमात्—न मया कर्मफले व्यधिकरणे अभ्युपगम्येते आत्मनि कर्म तत्रैव फलमित्यदोषः। मदीयाच्चित्तात् अर्थान्तरं विषयाः सामान्यविशेषवत्त्वात् सन्तानान्तरचित्तवत्। प्रमाणगम्यत्वात् कार्यत्वादनित्यत्वात् धर्मपूर्वकत्वाच्चेति।

एवं च सति—

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे॥ ३५॥

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे। स्थाणौ पुरुषाध्यवसायो मिथ्योपलब्धिः तत्त्वज्ञानेन च मिथ्याध्यवसायः स निवर्तते नार्थः स्थाणुपुरुषलक्षणः न ह्यसौ स्थाणुर्न भवतीति यथा स्वप्नोपलब्धानां येऽध्यवसायाः ते जाग्रदवस्थोपलब्ध्या निवर्त्यन्ते नार्थो विषयसामान्यलक्षण इति। शेषं भाष्ये॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्॥ ३६॥

बुद्धेश्चैवं निमित्तसद्भावोपलम्भादप्रतिषेधः। मिथ्याबुद्धेर्निमि-

---

(१) प्रधानप्रत्ययं बाधन्त—पा० ४ पु०।

समस्ति । किं पुनस्तत् ? सामान्यदर्शनं विशेषादर्शनमविद्यमानविशेषाध्यारोप इति । मिथ्याबुद्धिं प्रतिपद्यमानेन तस्या निमित्तं वक्तव्यं निमित्तं च प्रतिपद्यमानेनार्थोऽभ्युपेय इति ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ ३७ ॥

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः । तत्त्वं स्थाणुरिति प्रधानं पुरुष इति तत्त्वप्रधानयोरलोपे मिथ्याबुद्धिर्भवतीति । शेषं भाष्ये ।

(इति बाह्यार्थभङ्गनिराकरणप्रकरणम् ।)

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरित्युक्तम् । अथ तत्त्वज्ञानं कथमुत्पद्यत इति ?

समाधिविशेषाभ्यासात् ॥ ३८ ॥

समाधिविशेषाभ्यासात् । शेषं भाष्ये ।

व्यापकत्वादन्तः—करणस्य प्रत्याहारो न युक्त इति चेत् ?–अथ मन्यसे व्यापकमन्तः–करणं तत्कथं प्रत्याह्रियत इति चेत् ? नोक्तोत्तरत्वात्–यथा न व्यापकमन्तः-करणं तथोक्तमधस्तात् । अणुत्वात्(१) स्वाङ्गतीक्षणानुपपत्तिरिति चेत् ?–अथ मन्यसे यस्याप्यन्तःकरणमणु तस्यापि स्वाङ्गतिनिरीक्षणं(२) न, प्राप्नोति युगपद्धस्ते चक्षुषि चाऽसन्निधानात् ?, न शरीरात्ममनःसंयोगयौगपद्यात् प्रयत्नदर्शनयोर्युगपदुत्पत्तेः । स्वात्मशरीरसम्बन्धश्चात्ममनःसम्बन्धश्च(३) युगपद् भवति । तत्रात्ममनःशरीरसम्बन्धात् स्वाङ्गगतिरात्ममनःसम्बन्धाच्चक्षुषः प्रेरणम् तथा स्वाङ्गगतिः प्रयत्नाद्भवतीति दर्शनं

---

(१) अल्पत्वात्—पा० ४ पु० ।

(२) स्वाङ्गगतेरीक्षणं–पा० ४ पु० ।

(३) समर्थश्चात्मनः समर्थश्च–पा० ४ पु० । एवमग्रेऽपि ।

चक्षुरश्मेरर्थस्य च सन्निधानादिति । न चात्मनः प्रदेशाः सन्तीत्यचोद्यम् । प्रदेशवति चात्मनि अन्येनात्मप्रदेशेन मनः सम्बध्यते अन्येन शरीरमिति स्वाङ्गतीक्षणादिदोषः । यस्य पुनर्निष्प्रदेश एवासौ तस्यैष दोषो न भवतीति शरीरसम्बन्धेनात्ममनःसम्बन्ध इति ॥

नार्थविशेषप्राबल्यात् ॥ ३९ ॥

नार्थविशेषप्राबल्यात् । नोपपद्यते समाधिविशेषाभ्यासः अबुभुत्समानस्यापि बुद्ध्युत्पत्तेः यथा स्तनयित्नोः शब्दप्रभृतिषु इति ॥

क्षुदादिभिः प्रवर्त्तनाच्च ॥ ४० ॥

क्षुदादिभिः प्रवर्त्तनाच्च(१) । क्षुत्पिपासाभ्यां चानिच्छतोपि(२) बुद्धय (एव) उत्पद्यन्ते इति न युक्तः समाधिविशेषः ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ॥ ४१ ॥

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः । पूर्वकृतः—पूर्वशरीराभ्यस्तः समाधिविशेषः तस्य फलं धर्मः तत्कृतः पुनः समाधिविशेष इति समाधिविशेषाच्च बाह्यविषयाभिभवः लौकिकस्यापि तावत्समाधिविशेषावस्थितस्य बाह्यविषयोपनिपाते बुद्धयो नोत्पद्यन्ते किं पुनर्योगिन इति । यदि बाह्यविषयोपनिपाते अर्थज्ञानानि प्रादुर्भवन्ति ? अपवर्गेऽप्येवं प्रसङ्गः । मुक्तस्यापवर्गे बाह्यविषयविशेषोपनिपातो(३) विद्यत इति बुद्ध्युत्पादप्रसङ्गः ॥

---

(१) क्षुधादिभिः प्रवर्त्तनाच्च—इति क्वचित् ।
(२) चानिवृत्तोऽपि—पा० ४ पु० ।
(३) विषयोपनिपाते—पा० ४ पु० ।

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ ४२ ॥

अपवर्गेऽप्येवंप्रसङ्गः ॥ ४३ ॥

न निष्पन्नावश्यम्भावित्वात् ॥ ४४ ॥

न निष्पन्नावश्यम्भावित्वात् । सति शरीरे बाह्यविषयो ज्ञानोत्पत्तिकारणम्, नान्यथेति सूत्रार्थः ॥

तदभावश्चापवर्गे ॥ ४५ ॥

तदभावश्चापवर्गे । तस्य शरीरादेरुपलब्धिकारणस्याभावोऽपवर्ग इति । तस्मात् सर्वदुःखमोक्षो(१)ऽपवर्गे इति । यस्मात् सर्वं दुःखबीजं दुःखं चापवर्गे विच्छिद्यते तस्मात् सर्वदुःखेन विमुक्तिरपवर्गः ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ ४६ ॥

तदर्थं यमनियमाभ्यामात्मसंस्कारः योगाच्चाध्यात्मविध्युपायैः। तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः(२)

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः ॥ ४७ ॥

(प्र)ज्ञानग्रहणाच्चाभ्यासः तद्विद्यैश्च सह संवादः ! ज्ञानग्रहणं शास्त्रग्रहणं, तद्विद्या—यत्रमुपायं बुद्ध्यन्त इति तद्विद्या इत्यविभक्तार्थं वचनम् ॥

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥ ४८ ॥

तं शिष्यगुरुसब्रह्मचारिविशिष्ट इत्येवमादि सूत्रम् । एतत् तु निगदेनैव नीतार्थम् ॥

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ ४९ ॥

---

(१) सुखदुःखमोक्षो—पा० ४ पु० ।

(२) नियमाभ्याससंस्कारः—पा० ४ पु० ।

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे तमभ्युपेयादिति वर्तते ॥

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥ ५० ॥

तत्त्वाध्यवसायसंरक्षणार्थं(१) जल्पवितण्डे बीजप्ररोहसंरणार्थं कण्टकशाखावरणवदिति। अनुत्पन्नतत्त्वज्ञानेनैतत्कर्तव्यमिति सूत्रार्थः।

विद्यानिर्वेदादिभिश्च परेणावज्ञायमानस्य—

ताभ्यां विगृह्य कथनम्(२) ॥ ५१ ॥

ताभ्यां जल्पवितण्डाभ्यां विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति। विद्यापालनार्थं चैतत् न लाभपूजाख्यात्यर्थमिति(३) ॥

प्रवृत्तिदोषसम्बद्धः प्रेत्यभावः प्रपञ्चितः ।
फलं दुःखं विमुक्तिश्च तदुपायश्च कीर्तिताः ॥

इति-औद्द्योतकरे न्यायसूत्रवार्त्तिके चतुर्थाध्यायस्य द्वितीयमाह्निकम्(४) ॥ चतुर्थोऽध्यायः समाप्तः ॥

---

(१) प्रतिपक्षहीन-इत्यधिकम् ४ पु० ॥

(२) न्यायसूचीनिबन्धानुसारेणेदं सूत्रमेव । भाष्यमित्यन्ये ।

(३) ताभ्यां विगृह्य कथनमिति सूत्रम् । यस्तु कुदर्शनबलाहितमिथ्याज्ञानमवलम्ब्य दुर्विदग्धतया सद्विद्यावैराग्याद्वा लाभपूजाख्यात्यर्थितया कुहेतुभिरीश्वराणां जनाधाराणां पुरतो वेदब्राह्मणपरलोकादिदूषणे प्रवृत्तस्तं प्रति वादी समीचीनं दूषणमप्रतिभयाऽपश्यन् जल्पवितण्डे अवतार्य विगृह्य जल्पवितण्डाभ्यां तत्त्वकथनं करोति विद्यापरिपालनाय । माभूदीश्वराणां मतिविभ्रमेण तच्चरितानुवर्तिनीनां प्रजानां धर्मविप्लव इदमपि प्रयोजनं जल्पवितण्डयोः न तु लाभख्यात्यादि दृष्टम् । न हि परहितप्रवृत्तपरमकारुणिको मुनिर्दृष्टार्थं परपांसुलोपायमुपदिशतीति तात्पर्यटीकायां वाचस्पतिमिश्राः ।

(४) इति श्रीमदुद्द्योतकराचार्यविरचितं न्यायसूत्रचतुर्थाऽध्यायवार्त्तिकं समाप्तम्—पा० ४ पु० ।

पञ्चमोऽध्यायः ।

जातेः संक्षेपेणोक्ताया विस्तरो वक्तव्य इतीदमारभ्यते(१) साधर्म्यादि सूत्रम्—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥ १ ॥

तत्र जातिर्नाम स्थापनाहेतौ प्रयुक्ते यः प्रतिरोधासमर्थो हेतुः।

जातेः प्रयोगप्रतिषेधादसदुत्तरत्वाच्चारम्भो न युक्तः ?—छलजातिनिग्रहस्थानानां स्ववाक्ये परिवर्जनमिति प्रतिषिद्धा जातिः, न च जातिः सदुत्तरमतश्च जातेः प्रयोगो न युक्तः ? न, आरम्भप्रयोजनस्योक्तत्वात्—दुक्तं जातेरारम्भप्रयोजनं स्वयं च सुकरः प्रयोग इति । साधुसाधननिराकरणार्थं वा प्रयोगः—यदा तु वादी परस्य साधनं साध्विति मन्यते लाभपूजाख्यातिकामश्च भवति तदा जातिं प्रयुङ्क्ते कदाचिदयं जात्युत्तरेणाकुलीकृतो नोत्तरं प्रतिपद्येत उत्तराप्रतिपत्त्या च निगृह्यते । अनभिधाने (च) जातेरेकान्तजयः परस्यैत्यैकान्तिकाव

---

(१) अथ प्रमाणादयः पदार्था उद्दिष्टा लक्षिताः परीक्षिताश्च तत्किमपरमवशिष्यते यदर्थं पञ्चमाध्याय आरभ्यत इत्यत आह । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पाज्जातिबहुत्वमिति भाष्यम् । तस्यार्थमाह वार्त्तिककारः जातेः संक्षेपेणोक्ताया इत्यादि । इति तात्पर्यटीकायां वाचस्पतिमिश्राः ।

पराजयाद्वरमस्तु सन्देह(१) इति युक्तो जातेः प्रयोगः ।

असाधुसाधननिराकरणार्थमित्यन्ये—एकेतु जातेः प्रयोगं मन्यन्ते असाधुसाधननिराकरणार्थमेवं चाहुः असाधौ तु साधने प्रयुक्ते य आसां प्रयोगः सोऽनभिज्ञतया साधनदोषस्य, तद्दोषप्रदर्शनार्थं वा प्रसङ्गव्याजेनेति । एतत्तु न युक्तम्—प्रयोजनाभावात्(२) यदि तावदसाध्वेतत्साधनमिति प्रतिपद्यते य एवास्य दोषो बुद्धः स एव वक्तव्यो न जात्यभिधानेन(३) प्रयोजनमस्ति । अथ न बुद्ध्यते ? किमिति जातिं प्रयुङ्क्ते(४) न ह्यनवबुद्ध्यमानः शक्नोति प्रयोक्तुम् । अथानवबुद्ध्यमानोऽपि (प्रयुङ्क्ते) यत्किञ्चिद् ब्रूयात् नियमो न स्यात् । एतेनानैकान्तिके पञ्चानां प्रयोगः प्रत्युक्तः—य आहुरनैकान्तिके साधने परेण प्रयुक्ते पञ्च जातयः प्रयोक्तव्या इति, तदप्यनेनैव प्रत्युक्तम् । कथमिति ? बुद्ध्वा तदेव वक्तव्यमबुद्ध्वा अज्ञानमिति । एतेन युक्तायुक्तयोः पूर्वापरभावः प्रत्युक्तः । अयुक्ते साधने अयुक्तमुत्तरं युक्ते युक्तमिति । युक्तं च नाम (यत्) प्रतिज्ञादिदोषोद्भावनं नासौ जातिः, उत्तरमेव तदिति जातिलक्षणापरिज्ञानादयुक्तमेतदपीति ।

समीकरणार्थं प्रयोगः समः साधर्म्येमेव समं वैधर्म्यमेव(५) सममिति समार्थः समीकरणार्थः प्रयोगो द्रष्टव्यः । समीक्रियतां परपक्षो मात्राकारि अयं तु समीकरणार्थं प्रवर्त्तते यथा लोके कुटुम्बार्थं घटत इति । विशेषहेत्वभावो वा समार्थः न भवता

(१) वरं तत्सन्देह—पा० ६ पु० ।

(२) प्रयोजनासङ्गाभावादिति २ पु० पा० ।

(३) जात्यभिधाने—पा० ६ पु० ।

(४) प्रत्युञ्जीत इति टीकासम्मतः पाठः ।

(५) समं वैधर्म्यमेव—इति नास्ति ६ पु० ।

विशेषहेतुः कश्चिदपदिश्यत इति । एतमर्थमुररीकृत्य प्रवर्तते यथाभूतं भवतः साधनं तथाभूतं ममापीति । न च सर्वापदेशव्या-प्तिरव्यापकत्वात् । न हि सर्वापदेशे सर्वा जातयः प्रवर्तन्ते, न हि वैधर्म्येण स्थापनायामुत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसमाः प्र-योक्तुं शक्यन्त इति । न च वादिप्रतिवादिनोस्तुल्यता समार्थः जातेरसदुत्तरत्वात्—नियमेनैव जातिवाद्यसद्वादी भवति वा-दिनां तु सदसद्वादित्वे अनियम(१) इति ॥

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपप-त्तेः साधर्म्यवैधर्म्यसमौ ॥ २ ॥

प्रतिषेधाविति । साधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थाने, वैधर्म्येणोपसंहारे तद्विपरीतेन साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः यथा—अनित्यः शब्द उत्पत्तिधर्मकत्वात् । उत्पत्ति-धर्मकं कुम्भाद्यनित्यं दृष्टम् । यद्यनित्यघटसाधर्म्यादनित्यः नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः(२) प्राप्तः इति । एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्या-दनित्यः नित्यसाधर्म्यमप्याकाशेनामूर्तत्वमस्त्यतो नित्यः प्राप्तः । अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः ? न तर्हि वक्तव्यमनि-त्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति । सेयं जातिर्वि-शेषहेत्वभावं दर्शयति । विशेषहेत्वभावाच्चानैकान्तिकदेशनाभासा इति । एवं वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः यथा तस्मिन्नेव हेतावाकाशवैधर्म्यादनित्य इत्युक्ते यदि नि-

(१) अनियमप्रसङ्गः—पा० ६ पु० ।
(२) अमूर्तत्वमस्त्यतो नित्यः—पा० ६ पु० ।

स्याकाशवैधर्म्याद्नित्यः अनित्येनापि घटेनास्य वैधर्म्यममूर्त्तत्वमतो नित्यः प्राप्तः। तस्मिन्नेव हेतौ घटसाधर्म्यादित्युक्ते यथानित्यघटसाधर्म्यादनित्यः वैधर्म्यमप्यस्यास्त्यमूर्त्तत्वमतो नित्यः प्राप्तः। अथ मन्यसे सत्येतस्मिन्(१) वैधर्म्ये न नित्यः(२) न तर्ह्ययमेकान्तोऽनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याद्वाऽनित्य इति। सोऽयं विशेषहेत्वभावः ॥

अनयोरुत्तरम्—

गोत्वाद्गोसिद्धिवत् तत्सिद्धिः ॥ ३ ॥

गवाश्वसाधर्म्ये सत्त्वादौ समाने, वैधर्म्ये चैकशफत्वादौ साधर्म्यात् सत्त्वादेर्गौरश्वो न भवति। न च वैधर्म्यादेकशफत्वादेरगौर्गौर्भवति। किं कारणम्? एकस्यानन्वयादेकस्य चाव्यावृत्तेः। यदन्वयव्यतिरेकि साधर्म्यं तस्माद्धर्मव्यवस्था, गोत्वं च तथा, तस्माद्गोत्वादेव गौः सिद्ध्यति, तथेहाप्यमूर्त्तत्वमुभयव्यातिरेकि उभयान्वयि च, तस्मान्नित्यत्वमनित्यत्वं च(३) न शक्यं प्रतिपत्तुम्, अपि त्वन्वयव्यतिरेकसम्पन्नादुत्पत्तिधर्मकत्वा(४)दनित्य इति। अतो यदब्रवीषि विशेषहेत्वभावादिति अयं विशेषहेतुः इति॥

(इति सत्प्रतिपक्षदेशनाभासप्रकरणम्)

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ४ ॥

अविद्यमानधर्माध्यारोप उत्कर्षः, विद्यमानधर्मापचयोऽपकर्षः, वर्ण्यः साध्यः, अवर्ण्यः असाध्यः, विकल्पो विशेषः, एतेषां

(१) सत्यप्यस्मिन्–पा० ६ पु०। (२) प्राप्तः–इत्यधिकम् ६ पु०।
(३) नित्यमनित्यं च–पा० ६ पु०। (४) उत्पत्तिमत्त्वा–पा० ६ पु०।

धर्माणामुद्भावनार्थाः प्रयोगा उत्कर्षसमाद्या जातयः(१) साध्य-साधनधर्मयोस्तुल्यतया प्रत्यवस्थानं साध्यसमेत्युच्यते—यथा तस्मिन्नेव हेतौ घटसाधर्म्यादित्युक्ते यदि यथा घटस्तथा शब्द-स्तदा घटो रूपादिमान् शब्दोऽप्येवं प्रसक्त इत्युत्कर्षसमः । शब्दो वाऽरूप इति घटोऽप्येवं प्रसक्त इत्यपकर्षसमः । घटोऽनित्य इत्यवर्ण्यः शब्दोऽप्येवं, शब्दो वावर्ण्य इति घटोऽप्येवमिति वर्ण्यावर्ण्यसमौ । सत्येवास्मिन् उत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः विभागजाविभागजाविकल्पवत् च(२)*नित्यानि-त्यविकल्प इति विकल्पसमः । घटो वा अनित्य इत्यत्र को हेतुरयमपि साध्यवज्ज्ञापयितव्य इति साध्यवत् प्रत्यवस्थानात् साध्यसमः ॥

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥५॥

न, हेत्वर्थापरिज्ञानादिति सूत्रार्थः । न ब्रूमो यावन्तो घट-धर्मास्ते सर्वे एव शब्दे सम्भवन्तीति, अपि तु यो यस्य सा-धको धर्म उपपद्यते स तत्साधनं तत्रोपसंह्रियते । तथाचशब्दे-न शब्दे चोत्पत्तिधर्मकत्वं धर्म उपसंह्रियते । एवं यथोक्तमसम्ब-द्धम् । यथा गौस्तथा गवय इत्युक्ते न गोधर्माः सर्व एव गवये, न गवयधर्माः सर्व एव गवि प्राप्नुवन्ति । अपि तु यदि-तरस्येतरेण सम्बद्ध्यते तावन्मात्रमेवोपसंह्रियते । अशेषधर्मोप-संहारे तु यथा तथेत्येव न स्यात् स एवासावेव स्यात् तथेहापीत्ययमदोषः । यत्पुनरेतद्विभागजाविभागजाविकल्पव-न्नित्यानित्याविकल्प इति ? यथोत्पत्तिधर्मकत्वमन्वयव्यतिरेकि

---

(१) उभयोः—पा० ६ पु० । (२) विकल्पे च—पा० ६ पु० ।

* चिह्नितकृते २ पु० पा० ।

नैवं विभागजल्पम् । न हि किञ्चिद्विभागाज्जायमानं यथोक्तविशेषणं नित्यमनित्यं वा दृष्टमित्येतदप्यनुत्तरम् ॥

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ ६ ॥

दृष्टान्तः साध्य इति ब्रुवता भवता न दृष्टान्तलक्षणं व्यज्ञायि । दृष्टान्तो हि नामाविहतयोर्दर्शनयोर्विषयः । तथा च साध्यत्वमनुपपन्नम् । अथ दर्शनं विहन्यते ? नासौ दृष्टान्तो लक्षणाभावादिति ।

यत्त्वत्रोक्तं जातीनां(१) पौनरुक्त्यं प्रसज्यत इति ?—न पौनरुक्त्यमर्थभेदात्—यथा चोत्कर्षसमादीनां भिन्नोऽर्थस्तथोक्तम् । प्रयोगभेददर्शनाच्च—प्रयोगश्च भिन्न उत्कर्षसमादीनामिति । आनन्त्यमिति चेत् ?—अथ मन्यसे यदि प्रयोगभेदाद्भेदो न चतुर्विंशतिर्जातय इति प्राप्तम् ? न, अनवधारणात्—नेदमवधार्यते चतुर्विंशतिर्जातय इति, किन्तू(२)दाहरणानां भेदः । कथमवगम्यते ? तथाहि प्रकरणमेका चतुर्द्धा भिन्नेति । अथ सामान्यतोऽभिन्ना जातय इत्यभेदं ब्रूयात् ? तस्याप्यभ्युपगमं चतुर्दशत्वं निवर्तते । अथ कुतश्चिद्भेदाद्भेदः ? अदेश्यं(३) तर्हि उत्कर्षसमाद्या न विकल्पसमातो भिद्यन्त इति, यथा केनचिद्भेदेन चतुर्दशत्वं तथा केनचिद्भेदेन चतुर्विंशतित्वम् । अविशेषसमा त्वियं जातिः उत्कर्षसमादीनामेकत्वं किञ्चित्साधर्म्यादिति । अस्या जातेरुक्तमुत्तरम् ॥

(इति साध्यदृष्टान्तधर्मविकल्पसमवोत्कर्षसमादिजातिषट्कप्रकरणम् ।)

---

(१) ज्ञातीतां—पा० ६ पु० ।

(२) अपि तू—पा० ५ पु० ।

(३) अचोद्यं इति २ पु० पा ।

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वा-दप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ७ ॥

तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यदि तावदयं हेतुः साध्यं सम्प्राप्नोति प्राप्त्या अविशिष्टः । कोऽविशेषार्थः ? उभयोर्विद्यमानता—नाविद्यमानः सम्प्राप्यत इति हेतोः साधनार्थो हीयते । अथ न प्राप्यते ? अप्राप्तेनाहेतुना अविशिष्टत्वादहेतुर्भवति । न ह्यग्निरप्राप्तो दहति । प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमः । अनयोर्भेदेनोपन्यासो विवक्षातः—भेदविवक्षायां प्राप्त्यप्राप्तिसमाविति । अभेदविवक्षायामेकमेवोत्तरम्—यथा वृक्षा वनमिति ।

जातिलक्षणाभावान्नेयं जातिरिति चेत् ?—अथ मन्यसे यज्जातेर्लक्षणं तदस्या नास्ति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमिति हि तत्, न च लक्षणेनासम्बद्धा जातिरिति शक्यं वक्तुम्, न हि गोलक्षणहीनोऽश्वो गौरिति, न, सूत्रार्थापरिज्ञानात्—साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरित्यस्य सूत्रस्यार्थो न व्यज्ञायीत्यनुत्तरमेतत् । एतेन त्रैकाल्यसमाद्याः प्रत्युक्ताः सूत्रार्थापरिज्ञानात् ॥

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारा(१)द-प्रतिषेधः ॥ ८ ॥

मृत्पिण्डप्राप्तानां दण्डादीनां नाविशेषो न च साध्यसाधनभावनिवृत्तिः—न हि मृत्पिण्डप्राप्तो दण्डः साधनत्वं जहाति नापीतरत् साध्यत्वं जहाति । अथ मन्यसे घटस्तत्र साध्यस्तस्य चाविद्यमानस्य किं साधनेन ? ना-

(१) चाप्यभिचारादित्यपि क्वचित् ।

विद्यमानस्य साधनमपि तु मृत्पिण्डो घटीक्रियत इति। किमिदं घटीक्रियत इति? मृदवयवाः पूर्वव्यूहपरित्यागेन व्यूहान्तरमापद्यन्ते व्यूहान्तराच्च घटोत्पत्तिः। पीडने चाभिचारादप्राप्त्यापि साधकत्वं दृष्टम्। कोऽप्राप्त्यर्थः? परस्परोपश्लेषमन्तरेण साधकत्वम्। अन्यथा तूद्देशेनायं प्राप्त एव नियमात्। इयं च जातिः सर्वहेत्वपवादद्वारिका यदि ज्ञापको हेतुरपदिश्यते तथापि, यदि कारकस्तथापीति। सा चेयं कार्यकारण(त्वा)पवादद्वारेण प्रवर्तमाना व्याहता भवति। को व्याघातः? उत्तरस्यानुत्थानम्। कथमिति? यदिदमुत्तरं प्राप्यार्थं (कारणत्वापवादद्वारेण) साधयेदप्राप्य वेति तस्यापि प्रतिषेध्यं प्राप्य वाऽप्राप्य वेति समो दोषः॥

(इति प्राप्त्यप्राप्तियुगनद्धवाहिविकल्पोपक्रमजातिद्वयप्रकरणम्।)

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ॥ ९॥

यथा तस्मिन्नेव हेतौ घटादिसाधर्म्येण कृते इत्थं—घट एव तावदनित्य इत्यत्र को हेतुरिति प्रसङ्गसमः। प्रतिदृष्टान्तसमस्य यदेव भाष्य उदाहरणं तदेव द्रष्टव्यमिति। वाय्वाकाशसंयोगस्याकारणत्वादयुक्तमिति चेत्?—अथ मन्यसे न वाय्वाकाशसंयोगः क्रियाकारणं त्रिष्वपि कालेष्वसम्भवात्?—न वाय्वाकाशसंयोगेनाकाशे क्रिया कृता न करोति न करिष्यतीति, यच्च त्रिष्वपि कालेष्वकारणं तदकारणम्—यथा घटो घटान्तरस्य?। न, तत्समानधर्मोपपत्तेः—न ब्रूमो वाय्वाकाशसंयोग एव कारणमपि तु तथाभूताध-

र्मोऽन्यत्र दृष्टो यथा वायुवनस्पतिसंयोग इति । यस्त्वसौ तथाभूतः क्रियां न करोति तन्नाकारणत्वादपि तु प्रतिबन्धकात् । केनास्य प्रतिबन्धः ? । महत्परिमाणेन, यथा—मन्दवातवेगेन तुल्यानां लोष्टादीनामिति । यदि च क्रियां दृष्ट्वा क्रियाकरणमिति मन्यसे सर्वं कारणं क्रियानुमेयं भवतः प्राप्तं ततश्चोपादानं कारणस्य न प्राप्नोति किमिदं करिष्यत्याहो न करिष्यतीति । यस्य पुनः साधर्म्यादु(१)पादानं तस्य युक्तम् । यदि च तत्सदृशं न कारणमिति मन्यसे ? अनैकान्तिको हेतुर्न प्राप्नोति, न हि यच्छब्दे ऽमूर्तत्वं तदाकाशादीनामिति, अनुमानं चान्यत्र दृष्टस्यान्यत्र सादृश्यादेव प्रवर्तते न हि ये धूमधर्मा एकस्मिन् धूमे त एव धूमान्तरेष्वपीति ॥

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत् तद्विनिवृत्तिः ॥१०॥

इदं तावदयं प्रष्टव्यः के प्रदीपमुपाददते किमर्थं चेति ? । दिदृक्षमाणा दृश्यदर्शनार्थमिति ? । अथ प्रदीपोपलब्ध्यर्थं कस्मान्न प्रदीपोपादानं कुर्वते ? । अन्तरेण प्रदीपो दृश्यते प्रदीपान्तरमिति । अथ दृष्टान्तः किमर्थमुपादीयते ? अज्ञातस्य प्रज्ञापनार्थम् । अथ दृष्टान्तेऽपि दृष्टान्तः किमर्थं दृश्यते ? यदि प्रज्ञापनार्थं नाप्रज्ञातो दृष्टान्त इति । (यत्पुनराकाशदृष्टान्तवदिति)(२) ॥

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ११ ॥

अभ्युपगमात्—प्रतिदृष्टान्तस्य च हेतुभावं प्रतिपद्यमानेन दृ-

---

(१) सामर्थ्यादिति २ पु० पा० ।

(२) () एतदन्तर्गतो ग्रन्थः २ पु० नास्ति ।

ष्टान्तस्यापि हेतुभावोऽभ्युपगन्तव्यः हेतुभावश्च साधकत्वं स च कथं हेतुर्न स्यात् यद्यप्रतिषिद्धः साधकः स्यात् अप्रतिषिद्धश्चायं, साधकप्रयोगानुपपत्तेश्च यदि तावदेवं प्रयुङ्क्ते यथा भवदीयो दृष्टान्तस्तथा मदीय इति अभ्युपगमान्न प्रतिदृष्टान्तः। अथैवं प्रयुङ्क्ते यथा मदीयो न दृष्टान्तस्तथा त्वदीय इति तथापि व्याघातान्न प्रतिदृष्टान्त इति ॥

(इति युगनद्धवाहिप्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम् ।)

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ १२ ॥

अथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् घटवदिति कृते यदि ब्रूयात् प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति तदभावादनुत्पत्तिधर्मकः अनुत्पत्तिधर्मकत्वाच्च नित्य इति अनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ॥

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ १३ ॥

यथैव प्रागुत्पत्तेरुत्पत्तिधर्मकत्वं नास्ति तथा शब्दोपीति उत्पन्नः सन् शब्द इति भवति उत्पन्नः सन्नुत्पत्तिधर्मक इति भवति तथानित्य इति । उत्पन्ने उत्पत्तिधर्मकत्वमस्तीति न कारणप्रतिषेधः अनुत्पन्नस्य चातथाभावात् न चायमनुत्पन्नः शब्द इति वा उत्पत्तिधर्मक इति वा नित्य इति वा अनित्य इति वा व्यपदेष्टुं शक्यत इति । ज्ञापकश्चायं हेतुर्न कारकः ज्ञापके च कारकवत् प्रत्यवस्थानमसम्बद्धम् । न कारकज्ञापकयोर्भेदोऽस्ति कारकत्वादिति चेत् ? न, कारकज्ञापकयोः क्रियाज्ञप्तिहेतुत्वात् । योऽप्ययं ज्ञापकः सोऽपि किञ्चित् कुर्वन् ज्ञापक इत्युच्यते कारकोपीति(१) । नैष दोषः कारकस्य क्रियाहेतु-

(१) कारकत्वादिति—पा० ६ पु० ।

त्वात् ज्ञप्तिहेतुत्वाद् ज्ञापकस्येति । तत्रैको वस्तु निष्पादयति एकस्तु विद्यमाने वस्तुनि ज्ञप्तिं करोति प्राक्चोत्पत्तिधर्मकत्व-स्याभावादनुत्पत्तिधर्मकः शब्द इति ब्रुवाणः शब्दमभ्युपैति नामतोऽनुत्पत्तिधर्मकत्वं धर्म इति । ततश्च विशेषणमनर्थकं प्रा-गुत्पत्तेरिति ।

अपरे तु प्रागुत्पत्तेः कारणाभावादित्युक्ते अर्था-पत्तिसमेत्रेयमिति, प्रागुत्पत्तेः प्रयत्नानन्तरीयकत्वस्याभा-वादर्थादप्रयत्ननान्तरीयकोऽप्रयत्ननान्तरीयकत्वाच्च नित्य इति कृते उत्तरं ब्रूयात्(१) नायं नियमो ऽप्रयत्नानन्तरीयकं(२) नित्य-मिति । त्रयी हि तस्य गतिः किञ्चिन्नित्यमाकाशादि किञ्चि दनित्यं विद्युदादि किञ्चिदसदेव आकाशकुसुमादि ।

एतत्तु न युक्तमुत्पश्यामः । कथमिति ? यत्तावदसदप्रयत्नना-न्तरीयकमिति न युक्तं प्रयत्नानन्तरीयकत्वस्य जन्मविशेषणत्वात्-यस्य न प्रयत्नानन्तरीयकं जन्म तदप्रयत्नानन्तरीयकं, न चाभावो विद्यते अतो न तस्य जन्म । यच्चासत् किं तस्य विशेष्यमस्ति । एतेन नित्यं प्रत्युक्तम् । न हि नित्यमप्रयत्नानन्तरीयकमिति शक्यं वक्तुम् । जातिलक्षणाभावान्नेयं जातिरिति चेत् ? ना-नुत्पन्नैरहेतुभिः साम्यात् योऽनुत्पन्नः स न हेतुः तद्यथा अ-नुत्पन्नास्तन्तवो न पटस्य कारणमिति ॥

(इत्यनुत्पत्तिसमप्रकरणम् ।)

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्या-नित्यसाधर्म्यात् संशयसमः ॥ १४ ॥

उदाहरणं भाष्ये । संशयसमा साध्यसमातो न भिद्य-ते इति चेत् ?-अथ मन्यसे यथा साधर्म्यसमोदाहरणं साध-

---

(१)उत्तरं ब्रुवते इति १ पु०पा० । (२)प्रागुत्पन्नः-इत्यधिकम् ६ पु० ।

र्म्यात् प्रवर्त्तते तथा संशयसमापीति, अतोऽभेदाच्च जात्यन्तरमिति ? न, उभयैकसाधर्म्यभेदात्—उभयसाधर्म्यात् संशयसमः एकसाधर्म्यात् साधर्म्यसम इति विशेषः ॥

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ १५ ॥

साधर्म्यात् साधर्म्यदर्शनात् संशयः वैधर्म्याद्विशेषदर्शनान्न संशयः उभयथा तु(१) संशये सामान्यविशेषदर्शने सति संशयेऽत्यन्त(२)संशयप्रसङ्गो नित्यं सामान्यं संशयं करोतीति तु न प्रतिपद्यामहे सति सामान्ये विशेषदर्शनान्निवृत्तेरिति ॥

(इति संशयसमप्रकरणम् ।)

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ १६ ॥

उदाहरणं भाष्ये । संशयसमसाधर्म्यसमाभ्यां प्रकरणसमा न भिद्यते । कथमिति ? तत्रापि साधर्म्यमिहापीति ? । न, उभयपक्षसाधर्म्याद् भेदसिद्धेः—उभावत्र वादिप्रतिवादिनौ पक्षपरिग्रहेण नित्यानित्यत्वे साधयतः, न चैवं साधर्म्यसमसंशयसमयोरिति ॥

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः(३) ॥ १७ ॥

विरुद्धाव्यभिचार्येष उक्तोत्तर इति । प्रकरणोत्थानं च न प्रतिपक्षादिति ब्रूमः किन्तु तत्त्वादर्शनात्(४) तदुक्तं प्रकरणसमे हेत्वाभास इति ॥ (इति प्रकरणसमप्रकरणम् ।)

---

(१) उभयथा संयोगिनि—पा० ६ पु० ।

(२) संशय इत्यत्र—पा० ६ पु० ।

(३) प्रतिपक्षोपपत्तः—पा० ६ पु० । (४) तथादर्शनात्—पा० ६ पु० ।

त्रैकाल्यासिद्धे(१)र्हेतोरहेतुसमः ॥ १८ ॥

अहेतुसाम्यात् प्रत्यवस्थानमहेतुसम इति ॥

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ १९ ॥

विरोधः सूत्रार्थः । नोत्पद्यमानमहेतुत उत्पद्यते नापि ज्ञाप्यमानमहेतुना ज्ञाप्यते इति ।

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ २० ॥

विरोध उत्तरदोष इति । यस्त्रिष्वपि कालेषु न साधयति स न हेतुरिति प्रतिषेधेऽपि समानो दोषः । उक्तोत्तरत्वाच्च—प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरित्यत्रोक्तोत्तरमेतदिति ।

(इति हेतुसमप्रकरणम् ।)

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ २१ ॥

उदाहरणं भाष्ये ।

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥ २२ ॥

अनुपपाद्य सामर्थ्यमर्थादापद्यत इति ब्रुवाणः पक्षं हापयति । किं कारणम् ? सामर्थ्यस्यानुक्तत्वात् । एवं च पक्षहानेरुपपत्तिः । अनैकान्तिकत्वाच्चार्थापत्तेः(२) पूर्वसूत्रव्याघातः । यदुक्तं नानैकान्तिकत्वमनर्थापत्तावर्थापत्त्यभिमानादिति ? तद्व्याहन्यते(३) नास्ति व्याघातः सन्निधिविशिष्टाया अनैकान्तिकत्वाभ्युपगमात्—सेयं सूत्रेणोपात्ता साऽनैकान्तिकी

(१) त्रैकाल्यानुपपत्तेरिति न्यायसूचीनिबन्धे ।

(२) अनुपपत्तेः–पा० ६ पु० । (३) नुपपत्तिरिति–पा० ५ पु० ।

नार्थापत्तिमात्रं यथानुमानं व्यभिचारि यत् तदप्रमाणं नेतर-दिति तथेहापीति ॥

(इति अर्थापत्तिसमप्रकरणम् ।)

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भा-वोपपत्तेरविशेषसमः ॥ २३ ॥

उदाहरणं भाष्ये । साधर्म्यसमातो न भिद्यते अवि-शेषसमः । कस्मात् ? साधर्म्यमात्रात्—प्रवृत्तेरविशेषादिति चे-त् ? न, एकसमस्तभेदाद्भेदः एकसाधर्म्यात् साधर्म्यसमा स-मस्तसाधर्म्याद्विशेषसमेति ।

क्वचित् तद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः(१) प्रतिषे-धाऽभावः ॥ २४ ॥

क्वचित् साधर्म्यमुपलभ्यते क्वचिन्नेति सूत्रार्थः । अभ्युप-गमाच्च विरोधः सर्वभावानामनित्यत्वं प्रसञ्जयता अभ्यनुज्ञा-तं शब्दस्यानित्यत्वं व्यर्थं वा सर्वभावग्रहणमिति । उक्तश्च वि-शेषोऽन्वयव्यतिरेकसम्पन्नो हेतुर्नोत्तर इति ।

(इति अविशेषसमप्रकरणम् ।)

उभयकारणोपपत्तेरुपपत्तिसमः ॥ २५ ॥

उदाहरणं भाष्ये । उपपत्तिसमा प्रकरणसमातो न भिद्य-त इति तत्रापि नित्यानित्यकारणोपपत्तिरिहापीति ? । न, नित्या-नित्यकारणस्यैकत्रोपपत्तेः—नित्यकारणं चानित्यकारणं चै-कत्रोपपद्यत इत्युपपत्तिसमः नित्यानित्यपक्षाभ्यां प्रत्यवस्था-नात् प्रकरणसम इति भेदः ॥

(१) तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः—पा० ६ पु० ।

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ॥ २६ ॥

विरोधः सूत्रार्थः । नित्यत्वकारण(१)मप्यस्योपपद्यते इति ब्रुवताऽभ्यनुज्ञातं अनित्यत्वकारणमिति, तथा च विरोधादुत्तरपक्षोत्थानं न युक्तम् ॥

(इति उपपत्तिसमप्रकरणम् ।)

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥२७॥

उदाहरणं भाष्ये । सर्वसाध्यारोपेणाव्यापकत्वं साधनस्येत्युपलब्धिसमार्थः । सर्वमनित्यं सामान्यविशेषवतोऽस्मदादिबाह्यकरणप्रत्यक्षत्वेनाध्यारोप्याव्यापकत्वं हेतोः, न ह्ययं हेतुः सर्वस्मिन्ननित्ये द्व्यणुकादौ विद्यत इति । श्रूयमाणप्रतिज्ञार्था(२)व्यापकत्वं वा हेतोः । यथाऽनित्यः शब्दः शब्दान्तरोत्पादकत्वादिति, न शब्दान्तरोत्पादकत्वेन सर्वः शब्दो व्याप्यते । न ह्यन्त्यः शब्दः शब्दान्तरं करोति ॥

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ २८ ॥

अनित्यः शब्द इति ब्रुवता न साध्यान्तराणां कारणान्तरं प्रतिषिध्यते न साध्यस्य कारणान्तरमिति ।

अपरे तु परिहारान्तरं ब्रुवते—यदेव प्रयत्नानन्तरीयकं तदेव तस्मादनित्यमिति । एतत्तु नाविवादात्—यः प्रयत्नानन्तरीयकत्वं प्रतिपद्यते न तं प्रति किञ्चित् साध्यते, यदा तु प्रयत्नानन्तरीयकत्वं वस्तुविशेषणं तदाऽन्यो हेतुर्वक्तव्यः । जातिलक्षणाभावात्कथं जातिः ? । न, अहेतुसामान्याज्जातिः ॥

(इत्युपलब्धिसमप्रकरणम् ।)

---

(१) नित्यानित्यकारण—पा० ६ पु० ।

(२) प्रतिज्ञातार्थ—पा० ६ पु० ।

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतो-पपत्तेरनुपलब्धिसमः ॥ २९ ॥

उदाहरणं भाष्ये । न उक्तोत्तरत्वात—द्वितीयाध्याये उक्तोत्तरमेतत् ॥

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ३० ॥

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥ ३१ ॥

आवरणाद्यसम्भवे सत्त्वाभ्युपगमे च सत्यनुपलब्धेरिति प्रयोगः । एवं च सति न हेत्वन्तरं नानैकान्तिकं विपक्षात्प्रवृत्तत्वात । आवरणाद्यसम्भवे सत्त्वाभ्युपगमे विपर्ययस्याव्यभिचारान्नार्थापत्तिसमोन ॥

(इति अनुपलब्धिसमप्रकरणम ।)

साधर्म्यात् तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गाद-नित्यसमः ॥ ३२ ॥

सर्वमनित्यं प्राप्नोतीत्युदाहरणं भाष्ये । अविशेषसमातो अनित्यसमा न भिद्यते तत्रापि सर्वाविशेष इहापीति ? । भिद्यते तत्र सर्वाविशेष इह सर्वानित्यत्वमिति ।

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाम-र्थ्यात(१) ॥ ३३ ॥

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथाभावान्नाविशेषः ॥ ३४ ॥

प्रतिषेध्येन पक्षेण प्रतिषेधस्य प्रतिज्ञादियोगः समा-

(१) साधर्म्यात्—पा० ६ पु० ।

न्यम् । तथाहि (बाहि)प्रतिषेध्यस्यानित्यत्वस्यासिद्धिर्घटादिसाधर्म्यात् ननु प्रतिषेधस्याप्यसिद्धिः प्रतिषेध्येन प्रतिज्ञादियोगसामान्यादिति । नैवं साधर्म्यमात्रात् स्थापना, अपि तु दृष्टान्ते विशिष्टमन्वयव्यतिरेकिणं धर्म(१)मुपलभ्य तत्सामर्थ्यात् । न च प्रतिपक्षस्यैवंभूतो धर्म उपपद्यते । तस्मात् प्रतिषेधो नोपपद्यते इति । उक्तं चात्र क्वचित् तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव इति । यच्चाविशेषसम उत्तरं तदिहापि द्रष्टव्यम् । नासाधनादिति चेत् ?—अथ मन्यसे न मया सर्वस्यानित्यत्वप्रसङ्गेन सर्वस्यानित्यत्वं साध्यते, अपि त्वेवं ब्रुवाणस्य सर्वस्यानित्यत्वं प्राप्नोतीति प्रसङ्गः क्रियते ? । न, विशेषहेतूपपत्तेः—न मया साध्यसाधर्म्यमात्रेण साधनमुच्यते इत्यतो न सर्वानित्यत्वप्रसङ्गः । सर्वानित्यत्वसाधने प्रमाणाभावाच्च— न सर्वानित्यत्वप्रसाधकं प्रमाणमस्तीति । अथ सर्वमनित्यं सत्त्वादिति साधयेत् ? तस्यापि नान्वयो न व्यतिरेकः ॥

(इति अनित्यसमप्रकरणम् ।)

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्ते(२)र्नित्यसमः ॥ ३५ ॥

अनित्यः शब्द इत्येतस्यां प्रतिज्ञायां प्रतिज्ञादिदोषोद्भावनद्वारिका जातिः-अनित्यः शब्द इत्यभिदधान एव भवान् शब्दस्य नित्यत्वं प्रतिजानीते । कथमिति ? यदनित्यत्वं तत्(३) किं शब्दे नित्यमस्ति उत कदाचिद्भवतीति ।

(१) व्यतिरेकिलक्षणं धर्म—पा० ६ पु० ।

(२) नित्यत्वं—६ पु० ।

(३) यत् तदनित्यत्वं—पा० ६ पु० ।

यदि नित्यं धर्मनित्यत्वाद्धर्मिणोऽपि नित्यत्वम् । अथानि-त्यमनित्यत्वस्याभावान्नित्यः शब्द इति ॥

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ३६ ॥

प्रतिषेध्ये नित्यमनित्यत्वमिति ब्रुवताऽभ्यनुज्ञातमनित्यत्वम् । अभ्यनुज्ञानाच्चासमर्थः प्रतिषेध इति । अथ नाभ्यनुज्ञायते ? नि-त्यमनित्यभावान्नित्यः शब्द इति हेतुर्नोपपद्यते हेत्वनुपपत्तेर-नर्थकः प्रतिषेधः । प्रश्नानुपपत्तिश्च पृथग्धर्मत्वेनानित्यत्वस्या-नभ्युपगमात् । अपि चानात्यन्तिकसत्तायोगोऽनित्यत्वमित्यु-क्ते न युक्तः प्रश्नः किमयमत्यन्तं भवति उत नात्यन्त-मिति । आत्यन्तिकानात्यन्तिकभावयोगश्चैकस्य न युक्तः । अनित्यता नित्येति ब्रुवता एकस्यात्यन्तिकसत्तायोगोऽना-त्यन्तिकयोगश्चाभ्यनुज्ञायते स चायं विरोधान्न युक्त इति । प्रतिषेध्यदोषोद्भावनायुक्त इति चेत् ?—अथ मन्यसे न मयैकस्य नित्यत्वमनित्यत्वं चाभ्युपगम्यते, अपि त्वनित्यः शब्द इति ब्रुवाणस्य भवतः स एव दोष इति ? न, विकल्पानुपपत्तेः—नायं पक्षदोषो न साधनदोषः, पक्षदोषस्तावदयं न भवति पक्ष-स्य तादवस्थ्यात् । न साधनस्य, प्रतिज्ञादिदोषाणामनुद्भाव-नात् । विरोधस्य चोक्तोत्तरत्वादिति ॥

(इति नित्यसमप्रकरणम् ।)

प्रयत्नकार्यानेकत्वात् कार्यसमः ॥ ३७ ॥

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते जातिः का-र्यसमा प्रयुज्यते—प्रयत्नकार्यमनेकधा दृष्टमिति किञ्चित् प्रयत्ना-नन्तरं व्यज्यते किञ्चित् प्रयत्नानन्तरमुत्पद्यते प्रयत्नानन्त-

रमुपलब्धेर्हेतुत्वाध्यारोपेणानैकान्तिकदेशनात् कार्यसमः । कार्यः शब्दः प्रयत्नानन्तरमुपलब्धेरिति हेतुमनैकान्तिकं चोदयति । प्रयत्नानन्तरमुपलभ्यमानं कार्यमकार्यं च दृष्टमिति । अथ प्रयत्नानन्तरं जन्म हेत्वर्थः तथाप्यसिद्धदेशनेति ॥

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः॥३८॥

यत् खलु प्रयत्नेन व्यज्यते तत्रानुपलब्धिकारणमुपपद्यते, न तु शब्दस्यानुपलब्धिकारणं किञ्चिदस्ति, तस्मान्न व्यज्यते इति । संशयसमातो न भिद्यत इति चेत् ? उभयसाधर्म्यात् संशयसमः अयं तु न तथा तस्माद्भिद्यत इति । अथ साधर्म्यसमातो न भिद्यत इति चेत् ? न, हेत्वध्यारोपणात् । साधर्म्यसमा न हेत्वध्यारोपेण प्रवर्तते इयं त्वन्यथाभिहिते हेतौ अन्यथाकारं प्रवर्तते ॥

(इति कार्यसमप्रकरणम् ।)

एवं जातयो व्यवस्थिताः । अथेदानीं षट्पक्षीमुपन्यस्यन्निदमाह—

प्रतिषेधे विप्रतिषेधे ऽपि(१) समानो दोषः ॥ ३९ ॥

प्रथमपक्षवादी जातिवादिनमुत्तरं ब्रवीति । यद्यनैकान्तिकत्वादहेतुः प्रतिषेधोऽप्यनैकान्तिकः कस्यचिदप्रतिषेधात् कस्यचित्प्रतिषेधादिति । विशेषहेत्वभावो वा अविशेषः । शेषं भाष्ये ॥

सर्वत्रैवम् ॥ ४० ॥

सर्वासु जातिष्वेषा प्रयुक्तिरिति सूत्रार्थः ।

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ॥ ४१ ॥

तृतीयः पक्षो विप्रतिषेधः । एतस्मिन् विप्रतिषेधे स-

---

(१) प्रतिषेधे ऽपि समानो दोषः- इति न्यायसूचीनिबन्धे ।

मानमनैकान्तिकत्वं दोष इति चतुर्थः पक्षः ॥

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ ४२ ॥

प्रतिषेधं द्वितीयपक्षं सदोषमभ्युपेत्य तृतीयपक्षे ऽपि प्रतिषेधतुल्यदोषतामासञ्जयन् विप्रतिषेधे ऽपि समानो दोष इति ब्रुवन् मतमनुजानाति(१) सेयं मतानुज्ञा भवतीति पञ्चमः पक्षः ॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ॥ ४३ ॥

स्वपक्षसमुत्थानं दोषमभ्युपेत्य परपक्षे ऽपि प्रसञ्जयन्(२) स्वपक्षदोषमनुजानातीति तुल्या मतानुज्ञा । शेषं भाष्ये । अत्र खलु स्थापनाहेतुवादिनः प्रथमतृतीयपञ्चमाः पक्षाः । प्रतिषेधहेतुवादिनो द्वितीयचतुर्थषष्ठाः पक्षाः । तेषां साध्वसाधुतायां मीमांस्यमानायां चतुर्थषष्ठयोरर्थाविशेषात् न पुनरुक्तदोषप्रसङ्गः—समानः तृतीयपञ्चमयोः पुनरुक्तदोषः । तत्र पञ्चमषष्ठयोः पुनरुक्तदोषः, तृतीयचतुर्थयोर्मतानुज्ञा दोषः । प्रथमद्वितीययोर्विशेषहेत्वभाव इति षट्पक्ष्यामुभयोरसिद्धिरयुक्त(त्व)वादित्वात् । यदाऽनुपलब्धिकारणाभावे सति प्रयत्नानन्तरमुपलब्धेरिति विशेषहेतुरुच्यते तदा न षट्पक्षी प्रवर्तते । एतास्तु जातयो न तत्त्वविवेकमुपकुर्वन्तीति भेदमात्रमासामुक्तमिति ।

(इति षट्पक्षीरूपकथाभासप्रकरणम् ।)

इति-श्रीउद्द्योतकरे न्यायवार्त्तिके पञ्चमस्याध्यायस्याद्यमाह्निकम् ॥

---

(१) तमनुजानाति-पा० ६ पु० । (२) प्रयुञ्जन्-पा० ६ पु० ।

पञ्चमे ऽध्याये

द्वितीयमाह्निकम् ।

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रति-
ज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थम-
पार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञा-
नमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं नि-
रनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रह-
स्थानानि ॥ १ ॥

विप्रतिपत्त्यप्रतिपत्त्योर्विकल्पान्निग्रहस्थानबहुत्वमिति सङ्क्षे-
पेणोक्तम् । तदिदानीं विभजनीयम् । निग्रहस्थानानि तु प-
राजयवस्तूनि अपराधाधिकरणानि । सामान्यतो द्वे निग्रह-
स्थाने । कर्तृकर्मकरणानां तस्य ।

तत्रैके वर्णयन्ति पक्षस्येति, एवं चाहुर्दूषणानि न्यूनता
बयवोत्तरदोषाक्षेपभावोद्भावनानि एभिर्ह्यसौ परपक्षो दूष्यत इति ।
एतत्तु न सम्यक्, कर्मणस्तादवस्थ्यात्—न हि दूषणाभिधानेन
कर्मणोऽन्यथात्वं भवति यथाभूत एवार्थो दूष्यमाणस्तथाभूत ए-
वादूष्यमाणोऽपि । न करणस्य विषयान्तरे ऽसामर्थ्यात्—
साधनमपि प्रतिज्ञादिकं न दूष्यते(१) विषयान्तरे ऽसाम-
र्थ्यात् । न हि किञ्चित्साधनं यद्विषयान्तरे समर्थं स्यात्

---

(१) न दूष्यमिति—पा० ६ पु० ।

सर्वं साधनं स्वविषये समर्थमिति । तस्मादसमर्थयोः कर्म-करणयोरुपादानात् कर्तुर्निग्रह इति । यत् कर्म क्रियार्थ-मुपादीयमानमभीष्टक्रियां न निर्वर्तयति तदिदमसमर्थं यथा सिकता घटादिकरण इति । यत् च करणं क्रियार्थमुपादीय-मानं क्रियां न निर्वर्तयति तदसमर्थं यथा तुर्यादि घटे । स्वविषये तूभयं समर्थम् । तदन्यविषयस्य च कर्मणोऽन्य-विषयस्य च करणस्यान्यथोपादानात्(१) कर्तुरज्ञानम् । अ-ज्ञानं पुनरप्रतिपत्तिर्विप्रतिपत्तिर्वेति कर्ता निगृह्यते, न कर्म-करणे पारतन्त्र्यात् । तस्मात् स्वतन्त्रस्य कर्तुर्निग्रह इति । विप्रतिपत्त्यप्रतिपत्त्योश्च पुरुषधर्मत्वात् पुरुषस्येति—विप्रति-पत्त्यप्रतिपत्ती च पुरुषस्य वचनद्वारेण गम्येते तस्मात् प्र-तिज्ञादिदोषा इति भक्तिः(२) । कानिचिन्निग्रहस्थानान्यज्ञा-नादीनि पुरुषधर्मा एव ।

द्वैविध्यानुपपत्तिरनेकाभिधानादिति चेत् ?—अनेकं नि-ग्रहस्थानं प्रतिज्ञाहान्यादिसूत्रे पठ्यते तस्माद्द्वे निग्रहस्थाने इत्य-युक्तम् ? । न, सामान्यभेदविस्तरस्य विवक्षातः प्रवृत्तेः—सामान्यमधिकृत्य निग्रहस्थाने द्वे, भेदविस्तरविवक्षायां तु द्वाविंशतिधा भेदः । उदाहरणमात्रत्वाच्च भेदस्याऽऽनन्त्यमिति ।

प्रायेण प्रतिज्ञाद्यवयवाश्रयाणीति भाष्यम् । वक्तृ-विषयकत्वात् प्रतिज्ञाद्यवयवाश्रयत्वमनुपपन्नमिति चेत् ?—अथ मन्यसे विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमित्य-भिधाने प्रतिज्ञाद्यवयवाश्रितत्वे कः प्रसङ्ग इति ? न,

(१) पपादनात्–पा० ६ पु० ।
(२) युक्तिः–पा० ६ पु० ।

क्रियावचनदोषद्वारेण कर्तृवक्तृणामज्ञत्वोपपत्तेः । क्रियाद्वारेण कर्ता दुष्यते वचनद्वारेण वक्तेति न प्रतिज्ञाद्याश्रयत्वमनुपपन्नम् । न चाधाराधेयभाव आश्रयाश्रयिभावो विवक्षितः । किं तु प्रतिज्ञादिमुखेनोद्भावनमिति ।

तत्त्ववादिनमतत्त्ववादिनं चाभिसंप्लवन्त इति भाष्यम् । तत्त्ववादिनो निग्रहस्थानानुपपत्तिः प्रतिपादकत्वात्—तत्त्वं ब्रवीतीति प्रतिपादयति प्रतिपादयंश्च निगृह्यत इति न युक्तम् ? । न परापादिष्टदूषणदोषानवबोधद्वारेण तदुपपत्तेः । तत्त्ववादी प्रथमपक्षे द्वितीयपक्षवादिना (च) यो दूषणाभास उक्तस्तस्य तत्त्वानवबोधान्निगृह्यते तत्त्वमभिदधानोऽपि, तत्र वस्तु निर्णीतं निर्णीते च वस्तुनि दूषणाभासस्याप्रतिपत्त्या निगृह्यत इति । तत्रोदाहरणभेदप्रदर्शनार्थं प्रतिज्ञाहान्यादिसूत्रम् ॥

लक्षणं च—

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥२॥

प्रतिदृष्टान्तस्य यो धर्मस्तं यदा स्वपक्षे दृष्टान्ते ऽभ्यनुजानाति तदा निगृहीतो वेदितव्यः । यथाऽनित्यः शब्द ऐन्द्रियकत्वात् घटवदित्येकः । सामान्यमैन्द्रियकं दृष्टं नित्यं, कस्मान्न तथा शब्द इति द्वितीयः । यदि सामान्यमैन्द्रियकं नित्यमिति घटोऽप्येवमस्त्विति तृतीयः । अनेन किल प्रतिदृष्टान्तधर्मं स्वदृष्टान्ते ऽभ्यनुजानाति अभ्यनुज्ञानाच्च दृष्टान्तं जहन्निगमनान्तमेव पक्षं जहातीति प्रतिज्ञाहानिरित्युच्यते ।

एतत्तु न बुध्यामहे कथमत्र प्रतिज्ञा हीयते इति । हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते । नि-

त्यताप्रतिपत्तेश्चासिद्धता(१) दृष्टान्तदोषो भवति । सोऽयं दृष्टान्तदोषेण साधनदोषेण वा निग्रहो न प्रतिज्ञाहानिः । दृष्टान्तं च जहत् प्रतिज्ञामपि जहातीत्युपचारेण निग्रहस्थानम् । न च प्रधानासम्भवे उपचारो लभ्यते इति प्रतिज्ञाहानेर्मुख्यो विषयो वक्तव्यः ।

कथं तर्हीदं सूत्रं प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति ? । दृष्टश्चासावन्ते व्यवस्थित इति दृष्टान्तः स्वश्चासौ दृष्टान्तश्चेति स्वदृष्टान्तशब्देन पक्ष एवाभिधीयते । प्रतिदृष्टान्तशब्देन च प्रतिपक्षः–प्रतिपक्षश्चासौ दृष्टान्तश्चेति । एतदुक्तं भवति । परपक्षस्य यो धर्मस्तं स्वपक्ष एवानुजानातीति यथाऽनित्यः शब्द ऐन्द्रियकत्वात् इति द्वितीयपक्षवादिना सामान्येन प्रत्यवस्थिते इदमाह–यदि सामान्यमैन्द्रियकं नित्यं दृष्टमिति शब्दोऽप्येवं भवत्विति एषा प्रतिज्ञाहानिः । प्रागनेन प्रतिज्ञातमनित्यः शब्द इति सामान्येन अनैकान्तिकत्वेन प्रत्यवस्थित इदमाह नित्य इति(२) प्राक् प्रमाणावधारितार्थपरित्यागाद्विप्रतिपत्तितो निग्रहस्थानमिति । प्रसङ्गविधानादिति चेत् ?–अथ मन्यसे नासौ पश्चादपि शब्दस्य नित्यतां प्रतिपद्यते, किं तु प्रसङ्गं करोति–यदि सामान्यमैन्द्रियकं नित्यं दृष्टं शब्दोऽप्येवं भवत्विति प्रसङ्गं विधत्ते ? । तच्च(३) नात एव तत्प्राप्तेः । यत एवासौ हेतुदोषोद्धारे कर्तव्ये प्रसङ्गपरत्यत एव निगृह्यत इति ।

हेतुदोषेण चरितार्थत्वान्न प्रतिज्ञाहानि(४)र्निग्रहस्थान-

(१) असिद्धान्तता इति २ पु० पा० ।
(२) नित्यः शब्द इति—पा० ६ पु० ।
(३) यच्च–पा० ६ पु० ।
(४) प्रतिज्ञाहानिरिति नास्ति ६ पु० ।

मित्यन्ये— अन्ये तु वर्णयन्ति नैवेदं निग्रहस्थानं युक्तं हेतुदोषेण चरितार्थत्वात् यस्मादैन्द्रियकत्वादित्यस्य हेतोरनैकान्तिकत्वं दोषस्तेनायं निगृहीत इति । नानैकान्तिकत्वदोषपरिहारेण विप्रतिपत्तेस्तदुपपत्तेः—तस्यैवानैकान्तिकत्वस्य परिहारं कुर्वाणोऽयं निगृह्यत इत्यतोऽनैकान्तिकत्वं न निग्रहस्थानमिति ॥

प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ३ ॥

उदाहरणं पूर्ववत् । सर्वगतासर्वगतविकल्पेन प्रतिज्ञान्तरं करोति असर्वगतोऽनित्यः शब्द इति—तत्रानित्यः शब्द इति पूर्वा प्रतिज्ञा सामान्येनेन्द्रियकेण प्रतिहता, असर्वगतोऽनित्यः शब्द इति प्रतिज्ञान्तरम् । तत् कथं निग्रहस्थानम् ? । साधनसामर्थ्यापरिज्ञानात्—अपरिज्ञाय साधनसामर्थ्यं कुर्वतोऽसर्वगतोऽनित्यः शब्द इति प्रतिज्ञा । न च प्रतिज्ञा प्रतिज्ञान्तरं साधयति साधनसामर्थ्यापरिज्ञानात् । तदेतत्प्रतिज्ञान्तरम् । तदिदमप्रतिपत्तितो विप्रतिपत्तितो वा निग्रहस्थानमिति ॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ ४ ॥

यत्र प्रतिज्ञा हेतुना विरुध्यते हेतुश्च प्रतिज्ञया स प्रतिज्ञाविरोधो नाम निग्रहस्थानम्— यथा गुणव्यतिरिक्तं द्रव्यं भेदेनाग्रहणादिति । एतेनैव प्रतिज्ञाविरोधोप्युक्तः—यत्र प्रतिज्ञा स्ववचनेन विरुध्यते यथा श्रमणा गर्भिणी । हेतुविरोधोऽपि—यत्र प्रतिज्ञा हेतुना विरुध्यते यथा सर्वं पृथक् समूहे भावशब्दप्रयोगादिति । एतेन प्रतिज्ञया दृष्टान्तविरोधोऽपि व-

क्तव्यः—हेतोश्च दृष्टान्तादिभिर्विरोधः प्रमाणविरोधश्च प्रतिज्ञाहेत्वोर्वक्तव्यः । परपक्षसिद्धेन गोत्वादिनाऽनैकान्तिकदेशनाद्विरोधः—यः परपक्षसिद्धेन गोत्वादिना व्यभिचारयति तद्विरुद्धमुत्तरं वेदितव्यम् । स्वपक्षानपेक्षं च तथा—यश्च स्वपक्षानपेक्षं हेतुं प्रयुङ्क्ते अनित्यः शब्द ऐन्द्रियकत्वादिति स प्रसिद्धस्य गोत्वादेर्नित्यत्वविरोधाद्विरुद्धः । उभयपक्षसम्प्रतिपन्नस्त्वनैकान्तिकः—यदुभयपक्षसम्प्रतिपन्नं वस्तु तथात्वेन तेनानैकान्तिकदेशनेति । दृष्टान्ताभासाश्च कस्मान्निग्रहस्थानेषु नोक्ताः ? हेत्वाभासपूर्वकत्वाद् दृष्टान्ताभासानां तदभिधानेनैवोक्ता वेदितव्या इति ॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ ५ ॥

यः प्रतिज्ञातमर्थं प्रतिषेधे कृते परित्यजति स प्रतिज्ञासंन्यासो वेदितव्यः । उदाहरणं पूर्ववत् । सामान्येनानैकान्तिकत्वे हेतोः कृते ब्रूयात् कश्चैवमाहानित्यः शब्द इति एतत्साधनसामर्थ्यापरिच्छेदात्(१) विप्रतिपत्तितो निग्रहस्थानमिति ॥

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ६ ॥

उदाहरणं भाष्ये । साधनान्तरोपादाने पूर्वस्यासामर्थ्यख्यापनान्निग्रहस्थानमिति, सामर्थ्ये वा हेत्वन्तरं व्यर्थमिति ॥

(इति प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकाविशेषलक्षणप्रकरणम् ।)

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥ ७ ॥

उदाहरणं भाष्ये । अभ्युपगतार्थासङ्गतत्वान्निग्रहस्थानं प-

---

(१) परिज्ञानात्—इति क्वचित् ।

दभ्युपगतं तत्सम्बद्ध(१)मन्यदसम्बद्धमुच्यत इति ॥

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ८ ॥

उदाहरणं भाष्ये । साधनमनुपादानादज्ञानमेवं ब्रुवन्न साधनं साध्यं जानीत इति न साध्यं न साधनं चोपादत्त इति निगृह्यते ॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ९ ॥

उदाहरणं भाष्ये । असामर्थ्यख्यापनान्निग्रहस्थानम् । असामर्थ्यं(२) चाज्ञानमिति ॥

पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ १० ॥

यथा दशदाडिमादि(३)वाक्यम । निरर्थकापार्थकयोरभेद इति चेत् ?—अथ मन्यसे निरर्थकादपार्थकं न भिद्यते तत्राप्यर्थो न गम्यत इहापीति ? । भिद्यत इति ब्रूमः । कथं ? तत्र हि वर्णमात्रमिह तु पदान्यसम्बद्धानि । तत् कथं निग्रहस्थानम ? । वाक्यादते न विशेषावगतिरिति साधनसामर्थ्यापरिज्ञानान्निग्रहस्थानम् ॥

(इति प्रकृतोपयोगिवाक्यार्थप्रतिपत्तिफलशून्यनिग्रहस्थानचतुष्कप्रकरणम् ।)

अवयवविपर्यासवचनमप्राप्तकालम् ॥ ११ ॥

अवयवानां विपर्यासेनाभिधाने निग्रहस्थानम् ।

नैवमपिसिद्धेरित्येके—एके तु ब्रुवते नैतन्निग्रहस्थानमेवमपि सिद्धेरिति । समयानभ्युपगमाच्च—न च वयमेवं समयं प्रतीच्छाम इति । प्रयोगाच्च—प्रयुक्तश्चावयवव्यत्ययः सर्वशास्त्रेष्विति कस्यायं समय इति । यत्तावदेवमपि सिद्धेरिति ? प्रयोगापेक्षशब्दत्वादेतस्या-

(१) तत् स्थितमिति क्वचित् । (२) असमर्थं वा—पा० ६ पु० ।
(३) दाडिमा इति—पा० ६ पु० ।

तु–यथा गौरित्यस्य पदस्यार्थे गवीति(१) प्रयुज्यमानं पदं ककुदादिमन्तमर्थं प्रतिपादयतीति । न च शब्दान्वाख्यानं व्यर्थम् । अनेन शब्देन गोशब्दमेवासौ प्रतिपद्यते गोशब्दाव ककुदादिमन्तमर्थम् । तथा प्रतिज्ञाद्यवविपर्यासेना(२)नुपूर्वी प्रतिपद्यते आनुपूर्व्या चार्थ(३)मिति । एतव कथम् ? । पूर्वं तावव कर्मोपादीयते ततः करणम् मृत्पिण्डाद्युदाहरणम् अनेकधा लोक इति । यत्पुनरेतव समयानभ्युपगमाव इति ? नायं समयोऽपि त्वर्थस्यानुपूर्वी, सोयमर्थस्यानुपूर्वीमन्वाचक्षाणोनाभ्याख्येय इति । यत्पुनरेतत्प्रयोगादिति ? । न, निग्रहस्थानाविषयापरिज्ञानाव–शास्त्रे वाक्यान्यर्थसंग्रहार्थमुपादीयन्ते संगृहीतं त्वर्थं वाक्येन प्रतिपादयिता प्रयोगकाले प्रतिज्ञादिकयाऽऽनुपूर्व्या प्रतिपादयतीति ॥

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ १२ ॥

यस्मिन् वाक्ये प्रतिज्ञादीनामन्यतमोऽवयवो न भवति तद्वाक्यं न्यूनं वेदितव्यम् । तव कथं निग्रहस्थानम् ? । न साधनाभावे साध्यसिद्धिरिति ।

एके तु प्रतिज्ञान्यूनं नास्तीत्याचक्षते । एतव तु न युक्तम् । प्रतिज्ञामात्रेण प्रयोगो विकल्पतः पर्यनुयोज्यः । यः प्रतिज्ञान्यूनवाक्यं ब्रूते किमयं निगृह्यते अथ नेति ?, यदि निगृह्यते ?, कतमव ? निग्रहस्थानमिति ? न हि हेत्वाभासादयो ऽत्र सन्तीति । न च हेत्वादिदोषाः सन्तीति निग्रहं चाभ्युपैति, तस्मात् प्रतिज्ञान्यूनमेवेति । अथ न निग्रहः ? न्यूनं वाक्यमर्थं साधयतीति साधनाभावे सिद्धिरभ्युपगता भवति । यत्तु ब्रवीषि सिद्धान्तपरिग्रह एव

(१) गौरित्यस्य शब्दस्यार्थे गावीति ।

(२) विपर्ययेणा—पा० ६ पु० ।

(३) आनुपूर्व्याश्चार्थम्—पा० ६ पु० ।

प्रतिज्ञा ? एतदपि न बुद्ध्यामहे कर्मण उपादानं प्रतिज्ञा । सामान्यविशेषवतोऽवधारितस्य वस्तुनः परिग्रहः सिद्धान्त इति ॥

हेतूदाहरणाधिकमधिकम् ॥ १३ ॥

यस्मिन् वाक्ये हेतू द्वौ दृष्टान्तौ द्वौ तद्वाक्यमधिकं निग्रहस्थानमाधिक्यात् ।

तच्च न, दार्ढ्यादित्येके एके—तु ब्रुवते नेदं निग्रहस्थानं दार्ढ्याद्—दार्ढ्यं हि ज्ञाप्यस्य भूयोभिर्ज्ञापकैर्दृष्टं यथा धूमालोकाभ्यामग्नेरिति । न, दार्ढ्यार्थानभिधानात्—भूयोभिर्ज्ञापकैर्दार्ढ्यं भवतीति न दार्ढ्यार्थोऽभिधीयते किं ब्रवीषि दार्ढ्यादिति । सुतरां प्रतिपत्तिर्दार्ढ्यमिति ? तदपि तादृगेव, किमुक्तं भवति सुतरामिति । अथ ब्रवीषि द्वे अपि ज्ञापके ? । सत्यं द्वे अपि ज्ञापके । एकेनैवाऽभिधानात् व्यर्थमभिधानं द्वितीयस्य प्रकाशिते दीपान्तरोपादानवदिति । अनवस्था वा प्रकाशितेऽपि साधनान्तरोपादानादिति ॥

(इति स्वसिद्धान्तानुरूपप्रयोगाभासनिग्रहस्थानप्रकरणम् ।)

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥१४॥

शब्दपुनरुक्तं अनित्यः शब्दो ऽनित्यः शब्द इति । अर्थपुनरुक्तं अनित्यः शब्दो निरोधधर्मको ध्वान इति ॥

अनुवादे त्वपुनरुक्तमर्थविशेषोपपत्तेः(१) ॥ १५ ॥

नाबाधनादित्येके-एके तु ब्रुवते नेदं निग्रहस्थानमबाधनात् । न हि परीक्षाविधेः पुनर्ब्रुवता किञ्चिद्बाध्यते परप्रतिपादनार्थं च वाक्यप्रयोगः पुनरभिधानेन सुतरामर्थं प्रतिपद्यत इति न निग्रहस्थानं प्रतिपादकत्वात् । सत्यं प्रतिपादयति प्रतिपादितार्थप्रति-

(१) न्यायसूचीनिबन्धे सूत्रमिदं न दृश्यते । विश्वनाथपञ्चाननेनापि नावधृतम् ।

पादकत्वात् वैयर्थ्यं स्यात् वैयर्थ्यान्निग्रहस्थानं साधनविषयापरिज्ञानात् न चायं शिष्यो न गुरुस्तस्मान्नायं पुनः प्रतिपाद्यत इति ॥

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् ॥ १६ ॥

पूर्ववन्निग्रहस्थानमिति ॥

(इति पुनरुक्तनिग्रहस्थानप्रकरणम् ।)

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥ १७ ॥

शेषं भाष्ये ।

उत्तरेणावस्थानात् नेदं निग्रहस्थानमिति केचित्—उत्तरेणावस्थानात् उत्तरेण गुणदोषवता मूढत्वामूढत्वं गम्यत(१) इति किं पुनरुच्चारिते नास्ति । अस्ति हि उत्तरे कश्चित्समर्थो दृश्यते न प्रत्युच्चारणं, नासौ तावता निग्रहस्थानमर्हति । यश्चारभ्य स्वपक्षं न निर्वाहयेत् तस्य स्यात् खलीकारमात्रमिति । नोत्तरविषयापरिज्ञानात्—यद्ययं न प्रत्युच्चारयति ? निर्विषयमुत्तरं प्रसज्यते । अथोत्तरं ब्रवीति ? कथं नोच्चारयति तदिदं व्याहतमुच्यते नोच्चारयत्युत्तरं च ब्रवीतीति । अप्रतिज्ञानाच्च-नेदं प्रतिज्ञायते पूर्वमुच्चारयितव्यं पश्चादुत्तरमभिधेयमपि तु यथाकथञ्चिदुत्तरं वक्तव्यम् । उत्तरं चाश्रयाभावे न युक्त(२)मिति युक्तमप्रत्युच्चारणं निग्रहस्थानमिति ॥

अविज्ञातं चाज्ञानम् ॥ १८ ॥

स्फुटं भाष्ये । अप्रतिपत्तितो निग्रहस्थानम् ॥

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ १९ ॥

श्लोकपाठादिभिरवज्ञां दर्शयन्नोत्तरं प्रतिपद्यत इति, तदप्रतिभा नाम निग्रहस्थानं मू(ढ)ढत्वादिति ॥

---

(१) अमूढत्वं गम्यते—पा० ६ पु० ।

(२) उत्तरं चाश्रयाभावेन युक्तम्—पा० ६ पु० ।

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ॥ २० ॥

यत्र कर्त्तव्यं कार्यं व्यासज्य कथां विच्छिनत्ति स विक्षेपो विज्ञेयः यथा रसालया मया भुक्तं प्रतिश्यायकृणो मे कण्ठं क्षिणोतीत्येवमादि । तत् कथं निग्रहस्थानम् ? अज्ञाननिगूहनार्थं तु प्रत्युक्तमज्ञानमेव परिहारेणाविष्करोति ॥

(इति उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम् ।)

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ २१ ॥

यः परेण चोदितं दोषमनुद्धृत्य भवतोऽप्ययं दोष इति ब्रवीति सा मतानुज्ञा परमतं स्वमतेऽनु(१)जानाति । उदाहरणं भवांश्चौरः पुरुषत्वादिति स तं प्रति ब्रूयात् भवानपीति सोऽभ्युपगम्य दोषं परपक्षेऽप्यनुजानातीति निगृहीतो वेदितव्यः अनभ्युपगच्छता(२) न पुरुषत्वं चौर्यं हेतुरिति वक्तव्यम् । किन्तु परस्वेनानातिसृष्टेन सम्बन्धः तद् उत्तरापरिज्ञानान्निगृह्यत इति ।

प्रसङ्गविधानान्न निग्रहस्थानमित्यन्ये—अपरे तु ब्रुवते नैतन्निग्रहस्थानं प्रसङ्गविधानात्—नैवायं पश्चादपि तं दोषं प्रतिपद्यते अपि तु प्रसङ्गं करोति यदि पुरुषत्वाच्चौरो भवति भवानपि पुरुषस्तस्माच्चौर इति । एतत्तु नात एव,—यत एवायमुत्तरं वक्तव्ये प्रसङ्गं करोति, तत एवोत्तरापरिज्ञानान्निगृह्यत इति ॥

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥२२॥

यो निग्रहस्थानप्राप्तं न निगृह्णाति स निगृहीतो भवति निग्रहस्थानप्राप्तस्यापरिज्ञानात् । नान्यवचनादित्यन्ये— अन्ये ब्रुवते नेदं निग्रहस्थानम् अन्योत्तरस्याभिधानात्—यस्मादसौ निग्रहस्थानप्राप्तं न निगृह्णाति ब्रुवन्नन्यदुत्तरमभिधत्त इति । तच्च

---

(१) स्वमतत्वेनानु—पा० ६ पु० । (२) अनभ्युपगतो—पा०६ पु० ।

नात एव—यत एवासौ निग्रहस्थाने वक्तव्ये अन्यदभिधत्ते ऽत एव निगृह्यते जानानो ह्यसौ किमर्थमन्यत् ब्रवीति ॥

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ २३ ॥

अनिग्रहस्थान एवाभिधत्ते निगृहीतोऽसीति एतन्निग्रहस्थानापरिज्ञानान्निग्रहस्थानमिति ॥

(इति दोषनिरूप्यमतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम् ।)

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ॥ २४ ॥

अस्योदाहरणं स्फुटं भाष्ये । प्रतिज्ञातार्थव्यतिरेकेणाभ्युपगतार्थपरित्यागान्निगृह्यत इति ॥

हेत्वाभासाश्च यथोक्ताः ॥ २५ ॥

यथैव विभक्ता लक्षणेन तथैव तेषां निग्रहस्थानभाव इति । त इमे प्रमाणादय उद्दिष्टाः प्रथमसूत्रे, लक्षिताः प्रथमेऽध्याये, परीक्षिताः शेषेष्विति त्रिविधा तत्त्वस्य परिसमाप्तिरुक्ता वेदितव्येति ॥

(इति कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम् ।)

जातीनां सप्रपञ्चानां निग्रहस्थानलक्षणम् ।
शास्त्रस्य चोपसंहारः पञ्चमे परिकीर्तितः ॥
यदक्षपादप्रतिभो भाष्यं वात्स्यायनो जगौ(१) ।
अकारि महतस्तस्य भारद्वाजेन वार्त्तिकम् ॥

इति श्रीपरमर्षि-भारद्वाज-पाशुपताचार्यश्रीमदुद्द्योतकरकृतौ न्यायवार्त्तिके पञ्चमोऽध्यायः समाप्तः ॥

॥ समाप्तोऽयं ग्रन्थः ॥

---

(१) योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ।
अयं श्लोको न्यायभाष्यान्ते दृश्यते ॥